इस संकलन में नैषधीयचरितम्, शिशुपालवधन्, रघुवंशम्, कुमारसंभवम्, मेघदूतम्, किरातार्जुनीयम्, नीतिसंग्रहस्य मित्रलाभ, मुहूर्तचिन्तामणिः, उत्तररामचरितम्, मृच्छकटिकम् आदि ग्रन्थों के श्लोक अकारादि क्रम में हैं। यह जगदानन्द झा, लखनऊ द्वारा श्लोकान्त्याक्षरी की तैयारी के लिए बनाया गया है। अधिक सुविधा के लिए गूगल पर श्लोकसंधानम् खोजकर ऑनलाइन श्लोक का अभ्यास किया जा सकता है। कतिपय श्लोकों का ऑडियो भी यहाँ उपलब्ध है। श्लोक चक्र पर कम्प्यूटर या मोबाइल के माध्यम से श्लोकान्त्याक्षरी खेला जा सकता है। स्वर वर्ण से आरंभ होने वाले श्लोक हकार के बाद में दिए गए हैं।

कंचिद्दूरादायतेन द्रढीयःप्रासप्रोतस्रोतसान्तःक्षतेन । हस्ताग्रेण प्राप्तमप्यग्रतोऽभूदानैश्वर्यं वारणस्य ग्रहीतुं ॥ शिशुपालवधम् १८.४९ ॥

कंदर्प एवेदमविन्दत त्वां पुण्येन मन्ये पुनरन्यजन्म । चण्डीशचण्डाक्षिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ॥ नैषधीयचरितम् ८.३३ ॥

कः कुलेऽजनि जगन्मुकुटे वः प्रार्थकेप्सितमपूरि न येन । इन्दुरादिरजनिष्ट कलङ्की कष्टमत्र स भवानपि मा भूत् ॥ नैषधीयचरितम् ५.११९ ॥

ककुभः कृतनादमास्तृणन्तस्तिरयन्तः पटलानि भानुभासं । उदनंसिषुरभ्रमभ्रसङ्घाः सपदि श्यामलिमानमानयन्तः ॥ शिशुपालवधम् २०.६७ ॥

ककुभां मुखानि सहसोज्ज्वलयन्दधदाकुलत्वमधिकं रतये । अदिदीपदिन्दुरपरो दहनः कुसुमेषुमत्रिनयनप्रभवः ॥ शिशुपालवधम् ९.४२ ॥

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे । वृद्धव्याघ्रेण सम्प्राप्तः पथिकः सम्मृतः ॥ नीतिसंग्रहस्य मित्र-१.५ ॥

कच्चित्सोम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे प्रत्याख्यातुं न खलु भवतो धीरतां तर्कयामि निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥
मेघदूतम्, उत्तरमेघः ४७ ॥

कटकानि भजन्ति चारुभिर्नवमुक्ताफलभूषणैर्भुजैः । नियतं दधते च चित्रकैरवियोगं पृथुगण्डशैलतः ॥ शिशुपालवधम् १६.७७ ॥

कटाक्षणाज्जन्यजनैर्निजप्रजाः क्वचित्परीहारसमचीकर्त्तराम् । धराप्सरोभिर्वरयात्रयागतानभोजयद्भोजकुलाङ्कुरः क्वचित् ॥ नैषधीयचरितम् १६.४८ ॥

कटुनापि चैद्यवचनेन विकृतिमगमन्न माधवः । सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते ॥ शिशुपालवधम् १५.४० ॥

कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथाश्रितां पिशुनवचनैर्दुखं नेतुं न युक्तमिमं जनम् । किमिदमथवा सत्यं मुग्धे त्वया हि विनिश्चितं यदभिरुचितं तन्मे कृत्वा प्रिये सुखमास्यताम् ॥
अमरुशतकम्- ४७॥

कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताः सूचयति त्रिरेखः । इत्यन्तरस्तूयत यत्र कापि नलेन बाला कलमालपन्ती ॥ नैषधीयचरितम् ६.५९ ॥

कण्ठसक्तमृदुबाहुबन्धनं न्यस्तपादतलमग्रपादयोः । प्रार्थयन्त शयनोत्थितं प्रियास्तं निशात्ययविसर्गचुम्बनं ॥ रघुवंशम् १९.२९ ॥

कण्ठावसक्तमृदुबाहुलतातुरङ्गाद्राजावरोधनवधूरवतारयन्तः । आलिङ्गनान्यधिकृताः स्फुटमापुरेव गण्डस्थलीः शुचितया न चुचुम्बुरासां ॥ शिशुपालवधम् ५.१८ ॥

कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम् । तदेव वाग्भूय मुखे मृगाक्ष्याः श्रोतुः श्रुतौ याति सुधारसवम् ॥ नैषधीयचरितम् ७.५ ॥

कण्डूयतः कटुभुवं करिणो मदेन स्कन्धं सुगन्धिमनुलीनवता नगस्य । स्थूलेन्द्रनीलशकलावलिकोमलेन कणठेगुणत्वमलीनां वलयेन भेजे ॥ शिशुपालवधम् ५.४६ ॥

कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य । अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥ रघुवंशम् २.३७ ॥

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन संपातिभि- र्धर्मस्रंसितबन्धनैश्च कुसुमैरर्चन्ति गोदावरीम् । छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः कूजत्क्लान्तकपोतकुक्कुटकुलाः

कूले कुलायद्रुमाः ॥ (उत्तररामचरितम् २.९)

कतिपयदिवसैर्वयस्यया वः स्वयमभिलष्य वरिष्यते वरीयान् । ऋशिमशमनयानया तदाप्तुं रुचिरुचिताथ भविद्विधाविधाभिः ॥ नैषधीयचरितम् ४.१२२ ॥

कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः । सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः ॥ किरातार्जुनीयम् १०.३० ॥

कथं इव तव संमतिर्भवित्री समं ऋतुभिर्मुनिनावधीरितस्य । इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः ॥ किरातार्जुनीयम् १०.३६ ॥

कथं कथंचिन्निषधेश्वरस्य कृत्वास्यपद्मं दरवीक्षितश्रि । वाग्देवताया वदनेन्दुबिम्बं त्रपावती साकृत सामिदृष्टम् ॥ नैषधीयचरितम् १४.३ ॥

कथं न मन्ये किल तं मनोजवं मनोजवं म्लेच्छ-रणे समागतम् । अघो न चोच्चैर्न पुरो न पृष्ठतः ददर्श कोऽपि नरो न रोषिणम् ॥ प्रतापविजयः-१३८ ॥

कथं नु तेषां कृपयापि वागसावसावि मानुष्यकलाञ्छने जने । स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुदमुद्गिरन्ति वा ॥ नैषधीयचरितम् ९.२६ ॥

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् । इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम् ॥ रघुवंशम् २.५४ ॥

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः । वियोक्ष्यते वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा ॥ नैषधीयचरितम् १.१३८ ॥

कथमपि कृतप्रत्याख्याने प्रिये स्खलितोत्तरे विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतं । असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं विगलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ अमरुशतकम्-७३॥

| |
|---|
| कथमपि सखि क्रीडाकोपाद् व्रजेति मयोदिते कठिनहृदयस्त्यक्त्वा शय्यां बलाद् गत एव सः । इति सरभसं ध्वस्तप्रेम्णि व्यपेतघृणे जने पुनरपि हतव्रीडं चेतः प्रयाति करोमि किम् ॥ अमरुशतकम्-१२॥ |
| कथमेदलम्प्रभा - रतं, भुवनेऽभूदधूना प्रभा - हतम् । कवि-कल्पलते! विलिख्यता मिति सर्व सुविविच्य निर्भयम् ॥ प्रतापविजयः-१९ ॥ |
| कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः । तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ॥ किरातार्जुनीयम् १.२४ ॥ |
| कथाप्रसङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते । द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया ॥ नैषधीयचरितम् १.३५ ॥ |
| कथावशेषं तव सा कृते गतेत्युपैष्यति श्रोत्रपथं कथम् न ते । दयाणुना मां समनुग्रहीष्यसे तदापि तावद्यदि नाथ नाधुना ॥ नैषधीयचरितम् ९.९९ ॥ |
| कथासु शिष्यै वरमद्य न ध्रियै ममावगन्तासि न भावमन्यथा । त्वदर्थमुक्तासुतया सुनाथ मां प्रतीहि जीवाभ्यधिकं त्वदेकिकाम् ॥ नैषधीयचरितम् ९.१४९ ॥ |
| कथितं पुनरुक्ता वाक्श्यामाब्जश्यामलोचना । विकृतं दूरविकृतैरैयरुः कुञ्जराः पुरम् ॥ चन्द्रालोकः२.१९ ॥ |
| कथ्यते न कतमः स इति त्वं मां विवक्षुरसि किं चलदोष्ठः । अर्धवर्त्मनि रुणत्सि न पृच्छां निर्गमेण न परिश्रमयैनाम् ॥ नैषधीयचरितम् ५.२८ ॥ |
| कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम् । अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव ॥ नीतिशतकम् १०५ ॥ |
| कदलीप्रकाण्डरुचिरोरुतरौ जघनस्थलीपरिसरे महति । रशनाकलापकगुणेन वधूर्मकरध्वजद्विरदमाकलयत् ॥ शिशुपालवधम् ९.४५ ॥ |
| कदा वाराणस्याममरतटिनीरोधसि वसन् वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् । अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ वैराग्यशतकम् ८७ ॥ |
| कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी । अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ॥ कुमारसंभवम् ५.६ ॥ |
| कदास्रभे त्वाष्टवायू विश्वेज्यौ भगवासवौ । वैश्वश्रुती पाशिपौष्णे अजपादग्निपित्र्यभे ॥ मुहूर्तचिन्त.१४ ॥ |
| कनकभङ्गपिशङ्गदलैर्दधे सरजसारुणकेशरचारुभिः । प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता ॥ शिशुपालवधम् ६.४७ ॥ |
| कनकाङ्गदद्युतिभिरस्य गमितमरुचत्पिशङ्गतां । क्रोधमयशिखिशिखापटलैः परितः परीतमिव बाहुमण्डलं ॥ शिशुपालवधम् १५.७ ॥ |
| कन्यर्क्षाद्वरभं यावत् कन्याभं वरभादपि । गणयेन्नवहृच्छेषे त्रीष्वद्रिभमसत्स्मृतम् ॥ मुहूर्त.विवाहप्रकरणम् २४॥ |
| कन्यान्तः पुरबाधनाय यदधीकारान्न दोषा नृपं द्वौ मन्त्रिप्रवरश्च तुल्यमगदंकारश्च तावूचतुः । देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ॥ नैषधीयचरितम् ४.११७ ॥ |
| कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं संबन्धे विपरीतमेव तदभूदाराधनं ते मयि । त्वं कालेन तथाविधोऽप्यपहृतः संबन्धबीजं च तद् घोरेऽस्मिन्मम जीवलोकनरके पापस्य धिग् जीवितम् ॥ (उत्तररामचरितम् ४.१७) |
| कपाटविस्तीर्णमनोरमोरःस्थलश्रीललनस्य तस्य । आनन्दिताशोषजना बभूव सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः ॥ शिशुपालवधम् ३.१२ ॥ |
| कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः । मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः॥ कुमारसंभवम् ३.४९॥ |
| कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् । यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥ कुमारसंभवम् १.९ ॥ |
| कपोलपत्त्रान्मकरात्सकेतुभ्रूभ्यां जिगीषुर्धनुषा जगन्ति । इहावलम्ब्यास्ति रतिं मनोभू रज्यद्वयस्यो मधुनाधरेण ॥ नैषधीयचरितम् ७.६ ॥ |
| कपोलपालीजनिजानुबिम्बयोः समागमात्कुण्डलमण्डलद्वयी । नलस्य तत्कालमवाप चित्तभूरथ स्फुरच्चक्रचतुष्कचारुताम् ॥ नैषधीयचरितम् १५.७१ ॥ |
| कपोलसंश्लेषि विलोचनत्विषा विभूषयन्तीमवतंसकोत्पलम् । सुतेन पाण्डोः कलमस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता ॥ किरातार्जुनीयम् ४.९ ॥ |
| कपोले पत्राली करतलनिरोधेन मृदिता निपीतो निःश्वासैरयममृतहृद्योऽधररसः । मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥ अमरुशतकम्-८७॥ |
| कमलकुशलाधाने भानोरहो पुरुषाव्रतं यदुपकुरुते नेत्राणि श्रीगृहत्वविवक्षुभिः । कविभिरुपमानादप्यम्भोजतां गमितान्यसावपि यदतथाभावान्मुञ्चत्युलूकविलोचने ॥ नैषधीयचरितम् १९.४ ॥ |
| कमलैः कमलावासैः किं किं नासादि सुन्दरम् । अप्यम्बुधेः परं पारं प्रयान्ति व्यवसायिनः ॥ चन्द्रालोकः ५.६७ ॥ |
| कम्पेन मूर्ध्नः शतपत्रयोनिं, वाचा हरिं, वृत्रहणं स्मितेन । आलोकमात्रेण सुरानशेषान्संभावयामास यथाप्रधानम्॥ कुमारसंभवम् ७.४६॥ |
| कयाचिदालोक्य नलं ललज्जे कयापि तद्भासि हृदा ममज्जे । तं कापि मेने स्मरमेव कन्या भेजे मनोभूवशभूयमन्या ॥ नैषधीयचरितम् ८.६ ॥ |
| कयापि वीक्षाविमनस्कलोचने समाज एवोपपतेः समीयुषः । घनं सविघ्नं परिरम्भसाहसैस्तदा तदालोकनमन्वभूयत ॥ नैषधीयचरितम् १५.८४ ॥ |
| कयासि कामिन् ! सुरतापराधात्पादानतः कोपनयावधूतः । यस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ॥ कुमारसंभवम् ३.८॥ |
| करः स्रजा सज्जतरस्तदीयः प्रियोन्मुखः सन्विरराम भूयः । प्रियाननस्यार्धपथं ययौ च प्रत्याययौ चातिचलः कटाक्षः ॥ नैषधीयचरितम् १४.२८ ॥ |

| |
|---|
| करकमलवितीर्णैरम्बुनीवारशष्पै- स्तरुशकुनिकुरङ्गान्मैथिली यानपुष्यत् । भवति मम विकारस्तेषु दृष्टेषु कोऽपि द्रव इव हृदयस्य प्रस्रवोद्भेदयोग्यः ॥ (उत्तररामचरितम् ३.२५) |
| करकिसलयं धूत्वा धूत्वा विमार्गति वाससी क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति । स्थगयति मुहुः पत्युर्नेत्रे विहस्य समाकुला सुरतविरता रम्या तन्वी मुहुर्मुहुरीक्षते ॥ अमरुशतकम्-९६॥ |
| करकुड्मलेन निजमूरुमुरुतरनगाश्मकर्कशं । त्रस्तचपलचलमानजनश्रुतभीमनादमयमाहतोच्चकैः ॥ शिशुपालवधम् १५.१० ॥ |
| करग्रहे वाम्यमधत्त यस्तयोः प्रसाद्य भैम्यानु च दक्षिणीकृतः । कृतः पुरस्कृत्य ततो नलेन स प्रदक्षिणस्तत्क्षणमाशुशुक्षणिः ॥ नैषधीयचरितम् १६.३५ ॥ |
| करजदशनचिह्नं निशमङ्गेऽन्यनारी-जनितमिति सरोषमीर्ष्यया शङ्कमानां । स्मरसि न खलु दत्तं मत्तयैतत्त्वयैव स्त्रियमनुनयतीत्थं व्रीडमानां विलासी ॥ शिशुपालवधम् ११.३७ ॥ |
| करणशृङ्खलनिःसृतयोस्तयोः कृतभुजध्वनि वल्गु विवल्गतोः । चरणपातनिपातितरोधरसः प्रससृपुः सरितः परितः स्थलीः ॥ किरातार्जुनीयम् १८.११ ॥ |
| करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे । रविमहो बहुपीतचरं चिरादनिशतापमिषादुदसृज्यत ॥ नैषधीयचरितम् ४.१७ ॥ |
| करयुग्मपद्ममुकुलापवर्जितैः प्रतिवेश्म लाजकुसमैरवाकिरन् । अवदीर्णशुक्तिपुटमुक्तमौक्तिकप्रकरैरिव प्रियरथाङ्गमङ्गनाः ॥ शिशुपालवधम् १३.३७ ॥ |
| कररुद्धनीवि दयितोपगतौ गलितं त्वराविरहितासनया । क्षणदृष्टहाटकशिलासदृशस्फुरदूरुभित्ति वसनं ववसे ॥ शिशुपालवधम् ९.७५ ॥ |
| करस्थताम्बूलजिघत्सुरेकिका विलोकनैकाग्रविलोचनोत्पला । मुखे निचिक्षेप मुखद्विराजतारुषेव लीलाकमलं विलासिनी ॥ नैषधीयचरितम् १५.८३ ॥ |
| कराग्रजाग्रच्छतकोटिरर्थी ययोरिमौ तौ तुलयेत्कुचौ चेत् । सर्वं तदा श्रीफलमुन्मदिष्णु जातं वटीमप्यधुना न लब्धुम् ॥ नैषधीयचरितम् ७.७९ ॥ |
| कराभिघातोत्थितकन्दुकेयमालोक्य बालातिकुतूहलेन । जवात्पतज्ज्योतिरिवान्तरिक्षादादत्त जत्राभरणं त्वदीयं ॥ रघुवंशम् १६.८३ ॥ |
| करिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि । शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वां ॥ किरातार्जुनीयम् ३.२९ ॥ |
| करिष्यसे यद्यत एव दूषणादुपायमन्यं विदुषी स्वमृत्यवे । प्रियातिथिः स्वेन गृहागता कथं न धर्मराजं चरितार्थयिष्यसि ॥ नैषधीयचरितम् ९.४९ ॥ |
| करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रु ताभिः । प्रकुपितमभिसारणेऽनुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः ॥ किरातार्जुनीयम् १०.५८ ॥ |
| करे विधृत्येश्वरया गिरां सा पान्था पथीन्द्रस्य कृता विहस्य । वामेति नामैव बभाज सार्धं पुरन्ध्रिसाधारणसंविभागम् ॥ नैषधीयचरितम् १४.३३ ॥ |
| करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् । हृदि स्वच्छा वृत्तिः श्रुतिमधिगतं च श्रवणयो- र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ नीतिशतकम्६५ ॥ |
| करेण मीनं निजकेतनं दधद्द्रुमालवालाम्बुनिवेशशङ्कया । व्यतर्कि सर्वर्तुघने वने मधुं स मित्त्रमत्रानुसरन्निव स्मरः ॥ नैषधीयचरितम् १.१०५ ॥ |
| करेण वान्छेव विधुं विधर्तुं यमित्थमात्थादरिणी तमर्थम् । पातुं शृउतिभ्यामपि नाधिकुर्वे वर्णं शृउतेर्वर्ण इवान्तिमः किम् ॥ नैषधीयचरितम् ३.६२ ॥ |
| करेण वातायनलम्बितेन स्पृष्टस्त्वया चण्डि कुतूहलिन्या । आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ॥ रघुवंशम् १३.२१ ॥ |
| करेणुः प्रस्थितोऽनेको रेणुर्घण्टाः सहस्रशः । करेणुः शीकरो जज्ञे रेणुस्तेन शमं ययौ ॥ शिशुपालवधम् १९.३६ ॥ |
| करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्त्व स्तवम् । हरेर्हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया ॥ शिशुपालवधम्  १.३९ ॥ |
| करोति योऽशेषजनातिरिक्तां सम्भावनामर्थवतीं क्रियाभिः । संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥ किरातार्जुनीयम् ३.५१ ॥ |
| करोषि नेमं फलिनं मम श्रमं दिशोऽनुगृह्णासि न कंचन प्रभुम् । त्वमित्थमर्हासि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा ॥ नैषधीयचरितम् ९.१८ ॥ |
| करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसम्भ्रमा । सखीषु निर्वाच्यमधार्ष्ठ्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥ किरातार्जुनीयम् ८.४८ ॥ |
| करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमं । उपेयुषी कल्पलताभिशङ्कया कथं न्वितस्त्रस्यति षट्पदावलिः ॥ किरातार्जुनीयम् ८.७ ॥ |
| कर्णशक्तिमफलां खलु कर्तुं सज्जितार्जुनरथाय नमस्ते । केतनेन कपिनोरसि शक्तिं लक्ष्मणं कृतवता हृतशल्यम् ॥ नैषधीयचरितम् २१.८१ ॥ |
| कर्णाक्षिदन्तच्छदबाहुपाणिपादादिनः स्वाखिलतुल्यजेतुः । उद्वेगभागद्वयताभिमानादिहैव वेधा व्यधित द्वितीयं ॥ नैषधीयचरितम् ७.१०३ ॥ |
| कर्णार्पितो लोध्रकषायरुक्षे गोरोचनाक्षेपनितान्तगौरे । तस्याः कपोले परभागलाभाद्बबन्ध चक्षूँषि यवप्ररोहः॥ कुमारसंभवम् ७.१७॥ |
| कर्णोत्पलेनापि मुखं सनाथं लभेत नेत्रद्युतिनिर्जितेन । यद्येतदीयेन ततः कृतार्था स्वचक्षुषी किं कुरुते कुरङ्गी ॥ नैषधीयचरितम् ७.३ ॥ |
| कर्तव्यः सञ्चयो नित्यं न तु कार्योऽतिसञ्चयः । अतिसञ्चयशीलोऽयं धनुषा जम्बुको हतः  ॥ नीतिसंग्रहस्य मित्र-१.१५७ ॥ |
| कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम् तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः । आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥ मेघदूतम्, पूर्वमेघः ११॥ |
| कर्तुं शशाकाभिमुखं न भैम्या मृगं दृगम्भोरुहतर्जितम् यत् । अस्या विवाहाय ययौ विदर्भास्तद्वाहनस्तेन न गन्धवाहः ॥ नैषधीयचरितम् १०.१२ ॥ |
| कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी । तथाऽपि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ नीतिशतकम् ८९ ॥ |

| |
|---|
| कलकलः स तदालिजनाननादुदलसद्विपुलस्त्वरितेरितैः । यमधिगम्य सुतालयमीय्वान्धृतदरः स विदर्भपुरंदरः ॥ नैषधीयचरितम् ४.११६ ॥ |
| कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्तिविपर्ययेण । अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे ॥ रघुवंशम् १४.३३ ॥ |
| कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा । बलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥ किरातार्जुनीयम् ८.१७ ॥ |
| कलत्रवन्तमात्मानमवरोधे महत्यपि । तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ रघुवंशम् १.३२ ॥ |
| कलमन्यभृतासु भाषितं कलहंसीषु गतं मदालसं । पृटतीषु विलोलं ईक्षितं पवनाधूतलतासु विभ्रमः ॥ रघुवंशम् ८.५९ ॥ |
| कलया तुषारकिरणस्य पुरः परिमन्दभिन्नतिमिरौघजटं । क्षणमभ्यपद्यत जनैर्न मृषा गगनं गणादिपतिमूर्तिरिति ॥ शिशुपालवधम् ९.२७ ॥ |
| कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः । स तदुच्चकुचौ भवन्प्रभाझरचक्रभ्रममातनोति यत् ॥ नैषधीयचरितम् २.३२ ॥ |
| कला दधानः सकलाः स्वभाभिरुद्भासयन् सौधसिताभिराशाः । यां रेवतीजानिरियेष हृयतुं न रौहिणेयो नच रोहिणीशः ॥ शिशुपालवधम्  ३.६९ ॥ |
| कलासमग्रेणा गृहानमुञ्चता मनस्विनीरुत्कयितुं पटीयसा । विलासिनस्तस्य वितन्वता रतिं न नर्म्साचिव्यमकारि नेन्दुना ॥ शिशुपालवधम्  १.५९ ॥ |
| कल्पद्रुमान्परिमला इव भृङ्गमालामात्माश्रयामखिलनिन्दनशाखिवृन्दात् । तां राजकादपगमय्य विमानधुर्या निन्युर्नलाकृतिधरानथ पञ्चवीरान् ॥ नैषधीयचरितम् १३.१ ॥ |
| कल्प्यमानममुनाचमनाअर्थं गाङ्गमम्बु चुलुकोदरचुम्बि । निर्मलत्वमिलितप्रतिबिम्बद्यामयच्छदुपनीय करे नु ॥ नैषधीयचरितम् २१.१ ॥ |
| कल्याणबुद्धेरथ वा तवायं न कामचारो मयि शङ्कनीयः । ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ॥ रघुवंशम् १४.६२ ॥ |
| कल्याणि कल्यानि तवाङ्गकानि कच्चित्तमां चित्तमनाविलं ते । अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णतटायताक्षि ॥ नैषधीयचरितम् ८.५७ ॥ |
| कल्लोलजालचलनोपनतेन पीवा जीवातुनानवरतेन पयोरसेन । अस्मिन्नखण्डपरिमण्डलितोरुमूर्तिरध्यास्यते मधुभिदा भुजगाधिराजः ॥ नैषधीयचरितम् ११.४१ ॥ |
| कवित्वगानप्रियवादसत्यान्यस्या विधाता व्यधिताधिकण्ठम् । रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः ॥ नैषधीयचरितम् ७.६७ ॥ |
| कवीज्यचन्द्रलग्नपा रिपौ मृतौ व्रतेऽधमाः । व्ययेऽब्जभार्गवौ तथा तनौ मृतौ सुते खलाः ॥ मुहूर्त.संस्कारप्रकरणम् ४१॥ |
| कवीज्यास्तचैत्राधिमासे न पौषे जलं पूजयेत्सूतिका मासपूर्तौ । बुधेन्द्वीज्यवारे विरिक्ते तिथौ हि श्रुतीज्यादितीन्द्वर्कनैर्ऋत्यमैत्रैः ॥ मुहूर्त.संस्कारप्रकरणम् १६॥ |
| कश्चिच्छ्रस्त्रापातमूढोऽपवोढुर्लब्ध्वा भूयश्चेतनामाहवाय । व्यावर्तिष्ट क्रोशतः सख्युरुच्चैस्त्यक्तश्चात्मा का च लोकानुवृत्तिः ॥ शिशुपालवधम् १८.६४ ॥ |
| कश्चित्कराभ्यां उपगूढनालमालोलपत्त्राभिहतद्विरेफं । रजोभिरन्तः परिवेषबन्धि लीलारविन्दं भ्रमयां चकार ॥ रघुवंशम् ६.१३ ॥ |
| कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः । यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥ मेघदूतम् पूर्वमेघ १॥ |
| कश्चित्साधारणः कश्चिदामन्त्र्य प्रतिबोधितः । कश्चित्तटस्थः कश्चिच्च बोधितप्रतिबोधितः ॥ चन्द्रालोकः७.१४ ॥ |
| कश्चिद्द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य । वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ॥ रघुवंशम् ७.५१ ॥ |
| कश्चिद्यथाभागमवस्थितेऽपि स्वसंनिवेशाद्व्यतिलङ्घिनीव । वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे ॥ रघुवंशम् ६.१९ ॥ |
| कश्चिन्मूर्च्छामेत्य गाढप्रहारः सिक्तः शीतैः शीकरैर्वारणस्य । उच्छ्वास प्रस्थिता तं जिघृक्षुर्व्यर्थाकूता नाकनारी मुमूर्च्छ ॥ शिशुपालवधम् १८.५८ ॥ |
| कश्मीरजै रश्मिभिरौपसंध्यैर्मृष्टं धृतध्वान्तकुरङ्गनाभि । चन्द्रांशुना चन्दनचारुणाङ्गं क्रमात्समालम्भि दिगङ्गनाभिः ॥ नैषधीयचरितम् २२.५६ ॥ |
| कषणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्जितैः । इह मदस्नपितैरनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥ किरातार्जुनीयम् ५.४७ ॥ |
| कष्टः स्पष्टावबोधार्थमक्षमो वाच्यसन्निभः । व्याहतश्चेद्विरोधः स्यान्मिथः पूर्वापरार्थयोः ॥ चन्द्रालोकः२.३० ॥ |
| कष्टो जनः किल जनैरनुरञ्जनीयस्तन्नो यदुक्तमशुभं च न तत्क्षमं ते । नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ (उत्तररामचरितम् १.१४) |
| कस्त्वं कुतो वेति न जातु शेकुस्तं प्रष्टुमप्यप्रतिभातिभारात् । उत्तस्थुरभ्युत्थितिवाञ्छयेव निजासनान्नेकरसाः कृशाङ्ग्यः ॥ नैषधीयचरितम् ८.७ ॥ |
| कस्यचित्समदनं मदनीयप्रेयसीवदनपानपरस्य । स्वादितः सकृदिवासव एव प्रत्युत क्षणविदंशपदेऽभूत् ॥ शिशुपालवधम् १०.१० ॥ |
| कस्याप्यतिशयस्योक्तेरित्यन्वर्थविचारणात् । प्रायेणामी ह्यलङ्कारा भिन्ना नातिशयोक्तितः ॥ चन्द्रालोकः ५.१२३ ॥ |
| कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत् । आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥ (स्वप्नवासवदत्तम् १. ८) |
| कस्याश्चिनमुखमनु धौतपत्रलेखं व्यातेने सलिलभरावलम्बिनीभिः । किञ्चल्कव्यतिकरपिञ्चरान्तराभिश्चित्रश्रीरलमलकाग्रवल्लरीभिः ॥ शिशुपालवधम् ८.५६ ॥ |
| का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते । आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥ रघुवंशम् १६.८ ॥ |
| कांसीकृतासीत्खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण । तुला च नाराचलता निजैव मिथोनुरागस्य समीकृतौ वाम् ॥ नैषधीयचरितम् ३.१२२ ॥ |

| |
|---|
| काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः । न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते  ॥ नीतिसंग्रहस्य मित्र-०.35 ॥ |
| काकुस्थं प्रणतोऽम्भोधिरद्य माद्यत् रावणः । इत्यष्टधा गुणीभूत-व्यङ्ग्यमङ्गीकृतं बुधैः ॥ चन्द्रालोकः८.१० ॥ |
| काचः काञ्चनसंसर्गाद्धत्ते मारकतीर्द्युतीः । तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम्  ॥ नीतिसंग्रहस्य मित्र-०.४० ॥ |
| काचित्कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्त्रेन्दुलक्ष्मी- रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्वाः । भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमापुः प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः शशंसुः ॥ शिशुपालवधम् १५.९६ ॥ |
| काञ्च्या गाढतरावरुद्धवसनप्रान्ता किमर्थं पुनर्मुग्धाक्षी स्वैप्तीति तत्परिजनं स्वैरं प्रिये पृच्छति । मातः स्वप्तुमपीह वारयति मामित्याहितक्रोधया पर्यस्य स्वपितिच्छलेन शयने दत्तोऽवकाशस्तया ॥ अमरुशतकम्-१८॥ |
| कातरोऽसि यदि वोद्गतार्चिषा तर्जितः परशुधारया मम । ज्यानिघातकठिनाङ्गुलिर्वृथा बध्यतामभययाचनाञ्जलिः ॥ रघुवंशम् ११.७८ ॥ |
| कानुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा । यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिमि वीतविशङ्कः ॥ नैषधीयचरितम् ५.३८ ॥ |
| कान्तकान्तवदनप्रतिबिम्बे भग्नबालसहकारसुगन्धौ । स्वादुनि प्रणदितालिनि शीते निर्विवार मधुनीन्द्रियवर्गः ॥ शिशुपालवधम् १०.३ ॥ |
| कान्तदूत्य इव कुङ्कुमताम्राः सायमण्डलमभि त्वरयन्त्यः । सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥ किरातार्जुनीयम् ९.६ ॥ |
| कान्तया सपदि कोऽप्युपगूढः प्रौढपाणिरपनेतुमियेष । संहतस्तनतिरस्कृतदृष्टिर्भ्रष्टमेव न दुकूलमपश्यत् ॥ शिशुपालवधम् १०.७३ ॥ |
| कान्तवेश्म बहु संदिशतीभिर्यातमेव रतये रमणीभिः । मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितमप्युपकारि ॥ किरातार्जुनीयम् ९.३७ ॥ |
| कान्तसंगमपराजितमन्यौ वारुणीरसनशान्तविवादे । मानिनीजन उपाहितसंधौ संदधे धनुषि नेषुं अनङ्गः ॥ किरातार्जुनीयम् ९.५२ ॥ |
| कान्ताकटाक्षविशिखा न लुनन्ति यस्य, चित्तं न निर्दहति कोपकृशानुतापः । कर्षन्ति भूरिविषयाश्च न लोभपाशै-र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ नीतिशतकम् १०६ ॥ |
| कान्ताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयानिव मन्दमन्दं । हर्म्येषु माल्यमदिरापरिभोगगन्धानाविश्चकार रजनीपरिवृत्तिवायुः ॥ किरातार्जुनीयम् ९.७६ ॥ |
| कान्ताजनेन रहसि प्रसभं गृहीत- केशे रते स्मरसहासवतोपितेन । प्रेम्णा मनस्तु रजनीष्वपि हैमनीषु के शेरते स्म रसहासवतोपितेन ॥ शिशुपालवधम् ६.७७ ॥ |
| कान्तानां कुवलयमप्यपास्तमक्ष्णोः शोभाभिर्न मुखरुचाहमेकमेव । संहर्षादलिविरुतैरितीव गायल्लोलोर्मौ पयसि महोत्पलं ननर्त ॥ शिशुपालवधम् ८.२३ ॥ |
| कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभस् । सम्पेदे श्रमसलिलोद्गमो विभूषा रम्याणां विकृतिरपि श्रियं तनोति ॥ किरातार्जुनीयम् ७.५ ॥ |
| कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ स्वस्ति स्वस्ति निमीलयामि नयने यावन् न शून्या दिशः। आयाता वयमागमिष्यति सुहृद्वर्गस्य भाग्योदयैः सन्देशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥ अमरुशतकम्-२५॥ |
| कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनाद् वासो विश्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् । एतावत्सखि वेद्मि साम्प्रतमहं तस्याङ्गसङ्गे पुनः कोऽयं कास्मि रतं नु वा कथमिति स्वल्पापि मे न स्मृतिः ॥ अमरुशतकम्-१०४॥ |
| कान्ते सागसि शायिते प्रियसखीवेशं विधायागते भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्सङ्गमाकाङ्क्षया । मुग्धे दुष्करमेतद् इत्यतितरामुक्त्वा सहासं बलाद् आलिङ्ग्य छलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥ अमरुशतकम्-४१॥ |
| कान्तेन्दुकान्तोपलदुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यत्नः । उच्चैरधःपातिपयोमुचो पि समूहमूहः पयसां प्रणाल्यः ॥ शिशुपालवधम्  ३.४३ ॥ |
| कापि कामपि बभाण बुभुत्सुं शृण्वति त्रिदशभर्तरि किंचित् । एष कश्यपसुतामभिगन्ता पश्य कश्यपसुतः शतमन्युः ॥ नैषधीयचरितम् ५.५३ ॥ |
| कापि प्रमोदास्फुटनिर्जिहानवर्णेव या मङ्गलगीतिरासाम् । सैवाननेभ्यः पुरसुन्दरीणामुच्चैरुलूलुध्वनिरुच्चचार ॥ नैषधीयचरितम् १४.५१ ॥ |
| कापिशायनसुगन्धि विघूर्णन्नुन्मदोऽधिशयितुं समशेत । फुल्लदृष्टि वदनं प्रमदानामब्जचारु चषकं च षडङ्घ्रिः ॥ शिशुपालवधम् १०.४ ॥ |
| काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः । हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ रघुवंशम् १.४६ ॥ |
| काभिर्न तत्राभिनवस्मराज्ञा विश्वासनिक्षेपवणिक् त्रियेऽहम् । जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ॥ नैषधीयचरितम् ३.४३ ॥ |
| कामं ण्पाः सन्तु सहरशोऽन्ये राजन्वतीं आहुरनेन भूमिं । नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥ रघुवंशम् ६.२२ ॥ |
| कामं न सोऽकल्पत पैतृकस्य सिंहासनस्य प्रतिपूरणाय । तेजोमहिम्ना पुनरावृतात्मा तद्व्याप चामीकरपिञ्जरेण ॥ रघुवंशम् १८.४० ॥ |
| कामं प्रदोषतिमिरेण न दृश्यसे त्वं सौदामिनीव जलदोदरसंधिलीना। त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं गन्धश्च भीरु! मुखराणि च नूपुराणि॥ (मृच्छकटिकम् १.३५) |
| कामः कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनुर्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ । ग्रीवालंकृतिपट्टसूत्रलतया पृष्टे कियल्लम्बया भ्राजिष्णुं कषरेखयेव निवसत्सिन्दूरसौन्दर्यया ॥ नैषधीयचरितम् ३.१२६ ॥ |
| कामतोऽस्य ददृशुर्दिवौकसो दूरमूरुमलिनीलमायतं । व्योम्नि दिव्यसरिदम्बुपद्धतिस्पर्धयेव यमुनौघमुत्थितं ॥ शिशुपालवधम् १४.७७ ॥ |
| कामदेवविशिखैः खलु नेशं मात्रृपयज्जनकजामिति रक्षः । दैवतादमरणे वरवाक्यं तथ्ययत्स्वमपुनाद्भवदस्त्रैः ॥ नैषधीयचरितम् २१.७३ ॥ |

| |
|---|
| कामनीयकमधः कृतकामं काममक्षिभिरवेक्ष्य तदीयम् । कौशिकः स्वमखिलं परिपश्यन्मन्यते स्म खलु कौशिकमेव ॥ नैषधीयचरितम् ५.६४ ॥ |
| कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः । उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥ कुमारसंभवम् ३.६४ ॥ |
| कामानुशासनशते सुतरामधीती सोऽयं रहो नखपदैर्महतु स्तनौ ते । रुष्टाद्रिजाचरणकुङ्कुमपङ्करागसंकीर्णशंकरशशाङ्ककलाङ्ककारैः ॥ नैषधीयचरितम् ११.१२२ ॥ |
| कामिनः कृतरतोत्सवकालक्षेपमाकुलवधूकरसङ्गि । मेखलागुणविलग्नमसूयां दीर्घसूत्रमकरोत्परिधानं ॥ शिशुपालवधम् १०.६१ ॥ |
| कामिनामसकलानि विभुग्नैः स्वदवारिमृदुभिः करजाग्रैः । आक्रियन्त कठिनेषु कथञ्चित्कामिनीकुचतटेषु पदानि ॥ शिशुपालवधम् १०.५७ ॥ |
| कामिनीव भवेत्खड्ग-लेखा चारुकरालिका । काश्मीरसेका रक्ताङ्गी शत्रुकण्ठान्तिकाश्रिता ॥ चन्द्रालोकः ५.१० ॥ |
| कामिनीसहचरस्य कामिनस्तस्य वेश्मसु मृदङ्गनादिषु । ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥ रघुवंशम् १९.५ ॥ |
| कामेकपत्नीव्रतदुःखशीला लोलं मनश्चारुतया प्रविष्टाम् । नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥ कुमारसंभवम् ३.७॥ |
| कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः । तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥ (स्वप्नवासवदत्तम् ४. १) |
| कायः संनिहितापायः सम्पदः पदमापदाम् । समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम्  ॥ नीतिसंग्रहस्य मित्र-१.१९७ ॥ |
| कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि । आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ रघुवंशम् ५.५ ॥ |
| कारिष्यते परिभवः कलिना नलस्य तां द्वापरस्तु सुतनूमदुनोत्पुरस्तात् । भैमीनलोपयमनं पिशुनौ सहेते न द्वापरः किल कलिश्च युगे जगत्याम् ॥ नैषधीयचरितम् १३.३७ ॥ |
| कार्तवीर्यभिदुरेण दशास्ये रैणुकेय भवता सुखनाश्ये । कालभेदविरहादसमाधिं नौमि रामपुनरुक्तिमहं ते ॥ नैषधीयचरितम् २१.६८ ॥ |
| कार्त्तिकीषु सवितानहर्म्यभाग्यामिनीषु ललिताङ्गनासखः । अन्वभुङ्क्त सुरतश्रमापहां मेघमुक्तविशदां स चन्द्रिकां ॥ रघुवंशम् १९.३९ ॥ |
| कार्मुकतौलिककन्यायुग्मलवे झषगे वा । यर्हि भवेदुपयामस्तर्हि सती खलु कन्या ॥ मुहूर्त.विवाहप्रकरणम् ८४॥ |
| कार्यं फलोपलम्भश्चेद्व्यापाराद्वस्तुतोऽथ वा । असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् ॥ चन्द्रालोकः३.१० ॥ |
| कार्यकारणभावात् सा वाच्यवाचकभावतः । इत्येवमादेः सम्बन्धात् किंचान्यस्माच्चतुष्टयात् ॥ चन्द्रालोकः९.९ ॥ |
| कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी पातास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः । शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ अभिज्ञानशाकुन्तलम् ६.१७ ॥ |
| कार्याद्यैः प्रस्तुतैरुक्ते पर्यायोक्तिं प्रचक्षते । तृणान्यङ्कुरयामास विपक्षनृपसद्मसु ॥ चन्द्रालोकः ५.७० ॥ |
| कार्याद्यैरिह गमनस्य चेद्विलम्बा भूदेवादिभिरुपवीतमायुधं च । क्षौद्रं चामलफलमाशु चालनीयं सर्वेषां भवति यदेव हृत्प्रियं वा ॥ मुहूर्त.यात्राप्रकरणम् ९२॥ |
| कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा । स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥ रघुवंशम् १०.४१ ॥ |
| कालः किरातः स्फुटपद्मकस्य वधं व्यधाद्यस्य दिनद्विपस्य । तस्येव संध्या रुचिरास्रधारा ताराश्च कुम्भस्थलमौक्तिकानि ॥ नैषधीयचरितम् २२.९ ॥ |
| कालान्तरश्यामसुधेषु नक्तमितस्ततो रूढतृणाङ्कुरेषु । त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु मूर्छन्ति न चन्द्रपादाः ॥ रघुवंशम् १६.१८ ॥ |
| कालीयकक्षोदविलेपनश्रियं दिशद्दिशमुल्लसदंशुमद्द्युति । खातं खुरैमुद्गभुजां विपप्रते गिरेरधः काञ्चनभूमिजं रजः ॥ शिशुपालवधम् १२.१४ ॥ |
| काव्यवित्प्रवरैश्चित्रं खड्गबन्धादि लक्ष्यते । तेष्वाद्यमुच्यते श्लोकद्वयी सज्जनरञ्जिका ॥ चन्द्रालोकः ५.९ ॥ |
| काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन तु मूर्खाणां निद्रया कलहेन वा  ॥ नीतिसंग्रहस्य मित्र-१.१ ॥ |
| काव्ये नाट्ये च कार्ये च विभावाद्यैर्विभावितः । आस्वाद्यमानैकतनुः स्थायी भावो रसः स्मृतः ॥ चन्द्रालोकः६.३ ॥ |
| काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तास्वशङ्कन्त कान्ता मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनाम् । साहस्रीभिर्निमेषाकृतमतिभिरयं दृग्भिरालिङ्गितः किं ज्योतिष्टोमादियज्ञश्रुतिफलजगतीसार्वभौमभ्रमेण ॥ नैषधीयचरितम् १५.८८ ॥ |
| काषायी गुडतक्रपङ्कविधवाकुब्जाः कुटुम्बे कलि- र्वस्त्रादेः स्खलनं लुलायसमरं कृष्णानि धान्यानि च । कार्पासं वमनं च गर्दभरवो दक्षेऽतिरुट् गर्भिणी मुण्डार्द्राम्बरदुर्वचोऽन्धबधिरोदक्यो न दृष्टाः शुभाः ॥ मुहूर्त.यात्राप्रकरणम् १०३॥ |
| किं कन्दा कन्दरेभ्यः प्रलयमुपगता निझरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरसफलभृतोवल्कलिन्यश्च शाखाः । वीक्षन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां दुःखोपात्ताल्पवित्तस्मयवशललनागर्वितभ्रूलतानि ॥ पुरुषार्थोपदेशः-86॥ |
| किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरस-गल-भृतो वल्कलिन्यश्च शाखाः। वीक्ष्यन्ते यन्मुखानि प्रसभमपगत-प्रश्रयाणां खलानां दुःखाप्त-स्वल्प-वित्त-स्मय-पवन-वशानर्तित-भ्रू-लतानि॥॥ वैराग्यशतकम् २५ ॥ |
| किं क्रमिष्यति किलैष वामनो यावदित्थमहसन्न दानवाः । तावदस्य न ममौ नभस्तले लङ्घितार्कशशिमण्डलः क्रमः ॥ शिशुपालवधम् १४.७५ ॥ |
| किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः । योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥ किरातार्जुनीयम् ९.४० ॥ |

| |
|---|
| किं घनस्य जलधेरथवैवं नैव संशयितुमप्यलभन्त । स्यन्दनं परमदूरमपश्यन्निःस्वनश्रुतिसहोपनतं ते ॥ नैषधीयचरितम् ५.७९ ॥ |
| किं चाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः । किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ (उत्तररामचरितम् ५.१९) |
| किं तावत्सरसि सरोजमेतदाहोस्विन्मुखमवभासते युवत्याः । संशय्य क्षणमिति निश्चिकाय कश्चिद्विव्योकैर्बकसहवासिनां परोक्षैः ॥ शिशुपालवधम् ८.२९ ॥ |
| किं तु वध्वां तवैतस्यामदृष्टसदृशप्रजम् । न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ रघुवंशम् १.६५ ॥ |
| किं ते तथा मतिरमुष्य यथाशयः स्यात्त्वत्पाणिपीडनविनिर्मितयेऽनपाशः । कान्मानवानवति नो भुवनं चरिष्णून्नासावमुत्र नरता भवतीति युक्तम् ॥ नैषधीयचरितम् १३.३१ ॥ |
| किं तेन हेमगिरिणा रजताद्रिणा वा, यत्राश्रिताश्च तरवस्तरवस्त एव । मन्यामहे मलयमेव यदाश्रयेण कङ्कोलनिम्बकटुजा अपि चन्दनाः स्युः ॥ नीतिशतकम्८० ॥ |
| किं त्यक्तापास्तदेवत्व- मानुष्यकपरिग्रहैः । ज्वलितान्यगुणैर्गुर्वी स्थिता तेजसि मान्यता ॥ किरातार्जुनीयम् १५.२१ ॥ |
| किं त्वं कटीतटनिवेशितमुद्वहन्ती ताराविचित्ररुचिरं रशनाकलापम्। वक्त्रेण निर्मथितचूर्णमनःशिलेन त्रस्ताद्भुतं नगरदैवतवत्प्रयासि॥ (मृच्छकटिकम् १.२७) |
| किं त्वं पदैर्मम पदानि विशेषयन्ती व्यालीव यासि पतगेन्द्रभयाभिभूता। वेगादहं प्रविसृतः पवनं न रुन्ध्यां त्वन्निग्रहे तु वरगात्रि! न मे प्रयत्नः॥ (मृच्छकटिकम् १.२२) |
| किं त्वं भयेन परिवर्तितसौकुमार्या नृत्यप्रयोगविशदौ चरणौ क्षिपन्ती । उद्विग्नचञ्चलकटाक्षविसृष्टदृष्टिर्व्याधानुसारचकिता हरिणीव यासि ॥ (मृच्छकटिकम् १.१७) |
| किं न द्रुमा जगति जाग्रति लक्षसंख्यास्तुल्योपनीतपिककाकफलोपभोगाः । स्तुत्यस्तु कल्पविटपी फलसंप्रदानं कुर्वन्स एष विबुधानमृतैकवृत्तीन् ॥ नैषधीयचरितम् ११.१२५ ॥ |
| किं नर्मदाया मम सेयमस्या दृश्याभितो बाहुलतामृणाली । कुचौ किमुत्तस्थतुरन्तरीपे स्मरोष्मशुष्यत्तरबाल्यवारः ॥ नैषधीयचरितम् ७.७३ ॥ |
| किं नाक्ष्णि नोऽपि क्षणिकोऽणुकोऽयं भानस्ति तेजोमयबिन्दुरिन्दुः । अत्रेस्तु नेत्रे घटते यदासीन्मासेन नाशी महतो महीयान् ॥ नैषधीयचरितम् २२.१ ॥ |
| किं नु चित्रमधिवेदि भूपतिर्दक्षयन्द्विजगणानपूयत । राजतः पुपुविरे निरेनसः प्राप्य तेऽपि विमलं प्रतिग्रहं ॥ शिशुपालवधम् १४.३५ ॥ |
| किं यासि बालकदलीव विकम्पमाना रक्तांशुकं पवनलोलदशं वहन्ती। रक्तोत्पलप्रकरकुड्मलमुत्सृजन्ती टङ्कैर्मनःशिलगुहेव विदार्यमाणा॥ (मृच्छकटिकम् १.२०) |
| किं योगिनीयं रजनी रतीशं याजीजिवत्पद्ममममुहच्च । योगर्द्धिमस्या महतीमलग्नमिदं वदत्यम्बरचुम्बि कम्बु ॥ नैषधीयचरितम् २२.२३ ॥ |
| किं वक्ष्यतीति हृदयं परिशङ्कितं मे कन्या मयाप्यपहृता न च रक्षिता सा । भाग्यैश्चलैर्महदवाप्य गुणोपघातं पुत्रः पितुर्जनितरोष इवास्मि भीतः ॥ (स्वप्नवासवदत्तम् ६. ४) |
| किं वा तनोति मयि नैषध एव कावव्यूहं विधाय परिहासमसौ विलासी । विज्ञानवैभवभृतः किमु तस्य विद्या सा विद्यते न तुरगाशयवेदितेव ॥ नैषधीयचरितम् १३.४३ ॥ |
| किं वा तवात्यन्तवियोगमोघे कुर्यां उपेक्षां हतजीवितेऽस्मिन् । स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ॥ रघुवंशम् १४.६५ ॥ |
| किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य ऋभुक्षाः । शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलष्य नलस्य ॥ नैषधीयचरितम् ५.७३ ॥ |
| किं विधेयमनया विधीयतां त्वत्प्रसादजितयार्थसम्पदा । शाधि शासक जगत्त्रयस्य मामाश्रवोऽस्मि भवतः सहानुजः ॥ शिशुपालवधम् १४.११ ॥ |
| किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः। भुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं स्वात्मानन्दपदप्रवेशकथनं शेषैर्वणिग्वृत्तिभिः ॥ पुरुषार्थोपदेशः-97॥ |
| किंच प्रभावनमिताखिलराजतेजा देवः पिताम्बरमणी रमणीयमूर्तिः । उत्क्रान्तिदा कमनु न प्रतिभाति शक्तिः कृष्णत्वमस्य च परेषु गदान्नियोक्तुः ॥ नैषधीयचरितम् १३.१८ ॥ |
| किंचित्तिरश्चीनविलोलमौलिर्विचिन्त्य वाच्यं मनसा मुहूर्तम् । पतत्त्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ॥ नैषधीयचरितम् ३.५४ ॥ |
| किंचित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः । नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥ कुमारसंभवम् ३.४७ ॥ |
| किमत्र चित्रं यदि कामसूर्भूर्वृते स्थितस्याधिपतेः प्रजानां । अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥ रघुवंशम् ५.३३ ॥ |
| किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो । स्मरं तनुच्छायतया तमात्मनः शशाक शङ्के स न लङ्घितुं नलः ॥ नैषधीयचरितम् १.४७ ॥ |
| किमपि किमपि मन्दं मन्दमासक्तियोगा- दविरलितकपोलं जल्पतोरक्रमेण । अशिथिलपरिरम्भव्यापृतैकैकदोष्णो- रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ (उत्तररामचरितम् १.२७) |
| किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः । एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ॥ रघुवंशम् २.५७ ॥ |
| किमलम्बताम्बरविलग्नमधः किमवर्धतोर्ध्वमवनीतलतः । विससार तिर्यगथ दिग्भ्य इति प्रचुरीभवन्न निरधारि तमः ॥ शिशुपालवधम् ९.२० ॥ |
| किमवेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः । प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ किरातार्जुनीयम् २.२१ ॥ |

| |
|---|
| किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः । क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः ॥ किरातार्जुनीयम् २.४० ॥ |
| किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः । मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥ नैषधीयचरितम् ४.५२ ॥ |
| किमस्य लोम्नां कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद्गुणान् । न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः ॥ नैषधीयचरितम् १.२१ ॥ |
| किमहि बहुभिरुक्तैर्युक्तिशून्यैः प्रलापैर् द्वयमिह पुरुषाणां सर्वदा सेवनीयम् । अभिनवमदलीलालालसं सुन्दरीणां स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ पुरुषार्थोपदेशः-79॥ |
| किमहो नृपाः सममभीभिरुपपतिसुतैर्न पञ्चभिः । वध्यमभिहत भुजिष्यममुं सह चानया स्थविरराजकन्यया ॥ शिशुपालवधम् १५.६३ ॥ |
| किमात्मनिर्वादकथां उपेक्षे जायामदोषां उत संत्यजामि । इत्येकपक्षाश्रयविक्लवत्वादासीत्स दोलाचलचित्तवृत्तिः ॥ रघुवंशम् १४.३४ ॥ |
| किमालियुग्मार्पितदर्पणद्वये तदास्यमेकं बहु चान्यदम्बुजम् । हिमेषु निर्वाप्य निशासमाधिभिस्तदीयसालोक्यमितं व्यलोक्यत ॥ नैषधीयचरितम् १५.५२ ॥ |
| किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् । वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥ कुमारसंभवम् ५.४४ ॥ |
| किमिवाखिललोककीर्तितं कथयत्यात्मगुणं महामनाः । वदिता न लघीयसोऽपरः स्वगुणं तेन वदत्यसौ स्वयं ॥ शिशुपालवधम् १६.३१ ॥ |
| किमु तदन्तरुभौ भिषजौ दिवः स्मरनलौ विशतः स्म विगाहितुम् । तदभिकेन चिकित्सतुमाशु तां मखभुजामधिपेन नियोजितौ ॥ नैषधीयचरितम् ४.५ ॥ |
| किमु भवन्तमुमापतिरेककं मदमुदान्धमयोगिजनान्तकम् । यदजयत्तत एव न गीयते स भगवान्मदनान्धकमृत्युजित् ॥ नैषधीयचरितम् ४.९८ ॥ |
| कियचिरं श्राम्यसि गौरि ! विद्यते ममापि पूर्वाश्रमसंचितं तपः । तदर्धभागेन लभस्व काङ्क्षितं वरं तमिच्छामि च साधु वेदितुम् ॥ कुमारसंभवम् ५.५० ॥ |
| कियच्चिरं दैवतभाषितानि निह्नोतुमेनं प्रभवन्तु नाम । पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भिः ॥ नैषधीयचरितम् ८.२ ॥ |
| कियत्यजन्नोदनमानयन्कियत्करस्य पप्रच्छ गतागतेन याम् । अहं किमेष्यामि किमेष्यसीति सा व्यधत्त नम्रं किल लज्जयाननम् ॥ नैषधीयचरितम् १६.८ ॥ |
| कियद्बहु व्यञ्जनमेतदर्प्यते ममेति तृप्तेर्वदतां पुनःपुनः । अमूनि संख्यातुमसावढौकि तैश्छलेन तेषां कठिनीव भूयसी ॥ नैषधीयचरितम् १६.१०१ ॥ |
| कियान्यथानेन वियद्विभागस्तमोनिरासाद्विशदीकृतोयम् । अद्भिस्तथा लावणसैन्धवीभिरुल्लासिताभिः शितिरप्यकारि ॥ नैषधीयचरितम् २२.७३ ॥ |
| किरति कलितकिञ्चित्कोपरज्यन्मुखश्री- रविरतगुणगुञ्जत्कोटिना कार्मुकेण । समरशिरसि चञ्चत्पञ्चचूडश्चमूना- मुपरि शरतुषारं कोऽप्ययं वीरपोतः ॥ (उत्तररामचरितम् ५.२) |
| किसलयमिव मुग्धं बन्धनाद्विप्रलूनं दयकमलशोषी दारुणो दीर्घशोक ग्लपयति परिपाण्डु क्षाममस्याः शरीरं शरदिज इव धर्मः केतकीगर्भपत्रम् ॥ (उत्तररामचरितम् ३.५) |
| किसलयशकलेष्ववाचनीयाः पुलकिनि केवलमङ्गकेनिधेयाः । नखपदलिपयोऽपि दीपितार्थाः प्रणिदधिरे दयितैरनङ्गलेखाः ॥ शिशुपालवधम् ७.३९ ॥ |
| कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः । अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ नीतिसंग्रहस्य मित्र-०.४४ ॥ |
| कीर्णं शनैरनुकपोलमनेकपानां हस्तैर्विगाढमदतापरुजः शमाय । आकर्णमुल्लसितमम्बु विकाशिकाश-नीकाशमाप समतां सितचामरस्य ॥ शिशुपालवधम् ५.३५ ॥ |
| कीर्णा रेजे साजिभूमिः समन्तादप्राणद्भिः प्राणभाजां प्रतीकैः । बह्वारम्भैरर्धसंयोजितैर्वा रूपैः स्रष्टुः सृष्टिकर्मान्तशाला ॥ शिशुपालवधम् १८.७९ ॥ |
| कुजशुक्रसौम्यशशिसूर्यचन्द्रजाः कविभौमजीवशनिसौरयो गुरुः । इह राशिपाः क्रियमृगास्यतौलिकेन्दुभतो नवांशविधिरुच्यते बुधैः ॥ मुहूर्त.विवाहप्रकरणम् ३९॥ |
| कुटजानि वीक्ष्य शिखिभिः शिखरीन्द्रं समयावनौ घनमदभ्रमराणि । गगनं च गीतनिनदस्य गिरोच्चैः समया वनौघनमदभ्रमराणि ॥ शिशुपालवधम् ६.७३ ॥ |
| कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया धिया । स धूमकेतुं विपदे वियोगिना मुदीतमातङ्कितवानशङ्कत ॥ नैषधीयचरितम् १.९१ ॥ |
| कुण्डिनेन्द्रसुतया किल पूर्वं मां वरीतुमुररीकृतमास्ते । व्रीडमेष्यति परं मयि दृष्टे स्वीकरिष्यति न सा खलु युष्मान् ॥ नैषधीयचरितम् ५.११४ ॥ |
| कुतः कृतैवं वरलोकमागतं प्रति प्रतिज्ञाऽनवलोकनाय ते । अपीयमेनं मिथिलापुरंदरं निपीय दृष्टिः शिथिलास्तु ते वरम् ॥ नैषधीयचरितम् १२.६२ ॥ |
| कुतूहलेनेव जवादुपेत्य प्राकारभित्त्या सहसा निषिद्धः । रसन्नगदाद् भृशमम्बुवर्षव्याजेन यस्यां बहिरम्बुवाहः ॥ शिशुपालवधम् ३.४० ॥ |
| कुन्तेनोच्चैः सादिना हन्तुमिष्टान्नाजानेयो दन्तिनस्त्रस्यति स्म । कर्मोदारं कीर्तये कर्तुकामान्किंवा जात्याः स्वामिनोह्नेपयन्ति ॥ शिशुपालवधम् १८.२३ ॥ |
| कुपिताकृतिं प्रथममेव हसितमशनैरसूचयत् । क्रुद्धमशनिदलिताद्रितटध्वनि दन्तवक्रमरिचक्रभीषणम् ॥ शिशुपालवधम् १५.५२ ॥ |
| कुपितेषु राजसु तथापि रथचरणपाणिपूजया । चित्तकलितकलहागमनो मुदमाहुकिः सुहृदिवाधिकां दधौ ॥ शिशुपालवधम् १५.५५ ॥ |
| कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः । इत्यनेक उपदेश इव स्म स्वाद्यते युवतिभिर्मधुवारः ॥ किरातार्जुनीयम् ९.५३ ॥ |
| कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य । दिग्दक्षिणा गन्धवह मुखेन व्यलीकनिश्वासमिवोत्ससर्ज ॥ कुमारसंभवम् ३.२५॥ |
| कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि । पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रीतमिव ॥ रघुवंशम् ३.१२ ॥ |
| कुमाराः कृतसंस्कारास्ते धात्रिस्तन्य पायिनः । आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥ रघुवंशम् १०.७९ ॥ |
| कुमुदमुदमुदेष्यतीमसोढा रविरविलम्बितुकामतामतानीत् । प्रतितरु विरुवन्ति किं शकुन्ताः स्वहृदि निवेशितकोककाकुकुन्ताः ॥ नैषधीयचरितम् २१.१४७ ॥ |

| |
|---|
| कुमुदवनमपश्रि श्रीमदम्भोजषण्डं त्यजति मुदमुलूकः प्रीतिमाश्चक्रवाकः । उदयमहिमरश्मिर्याति शीतांशुरस्तं हतविधिलसितानां ही विचित्रो विपाकः ॥ शिशुपालवधम् ११.६४ ॥ |
| कुम्भकर्कद्वये मर्त्ये स्वर्गेऽब्जेऽजात्त्रयेऽलिगे । स्त्रीधनुर्जूकनक्रेऽधो भद्रा तत्रैव तत्फलम् ॥ मुहूर्तचिन्त.४५ ॥ |
| कुम्भकुम्भांशकौ त्याज्यौ सर्वथा यत्नतो बुधैः । तत्र प्रयातुर्नृपतेरर्थनाशः पदे पदे ॥ मुहूर्त.यात्राप्रकरणम् ४३॥ |
| कुम्भपूरणभवः पटुरुच्चैरुच्चचार नन्दोऽम्भसि तस्याः । तत्र स द्विरदबृंहितशङ्की शब्दपातिनमिषुं विससर्ज ॥ रघुवंशम् ८.७३ ॥ |
| कुम्भेऽर्के फाल्गुने प्रागपरमुखगृहं श्रावणे सिंहकर्क्योः पौषे नक्रे च याम्योत्तरमुखसदनं गोऽजगेऽर्के च राधे । मार्गे जूकालिगे सद्ध्रुवमृदुवरुणस्वातिवस्वर्कपुष्यैः सूतीगेहं त्वदित्यां हरिभविधिभयोस्तत्र शस्तः प्रवेशः ॥ मुहूर्त.वास्तुप्रकरणम् १५॥ |
| कुयोगास्तिथिवारोत्थास्तिथिभोत्था भवारजाः । हूणवङ्गखशेष्वेव वर्ज्यास्त्रितयजास्तथा ॥ मुहूर्तचिन्त.३१ ॥ |
| कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलम् । इह सिन्धवश्च वरणावरणाः करिणां मुदे सनलदानलदाः ॥ किरातार्जुनीयम् ५.२५ ॥ |
| कुरु करे गुरुमेकमयोघनं बहिरतो मुकुरं च कुरुष्व मे । विशति तत्र यदैव विधुस्तदा सखि सुखादहितं जहि तं द्रुतम् ॥ नैषधीयचरितम् ४.५९ ॥ |
| कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् । ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ किरातार्जुनीयम् २.२२ ॥ |
| कुरु तात तपांस्यमार्गदायी विजयायेत्यलमन्वशान्मुनिर्माम् । बलिनश्च वधादृतेऽस्य शक्यं व्रसंरक्षणमन्यथा न कर्तुं ॥ किरातार्जुनीयम् १३.१३ ॥ |
| कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम् । एषा विदूरीभवतः समुद्रात्सकानना निष्पततीव भूमिः ॥ रघुवंशम् १३.१८ ॥ |
| कुर्वञ्ज्योत्स्नाविप्रुषां तुल्यरूपस्तारस्ताराजालसारामिव द्याम् । खड्गाघातैर्दारितादुद्दन्तिकुम्भादाभाति स्म प्रोच्छलन्मौक्तिकौघः ॥ शिशुपालवधम् १८.४४ ॥ |
| कुर्वता मुकुलिताक्षियुगानामङ्गसादमवसादितवगचाम् । ईर्ष्ययेव हरता ह्रियमासां तद्गुणः स्वयमकारि मदेन ॥ शिशुपालवधम् १०.३० ॥ |
| कुर्वद्भिमुखरुचिमुज्जवलामजस्रं यैस्तोयैरसिचत वल्लभां विलासी । तैरेव प्रतियुवतेरकारि दूरात्कालुष्यं शशधरदीधितिच्छटाच्छैः ॥ शिशुपालवधम् ८.३८ ॥ |
| कुर्वद्भिरात्मभवसौरभसंप्रदानं भूपालचक्रचलचामरमारुतौघम् । आलोकनाय दिवि संचरतां सुराणां तत्रार्चनाविधिरभूदधिवासधूपैः ॥ नैषधीयचरितम् ११.४ ॥ |
| कुर्वन्तमित्यतिभरेण नगानवाचः पुष्पैर्विराममलिनां च न गानवाचः । श्रीमान्समस्तमनुसानु गिरौविहर्तु बिभ्रत्यचोदि स मयूरगिरा विहर्तु ॥ शिशुपालवधम् ६.७९ ॥ |
| कुर्वाणानां साम्परायान्तरायं भूरेणूनां मृत्युना मार्जनाय । सम्मार्जन्यो नूनमुद्धूयमाना भान्ति स्मोच्चैः केतनानां पताका ॥ शिशुपालवधम् १८.८ ॥ |
| कुलं च शीलं च बलं च यूनां जानासि नानाभुवनागतानाम् । एषामतस्त्वं भव वावदूका मूकायितुं कः समयस्तवायम् ॥ नैषधीयचरितम् १०.७१ ॥ |
| कुलाचारजनाचारैरतिशुद्धः प्रतापवान् । धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ नीतिसंग्रहस्य मित्र-१.१८८ ॥ |
| कुलिकः कालवेला च यमघण्टश्च कण्टकः । वाराद्विघ्ने क्रमान्मन्दे बुधे जीवे कुजे क्षणः ॥ मुहूर्तचिन्त.३७ ॥ |
| कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः । अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात्किमतः परं वद ॥ कुमारसंभवम् ५.४१ ॥ |
| कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः । त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥ रघुवंशम् ६.७९ ॥ |
| कुल्माषांस्तिलतण्डुलानपि तथा माषांश्च गव्यं दधि त्वाज्यं दुग्धमथैणमांसमपरं तस्यैव रक्तं तथा तद्वत्पायसमेव चाषपललं मार्गं च शाशं तथा षाष्टिक्यं च प्रियंग्वपूपमथवा चित्राण्डजान् सत्फलम् ॥ मुहूर्त.यात्राप्रकरणम् ८४॥ |
| कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो वटुपरिषदं पुण्यश्रीकः श्रियैवः सभाजयन् । पुनरपि शिशुर्भूतो वत्सः स मे रघुनन्दनो झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥ (उत्तररामचरितम् ४.१९) |
| कुशलं खलु तुभ्यमेव तदवचनं कृष्ण यदभ्यधामहं । उपदेशपराः परेष्वपि स्वविनाशाभिमुखेषु साधवः ॥ शिशुपालवधम् १६.४१ ॥ |
| कुशशयैरत्र जलाशयोषिता मुदा रमन्ते कलभा विकस्वरैः । प्रगीयते सिद्धगणैश्च योषितामुदारम कलभाविकस्वरैः ॥ शिशुपालवधम् ४.३३॥ |
| कुशावतीं श्रोत्रियसात्स कृत्वा यात्रानुकूलेऽहनि सावरोधः । अनुद्रुतो वायुरिवाभ्रवृन्दैः सैन्यैरयोध्याभिमुखः प्रतस्थे ॥ रघुवंशम् १६.२५ ॥ |
| कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलाञ्छनेन । रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् ॥ रघुवंशम् ६.१८ ॥ |
| कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति । अलकाभरणं कथं नु तत्तव नेष्यामि निवापलाल्यताम् ॥ रघुवंशम् ८.६२ ॥ |
| कुसुमकार्मुककार्मुकसंहितद्रुतशिलीमुखखण्डितविग्रहाः । मरणमप्यपराः प्रतिपेदिरे किमु मुहुर्मुहुर्गतभर्तृकाः ॥ शिशुपालवधम् ६.१६ ॥ |
| कुसुमचापजतापसमाकुलं कमलकोमलमैक्ष्यत तन्मुखम् । अहरहर्वहदभ्यधिकाधिका रविरुचिर्ग्लपितस्य विधोर्विधाम् ॥ नैषधीयचरितम् ४.६ ॥ |
| कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम् । इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम् ॥ रघुवंशम् ८.२६ ॥ |
| कुसुमनगवनान्युपैतुकामा किसलयिनीमवलम्ब्य चूतयष्टिं । क्वणदलिकुलनूपुरा निरासे नलिनवनेषु पदं वसन्तलक्ष्मीः ॥ किरातार्जुनीयम् १०.३१ ॥ |
| कुसुममप्यतिदुर्णयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत् । किमकृतैष तवैकतदास्पदे द्वयमभूदधुना हि नलभ्रुवौ ॥ नैषधीयचरितम् ४.९२ ॥ |
| कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदीपनं । किसलयप्रसवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितः ॥ रघुवंशम् ८.३१ ॥ |

| |
|---|
| कुसुमयन्फलिनीरवैमर्दविकासिभिरहितहुंकृतिः । उपवनं निरभर्सयत प्रियान्वियुवतीर्युवतीः शिशिरानिलः ॥ शिशुपालवधम् ६.६२ ॥ |
| कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः । मूर्ध्नि वा सर्वलोकस्य शीर्यते वने एव वा ॥ नीतिशतकम्३३ ॥ |
| कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः । सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वनेऽथवा  ॥ नीतिसंग्रहस्य मित्र-१.१२६ ॥ |
| कुसुमादपि स्मितदृशः सुतरां सुकुमारमङ्गमिति नापरथा । अनिशं निजैरकरुणः करुणं कुसुमेषुरुत्तपाति यद्विशिखैः ॥ शिशुपालवधम् ९.६७ ॥ |
| कुसुमानि यदि स्मरेषवो न तु वज्रं विषवल्लिजानि तत् । हृदयं यदमूमुहन्नमूर्मम यच्चातितरामतीतपन् ॥ नैषधीयचरितम् २.५९ ॥ |
| कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि । न भविष्यति हन्त साधनं किमिवानयत्प्रहरिष्यतो विधेः ॥ रघुवंशम् ८.४४ ॥ |
| कुसुमितमवलम्ब्य चूतमुच्चैस्तनुरिभकुम्भपृथुस्तनानताङ्गी । तदभिमुखं अनङ्गचापयष्टिर्विसृतगुणेव समुन्ननाम काचित् ॥ किरातार्जुनीयम् १०.५३ ॥ |
| कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशितां । अहरत्किल तस्य वेगवानधिवासस्पृहयेव मारुतः ॥ रघुवंशम् ८.३४ ॥ |
| कुसुमोत्कचितान्वलीमतश्चलयन्भृङ्गरुचस्तवालकान् । करभोरु करोति मारुतस्त्वदुपावर्तन्शङ्कि मे मनः ॥ रघुवंशम् ८.५३ ॥ |
| कूजायुजा बहुलपक्षशितिम्नि सीम्ना स्पष्टं कुहूपदपदार्थमिथोऽन्वयेन । तिर्यग्धृतस्फटिकदण्डकवर्तिनैका तामन्ववर्तत पिकेन मदाधिकेन ॥ नैषधीयचरितम् २१.१२४ ॥ |
| कूटकायमपहाय नो वपुर्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता । आप्तुमाकृतिमतो मनीषितां विद्यया हृदि तवाप्युदीयताम् ॥ नैषधीयचरितम् १४.९४ ॥ |
| कूपे वास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौ पुष्टिरैश्वर्यवृद्धिः । सूनोर्नाशःस्त्रीविनाशो मृतिश्च सम्पत्पीडा शत्रुतःस्याच्च सौख्यम् ॥ मुहूर्त.वास्तुप्रकरणम् २०॥ |
| कृच्छ्रं गतस्यापि दशाविपाकं धर्मान्न चेतः स्खलतु त्वदीयम् । अमुञ्चतः पुण्यमनन्यभक्तेः स्वहस्तवास्तव्य इव त्रिवर्गः ॥ नैषधीयचरितम् १४.८१ ॥ |
| कृच्छ्रलब्धमपि लब्धवर्णभाक्तं दिदेश मुनये सलक्ष्मणम् । अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता ॥ रघुवंशम् ११.२ ॥ |
| कृच्छ्रेणामेध्य-मध्ये नियमित-तनुभिः स्थीयते गर्भ-वासे कान्ता-विश्लेष-दुःख-व्यतिकर-विषमो यौवने चोपभोगः। वामाक्षीणामवज्ञा-विहसित-वसतिर्वृद्ध-भावोऽन्यसाधुः संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित्॥॥ वैराग्यशतकम् ३७ ॥ |
| कृतं यदन्यत्करणोचितत्यजा दिदृक्षु चक्षुर्यदवारि बालया । हृदस्तदीयस्य तदेव कामुके जगाद वार्तामखिलां खलु खलु ॥ नैषधीयचरितम् १६.५७ ॥ |
| कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना । सदोपयोगे पि गुरुस्त्वमक्षतिर्निधिः श्रुतीनां धनसंपदामिव ॥ शिशुपालवधम्  १.२८ ॥ |
| कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते । नागेन लौल्यात्कुमुदेन नूनमुपात्तमन्तर्ह्रदवासिना तत् ॥ रघुवंशम् १६.७६ ॥ |
| कृतकृतकरुषा सखीमपास्य त्वमकुशलेति कयाचिदात्मनैव । अभिमतमभि साभिलाषमाविष्कृतभुजमूलमबन्धि मूर्ध्नि माला ॥ शिशुपालवधम् ७.४० ॥ |
| कृतकेशविडम्बनैर्विहायो विजयं तत्क्षणमिच्छुभिश्छलेन । अमृताग्रभुवः पुरेव पुच्छं बडवाभर्तुरवारि काद्रवेयैः ॥ शिशुपालवधम् २०.४३ ॥ |
| कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ परिशिथिलितगात्रे गन्तुमापृच्छमाने । विगलितनवमुक्तास्थूलभाष्पाम्बुबिन्दु स्तनयुगमबलायास्तत्क्षणं रोदितीव ॥ शिशुपालवधम् ११.३८ ॥ |
| कृतगोपवधूरतेर्घ्नतो वृषमुग्रे नरकेऽपि संप्रति । प्रतिपत्तिरधःकृतैनसो जनताभिस्तव साधु वर्ण्यते ॥ शिशुपालवधम् १६.८ ॥ |
| कृतदाहमुदर्चिषः शिखाभिः परिषिक्तं मुहुरम्भसा नवेन । विहिताम्बुधरव्रणं प्रपेदे गगनं तापितपायितासिलक्ष्मीं ॥ शिशुपालवधम् २०.७५ ॥ |
| कृतधवलिमभेदैः कुङ्कुमेनेव किञ्चिन्मलयरुहरजोभिर्भूषयन्पश्चिमाशां । हिमरुचिररुणिम्ना राजते रज्यमानैर्जरठकमलकन्दच्छेदगौरैर्मयूखैः ॥ शिशुपालवधम् ११.१४ ॥ |
| कृतधृति परिवन्दितेनोच्चकैर्गणपतिभिरभिन्नरोमोद्गमैः । तपसि कृतफले फलज्यायसी स्तुतिरिति जगदे हरेः सूनुना ॥ किरातार्जुनीयम् १८.२१ ॥ |
| कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः । न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ किरातार्जुनीयम् १.२ ॥ |
| कृतभयपरितोषसन्निपातं सचकितसस्मितवक्त्रवारिजश्रीः । मनसिजगुरुतत्क्षणोपदिष्टं किमपि रासेन रसन्तरं भजन्ती ॥ शिशुपालवधम् ७.३७ ॥ |
| कृतमण्डलबन्धमुल्लसद्भिः शिरसि प्रत्युरसं विलम्बमानैः । व्यरुचज्जनता भुजङ्गभोगैर्दलितेन्दीवरमालभारिणीव ॥ शिशुपालवधम् २०.४८ ॥ |
| कृतमदं निगदन्त इवाकुलीकृतजगत्रयमूर्जमतङ्गजम् । ववुरयुक्छदगुच्छसुगन्धयः सततगास्ततगानगिरोऽलिभिः ॥ शिशुपालवधम् ६.५० ॥ |
| कृतवत्यसि नावधीरणामपराध्हेऽपि यदा चिरं मयि । कथं एकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ॥ रघुवंशम् ८.४८ ॥ |
| कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् । किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥ कुमारसंभवम् ४.७ ॥ |
| कृतसकलजगद्विबोधोऽवधूतान्धकारोदयः क्षयितकुमुदतारकश्रीर्वियोगं नयन्कामिनः । बहुतरगुणदर्शनादभ्युपेताल्पदोषः कृती तव वरद करोतु सुप्रातमह्नामयं नायकः ॥ शिशुपालवधम् ११.६७ ॥ |
| कृतसन्निधानमिव तस्य पुनरपि तृतीयचक्षुषा । क्रूरमजनि कुटिलभ्रु गुरुभ्रुकुटीकठोरितललाटमाननं ॥ शिशुपालवधम् १५.८ ॥ |
| कृतस्य सर्वक्षितिपैर्विजयाशंसया पुरः । अनेकस्य चकारासौ बाणैर्बाणस्य खण्डनं ॥ शिशुपालवधम् १९.१४ ॥ |
| कृताञ्जलिस्तत्र यदम्ब सत्यान्नाभ्रश्यत स्वर्गफलादुगुरुर्नः । तच्चिन्त्यमानं सुकृतं तवेति जहार लज्जां भरतस्य मातुः ॥ रघुवंशम् १४.१६ ॥ |
| कृतात्र देवी वचनाधिकारिणी त्वमुत्तरंदासि ददासि कासती । इतीरिणस्तन्नृपपारिपार्श्विकान्स्वभर्तुरेव भ्रुकुटिर्न्यवर्तयत् ॥ नैषधीयचरितम् १२.६ ॥ |
| कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ । इयाय सख्याविव सम्प्रसादं विश्वासयत्याशु सतां हि योगः ॥ किरातार्जुनीयम् ३.३१ ॥ |

| |
|---|
| कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे । अतर्कितं पाणितलान्निपेतुः क्रियाफलानीव तदायुधानि ॥ किरातार्जुनीयम् १६.२९ ॥ |
| कृतापराधः सुतनोरनन्तरं विचिन्त्य कान्तेन समं समागमम् । स्फुटं सिषेव कुसुमेषुपावकः स रागचिह्नश्चरणौ न यावकः ॥ नैषधीयचरितम् १५.४७ ॥ |
| कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् । दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ कुमारसंभवम् ५.१६ ॥ |
| कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः । ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥ रघुवंशम् १०.६४ ॥ |
| कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना । विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥ किरातार्जुनीयम् १.९ ॥ |
| कृतार्थनश्चाटुभिरिङ्गितैः पुरा परासि यः किंचनकुञ्चितभ्रुवा । क्षिपन्मुखे भोजनलीलयाङ्गुलीः पुनः प्रसन्नाननयान्वकम्पि सः ॥ नैषधीयचरितम् १६.८८ ॥ |
| कृतार्थयन्नर्थिजनाननारतं बभूव तस्यामरभूरुहः करः । तदीयमूले निहितं द्वितीयवद्ध्रुवं दधे कङ्कणमालवालताम् ॥ नैषधीयचरितम् १५.७४ ॥ |
| कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने । इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम् ॥ किरातार्जुनीयम् ४.३३ ॥ |
| कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती । तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ॥ नैषधीयचरितम् १.१२३ ॥ |
| कृतास्पदा भूमिभृतां सहस्रैरुदन्वदम्भःपरिवीतमूर्तिः । अनिर्विदा या विदधे विधात्रा पृथ्वी पृथिव्याः प्रतियातनेव ॥ शिशुपालवधम्  ३.३३ ॥ |
| कृतिः स्मरस्यैव न धातुरेषा नास्या हि शिल्पीतरकारुजेयः । रूपस्य शिल्पे वयसाऽपि वेधा निजीयते स स्मरकिङ्करेण ॥ नैषधीयचरितम् १०.१३१ ॥ |
| कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः शिरस्याज्ञा न्यस्ता प्रतिवचनवत्यानतिमति । न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे निगूढान्तःकोपात्कठिणहृदये संवृतिरियम् ॥ अमरुशतकम्-८२॥ |
| कृतोरुवेगं युगपद्व्यजिगीषन्त सैनिकाः । विपक्षं बाहुपरिघैर्जङ्घाभिरितरेतरं ॥ शिशुपालवधम् १९.३२ ॥ |
| कृतोर्मिरेखं शिथिलत्वमायता शनैः शनैः शान्तरयेण वारिणा । निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितक्षौमविपाण्डु सैकतम् ॥ किरातार्जुनीयम् ४.६ ॥ |
| कृत्तैः कीर्णा मही रेजे दन्तैर्गात्रैश्च दन्तिनां । क्षुण्णलोकासुभिर्मृत्योर्मुसलोलूखलैरिव ॥ शिशुपालवधम् १९.८१ ॥ |
| कृत्वा कृत्यविदस्तीर्थैरतः प्रणिधयः पदम् । विदांकुवन्तु महतस्तलं विद्विषदम्भसः ॥ शिशुपालवधम्  २.१११ ॥ |
| कृत्वा दृशौ ते बहुवर्णचित्रे किं कृष्णसारस्य तयोर्मृगस्य । अदूरजाग्रद्विदरप्रणालीरेखामयच्छद्विधिरर्धचन्द्रम् ॥ नैषधीयचरितम् ८.३८ ॥ |
| कृत्वा शिनेः शाल्वचमूं सप्रभावा चमूर्जितां । ससर्ज वक्त्रैः फुल्लाब्जसप्रभा वाचमूर्जितां ॥ शिशुपालवधम् १९.७ ॥ |
| कृत्वापुंवत्पादमुच्चैर्भृगुभ्यो मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः । कुर्वन्ति द्यामुत्पतन्तः स्मरार्तस्वर्लोकस्त्रीगात्रनिर्णमत्र ॥ शिशुपालवधम् ४.२३॥ |
| कृपा नृपाणामुपरि क्वचिन्न ते नतेन हा हा शिरसा रसाद्दशाम् । भवन्तु तावत्तव लोचनाञ्चला निपेयनेपालनृपालपालयः ॥ नैषधीयचरितम् १२.४३ ॥ |
| कृपाण - कुन्तादिकशस्त्र - झकृता, सदैव वीरोचितहुकृताऽङ्किता । प्रताडिताऽराति-ततिस्तदङ्कगा विभाति मेवाड़ मही महीयसी ॥ प्रतापविजयः-२८ ॥ |
| कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम् । सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ नीतिशितकम्९ ॥ |
| कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः । क्षुधाक्षामो जीर्णःपिठरककपालार्पितगलः शुचीमन्वेति श्वा, हतमपि च हन्त्येव मदनः ॥ पुरुषार्थोपदेशः-26॥ |
| कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः । रक्षिविप्रकृतावास्तामपविद्धशुचाविव ॥ रघुवंशम् १०.७५ ॥ |
| कृष्णे पक्षे सौरिकुजार्केऽपि च वारे वर्ज्ये नक्षत्रे यदि वा स्यात् करपीडा । सङ्कीर्णानां तर्हि सुतायुर्धनलाभ-प्रीतिप्राप्त्यै सा भवतीह स्थितिरेषा ॥ मुहूर्त.विवाहप्रकरणम् ९४॥ |
| कृष्णे प्रदोषेऽनध्याये शनौ निश्यपराहणके । प्राक्सन्ध्यागर्जिते नेष्टो व्रतबन्धो गलग्रहे ॥ मुहूर्त.संस्कारप्रकरणम् ४८॥ |
| केदारभाजा शिशिरप्रवेशात्पुण्याय मन्ये मृतमुत्पलिन्या । जाता यतस्तत्कुसुमेक्षणेयं यातश्च तत्कोरकदृक्चकोरः ॥ नैषधीयचरितम् ७.३५ ॥ |
| केनचितन्मधुरमुल्बणरागं बाष्पतप्तमधिकं विरहेषु । ओष्ठपल्लवमवाप्य मुहूर्तं सुभ्रुवः सरसमक्षि चुचुम्बे ॥ शिशुपालवधम् १०.७४ ॥ |
| केनचित्स्वासिनान्येषां मण्डलाग्रानवद्यता । प्रापे कीर्तिप्लुतमहीमण्डलाग्रानवद्यत ॥ शिशुपालवधम् १९.४८ ॥ |
| केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः । यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती ॥ कुमारसंभवम् ३.४॥ |
| केन्द्रत्रिकोणसहजेषु शुभैः खशुद्धे लग्ने त्रिलाभरिपुगैश्च वदन्ति पापैः । लग्नाष्टषष्ठरहितं शशिनं प्रशस्तं मैत्राम्बुपानिलजनुर्भमसच्च केचित् ॥ मुहूर्त.संस्कारप्रकरणम् १८॥ |
| केन्द्रत्रिकोणेषु शुभैश्च पापैस्त्र्यायारिगैः पुंग्रहदृष्टलग्ने । ओजांशगेऽब्जेऽपि च युग्मरात्रौ चित्रादितीज्याश्विषु मध्यमं स्यात् ॥ मुहूर्त.संस्कारप्रकरणम् ७॥ |
| केन्द्रे कोणे जीव आये रवौ च लग्ने चन्द्रे वाऽपि वर्तोत्तमे वा । सर्वे दोषा नाशमायान्ति चन्द्रे लाभे तद्वद्दुर्मुहूर्तांशदोषाः ॥ मुहूर्त.विवाहप्रकरणम् ९०॥ |
| केन्द्रे कोणे सौम्यखेटाः शुभाः स्युर्याने पापास्त्र्यायषट्खेषु चन्द्रः । नेष्टो लग्नान्त्यारिरन्ध्रे शनिःखेऽस्ते शुक्रो लग्नेट् नगान्त्यारिरन्ध्रे ॥ मुहूर्त.यात्राप्रकरणम् ५६॥ |
| केन्द्रे दिगधीशे गच्छेदवनीशः । लालाटिनि तस्मिन्नेयादरिसेनाम् ॥ मुहूर्त.यात्राप्रकरणम् ५०॥ |
| केयमर्धभवता भवतोहे मायिना ननु भवः सकलस्त्वम् । शेषतामपि भजन्तमशेषं वेद वेदनयनो हि जनस्त्वाम् ॥ नैषधीयचरितम् २१.१०३ ॥ |

| |
|---|
| केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः । वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ नीतिशतकम् १९ ॥ |
| केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि । धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः ॥ शिशुपालवधम् १४.६६ ॥ |
| केवलं स्मरणेनैव पुनासि पुरुषं यतः । अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ रघुवंशम् १०.३० ॥ |
| केशप्रचुरलोकस्य पर्यस्कारि विकासिना । शेखरेणेव युद्धस्य शिरः कुसुमलक्ष्मणा ॥ शिशुपालवधम् १९.२२ ॥ |
| केशान्तं षोडशे वर्षे चौलोक्तदिवसे शुभम् । व्रतोक्तदिवसादौ हि समावर्तनमिष्यते ॥ मुहूर्त.विवाहप्रकरणम् ६०॥ |
| केशान्धकारादथ दृश्यभालस्थलार्धचन्द्रा स्फुटमष्टमीयम् । एनां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु ॥ नैषधीयचरितम् ७.२३ ॥ |
| केषाञ्चिदस्तु कमला कमलाऽऽयताक्षी, केषाञ्च शम्भुसुमुखी सुमुखीषु मान्या । अस्मत्कृते तु जननी जननि ! त्वमेका, यत्पाययेः शमकरं मकरन्दबिन्दुम्॥ प्रतापविजयः-३॥ |
| कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् । जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियम् ॥ रघुवंशम् १०.७१ ॥ |
| कैटभारिपदयोर्नितमूर्ध्ना सञ्जिता विचकिलस्रगनेन । जह्नुजेव भुवनप्रभुणाऽभात्सेवितानुनयतायतमाना ॥ नैषधीयचरितम् २१.५ ॥ |
| कैतवापह्नुतिर्व्यक्ते व्याजाद्यैर्निह्नवे पदैः । निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात् ॥ चन्द्रालोकः ५.२८ ॥ |
| कैतवेन शयिते कुतूहलात्पार्वति प्रतिमुखं निपातितम् । चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत्॥ कुमारसंभवम् ७.३॥ |
| कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्टम् । अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥ रघुवंशम् २.३५ ॥ |
| कैश्चिन्मेषरवौ मधौ वृषभगे ज्येष्ठे शुचौ कर्कटे भाद्रे सिंहगते घटेश्वयुजि चोर्जेऽलौ मृगे पौषके । माघे नक्रघटे शुभं निगदितं गेहं तथोर्जो न सत् कन्यायां च तथा धनुष्यपि न सत्कृष्णादिमासादभवेत् ॥ मुहूर्त.वास्तुप्रकरणम् १६॥ |
| को धर्मो भूतदया किं सौख्यं नित्यमरोगिना जगति । कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥ नीतिसंग्रहस्य मित्र-१.१४१ ॥ |
| को न्विमं हरितुरङ्गमायुध- स्थेयसीं दधतमङ्गसंहतिं । वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ किरातार्जुनीयम् १३.५० ॥ |
| को लाभो गुणिसङ्गमः किमसुखं प्राज्ञेतरैः सङ्गतिः का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः । कः शूरो विजितेन्द्रियः प्रियतमा का अनुव्रता किं धनं विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥ नीतिशतकम् १०३ ॥ |
| को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतः यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् । यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिन्नत्त्यात्मनः ॥ नीतिसंग्रहस्य मित्र-१.१०५ ॥ |
| कोऽप्येष संप्रति नवः पुरुषावतारो वीरो न यस्य भगवान्भृगुनन्दनोऽपि । पर्याप्तसप्तभुवनाभयदक्षिणानि पुण्यानि तात चरितान्यपि यो न वेद ॥ (उत्तररामचरितम् ५.३३) |
| कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः । कथञ्चित्स्वोदरभराः किन्न शूकरशावकाः ॥ नीतिसंग्रहस्य मित्र-०. ९ ॥ |
| कोपवत्यनुनयानगृहीत्वा प्रागथो मधुमदाहितमोहा । कोपितं विरहखेदितचित्ता कान्तमेव कलयन्त्यनुनिन्ये ॥ शिशुपालवधम् १०.२९ ॥ |
| कोपात्कोमललोलबाहुलतिकापाशेन बद्धा दृढं नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः । भूयोऽप्येवमिति स्खलन् मृदुगिरा संसूच्य दुश्चेष्टितं धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥ अमरुशतकम्- ८॥ |
| कोपो यत्र भ्रूकुटिरचना निग्रहो यत्र मौनं यत्रान्योन्यस्मितमनुनयो यत्र दृष्टिः प्रसादः । तस्य प्रेम्णस्तद् इदमधुना वैषमं पश्य जातं त्वं पादान्ते लुठसि नहि मे मन्युमोक्षः खलायाः ॥ अमरुशतकम्-३४॥ |
| कोशातकीपुष्पगुलुच्छकान्तिभिर्मुखैर्विनिद्रोल्बणबाणचक्षुषः । ग्रामीणवध्वस्तमलक्षिता जनैश्चिरं मृतानामुपरि व्यलोकयन् ॥ शिशुपालवधम् १२.३७ ॥ |
| कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी नैश्चिन्त्यं निरपेक्षभैक्ष्यमशनं निद्रा श्मशाने वने । स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम् ॥ वैराग्यशतकम् ९१ ॥ |
| कौबीरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः । अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथ प्रतस्थे ॥ शिशुपालवधम् ३.१ ॥ |
| कौबेरीतो वैपरीत्येन कालो वारेऽर्कादये सम्मुखे तस्य पाशः । रात्रावेतौ वैपरीत्येन गण्यौ यात्रायुद्धे सम्मुखे वर्जनीयौ ॥ मुहूर्त.यात्राप्रकरणम् ३५॥ |
| कौमारगन्धीनि निवारयन्ती वृत्तानि रोमावलिवेत्रचिह्ना । सालिख्य तेनैक्ष्यत यौवनीयद्वाःस्थामवस्थां परिचेतुकामा ॥ नैषधीयचरितम् ६.३८ ॥ |
| कौमारमारभ्य गणा गुणानां हरन्ति ते दिक्षु धृताधिपत्यान् । सुराधिराजं सलिलाधिपं च हुताशनं चर्यमनन्दनं च ॥ नैषधीयचरितम् ८.५८ ॥ |
| कौर्भं सारिकगोधिकं च पललं शाल्यं हविष्यं हया- द्यृक्षे स्यात्कृसरान्नमुद्गमपि वा पिष्टं यवानां तथा । मत्स्यान्नं खलु चित्रितान्नमथवा दध्यन्नमेवं क्रमा- द्भक्ष्याभक्ष्यमिदं विचार्य मतिमान् भक्षेत्तथाऽऽलोकयेत् ॥ मुहूर्त.यात्राप्रकरणम् ८५॥ |
| कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये । काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥ रघुवंशम् ११.१ ॥ |

| |
|---|
| कौसल्य इत्युत्तरकोसलानां पत्युः पतंगान्वयभूषणस्य । तस्यौरसः सोमसुतः सुतोऽभून्नेत्रोत्सवः सोम इव द्वितीयः ॥ रघुवंशम् १८.२७ ॥ |
| कौसल्य इत्युत्तरकोसलानां स ब्रह्मभूयं गतिमाजगाम । ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठं एव स्वतनुप्रसूतं ॥ रघुवंशम् १८.२८ ॥ |
| क्ëप्तपुष्पशयनांल्लतागृहानेत्य दूतिकृतमार्गदर्शनः । अन्वभूत्परिजनाङ्गनारतं सोऽवरोधभयवेपथूत्तरं ॥ रघुवंशम् १९.२३ ॥ |
| क्रतुपाणिपीडमृतिबन्धमोक्षणे क्षुरकर्म च द्विजनृपाज्ञयाचरेत् । शववाहतीर्थगमसिन्धुमज्जनक्षुरमाचरेन्न खलु गर्भिणीपतिः ॥ मुहूर्त.संस्कारप्रकरणम् ३५॥ |
| क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः । कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसारस्यूतटाः ॥ रघुवंशम् ८.१६ ॥ |
| क्रतोः कृते जाग्रति वेत्ति कः कति प्रभोरपां वेश्मनि कामधेनवः । त्वदर्थमेकामपि याचते स चेत्प्रचेतसः पाणिगतैव वर्तसे ॥ नैषधीयचरितम् ९.७७ ॥ |
| क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा । उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ॥ रघुवंशम् ८.८२ ॥ |
| क्रमाच्छुभो विद्ध इति ग्रहः स्यात् पितुः सुतस्यात्र न वेधमाहुः । दुष्टोऽपि खेटो विपरीतवेधाच्छुभो द्विकोणे शुभदः सितेऽजः ॥ मुहूर्त.संक्रान्तिप्रकरणम् ४ ॥ |
| क्रमाधिकामुत्तरमुत्तरं श्रियं पुपोष यां भूषणचुम्बनैरियम् । पुरः पुरस्तस्थुषि रामणीयके तया बबाधेऽवधिबुद्धिधोरणिः ॥ नैषधीयचरितम् १५.४९ ॥ |
| क्रमेण कूरं स्पृशतोष्मणः पदं सितां च शीतां चतुरेण वीक्षिता । दधौ विदग्धारुणितेऽधरेऽङ्गुलीमनौचितीचिन्तनविस्मिता किल ॥ नैषधीयचरितम् १६.७९ ॥ |
| क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा । पुराणपत्रापगमादनन्तरं लतेव संनद्धमनोज्ञपल्लवा ॥ रघुवंशम् ३.७ ॥ |
| क्रमेलकं निन्दति कोमलेच्छुः क्रमेलकः कण्टकलम्पटस्तम् । प्रीतौ तयोरिष्टभुजोः समायां मध्यस्थता नैकतरोपहासः ॥ नैषधीयचरितम् ६.१०४ ॥ |
| क्रमोद्गता पीवरताधिजङ्घं वृक्षाधिरूढं विदुषी किमस्याः । अपि भ्रमीभङ्गिभिरावृताङ्गं वासो लतावेष्टितकप्रवीणम् ॥ नैषधीयचरितम् ७.९७ ॥ |
| क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न । पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः क्रये शुभाः ॥ मुहूर्त.नक्षत्रप्रकरणम् १६ ॥ |
| क्रव्यात्पूगैः पुष्कराण्यनकानां प्रत्याशाभिर्मेदसो दारितानि । आभीलानि प्राणिनः प्रत्यवस्यन्कालो नूनं व्यददावाननानि ॥ शिशुपालवधम् १८.७८ ॥ |
| क्रान्तं रुचा काञ्चनवप्रभाजा नवप्रभाजालभृतां मणीनाम् । श्रितं शिलाश्यामलताभिरामं लताभिरामनत्रितषट्पदाभिः ॥ शिशुपालवधम् ४.३॥ |
| क्रान्तानां ग्रहचरितात्पथो रथानामक्षाग्रक्षतसुरवेश्मवेदिकानां । निःसङ्गं प्रधिभिरुपाददे विवृत्तिः सम्पीडक्षुभितजलेषु तोयदेषु ॥ किरातार्जुनीयम् ७.१२ ॥ |
| क्रामद्भिर्घनपदवीं अनेकसंख्यैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः । उस्राणां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्निह निचयः सहस्रसंख्यां ॥ किरातार्जुनीयम् ५.३४ ॥ |
| क्रामन्दन्तौ दन्तिनः साहसिक्यादीषादण्डौ मृत्युशय्यातलस्य । सैन्यैरन्यस्तत्क्षणादाशशङ्के स्वर्गस्योच्चैर्धमार्गाधिरूढः ॥ शिशुपालवधम् १८.४३ ॥ |
| क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया । सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च ॥ कुमारसंभवम् ४.२२ ॥ |
| क्रियते धवलः खलूच्चकैर्धवलैरेव सितेतरैरधः । शिरसौधमधत्त श्ङ्करः सुरसिन्धोर्मधुजित्तमङ्घ्रिणा ॥ शिशुपालवधम् १६.४६ ॥ |
| क्रियाकलापप्रतिपत्तिहेतुं संक्षिप्तसारार्थविलासगर्भम् । अनन्तदैवज्ञसुतः स रामो मुहूर्तचिन्तामणिमातनोति ॥ मुहूर्तचिन्त.२॥ |
| क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु । तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥ रघुवंशम् ५.७ ॥ |
| क्रियाप्रबन्धादयमध्वराणामजस्रमाहूतसहस्रनेत्रः । शच्याश्चिरं पाण्डुकपोललम्बान्मन्दारशून्यानलकांश्चकार ॥ रघुवंशम् ६.२३ ॥ |
| क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः । अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ किरातार्जुनीयम् १.४ ॥ |
| क्रियेत चेत्साधुविभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया । या स्वौजसां साधयितुं विलासैस्तावत्क्षमानामपदं बहु स्यात् ॥ नैषधीयचरितम् ३.२३ ॥ |
| क्रीणीष्व मज्जीवितमेव पण्यमन्यन्नचेदस्ति तदस्तु पुण्यम् । जीवेशदातर्यदि ते न दातुं यशोऽपि तावत्प्रभवामि गातुम् ॥ नैषधीयचरितम् ३.८७ ॥ |
| क्रुध्यन्गन्धादन्यनागाय दूरादारोढारं धूतमूर्धावमत्य । घोरारावध्वनिताशेषदिक्के विष्के नागः पर्याणंसीत्स्व एव ॥ शिशुपालवधम् १८.२७ ॥ |
| क्रूराक्रान्तविमुक्तभं ग्रहणभं यत्क्रूरगन्तव्यभं त्रेधोत्पातहतं च केतुहतभं सन्ध्योदितं भं तथा । तद्वच्च ग्रहभिन्नयुद्धगतभं सर्वानिमान्सन्त्यजे- दुद्वाहे शुभकर्मसु ग्रहकृतान् लग्नस्य दोषानपि ॥ मुहूर्त.विवाहप्रकरणम् १०९॥ |
| क्रूरारिकारि कीरेककारकः कारिकाकरः । कोरकाकारकरकः करीरः कर्करोऽऽकरुक् ॥ शिशुपालवधम् १९.१०४ ॥ |
| क्रूरो जडो भवेत्पापः पटुः षट्कर्मकृद्बटुः । यज्ञार्थभाक् तथा मूर्खो रव्याद्यंशे तनौ क्रमात् ॥ मुहूर्त.संस्कारप्रकरणम् ४९॥ |
| क्रोधं प्रभो! संहर संहरेति यावद्गिरः खे मरुतां चरन्ति । तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ कुमारसंभवम् ३.७२ ॥ |
| क्रोधस्थायी रसो रौद्रो विभावाद्यैः समन्वितः । मात्सर्यहस्तनिष्पेष-संमोहाद्यैर्यथाक्रमम् ॥ चन्द्रालोकः६.८ ॥ |
| क्रोधानलो दहति हा हृदयं मदीयं, हस्तच संस्फुरति वैरि-वधे स-सङ्गः । भूयश्च लौहकवचाऽऽकुलमस्ति वक्षो यद्देश एष मम वैरि-जनेन विद्धः ॥ प्रतापविजयः-५८॥ |
| क्रोधान्धकारान्तरितो रणाय भ्रूभेदरेखाः स बभार तिस्रः । घनोपरुद्धः प्रभवाय वृष्टेरूर्ध्वांशुराजीरिव तिग्मरश्मिः ॥ किरातार्जुनीयम् १७.९ ॥ |
| क्रोधेनोद्धतधूतकुन्तलभरः सर्वाङ्गजो वेपथुः किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः । धत्ते कान्तिमिदं च वक्त्रमनयोर्भङ्गेन भिन्नं भ्रुवोश्चन्द्रस्योद्भटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥ (उत्तररामचरितम् ५.३५) |

| |
|---|
| क्रोशार्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण । शत्रुघ्नप्रतिविहितोपकार्यमार्यः साकेतोपवनमुदारमध्युवास ॥ रघुवंशम् १३.७९ ॥ |
| क्रौञ्चदुःखमपि वीक्ष्य शुचा यः श्लोकमेकमसृजत्कविरादयः । स त्वदुत्थकरुणः खलु काव्यं श्लोकसिन्धुमुचितं प्रबबन्ध ॥ नैषधीयचरितम् २१.७७ ॥ |
| क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाहयत । ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥ कुमारसंभवम् ५.१९॥ |
| क्लान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानां । सेव्यानां हतविनयैरिवावृतानां सम्पर्कं परिहरति स्म चन्दनानां ॥ किरातार्जुनीयम् ७.२९ ॥ |
| क्लिष्टमर्थो यदीयोऽर्थ-श्रेणिनिःश्रेणिमृच्छति । हरिप्रियापितृवधू-प्रवाहप्रतिमं वचः ॥ चन्द्रालोकः२.१२ ॥ |
| क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात्कनकासनस्थौ । जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम्॥ कुमारसंभवम् ७.८८॥ |
| क्लेशावहा भर्तुरलक्षणाहं सीतेति नाम स्वमुदीरयन्ती । स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावभक्तिभेदेन वधूर्ववन्दे ॥ रघुवंशम् १४.५ ॥ |
| क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता । शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ किरातार्जुनीयम् २.३९ ॥ |
| क्व तावानानन्दो निरतिशयविस्रम्भबहुलः क्व वाऽन्योन्यप्रेम क्व च नु गहनाः कौतुकरसाः । सुखे वा दुःखे वा क्व नु खलु तदैक्यं दययोस्तथाप्येष प्राणः स्फुरति न तु पापो विरमति ॥ (उत्तररामचरितम् ६.३३) |
| क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः । न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ॥ कुमारसंभवम् ४.२४ ॥ |
| क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः । नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ॥ कुमारसंभवम् ४.६ ॥ |
| क्व प्रयास्यसि नलेत्यलमुक्त्वा यात्रयात्र शुभयाजनि यन्नः । तत्तयैव फलसत्वरया त्वं नाध्वनोऽर्धनोऽर्धमिदमागमितः किम् ॥ नैषधीयचरितम् ५.७५ ॥ |
| क्व प्रस्थितासि करभोरु घने निशीथे प्राणाधिको वसति यत्र जनः प्रियो मे । एकाकिनी वद कथं न बिभेषि बाले नन्वस्ति पुङ्खितशरो मदनः सहायः ॥ अमरुशतकम्-६९॥ |
| क्व प्राप्यते स पतगः परिपृच्छ्यते यः प्रत्येमि तस्य हि पुरेव नलं गिरेति । सस्मार सस्मरमतिः प्रति नैषधीयं तत्रामरालयमरालमरालकेशी ॥ नैषधीयचरितम् १३.४ ॥ |
| क्व लक्षशो भारतभाररूपिणः, प्रकामचाराः यवना मदोद्धताः । क्व जन्मभू-भार-निवारणे रतः जनाः कियन्तो घृत-सङ्गर-व्रताः ॥ प्रतापविजयः-११० ॥ |
| क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः । तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ रघुवंशम् १.२ ॥ |
| क्वचन सत्प्रतिभाप्रकाशो, भासोऽथवाऽमरमणिः कविकालिदासः । तन्मे पुनर्जननि सर्जनमर्जयन्ती, किम्मन्यसे न भविता कविता- विकास॥ प्रतापविजयः-२॥ |
| क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य । पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ॥ रघुवंशम् १३.५७ ॥ |
| क्वचिज्जलापायविपाण्डुराणि धौतोत्तरीयप्रतिमच्छवीनि । अभ्राणि बिभ्रामुमाङ्गसङ्गविभक्तभस्मानमिव स्मरारिं ॥ शिशुपालवधम् ४.५॥ |
| क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव । अन्यत्र शुभ्रा शरदभ्रलेखा भक्तिर्भुवश्चन्दनकल्पितेव ॥ रघुवंशम् १३.५५ ॥ |
| क्वचित्तदालेपनदानपण्डिता कमप्यहंकारमगात्पुरस्कृता । अलम्भि तुङ्गासनसंनिवेशनादपूपनिर्माणविदग्धयादरः ॥ नैषधीयचरितम् १५.१२ ॥ |
| क्वचित्पथा संचरते सुराणां क्वचिद्घनानां पततां क्वचिच्च । यथाविधो मे मन्सोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ॥ रघुवंशम् १३.१९ ॥ |
| क्वचित्पृथ्वीशय्या क्वचिदपि च पर्यङ्कशयनम्, क्वचिच्छाकाहारः क्वचिदपि च शल्योदनरुचिः । क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो, मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ नीतिशतकम्८२ ॥ |
| क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव । अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ रघुवंशम् १३.५६ ॥ |
| क्वचित्प्रभा चान्द्रमसी तमोभिश्मुक्तामयी यष्टिरिवानुविद्धा । अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ॥ रघुवंशम् १३.५४ ॥ |
| क्वचिद् भूमिः शय्या क्वचिदपि च पर्यङ्कशयनं क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः । क्वचित्कन्धामाली क्वचिदपि च वर्याम्बरधरो मनस्वी कार्यार्थी न गणयति दुखं न च सुखम् ॥ पुरुषार्थोपदेशः-69॥ |
| क्वचिल्लसद्घननिकुरम्बकर्बुरः क्वचिद्धिरण्मयकणपुञ्जपिञ्जरः । क्वचिच्छरच्छशधरखण्डपाण्डुरः खुरक्षतक्षितितलरेणुरुद्ययौ ॥ शिशुपालवधम् १७..५६ ॥ |
| क्वापि प्रतारणमल ललनाजनानां, दृष्ट्वा क्वचित् सुरजनप्रतिमाऽपमानम् । हिन्दून्विलोक्य च पशूनिव हन्यमानान्, हा!! हृत्तलं भवति मे शतधा विदीर्णम् ॥ प्रतापविजयः-५६॥ |
| क्वापि यन्नभसि धूपजधूमैर्मेचकागुरुभवैर्भ्रमराणाम् । भूयते स्म सुमनःसुमनःस्रग्दामधामपटले पटलेन ॥ नैषधीयचरितम् २१.२२ ॥ |
| क्षणं बालो भूत्वा क्षणमपि युवा काम-रसिकः क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्ण-विभवः। जरा-जीर्णैरङ्गैर्नट इव बली-मण्डित-तनूर्नरः संसारान्ते विशति यमधानीय-वनिकाम्॥॥ वैराग्यशतकम् ५० ॥ |
| क्षणं यदन्तःकरणेन वृक्षाः फलन्ति कल्पोपदास्तदेव । अध्यूषुषस्तामभवन् जनस्य याः संपदस्ता मनसो प्यभूमिः ॥ शिशुपालवधम् ३.५८ ॥ |
| क्षणनीरवया यया निशि श्रितवप्रावलियोगपट्टया । मणिवेश्ममयं स्म निर्मलं किमपि ज्योतिरबाह्यमिज्यते ॥ नैषधीयचरितम् २.७८ ॥ |
| क्षणमतुहिनधाम्नि प्रेष्य भूयः पुरस्तादुपगतवति पाणिग्राहवद्दिग्वधूनां । द्रुततरमुपयाति स्रंसमानांशुकोऽसावुपपातिरिति नीचैः पश्चिमान्तेन चन्द्रः ॥ शिशुपालवधम् ११.६५ ॥ |
| क्षणमयमुपविष्टः क्ष्मातलन्यस्तपादः प्रणतिपरमवेक्ष्य प्रीतमह्नाय लोकं । भुवनतलमशेषं प्रत्यवेक्षिष्यमाणः क्षितिधरपीठादुत्थितः सप्तसप्तिः ॥ शिशुपालवधम् ११.४८ ॥ |

| |
|---|
| क्षणमात्ररोधि चलितेन कतिपयपदं नतभ्रुवः । स्रस्तभुजयुगगलद्वलयस्वनितं प्रतिक्षुतमिवोपशुश्रुवे ॥ शिशुपालवधम् १५.९१ ॥ |
| क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विहला । निमिमील नरोत्तमप्रिया हृतचन्द्रा तमसेव कौमुदी ॥ रघुवंशम् ८.३७ ॥ |
| क्षणमाश्लिषद्दघटितशैलशिखरकठिनांसमण्डनः । स्तम्भमुपहितविधूतिमसावधिकावधूनितसमस्तसंसदं ॥ शिशुपालवधम् १५.६ ॥ |
| क्षणमीक्षतः पथि जनेन किमिदमिति जल्पता मिथः । प्राप्य शिबिरमविशङ्किमनाः समनीनहद्द्रुतमनीकिनीमसौ ॥ शिशुपालवधम् १५.७१ ॥ |
| क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगानुदधिमहति राज्ये काव्यवद्दुर्विगाहे । गहनमपररात्रप्राप्तबुद्धिप्रसादाः कवय इव महीपाश्चिन्तयन्त्यर्थजातं ॥ शिशुपालवधम् ११.६ ॥ |
| क्षणादथैष क्षणदापतिप्रभः प्रभञ्जनाध्येयजवेन वाजिना । सहैव ताभिर्जनदृष्टिवृष्टिभिर्बहिः पुरोऽभूत्पुरुहूतपौरुषाः ॥ नैषधीयचरितम् १.६७ ॥ |
| क्षणे क्षणे यस्य रणे रतिर्भवेत्, पदे पदे यो विनिपातयेदरीन् । तदद्य किं विस्मय-कारणं बुधाः !, गृहे गृहे सम्प्रति चेत्स पूज्यते ॥ प्रतापविजयः-४१ ॥ |
| क्षणेन च प्रतिमुखतिग्मदीधितिप्रतिप्रभास्फुरदसिदुःखदर्शना । भयङ्करा भृशमपि दर्शनीयतां ययावसावसुरचमूश्च भूभृतां ॥ शिशुपालवधम् १७..४५ ॥ |
| क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः । राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥ रघुवंशम् २.५३ ॥ |
| क्षत्त्रजातिरुदियाय भुजाभ्यां या तवैव भुवनं सृजतः प्राक् । जामदग्न्यवपुषस्तव तस्यास्तौ लयार्थमुचितौ विजयेताम् ॥ नैषधीयचरितम् २१.६६ ॥ |
| क्षत्त्राणि रामः परिभूय रामात्क्षत्त्राद्यथाभज्यत स द्विजेन्द्रः । तथैव पद्मानभिभूय सर्वांस्त्वद्वक्त्रपद्मात्परिभूतिमेति ॥ नैषधीयचरितम् २२.१३३ ॥ |
| क्षत्रजातमपकारि वैरि मे तन्निहत्य बहुशः शमं गतः । सुप्तसर्प इव दण्डघट्टनाद्रोषितोऽस्मि तव विक्रमश्रवात् ॥ रघुवंशम् ११.७१ ॥ |
| क्षत्रियान्तकरणोऽपि विक्रमस्तेन मामवति नाजिते त्वयि । पावकस्य महिमा स गण्यते कक्षवज्ज्वलति सागरेऽपि यः ॥ रघुवंशम् ११.७५ ॥ |
| क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये । प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ किरातार्जुनीयम् २.११ ॥ |
| क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः सेढा दुस्सहशीतवाततपनक्लेशा न तप्तं तपः। ध्यातं वित्तमहर्निशं नियमितप्राणर्न शम्भोः पदं तत्तत् कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥ पुरुषार्थोपदेशः-21॥ |
| क्षान्तं न क्षमया गृहोचित-सुखं त्यक्तं न सन्तोषतः सोढो दुःसह-शीत-ताप-पवन-क्लेशो न तप्तं तपः। ध्यातं वित्तमहर्-निशं नित्यमित-प्राणैर्न शम्भोः पदं तत्-तत्-कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः॥॥ वैराग्यशतकम् ६ ॥ |
| क्षान्तिश्चेद्वचनेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनाम् ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलम् । किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥ नीतिशतकम् २१ ॥ |
| क्षितिगर्भधराम्बरालयैस्तलमध्योपरिपूरिणां पृथक् । जगतां किल याखिलाद्भुताजनि सारैर्निजचिह्नधारिभिः ॥ नैषधीयचरितम् २.८१ ॥ |
| क्षितितटशयनान्तादुत्थितं दानपङ्कप्लुतबहुलशरीरं शाययत्येष भूयः । मृदुचलदपरान्तोदीरितान्दूनिनादं गजपतिमधिरोहः पक्षकव्यत्ययेन ॥ शिशुपालवधम् ११.७ ॥ |
| क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः । प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शम्भुना ॥ किरातार्जुनीयम् ५.३ ॥ |
| क्षितिप्रतिष्ठोऽपि मुखारबिन्दैर्वधूजनश्चन्द्रमधश्चकार । अतीतनक्षत्रपथानि यत्र प्रासादशृङ्गाणि मुधाध्यरोहत् ॥ शिशुपालवधम्  ३.५१ ॥ |
| क्षितिरिन्दुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषम् । प्रथमा बहुरत्नसूरभूदपरा वीरमजीजनत्सुतम् ॥ रघुवंशम् ८.२८ ॥ |
| क्षिपति योऽनुवनं विततां बृहद्बृहतिकां इव रौचनिकीं रुचम् । अयमनेकहिरण्मयकंदरस्तव पितुर्दयितो जगतीधरः ॥ किरातार्जुनीयम् ५.४५ ॥ |
| क्षिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डं नापेक्षते स्म निकटोपगतां करेणुं । सस्मार वारणपतिः परिमीलिताक्षमिच्छाविहारवनवासमहोत्सवनां ॥ शिशुपालवधम् ५.५० ॥ |
| क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंशुकान्तं गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण । आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥ अमरुशतकम् -२॥ |
| क्षिप्रध्रुवान्त्यचरमैत्रमघासु शस्तं स्याच्छान्तिकं च सह मङ्गलपौष्टिकाभ्याम् । खेऽर्के विधौ सुखगते तनुगे गुरौ नो मौढ्यादिदुष्टसमये शुभदं निमित्ते ॥ मुहूर्त.नक्षत्रप्रकरणम्  ३४ ॥ |
| क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वा- रौद्रेऽर्कविद्गुरुसितेन्दुदिने व्रतं सत् । द्वित्रीषुरुद्ररविदिक्प्रमिते तिथौ च कृष्णादिमत्रिलवकेऽपि न चापराह्णे ॥ मुहूर्त.संस्कारप्रकरणम् ४०॥ |
| क्षिप्रान्त्यवस्विन्दुमरूज्जलेशा-दित्येष्वरिक्तारदिने प्रशस्तम् । स्याद्वाजिकृत्यं त्वथ हस्तिकार्यं कुर्यान्मृदुक्षिप्रचरेषु विद्वान् ॥ मुहूर्त.नक्षत्रप्रकरणम्  १८॥ |
| क्षिप्राहिमूलेन्द्रहरीशवायुभे प्रेतक्रिया स्याज्झषकुम्भगे विधौ । प्रेतस्य दाहं यमदिग्गमं त्यजेच्छय्यावितानं गृहगोपनादि च ॥ मुहूर्त.नक्षत्रप्रकरणम्  ४८॥ |
| क्षिप्रे मैत्रै वित्सितार्केज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे । योनेर्मैत्र्यां राशिपोश्चापि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन ॥ मुहूर्त.नक्षत्रप्रकरणम्  २६॥ |
| क्षीणचन्द्रकुजसौरिभास्करैर्मृत्युशस्त्रमृतिपङ्गुताज्वराः । स्युः क्रमेण बुधजीवभार्गवैः केन्द्रगैश्च शुभमिष्टतारया ॥ मुहूर्त.संस्कारप्रकरणम् ३०॥ |
| क्षीणयावकरसोऽप्यतिपानैः कान्तदन्तपदसम्भृतशोभः । आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥ किरातार्जुनीयम् ९.६२ ॥ |
| क्षीणेन मध्येऽपि सतोदरेण यत्प्राप्यते नाक्रमणं वलिभ्यः । सर्वाङ्गशुद्धौ तदनङ्गराज्यविजृम्भितं भीमभुवीह चित्रम् ॥ नैषधीयचरितम् ७.८१ ॥ |
| क्षीणेन्दुपूर्णचन्द्रेज्यज्ञभौमाऽर्काऽऽर्किभार्गवैः । त्रिकोणव्ययकेन्द्राष्टस्थितैरुक्तं फलं ग्रहैः ॥ मुहूर्त.संस्कारप्रकरणम् १९॥ |
| क्षीबतामनुगतास्वनुवेलं तासु रोषपरितोषवतीषु । अग्रहीन्न सशरं धनुरुज्झामास नूज्झितनिषङ्गमनङ्गः ॥ शिशुपालवधम् १०.३४ ॥ |

| |
|---|
| क्षीरनीरधिराकाश-पङ्कजं तेन सिद्धयति । विभक्त्यन्तं पदं वाक्यं तद्व्यूहोऽर्थसमाप्तितः ॥ चन्द्रालोकः १.१३ ॥ |
| क्षीरार्णवस्तवकटाक्षरुचिच्छटानामन्वेतु तत्र विकटायितमायताक्षि । वेलावनीवनततिप्रतिबिम्बचुम्बिकिर्मीरितोर्मिचयचारिमचापलाभ्याम् ॥ नैषधीयचरितम् ११.४ ॥ |
| क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः क्षीरो त्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः । गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदम् युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ नीतिशतकम्७६ ॥ |
| क्षीरोदन्वदपाः प्रमथ्य मथितादेशेऽमरैर्निर्मिते स्वाक्रम्यं सृजतस्तदस्य यशसः क्षीरोदसिंहासनम् । केषां नाजनि वा जनेन जगतामेतत्कवित्वामृतस्रोतःप्रोतपिपासुकर्णकलसीभाजाभिषेकोत्सवः ॥ नैषधीयचरितम् १२.७४ ॥ |
| क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा । नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना॥ कुमारसंभवम् ७.२६॥ |
| क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपिकष्टां दशा- मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि । मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ नीतिशतकम् २९ ॥ |
| क्षुत्क्षार्मोऽपि जराकृशोऽपि शिथिलप्रायोऽपिकष्टां दशा मापन्नोऽपि विपन्नधीधृतिरपि प्राणेषु गच्छत्स्वपि । मत्तेभेन्द्र विभिन्न कुम्भकबलग्रासकैबद्धस्पृहः किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ पुरुषार्थोपदेशः-51॥ |
| क्षुभितस्य महीभृतस्त्वयि प्रशमोपन्यसनं वृथा मम । प्रलयोल्लसितस्य वारिधेः परिवाहो जगतः करोति किं ॥ शिशुपालवधम् १६.५१ ॥ |
| क्षोणीभृतामतुलकर्कशविग्रहाणामुद्दामदर्पहरिकुञ्जरकोटिभाजाम् । पक्षच्छिदामयमुदग्रबलो विधाय मग्नं विपज्जलनिधौ जगदुज्जहार ॥ नैषधीयचरितम् १३.५ ॥ |
| क्षोभेण तेनाथ गणाधिपानां भेदं ययवाकृतिरीश्वरस्य । तरङ्गकम्पेन महाह्रदानां छायामयस्येव दिनस्य कर्तुः ॥ किरातार्जुनीयम् १७.२२ ॥ |
| क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतम् निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् । अन्येभ्यो वनदेवताकरतलैरापर्वभोगोत्थितैर् दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥ अभिज्ञानशाकुन्तलम् ४.५ ॥ |
| खगा वासोपेताः सलिलमवगाढो मुनिजनः प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् । परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ॥ (स्वप्नवासवदत्तम् १. १६) |
| खचरैः क्षयमक्षयेऽहिसैन्ये सुकृतैर्दुष्कृतवत्तदोपनीते । अयुगाचिरिव ज्वलन्नुषाथो रिपुरौदर्चिषमाजुहाव मन्त्रं ॥ शिशुपालवधम् २०.५९ ॥ |
| खड्गेन खण्डयति कोऽपि विपक्षि-पक्ष, कश्चित्करोति कुटिलच्छुरिका-प्रहारम् । कश्चिद् भिनत्ति किल सिंहनखेन कञ्चित्, कश्चित् कृपाणफलकेन खलं छिनत्ति ॥ प्रतापविजयः- ४२ ॥ |
| खड्गो दण्डशरासतोमरमथो कुन्तश्च पाशोऽङ्कुशो- ऽस्त्रं बाणस्त्वथ भक्ष्यमत्रपरमान्नं भक्षपक्वान्नकम् । दुग्धं दध्यपि चित्रितान्नगुडमध्वाज्यं तथा शर्कर- थो लेपो मृगनाभिकुङ्कुममथो पाटीरमृद्रोचनम् ॥ मुहूर्त.संक्रान्तिप्रकरणम् १५ ॥ |
| खण्डः किमु त्वद्गिर एव खण्डः किं शर्करा तत्पथशर्करैव । कृशाङ्गि तद्भङ्गिरसोत्थकच्छतृणं न दिक्षु प्रथितं तदिक्षुः ॥ नैषधीयचरितम् ८.१०१ ॥ |
| खण्डक्षोदमृदि स्थले मधुपयःकादम्बिनीतर्पणात्कृष्टे रोहति दोहदेन पयसां पिण्डेन चेत्पुण्ड्रकः । स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरामुद्देशाय ततोऽप्युदेति मधुराधारस्तमप्प्रत्ययः ॥ नैषधीयचरितम् २१.१५३ ॥ |
| खण्डश्लेषः पदानां चेदेकैकं पृथगर्थता । उच्छलद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥ चन्द्रालोकः ५.६३ ॥ |
| खण्डिताशंसया तेषां पराङ्मुखतया तया । आविवेश कृपा केतौ कृतोच्चैर्वानरं नरं ॥ किरातार्जुनीयम् १५.३ ॥ |
| खण्डितेन्द्रभवनाद्यभिमानाल्लङ्घते स्म मुनिरेष विमानान् । अर्थितोऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥ नैषधीयचरितम् ५.४ ॥ |
| खरामतो ३० ऽन्त्यादितिवह्निपित्र्यभे खवेदतः ४० के रदत ३२ श्च सार्पभे । खबाणतो ५० ऽश्वे धृतितो १८ ऽर्यमाम्बुपे कृते २० र्भगत्वाष्ट्रभविश्वजीवभे ॥ मुहूर्त.विवाहप्रकरणम् ४९॥ |
| खलालापाः सौढाः कथमपि तदाराधन-परैः निगृह्यान्तर्-बाष्पं हसितमपि शून्येन मनसा। कृतो वित्त-स्तम्भ-प्रतिहत-धियामञ्जलिरपि त्वमाशे मोघाशे किमपरमतो नर्तयसि माम्॥॥ वैराग्यशतकम् ४ ॥ |
| खलोल्लापाः सोढाः कथमपि तदाराधनपरै र्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा । कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि त्वमाशे! मोघाशे किमपरमतो नर्तयसि माम् ॥ पुरुषार्थोपदेशः-58॥ |
| खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः । तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ नीतिशतकम् ९० ॥ |
| खुराग्रभागेण विदारयन् भुवं, निशामयँश्चाप्रियभैरवं स्वम् । क्षणप्रभोत्पात-निपात चञ्चलः, न कं चकाराऽऽर्ततरं स चेतकः॥ प्रतापविजयः-१३२ ॥ |
| खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः। तटाभिघातादिव लग्नपङ्के धुन्वन्मुहुः प्रोतघने विषाणे॥ कुमारसंभवम् ७.४९॥ |
| गङ्गतरङ्गकणशीकरशीतलानि विद्याधराध्युषितचारुशिलातलानि । स्थानानि किं हिमवतः प्रलयं गतानि यत् सावमानपरपिण्डरता मनुष्याः ॥ पुरुषार्थोपदेशः-87॥ |
| गङ्गां भगीरथेनेव पूर्वेषां पावनक्षमाम् । इच्छता संततिं न्यस्ता तेन मन्त्रिषु कोसला ॥ रघुवंशम् १.३४ ॥ |

| |
|---|
| गङ्गा-तरङ्ग-कण-शीकर-शीतलानि विद्याधराध्युषित-चारु-शिला-तलानि। स्थानानि किं हिमवतः प्रलयं गतानि यत्सावमान-पर-पिण्ड-रता मनुष्याः॥॥ वैराग्यशतकम् २४ ॥ |
| गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यसनविधिना योगनिद्रारतस्य । किं तैर्भाव्यं मम सुदिवसैर्येषु ते निर्विशङ्काः कण्डूयन्ते जरठहरिणाः शृङ्गमङ्गेमदीये ॥ पुरुषार्थोपदेशः-64॥ |
| गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य । किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्गे मदीये ॥ वैराग्यशतकम् ९८ ॥ |
| गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे । साधने हि नियमोऽन्यजनानां योगिनां तु तपसाखिलसिद्धिः ॥ नैषधीयचरितम् ५.३ ॥ |
| गच्छतापि गगनाग्रमुच्चकैर्यस्य भूधरगरीयसाङ्घ्रिणा । क्रान्तकन्धर इवाबलो बलिः स्वर्गभर्तुरगमत्सुबन्धतां ॥ शिशुपालवधम् १४.७६ ॥ |
| गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः । सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥ मेघदूतम्, पूर्वमेघः ३७॥ |
| गच्छन्तीरलसमवेक्ष्य विस्मयिन्यस्तास्तन्वीर्न विदधिरे गतानि हंस्यः । बुद्ध्वा वा जितमपरेण काममाष्कुर्वीत स्वगुणमपत्रपः क एव ॥ शिशुपालवधम् ८.७ ॥ |
| गजकदम्बकमेचकमुच्चकैर्नभसि वीक्ष्य नवाम्बुदमम्बरे । अभिससार न वल्लभमङ्गना न चकमे च कमेकरसं रहः ॥ शिशुपालवधम् ६.२६ ॥ |
| गजद्वयसीरपि हैमनस्तुहिनयन्सरितः पृषतां पतिः । सलिलसन्ततिमध्वगयोषितामतुनतातनुतापकृतं दृशाम् ॥ शिशुपालवधम् ६.५५ ॥ |
| गजव्रजाक्रमणभरावनम्रया रसातलं यदखिलमानशे भुवा । नभस्तलं भहुलतरेण रेणुना ततोऽगमत्त्रिजगदिवैकतां स्फुटं ॥ शिशुपालवधम् १७.६५ ॥ |
| गणेशविष्णुवाग्रमाः प्रपूज्य पञ्चमाब्दके तिथौ शिवार्कदिग्द्विषट्शरत्रिके रवावुदक् । लघुश्रवोऽनिलान्त्यभादितीशतक्षमित्रभे चरोनसत्तनौ शिशोर्लिपिग्रहः सतां दिने ॥ मुहूर्त.संस्कारप्रकरणम् ३७॥ |
| गण्डभित्तिषु पुरा सदृशीषु व्याञ्जि नाञ्जितदृशां प्रतिमेन्दुः । पानपाटलितकान्तिषु पश्चाल्लोध्रचूर्णतिलकाकृतिरासीत् ॥ शिशुपालवधम् १०.३१ ॥ |
| गण्डान्तं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलान्तकं दास्रं पौष्णमथोपरागदिवसं पातं तथा वैधृतिम् । पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्धं स्वपत्नीगमे भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभम् ॥ मुहूर्त.संस्कारप्रकरणम् ५॥ |
| गण्डान्तेन्द्रभशूलपातपरिघव्याघातगण्डावमे सङ्कान्तिव्यतिपातवैधृतिसिनीवालीकुहूदर्शके । वज्रे कृष्ण चतुर्दशीषु यमघण्टे दग्धयोगे मृतौ विष्टौ सोदरभे जनिर्न पितृभे शस्ता शुभा शान्तितः ॥ मुहूर्त.नक्षत्रप्रकरणम् ५७॥ |
| गण्डूषमुज्झितवता पयसः सरोषं नागेन लब्धपरवारणमारुतेन । अम्भोधिरोधसि पृथुप्रतिमानभाग-रुद्धोरुदन्तमुसलप्रसरं निपेते ॥ शिशुपालवधम् ५.३६ ॥ |
| गण्डोज्वलामुज्ज्वनाभिचक्रया विराजमानां नवयोदरश्रिया । कश्चित्सुखं प्राप्तुमनाः सुसारथी रथीं युयोजाधिधुरां वधूमिव ॥ शिशुपालवधम् १२.८ ॥ |
| गत एव न ते निवर्तते स सखा दीप इवानिलाहतः । अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ॥ कुमारसंभवम् ४.३० ॥ |
| गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वं ज्वलनम हविर्भुजः । पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः ॥ शिशुपालवधम् १.२ ॥ |
| गतचरदिनस्यायुर्भ्रंशे दयोदयसंकुचत्कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषाम् । इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायतां सह सहचरैरालोक्यन्तेऽधुना मधुपारणाः ॥ नैषधीयचरितम् १९.३ ॥ |
| गतधृतिरवलम्बितुं बतासूननलमनालपनादहं भवत्याः । प्रणयति यदि न प्रसादबुद्धिर्भव मम मानिनि जीविते दयालुः ॥ शिशुपालवधम् ७.१० ॥ |
| गतमनुगतवीणैरेकतां वेणुनादैः कलमविकलतालं गायकैर्बोधहेतोः । असकृदनवगीतं गीतमाकर्णयन्तः सुखमुकुलितनेत्रा यान्ति निद्रां नरेन्द्राः ॥ शिशुपालवधम् ११.१० ॥ |
| गतया निरन्तरनिवासमध्युरः परिनाभि नूनमवमुच्य वारिजं । कुरराजनिर्दय निपीडनाभयान्मुखमध्यरोहि मुरविद्विषः श्रिया ॥ शिशुपालवधम् १३.११ ॥ |
| गतया पुरः प्रतिगवाक्षमुखं दधती रतेन भृशमुत्सुकताम् । मुहुरन्तारालभुवमस्तगिरेः सवितुश्च योषिदमिमीत दृशा ॥ शिशुपालवधम् ९.२ ॥ |
| गतयोरभेदमिति सैन्ययोस्तयोरथ भानुतजह्नुतनयाम्भसोरिव । प्रतिनादितामरविमानमानकैर्नितरां मुदा परमयेव दध्वने ॥ शिशुपालवधम् १३.२५ ॥ |
| गतवतामपि विस्मयमुच्चकैरसकलामलपल्लवलीलया । मधुकृतामसकृद्गिरमावली रसकलामलपल्लवलीलया ॥ शिशुपालवधम् ६.७८ ॥ |
| गतवति नखलेखालक्ष्यतामङ्गरागे समददयितपीताताम्रबिम्बाधराणां । विरहविधुरमिष्टा सत्सखीवङ्गनानां हृदयमवललम्बे रात्रिसम्भोगलक्ष्मीः ॥ किरातार्जुनीयम् ९.७८ ॥ |
| गतवत्यराजत जपाकुसुमस्तबकद्युतौ दिनकरेऽवनतिं । बहलानुरागकुरुविन्ददलप्रतिबद्धमध्यमिव दिग्वलयं ॥ शिशुपालवधम् ९.८ ॥ |
| गतस्पृहो प्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया । तनोति नस्तामुदितात्मगौरवो गुरुस्तवैवागम एष धृष्टताम् ॥ शिशुपालवधम् १.३० ॥ |
| गता न या सप्तशताब्दकाञ्वधि, प्रतापिनीत्वात् परिपन्थि वश्यताम् । इयं पुरी सैव महामनस्विनी, ध्वजावती, तच्छिरसा नमस्यताम् ॥ प्रतापविजयः-३३॥ |
| गता यदुत्सङ्गतले विशालतां द्रुमाः शिरोभिः फलगौरवेण ताम् । कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दति स्म तान् ॥ नैषधीयचरितम् १.९८ ॥ |
| गतानुगतिको लोकः कुट्टनीमुपदेशिनीम् । प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजम् ॥ नीतिसंग्रहस्य मित्र-१.१० ॥ |
| गतान्पशूनां सहजन्मबन्धुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः । ददर्श गोपानुपधेनु पाण्डवः कृतानुकारानिव गोभिरार्जवे ॥ किरातार्जुनीयम् ४.१३ ॥ |

| |
|---|
| गते प्रेमाबन्धे प्रणयबहुमाने विगलिते निवृत्ते सद्भावे जन इव जने गच्छति पुरः । तद् उत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्न जाने को हेतुर्दलति शतधा यन् न हृदयम् ॥ अमरुशतकम्-३८॥ |
| गते मुखच्छदपटसादृशीं दृशः पथस्थिरो दधति घने रजस्यपि । मदानिलैरधिमधुचूतगन्धिभिर्द्विपा द्विपानभिययुरेव रंहसा ॥ शिशुपालवधम् १७..६७ ॥ |
| गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितम्बिभिः । मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥ किरातार्जुनीयम् ८.२९ ॥ |
| गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः क्लृप्तच्छेद्यैः कनककमलैः कर्णविभ्रंशिभिश्च । मुक्तालग्नस्तनपरिमलैश्छिन्नसूत्रैश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ मेघदूतम्, उत्तरमेघः ७ ॥ |
| गत्यूनमर्गगतयोऽपि गतोरुमार्गाः स्वैरं समाचकृषिरे भुवि वेल्लनाय । दर्पोदयोल्लसितफेनजलानुसार-संलक्ष्यपल्ययनवर्ध्रपदास्तुरङ्गाः ॥ शिशुपालवधम् ५.५३ ॥ |
| गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः । शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं राशीभूतः प्रतिनिशमिव त्र्यम्बकस्याट्टहासः ॥ मेघदूतम्, पूर्वमेघः ५८॥ |
| गत्वा नूनं वैबुधं सद्म रम्यं मूच्छाभाजामाजगामान्तरात्मा । भूयो दृष्टप्रत्ययाः प्राप्तसंज्ञाः साधीयस्ते यद्रणायाद्रियन्ते ॥ शिशुपालवधम् १८.६३ ॥ |
| गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ मेघदूतम्, उत्तरमेघः १५ ॥ |
| गत्वोद्रेकं जघनपुलिने रुद्धमध्यप्रदेशः क्रमन्नूरुद्रुमभुजलताः पूर्णनाभीह्रदान्ताः । उल्लङ्घ्योच्चैः कुचतटभुवं प्लावयन्नोकूपान्स्वेदपूरो युवतिसरितां व्याप गण्डस्थलानि ॥ शिशुपालवधम् ७.७४ । |
| गन्धं उद्धतरजःकणवाही विक्षिपन्विकसतां कुमुदानां । आदुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः ॥ किरातार्जुनीयम् ९.३१ ॥ |
| गन्धश्च धाराहतपल्वलानां कादम्बमर्धोद्गतकेसरं च । स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिनसह्यानि विना त्वया मे ॥ रघुवंशम् १३.२७ ॥ |
| गभीरताविजितमृदङ्गनादया स्वनश्रिया हतरिपुहंसहर्षया । प्रमोदयन्नथ मुखरान्कलापिनः प्रतिष्ठते नवघनवद्रथः स्म सः ॥ शिशुपालवधम् १७..२९ ॥ |
| गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् । तस्मात्तस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ मेघदूतम्, पूर्वमेघः ४०॥ |
| गम्यतामुपगते नयनानां लोहितायाति सहस्रमरीचौ । आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥ किरातार्जुनीयम् ९.४ ॥ |
| गरीयसः प्रचुरमुखस्य रागिणो रजोऽभवद्व्यवहितसत्वमुत्कटं । सिसृक्षतः सरसिजजन्मनो जगद्बलस्य तु क्षयमपनेतुमिच्छतः ॥ शिशुपालवधम् १७..५४ ॥ |
| गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि । अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन ॥ रघुवंशम् १३.४ ॥ |
| गर्भैमैणमदकर्दमसान्द्रं भाजनानि रजतस्य भजन्ति । यत्र साम्यमगमन्नमृतांशोरङ्करङ्कुकलुषीकृतकुक्षेः ॥ नैषधीयचरितम् २१.२६ ॥ |
| गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलि नागकेसरम् । स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥ नैषधीयचरितम् १.९२ ॥ |
| गलद्वेद्यान्तरोद् भेदं हृदयेष्वजडात्मनाम् । मिलन्मलयजालेप इवाह्लादं विकासयन् ॥ चन्द्रालोकः६.२ ॥ |
| गवलासितकान्ति तस्य मध्यस्थितघोरायतबाहुदण्डनासं । ददृशे कुपितान्तकोन्नमद्भ्रूयुगभीमाकृति कार्मुकं जनेन ॥ शिशुपालवधम् २०.१२ ॥ |
| गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा सान्द्रस्नेहरसातिरेकविगलत्श्रीमन्नितम्बाम्बरा । मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥ अमरुशतकम्-३६॥ |
| गाढाश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं शय्या सम्प्रति कोमलाङ्गि परुषेत्यारोप्य मां वक्षसि । गाढौष्ठग्रहपूर्वमाकुलतया पादाग्रसंदंशके- नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत्प्रस्तुतम् ॥ अमरुशतकम्-७२॥ |
| गात्रं सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिर्दृष्टिर्नश्यति वर्धते वधिरता वक्त्रं च लालायते। वाक्यं नाद्रियते च बान्धव-जनो भार्या न शुश्रूषते हा कष्टं पुरुषस्य जीर्ण-वयसः पुत्रोऽप्यमित्रायते॥॥ वैराग्यशतकम् ७३ ॥ |
| गान्धर्वादिविवाहेऽर्काद्वेद-४ नेत्र-२ गुणे-३ न्दवः-१ । कु-१ युगा-४ ङ्गा-३ ग्नि-३ भू-१ रामा-३ स्त्रिपद्यां न शुभाः शुभाः ॥ मुहूर्त.विवाहप्रकरणम् ९५॥ |
| गाम्भीर्यं दधदपिरन्तुमङ्गनाभिः संक्षोभं जघनविघट्टनेन नीतः । अम्भोधिविकसितवारिजाननोऽसौ मर्यादां सपदि विलङ्घयांबभूव ॥ शिशुपालवधम् ८.२६ ॥ |
| गिरः श्रुता एव तव श्रुवःसुधाः श्लथा भवन्नाम्नि तु न श्रुतिस्पृहा । पिपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि ॥ नैषधीयचरितम् ९.५ ॥ |
| गिरानुकम्पस्व दयस्व चुम्बनैः प्रसीद शुश्रूषयितुं मया कुचौ । निशेव चान्द्रस्य करोत्करस्य यन्मम त्वमेकासि नलस्य जीवितम् ॥ नैषधीयचरितम् ९.१२ ॥ |
| गिरिशभुजगमित्राः पित्र्यवस्वम्बुविश्वेऽभिजिदथ च विधाताऽपीन्द्र इन्द्रानलौ च । निरृतिरुदकनाथोऽप्यर्यमाथो भगः स्युः क्रमश इह मुहूर्ता वासरे बाणचन्द्राः ॥ मुहूर्त.विवाहप्रकरणम् ५२॥ |
| गीतान्तरेषु श्रमवारिलेशैः किंचित्समुच्छ्वासितपत्रलेखम् । पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे ॥ कुमारसंभवम् ३.३८ ॥ |
| गीर्देवतागीतयशःप्रशस्तिः श्रिया तडित्त्वल्ललिताभिनेता । मुदा तदाऽवैक्षत केशवस्तं स्वयंवराडम्बरमम्बरस्थः ॥ नैषधीयचरितम् १०.५१ ॥ |

| |
|---|
| गीर्वाणाऽम्बुप्रतिष्ठापरिणयदहनाधानचौलोपवीत- क्षोणीपालाभिषेकोदवसितदिशनं नैव याम्यायने स्यात् । नो वा बाल्यास्तवार्द्धे सुरगुरुसितयोर्नैव केतूदये स्यात् पक्षं वार्द्धं च केचिज्जहति तमपरे यावदीक्षां तदुग्रे ॥ मुहूर्त.संस्कारप्रकरणम् २६॥ |
| गुच्छालयस्वच्छतमोदबिन्दुवृन्दाभमुक्ताफलफेनिलाङ्के । माणिक्यहारस्य विदर्भसुभ्रूपयोधरे रोहति रोहितश्रीः ॥ नैषधीयचरितम् ७.७६ ॥ |
| गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक- स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चाभिधोऽयं गिरिः । एतस्मिन्प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै- रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः ॥ (उत्तररामचरितम् २.२९) |
| गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः । पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ॥ रघुवंशम् ८.११ ॥ |
| गुणवदगुणवद्वा कुर्वता कार्यजातं  परिणतिरवधार्या यत्नतः पण्डितेन । अतिरभसकृतानां कर्मणामाविपत्ते- र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ नीतिशतकम्९९ ॥ |
| गुणसम्पदा समधिगम्य परं महिमानमत्र महिते जगताम् । नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुं औषधयः ॥ किरातार्जुनीयम् ५.२४ ॥ |
| गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः । आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः  ॥ नीतिसंग्रहस्य मित्र-०.४६ ॥ |
| गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहापयन्ति । न लोकमालोकयथापवर्गात्त्रिवर्गमर्वाञ्चममुञ्चमानम् ॥ नैषधीयचरितम् ६.१०५ ॥ |
| गुणानामास्थानीं नृपतिलकनारीति विदितां रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः । भवित्री वैदर्भीमधिकमधिकण्ठं रचयितुं परीरम्भक्रीडाचरणशरणामन्वहमहम् ॥ नैषधीयचरितम् १४.९१ ॥ |
| गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः । परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ किरातार्जुनीयम् १.३१ ॥ |
| गुणेन केनापि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम् । रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ॥ नैषधीयचरितम् १०.४४ ॥ |
| गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः । तमेव चतुर्नतेशं रत्नैरिव महार्णवाः ॥ रघुवंशम् १०.८६ ॥ |
| गुणौ पयोधेर्निजकारणस्य न हानिवृद्धी कथमेतु चन्द्रः । चिरेण सोऽयं भजते तु यत्ते न नित्यमम्भोधिरिवात्र चित्रम् ॥ नैषधीयचरितम् २२.७४ ॥ |
| गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः । जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः ॥ रघुवंशम् १०.६१ ॥ |
| गुम्फः कारणमाला स्याद्यथा प्राक्प्रान्तकारणैः । नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥ चन्द्रालोकः ५.८७ ॥ |
| गुम्फो गिरां शमननैषाधयोः समानः शङ्कामनेकनलदर्शनजातशङ्के । चित्ते विदर्भवसुधाधिपतेः सुताया यन्निर्ममे खलु तदेष पिपेष पिष्टम् ॥ नैषधीयचरितम् १३.२ ॥ |
| गुरवोऽपि निषद्य यन्निदद्र्धनुषि क्ष्मापतयो न वाच्यमेतत् । क्षयितापदि जाग्रतोऽपि नित्यं ननु तत्रैव हि तेऽभवन्निषण्णाः ॥ शिशुपालवधम् २०.३४ ॥ |
| गुरुकोपरुद्धपदमापदसितयवनस्य रोद्रतां । व्यात्तमशितुमिव सर्वजगद्विकरालमास्यकुहरं विवक्षतः ॥ शिशुपालवधम् १५.७६ ॥ |
| गुरुतरकलनूपुरानुनादं सललितनर्तितवामपादपद्मा । इतरदतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम ॥ शिशुपालवधम् ७.१८ ॥ |
| गुरुतापविशुष्यदम्बुशुभ्राः क्षणमालग्नकृशानुताम्रभासः । स्वमसारतया मषीभवन्तः पुनराकारमवापुराम्बुवाहाः ॥ शिशुपालवधम् २०.६३ ॥ |
| गुरुनिःश्वसन्नथ विलोलसदवथुवपुर्वचोविषं । कीर्णदशनकिरणाग्निकणः फणवानिवैष विससर्ज चेदिपः ॥ शिशुपालवधम् १५.६२ ॥ |
| गुरुनिबिडनितम्बबिम्बभाराक्रमणनिपीडितमङ्गनाजनस्य । चरणयुगमसुस्रुवत्पदेषु स्वरसमसक्तमलक्तकच्छलेन ॥ शिशुपालवधम् ७.६ ॥ |
| गुरुभिः प्रतिपादितां वधूमपहृत्य स्वजनस्य भूपतेः । जनकोऽसि जनार्दन स्फुटं हतधर्मार्थतया मनोभुवः ॥ शिशुपालवधम् १६.४९ ॥ |
| गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः  ॥ नीतिसंग्रहस्य मित्र-१.११३ ॥ |
| गुरुर्लग्नकोणे कुजोऽरौ सितः खे स राजा सदा मोदते राजलक्ष्म्या । तृतीयायगौ सौरिसूर्यौ खबन्ध्वोर्गुरुश्चेद्धरित्री स्थिरा स्यान्नृपस्य ॥ मुहूर्त.राजाभिषेकप्रकरणम् ४॥ |
| गुरुवेगविराविभिः पतत्रैरिषवः काञ्चनपिङ्गलभासः । विनतासुतवत्तलं भुवः स्म व्यथितभ्रान्तभुजङ्गमं विशन्ति ॥ शिशुपालवधम् २०.३० ॥ |
| गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात् । रविशुद्धिवशाच्छुभो वराणामुभयोश्चन्द्रविशुद्धितो विवाहः ॥ मुहूर्त.विवाहप्रकरणम् १२॥ |
| गुरुस्थिराण्युत्तमवंशजत्वाद्विज्ञातसाराण्यनुशीलनेन । केचित्समाश्रित्य गुणान्वितानि सुहृत्कुलानीव धनूंषि तस्थुः ॥ किरातार्जुनीयम् १६.२८ ॥ |
| गुरोः स चानन्तरमन्तज्ञः पुंसां पुमानाद्य इवावतीर्णः । उपक्रमैरस्खलितैश्चतुर्भिश्चतुर्दिगीशश्चतुरो बभूव ॥ रघुवंशम् १८.१५ ॥ |
| गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यञ्च विधिं दिलीपः । दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥ रघुवंशम् २.२३ ॥ |
| गुरोनियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् । अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥ कुमारसंभवम् ३.१७॥ |
| गुरोरपीमां भणदोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम् । श्रमः स्मरस्यैव भवं विहाय मुक्तिं गतानामनुतापनाय ॥ नैषधीयचरितम् १०.१३२ ॥ |
| गुरोर्नियोगाद्वनितां वनान्ते साध्वीं सुमित्रातनयो विहास्यन् । अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा शितया पुरस्तात् ॥ रघुवंशम् १४.५१ ॥ |
| गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे । तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥ रघुवंशम् १३.३ ॥ |
| गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् । गतो वदायान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥ रघुवंशम् ५.२४ ॥ |

| |
|---|
| गुर्वीरजस्रं दृषदः समन्तादुपर्युपर्यम्बुमुचां वितानैः । विन्ध्यायमानं दिवसस्य भर्तुमार्गं पुना रोद्धुमिवोन्नमद्भिः ॥ शिशुपालवधम् ४.२॥ |
| गूढाक्षेपो विधौ व्यक्ते निषेधे चास्फुटे सति । हर सीतां सुखं किं तु चिन्तयान्तकढौकनम् ॥ चन्द्रालोकः ५.७३ ॥ |
| गृहप्रवेशे यात्रायां विवाहे च यथाक्रमम् । भौमाश्विनीं शनौ ब्राहमं गुरौ पुष्यं विवर्जयेत् ॥ मुहूर्तचिन्त.२२ ॥ |
| गृहमागताय कृपया च कथमपि निसर्गदक्षिणाः । क्षान्तिमहितमनसो जननीस्वसुरात्मजाय चुकुपुर्न पाण्डवाः ॥ शिशुपालवधम् १५.६८ ॥ |
| गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ । करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतं ॥ रघुवंशम् ८.६७ ॥ |
| गृहीतमुक्तरीत्यर्थ-श्रेणिरेकावली मता । नेत्रे कर्णान्तविश्रान्ते कर्णौ दोर्मूलदोलिनौ ॥ चन्द्रालोकः ५.८८ ॥ |
| गृहेशतत्स्त्रीसुतवित्तनाशोऽर्केन्द्वीज्यशुक्रे विबलेऽस्तनीचे । कर्तुः स्थितिर्नो विधुवास्तुर्नोभे पुरःस्थिते पृष्ठगते खनिः स्यात् ॥ मुहूर्त.वास्तुप्रकरणम् ६॥ |
| गेहाद्गेहान्तरमपि गमस्तर्हि यात्रेति गर्गः सीम्नः सीमन्तरमपि भृगुर्बाणविक्षेपमात्रम् । प्रस्थानं स्यादिति कथयतेऽथो भरद्वाज एवं यात्रा कार्या बहिरिह पुरात्स्याद्वसिष्ठो ब्रवीति ॥ मुहूर्त.यात्राप्रकरणम् ९३॥ |
| गेहाद्यारम्भेऽर्कभाद्वत्सशीर्षे रामैर्दाहो वेदभैरग्रपादे । शून्यं वेदैः पृष्ठपादे स्थिरत्वं रामैः पृष्ठे श्रीर्युगैर्दक्षकुक्षौ ॥ मुहूर्त.वास्तुप्रकरणम् १३॥ |
| गोत्रानुकूलत्वभवे विवाहे तत्प्रातिकूल्यादिव गोत्रशत्रुः । पुरश्चकार प्रवरं वरं यमायन्सखायं ददृशे तया सः ॥ नैषधीयचरितम् १४.६२ ॥ |
| गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतं नीलोद्वाहमथातिपन्नशिशुसंस्कारान् सुरस्थापनम् ।॥ मुहूर्तचिन्त.४६॥ |
| गोधाजाहकसूकराहिशशकानां कीर्तनं शोभनं नो शब्दो न विलोकनं च कपिऋक्षाणामतो व्यत्ययः । नद्युत्तारभयप्रवेशसमरे नष्टार्थसंवीक्षणे व्यत्यस्ताः शकुना नृपेक्षणविधौ यात्रोदिताः शोभनाः ॥ मुहूर्त.यात्राप्रकरणम् १०४॥ |
| गोपानसीषु क्षणमास्थितानामालम्बिभिश्चन्द्रकिणां कलापैः । हरिन्मणिश्यामतृणाभिरामैर्गृहाणि नीध्रैरिव यत्र तेजुः ॥ शिशुपालवधम्  ३.४८ ॥ |
| गोवर्धनाचलकलापिचयप्रचारनिर्वासिताहिनि घने सुरभिप्रसूनैः । तस्मिन्ननेन सह निर्विश निर्विशङ्कं वृन्दावने वनविहारकुतूहलानि ॥ नैषधीयचरितम् ११.१०७ ॥ |
| गोष्ठेषु गोष्ठीकृतमण्डलासनान्सनादमुत्थाय मुहुः स वल्गतः । ग्राम्यानपश्यत्कपिशं पिपासतः स्वगोत्रसङ्कीर्तनभावितात्मनः ॥ शिशुपालवधम् १२.३८ ॥ |
| गोसिंहनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभोऽलिझषाङ्गनाश्च । कर्को धनुस्तुलभमेषघटाश्च तद्व-द्वर्गाः स्वपञ्चमपरा बलिनः स्युरैन्द्र्याः ॥ मुहूर्त.वास्तुप्रकरणम् २॥ |
| गोस्त्रीझषे धाततिथिस्तु पूर्णा भद्रा नृयुक्कर्कटकेऽथ नन्दा । कौर्प्याजयोर्नक्रधटे च रिक्ता जया धनुःकुम्भहरौ न शस्ताः ॥ मुहूर्त.यात्राप्रकरणम् ३०॥ |
| गौणं सारोपमुद्दिष्टमिन्दुर्मुखमितीदृशम् । गौणं साध्यवसानं स्यादिन्दुरेवेदमीदृशम् ॥ चन्द्रालोकः९.११ ॥ |
| गौरवाद्यदपि जातु मन्त्रिणां दर्शनं प्रकृतिकाङ्क्षितं ददौ । तद्गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितं ॥ रघुवंशम् १९.७ ॥ |
| गौरीव पत्या सुभगा कदाचित्कर्तेयमप्यर्धतनूसमस्याम् । इतीव मध्ये विदधे विधाता रोमावलीमेचकसूत्रमस्याः ॥ नैषधीयचरितम् ७.८३ ॥ |
| गौरीश्रवः केतकपत्रभंगमाकृष्य हस्तेन ददन्मुखाग्र । विघ्नं मुहूर्ताकलितद्वितीयदंतप्ररोहो हरतु द्विपास्यः ॥ मुहूर्तचिन्त.१ ॥ |
| गौरे प्रिये भातितमां तमिस्रा ज्यौत्स्नी च नीले दयिता यदस्मिन् । शोभाप्तिलोभादुभयोस्तयोर्वा सितासितां मूर्तिमयं बिभर्ति ॥ नैषधीयचरितम् २२.९७ ॥ |
| गौर्नीलः पाचको दण्डी डित्थः कंस इति क्रमात् । कं संहिनस्ति कंसारिर्नरं च कं समाश्रितम् ॥ चन्द्रालोकः १०.३ ॥ |
| ग्रथितमौलिरसौ वनमालया तरु पलाशसवर्णतनुच्छदः । तुरगवल्गनचण्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु ॥ रघुवंशम् ८.५१ ॥ |
| ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया प्राज्ञंमन्यमना हठेन पठिती मास्मिन्खलः खेलतु । श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादयत्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ॥ नैषधीयचरितम् २२.१५४ ॥ |
| ग्रन्थिमुद्ग्रथयितुं हृदयदेशे वाससः स्पृशति मानधनायाः । भ्रूयुगेण सपदि प्रतिपेदे रोमभिश्च सममेव विभेदः ॥ शिशुपालवधम् १०.६३ ॥ |
| ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना । मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहं उपापतिसेविनः ॥ किरातार्जुनीयम् ५.१४ ॥ |
| ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदम् । असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥ रघुवंशम् ३.१३ ॥ |
| ग्रामेष्वात्मविषृटेषु यूपचिहनेषु यज्वनां । अमोघाः प्रतिगृहणन्तावर्घ्यानुपदमाशिषः ॥ रघुवंशम् १.४४ ॥ |
| ग्राम्यभावमपहातुमिच्छवो योगमार्गपतितेन चेतसा । दुर्गमेकमपुनर्निवृत्तये यं विशन्ति वशिनं मुमुक्षवः ॥ शिशुपालवधम् १४.६४ ॥ |
| ग्रीवाद्भुतैवावटुशोभितापि प्रसाधिता माणवकेन सेयम् । आलिङ्ग्यतामप्यवलम्बमाना सुरूपताभागखिलोर्ध्वकाया ॥ नैषधीयचरितम् ७.६६ ॥ |
| ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् । दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ अभिज्ञानशाकुन्तलम् १.७  ॥ |
| ग्लानिच्छेदि क्षुत्प्रबोधाय पीत्वा रक्तारिष्टं शोषिताजीर्णशेषं । स्वादुंकारं कालखण्डोपदंशं क्रोष्टा डिम्बं व्यष्वणद्व्यस्वनञ्च ॥ शिशुपालवधम् १८.७७ ॥ |
| घटो झषो गौर्मिथुनं मेषकन्यालितौलिनः । धनुः कर्को मृगः सिंहश्चैत्रादौ शून्यरशयः ॥ मुहूर्तचिन्त.१६ ॥ |
| घण्डानादो निस्वनो डिण्डिमानां ग्रैवेयाणामारवो बृंहितानि । आमेतीव प्रत्यवोचन्गजानामुत्साहार्थं वाचमाधोरणस्य ॥ शिशुपालवधम् १८.१० ॥ |

| |
|---|
| घनं विदार्यार्जुनबाणपूगं ससारबाणोऽयुगलोचनस्य । घनं विदार्यार्जुनबाणपूगं ससार बाणोऽयुगलोचनस्य ॥ किरातार्जुनीयम् १५.५० ॥ |
| घनजालनिभैर्दुरासदाः परितो नागकदम्बकैस्तव । नगरेषु भवन्तु वीथयः परिकीर्णा वनजैर्मृगादिभिः ॥ शिशुपालवधम् १६.१० ॥ |
| घनपत्रभृतोऽनुगामिनस्तरसाकृष्य करोति कांश्चन । दृढमप्यपरं प्रतिष्ठितं प्रतिकूलं नितरां निरस्यति ॥ शिशुपालवधम् १६.७४ ॥ |
| घनपोत्रविदीर्णशालमूलो निबिडस्कन्धनिकाषरुग्णवप्रः । अयमेकचरोऽभिवर्तते मां समरायेव समाजुहूषमाणः ॥ किरातार्जुनीयम् १३.३ ॥ |
| घनसंतमसैर्जवेन भूयो यदुयोधैर्युधि रेधिरे द्विषन्तः । ननु वारिधरोपरोधमुक्तः सुतरामुत्तपते पतिः प्रभाणाम् ॥ शिशुपालवधम् २०.४० ॥ |
| घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः । पुरोऽभिसस्रे सुरसुन्दरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः ॥ किरातार्जुनीयम् ८.४ ॥ |
| घने समस्तापघनावलम्बिनां विभूषणानां मणिमण्डले नलः । स्वरूपरेखामवलोक्य निष्फलीचकार सेवाचणदर्पणार्पणाम् ॥ नैषधीयचरितम् १५.७६ ॥ |
| घनैरमीषां परिवेषकैर्जनैरवर्षि वर्षोपलगोलकावली । चलद्भुजाभूषणरत्नरोचिषा धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥ नैषधीयचरितम् १६.१ ॥ |
| घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् । प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः सद्युक्त्या च परिष्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम्  ॥ नीतिसंग्रहस्य मित्र-१.९८ ॥ |
| घस्रे तुलाली बधिरौ मृगाश्वौ रात्रौ च सिंहाजवृषा दिवान्धाः । कन्यानृयुक्कर्कटका निशान्धा दिने घटोऽन्त्यो निशि पङ्गुसंज्ञः ॥ मुहूर्त.विवाहप्रकरणम् ८१॥ |
| घातितार्कसुतकर्णदयालुर्जैत्रितेन्दुकुलपार्थकृतार्थः । अर्धदुःखसुखमभ्यनयस्त्वं सास्रुभानुविहसद्विधुनेत्रः ॥ नैषधीयचरितम् २१.८३ ॥ |
| घुसृणसुमनःशृएणीश्रीणामनादरिभिः सरःपरिसरचरैर्भासां भर्तुः कुमारतरैः करैः । अजनि जलजामोदानन्दोत्पतिष्णुमधुव्रता बलिशबलनाद्गुञ्जापुञ्जश्रियं हृगयालुभिः ॥ नैषधीयचरितम् १९.३८ ॥ |
| घृतप्लुते भोजनभाजने पुरः स्फुरत्पुरंध्रिप्रतिबिम्बिताकृतेः । युवा निधायोरसि लड्डुकद्वयं नखैर्लिलेखाथ ममर्द निर्दयम् ॥ नैषधीयचरितम् १६.१०३ ॥ |
| घोरं लोके विततमयशो या च वह्नौ विशुद्धि- र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु ? । इक्ष्वाकूणां कुलधनमिदं यत्समारधनीयः कृत्स्नो लोकस्तदिह विषमे किं स वत्सः करोतु ? ॥ (उत्तररामचरितम् ७.६) |
| घोरार्कसङ्क्रमणमुग्ररवौ हि शूद्रान् ध्वाङ्क्षी विशो लघुविधौ च चरर्क्षभौभे । चौरान् महोदरयुता नृपतीन् ज्ञमैत्रे मन्दाकिनी स्थिरगुरौ सुखयेच्च मन्दा ॥ मुहूर्त.संक्रान्तिप्रकरणम् १॥ |
| घ्राणकान्तमधुगन्धकर्षिणीः पानभूमिरचनाः प्रियासखः । अभ्यपद्यत स वासितासखः पुष्पिताः कमलिनीरिव द्विपः ॥ रघुवंशम् १९.११ ॥ |
| चकास्ति बिन्दुच्युतकातिचातुरी घनास्रबिन्दुस्रुतिकैतवात्तव । मसारताराक्षि ससारमात्मना तनोषि संसारमसंशयं यतः ॥ नैषधीयचरितम् ९.१०४ ॥ |
| चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष कृष्टः । सारः सुधोद्गारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः ॥ नैषधीयचरितम् ७.३२ ॥ |
| चक्राऽऽभ-वक्र वदनः स विशालभाल:, दोर्दण्ड- चण्ड- परिचालित शस्त्रजालः । निक्षिप्तवान् प्रहत- मोगल सैन्य मल्लं, भल्लं नृपार्कवर सूनु-सलीम-मौलौ ॥ प्रतापविजयः-१४६ ॥ |
| चक्रुरेव ललनोरुषु राजीः स्पर्शलोभवशलोलकराणां । कामिनामनिभृतान्यपि रम्भास्त म्भकोमलतलेषु नखानि ॥ शिशुपालवधम् १०.६६ ॥ |
| चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन । जगज्जिगीषत्यमुना नितम्बमयेन किं दुर्लभदर्शनेन ॥ नैषधीयचरितम् ७.८९ ॥ |
| चक्षुःप्रीतिप्रसक्ते मनसि परिचये चिन्त्यमानाभ्युपाये रागे यातेऽतिभूमिं विकसति सुतरां गोचरे दूतिकायाः । आस्तां दूरेण तावत्सरभसदयितालिङ्गनानन्दलाभस्तद्गेहोपान्तरथ्याभ्रमणमपि परां निर्वृतिं सन्तनोति ॥ अमरुशतकम्-१०३॥ |
| चञ्चलं वसु नितान्तमुन्नता मेदिनीमपि हरन्त्यरातयः । भूधरस्थिरं उपेयमागतं मावमंस्त सुहृदं महीपतिं ॥ किरातार्जुनीयम् १३.५३ ॥ |
| चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः किं वा तत्त्वविवेकपेशलमतिर्योगीश्वरः कोऽपि किम् । इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनैर्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ पुरुषार्थोपदेशः-76॥ |
| चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः किं वा तत्त्वविवेकपेशलमतिर्योगीश्वरः कोऽपि किम् । इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनैर्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ वैराग्यशतकम् ९६ ॥ |
| चण्डालस्ते विषामविशिखः स्पृश्यते दृश्यते न ख्यातोऽनङ्गस्त्वयि जयति यः किंनु कृत्ताङ्गुलीकः । कृत्वा मित्त्रं मधुमधिवनस्थानमन्तश्चरित्वा सख्याः प्राणान्हरति हरितस्त्वद्यशस्तज्जुषन्ताम् ॥ नैषधीयचरितम् ९.१५६ ॥ |
| चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता । कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥ किरातार्जुनीयम् २.६ ॥ |
| चतुःसमुद्रीपरिखे नृपाणामन्तः पुरे वासितकीर्तिदारे । दानं दया सूनृतमातिथेयी चतुष्टयी रक्षणसौविदल्ला ॥ नैषधीयचरितम् १०.२८ ॥ |
| चतुरम्बुधिगर्भधीरकुक्षेर्वपुषः सन्धिषु लीनसर्वसिन्धोः । उदगुः सलिलात्मनस्त्रिधाम्नो जलवाहावलयः शिरोरुहेभ्यः ॥ शिशुपालवधम् २०.६६ ॥ |
| चतुर्दिगन्तीं परिपूरयन्ती ज्योत्स्नैव कृत्स्ना सुरसिन्धुबन्धुः । क्षीरोदपूरोदरवासहार्दवैरस्यमेतस्य निरस्यतीयम् ॥ नैषधीयचरितम् २२.७ ॥ |
| चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानाम् । सुरद्विपानामिव सामयोनिर्भिन्नोऽष्ठदा विप्रससार वंशः ॥ रघुवंशम् १६.३ ॥ |

| |
|---|
| चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगा । चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ रघुवंशम् १०.२३ ॥ |
| चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमन्यते । अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु॥ कुमारसंभवम् ५.६८ ॥ |
| चतुष्पथे तं विनिमीलिताक्षं चतुर्दिगेताः सुखमग्रहीष्यन् । संघट्ट्य तस्मिन्भृशभीनिवृत्तास्ता एव तद्वत्र्म न चेददास्यन् ॥ नैषधीयचरितम् ६.२७ ॥ |
| चत्वारो वस्त्वलङ्कारमलङ्कारस्तु वस्तु यत् । अलङ्कारमलङ्कारो वस्तु वस्तु व्यनक्ति तत् ॥ चन्द्रालोकः७.७ ॥ |
| चन्द्राधिकैतन्मुखचन्द्रिकाणां दरायतं तत्किरणाद्धनानाम् । पुरःसरस्रस्तपृषद्द्वितीयं रदावलिद्वन्द्वति बिन्दुवृन्दम् ॥ नैषधीयचरितम् ७.४४ ॥ |
| चन्द्राभमाभ्रं तिलकं दधाना तद्वन्निजास्येन्दुकृतानुबिम्बम् । सखीमुखे चन्द्रसमे ससर्ज चन्द्रनवस्थामिव कापि यत्र ॥ नैषधीयचरितम् ६.६२ ॥ |
| चन्द्रे सूर्यादिसंयुक्ते दारिद्र्यं मरणं शुभम् । सौख्यं सापत्न्यवैराग्ये पापद्वययुते मृतिः ॥ मुहूर्त.विवाहप्रकरणम् ४५॥ |
| चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे । यामीति प्रियपृष्टाया वलयोऽभवदूर्मिका ॥ चन्द्रालोकः ५.४३ ॥ |
| चमरान्परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी । नृपतीनिव तान्वियोज्य सद्यः सितवालव्यजनैर्जगाम शान्तिं ॥ रघुवंशम् ८.६६ ॥ |
| चमूः समस्ता जडताङ्गता सकृत् निष्कम्पमभूद्रणाङ्गणम् । निवात नमः स्थलाच्चङ्क्रमणं विधाय गां, यदा तरस्वी स जगर्ज वाजि - राट् ॥ प्रतापविजयः-१३४ ॥ |
| चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयैव सैन्धवाः । विहारदेशं तमवाप्य मण्डलीमकारयन्भूरितुरंगमानपि ॥ नैषधीयचरितम् १.७१ ॥ |
| चयस्त्विषामित्यवधारितं पुरस्ततः शरीरिति विभाविताकृतिम् । विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥ शिशुपालवधम्  १.३ ॥ |
| चयानिवाद्रीनिव तुङ्गशृङ्गान्क्वचित्पुराणीव हिरण्मयानि । महावनानीव च किंशुकानामत्तान वह्निः पवनानुवृत्त्या ॥ किरातार्जुनीयम् १६.५२ ॥ |
| चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि खेदमेति । तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्यवित्तम् ॥ नैषधीयचरितम् ८.५९ ॥ |
| चरणपतनं सख्यालापा मनोहरचाटवः कृशतरतनोर्गाढाश्लेषो हठात्परिचुम्बनम् । इति हि चपलो मानारम्भस्तथापि हि नोत्सह हृदयदयितः कान्तः कामं किमत्र करोम्यहम् ॥ अमरुशतकम्-१०१॥ |
| चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे निभृतकितवाचारेत्युक्त्वा रुषा पुरुषीकृते । व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता ॥ अमरुशतकम्-१७॥ |
| चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् । स धनुषा युधि सायकवर्षिणा शतमखं तमखण्डितपौरुषम् ॥ रघुवंशम् ८.१३ ॥ |
| चरणेन हन्ति सुबलः स्म शिथिलितमहीध्रबन्धनां । तीरतरलजलराशिजलामवभुग्नभोगिफणमण्डलां भुवं ॥ शिशुपालवधम् १५.५४ ॥ |
| चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा । प्रजिघाय समाधिबेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् ॥ रघुवंशम् ८.७९ ॥ |
| चरेदथौजहायने घटालिमेषगे रवौ रवीज्यशुद्धियोगतः शुभग्रहस्य वासरे । नृयुग्ममीनकन्यकातुलावृषे विलग्नके द्विरागमं लघुध्रुवे चरेऽस्रपे मृदूडुनि ॥ मुहूर्त.द्विरागमनप्रकरणम् १॥ |
| चर्म वर्म किल यस्य न भेद्यं यस्य वज्रमयमस्थि च तौ चेत् । स्थायिनाविह न कर्णदधीची तन्न धर्ममवधीरय धीर ॥ नैषधीयचरितम् ५.१२९ ॥ |
| चलत्पदस्तत्पदयन्त्रणेङ्गितस्फुटाशयामासयति स्म राजके । शृअमं गता यानगतावपीयमित्युदीर्य धुर्यः कपटाज्जनीं जनः ॥ नैषधीयचरितम् १२.३ ॥ |
| चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् । नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ नीतिसंग्रहस्य मित्र-१.१०६ ॥ |
| चलन्नलंकृत्य महारयं हयं स्ववाहवाहोचितवेषपेशलः । प्रमोदनिःस्पन्दतराक्षिपक्ष्मभिर्व्यलोकि लोकैर्नगरालयैर्नलः ॥ नैषधीयचरितम् १.६६ ॥ |
| चलाङ्गुलीकिसलयमुद्धतैः करैरनृत्यत स्फुटकृतकर्णतालया । मदोदकद्रवकटभित्तिसङ्गिभिः कलस्वरं मधुपगणैरगीयत ॥ शिशुपालवधम् १७..३७ ॥ |
| चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम् । अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनमास्थितम् ॥ नैषधीयचरितम् १.६ ॥ |
| चलितं ततोऽनभिहतेच्छमवनिपतियज्ञभूमितः । तूर्णमथ ययुमिवानुययुर्दमघोषसूनुमवनीशसूनवः ॥ शिशुपालवधम् १५.६९ ॥ |
| चलितानकदुन्दुभिः पुरः सबलस्त्वं सह सारणेन तं । समितौ रभसादुपागतः सगदः संप्रतिपत्तुमर्हसि ॥ शिशुपालवधम् १६.१३ ॥ |
| चलितोद्धतधूमकेतनोऽसौ रभसादम्बररोहिरोहिताश्वः । द्रुतमारुतसारथिः शिखावान्कनकस्यन्दनसुन्दरश्चचाल ॥ शिशुपालवधम् २०.६१ ॥ |
| चलितोर्ध्वकबन्धसम्पदो मकरव्यूहनिरूद्धवर्त्मनः. अतरत्स्वभुजौजसा मुहुर्महतः सङ्गरसागरानसौ ॥ शिशुपालवधम् १६.६७ ॥ |
| चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः । ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमभूमधूमताम् ॥ नैषधीयचरितम् १.११४ ॥ |
| चापान्त्यगे गोघटगे पतङ्गे कर्काजगे स्त्रीमिथुने स्थिते च । सिंहालिगे नक्रध्टे समाः स्युस्तिथ्यो द्वितीयाप्रमुखाश्च दग्धाः ॥ मुहूर्त.विवाहप्रकरणम् ६६॥ |
| चापे जीवे तनुस्थे वा मेषे भौमेऽम्बरे द्युने । षट्त्र्यायेऽब्जे रवौ वा स्याज्जाताग्निर्यजति ध्रुवम् ॥ मुहूर्त.ग्न्याधानप्रकरणम् ३॥ |
| चारचुञ्चुश्चिरारेची चञ्चच्चीररुचा रुचः । चचार रुचिरश्चारु चारैराचारचञ्चुरः ॥ किरातार्जुनीयम् १५.३८ ॥ |
| चारु नृत्यविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् । प्रेमदत्तवदनानिअः मनः सोऽन्वजीवदमरालकेश्वरौ ॥ रघुवंशम् १९.१५ ॥ |
| चारुता वपुरभूषयदासां तामनूननवयौवनयोगः । तं पुनर्मकरकेतनलक्षक्ष्मीस्तां मदो दयितसंगमभूषः ॥ शिशुपालवधम् १०.३३ ॥ |
| चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान् । पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥ नैषधीयचरितम् २.२ ॥ |

| |
|---|
| चिक्रंसया कृत्रिमपत्रिपंक्तेः कपोतपालीषु निकेतनानाम् । मार्जारमप्यानतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने ॥ शिशुपालवधम् ३.५० ॥ |
| चिचीषतां जन्मवतामलघ्वीं यशोवतंसां उभयत्र भूतिम् । अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिविशेषेण तपोधनानां ॥ किरातार्जुनीयम् ३.११ ॥ |
| चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः । संगमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानां ॥ किरातार्जुनीयम् ९.७१ ॥ |
| चित्रं चापैरपेतज्यैः स्फुरद्रक्तशतहृदं । पयोदजालमिव तद्वीराशंसनमाबभौ ॥ शिशुपालवधम् १९.७९ ॥ |
| चित्रं तदा कुण्डिनवेशिनः षा नलस्य मूर्तिर्ववृते न दृश्या । बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः ॥ नैषधीयचरितम् ६.८ ॥ |
| चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः । नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति ॥ रघुवंशम् १६.१६ ॥ |
| चित्रमत्र विबुधैरपि यत्तैः स्वर्विहाय बत भूरनुसस्रे । द्यौर्न काचिदथवास्ति निरूढा सैव सा चलति यत्र हि चित्तम् ॥ नैषधीयचरितम् ५.५७ ॥ |
| चित्राद्वीशौ शिवाश्व्यर्काः श्रुतिमूले यमेन्द्रभे । चेत्रादिमासे शून्याख्यास्तारा वित्तविनाशदाः ॥ मुहूर्तचिन्त.१५॥ |
| चित्राभिरस्योपरि मौलिभाजां भाभिर्मणीनामनणीयसीभिः । अनेकधातुच्छुरिताश्मराशेर्गोवर्धनस्याकृतिरन्वकारि ॥ शिशुपालवधम् ३.४ ॥ |
| चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानां । समाकुलाया निचखान दूरं बाणान्ध्वजिन्या हृदयेष्वरातिः ॥ किरातार्जुनीयम् १७.३१ ॥ |
| चिन्तां कलत्रसुतयोर्न तयोर्विधाय, याचेऽभिलाषणमदो जगदीश्वराय । 'मेवाड़' मण्डल बलोन्नयनं वनं वा, म्लेच्छौघसैन्य- शरणं मरणं रणं वा ॥ प्रतापविजयः-५७॥ |
| चिन्तामोहविनिश्चलेन मनसा मौनेन पादानतः प्रत्याख्यानपराङ्मुखः प्रियतमो गन्तुं प्रवृत्तोऽधुना । सव्रीडैरलसैर्निरन्तरलुठद्बाष्पाकुलैर्लोचनैः श्वासोत्कम्पकुचं निरीक्ष्य सुचिरं जीवाशया वारितः ॥ अमरुशतकम्-९०॥ |
| चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः प्रवासे चाश्वासं न खलु न करोति प्रियजनः । जगज्जीर्णारण्यं भवति च कलत्रे ह्युपरते कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ (उत्तररामचरितम् ६.३८) |
| चिरं युवाकूतशतैः कृताऋथनश्चिरं सरोषेङ्गितया च निर्धुतः । सृजन्करक्षालनलीलयाञ्जलीनसेचि किंचिद्विधुताम्बुधारया ॥ नैषधीयचरितम् १६.१०८ ॥ |
| चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या । ससचिव इव निर्जनेऽपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः ॥ किरातार्जुनीयम् १०.१४ ॥ |
| चिरमतिरसलौल्याद्बन्धनं लम्भितानां पुनरयमुदयाय प्राप्य धाम स्वमेव । दलितदलकपाटः षट्पदानां सरोजे सरभस इव गुप्तिस्फोटमर्कः करोति ॥ शिशुपालवधम् ११.६० ॥ |
| चिरमपि कलितान्यपारयन्त्या परिगदितुं परिशुष्यता मुखेन । गतघृण गमितानि सत्सखीनां नयनयुगैः सममार्द्रतां मनांसि ॥ किरातार्जुनीयम् १०.४८ ॥ |
| चिररतिपरिखेद प्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव प्रबुद्धाः । अपरिचलितगात्राः कुर्वतेन प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥ शिशुपालवधम् ११.१३ ॥ |
| चिरविरहिणोरुत्कण्ठार्तिश्लथीकृतगात्रयोर् नवमिव जगज् जातं भूयश्चिराद् अभिनन्दतोः । कथमपि दिने दीर्घे याते निशामधिरूढयोः प्रसरति कथा बह्वी यूनोर्यथा न तथा रतिः ॥ अमरुशतकम्-३९॥ |
| चिरादनध्यायमवाङ्मुखी मुखे ततः स्म सा वासयते दमस्वसा । कृतायतश्वासविमोक्षणाथ तं क्षणाद्वभाषे करुणं विचक्षणा ॥ नैषधीयचरितम् ९.६१ ॥ |
| चिरादपि बलात्कारो बलिनः सिद्ध्ये रिषु । छन्दानुवृत्तिदुःसाधाः सुहृदो विमनीकृताः ॥ शिशुपालवधम् २.१०५ ॥ |
| चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः । व्रणो रूढग्रन्थिः स्फुटित इव न्मर्मणि पुनः पुराभूतः शोको विकलयति मां नूतन इव ॥ (उत्तररामचरितम् २.२६) |
| चिह्नैरमीभिर्नलसंविदस्याः संवादमाप प्रथमोपजाता । सा लक्षणव्यक्तिभिरेव देवप्रसादमासादितमप्यबोधि ॥ नैषधीयचरितम् १४.२४ ॥ |
| चुचुम्ब नोर्वीवलयोर्वशीं परं पुरोऽधिपारि प्रतिबिम्बितां विटः । पुनःपुनः पानकपानकैतवाच्चकार तच्चुम्बनचुंकृतान्यपि ॥ नैषधीयचरितम् १६.९९ ॥ |
| चुम्बनादलकचूर्णदूषितं शंकरोऽपि नयनं ललाटजम् । उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने॥ कुमारसंभवम् ७.१९॥ |
| चुम्बने विपरिवर्तिताधरं हस्तरोधि रशनाविघट्टने । विघ्नितेच्छं अपि तस्य सर्वतो मन्मथेन्धनमभूद्वधूरतं ॥ रघुवंशम् १९.२७ ॥ |
| चुम्बनेष्वधरदानवर्जितं सन्नहस्तमदयोपगूहनम् । क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम्॥ कुमारसंभवम् ७.८॥ |
| चुलुकिततमःसिन्धोर्भृङ्गैः करादिव शुभ्यते नभसि बिसिनीबन्धोरन्ध्रच्युतैरुदबिन्दुभिः । शतदलमधुस्रोतःकच्छद्वयीपरिरम्भणादनुपदमदःपङ्काशङ्काममी मम तन्वते ॥ नैषधीयचरितम् १९.३७ ॥ |
| चूडा व्रतं चाऽपि विवाहतो व्रताच्चूडा च नेष्टा पुरुषत्रयान्तरे । वधूप्रवेशाच्च सुताविनिर्गमः षण्मासतो वाऽब्दविभेदतः शुभः ॥ मुहूर्त.विवाहप्रकरणम् १८॥ |
| चूडाग्रचुम्बिमिहिरोदयशैलशीलस्तेनाः स्तनंधयसुधाकरशेखरस्य । तस्मिन्सुवर्णरसभूषणरम्यहर्म्यभूभृद्धटा घटय हेमघटावतंसाः ॥ नैषधीयचरितम् ११.५२ ॥ |

| |
|---|
| चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् । मौर्व्या मेखलया नियन्त्रितमधो वासश्चमाञ्जिष्ठकं पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ॥ (उत्तररामचरितम् ४.२०) |
| चूडामणिः सकलभारत- भामिनीनां, पत्नी प्रतापनृपतेरमलाऽत्र शैले । प्राण-प्रदानमकरोत् पतिपादपद्मे किन्त्वेकवारमपि हा! नहि हाऽकरोत्सा ॥ प्रतापविजयः-१६४॥ |
| चूडावर्षात्तृतीयात्प्रभवति विषमेऽष्टार्करिक्ताद्यषष्ठी- पर्वोनाहे विचैत्रोदगयनसमये ज्ञेन्दुशुक्रेज्यकानाम् । वारे लग्नांशयोश्चास्वभनिधनतनौ नैधने शुद्धियुक्ते शाक्रोपेतैर्विमैत्रैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः ॥ मुहूर्त.संस्कारप्रकरणम् २९॥ |
| चूडोत्तंसित-चन्द्र-चारु-कलिका-चञ्चच्छिखा-भास्वरो लीला-दग्ध-विलोल-काम-शलभः श्रेयो-दशाग्रे स्फुरन्। अन्तःस्फूर्जदपार-मोह-तिमिर-प्राग्भारमुच्चाटयन् श्वेतः सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः॥॥ वैराग्यशतकम् १ ॥ |
| चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज । मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य॥ कुमारसंभवम् ३.३२ ॥ |
| चूर्णबभ्रु लुलितस्रगाकुलं छिन्नमेखलमलक्तकाङ्कितं । उत्थितस्य शयनं विलासिनस्तस्य विभ्रमर्ततान्यपावृणोथ ॥ रघुवंशम् १९.२५ ॥ |
| चेच्चन्द्रिकाऽसि तदहं चटुलश्चकोरः, चेत्वं नवाम्बुदघटा तदहं मयूरः । कल्याणि! कल्पलतिकाऽसि तदाऽस्मि रेजो रन्वेषणातुर - तरो रस- रञ्जनोऽहम् ॥ प्रतापविजयः-१५ ॥ |
| चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया भूपाल-भ्रुकुटी-कुटी-विहरण-व्यापार-पण्याङ्गनाम्। कन्था-कञ्चुकिनः प्रविश्य भवन-द्वाराणि वाराणसी-रथ्या-पङ्क्तिषु पाणि-पात्र-पतितां भिक्षामपेक्षामहे॥॥ वैराग्यशतकम् ६६ ॥ |
| चेतोनिमित्तशकुनैः खलु सुप्रशस्तैर्ज्ञात्वा विलग्नबलमुर्व्यधिपः प्रयाति । सिद्धिर्भवेदथ पुनः शकुनादितोऽपि चेतोविशुद्धिरधिका न च तां विनेयात् ॥ मुहूर्त.यात्राप्रकरणम् ७८॥ |
| चेतोभवस्य भवती कुचपत्त्रराजधानीयकेतुमकरा ननु राजधानी । अस्यां महोदयमहस्पृशिमीनकेतो के तोरणं तरुणि न ब्रुवते भ्रुवौ ते ॥ नैषधीयचरितम् २१.१३६ ॥ |
| चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः । स्यान्मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहुङ्कृतिः ॥ चन्द्रालोकः ५.५६ ॥ |
| चेल्लग्नाऽर्कौ सायनावेकराशौ तद्विश्लेषघ्नोदयः खाग्निभक्तः । स्वेष्टः कालो लग्नमूनं यदाऽर्कादात्रेः शेषोऽर्कात्सषड्भान्निशायाम् ॥ मुहूर्त.विवाहप्रकरणम् १०६॥ |
| चेष्टा व्यनेशन्निखिलास्तदास्याः स्मरेषुवातैरिव ता विधूताः । अभ्यर्थ्य नीताः कलिना मुहूर्तं लाभाय तस्य बहु चेष्टितुं वा ॥ नैषधीयचरितम् १४.५५ ॥ |
| च्युते स तस्मिन्निषुधौ शरार्थाद्ध्वस्तार्थसारे सहसेव बन्धौ । तत्कालमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यं ॥ किरातार्जुनीयम् १७.३७ ॥ |
| च्योतन्मयूखेऽपि हिमद्युतौ मे ननिर्वृतं निर्वृतिमेति चक्षुः । समुज्झितज्ञातिवियोगखेदं त्वत्संनिधावुच्छ्वसतीव चेतः ॥ किरातार्जुनीयम् ३.८ ॥ |
| छदे सदैव च्छविमस्य बिभ्रतां न केकिनां सर्पविषं विसर्पति । न नीलकण्ठत्वमधास्यदत्र चेत् स कालकूटं भगवानभोक्ष्यत ॥ नैषधीयचरितम् १६.३ ॥ |
| छद्ममत्स्यवपुषस्तव पुच्छास्फालनाज्जलमिवोद्धतमब्धेः । श्वैत्यमेत्य गगनाङ्गणसङ्गादाविरस्ति विबुधालयगङ्गा ॥ नैषधीयचरितम् २१.५६ ॥ |
| छद्मैव तच्छम्बरजं बिसिन्यास्तत्पद्ममस्यास्तु भुजाग्रसद्म् । उत्कण्टकादुद्गमनेन नालादुत्कण्टकं शातशिखैर्नखैर्यत् ॥ नैषधीयचरितम् १०.१२४ ॥ |
| छन्नेष्वपि स्पष्टतरेषु यत्रे स्वच्छानि नारीकुचमण्डलेषु । आकाशसाम्यं दधुरम्बराणि न नामतः केवलमर्थतोऽपि ॥ शिशुपालवधम् ३.५५ ॥ |
| छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्- त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे । नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थाम् मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥ मेघदूतम्, पूर्वमेघः १८॥ |
| छलयन्प्रजास्त्वमनृतेन कपटपटुरैन्द्रजालिकः । प्रीतिमनुभवसि नग्नजितः सुतयेष्टसत्य इति सम्प्रतीयसे ॥ शिशुपालवधम् १५.२५ ॥ |
| छली रिपुभरतवर्षभू-भुषां स कूटनीतौ प्रथितो भुवस्तले । यम-प्रतिस्पर्धि-विशुद्ध हैन्दवं, निनाय नाशं क्रमशः पराक्रमम् ॥ प्रतापविजयः-४६ ॥ |
| छादितः कथमपि त्रपययान्तर्यः प्रियं प्रति चिराय रमण्याः । वारुणीमदविशङ्गमथाविश्चक्षुषोऽभवदसाविव रागाः ॥ शिशुपालवधम् १०.१९ ॥ |
| छायां निजस्त्रीचटुलालसानां मदेन किञ्चिच्चटुलालसानाम् । कुर्वाणमुत्पिञ्जलजातपत्रैर्विहङ्गमानां जलजातपत्रैः ॥ शिशुपालवधम् ४.६॥ |
| छायां विनिर्धूय तमोमयीं तां तत्त्वस्य संवित्तिरिवापविद्यां । ययौ विकासं द्युतिरिन्दुमौलेरालोकमभ्यादिशती गणेभ्यः ॥ किरातार्जुनीयम् १६.३२ ॥ |
| छायामपास्य महतीमपि वर्तमानामागामिनीं जगृहिरे जनतास्तूणाम् । सर्वो हि नोपागतमप्यपचीयमानं वर्धिष्णुमाश्रयमनागतमभ्युपैति ॥ शिशुपालवधम् ५.१४ ॥ |
| छायामयः प्रैक्षि कयापि हारे निजे स गच्छन्नथ नेक्ष्यमाणः । तच्चिन्तयान्तर्निरचायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥ नैषधीयचरितम् ६.३ ॥ |
| छायाविधायिभिरनुज्झितभूतिशोभैरुच्छ्रायिभिर्बहलपाटलधातुरागैः । दूष्यैरपि क्षितिभृतां द्विरदैरुदारतारावलीविरचनैर्व्यरुचन्निवासाः ॥ शिशुपालवधम् ५.२१ ॥ |
| छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु । तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥ रघुवंशम् १३.४६ ॥ |
| छिक्करः पिक्कको भासः श्रीकण्ठो वानरो रुरुः । स्त्रीसञ्ज्ञकाः काकऋक्षश्वानः स्युर्दक्षिणाः शुभाः ॥ मुहूर्त.यात्राप्रकरणम् १०६॥ |
| छिन्नोऽपि रोहति तरुर्क्षीणोऽप्युपचीयते पुनश्चन्द्रः । इति विमृशन्तः सन्तः सन्तप्यन्ते न दुःखेषु ॥ नीतिशतकम् ८७ ॥ |
| छेकापह्नुतिरन्यस्य शङ्कया तथ्यनिह्नवे । प्रजल्पन्मत्पदे लग्नः कान्तः किं न हि नूपुरः ॥ चन्द्रालोकः ५.२७ ॥ |
| जगज्जयं तेन च कोशमक्षयं प्रणीतवाञ्शैशवशेषवानयम् । सखा रतीशस्य क्रतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ॥ नैषधीयचरितम् १.१९ ॥ |

| |
|---|
| जगति तिमिरं मूर्च्छामब्जव्रजेऽपि चिकित्सतः पितुरिव निजाद्दस्रावस्मादधीत्य भिषाज्यतः । अपिच शमनस्यासौ तातस्ततः किमु नौचिती यदयमदयः कह्लाराणामुदेत्यपमृत्यवे ॥ नैषधीयचरितम् १९. ॥ |
| जगति नैशमशीतकरः करैर्वियति वारिदवृन्दमयं तमः । जलजराजिषु नैन्द्रमदिद्रवन्न महतामहताः क्व च नारयः ॥ शिशुपालवधम् ६.४३ ॥ |
| जगति मिथुने चक्रावेव स्मरागमपारगौ नवमिव मिथः संभुञ्जाते वियुज्य वियुज्य यौ । सततममृतादेवाहाराद्युदापदरोचकं तदमृतभुजां भर्ता शंभुर्विषां बुभुजे विभुः ॥ नैषधीयचरितम् १९.३४ ॥ |
| जगति श्रिया विरहितोऽपि यदुदधिसुतामुपायथाः । ज्ञातिजनजनितनामपदां त्वमतः श्रियः पतिरिति प्रथामगाः ॥ शिशुपालवधम् १५.२७ ॥ |
| जगतीशरणे युक्तो हरिकान्तः सुधासितः । दानवर्षीकृताशंसो नागराज इवाबभौ ॥ किरातार्जुनीयम् १५.४५ ॥ |
| जगत्त्रयीपण्डितमण्डितैषा सभा न भूता च न भाविनी च । राज्ञां गुणज्ञापनकैतवेन संख्यावतः श्रावय वाङ्मुखानि ॥ नैषधीयचरितम् १०.७२ ॥ |
| जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः । यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभरांबभूवे ॥ शिशुपालवधम् ३.२ ॥ |
| जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी । द्युतिं समग्रां समितिर्गवामसावुपैति मन्त्रैरिव संहिताहुतिः ॥ किरातार्जुनीयम् ४.३२ ॥ |
| जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना । प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः ॥ शिशुपालवधम् १.२७ ॥ |
| जगदन्तकालसमवेतविषदविषमेरितारवं । धीरनिजरवविलीनगुरुप्रतिशब्दमस्य रणतूर्यमावधि ॥ शिशुपालवधम् १५.७३ ॥ |
| जगद्वधूमूर्धसु रूपदर्पाद्यदेनयादायि पदारविन्दम् । तत्सान्द्रसिन्दूरपरागरागैर्द्वयं प्रवालप्रबलारुणं तत् ॥ नैषधीयचरितम् ७.१ ॥ |
| जगद्वशीकर्तुमिमाः स्मरस्य प्रभावनीके तनवै जयन्तीः । इत्यस्य तेने कदलीर्मधुश्रीः प्रभावनी केतनवैजयन्तीः ॥ शिशुपालवधम् ६.६९ ॥ |
| जगाद चैनामयमङ्गनाथः सुराङ्गनाप्रार्थितयौवनश्रीः । विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते ॥ रघुवंशम् ६.२७ ॥ |
| जगाद भूयस्तदनन्तरं क्रुधा, प्रतापसिंहः किल सिंहविक्रमः । विधाय 'मान' धृतमौनमन्ततः स वीरराजस्फुरितोत्तराधरः ॥ प्रतापविजयः-८० ॥ |
| जग्रन्थ सेयं मदनुग्रहेण वचःस्रजः स्पष्टयितुं चतस्रः । द्वे ते नलं लक्षयितुं क्षमेते ममैव मोहोऽयमहो महीयान् ॥ नैषधीयचरितम् १४.१५ ॥ |
| जघनमेलघपीवरोरु कृच्छ्रादुरुनिबिरीसनितम्बभारखेदि । दयिततमशिरोधरावलम्बिस्वभुजलताविभवेन काचिदूहे ॥ शिशुपालवधम् ७.२० ॥ |
| जघनस्तनभारगौरवाद्वियदालम्ब्य विहर्तुमक्षमाः । ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः ॥ नैषधीयचरितम् २.९७ ॥ |
| जघन्यभे संक्रमणे मुहूर्ताः शरेन्दवो १५ बाणकृता ४५ बृहत्सु । खराम ३० सङ्ख्याः समभे महर्धसमर्धसाम्यं विधुदर्शनेऽपि ॥ मुहूर्त.संक्रान्तिप्रकरणम् ११ ॥ |
| जजौजोजाजिजिज्जाजी तं ततोऽतितताितुत् । भाभोऽभीभाभिभूभारारारिरिरीररः ॥ शिशुपालवधम् १९.३ ॥ |
| जज्ञे जनैर्मुकुलिततताक्षमनाददाने संरब्धहस्तिपकनिष्टुरचोदनाभिः । गम्भीरवेदिनि पुरः कवलं करीन्द्रे मन्दोऽपि नाम न महानवगृह्य साध्यः ॥ शिशुपालवधम् ५.४९ ॥ |
| जडीकृतश्रवणपथे दिवौकसां चमूरवे विशति सुराद्रिकन्दराः । अनर्थकैरजनि विदग्धकामिनीरतान्तरक्वणितविलासकौशलैः ॥ शिशुपालवधम् १७..३३ ॥ |
| जनतां भयशून्यधीः परैरभिभूतामवलम्बसे यतः । तव कृष्ण गुणास्ततो नरैरसमानस्य दधत्यगण्यतां ॥ शिशुपालवधम् १६.६ ॥ |
| जननराशितनू यदि लग्नगे तदधिपौ यदि वा तत एव वा । त्रिरिपुखायगृहं यदि वोदयो विजय एव भवेद्वसुधापतेः ॥ मुहूर्त.यात्राप्रकरणम् २॥ |
| जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः । क्षितिरभूत्फलवत्यजनन्दने शमरतेऽमरतेजसि पार्थिवे ॥ रघुवंशम् ८.४ ॥ |
| जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु । मोहयन्ति च सम्पत्तौ कथमर्थाः सुखावहाः ॥ नीतिसंग्रहस्य मित्र-१.१७३ ॥ |
| जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेषकान्तौ । तापापनोदक्षमपाद स चोदयस्थो नृपतिः शशी च ॥ रघुवंशम् १६.५३ ॥ |
| जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ । गुरुप्रदेयाधिकनीःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥ रघुवंशम् ५.३१ ॥ |
| जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम् । अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रं उभे च चामरे ॥ रघुवंशम् ३.१६ ॥ |
| जनिताशनिशब्दशङ्कमुच्चैर्धनुरास्फालितमध्वनन्नृपेण । चपलानिलचोद्यमानकल्पक्षयकालाग्निशिखानिभस्फुरज्ज्यं ॥ शिशुपालवधम् २०.७ ॥ |
| जनुरधत्त सती स्मरतापिता हिमवतो न तु तन्महिमादृता । ज्वलति भालतले लिखितः सतीविरह एव हरस्य न लोचनम् ॥ नैषधीयचरितम् ४.४५ ॥ |
| जनैरुपग्रामं अनिन्द्यकर्मभिर्विविक्तभावेङ्गितभूषणैर्वृताः । भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥ किरातार्जुनीयम् ४.१९ ॥ |
| जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम् । तां गाहमानास्य चिरं नलस्य दृष्टिर्ययौ राजकुलातिथित्वम् ॥ नैषधीयचरितम् ६.९ ॥ |
| जन्मनि क्लेशबहुले किं नु दुःखमतः परम् । इच्छासम्पद्यतो नास्ति यच्चेच्छा न निवर्तते ॥ नीतिसंग्रहस्य मित्र-१.१७७ ॥ |
| जन्मप्रत्यरितारयोर्मृतिसुखान्त्येऽब्जे च कर्तुर्नसन् मध्यो मैत्रभगादितिध्रुवविशाखाद्वयङ्घ्रिभेज्ञेऽपि । श्रेष्ठोऽर्केज्यविधोर्दिने श्रुतिकरस्वात्यश्विपुष्ये तथा त्वाशौचात्परतो विचार्यमखिलं मध्ये यथासम्भवम् ॥ मुहूर्त.नक्षत्रप्रकरणम् ५२॥ |
| जन्मराशितनुतोऽष्टमेऽथवा स्वारिभाच्च रिपुभे तनुस्थिते । लग्नगास्तदधिपा यदाऽथवा स्युर्गतं हि नृपतेर्मृतिप्रदम् ॥ मुहूर्त.यात्राप्रकरणम् ४५॥ |
| जन्मर्क्षमासतिथयो व्यतिपातभद्रा वैधृत्यमापितृदिनानि तिथिक्षयर्द्धी । न्यूनाधिमासकुलिकप्रहरार्धपात विष्कम्भवज्रघटिकात्रयमेव वर्ज्यम् ॥ मुहूर्तचिन्त.३४ ॥ |

| |
|---|
| जन्मर्क्षमासलग्नादौ व्रते विद्याधिको व्रती । आद्यगर्भेऽपि विप्राणां क्षत्रादीनामनादिमे ॥ मुहूर्त.संस्कारप्रकरणम् ४५॥ |
| जन्मर्क्षे निधनं ग्रहे जनिभतो घातः क्षतिः श्रीर्व्यथा चिन्ता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशः सुखम् । लाभोऽपाय इति क्रमात्तदशुभध्वस्त्यै जपः स्वर्णगो- दानं शान्तिरथो ग्रहं त्वशुभदं नो वीक्ष्यमाहुः परे ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ६ ॥ |
| जन्मलग्नभयोर्मृत्युशाशौ नेष्टः करग्रहः । एकाधिपत्ये राशीशमैत्र्ये वानैव दोषकृत् ॥ मुहूर्त.विवाहप्रकरणम् ४६॥ |
| जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूं अपक्रियां । आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिं ॥ किरातार्जुनीयम् १३.६४ ॥ |
| जन्माख्यसम्पद्विपदः क्षेमप्रत्यरिसाधकाः । वध मैत्रातिमैत्राः स्युस्तारा नामसदृक्फलाः ॥ मुहूर्त.संक्रान्तिप्रकरणम्  १२ ॥ |
| जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः । सल्लग्नेऽच्युतमूर्तिपिप्पलघटैः कृत्वा विवाहं स्फुटं दद्यात्तां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः ॥ मुहूर्त.विवाहप्रकरणम् ७॥ |
| जन्यास्ततः फणभृतामधिपः सुरौघान्माञ्जिष्ठमञ्जिमवगाहिपदोष्ठलक्ष्मीम् । तां मानसं निखिलवारिचयान्नवीना हंसावलीमिव घना गमयांबभूवुः ॥ नैषधीयचरितम् ११.१५ ॥ |
| जम्बालजालात्किमकर्षि जम्बूनद्या न हारिद्रनिभप्रभेयम् । अप्यङ्गयुग्मस्य न सङ्गचिह्नमुन्नीयते दन्तुरता यदत्र ॥ नैषधीयचरितम् ७.१३ ॥ |
| जय जय महाराज प्राभातिकीं सुषमामिमां सफलयत मां दानाडक्ष्णोर्दरालसपक्ष्मणी । प्रथमशकुनं शय्योत्थायं तवास्तु विदर्भजा प्रियजनमुखाम्भोजात्तुङ्गं यदङ्ग न मङ्गलम् ॥ नैषधीयचरितम् १९.२ ॥ |
| जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः । नास्ति येषां यशः काये जरामरणजं भयम् ॥ नीतिशतकम् २४ ॥ |
| जयन्ति याज्ञिकश्रीमन्-महादेवाङ्गजन्मनः । सूक्तिपीयूषवर्षस्य जयदेवकवेर्गिरः ॥ चन्द्रालोकः १०.६ ॥ |
| जयश्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात् । सेहेऽस्य न भ्रंशमतो न लोभात्स तुल्यपुष्पाभरणो हि धीरः ॥ रघुवंशम् १६.७४ ॥ |
| जलं ददत्याः कलितानतेर्मुखं व्यवस्यता साहसिकेन चुम्बितम् । पदे पतद्वारिणि मन्दपाणिना प्रतीक्षितोऽन्येक्षणवञ्चनक्षणः ॥ नैषधीयचरितम् १६.५८ ॥ |
| जलजभिदुरीभावं प्रेप्सुः करेण निपीडयत्यशिशिरकरस्ताराशङ्खप्रपञ्चविलोपकृत् । रजनिरमणस्यास्तक्षोणीधरार्धपिधावशाद्दधतमधुना बिम्बं कम्बुच्छिदः करपत्रताम् ॥ नैषधीयचरितम् १९.५८ ॥ |
| जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः । ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्त्रदंपती ॥ नैषधीयचरितम् २.३८ ॥ |
| जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः । भवति दीप्तिरदीपितकंदरा तिमिरसंवलितेव विवस्वतः ॥ किरातार्जुनीयम् ५.४८ ॥ |
| जलदपङ्क्तिरनर्तयदुन्मदंकलविलापि कलापिकदम्बकं । कृतसमार्जनमर्दलमण्डलध्वनिजया निजया स्वनसंपदा ॥ शिशुपालवधम् ६.३१ ॥ |
| जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः । निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते  ॥ नीतिसंग्रहस्य मित्र-१.१५८ ॥ |
| जलाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रजिघाय स स्फुटम् । मरुत्वतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्ध्वमुखेन तेजसा ॥ नैषधीयचरितम् ९.२३ ॥ |
| जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् । तुरंगमेधावभृतवतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥ रघुवंशम् १३.६१ ॥ |
| जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशाङ्कगुक्रे । दृश्ये मृदुक्षिप्रचरध्रुवे स्यात् पक्षे सिते स्वर्क्षतिथिक्षणे वा ॥ मुहूर्त.नक्षत्रप्रकरणम् ६१॥ |
| जलौघसंमूर्छनमूर्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः । प्रशान्तिमेष्यन्धृतधूममण्डलो बभूव भूयानिव तत्र पावकः ॥ किरातार्जुनीयम् १६.५९ ॥ |
| जवादवारीकृतदूरदृक्पथस्तथाक्षियुग्माय ददे मृदं न यः । ददद्दिदृक्षादरदासतां यथा तयैव तत्पांसुलकण्ठनालताम् ॥ नैषधीयचरितम् १६.२६ ॥ |
| जहात् नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः । असाद्ययोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥ किरातार्जुनीयम् ३.१४ ॥ |
| जहार चान्येन मयूरपत्रिरिणा शरेण शक्रस्य महाशनिध्वजम् । चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ॥ रघुवंशम् ३.५६ ॥ |
| जहार चास्मादचिरेण वर्म ज्वलन्मणिद्योतितहैमलेखं । चण्डः पतङ्गान्मरुदेकनीलं तडित्वतः खण्डमिवाम्बुदस्य ॥ किरातार्जुनीयम् १७.४४ ॥ |
| जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनां । उपगतमवधीरयन्त्यभव्याः स निपुणं एत्य कयाचिदेवं ऊचे ॥ किरातार्जुनीयम् १०.५१ ॥ |
| जहीहि कोपं दयितोऽनुगम्यतां पुरानुशेते तव चञ्चलं मनः । इति प्रियं कांचिदुपैतुं इच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः ॥ किरातार्जुनीयम् ८.८ ॥ |
| जागर्ति तच्छायदृशां पुरा यः स्पृष्टे च तस्मिन्विससर्प कम्पः । द्रुते द्रुतं तत्पदशब्दभीत्या स्वहस्तितश्चारुदृशां परं सः ॥ नैषधीयचरितम् ६.३३ ॥ |
| जागर्ति मर्त्येषु तुलार्थमस्या योग्येति योग्यानुपलम्भनं नः । यद्यस्ति नाके भुवनेऽथ वाधस्तदा न कौतस्कुतलोकबाधः ॥ नैषधीयचरितम् १०.१२५ ॥ |
| जाज्वल्यमानकिरणोऽस्तु दिनेषु चन्द्रः, सूर्यः, समुल्लसतु पश्चिमदिक्प्रदेशात् । शुष्कः स्वतो भवतु कल्पतरुः परन्तु, व्यर्था भविष्यति न मद्विहिता प्रतिज्ञा ॥ प्रतापविजयः-५३ ॥ |
| जाड्यं धियो हरति सिञ्चति वाचि सत्यं, मानोन्नतिं दिशति पापमपाकरोति । चेतः प्रसादयति दिक्षु तनोति कीर्तिं, सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ नीतिशतकम् २३ ॥ |
| जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि । तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥ नीतिशतकम्५४ ॥ |

| |
|---|
| जातं वंशे भुवनविदिते पुष्करावर्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः । तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥ मेघदूतम्, पूर्वमेघः ६॥ |
| जातं शातक्रतव्यां हरिति विहरतः काकतालीयमस्यामश्यामत्वैकमत्यस्थितसकलकलानिर्मितेर्निर्मलस्य । इन्दोरिन्दीवराभं बलविजयिगजग्रामणीगण्डपिण्डद्वन्द्वापादानदानद्रवलवलगनादङ्कमङ्के विशङ्के ॥ नैषधीयचरितम् २२.१४१ |
| जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः । अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ॥ रघुवंशम् ६.७४ ॥ |
| जातः प्रतापविहितो न हि कुन्तघातः युद्धेऽशने, समभवन्नु निरभ्र-पातः । आमेडितं सकल- दिग्वलये तदाऽभूत् हा हा सलीम! नर-भीम! कुलैक - तात ॥ प्रतापविजयः-१४७ ॥ |
| जातप्रीतिर्या मधुरेणानुवनान्तं कामे कान्ते सारसिकाकुरुतेन । तत्सम्पर्कं प्राप्य पुरा मोहनलीलां कामेकान्ते सा रसिका का कुरुते न ॥ शिशुपालवधम् ६.७६ ॥ |
| जातस्य ते पितुरपीन्द्रजितो निहन्तुर्वत्सस्य वत्स ! कति नाम दिनान्यमूनि । तस्याप्यपत्यमनुतिष्ठति वीरधर्मं दिष्ट्यागतं दशरथस्य कुलं प्रतिष्ठाम् ॥ (उत्तररामचरितम् ५.२४) |
| जाता नोत्कलिका स्तनौ न लुलितौ गात्रं न रोमाञ्चितं वक्त्रं स्वेदकणान्वित न सहसा यावच्छठेनामुना । दृष्टेनाव मनो हृतं धृतिमुषा प्राणेश्वरेणाद्य मे तत्केनात्र निरूप्यमाणनिपुणो मानः समाधीयताम् ॥ अमरुशतकम्-८०॥ |
| जातिद्रव्यबलानां च साम्यमेषां मया सह । मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति ॥ नीतिसंग्रहस्य मित्र-१.४५ ॥ |
| जातिमात्रेण किं कश्चिद्वध्यते पूज्यते क्वचित् । व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ नीतिसंग्रहस्य मित्र-१.५८ ॥ |
| जातिर्यातु रसातलं गुणगणैस्तत्राप्यधो गच्छतां शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना । शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं येनैकेन बिना गुणास्तृणलवप्रायाः समस्ता इमे ॥ नीतिशतकम्३९ ॥ |
| जातौ न वित्ते न गुणे न कामः सौन्दर्य एव प्रवणः स वामः । स्वच्छस्वशैलेक्षितकुत्सबेरस्तां प्रत्यगान्न स्त्रितमां कुबेरः ॥ नैषधीयचरितम् १०.१३ ॥ |
| जात्या गुणेन क्रियया वस्तुयोगेन संज्ञया । निर्देशेन तथा प्राहुः षड् विधामभिधां बुधाः ॥ चन्द्रालोकः १०.२ ॥ |
| जात्या च वृत्तेन च भिद्यमानं छन्दो भुजद्वन्द्वमभूद्यदीयम् । श्लोकार्धविश्रान्तिमयीभविष्णु पर्वद्वयीसन्धिसुचिह्नमध्यम् ॥ नैषधीयचरितम् १०.७७ ॥ |
| जाने विषृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा । तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि पितुर्निकेतम् ॥ रघुवंशम् १४.७२ ॥ |
| जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ । अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥ रघुवंशम् १०.३९ ॥ |
| जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मादित्थंभूतां प्रथमविरहे तामहं तर्कयामि वाचालं मां न खलु सुभगंमन्यभावः करोति प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥ मेघदूतम्, उत्तरमेघः २७ ॥ |
| जानेऽतिरागादिदमेव बिम्बं बिम्बस्य च व्यक्तमितोऽधरत्वम् । द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥ नैषधीयचरितम् ७.३९ ॥ |
| जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम् । युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः ॥ (उत्तररामचरितम् १.११) |
| जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नापि सा तव रुचा विजितश्रि । यस्याः तज्जाम्बवद्रवभवास्य सुधाविधाम्बुर्जम्बूसरिद्वहति सीमनि कम्बुकण्ठि ॥ नैषधीयचरितम् ११.८६ ॥ |
| जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् । नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ रघुवंशम् ७.९ ॥ |
| जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् । नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः॥ कुमारसंभवम् ७.६०॥ |
| जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूमैर्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्तोपहारः । हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा नीत्वा रात्रिं ललितवनितापादरागाङ्कितेषु॥ मेघदूतम्, पूर्वमेघः ३२॥ |
| जाह्नवीजलजकौस्तुभचन्द्रान्पादपाणिहृदयेक्षणवृत्तीन् । उत्थिताब्धिसलिलात्त्वयि लोला श्रीःस्थिता परिचितान्परिचिन्त्य ॥ नैषधीयचरितम् २१.१०७ ॥ |
| जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः । दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत् ॥ रघुवंशम् ८.२५ ॥ |
| जितंजितं तत्खलु पाशपाणिना विनानलं वारि यदि प्रवेक्ष्यसि । तदा त्वदाख्यान्बहिरप्यसूनसौ पयःपतिर्वक्षसि वक्ष्यतेतराम् ॥ नैषधीयचरितम् ९.४८ ॥ |
| जितरोषरया महाधियः सपदि क्रोधजितो लघुर्जनः । विजितेन जितस्य दुर्मतेर्मतिमद्भिः सह का विरोधिता ॥ शिशुपालवधम् १६.२६ ॥ |
| जितस्तदास्येन कलानिधिर्दधे द्विचन्द्रधीसाक्षिकमायकायताम् । तथापि जिग्ये युगपत्सखीयुगप्रदर्शितादर्शबहूभविष्णुना ॥ नैषधीयचरितम् १५.५१ ॥ |
| जितस्तवास्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौ मम तौ वधे कृतः । तवेति कृत्वा यदि तज्जितं मया न मोघसंकल्पधराः किलामराः ॥ नैषधीयचरितम् ९.१४५ ॥ |
| जिह्वाशतान्युल्लसयन्त्यजस्रं लसत्तडिल्लोलविषानलानि । त्रासान्निरस्तां भुजगेन्द्रसेना नभश्चरैस्तत्पदवीं विवव्रे ॥ किरातार्जुनीयम् १६.३७ ॥ |

| |
|---|
| जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं हन्ताङ्गेषु गुणाश्च बन्ध्य-फलतां याता गुणज्ञैर्विना । किं युक्तं सहसाभ्युपैति बलवान्कालः कृतान्तोऽक्षमी हा ज्ञातं मदनान्तकाङ्घ्रि-युगलं मुक्त्वास्ति नान्यो गतिः ॥ वैराग्यशतकम् ८३ ॥ |
| जीर्णाः कन्था ततः किं सितममलपटं पट्टसूत्रं ततः किं एका भार्या ततः किं हयकरिसुगणैरावृतो वा ततः किम् । भक्तं भुक्तं ततः किं कदशनमथवा वासरान्ते ततः किं व्यक्तज्योतिर्न वान्तर्मथितभवभयं वैभवं वा ततः किम् ॥ वैराग्यशतकम् ॥ |
| जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्जयोः श्रावणिकेऽपि सत्स्यात् । वेशोऽम्बुपेज्यानिलवासवेषु नावश्यमस्तादिविचारणाऽत्र ॥ मुहूर्त.गृहप्रवेशप्रकरणम् २॥ |
| जीवार्कविच्छुक्रशनैश्चरेषु लग्नारिजामित्रसुखत्रिगेषु । स्थितिः शतं स्याच्छरदां सितार्कारेज्ये तनुत्र्यङ्गसुते शते द्वे ॥ मुहूर्त.वास्तुप्रकरणम् २२॥ |
| जीवार्कारदिने मृगेज्यनिरृतिश्रोत्रादितिब्रध्नभै- रिक्तामार्करसाष्टवर्ज्यतिथिभिर्मासाधिपे पीवरे । सीमन्तोऽष्टमषष्ठमासि शुभदैः केन्द्रत्रिकोणे खलै- र्लाभारित्रिषु वा ध्रुवान्त्यसदहे लग्ने च पुंभांशके ॥ मुहूर्त.संस्कारप्रकरणम् ८॥ |
| जीवितावधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात् । तेन वश्चरणमर्चतु सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक् ॥ नैषधीयचरितम् ५.९७ ॥ |
| जीवितावधि वनीयकमात्रैर्याच्यमानमखिलैः सुलभं यत् । अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः ॥ नैषधीयचरितम् ५.८१ ॥ |
| जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः । इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमितेन ॥ नैषधीयचरितम् ५.४९ ॥ |
| जीवेऽन्त्यमैत्राश्व्यदितीज्यधिष्ण्यं शुक्रेऽन्त्यमैत्राश्व्यदितिश्रवोभम् । शनौ श्रुति ब्राह्मसमीरभानि सर्वार्थसिद्ध्यै कथितानि पूर्वैः ॥ मुहूर्तचिन्त.२९ ॥ |
| जुगूह तस्याः पथि लक्ष्मणो यत्सव्येतरेण स्फुरता तदक्ष्णा । आख्यातमस्यै गुरु भावि दुःखं अत्यन्तलुप्तप्रियदर्शनेन ॥ रघुवंशम् १४.४९ ॥ |
| जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः । अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ रघुवंशम् १.२१ ॥ |
| जेतुं जैत्राः शेकिरे नारिसैन्यैः पश्यन्तोऽधो लोकमस्तेषुजालाः । नागारूढाः पार्वतानि श्रयन्तो दुर्गाणीव त्रासहीनास्त्रसानि ॥ शिशुपालवधम् १८.२४ ॥ |
| जेतुमेव भवता तपस्यते नायुधानि दधते मुमुक्षवः । प्राप्स्यते च सकलं महीभृता संगतेन तपसः फलं त्वया ॥ किरातार्जुनीयम् १३.५४ ॥ |
| ज्ञराहुपूर्णेन्दुसिताः स्वपृष्ठे भं सप्तगोजातिशरैर्मितं हि । संलत्तयन्तेऽर्कशनीज्यभौमाः सूर्याष्टतर्काग्निमितं पुरस्तात् ॥ मुहूर्त.विवाहप्रकरणम् ५९॥ |
| ज्ञानाधिकासि सुकृतान्यधिकाशि कुर्याः कार्यं किमन्यकथनैरपि यत्र मृत्योः । एकं जनाय सतताभयदानमन्यद्धन्ये वहत्यमृतसत्त्रमवारितार्थि ॥ नैषधीयचरितम् ११.१२ ॥ |
| ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ रघुवंशम् १.२२ ॥ |
| ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ- प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः । त्वां पातु मञ्जरितपल्लवकर्णपूर- लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ अमरुशतकम्- १॥ |
| ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः । रिपुश्रियां साञ्जनभाष्पसेके बन्दीकृटानामिव पद्धती द्वे ॥ रघुवंशम् ६.५५ ॥ |
| ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र- मुद्भूरिघोरघनघर्घरघोषमेतत् ।ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बि विकटोदरमस्तु चापम् ॥ (उत्तररामचरितम् ४.२९) |
| ज्यानिनिआदमथ गृहणती तयोः प्रादुरास बहूलक्षपा छविः । ताडका चलकपालकुण्डला कालिकेव निबिडा बलाकिनी ॥ रघुवंशम् ११.१५ ॥ |
| ज्याबन्धनिष्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण । कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात् ॥ रघुवंशम् ६.४० ॥ |
| ज्येष्ठद्वन्द्वं मध्यमं सम्प्रदिष्टं त्रिज्येष्ठं चेन्नैव युक्तं कदापि । केचित्सूर्यं वह्निगं प्रोज्झ्य चाऽऽहुर्नैवाऽन्योन्यं ज्येष्ठयोः स्याद्विवाहः ॥ मुहूर्त.विवाहप्रकरणम् १५॥ |
| ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनी- पित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम् । कर्काल्यण्डजभान्ततोऽर्धघटिका सिंहाश्वमेषादिगा पूर्णान्ते घटिकात्मकं त्वशुभदं नन्दातिथेश्चादिमम् ॥ मुहूर्त.विवाहप्रकरणम् ४३॥ |
| ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयोः श्वा तथा मार्जारोऽदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरुः । व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्न्यर्क्षयो- र्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत् ॥ मुहूर्त.विवाहप्रकरणम् २६॥ |
| ज्येष्ठारौद्रार्यमाम्भःपतिभयुगयुगं दास्रभं चैकनाडी पुष्येन्दुत्वाष्ट्रमित्रान्तकवसुजलभं योनिबुध्ने च मध्या । वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरास्या- द्दम्पत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः ॥ मुहूर्त.विवाहप्रकरणम् ३४॥ |
| ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हन्त्यादिमे भर्तृगृहे वधूः शुचौ । श्वश्रूं सहस्ये श्वशुरं क्षये तनुं तातं मधौ तातगृहे विवाहतः ॥ मुहूर्त.वधूप्रवेशप्रकरणम् ३॥ |
| ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रीत्या कुवलयपदप्रापि कर्णे करोति । धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ मेघदूतम्, पूर्वमेघः ४४॥ |
| ज्योतिर्विद्गणवन्दिताङ्घ्रिकमलस्तत्सूनुरासीत्कृती नाम्नाऽनन्त इति प्रथामधिगतो भूमण्डलाहस्करः। यो रम्यां जनिपद्धतिं समकरोद्दुष्टाशयध्वंसिनीं टीकां चोत्तमकामधेनुगणितेऽकार्षीत्सतां प्रीतये ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ९॥ |
| ज्योत्स्नापयःक्ष्मातटवास्तुवस्तुच्छायाछलच्छिद्रधरा धरायाम् । शुभ्रांशुशुभ्रांशकराः कलङ्कनीलप्रभामिश्रविभा विभान्ति ॥ नैषधीयचरितम् २२.७२ ॥ |
| ज्योत्स्नामयं रात्रिकलिन्दकन्यापूरानुकारेऽपसृतेऽन्धकारे । परिस्फुरन्निर्मलदीप्तिदीपं व्यक्तायते सैकतमन्तरीपम् ॥ नैषधीयचरितम् २२.६२ ॥ |

| |
|---|
| ज्योत्स्नामादयते चकोरशिशुना द्राघीयसी लोचने लिप्सुर्मूलमिवोपजीवितुमितः संतपर्णात्मीकृतात् । अङ्के रङ्कुमयं करोति च परिस्प्रष्टुं तदेवादृतस्त्वद्वत्त्रं नयनश्रियाप्यनधिकं मुग्धे विधित्सुर्विधुः ॥ नैषधीयचरितम् २२.१४३ ॥ |
| ज्वलतः शमनाय चित्रभानोः प्रलयाप्लावमिवाभिदर्शयन्तः । ववृषुर्वृषनादिनो नदीनां प्रतटारोपितवारि वारिवाहाः ॥ शिशुपालवधम् २०.७० ॥ |
| ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि । विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥ किरातार्जुनीयम् २.२४ ॥ |
| ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता । स्वजयिनोस्त्रपया सविधस्थयोर्मलिनतामभजद्भुजयोर्भृशम् ॥ नैषधीयचरितम् ४.३४ ॥ |
| ज्वलदम्बरकोटरान्तरालं बहुलार्द्राम्बुदपत्रबद्धधूमं । परिदीपितदीर्घकाष्ठमुच्चैस्तरुवद्विश्वमुवोष जातवेदाः ॥ शिशुपालवधम् २०.६२ ॥ |
| ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः । अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ किरातार्जुनीयम् २.२० ॥ |
| ज्वलितानललोलपल्लवान्ताः स्फुरदष्टापदपत्रपीतभासः । क्षणमात्रभवामभावकाले सुतरामापुरिवायतिं पताकाः ॥ शिशुपालवधम् २०.६४ ॥ |
| झणज्झणमिति बहुभूषणशब्दमिश्रं किं द्रौपदीव पलायसे रामभीता। एष हरामि सहसेति यथा हनूमान्विश्वावसोर्भगिनीमिव तां सुभद्राम्॥ (मृच्छकटिकम् १.२५) |
| झणज्झणितकङ्कणक्वणितकिङ्किणीकं धनु- र्ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम् । वितत्य किरतोः शरानविरतं पुनः शूरयो- र्विचित्रमभिवर्तते भुवनभीममायोधनम् ॥<br><br>(उत्तररामचरितम् ६.१) |
| तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम् । भूभृतां चिरमनागतिहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ॥ नैषधीयचरितम् ५.१३ ॥ |
| तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशाङ्गरागं । सूतात्मजाः सवयसः प्रथितप्रबोधं) प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥ रघुवंशम् ५.६५ ॥ |
| तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि । स्वं च संहितममोघमाशुगं व्याजहार हरसूनसंनिभः ॥ रघुवंशम् ११.८३ ॥ |
| तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरोधसा । रोगशान्तिमपदिश्य मन्त्रिणः संभृते शिखिनि गूढमादधुः ॥ रघुवंशम् १९.५४ ॥ |
| तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः । अर्हस्येनं शमयितुमलं वारिधारासहस्रैरापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ मेघदूतम्, पूर्वमेघः ५३॥ |
| तं जगाद गिरमुद्गिरन्निव स्नेहमाहितविकासया दृशा । यज्ञकर्मणि मनः समादधद्वाग्विदां वरमकमद्वदो नृपः ॥ शिशुपालवधम् १४.१ ॥ |
| तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः । प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥ रघुवंशम् ५.६१ ॥ |
| तं दह्यमानैरपि मन्मथैधं हस्तैरुपास्ते मलयः प्रवालैः । कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां सदा यदाशामवलम्बते यः ॥ नैषधीयचरितम् ८.७८ ॥ |
| तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने । काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥ कुमारसंभवम् ३.३५॥ |
| तं न्यमन्त्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन् वशी । राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम् ॥ रघुवंशम् ११.३२ ॥ |
| तं पयोधरनिषक्तचन्दनैर्मौक्तिकग्रथितचारुभूषणैः । ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलम्बिमणिमेखलाः प्रियाः ॥ रघुवंशम् १९.४५ ॥ |
| तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम् । बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ॥ रघुवंशम् ११.६७ ॥ |
| तं पूर्वाचार्यसूर्योक्तिज्योतिस्तोमोद्गमं स्तुमः । यं प्रस्तूय प्रकाशन्ते मद्गुणास्त्रसरेणवः ॥ चन्द्रालोकः १.४ ॥ |
| तं प्रमत्तमपि न प्रभावतः शेकुराक्रमितुमन्यपार्थिवाः । आमयस्तु रतिरागसंभवो दक्षशाप इव चन्द्रमक्षिणोथ ॥ रघुवंशम् १९.४८ ॥ |
| तं प्राप्य सर्वावयवानवद्यं व्यावर्ततान्योपगमात्कुमारी । न हि प्रफुल्लं सहकारं एत्य वृक्सान्तरं काङ्क्षति षट्पदाली ॥ रघुवंशम् ६.६९ ॥ |
| तं भावार्थ प्रसवसमयाकाङ्क्षिणीनां प्रजानामन्तर्गूढं क्षितिरिव बभौ बीजमुष्टिं दधाना । मौलैः सार्धं स्थविरसचिवैर्हेमसिंहासनस्था राज्ञी राज्यं विधिवदशिषर्तुरव्याहताद्भज्ञा ॥ रघुवंशम् १९.५७ ॥ |
| तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् । दिदेश कौतस्य समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥ रघुवंशम् ५.३० ॥ |
| तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः। मुखैः प्रभामण्डलरेणुगौरैः पद्माकरं चक्रुरिवान्तरीक्षम्॥ कुमारसंभवम् ७.३८॥ |
| तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् । सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैक वृत्तिभाक्॥ कुमारसंभवम् ७.१६॥ |
| तं रागबन्धिष्ववितृप्तमेव भोगेषु सौभाग्यविशेषभोग्यं । विलासिनीनामरतिक्षमापि जरा वृथा मत्सरिणी जहार ॥ रघुवंशम् १८.१९ ॥ |
| तं राजवीथ्यामधिहस्ति यान्तमाधोरणालम्बितमग्र्यवेषं । षड्वर्षदेशियमपि प्रभुत्वात्प्रैक्षन्त पौराः पितृगौरवेण ॥ रघुवंशम् १८.३९ ॥ |
| तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः। दृष्ठिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः॥ कुमारसंभवम् ७.४५॥ |
| तं वदन्तमिति विष्टरश्रवाः श्रावयन्नथ समस्तभूभृतः । व्याजहार दशनांशुमण्डलव्याजहार शबलं दधद्वपुः ॥ शिशुपालवधम् १४.१२ ॥ |
| तं वाहनादवनतोत्तरकायमीषद्विध्यन्तमुद्धतसटाः प्रतिहन्तुं ईषुः । नात्मानमस्य विविदुः सहसा वराहा वृकेषु विद्धं इषुभिर्जघनाश्रयेषु ॥ रघुवंशम् ८.६० ॥ |

| |
|---|
| तं विदर्भरमणीमणिसौधादुज्जिहानमनुदर्शितसेवैः । अपर्णान्निजकरस्य नरेन्द्रैरात्मनः करदता पुनरूचे ॥ नैषधीयचरितम् २१.१ ॥ |
| तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि । ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥ रघुवंशम् २.६२ ॥ |
| तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि- र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती । मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ ॥ कुमारसंभवम् ५.८५ ॥ |
| तं वेधा विदधे नूनं महाभूतसमाधिना । तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ रघुवंशम् १.२९ ॥ |
| तं शम्भुराक्षिप्तमहेषुजालं लोहैः शरैर्मर्मसु निस्तुतोद । हृत्तोत्तरं तत्त्वविचारमध्ये वक्तेव दोषैर्गुरुभिर्विपक्षं ॥ किरातार्जुनीयम् १७.४३ ॥ |
| तं श्रिया घनयानस्तरुचा सारतया तया । यातया तरसा चारुस्तनयानघया श्रितं ॥ शिशुपालवधम् १९.८८ ॥ |
| तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रं । प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीं ॥ रघुवंशम् ५.४० ॥ |
| तं स द्विपेन्द्रतुलितातुलतुङ्गशृङ्गमभ्युल्लसत्कदलिकावनराजिमुच्चैः । विस्ताररुद्धवसुधोऽन्वचलं चचाल लक्ष्मीं दधत्प्रतिगिरेरलघुर्बलौघः ॥ शिशुपालवधम् ५.२ ॥ |
| तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः । हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ रघुवंशम् १.१० ॥ |
| तच्चात्मचिन्तासुलभं विमानं हृतं सुरारेः सह जीवितेन । कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त ॥ रघुवंशम् १४.२० ॥ |
| तच्चिन्तनानन्तरमेव देवः सरस्वतीं सस्मितमाह स स्म । स्वयंवरे राजकगोत्रवृत्तवक्त्रीमिह त्वां करवाणि वाणि ॥ नैषधीयचरितम् १०.७ ॥ |
| तच्चोदितः च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय । ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं नृपतिः शशंस ॥ रघुवंशम् ८.७७ ॥ |
| तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमू रतीशः । रतिप्रतिद्वन्द्वितमासु नूनं नामूषु निर्णीतरतिः कथंचित् ॥ नैषधीयचरितम् ६.३१ ॥ |
| तज्जः श्रमाम्बु सुरतान्तमुदा नितान्तमुत्कण्टके स्तनतटे तव संचरिष्णुः । खञ्जन्प्रभञ्जनजनः पथिकः पिपासुः पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ॥ नैषधीयचरितम् ११.१०९ ॥ |
| तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तोनतिथौ शुभेऽह्नि । एकादशे द्वादशकेऽपि घस्रे मृदुध्रुवक्षिप्रवरोडुषु स्यात् ॥ मुहूर्त.संस्कारप्रकरणम् ११॥ |
| तटतरुखगश्रेणीसांराविणैरिव साम्प्रतं सरसि विगलन्निद्रामुद्राजनिष्ट सरोजिनी । अधरसुधया मध्ये मध्ये वधूमुखलब्धया धयति मधुपः स्वादुंकारं मधूनि सरोरुहाम् ॥ नैषधीयचरितम् १९.२९ ॥ |
| तटान्तविश्रान्ततुरंगमच्छटास्फुटानुबिम्बोदयचुम्बनेन यः । बभौ चलद्वीचिकशान्तशातनैः सहस्रमुच्चैः श्रवसामिवाश्रयम् ॥ नैषधीयचरितम् १.१०९ ॥ |
| तडिदुज्ज्वलजातरूपपुङ्खैः खमयःश्याममुखैरभिध्वनद्भिः । जलदैरिव रंहसा पतद्भिः पिदधे संहतिशालिभिः शरौघैः ॥ शिशुपालवधम् २०.१३ ॥ |
| तत उदग्र इव द्विरदे मुनौ रणमुपेयुषि भीमभुजायुधे । धनुरपास्य सबाणधि शंकरः प्रतिजघान घनैरिव मुष्टिभिः ॥ किरातार्जुनीयम् १८.१ ॥ |
| ततः किराताधिपतेरलघ्वीं आजिक्रियां वीक्ष्य विवृद्धमन्युः । स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि ॥ किरातार्जुनीयम् १६.१ ॥ |
| ततः परं तत्प्रभवः प्रपेदे ध्रुवोपमेयो ध्रुवसंधिरुर्वी । यस्मिन्नभूज्ज्यायसि सत्यसंधे संधिर्ध्रुवः संनमतामरीणाम् ॥ रघुवंशम् १८.३४ ॥ |
| ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः । धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥ रघुवंशम् ३.३९ ॥ |
| ततः परं दुष्प्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ । निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ॥ रघुवंशम् ६.३१ ॥ |
| ततः परं वज्रधरप्रभावस्तदात्मजः संयति वज्रघोषः । बभूव वज्राकरभुषणायाः पतिः पृथिव्याः किल वज्रनाभः ॥ रघुवंशम् १८.२१ ॥ |
| ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम् । रघुः शशाङ्कार्धमुखेन पत्रिणा शरासनज्यामलुनाद्विडौजसः ॥ रघुवंशम् ३.५९ ॥ |
| ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वी लघयिष्यता धुरम् । निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ॥ रघुवंशम् ३.३५ ॥ |
| ततः प्रतीच्छ प्रहरेति भाषिणी परस्परोल्लासितशल्यपल्लवे । मृषा मृधं सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥ नैषधीयचरितम् १.६८ ॥ |
| ततः प्रयात्यस्तमदावलेपः स जय्यतायाः पदवीं जिगीषोः । गन्धेन जेतुः प्रमुखागतस्य प्रतिद्विपस्येव मतङ्गजौघः ॥ किरातार्जुनीयम् १७.१७ ॥ |
| ततः प्रसूने च फले च मञ्जुले स संमुखस्थाङ्गुलिना जनाधिपः । निवेद्यमानं वनपालपाणिना व्यलोकयत्काननकामनीयकम् ॥ नैषधीयचरितम् १.७६ ॥ |
| ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता । गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥ रघुवंशम् ३.५१ ॥ |
| ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलं कुमारः । येन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाभासे ॥ रघुवंशम् ७.६३ ॥ |
| ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः । बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ किरातार्जुनीयम् ३.१ ॥ |
| ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम् । उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम् ॥ किरातार्जुनीयम् ४.१ ॥ |
| ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः । गारुत्मतं तीरगतस्तरस्वी भुजंगनाशाय समाददेऽस्त्रं ॥ रघुवंशम् १६.७७ ॥ |
| ततः स भैम्या ववृते वृते नृपैर्विनिःश्वसद्भिः सदसि स्वयंवरः । चिरागतैस्तर्कितदविरागितैः स्फुरद्भिरानन्दमहार्णवैर्नवैः ॥ नैषधीयचरितम् १२.२ ॥ |
| ततः स सम्प्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषं । उवाच यक्षस्तमचोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ किरातार्जुनीयम् ४.२० ॥ |
| ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः । उपोषितैर्वास्तुविधानविद्भिर्निर्वर्तयामास रघुपवीरः ॥ रघुवंशम् १६.३९ ॥ |
| ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान् । वन्ध्यश्रमास्ते सरयूं विगाह्य तं ऊचुराम्लानमुखप्रसादाः ॥ रघुवंशम् १६.७५ ॥ |

| |
|---|
| ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः । वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ॥ रघुवंशम् २.६४ ॥ |
| ततः सुनन्दावचनावसाने लज्जां तनू कृत्य नरेन्द्रकन्या । दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ॥ रघुवंशम् ६.८० ॥ |
| ततः सुपर्णव्रजपक्षजन्मा नानागतिर्मण्डलयञ्जवेन । जरत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः ॥ किरातार्जुनीयम् १६.४४ ॥ |
| ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा मनस्विन्या रूढप्रणयसहसोद्गद्गदगिरा । अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं रुषा ब्रह्मास्त्रं मे शरसि निहितो वामचरणः ॥ अमरुशतकम्- ४६॥ |
| ततस्ततधनुर्मौर्वीविस्फारस्फारिनिःस्वनैः । तूर्यैर्युगक्षये क्षुभ्यदकूपारानुकारिणी ॥ शिशुपालवधम् १९.२६ ॥ |
| ततस्तदप्रस्तुतभाषितोत्थितैः सदस्तदश्वेति हसैः सदःसदाम् । स्फुटाजनि म्लानिरतोऽस्य भूपतेः सिते हि जायेत शितेः सुलक्ष्यता ॥ नैषधीयचरितम् १२.२२ ॥ |
| ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु । बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ॥ रघुवंशम् ७.५ ॥ |
| ततस्तदुर्वीन्द्रगुणाद्भुतादिव स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी । विधीयतामाननमुद्रणेति सा जगाद वैदग्ध्यमयेङ्गितैव ताम् ॥ नैषधीयचरितम् १२.३१ ॥ |
| ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्यघोषः। विमानश्रृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः॥ कुमारसंभवम् ७.४०॥ |
| ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालम् । तस्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यम् ॥ रघुवंशम् ७.६२ ॥ |
| ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिङ्गितनीलमूर्तयः । अधोमुखाकाशसरिन्निपातिनीरपः प्रसक्तं मुमुचुः पयोमुचः ॥ किरातार्जुनीयम् १६.५५ ॥ |
| ततो निषङ्गादसमग्रं उद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् । नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरम् ॥ रघुवंशम् ३.६४ ॥ |
| ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी । प्राक्संनिकर्षं मगधेश्वरस्य नीत्वा कुमारीं अवदत्सुनन्दा ॥ रघुवंशम् ६.२० ॥ |
| ततो नृपेनानुगताः स्त्रियस्ता भ्राजिष्णुना सातिशयं विरेजुः । प्रागेव मुक्ता नयनाभिरामाः प्राप्येन्द्रनीलं किमुतोन्मयूखं ॥ रघुवंशम् १६.६९ ॥ |
| ततो भुजंगाधिपतेः फणाग्रैरधः कथंचिद्धृतभूमिभागः । शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निबिडं बिभेद ॥ कुमारसंभवम् ३.५९ ॥ |
| ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः । जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥ रघुवंशम् २.३० ॥ |
| ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय । वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥ रघुवंशम् ५.१९ ॥ |
| ततो विशांपत्युरनन्यसंततेर्मनोरथं किंचिदिवोदयोन्मुखम् । अनन्यसौहार्दरसस्य दोहदं प्रिया प्रपेदे प्रकृतिप्रियंवदा ॥ रघुवंशम् ३.२आ ॥ |
| ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः । तेजःश्रियामाश्रयमुत्तमासिं साक्षादहंकारमिवाललम्बे ॥ किरातार्जुनीयम् १७.५५ ॥ |
| ततोऽनु देव्या जगदे महेन्द्रभूपुरंदरं सा जगदेकवन्द्यया । तदार्जववर्जिततर्जनीकया जनी कयाचित्परचित्त्स्वरूपया ॥ नैषधीयचरितम् १२.२३ ॥ |
| ततोऽनु वार्ष्णेयनियन्तृकं रथं युधि क्षितारिक्षितिभृज्जयद्रथः । नृपः पृथासूनुरिवाधिरूढवान्स जन्ययात्रामुदितः किरीटवान् ॥ नैषधीयचरितम् १५.७८ ॥ |
| ततोऽनुपूर्वायतवृत्तबाहुः श्रीमान्क्षरल्लोहितदिग्धदेहः । आस्कन्द्य वेगेन विमुक्तनादः क्षितिं विधुन्वन्निव पार्ष्णिघातैः ॥ किरातार्जुनीयम् १७.५० ॥ |
| ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणस्प्रसूना । स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ॥ रघुवंशम् १४.५४ ॥ |
| ततोऽवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः । वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्तः ॥ रघुवंशम् ७.१७ ॥ |
| तत्कालमानन्दमयीभवन्ती भवत्तरानिर्वचनीयमोहा । सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभुङ्क्त मिष्टम् ॥ नैषधीयचरितम् ८.१५ ॥ |
| तत्कालवेद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य । तां लोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश ॥ नैषधीयचरितम् १०.९१ ॥ |
| तत्तदर्यमरहस्यजपेषु स्रङ्नयः शयममुष्य बभाज । रक्तिमानमिव शिक्षितुमुच्चै रक्तचन्दनजबीजसमाजः ॥ नैषधीयचरितम् २१.३३ ॥ |
| तत्तदीयविशिखातिसर्जनादस्तु वां गुरु यदृच्छयागतं । राघवप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयं ॥ किरातार्जुनीयम् १३.५७ ॥ |
| तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः। भूगोलच्छायमायामयगणितविदुन्नेयकायोऽभियाभूदेतत्कीर्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः ॥ नैषधीयचरितम् १२.९४ ॥ |
| तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः । अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥ रघुवंशम् १.४७ ॥ |
| तत्तद्विरागमुदितं शिबिकाधरस्थाः साक्षाद्विदुः स्म न मनागपि यानधुर्याः । आसन्ननायकविषण्णमुखानुमेयभैमीविरक्तचरितानुमया तु जज्ञुः ॥ नैषधीयचरितम् ११.१२ ॥ |
| तत्तितिक्षितमिदं मया मुनेरित्यवोचत वचश्चमूपतिः । बाणमत्रभवते निजं दिशन्नाप्नुहि त्वमपि सर्वसम्पदः ॥ किरातार्जुनीयम् १३.६८ ॥ |
| तत्पूर्वमंसद्वयसं द्विपाधिपाः क्षणं सहेलाः परितो जगाहिरे । सद्यस्ततस्तेरुरनारतस्रुतस्वदानवारिप्रचुरीकृतं पयः ॥ शिशुपालवधम् १२.७२ ॥ |
| तत्प्रणीतमनसामुपेयुषां द्रष्टुमाहवनमग्रजन्मनां । आतिथेयमनिवारितातिथिः कर्तुमाश्रमगुरुः स नाश्रमत् ॥ शिशुपालवधम् १४.३८ ॥ |
| तत्प्रतीपपवनादि वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् । अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वन्तमित्यलघयत्स तद्व्यथाम् ॥ रघुवंशम् ११.६२ ॥ |
| तत्प्रसीदत निधत्त न खेदं दूत्यमत्यसदृशं हि ममेदम् । हास्यतैव सुलभा न तु साध्यं तद्विधित्सुभिरनौपयिकेन ॥ नैषधीयचरितम् ५.११५ ॥ |
| तत्प्रसुप्तभुजगेन्द्रभीषणं वीक्ष्य दाशरथिराददे धनुः । विद्रुतक्रतुमृगानौसारिणं येन बाणमसृजद्वृषध्वजः ॥ रघुवंशम् ११.४४ ॥ |

| |
|---|
| तत्प्रार्थितं जवन्वाजिगतेन राज्ञा तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति । श्यामीचकार वनमाकुलदृश्टिपातैर्वतेरितोत्पलदलप्रकरैरिवाम्भः ॥ रघुवंशम् ८.५६ ॥ |
| तत्र कार्मुकभृतं महाभुजः पश्यति स्म सहसा वनेचरं । संनिकाशयितुमग्रतः स्थितं शासनं कुसुमचापविद्विषः ॥ किरातार्जुनीयम् १३.३५ ॥ |
| तत्र तीर्थसलिलेन दीर्घिकास्तल्पमन्तरितभूमिभिः कुशैः । सौधवासं उटजेन विस्मृतः संचिकाय फलनिःस्पृहस्तपः ॥ रघुवंशम् १९.२ ॥ |
| तत्र दीक्षितमृषिं रकषतुर्विघ्नतो दशरथात्मजौ शरैः । लोकमन्धतमसात्क्रमोदितौ रशामिभिः शशिदिवाकराविव ॥ रघुवंशम् ११.२४ ॥ |
| तत्र नित्यविहितोपहूतिषु प्रोषितेषु पतिषु द्युयोषितां । गुम्फिताः शिरसि वेणयोऽभवन्न प्रफुल्लसुरपादपस्रजः ॥ शिशुपालवधम् १४.३० ॥ |
| तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते । उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति  ॥ नीतिसंग्रहस्य मित्र-१.९ ॥ |
| तत्र बाणाः सुपरुषः समधीयन्त चारवः । द्विषामभूत्सुपरुषस्तस्याकृष्टस्य चारवः ॥ शिशुपालवधम् १९.९२ ॥ |
| तत्र मन्त्रपवितं हविः क्रतावश्नतो न वपुरेव केवलं । वर्णसम्पदमतिस्फुटां दधन्नाम चोज्ज्वलमभूद्धविर्भुजः ॥ शिशुपालवधम् १४.२६ ॥ |
| तत्र मारजयिनि त्वयि साक्षात्कुर्वति क्षणिकतात्मनिषेधौ । पुष्पवृष्टिरपतत्सुरहस्तात्पुष्पशस्त्रशरसंततिरेव ॥ नैषधीयचरितम् २१.८९ ॥ |
| तत्र मित्र ! न वस्तव्यं यत्र नास्ति चतुष्टयम् । ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी  ॥ नीतिसंग्रहस्य मित्र-१.१११ ॥ |
| तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान् । किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते ॥ रघुवंशम् ११.२७ ॥ |
| तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः शश्वत्सिद्धैरुपहृतबलिं भक्तिनम्रः परीयाः । यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः कल्पन्तेऽस्य स्थिरगणपदप्राप्तये श्रद्धधानाः ॥ मेघदूतम्, पूर्वमेघः ५५॥ |
| तत्र सेकहृतलोचनाञ्जनैर्धौतरागपरिपाटलाधरैः । अङ्गनास्तमधिकं व्यलोभयन्नर्पितप्रकृतिकान्तिभिर्मुखैः ॥ रघुवंशम् १९.१० ॥ |
| तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः । रक्षाहेतोर्नवशशिभृता वासवीनां चमूनामत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ मेघदूतम्, पूर्वमेघः ४३॥ |
| तत्र स्वयंवरसमाहृतराजलोकं कन्याललाम कमनीयमजस्य लिप्सोः । भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ॥ रघुवंशम् ५.६४ ॥ |
| तत्रागमद्वासुकिरीशभूषाभस्मोपदेहस्फुटगौरदेहः । फणीन्द्रवृन्दप्रणिगद्यमानप्रसीदजीवाद्यनुजीविवादः ॥ नैषधीयचरितम् १०.२५ ॥ |
| तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं दूराल्लक्ष्यं तदमरधनुश्चारुणा तोरणेन । यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ मेघदूतम्, उत्तरमेघः ९ ॥ |
| तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान् । हंसावली कलकलप्रतिनादवाग्भिः स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥ नैषधीयचरितम् ११.५ ॥ |
| तत्रानुतीरवनवासितपस्विविप्रा शिप्रा तवोर्मिभुजया जलकेलिकाले । आलिङ्गनानि ददती भवता वयस्या हास्यानुबन्धिरमणीयसरोरुहास्या ॥ नैषधीयचरितम् ११.८९ ॥ |
| तत्रापि तत्रभवती भृशसंशयालोरालोक्य सा विधिनिषेधनिवृत्तिमस्याः । याथःपतिं प्रति धृताभिमुखाङ्गुलीकपाणिः क्रमोचितमुपाक्रमताभिधातुम् ॥ नैषधीयचरितम् १३.२१ ॥ |
| तत्राभिषेकप्रयता वसन्ती प्रयुक्तपूजा विधिनातिथिभ्यः । वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासंततये बभार ॥ रघुवंशम् १४.८२ ॥ |
| तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः । तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयां चकार ॥ रघुवंशम् ७.२० ॥ |
| तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः। क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश॥ कुमारसंभवम् ७.७०॥ |
| तत्रावनीन्द्रचयचन्दनचन्द्रलेपनेपथ्यगन्धवहगन्धवहप्रवाहम् । आलीभिरापतदनङ्गशरानुसारी संरुध्य सौरभमगाहत भृङ्गवर्गः ॥ नैषधीयचरितम् ११.५ ॥ |
| तत्रावश्यं जनितसलिलोद्गारमन्तःप्रवेशान्नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् । ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ मेघदूतम्, पूर्वमेघः ६१॥ |
| तत्रेश्वरेण जगतां प्रलयादिवोर्वीं वर्षात्ययेन रुचमभ्रघनादिवेन्दोः । रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ रघुवंशम् १३.७७ ॥ |
| तत्रेश्वरो विष्टरभाग्यथावत्सरत्नमर्घ्यं मधुमच्च गव्यम् । नवे दुकूले च नगोपनीतं प्रत्यग्रहीत्सर्वममन्त्रवर्जम्॥ कुमारसंभवम् ७.७२॥ |
| तत्रैव मग्ना यदपश्यदग्रे नास्याद्दगस्थाङ्गमयास्यदन्यत् । नादास्यदस्यै यदि बुद्धिधारां विच्छिद्य विच्छिद्य चिरान्निमेष ॥ नैषधीयचरितम् ८.९ ॥ |
| तत्वज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं यल्लब्ध्वाप्युपभोगवन्त्यपि धनान्येकान्ततो निःस्पृहाः । न प्राप्तानि धनानि सम्प्रति न च प्राप्तौ दृढप्रत्ययो वाञ्छामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥ पुरुषार्थोपदेशः-59॥ |
| तत्सुराज्ञि भवति स्थिते पुनः कः क्रतुं यजतु राजलक्षणं । उद्धृतौ भवति कस्य वा भुवः श्रीवराहमपहाय योग्यता ॥ शिशुपालवधम् १४.१४ ॥ |
| तथा किमाजन्मनिजाङ्कवर्धितां प्रहित्य पुत्रीं पितरौ विषेदतुः । विसृज्य तौ तं दुहितुः पतिं यथा विनीततालक्षगुणीभवद्गुणम् ॥ नैषधीयचरितम् १६.११६ ॥ |
| तथा च सुग्रीवविभीषणादीनुपाचरत्कृत्रिमसंविधाभिः । संकल्पमात्रोदितसिद्धयस्ते क्रान्ता यथा चेतसि विस्मयेन ॥ रघुवंशम् १४.१७ ॥ |
| तथा न तापाय पयोनिधीनामश्वामुखोत्थः क्षुधितः शिखावान् । निजः पतिः संप्रति वारिपोपि यथा हृदिस्थः स्मरतापदुःस्थः ॥ नैषधीयचरितम् ८.८१ ॥ |
| तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः । यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टीश्च विपक्षयोषितां ॥ किरातार्जुनीयम् ८.४१ ॥ |

तथा पथि त्यागमयं वितीर्णवान्यथातिभाराधिगमेन मागधैः । तृणीकृतं रत्ननिकाय मुच्चकैश्चिकाय लोकश्चिरमुञ्छमुत्सुकः ॥ नैषधीयचरितम् १५.२ ॥

तथा वाच्यस्य सिद्ध्यङ्गं नौरर्थो वारिधेर्यथा । संश्रित्य तरणिं धीरास्तरन्ति व्याधिवारिधीन् ॥ चन्द्रालोकः८.५ ॥

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती । निनिन्द रूपं हृदयेन पार्वती  प्रियेषु सौभाग्यफला हि चारुता ॥ कुमारसंभवम् ५.१ ॥

तथा सहेतुरतथा भेदभिन्ना च कुत्रचित् । सौन्दर्येणैष कन्दर्पः सा च मूर्तिमती रतिः ॥ चन्द्रालोकः९.१५ ॥

तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे । आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥ रघुवंशम् ६.८२ ॥

तथाधिकुर्या रुचिरे चिरेप्सिता यथोत्सुकः सम्प्रति संप्रतीच्छति । अपाङ्गरङ्गस्थललास्यलम्पटाः कटाक्षधारास्त्व कीकटाधिपः ॥ नैषधीयचरितम् १२.८८ ॥

तथापि जातं समरं तथाविधं, यदद्यकालेऽपि तदुल्वण-प्रभाम् । विलिख्य मौनं स्वशिलातलेवलं, चिरादहो रौति 'अरावल' स्थली  ॥ प्रतापविजयः-१११ ॥

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः । समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥ किरातार्जुनीयम् १.८ ॥

तथापि निघ्नं नृप तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः । वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥ किरातार्जुनीयम् ३.१२ ॥

तथापि निर्बध्नति तेऽथवा स्पृहामिहानुरुन्धे मितया न किं गिरा । हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिग्रहा ॥ नैषधीयचरितम् ९.१२ ॥

तथापि शस्त्रव्यवहारनिष्ठुरे बिपक्षभावे चिरमस्य तस्थुषः । तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥ रघुवंशम् ३.६२ ॥

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम् । अमोचि चञ्चूपुट मौनमुद्रा विहायसा तेन विहस्य भूयः ॥ नैषधीयचरितम् ३.९९ ॥

तथायनांशाः खरसाहताश्च स्पष्टार्कगत्या विहृता दिनाद्यैः । मेषादितः प्राक्चलसंक्रमाः स्युर्दाने जपादौ बहुपुण्यदास्ते ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ९॥

तथाशनाय निरशेषि नो ह्रिया न सम्यगालोकि परस्परक्रिया । विमुक्तसंभोगमशायि सस्पृहं वरेण वध्वा च यथाविधि त्र्यहम् ॥ नैषधीयचरितम् १६.४७ ॥

तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ । नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिनासूनुरपि न्यवर्तत ॥ रघुवंशम् ३.६७ ॥

तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः । स न्यस्त शस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ॥ रघुवंशम् २.५९ ॥

तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत्प्राग्रहरो रघूणाम् । पूर्प्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव ॥ रघुवंशम् १६.२३ ॥

तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते । सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः ॥ रघुवंशम् १४.६८ ॥

तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा । गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ रघुवंशम् ५.२६ ॥

तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः । आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ रघुवंशम् १.९२ ॥

तथेति शेषामिव भर्तुराज्ञामादाय मूर्धा मदनः प्रतस्थे । ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥ कुमारसंभवम् ३.२२॥

तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः । उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात् ॥ रघुवंशम् ५.५९ ॥

तथैव तत्कालमथानुजीविभिः प्रसाधनासजनशिल्पपारगैः । निजस्य पाणिग्रहणक्षणोचिता कृता नलस्यापि विभोर्विभूषणा ॥ नैषधीयचरितम् १५.६३ ॥

तथैव तत्कालमथानुजीविभिः प्रसाधनासञ्जनशिल्पपारगैः । निजस्य पाणिग्रहणक्षणोचिता कृता नलस्यापि विभोर्विभूषणा ॥ नैषधीयचरितम् १५.५७ ॥

तथोत्थितं भीमवचःप्रतिध्वनिं निपीय दूतस्य स वक्त्रगह्वरात् । व्रजामि वन्दे चरणौ गुरोरिति ब्रुवन्प्रदाय प्रजिघाय तं बहु ॥ नैषधीयचरितम् १५.१ ॥

तदक्षरैः सस्मितविस्मिताननां निपीय तामीक्षणभङ्गिभिः सभाम् । इहास्य हास्यं किमभून्नवेति तं विदर्भजा भूपमपि न्यभालयत् ॥ नैषधीयचरितम् १२.१०७ ॥

तदक्षितत्कालतुलागसा नखं निखाय कृष्णस्य मृगस्य चक्षुषी । विधिर्यदुद्धर्तुमियेष तत्तयोरदूरवर्तिक्षतता स्म शंसति ॥ नैषधीयचरितम् १५.३७ ॥

तदखिलमिह भूतं भूतगत्या जगत्याः पतिरभिलपति स्म स्वात्मदूतत्वतत्त्वम् । त्रिभुवनजनयावदृत्तवृत्तान्तसाक्षात्कृतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥ नैषधीयचरितम् ९.१५९ ॥

तदङ्गनिस्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम् । अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ॥ रघुवंशम् ३.४१ ॥

तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम् । स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदो मण्डनमर्पयन्तीम् ॥ नैषधीयचरितम् १०.१०६ ॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः । स्वचापदुर्निर्गतमार्गणभ्रमात्स्मरः स्वनन्तीरवलोक्य लज्जितः ॥ नैषधीयचरितम् १.९३ ॥

तदङ्गम् अग्र्यं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुम् अर्हसि । पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसां आददते न पद्धतिम् ॥ रघुवंशम् ३.४६ ॥

तदङ्गसंसर्गमवाप्य कल्पते ध्रुवं चिताभस्मरजो विशुद्धये । तथा हि नृत्याभिनयक्रियाच्युतं विलिप्यते मौलिभिरम्बरौकसां ॥ कुमारसंभवम् ५.७९ ॥

तदञ्जनक्लेदसमाकुलाक्षं प्रम्लानभीजाङ्कुरकर्णपूरम् । वधूमुखं पाटलगण्डलेखमाचारधूमग्रहणाद्बभूव ॥ रघुवंशम् ७.२७ ॥

तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस । श्रुत्वा त एनं कुलराजधान्या साक्षात्पतित्वे वृतमभ्यनन्दन् ॥ रघुवंशम् १६.२४ ॥

तदद्य विश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी । नखैः किलाख्यायि विलिख्य पक्षिणा तवैव रूपेण समः स मत्प्रियः ॥ नैषधीयचरितम् ९.६६ ॥

तदद्य सार्धं मयका रणाङ्गणे, प्रमत्तभावाः समरे धृतायुषाः । विधाय मानङ्गतमान-मर्दनं, स्ववीरभूमिं कलयन्तु सर्वथा ॥ प्रतापविजयः-९७ ॥

तदनघ तनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे । पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः ॥ किरातार्जुनीयम् १०.५० ॥

तदनु स तनुजासखीरवादीत्तुहिनऋतौ गत एव हीदृशीनाम् । कुसुममपि शरायते शरीरे तदुचितमाचरतोपचारमस्याः ॥ नैषधीयचरितम् ४.१२१ ॥

| |
|---|
| तदन्तरन्तः सुषिरस्य बिन्दुभिः करम्बितं कल्पयता जगत्कृता । इतस्ततः स्पष्टमचोरि मायिना निरीक्ष्य तृष्णाचलजिह्वताभृता ॥ नैषधीयचरितम् १६.९४ ॥ |
| तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये । स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥ रघुवंशम् ५.१७ ॥ |
| तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः । दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ रघुवंशम् १.१२ ॥ |
| तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे । ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तं ओषधिः ॥ रघुवंशम् ८.५४ ॥ |
| तदभूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवं । उपतस्थुरास्थितविषादधियः शतयज्वनो वनचरा वसतिं ॥ किरातार्जुनीयम् ६.२९ ॥ |
| तदयं समुपैति भूपतिः पयसां पूर इवानिवारितः । अविलम्बितमेधि वेतसस्तरुवन्माधव मा स्म भज्यथाः ॥ शिशुपालवधम् १६.५३ ॥ |
| तदयुक्तमङ्ग तव विश्वसृजा न कृतं यदीक्षणसहस्रतयम् । प्रकटीकृता जगति येन खलु स्फुटमिन्द्रताद्य मयि गोत्रभिदा ॥ शिशुपालवधम् ९.८० ॥ |
| तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ताः पटवस्तमस्तुवन् । स्वरामृतेनोपजगुश्च सारिकास्तथैव तत्पौरुषगायनीकृताः ॥ नैषधीयचरितम् १.१०३ ॥ |
| तदर्पितामश्रुतवद्विधाय तां दिगीशसंदेशमयीं सरस्वतीम् । इदं तमुर्वीतलशीतलद्युतिं जगाद वैदर्भनरेन्द्रनन्दिनी ॥ नैषधीयचरितम् ९.२ ॥ |
| तदर्हसीमां वसतिं विसृज्य मामभ्युपैतुं कुलराजधानीं । हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्तिं ॥ रघुवंशम् १६.२२ ॥ |
| तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता । वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ॥ रघुवंशम् ८.८३ ॥ |
| तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् । निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ किरातार्जुनीयम् २.१५ ॥ |
| तदलक्ष्यरत्नमयकुड्यमादरादभिधातरीत इत इत्यथो नृपे । धवलाश्मरश्मिपटलाविभावितप्रतिहारमाविशदसौ सदः शनैः ॥ शिशुपालवधम् १३.६२ ॥ |
| तदवितथमवादीर्यन्मम त्वं प्रियजनपरिभुक्तं यद्दुकूलं दधानः । मदधिवसतिमागाःकामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन ॥ शिशुपालवधम् ११.३३ ॥ |
| तदहं विदधे तथातथा दमयन्त्याः सविधे तव स्तवम् । हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते ॥ नैषधीयचरितम् २.४७ ॥ |
| तदा किंचित्किंचित्कृतपदमहोभिः कतिपयैस्तदेतद्विस्तारि स्तनमुकुलमासीन्मृगदृशः । वयः स्नेहाकूतव्यतिकरघनो यत्र मदनः प्रगल्भव्यापारः स्फुरति हृदि मुग्धश्च वपुषि ॥<br><br>(उत्तररामचरितम् ६.३५) |
| तदा तदङ्गस्य बिभर्ति विभ्रमं विलेपनामोदमुचः स्फुरद्रुचः । दरस्फुरत्काञ्चनकेतकीदलात्सुवर्णमभ्यस्यति सौरभं यदि ॥ नैषधीयचरितम् १५.२५ ॥ |
| तदा निसस्वानतमां घनं घनं ननाद तस्मिन्नितरां ततं ततम् । अवापुरुच्चैः सुषिराणि राणितामममानमानद्धमियत्तयाध्वनीत् ॥ नैषधीयचरितम् १५.१६ ॥ |
| तदा प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका । न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ॥ कुमारसंभवम् ५.५५ ॥ |
| तदा प्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ । व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ॥ रघुवंशम् २.३८ ॥ |
| तदात्तमात्मानमवेत्य संभ्रमात्पुनःपुनः प्रायसदुत्प्लवाय सः । गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम् ॥ नैषधीयचरितम् १.१२५ ॥ |
| तदात्मज उदारधीर्विबुधनीलकण्ठानुजो गणेशपदपङ्कजं हृदि निधाय रामाभिधः । गिरीशनगरे वरे भुजभुजेषुचन्द्रेमिते शके विनिरमादिमं खलु मुहूर्तचिन्तामणिम् ॥ मुहूर्त.गृहप्रवेशप्रकरणम् १०॥ |
| तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ । करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥ रघुवंशम् ३.३ ॥ |
| तदानन्दाय त्वत्परिहसितकन्दाय भवती निजालीनां लीनां स्थितिमिह मुहूर्तं मृगयताम् । इतिव्याजात्कृत्वालिषु चलितचित्तां सहचरीं स्वयं सोयं सायंतनविधिविधित्सुर्बहिरभूत् ॥ नैषधीयचरितम् २१.१६३ ॥ |
| तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् । परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां धियः ॥ किरातार्जुनीयम् १.२५ ॥ |
| तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व । प्रत्यागतं त्वास्मि कृतार्थ एव स्तनोपपीडं परिरब्धुकामा ॥ किरातार्जुनीयम् ३.५४ ॥ |
| तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् । विधुरां ज्वलनातिसर्जनान्ननु ! मां प्रापय पत्युरन्तिकम् ॥ कुमारसंभवम् ४.३२ ॥ |
| तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपात् । अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ॥ नैषधीयचरितम् २.४९ ॥ |
| तदिन्द्रसंदिष्टमुपेन्द्र यद्वचः क्षणं मया विश्वजनीनमुच्यते । समस्तकार्येषु गतेन धुर्यतामहिद्विषस्तद्भवता निशम्यताम् ॥ शिशुपालवधम्  १.४१ ॥ |
| तदिहानवधौ निमज्जतो मम कंदर्पशराधिनीरधौ । भव पोत इवावलम्बनं विधिनाकस्मिकसृष्टसंनिधिः ॥ नैषधीयचरितम् २.६ ॥ |
| तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् । रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ॥ रघुवंशम् २.२८ ॥ |
| तदीयमातङ्गघटाविघट्टितैः कटास्थलप्रोषितदानवारिभिः । गृहीतदिक्कैरपुनर्निवर्तिभिश्चिरस्य याथार्थ्यमलम्भि दिग्गजैः ॥ शिशुपालवधम्  १.६३ ॥ |
| तदीषदार्द्रारुणगण्डलेखमुच्छासिकालाञ्जनरागमक्ष्णोः। वधूमुखं क्लान्तयवावतंसमाचारधूपग्रहणाद्बभूव॥ कुमारसंभवम् ७.८२॥ |
| तदुपेत्य मा स्म तमुपालभथाः क्ल दोषमस्य न हि विद्म वयं । इति सम्प्रधार्य रमणाय वधूर्विहितागसेऽपि विससर्ज सखीं ॥ शिशुपालवधम् ९.६० ॥ |
| तदुपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः । हृतवीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखावजितिः ॥ किरातार्जुनीयम् ६.४३ ॥ |

| |
|---|
| तद्दीधितिधारया रयाद्गतया लोकविलोकनामसौ । छदहेम कषन्निवालसत्कषपाषाणनिभे नभस्तले ॥ नैषधीयचरितम् २.६९ |
| तदेकदासीत्वपदादुदग्रे मदीप्सिते साधु विधित्सुता ते । अहेलिना किं नलिनी विधत्ते सुधाकरेणापि सुधाकरेण ॥ नैषधीयचरितम् ३.८ ॥ |
| तदेकलुब्धे हृदि मेऽस्ति लब्धुं चिन्ता न चिन्तामणिमप्यनर्घ्यम् । चित्ते समैकः सकलत्रिलोकीसारो निधिः पद्ममुखं स एव ॥ नैषधीयचरितम् ३.८१ ॥ |
| तदेतदाजानुविलम्बिना ते ज्याघातरेखाकिण लाञ्छनेन । भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन ॥ रघुवंशम् १६.८४ ॥ |
| तदेनमुल्लङ्घितशासनं विधएर्विधेहि कीनाशनिवेशनातिथिम् । शुभेतराचारविपक्रिमापदो विपादनीया हि सतामसाधवः ॥ शिशुपालवधम्  १.७३ ॥ |
| तदेव किं न क्रियते नु का क्षतिर्यदेष तद्दूतमुखेन काङ्क्षति । प्रसीद काञ्चीमयमाच्छिनत्तु ते प्रसह्य काञ्चीपुरभूपुरंदरः ॥ नैषधीयचरितम् १२.३३ ॥ |
| तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः । यद्यर्थिता निर्हृतवाच्यशल्यान्प्राणान्मया धारयितुं चिरं वः ॥ रघुवंशम् १४.४२ ॥ |
| तदैव युद्धोदयकाल सूचकः, समुत्थितो दुर्धर-दुन्दुभि-ध्वनिः । क्षणेन सा सुन्दर-हल्दिघाटिकाऽतिभीमहुङ्कारमयी तदाऽभवत् ॥ प्रतापविजयः-११४॥ |
| तदैव सैन्ये रण- राष- लक्षणो, विलक्षणो वैरिचमूनिषूदनः । स वीरताया निकषोपलो मलो, ननाद वेगेन निसर्ग-निष्ठुरः ॥ प्रतापविजयः-११५ ॥ |
| तदैव सैन्ये सहसा समाविशत् तडिठाभः साहस एव मूर्तिमान्। जयेति शब्देन सरोष घोषणो, रवोऽभवच्छस्त्र- ततिप्रताडितः ॥ प्रतापविजयः-१०६ ॥ |
| तदैव हर्षेण गृहाद् विनिःसरन् स साहसी तं सहसा जनं हसन् । सहस्रनेत्र- प्रतिमो रिपुन्दमो महाद्युतिर्वाचमुवाच मानिनम् ॥ प्रतापविजयः-७१ ॥ |
| तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा । तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥ नैषधीयचरितम् १.१४ ॥ |
| तद् गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण । स एव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे॥ कुमारसंभवम् ७.३१॥ |
| तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव । अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ कुमारसंभवम् ३.१८॥ |
| तद्गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः । विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः ॥ किरातार्जुनीयम् १५.३५ ॥ |
| तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे । पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम् ॥ रघुवंशम् ११.८७ ॥ |
| तद्गुणः स्वगुणत्यागादन्यतः स्वगुणोदयः । पद्मरागारुणं नासामौक्तिकं तेऽधराश्रितम् ॥ चन्द्रालोकः ५.१०२ ॥ |
| तद्गौरसारस्मितविस्मितेन्दुप्रभाशिरःकम्परुचोऽभिनेतुम् । विपाण्डुतामण्डितचामरालीनानामरालीकृतलास्यलीलाम् ॥ नैषधीयचरितम् १०.१०५ ॥ |
| तद्दम्पतिश्रुतिमधून्यथ चाटुगाथा वीणास्तथा जगुरतिस्फुटवर्णबन्धम् । इत्थं यथा वसुमतीरतिगृह्यकस्ताः कीरः किरन्मुदमुदीरयति स्म विश्वाः ॥ नैषधीयचरितम् २१.१३ ॥ |
| तद्दर्शिभिः स्ववरणे फणिभिर्निराशैर्निःश्वस्य तत्किमपि सृष्टमनात्मनीनम् । यत्तान्प्रयातुमनसोऽपि विमानवाहा हा हा प्रतीपपवनाशकुनान्न जग्मुः ॥ नैषधीयचरितम् ११.२२ ॥ |
| तद्भुजादतिवितीर्णसपर्याद्द्युद्रुमानपि विवेद मुनीन्द्रः । स्वःसहस्थितिसुशिक्षितया तान्दानपारमितयैव वदान्यात् ॥ नैषधीयचरितम् ५.११ ॥ |
| तद्यशो हसति कम्बुकदम्बं शम्बुकस्य न किमम्बुधिचुम्बि । नामशेषितससैन्यदशास्यादस्तमाप यदसौ तव हस्तात् ॥ नैषधीयचरितम् २१.७४ ॥ |
| तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहं । महीतलस्पर्शनमात्रभिन्नं ऋद्धं हि राज्यं पदमैन्द्रमाहुः ॥ रघुवंशम् २.५० ॥ |
| तद्वर्णनासमय एव समेतलोकशोभावलोकनपरा तमसौ निरासे । मानी तया गुणविदा यदनादृतोऽसौ तद्भूभृतां सदसि दुर्यशसेव मम्लौ ॥ नैषधीयचरितम् ११.१२८ ॥ |
| तद्वल्गुना युगपदुन्मिषितेन तावत्सद्यः परपरतुलामधिरोहतां द्वे । प्रस्पन्दमानपरुषेतरतारमन्तश्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥ रघुवंशम् ५.६८ ॥ |
| तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विषाये सहसाघम् । भूयतां भगवतः श्रुतिसारैरद्यवाग्भिरघमर्षणऋग्भिः ॥ नैषधीयचरितम् ५.१८ ॥ |
| तद्विस्फुरत्फणविलोकनभूतभीतेः कम्पं च वीक्ष्य पुलकं च ततोनु तस्याः । संजातसात्विकविकारधियः स्वभृत्यान्नृत्यान्न्यषेधदुरगाधिपतिर्विलक्षाः ॥ नैषधीयचरितम् ११.२१ ॥ |
| तद्वीपलक्ष्मपृथुशाल्मलितूलजालैः क्षोणीतले मृदुनि मारुतचारुकीर्णैः । लीलाविहारसमये चरणार्पणानि योग्यानि ते सरससारसकोशमृद्वि ॥ नैषधीयचरितम् ११.७ ॥ |
| तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दन्तेष्वसिभिः पतद्भिः । रणक्षितिः शोणितमद्यकुल्या गजा विविग्नाः करशीकरेण ॥ रघुवंशम् ७.४८ ॥ |
| तनुत्विषा यस्य तृणं स मन्मथा कुलश्रिया यः पवितास्मदन्वयम् । जगत्त्रयीनायकमेलके वरं सुतां परं वेद विवेक्तुमीदृशम् ॥ नैषधीयचरितम् १५.६ ॥ |
| तनुभिस्त्रिनेत्रनयनानवेक्षितस्मरविग्रहद्युतिभिरद्युतन्नराः । प्रमदाश्च यत्र खलु राजयक्ष्मणः परतो निशाकरमनोरमैर्मुखैः ॥ शिशुपालवधम् १३.२९ ॥ |
| तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः । अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोधिकारे ॥ किरातार्जुनीयम् १०.१५ ॥ |
| तनुरुहाणि पुरो विजितध्वनेर्धवलपक्षविहङ्गमकूजितैः । जगलुरक्षमयेव शिखण्डिनः परिभवोऽरिभवो हि सुदुःसहः ॥ शिशुपालवधम् ६.४५ ॥ |
| तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः । ददृषुरध्वनि तं वनदेवताः सुनयनं नयनन्दितकोसलं ॥ रघुवंशम् ८.५२ ॥ |
| तनुवारभसो भास्वानधीरोऽविनतोरसा । चारुणा रमते जन्ये कोऽभीतो रसिताशिनि ॥ किरातार्जुनीयम् १५.२३ ॥ |
| तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः । विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥ किरातार्जुनीयम् ८.५ ॥ |
| तनोत्यकीर्तिं कुसुमाशुगस्य सैषा बतेन्दीवरकर्णपूरौ । यतः श्रवःकुण्डलिकापराद्धशरं खलः ख्यापयिता तमाभ्याम् ॥ नैषधीयचरितम् १०.११८ ॥ |
| तनोरिष्टांशकात् पूर्वं नवांशा दशसंगुणाः । रामाप्ताः लब्धमंशाद्यं तनोर्वर्गादिसाधने ॥ मुहूर्त.विवाहप्रकरणम् १०४॥ |
| तनोषि मानं मयि चेन्मनागपि त्वयि श्रये तद्बहुमानमानतः । विनम्य वक्रं यदि वर्तसे कियन्नमामि ते चण्डि तदा पदावधि ॥ नैषधीयचरितम् ९.१०८ ॥ |

| |
|---|
| तनौ जीव इन्दुर्मृतौ वैरिगोऽर्कः । प्रयातो महीन्द्रो जयत्येव शत्रून् ॥ मुहूर्त.यात्राप्रकरणम् ६०॥ |
| तनौ शनिकुजौ रविर्दशमभे बुधो भृगुसुतोऽपि लाभदशमे । त्रिलाभरिपुभेषु भूसुतशनी गुरुज्ञभृगुजास्तथा बलयुताः ॥ मुहूर्त.यात्राप्रकरणम् ६५॥ |
| तन्नालीकनले चलेतरमनाः साम्यान्मनागप्यभूदप्यग्रे चतुरः स्थितान्न चतुरा पातुं दृशा नैषधान् । आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरं गता तत्तलालंकारीभवनाज्जनाय ददती पातालकन्याभ्रमम् ॥ नैषधीयचरितम् १२.१११ ॥ |
| तन्निर्मलावयवभित्तिषु तद्विभूषारत्नेषु च प्रतिफलन्निजदेहदम्भात् । दृष्ट्या परं न हृदयेन न केवलं तैः सर्वात्मनैव सुतनौ युवभिर्ममज्जे ॥ नैषधीयचरितम् ११.२ ॥ |
| तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कृतचाटुजन्म । रसालवन्या मधुपानुविद्धं सौभाग्यमप्राप्तवसन्तयेव ॥ नैषधीयचरितम् ३.४६ ॥ |
| तन्न्यस्तमाल्यस्पृशि यन्नलस्य स्वेदं करे पञ्चशरश्चकार । भविष्यदुद्वाहमहोत्सवस्य हस्तोदकं तज्जनयांबभूव ॥ नैषधीयचरितम् १४.५६ ॥ |
| तन्मदीयमिदमायुधं ज्यया संगमय्य सशरं विकृष्यताम् । तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया ॥ रघुवंशम् ११.७७ ॥ |
| तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिर्मूले नद्धा मणिभिरनतिप्रौढवंशप्रकाशैः तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ मेघदूतम्, उत्तरमेघः १३ ॥ |
| तन्मिश्रोऽन्योन्यसामान्य-विशेषपरिवर्तनात् । नीरधिः पङ्कजं सौधं सागरो भूरुहः शशी ॥ चन्द्रालोकः १.१२ ॥ |
| तन्मुहूर्तमपि भीमतनूजाविप्रयोगमसहिष्णुरिवायम् । शूलिमौलिशशिभीततयाऽभूद्ध्यानमूर्च्छननिमीलितनेत्रः ॥ नैषधीयचरितम् २१.३८ ॥ |
| तन्वङ्ग्या गुरुसन्निधौ नयनजं यद् वारि संस्तम्भितं तेनान्तर्गलितेन मन्मथशिखी सिक्तोऽनुषङ्गोद्भवः । मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता श्वासामोदसमाकुलालिनिकरव्याजेन धूमावलिः ॥ अमरुशतकम्-९१॥ |
| तन्वाः पुंसो नन्द गोपात्मजायाः कंसेनेव स्फोटितायाः गजेन । दिव्या मूर्तिर्व्योमगैरुत्पतन्ती वीक्षामासे विस्मितैश्चण्डिकेव ॥ शिशुपालवधम् १८.५० ॥ |
| तन्वी श्यामा शिखरदशना पक्वबिम्बाधरौष्ठी मध्ये क्षामा चकितहरिणप्रेक्षणी निम्ननाभिः श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥ मेघदूतम्, उत्तरमेघः १६ ॥ |
| तन्वीमुखं द्रागधिगत्य चन्द्रं वियोगिनस्तस्य निमीलिताभ्याम् । द्वयं द्रढीयः कृतमीक्षणाभ्यां तदिन्दुता च स्वसरोजता च ॥ नैषधीयचरितम् ६.२६ ॥ |
| तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य । स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥ कुमारसंभवम् ३.७१॥ |
| तपःफलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते । भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसर्जि ॥ नैषधीयचरितम् ६.९३ ॥ |
| तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् । प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः ॥ कुमारसंभवम् ३.३४॥ |
| तपनमण्डलदीतितमेकतः सततनैशतमोवृतमन्यतः । हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥ किरातार्जुनीयम् ५.२ ॥ |
| तपनीयनिकर्षराजिगौरस्फुरदुत्तालतडिच्छटाट्टहासं । अनुबद्धसमुद्धताम्बुवाहध्वनिताडम्बरमम्बरं बभूव ॥ शिशुपालवधम् २०.६८ ॥ |
| तपसा तथा न मुदमस्य ययौ भगवान्यथा विपुलसत्त्वतया । गुणसंहतेः समतिरिक्तमहो निजं एव सत्त्वमुपकारि सतां ॥ किरातार्जुनीयम् १८.१४ ॥ |
| तपस्तपोवीर्यसमुद्धतस्य पारं यियासोः समरार्णवस्य । महेषुजालान्यखिलानि जिष्णोरर्कः पयांसीव समाचचाम ॥ किरातार्जुनीयम् १७.३५ ॥ |
| तपस्यतामम्बुनि कैरवाणां समाधिभङ्गे विबुधाङ्गनायाः । अवैमि रात्रेरमताधरोष्ठं मुखं मयूखस्मितचारुचन्द्रम् ॥ नैषधीयचरितम् २२.१२६ ॥ |
| तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं गुणोदारान् दारानुत परिचरामः किमु वयम् । पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान् न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ पुरुषार्थोपदेशः-63॥ |
| तपस्यन्तः सन्तः किमधिनिवसामः सुर-नदीं गुणोदारान्दारानुत परिचरामः सविनयम् । पिबामः शास्त्रौघानुत-विविध-काव्यामृत-रसान्न विद्मः किं कुर्मः कतिपय-निमेषायुषि जने ॥ वैराग्यशतकम् ७६ ॥ |
| तपस्विवेषक्रिययापि तावद्यः प्रेक्षणीयः सुतरां बभूव । राजेन्द्रनेपथ्यविधानशोभा रस्योदितासीत्पुनरुक्तदोषा ॥ रघुवंशम् १४.९ ॥ |
| तपस्विसंसर्गविनितत्सत्त्वे तपोवने वीतभया वसास्मिन् । इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते ॥ रघुवंशम् १४.७५ ॥ |
| तपेन वर्षाः शरदा हिमागमो वसन्तलक्ष्म्या शिशिर समेत्य च । प्रसूनक्लृप्तं ददतः सदर्त्तवः पुरे स्य वास्तव्यदुटुम्बितां दधुः ॥ शिशुपालवधम्  १.६५ ॥ |
| तपोनले जुह्वति सूरयस्तनूर्दिवे फलायान्यजनुर्भविष्णवे । करे पुनः कर्षति सैव विह्वला बलादिव त्वां वलसे न बालिशे ॥ नैषधीयचरितम् ९.४५ ॥ |
| तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः । युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ किरातार्जुनीयम् ७.१३ ॥ |
| तप्ते महाविरहवह्निशिखावलीभिर् आपाण्डुरस्तनतटे हृदये प्रियायाः । रथ्यालिवीक्षणनिवेशितलोलदृष्टेर् नूनं छनच्छनिति बाष्पकणाः पतन्ति ॥ अमरुशतकम्-८९॥ |
| तमकुण्ठमुखाः सुपर्णकेतोरिषवः क्षिप्तमिषुव्रजं परेण । विभिदामनयन्त कृत्यपक्षं नृपतेर्नेतुरिवायथार्थवर्णाः ॥ शिशुपालवधम् २०.२३ ॥ |
| तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि । उपान्तसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ ॥ रघुवंशम् ३.२६ ॥ |
| तमङ्कमारोप्य शरीरयोगजैः स्थितेरभेत्ता स्थितिमन्तमन्वयम् । स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः ॥ रघुवंशम् ३.२७ ॥ |

| |
|---|
| तमङ्गदे मन्दरकूटकोटिव्याघट्टनोत्तेजनया मणीनाम् । वंहीयसा दीप्तिवितानकेअन चकासयामासतुरुल्लसन्ती ॥ शिशुपालवधम् ३.६ ॥ |
| तमतनुवनराजिश्यामितोपत्यकान्तं नगमुपरि हिमानीगौरमासद्य जिष्णुः । व्यपगतमदरागस्यानुसस्मार लक्ष्मीमसितमधरवासो बिभ्रतः सीरपाणेः ॥ किरातार्जुनीयम् ४.३८ ॥ |
| तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं । उपात्तविद्यो गुरुदक्षिनार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ रघुवंशम् ५.१ ॥ |
| तमनतिशयनीयं सर्वतः सारयोगादविरहितमनेकेनाङ्कभाजा फलेन । अकृशमकृशलक्ष्मीश्चेतसाशंसितं स स्वमिव पुरुषकारं शैलमभ्याससाद ॥ किरातार्जुनीयम् ५.५२ ॥ |
| तमनिन्द्यबन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः । पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमैः ॥ किरातार्जुनीयम् ६.२ ॥ |
| तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च । गणाश्च गिर्यालयमभ्यगच्छन्प्रशस्तमारम्भमिवोत्तमार्थाः॥ कुमारसंभवम् ७.७१॥ |
| तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभुवं च पतिव्रता । नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु ॥ रघुवंशम् ८.१९ ॥ |
| तमब्रवीत्सा गुरुणा नवद्या या नीतपौरा स्वपदोन्मुखेन । तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां मां ॥ रघुवंशम् १६.९ ॥ |
| तमभ्यगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् । जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम्॥ कुमारसंभवम् ७.४३॥ |
| तमभ्यनन्दत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः । परामृशन्हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥ रघुवंशम् ३.६८ ॥ |
| तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः । पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥ रघुवंशम् ८.१२ ॥ |
| तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्य्यपूपुजत् । गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः ॥ शिशुपालवधम् १.१४ ॥ |
| तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी । विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित उवाच ॥ रघुवंशम् ५.३ ॥ |
| तमर्चितुं मद्वरणस्रजा नृपं स्वयंवरः संभविता परेद्यवि । ममासुभिर्गन्तुमनाः पुरःसरैस्तदन्तरायः पुनरेष वासरः ॥ नैषधीयचरितम् ९.६५ ॥ |
| तमलभन्त पतिं पतिदेवताः शिखरिणां इव सागरमापगाः । मगधकोसलकेकयशसिनां दुहितरोऽहितरोपितमार्गणं ॥ रघुवंशम् ८.२२ ॥ |
| तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च । स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥ कुमारसंभवम् ४.२६ ॥ |
| तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद्विरता ववन्दे । तस्यै मुनिर्दोहदलिङ्गदर्शी दाश्वान्सुपुत्राशिषमित्युवाच ॥ रघुवंशम् १४.७१ ॥ |
| तमागतं वीक्ष्य युगान्तबन्धुमुत्सङ्गशय्याशयमम्बुराशिः । प्रत्युज्जगामेव गुरुप्रमोदप्रसारिओत्तुङ्गतरङ्गबाहुः ॥ शिशुपालवधम् ३.७७ ॥ |
| तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती । भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ कुमारसंभवम् ५.३१॥ |
| तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् । पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ रघुवंशम् १.५८ ॥ |
| तमात्मसंपन्नमनिन्दितात्मा कृत्वा युवानं युवराजं एव । सुखानि सोऽभुङ्क्त सुखोपरोधि वृत्तं हि राज्ञामपरुद्धवृत्तम् ॥ रघुवंशम् १८.१८ ॥ |
| तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः । निवर्तयिष्यन्विशिखेन कुम्भे जघान नात्यायतकृष्टशार्ङ्गः ॥ रघुवंशम् ५.५० ॥ |
| तमार्यगृह्यं निगृहीत धेनुर्मनुष्यवाचा मनुवंशकेतुम् । विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥ रघुवंशम् २.३३ ॥ |
| तमालिरूचेऽथ विदर्भजेरिता प्रगाढमौनव्रतयैकया सखी । त्रपां समाराधयतीयमन्यया भवन्तमाह स्वरसज्ञया मया ॥ नैषधीयचरितम् ९.६४ ॥ |
| तमाशु चक्षुःश्रवसां समूहं मन्त्रेण ताक्ष्र्योदयकारणेन । नेता नयेनेव परोपजापं निवारयामास पतिः पशूनां ॥ किरातार्जुनीयम् १६.४२ ॥ |
| तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य । स्त्रीसंनिकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥ कुमारसंभवम् ३.७४ ॥ |
| तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् । नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथं इवौषधीनाम् ॥ रघुवंशम् २.७३ ॥ |
| तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः । बलिप्रदिष्टं श्रियमाददानं त्रैविक्रमं पादं इवेन्द्रशत्रुः ॥ रघुवंशम् ७.३५ ॥ |
| तमृद्धिमद्बन्धुजनाधिरुढैर्वृन्दैर्गजानां गिरिचक्रवर्ती । प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः॥ कुमारसंभवम् ७.५२॥ |
| तमेकदृश्यं नयनैः पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि । तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥ कुमारसंभवम् ७.६४॥ |
| तमेव लब्ध्वावसरं ततः स्मरः शरीरशोभाजयजातमत्सरः । अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम् ॥ नैषधीयचरितम् १.४३ ॥ |
| तमोभुक्तताराः स्मृता विश्वसङ्ख्याः शुभो जीवपक्षो मृतश्चापि भोग्याः । तदाक्रान्तभं कर्तरीसंज्ञमुक्तं ततोऽक्षेन्दुसङ्ख्यं भवेद्ग्रस्तनाम ॥ मुहूर्त.यात्राप्रकरणम् १४॥ |
| तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदृशां दिशन्ति । कुहूगिरश्चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ॥ नैषधीयचरितम् ८.६५ ॥ |
| तया प्रतीष्टाहुतिधूमपद्धतिर्गता कपोले मृगनाभिशोभिताम् । ययौ दृशोरञ्जनतां श्रुतौ श्रिता तमाललीलामलिकेऽलकायिता ॥ नैषधीयचरितम् १६.४१ ॥ |
| तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या । प्रसन्नचेतःसलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः॥ कुमारसंभवम् ७.७४॥ |
| तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बया सः । अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ॥ रघुवंशम् ६.८४ ॥ |
| तया हीनं विधातर्मा कथं पश्यन्न दूयसे । सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकं ॥ रघुवंशम् १.७० ॥ |
| तयेरितः प्राणसमः सुमुख्या गिरं परीहासरसोक्तिरां सः । भूलोकसारः स्मितवाक् तुषारभानुं भणिष्यन्सुभगां बभाण ॥ नैषधीयचरितम् २२.१०७ ॥ |
| तयोः समापत्तिषु कातराणि किंचिंद्व्यवस्थापितसंहृतानि । ह्रीयन्त्रणां तत्क्षणमन्वभूवन्नन्योन्यलोलानि विलोचनानि॥ कुमारसंभवम् ७.७५॥ |

| |
|---|
| तयोरपाङ्ग-प्रतिसारितानि क्रियासमापत्तिवर्तितानि । ह्रीयन्त्रणामनशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ॥ रघुवंशम् ७.२३ ॥ |
| तयोरिदं सत्सुरतोत्सवाश्रयं नयप्रचारं व्यवहारदुष्टताम् । खलस्वभावं भवितव्यतां तथा चकार सर्वं किल शूद्रको नृपः ॥ (मृच्छकटिकम् १.७) |
| तयोरुपान्तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः । बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥ रघुवंशम् ३.५७ ॥ |
| तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी । तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ रघुवंशम् १.५७ ॥ |
| तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु । प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखान्यभूवन् ॥ रघुवंशम् १४.२५ ॥ |
| तरङ्गिणी भूमिभृतः प्रभूता जानामि शृङ्गाररसस्य सेयम् । लावण्यपूरोऽजनि यौवनेन यस्यां तथोच्चैस्तनता घनेन ॥ नैषधीयचरितम् ७.११ ॥ |
| तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गरेखा बिभरांबभूव यः । दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसंचयश्च यः ॥ नैषधीयचरितम् १.११२ ॥ |
| तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रं । परितो दुरितानि यः पुनीते शिव तस्मै पवनात्मने नमस्ते ॥ किरातार्जुनीयम् १८.३७ ॥ |
| तरुणजनसहायश्चिन्त्यतां वेशवासो विगणय गणिका त्वं मार्गजाता लतेव। वहसि हि धनहार्यं पण्यभूतं शरीरं सममुपचर भद्रे! सुप्रियं वाप्रियं वा॥ (मृच्छकटिकम् १.३१) |
| तरुणतातरणिद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा । अनलसंगतितापमुपैतु नो कुसुमचापकुलाअलविलासजम् ॥ नैषधीयचरितम् ४.७ ॥ |
| तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम् । तरुणीमपि जुष्णुरेव तां धनदापत्यतपः फलस्तनीम् ॥ नैषधीयचरितम् २.३७ ॥ |
| तर्का रदा यद्वदनस्य तर्क्या वादेऽस्य शक्तिः क्व तथाऽन्यथा तैः । पत्त्रं क्व दातुं गुणशालिपूगं क्व वादतः खण्डयितुं प्रभुत्वम् ॥ नैषधीयचरितम् १०.८३ ॥ |
| तलं यथेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः । भैमीं स लब्धामिव तत्र मेने कः प्राप भूभृद्भवितुं पुरस्तात् ॥ नैषधीयचरितम् १०.५ ॥ |
| तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः । ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मं ॥ शिशुपालवधम् ७.५४ ॥ |
| तव दुग्धाब्धि-संभूतेः कथं जाता कलङ्किता । कवीनां समयाद्विद्या-विरुद्धोऽदोषतां गतः ॥ चन्द्रालोकः२.४३ ॥ |
| तव धन्यतेयमपि सर्वनृपतितुलितोऽपि यत्क्षणं । क्लान्तकरतलधृताचलकः पृथिवीतले तुलितभूभृदुच्यसे ॥ शिशुपालवधम् १५.३० ॥ |
| तव धर्मराज इति नाम कथमिदमपष्ठु पठ्यते । भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः ॥ शिशुपालवधम् १५.१७ ॥ |
| तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया । असमाप्य विलासमेखलां किमिदं किंनरकण्ठि सुप्यते ॥ रघुवंशम् ८.६४ ॥ |
| तव प्रवेशे सुकृतानि हेतुर्मन्ये मदक्ष्णोरपि तावदत्र । न लक्षितो रक्षिभटैर्यदाभ्यां पीतोऽसि तन्वा जितपुष्पधन्वा ॥ नैषधीयचरितम् ८.२७ ॥ |
| तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा । कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥ कुमारसंभवम् ३.१०॥ |
| तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः । प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ रघुवंशम् १.६१ ॥ |
| तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः । इयमृद्धधना वृथावनी स्ववनी संप्रवदत्पिकापि ॥ नैषधीयचरितम् २.४५ ॥ |
| तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः । अयि साधय साधयेप्सितं स्मरणीयाः समये वयं वयः ॥ नैषधीयचरितम् २.६२ ॥ |
| तव संमितिमेव केवलामधिगन्तुं धिगिदं निवेदितम् । ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ॥ नैषधीयचरितम् २.४८ ॥ |
| तव सपदि समीपमानये तामहमिति तस्य मयाग्रतोऽभ्यधायि । अतिरभसाकृतालघुप्रतिज्ञामनृतगिरं गुणगौरि मा कृथा मां ॥ शिशुपालवधम् ७.७ ॥ |
| तव सा कथासु परिघट्टयति श्रवणं यदङ्गुलिमुखेन मुहुः । घनतां ध्रुवं नयति तेन भवद्गुणपूगपूरितमतृप्ततया ॥ शिशुपालवधम् ९.६४ ॥ |
| तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् । ऊर्ध्वाङ्कुरप्रोतमुखं कथंचित्क्लेशदपक्रामति शङ्खयूथम् ॥ रघुवंशम् १३.१३ ॥ |
| तवाधराय स्पृहयामि यन्मधुस्रवैः श्रवःसाक्षिकमाक्षिका गिरः । अधित्यकासु स्तनयोस्तनोतु ते ममेन्दुलेखाभ्युदयाद्भुतं नखः ॥ नैषधीयचरितम् ९.११७ ॥ |
| तवानने जातचरीं निपीय गीतिं तदाकर्णनलोलुपोऽयम् । हातुं नु जातु स्पृहयत्यवैमि विधुं मृगस्त्वद्वदनभ्रमेण ॥ नैषधीयचरितम् २२.१०८ ॥ |
| तवापि हाहा विरहात्क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते । चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटीतेक्षणा मम ॥ नैषधीयचरितम् १.१४१ ॥ |
| तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे । अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्माम् ॥ रघुवंशम् ५.११ ॥ |
| तवास्मि मां घातुकमप्युपेक्षसे मृषामरं हाऽमरगौरवात्स्मरम् । अवेहि चण्डालमनङ्गमङ्ग तं स्वकाण्डकारस्य मधोः सखा हि सः ॥ नैषधीयचरितम् ९.१५१ ॥ |
| तवेत्ययोगस्मरपावकोऽपि मे कदर्थनात्यर्थतयांगमद्दयाम् । प्रकाशमुन्माद्य यदद्य कारयन्मयात्मनस्त्वामनुकम्पते स्म सः ॥ नैषधीयचरितम् ९.१३३ ॥ |
| तवेन्दुकीर्तिः श्वशुरः सखा मे सतां भवोच्छेदकरः पिता ते । धुरि स्थिता त्वं पतिदेवतानां किं तन्न येनासि ममानुकम्प्या ॥ रघुवंशम् १४.७४ ॥ |
| तवोत्तरीयं करिचर्म साङ्गजं ज्वलन्मणिः सारशनं महानहिः । स्रगास्यपङ्क्तिः शवभस्म चन्दनं कला हिमांशोश्च समं चकासति ॥ किरातार्जुनीयम् १८.३२ ॥ |
| तवोपवाराणसि नामचिह्नं वासाय पारेसि पुरं पुरास्ति । निर्वातुमिच्छोरपि तत्र भैमीसंभोगसंकोचभियाधिकाशि ॥ नैषधीयचरितम् १४.७५ ॥ |
| तस्थेमुहूर्त हरिणीविलोचनैः सदृशि दृष्ट्वा नयनानि योषितां । त्वाथ सत्रासमनेकविभ्रमक्रियाविकाराणि मृगैः पलाय्यत ॥ शिशुपालवधम् १२.३० ॥ |
| तस्मात्पुरःसरविभीषणदर्शितेन सेवाविचक्षणहरीश्वरदत्तहस्तः । यानादवातरददूरमहीतलेन मार्गेण भङ्गिरचितस्फटिकेन रामः ॥ रघुवंशम् १३.६९ ॥ |

| |
|---|
| तस्मात्प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन। पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम्॥ कुमारसंभवम् ७.१२॥ |
| तस्मात्समुद्रादिव मथ्यमानादुद्वृत्तनक्रात्सहसोन्ममज्ज । लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजंगराजः ॥ रघुवंशम् १६.७९ ॥ |
| तस्माददृश्यादपि नातिबिभ्युस्तच्छायरूपाहितमोहलोलाः । मन्यन्त एवादृतमन्मथाज्ञाः प्राणानपि स्वान्सुदृशस्तृणानि ॥ नैषधीयचरितम् ६.३२ ॥ |
| तस्मादधः किंचिदिवावतीर्णावसंस्पृशन्तौ तपनीयपीठं । सालक्तकौ भूपतयः प्रसिद्धैर्ववन्दिरे मौलिभिरस्य पादौ ॥ रघुवंशम् १८.४१ ॥ |
| तस्मादनन्तमजरं परमं विकासि तच्चित! चिन्तय किमेभिरसद्विकल्पैः । यस्यानुषङ्गिण इमे भुवनाधिपत्य- भोगादयः कृपणलोकमता भवन्ति ॥ पुरुषार्थोपदेशः-92॥ |
| तस्मादनन्तमजरं परमं विकासि तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः। यस्यानुषङ्गिण इमे भुवनाधिपत्य-भोगादयः कृपण-लोक-मता भवन्ति॥॥ वैराग्यशतकम् ७० ॥ |
| तस्मादिमां नरपतेरपनीय तन्वीं राजन्यमन्यमथ जन्यजनः स निन्ये । स्त्रीभावधावितपदामविमृश्य याच्ञामर्थी निवर्त्य विधनादिव वित्तवित्तम् ॥ नैषधीयचरितम् ११.६५ ॥ |
| तस्मादियं क्षितिपतिक्रमगम्यमानमध्वानमैक्षत नृपादवतारिताक्षी । तद्भावबोधबुधतां निजचेष्टयैव व्याचक्षते स्म शिबिकानयने नियुक्ताः ॥ नैषधीयचरितम् ११.११२ ॥ |
| तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् । गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ मेघदूतम्, पूर्वमेघः ५०॥ |
| तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि । इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥ रघुवंशम् १.७२ ॥ |
| तस्मिन् गते विजयिनं परिरभ्य रामं स्नेहादमन्यत पिता पुनरेव जातम् । तस्याभवत्क्षणशुचः परितोषलाभः कक्षाग्निलङ्घिततरोरिव वृष्टिपातः ॥ रघुवंशम् ११.९२ ॥ |
| तस्मिन्काले जलद दयिता लब्धनिद्रा यदि स्यादन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथं चित्सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ मेघदूतम्, उत्तरमेघः ३१ ॥ |
| तस्मिन्काले नयनसलिलं योषितां खण्डितानां शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु । प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ मेघदूतम्, पूर्वमेघः ३९॥ |
| तस्मिन्काले स्थापयेत्तत्पुरस्ताद्वस्त्रं शस्त्रं पुस्तकं लेखनीं च । स्वर्णं रौप्यं यच्च गृह्णाति बालस्तैराजीवैस्तस्य वृत्तिः प्रदिष्टा ॥ मुहूर्त.संस्कारप्रकरणम् २२॥ |
| तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् । अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥ रघुवंशम् २.६० ॥ |
| तस्मिन्गते द्यां सुकृतोपलब्धां तत्संभवं शङ्खणमर्णवान्ता । उत्खातशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ॥ रघुवंशम् १८.२२ ॥ |
| तस्मिन्गुणैरपि भृते गणनादरिद्रैस्तन्वी न सा हृदयबन्धमवाप भूपे । दैवे निरुन्धति निबन्धनतां वहन्ति हन्त प्रयासपरुषाणि न पौरुषाणि ॥ नैषधीयचरितम् ११.५५ ॥ |
| तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः । आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥ मेघदूतम्, पूर्वमेघः २॥ |
| तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के । बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ॥ रघुवंशम् ६.३६ ॥ |
| तस्मिन्नलोऽसाविति सान्वरज्यत्क्षणं क्षणं क्वेह स इत्युदास्त । पुनः स्म तस्यां वलतेऽस्य चित्तं दूत्यादनेनाथ पुनर्न्यवर्ति ॥ नैषधीयचरितम् ८.५ ॥ |
| तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् । अभिजग्मुर्निदाघार्तार्श्छायावृक्षमिवाध्वगाः ॥ रघुवंशम् १०.५ ॥ |
| तस्मिन्नियं सेति सखीसमाजे नलस्य संदेहमथ व्युदस्यन् । अपृष्ट एव स्फुटमाचचक्षे स कोऽपि रूपातिशयः स्वयं ताम् ॥ नैषधीयचरितम् ६.७३ ॥ |
| तस्मिन्नेतेन यूना सह विहर पयःकेलिवेलासु बाले नालेनास्तु त्वदक्षिप्रतिफलनभिदा तत्र नीलोत्पलानाम् । तत्पाथोदेवतानां विशतु तव तनुच्छायमेवाधिकारे तत्फुल्लाम्भोजराज्ये भवतु च भवदीयाननस्याभिषेकः ॥ नैषधीयचरितम् १२.१०३ ॥ |
| तस्मिन्प्रयाते परलोकयात्रां जेतर्यरीणां तनयं तदीयं । उच्चैःशिरस्त्वाज्जितपारियात्रं लक्ष्मीः सिषेवे किल पारियात्रं ॥ रघुवंशम् १८.१६ ॥ |
| तस्मिन्मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात । प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥ कुमारसंभवम् ३.१॥ |
| तस्मिन्मलिम्लुच इव स्मरकेलिजन्मघर्मोदबिन्दुमययौक्तिकमण्डनं ते । जालैर्मिलन्दधिमहोदधिपूरलोलकल्लोलचामरमरुत्तरुणि छिनत्तु ॥ नैषधीयचरितम् ११.५३ ॥ |
| तस्मिन्मुहूर्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम् । प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि॥ कुमारसंभवम् ७.५६॥ |
| तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती । संकल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥ कुमारसंभवम् ३.२४॥ |
| तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये । निपेतुरन्तःकरणैर्नरेन्द्रा देहैः स्थिताः केवलमासनेषु ॥ रघुवंशम् ६.११ ॥ |
| तस्मिन्विमृश्यैव वृते हृदैषा मैन्द्री दया मामनुतापिकाभूत् । निर्वातुकामं भवसंभवानां धीरं सुखानामवधीरणेव ॥ नैषधीयचरितम् ६.९६ ॥ |
| तस्मिन्विषज्याऋधपथात्तपातं तदङ्गरागच्छुरितं निरीक्ष्य । विस्मेरतामापुरविस्मरन्त्यः क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ॥ नैषधीयचरितम् ६.४२ ॥ |
| तस्मिन्समावेशितचित्तवृत्तिमिन्दुप्रभामिन्दुप्रभामिन्दुमतीमवेक्ष्य । प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनन्दा ॥ रघुवंशम् ६.७० ॥ |
| तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् । अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥ कुमारसंभवम् ३.१९॥ |
| तस्मिन्ह्रदः संहितमात्र एव क्षोभात्समाविद्धतरङ्गहस्तः । रोधांस्यभिघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास ॥ रघुवंशम् १६.७८ ॥ |

| |
|---|
| तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः । भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः ॥ रघुवंशम् १०.३५ ॥ |
| तस्मै जयाशीः ससृजे पुरस्तात्सप्तर्षिभिस्तान्स्मितपूर्वमाह । विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्ववृता मयेति॥ कुमारसंभवम् ७.४७॥ |
| तस्मै विष्ज्योत्तरकोसलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वं । मृगैरजर्यं जरस्पोदैष्टमदेहबन्धाय पुनर्बबन्ध ॥ रघुवंशम् १८.७ ॥ |
| तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् । प्रवेशयामास च भर्तुरेनां भ्रक्षेपमात्रानुमतप्रवेशाम् ॥ कुमारसंभवम् ३.६० ॥ |
| तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः । अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ रघुवंशम् १.५५ ॥ |
| तस्मै हि भारोद्धरणे समर्थं प्रदास्यता बाहुं इव प्रतापं । चिरं विषेहेऽभिभवस्तदानीं स कारणानामपि कारणेन ॥ किरातार्जुनीयम् १७.१४ ॥ |
| तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व । योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥ कुमारसंभवम् ३.१६॥ |
| तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालकं । आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः ॥ रघुवंशम् ८.६८ ॥ |
| तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान् वचनमग्रजन्मनः । उच्चचाल वलभितसखो वशी सैन्यरेणुमुषितार्कदीधितिः ॥ रघुवंशम् ११.५१ ॥ |
| तस्य चीनसिचयैरपि बद्धा पद्धतिः पदयुगात्कठिनेति । तां प्यधत्त शिरसां खलु माल्यैराजराजिरभितः प्रणमन्ती ॥ नैषधीयचरितम् २१.२ ॥ |
| तस्य जातु मरुतः प्रतीपगा वर्त्मसु ध्वजतरुप्रमाथिनः । चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीम् ॥ रघुवंशम् ११.५८ ॥ |
| तस्य तापनभिया तपनः स्वं तावदेव समकोचयदर्चिः । यावदेव दिवसेन शशीव द्रागतप्यत न तन्महसैव ॥ नैषधीयचरितम् ५.५ ॥ |
| तस्य दाक्षिण्यरुढेन नाम्ना मगधवंशजा । पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ रघुवंशम् १.३१ ॥ |
| तस्य द्विपानां मदवारिसेकात्खुराभिघाताच्च तुरंगमाणां । रेणुः प्रपेदे पथि पङ्कभावं पङ्कोऽपि रेणुत्वमियाय नेतुः ॥ रघुवंशम् १६.३० ॥ |
| तस्य निर्दयरतिश्रमालसाः कण्ठसूत्रमपदिश्ययोषितः । अध्यशेरत बृहद् भुजान्तरं पीवरस्तनविलुप्तचन्दनं ॥ रघुवंशम् १९.३२ ॥ |
| तस्य पाण्डुवदनाल्पभूषणा सावलम्बगमना मृदुस्वना । यक्ष्मणापि परिहानिराययौ कामयानसमवस्थया तुलां ॥ रघुवंशम् १९.५० ॥ |
| तस्य प्रभानिर्जितपुष्प-रागं पौष्यं तिथौ पुष्यमसूत पत्नी । यस्मिन्नपुष्यन्नुदिते समग्रां पुष्टिं जनाः पुष्य इव द्वितीये ॥ रघुवंशम् १८.३२ ॥ |
| तस्य प्रयातस्य वरूथिनीनां पीडां अपर्याप्तवतीव सोढुं । वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन ॥ रघुवंशम् १६.२८ ॥ |
| तस्य प्रसह्य हृदयं किल शोकशङ्कुः प्लक्षप्ररोह इव सौधतलं बिभेद ।प्राणान्तहेतुमपि तं भिषजां असाध्यं लाभं प्रियानुगमने त्वरया स मेने ॥ रघुवंशम् ८.९३ ॥ |
| तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः । अभियुक्तं त्वयैनं गन्तारस्त्वामतः पते ॥ शिशुपालवधम्  २.१०१ ॥ |
| तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः । स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया ॥ रघुवंशम् ११.३८ ॥ |
| तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च । फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ रघुवंशम् १.२० ॥ |
| तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रियाः । कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि ॥ शिशुपालवधम् १४.१९ ॥ |
| तस्य सावरणदृष्टसंधयः काम्यवस्तुषु नवेषु सङ्गिनः । वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः समागमाः ॥ रघुवंशम् १९.१६ ॥ |
| तस्य स्तनप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् । आविर्बभूव कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृष्नसारम् ॥ रघुवंशम् ८.५५ ॥ |
| तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो- रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ । मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥ मेघदूतम्, पूर्वमेघः ३॥ |
| तस्यः स रक्षार्थमनल्पयोधं आदिष्य पित्र्यं सचिवं कुमारः । प्रत्यग्रहीत्पार्थिववाहिनीं तां ज्योतीरथां शोण इवोत्तरङ्गः ॥ रघुवंशम् ७.३६ ॥ |
| तस्या हृदि व्रीडमनोभवाभ्यां दोलाविलासं समवाप्यमाने । स्थितं धृतैणाङ्ककुलातपत्रे शृङ्गारमालिङ्गदधीश्वरश्रीः ॥ नैषधीयचरितम् १४.२७ ॥ |
| तस्यां मनोबन्धविमोचनस्य कृतस्य तत्कालमिव प्रचेताः । पाशं दधानः करबद्धवासं विभुर्बभावाप्यमवाप्य देहम् ॥ नैषधीयचरितम् १४.६७ ॥ |
| तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् । वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद ॥ रघुवंशम् ६.६८ ॥ |
| तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः। उमातनौ गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहम्॥ कुमारसंभवम् ७.७६॥ |
| तस्याः किं चित्करधृतमिव प्राप्तवानीरशाखं हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् । प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि ज्ञातास्वादः पुलिनजघनां को विहातुं समर्थः ॥ मेघदूतम्, पूर्वमेघः ४१॥ |
| तस्याः खुरन्या सपवित्रपांसुमपांसुलानां धुरि कीर्तनीया । मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥ रघुवंशम् २.२ ॥ |
| तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः । संसर्पन्त्या सपदि भवतः स्रोतसि च्छायया सा स्यादस्थानोपनतयमुनासंगमेवाभिरामा ॥ मेघदूतम्, पूर्वमेघः ५१॥ |
| तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः । हस्ताद्भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि ॥ अभिज्ञानशाकुन्तलम् ३.२५ ॥ |

| |
|---|
| तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव । शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥ रघुवंशम् ६.४४ ॥ |
| तस्याः प्रतिद्वन्द्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे । निश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ॥ रघुवंशम् ७.६८ ॥ |
| तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य । प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥ रघुवंशम् २.६८ ॥ |
| तस्याः प्रियं चित्तमुपेतमेव प्रभूबभूवाक्षि न तु प्रयातुम् । सत्यः कृतः स्पष्टमभूत्तदानीं तयाक्ष्णि लज्जेति जनप्रवादः ॥ नैषधीयचरितम् १४.२९ ॥ |
| तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं प्रविश्य । यथार्हमन्यैरनुजीविलोकं संभावयामास गृहैस्तदीयैः ॥ रघुवंशम् १६.४० ॥ |
| तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य । व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥ कुमारसंभवम् ३.६१ ॥ |
| तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते । इत्युक्ते क्व तद् इत्युदीर्य सहसा तत्सम्प्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्यापि तद् विस्मृतम् ॥ अमरुशतकम्-२२॥ |
| तस्याः सुजातोत्पलपत्त्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य । न चक्षुषोः कान्तिविशेषबुद्ध्या कालाञ्जनं मङ्गलमित्युपात्तम्॥ कुमारसंभवम् ७.२०॥ |
| तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य । दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगन्तान्गन्धोदग्रं तदनौ ववृषुः पुष्पं आश्चर्यमेघाः ॥ रघुवंशम् १६.८७ ॥ |
| तस्यातसीसूनसमानभासो भ्राम्यन्मयूखावलिमण्डलेन । चक्रेण रेजे यमुनाजलौघः स्फुरन्महावर्त इवैकबाहुः ॥ शिशुपालवधम्  ३.१६ ॥ |
| तस्यातियत्नादतिरिच्यमाने पराक्रमेऽन्योन्यविशेषणेन । हन्ता पुरां भूरि पृषत्कवर्षं निरास नैदाघ इवाम्बु मेघः ॥ किरातार्जुनीयम् १७.३२ ॥ |
| तस्यानलौजास्तनयस्तदन्ते वंशश्रियं प्राप नलाभिधानः । यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः ॥ रघुवंशम् १८.५ ॥ |
| तस्यानुमेने भगवान्विमन्युर्व्यापारमात्मन्यपि सायकानाम्। कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति॥ कुमारसंभवम् ७.९३॥ |
| तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी । येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम् ॥ रघुवंशम् ६.४१ ॥ |
| तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः । त्यक्ष्यामि वैदेहसुतां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव ॥ रघुवंशम् १४.३९ ॥ |
| तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः । त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि ॥ रघुवंशम् ८.५८ ॥ |
| तस्याभवत्सूनुरुदारशीलः शिलः शिलापट्टविशालवक्षाः । जितारिपक्षोऽपि शिलीमुखैर्यः शालीनतामव्रजदीड्यमानः ॥ रघुवंशम् १८.१७ ॥ |
| तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः । विलम्बितफलैः कालं स निनाय मनोरथैः ॥ रघुवंशम् १.३३ ॥ |
| तस्यायमन्तर्हितसौधभाजः प्रसक्तसंगीतमृदङ्गघोषः । वियद्गतः पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ॥ रघुवंशम् १३.४० ॥ |
| तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण । उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥ रघुवंशम् २.३९ ॥ |
| तस्यावदानैः समरे सहसा रोमहर्षिभिः । सुरैरशंसि व्योमस्थैः सह सारो महर्षिभिः ॥ शिशुपालवधम् १९.१९ ॥ |
| तस्यावसाने हरिदश्वधामा पित्र्यं प्रपेदे पदमश्विरूपः । वेलातटेषूषितसैनिकाश्वं पुराविदो यं ध्युषिताश्वमाहुः ॥ रघुवंशम् १८.२३ ॥ |
| तस्यास्तथाविधनरेन्द्रविपत्तिशोकादुष्णैर्विलोचनजलैः प्रथमाभितप्तः । निर्वापितः कनककुम्भमुखोज्झितेन वंशाभिषेकविधिना शिशिरेण गर्भः ॥ रघुवंशम् १९.५६ ॥ |
| तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्- जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः । अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥ मेघदूतम्, पूर्वमेघः २०॥ |
| तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य । निर्वापयिष्यन्निव रोषतप्तं प्रस्नापयामास मुखं निदाघः ॥ किरातार्जुनीयम् १७.८ ॥ |
| तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः । आलोकयिष्यन्मुदितामयोध्यां प्रासादमभ्रंलिहमारुरोह ॥ रघुवंशम् १४.२९ ॥ |
| तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षणमात्रशान्ता । वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ॥ रघुवंशम् ५.४७ ॥ |
| तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य । अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥ नैषधीयचरितम् ३.४७ ॥ |
| तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुगूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् । या वः काले वहति सलिलोद्गारमुच्चैर्विमाना मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ मेघदूतम्, पूर्वमेघः ६३॥ |
| तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः । विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥ रघुवंशम् १०.७४ ॥ |
| तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः। स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः॥ कुमारसंभवम् ७.५१॥ |
| तस्योपकार्यारचितोपकारा वन्येतरा जानपदोपदाभिः । मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ॥ रघुवंशम् ५.४१ ॥ |
| तस्योल्लसत्काञ्चनकुण्डलाग्रप्रत्युप्तगारुत्मतरत्नभासा । अवाप बाल्योचितनीलकण्ठपिच्छावचूडाकलनामिवोरः ॥ शिशुपालवधम्  ३.५ ॥ |
| तस्य् ऽ आधिकारपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् । मेने यथा तत्र जनः समेतो बाल्यात्परामिव दशां मदनोऽध्युवास ॥ रघुवंशम् ५.६३ ॥ |
| ता इङ्गुदीस्नेहकृतप्रदीपं आस्तीर्णमेध्याजिनतल्पमन्तः । तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः ॥ रघुवंशम् १४.८१ ॥ |

| |
|---|
| ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थताम् । सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोग्संनिभः ॥ रघुवंशम् ११.५६ ॥ |
| ता राघवं दृष्टिभिरापिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि । तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥ रघुवंशम् ७.१२ ॥ |
| तां एकभार्यां परिवादभीरोः साध्वीं अपि त्यक्तवतो नृपस्य । वक्षस्यसंघट्टसुखं वसन्ती रेजे सपत्नीरहितेव लक्ष्मीः ॥ रघुवंशम् १४.८६ ॥ |
| तां कस्यां चिद्भवनवलभौ सुप्तपारावतायां नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः । दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ मेघदूतम्, पूर्वमेघः ३८॥ |
| तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः । मनोरथः सिद्धिमिव क्षणेन रथस्तदीयः पुरमाससाद ॥ नैषधीयचरितम् ६.४ ॥ |
| तां चावश्यं दिवसगणनातत्परामेकपत्नी- मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् । आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥ मेघदूतम्, पूर्वमेघः १०॥ |
| तां जानीयाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् गाढोत्कण्ठागुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ मेघदूतम्, उत्तरमेघः १७ ॥ |
| तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना । विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥ रघुवंशम् १३.५ ॥ |
| तां दूर्वया श्यामलयातिवेलं शृङ्गारभाषंनिभया सुशोभाम् । मालां प्रसूनायुधपाशभासं कण्ठेन भूभृद्बिभरांबभूव ॥ नैषधीयचरितम् १४.४९ ॥ |
| तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः । बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥ रघुवंशम् २.१६ ॥ |
| तां देवतामिव मुखेन्दुवसत्प्रसादामक्ष्णा रसादनिमिषेण निभालयन्तीम् । लाभाय चेतसि धृतस्य वरस्य भीमभूमीन्द्रजा तदनु राजसभां बभाज ॥ नैषधीयचरितम् ११.१ ॥ |
| तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः । याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ रघुवंशम् १.८६ ॥ |
| तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः। भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः॥ कुमारसंभवम् ७.१३॥ |
| तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः । प्रवालोशोभा इव पादपानां शृङ्गारचेष्ट विविधा बभूवुः ॥ रघुवंशम् ६.१२ ॥ |
| तां भारती पुनरभाषत नन्वमुष्मिन्काश्मीरपङ्कनिभलग्नजनानुरागे । श्रीखण्डलेपमयदिग्जयकीर्तिराजिराजद्भुजे भज महीभुजि भैमि भावम् ॥ नैषधीयचरितम् ११.७२ ॥ |
| तां मत्स्यलाञ्छनदराञ्छितचापभासा नीराजितभ्रुवमभाषत भाषितेशा । व्रीडाजडे किमपि सूचय चेतसा चेत्क्रीडारसं वहसि गौडविडौजसीह ॥ नैषधीयचरितम् ११.९६ ॥ |
| तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम् । वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः॥ कुमारसंभवम् ७.९॥ |
| तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् । जितेन्द्रिये शूलिनि पुष्पचापः खेकार्यसिद्धिं पुनराशशंसे ॥ कुमारसंभवम् ३.५७॥ |
| तां शिल्पिसंघाः प्रभुणा नियुक्तास्तथागतां संभृतसाधनत्वात् । पुरं नवीचक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्वीं ॥ रघुवंशम् १६.३८ ॥ |
| तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय । समीरणोत्थेव तरङ्गलेखा पद्मान्तरं मानसराजहंसीम् ॥ रघुवंशम् ६.२६ ॥ |
| ताः पूर्वं सचकितमागमय्य गाधं कृत्वाथो मृदु पदमन्तराविशन्त्यः । कामिन्यो मन इव कामिनः सरागैरङ्गैस्तज्जलमनुरञ्जयांबभूः ॥ शिशुपालवधम् ८.१८ ॥ |
| ताः स्वमङ्कमधिरोप्य दोलया प्रेङ्खयन्परिजनापविद्धया । मुक्तरज्जु निबिडं भयच्छलात्कण्ठबन्धनमवाप बाहुभिः ॥ रघुवंशम् १९.४४ ॥ |
| तात नोदधिविलोडनं प्रति त्वद्विनाथ वयमुत्सहामहे । यः सुरैरिति सुरौघवल्लभो बल्लवैश्च जगदे जगत्पतिः ॥ शिशुपालवधम् १४.८३ ॥ |
| तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः । व्योमव्यापिविपक्षराजकयशस्ताराः पराभावुकः कासामस्य न स प्रतापतपनः पारं गिरां गाहते ॥ नैषधीयचरितम् १२.११ ॥ |
| तानसौ कुशलसूनृतसेकैस्तर्पितानथ पितेव विसृज्य । अस्त्रशस्त्रखुरलीषु विनिन्ये शैष्यकोपनमितानमितौजाः ॥ नैषधीयचरितम् २१.५ ॥ |
| तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव । अर्थोष्मणा विरहितः पुरुषः स एव अन्यः क्षणेन भवतीति विचित्रमेतत् ॥ नीतिसंग्रहस्य मित्र-१.१२३ ॥ |
| तानीन्द्रियाण्यविकलानि तदेव नाम, सा बुद्धिरप्रतिहता वचनं तदेव । अर्थोष्मणा विरहितः पुरुषः क्षणेन, सोऽप्यन्य भवतीति विचित्रमेतत् ॥ नीतिशतकम्४० ॥ |
| तानीव गत्वा पितृलोकमेनमरञ्जयन्यानि स जामदग्न्यः । छित्त्वा शिरोस्त्राणि सहस्रबाहोर्विस्राणि विश्राणितवान्पितृभ्यः ॥ नैषधीयचरितम् २२.५ ॥ |
| तान् कल्पना- गत-कला सकला व्रजन्ति, भावा गुणेन सहिता अपि तान्नु यन्ति । दासोपमा नव रसा अपि तान् भवन्ति, सर्वं विहाय भवतीं भुवि ये यजन्ति ॥ प्रतापविजयः-४ ॥ |
| तान्भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य । एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिव प्रपेदे ॥ किरातार्जुनीयम् ३.३५ ॥ |
| तान्हत्वा गजकुलबद्धतीव्रवैरान्काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् । आत्मानं रणकृतकर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त ॥ रघुवंशम् ८.६५ ॥ |
| तापसोऽपि विभुतामुपेयिवानास्पदं त्वमसि सर्वसम्पदां । दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ॥ किरातार्जुनीयम् १३.३९ ॥ |
| ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसम्भवः । सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥ रघुवंशम् १०.५९ ॥ |
| ताभिर्दृश्यत एष यान्पथि महाज्यैष्ठीमहे मन्महे यदृग्भिः पुरुषोत्तमः परिचितः प्राग्मञ्चमञ्चन्कृतः । सा स्त्रीराट् पतयालुभिः शितिसितैः स्यादस्य दृक्चामरैः सस्ने माघमघातिघातियमुनागङ्गौघयोगे यया ॥ नैषधीयचरितम् १५.९५ ॥ |

| |
|---|
| ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः । मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥ रघुवंशम् १०.६५ ॥ |
| ताभ्यामभूद्युगपदप्यभिधीयमानं भेदव्यपाकृति मिथः प्रतिघातमेव । श्रोत्रे तु तस्य पवतुर्नृपतेर्न किंचिदभैम्यामनिष्टशतशङ्कितयाकुलस्य ॥ नैषधीयचरितम् ४.११८ ॥ |
| तामग्रतस्तामरसान्तराभां अनूपराजस्य गुणैरनूनां । विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सुदतीं सुनन्दा ॥ रघुवंशम् ६.३७ ॥ |
| तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णान्तराक्रान्तपयोधराग्रां । विलज्जमानां रहसि प्रतीतः प्रप्रच्छ रामां रमणोऽभिलाषं ॥ रघुवंशम् १४.२७ ॥ |
| तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः । क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ रघुवंशम् २.२४ ॥ |
| तामन्वगादशितबिम्बविपाकचञ्चोः स्पष्टं शलाटुपरिणत्युचितच्छदस्य । कीरस्य कापि करवारिरुहे वहन्ती सौन्दर्यपुञ्जमिव पञ्जरमेकमाली ॥ नैषधीयचरितम् २१.१२३ ॥ |
| तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः । निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥ रघुवंशम् १४.७० ॥ |
| तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता । अकारयत्कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम्॥ कुमारसंभवम् ७.२७॥ |
| तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु । निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु ॥ रघुवंशम् १४.८० ॥ |
| तामायुष्मान्मम च वचनादात्मना चोपकर्तुं ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थः अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव ॥ मेघदूतम्, उत्तरमेघः ३५ ॥ |
| तामिङ्गितैरप्यनुमाय मायामयं न भैम्या वियदुत्पपात । तत्पाणिमात्मोपरिपातुकं तु मोघं वितेने प्लुतिलाघवेन ॥ नैषधीयचरितम् ३.५ ॥ |
| तामीक्षमाणः स पुरीं पुरस्तात् प्रापत् प्रतोलीमतुलप्रतापः । वज्रप्रभाक्रान्तसुरायुधश्रीर्या देवसेनेव परैरलङ्घ्या ॥ शिशुपालवधम्  ३.६३ ॥ |
| तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् । कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥ मेघदूतम्, पूर्वमेघः ४७॥ |
| तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् विद्युद्गर्भे निहितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ मेघदूतम्, उत्तरमेघः ३२ ॥ |
| तामेव सा यत्र यगाद भूयः पयोधियादः कुचकुम्भयोस्ते । सेयं स्थिता तावकहृच्छयाङ्कप्रियास्तु विस्तारयशःप्रशस्तिः ॥ नैषधीयचरितम् ६.७ ॥ |
| ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वराद्यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम् । यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥ नैषधीयचरितम् २२.१५५ ॥ |
| ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु । तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ॥ रघुवंशम् ६.६४ ॥ |
| ताम्रोदरेषु पैतं तरुपल्लवेषु निर्धौत हारगुलिकाविशदं हिमाम्भः । आभाति लब्धपरभागतयाधरोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥ रघुवंशम् ५.७० ॥ |
| तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम् । आकण्ठमक्ष्णोर्द्वितयं मधूनि महीभुजः कस्य न भोजयन्तीम् ॥ नैषधीयचरितम् १०.१०७ ॥ |
| ताराक्षरैर्यामसिते कठिन्या निशालिखद्व्योम्नि तमःप्रशस्तिम् । विलुप्य तामल्पयतोऽरुणेऽपि जातः करे पाण्डुरिमा हिमांशोः ॥ नैषधीयचरितम् २२.५४ ॥ |
| ताराततिर्बीजमिवादमादमियं निरष्ठेवि यदस्थियूथम् । तन्निष्कुलाकृत्य रविं त्वगेषा संध्योज्झिता पाकिमदाडिमं वा ॥ नैषधीयचरितम् २२.१५ ॥ |
| तारादौष्ट्येऽब्जे त्रिकोणोच्चगे वा क्षौरं सत्स्यात्सौम्यमित्रस्ववर्गे । सौम्ये भेऽब्जे शोभने दुष्टतारा शस्ता ज्ञेया क्षौरयात्रादिकृत्ये ॥ मुहूर्त.संस्कारप्रकरणम् ३२॥ |
| ताराविहारभुवि चन्द्रमयीं चकार यन्मण्डलीं हिमभुवं मृगनाभिवासम् । तेनैव तन्वि सुकृतेन मते जिनस्य स्वर्लोकलोकतिलकत्वमवाप धाता ॥ नैषधीयचरितम् २२.१३६ ॥ |
| ताराशङ्खविलोपकस्य जलजं तीक्ष्णत्विषो भिन्दतः सारम्भं चलता करेण निबिडां निष्पीडनां लम्भितः । छेदार्थापहृताम्बुकम्बुजरजोजम्बालपाण्डुभवच्छङ्खच्छित्करपत्त्रतामिह वहन्नस्तंगतार्धो विधुः ॥ नैषधीयचरितम् १९.५७ ॥ |
| तारास्थिभूषा शशिजह्नुजाभृच्चन्द्रांशुपांशुच्छुरितद्युतिर्द्यौः । छायापथच्छद्मफणीन्द्रहारा स्वं मूर्तिमाह स्फुटमष्टमूर्तेः ॥ नैषधीयचरितम् २२.१२८ ॥ |
| तारुण्यपुण्यामवलोकयन्त्योरन्योन्यमेणेक्षणयोरभिख्याम् । मध्ये मुहूर्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ॥ नैषधीयचरितम् ६.४ ॥ |
| तालं प्रभु स्याडनुकर्तुमेतावुत्थानसुस्थौ पतितं न तावत् । परं च नाश्रित्य तरुं महान्तं कुचौ कृशाङ्ग्याः स्वत एव तुङ्गौ ॥ नैषधीयचरितम् ७.७४ ॥ |
| तावकापरतनोः सितकेशस्त्वं हली किल स एव च शेषः । साध्वसाववतरस्तव धत्ते तज्जरच्चिकुरनालविलासः ॥ नैषधीयचरितम् २१.८५ ॥ |
| तावके हृदि निपात्य कृतेयं मन्मथेन दृढधैर्यतनुत्रे । कुण्ठनादतितमां कुसुमानां छत्त्रमित्त्रमुखतैव शराणाम् ॥ नैषधीयचरितम् २१.९ ॥ |
| तावकोरसि लसद्वनमाले श्रीफलद्विफलशाखिकयेव । स्थीयते कमलया त्वदजस्रस्पर्शकण्टकितयोत्कुचया च ॥ नैषधीयचरितम् २१.१ ॥ |
| तावत्पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे । प्रासादशृङ्गाणि दिवापि कुर्वञ्ज्योत्स्नाभिषेकद्विगुणद्युतीनि॥ कुमारसंभवम् ७.६३॥ |
| तावत्प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणाङ्कम् । वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ॥ रघुवंशम् ७.४ ॥ |
| तावत्स-शस्त्र-यवनाः परितः प्रचेलुः, राणापनोदकृ युगपत्समस्ताः । सोऽपि क्षणाय विनिमीलित- लोचनोऽभूत्, सूर्यो यथा सजलसज्जलदप्रपञ्चे ॥ प्रतापविजयः-१४९ ॥ |
| तावद्भयस्य भेतव्यं यावद्भयमनागतम् । आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम्  ॥ नीतिसंग्रहस्य मित्र-१.५७ ॥ |

| |
|---|
| तावद्भवस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरुपम् । प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात्पुरशासनस्य॥ कुमारसंभवम् ७.३०॥ |
| तावुभावपि परस्परस्थितौ वर्धमानपरिहीनतेजसौ । पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ॥ रघुवंशम् ११.८२ ॥ |
| तासां च पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे । बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशातह्रदेव॥ कुमारसंभवम् ७.३९॥ |
| तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् । विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्त्राभरणा इवासन् ॥ रघुवंशम् ७.११ ॥ |
| तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् । विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्त्राभरणा इवासन्॥ कुमारसंभवम् ७.६२॥ |
| तासामभासत कुरङ्गदृशां विपञ्ची किंचित्पुरः कलितनिष्कलकाकलीका । भैमीतथामधुरकण्ठलतोपकण्ठे शब्दायितुं प्रथममप्रतिभावतीव ॥ नैषधीयचरितम् २१.१२६ ॥ |
| तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः । सहस्रधात्मा व्यरुचद्विभक्तः पयमुचां पङ्क्तिषु विद्युतेव ॥ रघुवंशम् ६.५ ॥ |
| तिथयो मासशून्याश्च शून्यलग्नानि यान्यपि । मध्यदेशे विवर्ज्यानि न दूष्याणीतरेषु तु ॥ मुहूर्तचिन्त.१८ ॥ |
| तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहो रविः । शिवो दुर्गांतको विश्वे हरिः कामः शिवः शशी ॥ मुहूर्तचिन्त.३ ॥ |
| तिथ्यर्काष्टाष्टिगोरुद्रशक्रे नामाक्षरं त्रयम्  । भूद्व्यब्धोष्वङ्गदिग्वह्निविश्वेषु द्वौ नगाऽब्धयः ॥ मुहूर्त.वास्तुप्रकरणम् ९॥ |
| तिथ्यृक्षवारयुतिरद्रिगजाग्नितष्टा स्थानत्रयेऽत्र वियति प्रथमेऽतिदुःखी । मध्ये धनक्षतिरथो चरमे मृतिः स्यात् स्थानत्रयेऽङ्कयुजि सौख्यजयौ निरुक्तौ ॥ मुहूर्त.यात्राप्रकरणम् २४॥ |
| तिमिरविरहात्पाण्डूयन्ते दिशः कृशतारकाः कमलहसितैः श्येनीवोन्नीयते सरसी न का । शरणमिलितध्वान्तध्वंसिप्रभादरधारणाद्गगनशिखरं नीलत्येकं निजैरयशोभरैः ॥ नैषधीयचरितम् १९.३१ ॥ |
| तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणाम् । सतां हि साधुशीलत्वात्स्वभावो न निवर्तते  ॥ नीतिसंग्रहस्य मित्र-१.८६ ॥ |
| तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना महसां महीयसाम् । बभार वाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानमाधिजैः ॥ शिशुपालवधम्  १.६२ ॥ |
| तिरोवलद्वक्त्रसरोजनालया स्मिते स्मितं यत्खलु यूनि बालया । तया तदीये हृदये निखाय तद्व्यधीयतासंमुखलक्ष्यवेधिता ॥ नैषधीयचरितम् १६.५६ ॥ |
| तिरोहितान्तानि नितान्तमाकुलैरपां विगाहादलकैः प्रसारिभिः । ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥ किरातार्जुनीयम् ८.४७ ॥ |
| तिरोहितेन्दोरथ शम्भुमूर्ध्नः प्रणम्यमानं तपसां निवासैः । सुमेरुशृङ्गादिव बिम्बं आर्कं पिशङ्गमुच्चैरुदियाय तेजः ॥ किरातार्जुनीयम् १६.३१ ॥ |
| तिलकमस्तकहर्म्यकृतास्पदैः कुसुममध्वनुषङ्गसुगन्धिभिः । कलममगीयत भृङ्गविलासिनां स्मरयुतैरयुतैरबलासखैः ॥ रघुवंशम् ८.३६* ॥ |
| तिलकाद्यमिव स्त्रीणां विदग्धहृदयङ्गमम् । व्यतिरिक्तमलङ्कारं प्रकृतेर्भूषणं गिराम् ॥ चन्द्रालोकः४.११ ॥ |
| तिष्ठतां तपसि पुण्यमासजन्सम्पदोऽनुगुणयन्सुखैषिणां । योगिनां परिणमन्विमुक्तये केन नास्तु विनयः सतां प्रियः ॥ किरातार्जुनीयम् १३.४४ ॥ |
| तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतं तुरङ्गैः । नेमीनामसति विवर्तनई रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥ किरातार्जुनीयम् ७.४ ॥ |
| तिष्ठन्तं पयसि पुमांसमंसमात्रे तद्दघ्नं तदवयती किलात्मनोऽपि । अभ्येतुं सुतनुरभीरियेष मौग्ध्यादाश्लेषि द्रुतममुना निमज्जतीति ॥ शिशुपालवधम् ८.२१ ॥ |
| तिष्ठन्तु ते निज-गृहे ललना-विलासाः, ये वारुणी- विषय - वञ्चकतैकदासाः। जन्मनैव खल-कर्म समर्थयन्ति, प्रोच्चैर्बलं शुचि- कुलं च कदर्थयन्ति ॥ प्रतापविजयः-११ ॥ |
| तिस्रस्त्रिलोकी प्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा । तस्मादपावर्तत कुण्डिनेशः पर्वात्यये सोम इवोष्णरश्मेः ॥ रघुवंशम् ७.३३ ॥ |
| तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यं दत्तं निवेशितम् । प्रयुक्तं च विनष्टं च विष्ट्यां पाते न चाप्यते ॥ मुहूर्त.नक्षत्रप्रकरणम्  २४ ॥ |
| तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापयत् । नोपतापि मनः सोष्म वागेका वाग्मिनः सतः ॥ शिशुपालवधम्  २.१०९ ॥ |
| तीक्ष्णाजपादकरवन्हिवसुश्रुतीन्दु- स्वातीमघोत्तरजलान्तकतक्षपुष्ये। मन्दाररिक्तरहिते विवसेऽतिशस्ता धान्यच्छिदा निगदिता स्थिरभं विलग्ने ॥ मुहूर्त.नक्षत्रप्रकरणम् ३१॥ |
| तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानं । श्रोत्रेषु संमूर्छति रक्तमासां गीतानुगं वारिमृदङ्गवाद्यं ॥ रघुवंशम् १६.६४ ॥ |
| तीरान्तराणि मिथुनानि रथाङ्गनाम्नां नीत्वा विलोलितसरोजवनश्रियस्ताः । संरेजिरे सुरसरिज्जलधौतहारास्ताराविताानतरला इव यामवत्यः ॥ किरातार्जुनीयम् ८.५६ ॥ |
| तीर्णः किमर्णोनिधिरेव नैष सुरक्षितेभूदिह यत्प्रवेशः । फलं किमेतस्य तु साहसस्य न तावदद्यापि विनिश्चिनोमि ॥ नैषधीयचरितम् ८.२६ ॥ |
| तीर्त्वा जनेनैव नितान्तदुस्तरां नदीं प्रतिज्ञामिव तां गरीयसीं । शृङ्गैरपस्कीर्णमहत्तटीभुवामशोभतोच्चैर्नदितं ककुद्मतां ॥ शिशुपालवधम् १२.७४ ॥ |
| तीर्थे तदीये गजसेतुबन्धात्प्रतीपगां उत्तरतोऽस्य गङ्गां । अयत्नवालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ॥ रघुवंशम् १६.३३ ॥ |
| तीर्थे तोयव्यतिकरभवे जह्नुकन्यासर्य्वोर्देहत्यागादमरगणनालेख्यमासाद्य सद्यः । पूर्वाकाराधिकतररुचा संगतः कान्तयासौ लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ रघुवंशम् ८.९५ ॥ |
| तीर्थोदकानि समिधः कुसुमानि दर्भान् स्वैरं वनादुपनयन्तु तपोधनानि । धर्मप्रिया नृपसुता न हि धर्मपीडामिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥ (स्वप्नवासवदत्तम् १. ६) |
| तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया । अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया ॥ रघुवंशम् ११.१६ ॥ |
| तीव्राभिपङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् । अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ कुमारसंभवम् ३.७३ ॥ |
| तुङ्गं वेश्म सुताः सतामभिमताः सङ्ख्यातिगाः सम्पदः कल्याणी दयिता वयश्च नवमित्यज्ञान-मूढो जनः। मत्वा विश्वमनश्वरं निविशते संसार-कारा-गृहे संदृश्य क्षण-भङ्गुरं तदखिलं धन्यस्तु सन्न्यस्यति॥॥ वैराग्यशतकम् २० ॥ |

| |
|---|
| तुङ्गप्रासादवासादथ भृशकृशतामायतीं केलिकुल्यामद्राक्षोदर्कबिम्बप्रतिकृतिमणिना भीमजा राजमानाम् । वक्रं वक्रं व्रजन्तीं फणियुवतिरिति त्रस्नुभिर्व्यक्तमुक्तान्योन्यं विद्रुत्य तीरे रथपदमिथुनैः सूचितामर्तिरुत्या ॥ नैषधीयचरितम् २१.१४४ ॥ |
| तुतोष पश्यन्कलमस्य स अधिकं सवारिजे वारिणि रामणीयकम् । सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे ॥ किरातार्जुनीयम् ४.४ ॥ |
| तुरगशताकुलस्य परितं परमेकतुरङ्गजन्मनः प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता । परिचलतो बलानुजबलस्य पुरः सततं धृतश्रिय-श्चिरविगतश्रियो जलनिधेश्च तदाभवदन्तरं महत् ॥ शिशुपालवधम् ३.८१ ॥ |
| तुलयति स्म विलोचनतारकाः कुरबकस्तबकव्यतिषङ्गिणि । गुणवदाश्रयलब्धगुणोदये मालिनिमालिनि माधवयोषिताम् ॥ शिशुपालवधम् ६.४ ॥ |
| तुल्यप्राधान्यमिन्दुत्वमिव वाच्येन साम्यभृत् । कान्ते त्वदाननरुचा म्लानिमेति सरोरुहम् ॥ चन्द्रालोकः८.८ ॥ |
| तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा । योषितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ किरातार्जुनीयम् ९.६१ ॥ |
| तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं सास्य न ताप्यतेऽपि । इत्यभ्यसूयन्निव देहतापं तस्यातनुस्त्वद्विरहाद्विधत्ते ॥ नैषधीयचरितम् ३.१०२ ॥ |
| तुषारनिःशेषितमब्जसर्गं विधातुकामस्य पुनर्विधातुः । पञ्चस्विहास्याङ्घ्रिकरेष्वभिख्याभिक्षाधुना मधुकरीसदृक्षा ॥ नैषधीयचरितम् ७.१०४ ॥ |
| तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः । अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥ किरातार्जुनीयम् ३.३६ ॥ |
| तुहिनांशुममुं सुहृज्जनाः कलयन्त्युष्णकरं विरोधिनः । कृतिभिः कृतदृष्टिविभ्रमाः स्रजमेके भुजगं यथापरे ॥ शिशुपालवधम् १६.६४ ॥ |
| तूर्णं प्रणेत्रा कृतनादमुच्चकैः प्रणोदितं वेसरयुग्ममध्वनि । आत्मीयनेमिक्षतसान्द्रमेदिनीरजश्चयाक्रान्तभयादिवाद्रवत् ॥ शिशुपालवधम् १२.१९ ॥ |
| तूर्णं यावन्नापनिन्ये निषादी वासश्चक्षुर्वारणं वारणस्य । तावत्पूगैरन्यनागाधिरूढः कादम्बानामेकपातैरसीव्यत् ॥ शिशुपालवधम् १८.२९ ॥ |
| तूर्यारावैराहितोत्तालतालैर्गायन्तीभिः काहलं काहलाभिः । नृत्ते चक्षुःशून्यहस्तप्रयोगं काये कूजन्कम्बुरुच्चैर्जहास ॥ शिशुपालवधम् १८.५४ ॥ |
| तूलेन तस्यास्तुलना मृदोस्तत्कम्प्राऽस्तु सा मन्मथबाणवातैः । चित्रीयितं तत्तु नलो यदुच्चैरभूत्स भूभृत्पृथुवेपथुस्तैः ॥ नैषधीयचरितम् १४.५७ ॥ |
| तृणवाञ्छया मुहुरवाञ्चितानननान्निचयेषु यत्र हरिताश्मवेश्मनां । रसनाग्रलग्नकिरणाङ्कुराञ्जनो हरिणान्गृहीतकवलानिवैक्षत ॥ शिशुपालवधम् १३.५६ ॥ |
| तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ नीतिसंग्रहस्य मित्र-१.६० ॥ |
| तृणीकृतास्त्रः स तडित्ततिप्रभः तुरुष्कजान् तुच्छतमान्प्रताडयन् । त्विषामधीशस्तरसाऽथ ताण्डवे, त्रिलोचनस्यानुचराम आबभौ॥ प्रतापविजयः-१२२ ॥ |
| तृषा शुष्यत्यास्ये पिबति सलिलं शीत-मधुरं क्षुधार्तः शाल्यन्नं कवलयति मांसादि-कलितम्। प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं प्रतीकारं व्याधः सुखमिति विपर्यस्यति जनः॥॥ वैराग्यशतकम् १९ ॥ |
| तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् । मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितम् ॥ नीतिशतकम्७८ ॥ |
| ते च प्रापुरुदन्वतं बुबुधे चादिपूरुषः । अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ रघुवंशम् १०.६ ॥ |
| ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः । सामदानविधिभेदविग्रहाः सिद्धिमन्त इव तस्य भूपतेः ॥ रघुवंशम् ११.५५ ॥ |
| ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरैः पुरि लेखितानि । निरीक्ष्य निन्युर्दिवसं निशां च तत्स्वप्नसंभोगकलाविलासैः ॥ नैषधीयचरितम् १०.३५ ॥ |
| ते तां ततोऽपि चकृषुर्जगदेकदीपादंसस्थलस्थितसमानविमानदण्डाः । चण्डद्युतेरुदयिनीमिव चन्द्रलेखां सोत्कण्ठकैरववनीसुकृतप्ररोहाः ॥ नैषधीयचरितम् ११.८१ ॥ |
| ते दशाहं द्वयोः प्रोक्ते कैश्चित्सप्तदिनं परैः । त्र्यहं त्वात्ययिकेऽप्यन्यैरर्द्धाहं च त्र्यहं विधोः ॥ मुहूर्त.संस्कारप्रकरणम् २८॥ |
| ते निन्यिरे नृपतिमन्यमिमाममुष्मादंसावतंसशिबिकांशभृतः पुमांसः । रत्नाकरादिव तुषारमयूखलेखां लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम् ॥ नैषधीयचरितम् ११.५६ ॥ |
| ते पुत्रयोर्नैरृतशस्त्रमार्गानार्द्रानिवाङ्गे सदयं स्पृशन्त्यौ । अपीप्सितं क्षत्रकुलाङ्गनानां न वीरसूशब्दमकामयेतां ॥ रघुवंशम् १४.४ ॥ |
| ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च । मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥ रघुवंशम् १०.८४ ॥ |
| ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः । चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥ रघुवंशम् १०.५७ ॥ |
| ते रेकाध्वजकुलिशातपत्रैचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यम् । प्रस्थानप्रणतिभिरङ्गुलीषु चक्रुर्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ रघुवंशम् ४.८८ ॥ |
| ते सेतुवार्त्तागजबन्धमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवन्ध्यैः । अन्योन्यदेशप्रविभागसीमां वेलां समुद्रा इव न व्यतीयुः ॥ रघुवंशम् १६.२ ॥ |
| ते हरन्तु दुरितव्रततिं मे यैः स कल्पविटपी तव दोर्भिः । छद्मयादवतनोरुदपाटि स्पर्धमान इव दानमदेन ॥ नैषधीयचरितम् २१.७९ ॥ |
| तेजः समाश्रित्य परैरहार्यं निजं महन्मित्रमिवोरुधैर्यं । आसादयन्नस्खलितस्वभावं भीमे भुजालम्बं इवारिदुर्गे ॥ किरातार्जुनीयम् १७.३ ॥ |
| तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे । यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ॥ रघुवंशम् ११.६३ ॥ |
| तेजोनिरोधसमतावहितेन यन्त्रा सम्यक्कशात्रयविचारवाता नियुक्तः । आराट्टजश्चटुलनिष्ठुरपातमुच्चैश्चित्रं चकार पदमर्दपुलायितेन ॥ शिशुपालवधम् ५.१० ॥ |
| तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः । अङ्गुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ॥ रघुवंशम् ११.७० ॥ |

| |
|---|
| तेन जाग्रदधृतिर्दिवमागां संख्यसौख्यमनुसर्तुमनु त्वाम् । यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥ नैषधीयचरितम् ५.३५ ॥ |
| तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः । आचरत्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः ॥ नैषधीयचरितम् ५.१०३ ॥ |
| तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु । शुश्रुवे प्रियजनस्य कातरं विप्रलम्भपरिशङ्किनो वचः ॥ रघुवंशम् १९.१८ ॥ |
| तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः । शान्ते पितर्याहृतपुण्डरीका यं पुण्डरीकाक्षमिवाश्रिता श्रीः ॥ रघुवंशम् १८.८ ॥ |
| तेन भूमिनिहितैककोटि तत्कार्मुकं च बलिनाधिरोपितम् । निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः ॥ रघुवंशम् ११.८१ ॥ |
| तेन व्यातेनिरे भीमा भीमार्जनफलाननाः । न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥ किरातार्जुनीयम् १५.४२ ॥ |
| तेन सूरिरुपकारिताधनः कर्तुं इच्छति न याचितं वृथा । सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभङ्गवेदनां ॥ किरातार्जुनीयम् १३.६० ॥ |
| तेनातपत्रामलमण्डलेन प्रस्थापितः पूर्वनिवासभूमिं । बभौ बलौघः शशिनोदितेन वेलां उदन्वानिव नीयमानः ॥ रघुवंशम् १६.२७ ॥ |
| तेनातिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयानुतेपे । स्वां आपदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्युपकारिपक्षं ॥ किरातार्जुनीयम् १७.४० ॥ |
| तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् । येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम्  ॥ नीतिसंग्रहस्य मित्र-१.१३८ ॥ |
| तेनाभिघातरभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः । निर्भिद्य विग्रहमशोणितलिप्तपुङ्खस्तं पातयां प्रथममास पपात पश्चात् ॥ रघुवंशम् ८.६१ ॥ |
| तेनाम्भसां सारमयः पयोधेर्दध्रे मणिर्दीधितिदीपिताशः । अन्तर्वसन् बिम्बगतस्तदङ्गे साक्षादिवालक्ष्यत यत्र लोकः ॥ शिशुपालवधम्  ३.९ ॥ |
| तेनार्थवांल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् । तेनास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री ॥ रघुवंशम् १४.२३ ॥ |
| तेनावतीर्य तुरगात्प्रथितान्वयेन पृष्टान्वयः स जलकुम्भनिषण्णदेहः । तस्मै द्विजेतरतपस्विसुतं स्खलद्भिरात्मानमक्षरपदैः कथयां बभूव ॥ रघुवंशम् ८.७६ ॥ |
| तेनावरोधप्रमदासखेन विगाहनानेन सरिद्वरां तां । आकाशगङ्गारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः ॥ रघुवंशम् १६.७१ ॥ |
| तेनाष्टौ परिगमिताः समाः कथंचिद्बालत्वादवितथसूनृतेन सूनोः । सादृश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु क्षणिकसमागमत्सवैश्च ॥ रघुवंशम् ८.९२ ॥ |
| तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमाणेन ननन्द यूना । सुवृष्टियोगादिव जीवलोकः सस्येन संपत्तिफलात्मकेन ॥ रघुवंशम् १८.२ ॥ |
| तेभ्यः परान्नः परिकल्पयस्व श्रिया विदूरीकृतकामदेवान् । अस्मिन्समाजे बहुषु भ्रमन्ती भैमी किलास्मासु घटिष्यतेऽसौ ॥ नैषधीयचरितम् १०.४७ ॥ |
| तेषां तदा लब्धुमनीश्वराणां श्रियं निजास्येन नलाननस्य । नालं तरीतुं पुनरुक्तिदोषं बर्हिर्मुखानामनलाननत्वम् ॥ नैषधीयचरितम् १०.२१ ॥ |
| तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा । तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत्तत्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि॥ मेघदूतम्, पूर्वमेघः २४॥ |
| तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन । यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ॥ रघुवंशम् १०.८३ ॥ |
| तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये । रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणां इव पारिजातः ॥ रघुवंशम् ६.६ ॥ |
| तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम् । आशास्तु नासाद्य तनूरुदाराः पूर्वादयः पूर्ववदात्मदाराः ॥ नैषधीयचरितम् ८.६ ॥ |
| तेषु तद्विधवधूवरणार्हं भूषणं स समयः स रथाध्वा । तस्य कुण्डिनपुरं प्रतिसर्पन्भूपतेर्व्यवसितानि शशंसुः ॥ नैषधीयचरितम् ५.६७ ॥ |
| तैः कृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्मचारिणी । साधु दृष्टशुभगर्भलक्षणा प्रत्यपद्यत नराधिपश्रियं ॥ रघुवंशम् १९.५५ ॥ |
| तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत । येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ॥ रघुवंशम् ११.३३ ॥ |
| तैर्वजयन्तीवनराजिराजिभिर्गिरिप्रतिच्छन्दमहामतङ्गजैः । बह्व्यः प्रसर्पज्जनतानानदीशतैर्भुवो बलैरन्तरायामबभूविरे ॥ शिशुपालवधम् १२.२९ ॥ |
| तोरणं बलिनिभं च कुण्डलं सिंहपुच्छगजदन्तमञ्चकः । त्र्यस्रि च त्रिचरणाभमर्दलो वृत्तमञ्चयमलाभमर्दलाः  ॥ मुहूर्त.नक्षत्रप्रकरणम् ६०॥ |
| तोषमेति वितथैः स्तवैः परस्ते च तस्य सुलभाः शरीरिभिः । अस्ति न स्तुतिवचोऽनृतं तव स्तोत्रयोग्यन च तेन तुष्यसि ॥ शिशुपालवधम् १४.३ ॥ |
| तौ दंपती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ । स कारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमोक्षम्॥ कुमारसंभवम् ७.८०॥ |
| तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः । सोऽभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥ रघुवंशम् ८.७८ ॥ |
| तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः । भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः ॥ रघुवंशम् ११.४ ॥ |
| तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशिखण्डकावुभौ । धन्विनौ तमृषिं अन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ॥ रघुवंशम् ११.५ ॥ |
| तौ प्रणामचलकाकपक्षकौ भ्रातरावभृथाप्लुतो मुनिः । आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना ॥ रघुवंशम् ११.३१ ॥ |
| तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः । मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव ॥ रघुवंशम् ११.९ ॥ |
| तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू । मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः ॥ रघुवंशम् ११.३६ ॥ |
| तौ संधिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् । अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम्॥ कुमारसंभवम् ७.९१॥ |
| तौ समेत्य समयस्थितावुभौ भूपती वरुणवासवोपमौ । कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ॥ रघुवंशम् ११.५३ ॥ |

| |
|---|
| तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्रिणः । वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे ॥ रघुवंशम् ११.११ ॥ |
| तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया पथि । निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् ॥ रघुवंशम् ११.१४ ॥ |
| तौ स्नातकैर्बन्धुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तम् । कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां ॥ रघुवंशम् ७.२८ ॥ |
| त्यक्तप्राणं संयुगे हस्तिनीस्था वीक्ष्य प्रेम्णा तत्क्षणादुद्गतासु । प्राप्याखण्डं देवभूयं सतीत्वादाशिश्लेष स्वैव कञ्चित्पुरन्धी ॥ शिशुपालवधम् १८.६१ ॥ |
| त्यक्त्वा रणं नृपवरो न जगाम यावत् काञ्चिद्दशां कविमतिः स्वगिता नु तावत् । वृत्तं कथङ्कथमपि प्रकटं प्रवक्तुं, नाग्रे क्षमा हत-बला वत लेखनीयम् ॥ प्रतापविजयः-१५२॥ |
| त्यक्त्वाष्टभूतशनिविष्टिकुजाञ्जनुर्भ- मासौ मृतौ रविविधू अपि भानिनाड्यः । द्व्यङ्गे चरे तनुलवे शशिजीवतारा शुद्धौ करादितिहरीन्द्रकपे परीक्षा ॥ मुहूर्त.नक्षत्रप्रकरणम् ४३ ॥ |
| त्यजत मानमलं बत बिग्रहैर्न पुनरेति गतं चतुरं वयः । परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ॥ रघुवंशम् ८.४७ ॥ |
| त्यजति कष्टामसावचिरादसून्विरहवेदनयेत्यघशङ्गिभिः । प्रियतया गदितास्त्वयि बान्धवैरवितथा वितथाः सखि मा गिरः ॥ शिशुपालवधम् ६.१८ ॥ |
| त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ नीतिसंग्रहस्य मित्र-१.१४३ ॥ |
| त्यज्यते न जलजेन करस्ते शिक्षितुं सुभगभूयमिवोच्चैः । आननं च नयनायितबिम्बः सेवते कुमुदहासकरांशुः ॥ नैषधीयचरितम् २१.१०१ ॥ |
| त्यागं महेन्द्रादिचतुष्टयस्य किमभ्यनन्दत्क्रमसूचिअस्य । किं प्रेरयामास नले च तन्मां सा सूक्तिरस्या मम कः प्रमोहः ॥ नैषधीयचरितम् १४.१७ ॥ |
| त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् । यशसे विजिगीषूणां प्रजायै गृहमेन्धिनाम् ॥ रघुवंशम् १.७ ॥ |
| त्रपास्य न स्यात्सदसि स्त्रियान्वयात्कुतोऽतिरूपः सुखभाजनं जनः । अमूदृशी तत्कविबन्दिवर्णनैरवाक्कृता राजकरञ्जिलोकवाक् ॥ नैषधीयचरितम् १५.३ ॥ |
| त्रस्तः समस्तजनहासकरः करेणोस्तावत्खरः प्रखरमुल्ललयाञ्चकार । यावच्चलासनविलोलनितम्बबिम्बविस्रस्तवस्त्रमवरोधवधूः पपात ॥ शिशुपालवधम् ५.७ ॥ |
| त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः । वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्नेपयतीव कृष्णम् ॥ रघुवंशम् ६.४९ ॥ |
| त्रस्तौ समासन्नकरेणुसूत्कृतान्नियन्तरि व्याकुलमुक्तरज्जुके । क्षिप्तावरोधाङ्गनमुत्पथेन गां विलङ्घ्य लघ्वीं करभौ बभञ्जतुः ॥ शिशुपालवधम् १२.२४ ॥ |
| त्रस्यन्ती चलशफरीविघट्टितोरूवामोरूरतिशयमाप विभ्रमस्य । क्षुभ्यन्ति पसभमहो विनापि हेतोर्लीलाभिः किमु सति कारणे रमण्यः ॥ शिशुपालवधम् ८.२४ ॥ |
| त्रातुं पतिं नौषधयः स्वशक्त्या मन्त्रेण विप्राः क्षयिणं न शेकुः । एनं पयोधिर्मणिभिर्न पुत्रं सुधा प्रभावैर्न निजाश्रयं वा ॥ नैषधीयचरितम् २२.१०१ ॥ |
| त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै । सामर्थ्यानामिव समुदयः सञ्चयो वा गुणानामाविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥<br>(उत्तररामचरितम् ६.९) |
| त्रासजिह्मं यतश्चैतान्मन्दं एवान्वियाय सः । नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः ॥ किरातार्जुनीयम् १५.६ ॥ |
| त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदिमे भावाः समाख्यातास्तु नामतः ॥ चन्द्रालोकः६.१८ ॥ |
| त्रासाकुलः परिपतन्परितो निकेतान्पुंभिर्न कैश्चिदपि धन्वभिरन्वबन्धि । तस्थौ तथापि न मृगः क्वचिदङ्गनानामाकर्णपूर्णनयनेषुहतेक्षणश्रीः ॥ शिशुपालवधम् ५.२६ ॥ |
| त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः । वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम् ॥ किरातार्जुनीयम् ३.१८ ॥ |
| त्रिकोणे कुज्ञात्सौरिशुक्रज्ञजीवा यदैकोऽपि वा नो गमोऽर्काच्छशी वा । बलीयांस्तु मध्ये तयोर्यो ग्रहः स्यात् स्वकीयां दिशं प्रत्युताऽसौ नयेच्च ॥ मुहूर्त.यात्राप्रकरणम् ६॥ |
| त्रिकोणे केन्द्रे वा मदनरहिते दोषशतकं हरेत्सौम्यः शुक्रो द्विगुणमपि लक्षं सुरगुरुः । भवेदाये केन्द्रेऽङ्गप उत लवेशो यदि तदा समूहं दोषाणां दहन इव तूलं शमयति ॥ मुहूर्त.विवाहप्रकरणम् ९१॥ |
| त्रित्र्यङ्गपञ्चाग्निकुवेदवह्नयः शरेषुनेत्राश्विशरेन्दुभूकृताः । वेदाग्निरुद्राश्वियमाग्निवह्नयोऽब्धयः शतं द्विद्विरदा भतारकाः ॥ मुहूर्त.नक्षत्रप्रकरणम्  ५८ ॥ |
| त्रिदशगुरुस्तनुगो मदने हिमकिरणो रविरायगतः । सितशशिजावपि कर्मगतौ रविसुतभूमिसुतौ सहजे ॥ मुहूर्त.यात्राप्रकरणम् ६७॥ |
| त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते निधुवनधुतस्रग्भागश्रीभरं ग्रहसंग्रहः । मृदुतरकराकारैस्तूलोत्करैरुदरंभरिः परिहरति नाखण्डो गण्डोपधानविधां विधुः ॥ नैषधीयचरितम् १९.९ ॥ |
| त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया । विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ॥ रघुवंशम् ८.६० ॥ |
| त्रिधा शब्दार्थतद् युग्मशक्तिजन्मा स्फुटक्रमात् । रसभावतदाभास-प्रमुखस्त्वस्फुटक्रमात् ॥ चन्द्रालोकः७.५ ॥ |
| त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति । न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ॥ नैषधीयचरितम् ८.६३ ॥ |
| त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत । क्व नीलकण्ठ! ब्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥ कुमारसंभवम् ५.५७ ॥ |
| त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः । अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते  ॥ नीतिसंग्रहस्य मित्र-१.८४ ॥ |
| त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा । स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ॥ रघुवंशम् ३.४५ ॥ |
| त्रेताग्निधूमाग्रमनिन्द्यकीर्तेस्तस्येदमाक्रान्तविमानमार्गम् । घ्रात्वा हविर्गन्धि रजोविमुक्तः समश्नुते मे लघिमानमात्मा ॥ रघुवंशम् १३.३७ ॥ |
| त्रैलोक्यनाथप्रभवं प्रभावात्कुशं द्विषामङ्कुशमस्त्रविद्वान् । मानोनन्तेनाप्यभिवन्द्य मूर्ध्ना मूर्धाभिषिक्तं कुमुदो बभाषे ॥ रघुवंशम् १६.८१ ॥ |

| |
|---|
| त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने तल्लब्ध्वासनवस्त्रमानघटने भोगे रतिं मा कृथाः । भोगः कोऽपि स एक एव परमो नित्योदिता जृम्भने यत्स्वादाद्विरसा भवन्ति विषयास्त्रैलोक्यराज्यादयः ॥ वैराग्यशतकम् ॥ |
| त्र्यम्बकस्य पदयोः कुसुमानि न्यस्य सैष निजशस्त्रनिभानि । दण्डवद्भुवि लुठन्किमु कामस्तं शरण्यमुपगम्य ननाम ॥ नैषधीयचरितम् २१.४ ॥ |
| त्र्यायाष्टषट्सु रविकेतुतमोऽर्कपुत्रा- स्त्र्यायारिगः क्षितिसुतो द्विगुणायगोऽब्जः । सप्तव्ययाष्टरहितौ ज्ञगुरू सितोऽष्ट- त्रिद्यूनषड्व्ययगृहान् परिहृत्य शस्तः ॥ मुहूर्त.विवाहप्रकरणम् ८७॥ |
| त्र्याशं त्रिकोणं चतुरस्रमस्तं पश्यन्ति खेटाश्चरणाभिवृद्ध्या । मन्दो गुरुर्भूमिसुतः परे च क्रमेण सम्पूर्णदृशो भवन्ति ॥ मुहूर्त.विवाहप्रकरणम् ७५॥ |
| त्वं छिन्धि भिन्धि परिदारय ताडय त्वं, त्वं खण्डय ज्वलय कर्तय पातय त्वम् । आदेशयन्ननुपदं विपदङ्कमूर्तिः, युद्धे प्रतापनृपतिर्द्रढिमोत्कटोऽभूत् ॥ प्रतापविजयः-१४० ॥ |
| त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमङ्गे । इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव शान्तमथवा किमतः परेण ॥ (उत्तररामचरितम् ३.२६) |
| त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकां संस्पृशि । शय्योपान्तनिविष्टसस्मितमुखीनेत्रोत्सवानन्दितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥ अमरुशतकम्-२३॥ |
| त्वं याऽर्थिनी किल नले न शुभाय तस्याः क्व स्यान्निजार्पणममुष्य चतुष्टये ते । इन्द्रानलार्यमतनूजपयःपतीनां प्राप्यैकरूप्यमिह संसदि दीप्यमाने ॥ नैषधीयचरितम् १३.३३ ॥ |
| त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे । अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥ रघुवंशम् १३.२४ ॥ |
| त्वं राजा वयमप्युपासित-गुरु-प्रज्ञाभिमानोन्नताः ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः। इत्थं मान-धनाति-दूरमुभयोरप्यावयोरन्तरं यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः॥॥ वैराग्यशतकम् ५१ ॥ |
| त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताःख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः । इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ॥ पुरुषार्थोपदेशः-38॥ |
| त्वं वह्निर्मुनयो वसिष्ठगृहिणी, गङ्गा च यस्या विदुर्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः । विद्यां वागिव यामसूत भवती, शुद्धिं गतायाः पुन- स्तस्यास्त्वद्दुहितुस्तथा विशसनं किं दारुणे मृष्यथाः ॥ (उत्तररामचरितम् ४.५) |
| त्वं हृद्गता भैमि बहिर्गतापि प्राणायिता नासिकयास्यगत्या । न चित्रमाक्रामति तत्र चित्रमेतन्मनो यद्भवदेकवृत्ति ॥ नैषधीयचरितम् ३.१०५ ॥ |
| त्वक्साररन्ध्रपरिपूरणलब्धगीति- रस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः । कस्तूरिकामृगविमर्दसुगन्धिरेति रागीव सक्तिमधिकां विषयेषु वायुः ॥ शिशुपालवधम् ४.६१॥ |
| त्वचं स मेध्यां परिधाय रौरवीं अशिक्षतास्त्रं पितुरेव मन्त्रवत् । न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ॥ रघुवंशम् ३.३१ ॥ |
| त्वचः समुत्तार्य दलानि रीत्या मोचात्वचः पञ्चषपाटनायाम् । सौरैर्गृहीतैर्विधिरुत्पलौघादस्यामभूदीक्षणरूपशिल्पी ॥ नैषधीयचरितम् ७.३१ ॥ |
| त्वच्चेतसः स्थैर्यविपर्ययं तु संभाव्य भाव्यस्मि तमज्ञ एव । लक्ष्ये हि बालाहृदि लोलशीले परापराद्धेषुरपि स्मरः स्यात् ॥ नैषधीयचरितम् ३.७ ॥ |
| त्वत्कान्तिमस्माभिरयं पिपासन्मनोरथाश्वासनयैकयैव । निजः कटाक्षः खलु विप्रलभ्यः कियन्ति यावद्भण वासराणि ॥ नैषधीयचरितम् ८.९१ ॥ |
| त्वत्तः श्रुतं नेति नले मयातः परं वदस्वेत्युदिताथ देव्या । ह्रीमन्मथद्वैरथरङ्गभूमी भैमी दृशा भाषितनैषधाभूत् ॥ नैषधीयचरितम् १४.३६ ॥ |
| त्वत्प्रापकात्त्रस्यति नैनसोऽपि त्वय्येष दास्येऽपि न लज्जते यत् । स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान्कमस्य ॥ नैषधीयचरितम् ३.११ ॥ |
| त्वदग्रसूच्या सचिवेन कामिनोर्मनोभवः सीव्यति दुर्यशः पटौ । टं स पत्त्रैः करपत्त्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायते ॥ नैषधीयचरितम् १.८ ॥ |
| त्वदबद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः । त्वामद्य लब्ध्वामृततृप्तिभाजां स्वदेवभूयंचरितार्थमस्तु ॥ नैषधीयचरितम् ३.१०१ ॥ |
| त्वदर्थिनः सन्तु परस्सहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः । विशङ्कसे कैतवनर्तितं चेदन्तश्चरः पञ्चशरः प्रमाणम् ॥ नैषधीयचरितम् ८.९४ ॥ |
| त्वदास्यनिर्यन्मदलीकदुर्यशोमषीमयं सल्लिपिरूपभागिव । श्रुतिं ममाविश्य भवद्दुरक्षरं सृजत्यदः कीटवदुत्कटा रुजः ॥ नैषधीयचरितम् ९.६३ ॥ |
| त्वदास्यलक्ष्मीमुकुरं चकोरैः स्वकौमुदीमादयमानमिन्दुम् । दृशा निशेन्दीवरचारुभासा पिबोरु रम्भातरुपीवरोरु ॥ नैषधीयचरितम् २२.४३ ॥ |
| त्वदितरोऽपि हृदा न मया धृतः पतिरितीव नलं हृदयेशयम् । स्मरहविर्भुजि बोधयति स्म सा विरहपाण्डुतया निजशुद्धताम् ॥ नैषधीयचरितम् ४.३१ ॥ |
| त्वद्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभोर्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम् । यन्नित्याङ्कनिवासलालिततमज्याभज्यमानं लसन्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते ॥ नैषधीयचरितम् ३.१२७ ॥ |
| त्वद्गोचरस्तं खलु पञ्चबाणः करोति संताप्य तथा विनीतम् । स्वयं यथा स्वादिततप्तभूयः परं न संतापयिता स भूयः ॥ नैषधीयचरितम् ८.७२ ॥ |

| |
|---|
| त्वद्रूपसंपदवलोकनजातशङ्का पादाब्जयोरिह कराङ्गुलिलालनेन । भूयाच्चिराय कमला कलितावधाना निद्रानुबन्धमनुरोधयितुं धवस्य ॥ नैषधीयचरितम् ११.४२ ॥ |
| त्वद्वाचः स्तुतये वयं न पटवः पीयूषमेव स्तुमस्तस्यार्थे गरुडामरेन्द्रसमरः स्थाने स जानेऽजनि । द्राक्षापानकमानमर्दनसृजा क्षीरे दृढावज्ञया यस्मिन्नाम धृतोऽनया निजपदप्रक्षालनानुग्रहः ॥ नैषधीयचरितम् २१.१६१ ॥ |
| त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्कपुण्यः स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः । नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ मेघदूतम्, पूर्वमेघः ४२॥ |
| त्वमन्तकः स्थावरजङ्गमानां त्वया जगत्प्राणिति देव विश्वं । त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानां ॥ किरातार्जुनीयम् १८.३५ ॥ |
| त्वमभिधेहि विधुं सखि मद्गिरा किमिदमीदृगधिक्रियते त्वया । न गणितं यदि जन्म पयोनिधौ हरशिरः स्थितिभूरपि विस्मृता ॥ नैषधीयचरितम् ४.५ ॥ |
| त्वमशक्नुवन्न शुभकर्मनिरत! परिपाकदारुणं । जेतुमकुशलमतिर्नरकं यशसेऽधिलोकमजयः सुतं भुवः ॥ शिशुपालवधम् १५.३१ ॥ |
| त्वमिव कोऽपि परापकृतौ कृती न ददृशे न च मन्मथ शुश्रुवे । स्वमदहो दहनाज्ज्वलतात्मना ज्वलयितुं परिरभ्य जगन्ति यः ॥ नैषधीयचरितम् ४.९९ ॥ |
| त्वमुचितं नयनार्चिषि शंभुना भुवनशान्तिकहोमहविः कृतः । तव वयस्यमपास्य मधुं मधुं हतवता हरिणा बत किं कृतम् ॥ नैषधीयचरितम् ४.१ ॥ |
| त्वमेव चातकाधारोऽसीति केषां न गोचरः । किमम्भोदवरास्माकं कार्पण्योक्तं प्रतीक्षसे ॥ नीतिशतकम्५० ॥ |
| त्वमेव तावत्परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः ।  वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च ॥ कुमारसंभवम् ५.६७ ॥ |
| त्वया जगत्युच्चितकान्तिसारे यदिन्दुनाशीलि शिलोञ्छवृत्तिः । आरोपि तन्माणवकोऽपि मौलौ स यज्वराज्येऽपि महेश्वरेण ॥ नैषधीयचरितम् ८.४२ ॥ |
| त्वया निधेया न गिरो मदर्थाः कुधा कदुष्णे हृदि नैषधस्य । पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस ॥ नैषधीयचरितम् ३.९४ ॥ |
| त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः । राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥ रघुवंशम् १३.५३ ॥ |
| त्वया विधातर्यदकारि चामृतं कृतं च यज्जीवनमम्बु साधु तत् । वृथेदमारम्भि तु सर्वतोमुखस्तथोचितः कर्तुिंदंपिबस्तव ॥ नैषधीयचरितम् १६.९ ॥ |
| त्वया विप्रकृतश्चैध्यो रुक्मिणीं हरता हरे । बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ॥ शिशुपालवधम् २.३८ ॥ |
| त्वयापि किं शङ्कितविक्रियेऽस्मिन्नधिक्रिये वा विषये निधातुम् । इतः पृथक्प्रार्थयसे तु यद्यत्कुर्वे तदुर्वीपतिपुत्रि सर्वम् ॥ नैषधीयचरितम् ३.७३ ॥ |
| त्वयि पूजनं जगति जाल्म कृतमिदमपाकृते गुणैः । हासकरमघटते नितरां शिरसीव कङ्कतमपेतमूर्धजे ॥ शिशुपालवधम् १५.३३ ॥ |
| त्वयि भक्तिमता न सत्कृतः कुरुराजा गुरुरेव चेदिपः । प्रियमांसमृगाधिपोज्झितः किमवद्यः करिकुम्भजो मणिः ॥ शिशुपालवधम् १६.४५ ॥ |
| त्वयि वीर विराजते परं दमयन्तीकिलकिञ्चितं किल । तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥ नैषधीयचरितम् २.४४ ॥ |
| त्वयि स्मराधेः सततास्मितेन प्रस्थापितो भूमिभृतास्मि तेन ।आगत्य भूतः सफलो भवत्या भावप्रतीत्या गुणलोभवत्याः ॥ नैषधीयचरितम् ३.११५ ॥ |
| त्वयैकसत्या तनुतापशङ्कया ततो निवर्त्यं न मनः कथंचन । हिमोपमा तस्य परीक्षणक्षणे सतीषु वृत्तिः शतशो निरूपिता ॥ नैषधीयचरितम् ९.५५ ॥ |
| त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना । सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ रघुवंशम् १.६४ ॥ |
| त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् । प्रेक्षिष्यन्ते गगनगतयो दूरमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ मेघदूतम्, पूर्वमेघः ४६॥ |
| त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः । सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किंचित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण॥ मेघदूतम्, पूर्वमेघः १६॥ |
| त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां । गतिस्त्वं वीतरागाणामभूयःसंनिवृत्तये ॥ रघुवंशम् १०.२८ ॥ |
| त्वरमाणशाङ्खिकसवेगवदनपवनाभिपूरितः । शैलकटकतटभिन्नरवः प्रणनाद सांनहनिकोऽस्य वारिजः ॥ शिशुपालवधम् १५.७२ ॥ |
| त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्ममयं यशश्चयम् । विधे परेहाफलभक्षणव्रती पतादय तृप्यन्नसुभिर्ममाफलैः ॥ नैषधीयचरितम् ९.८८ ॥ |
| त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपद्प्रसरस्य सीमा । अदृश्यतादर्शतलामलेषु च्छायेव या स्वर्जलधेर्जलेषु ॥ शिशुपालवधम्  ३.३४ ॥ |
| त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः । कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥ मेघदूतम्, पूर्वमेघः ८॥ |
| त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालिप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ मेघदूतम्, उत्तरमेघः ३९ ॥ |
| त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः । न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥ मेघदूतम्, पूर्वमेघः १७॥ |
| त्विषं चकोराय सुधां सुराय कलामपि स्वावयवं हराय । ददज्जयत्येष समस्तमस्य कल्पद्रुमभ्रातुरथाल्पमेतत् ॥ नैषधीयचरितम् २२.६५ ॥ |

| |
|---|
| त्विषां ततिः पाटलिताम्बुवाहा सा सर्वतः पूर्वसरीव संध्या । निनाय तेषां द्रुतमुल्लसन्ती विनिद्रतां लोचनपङ्कजानि ॥ किरातार्जुनीयम् १६.३३ ॥ |
| दक्षिणां प्रणतदक्षिण मूर्तिं तत्त्वतः शिवकरीं अविदित्वा । रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ॥ किरातार्जुनीयम् १८.२७ ॥ |
| दक्षिणीयमवगम्य पङ्क्तिशः पङ्क्तिपावनमथ द्विजव्रजं । दक्षिणः क्षितिपतिर्व्यशिश्रणद्दक्षिणाः सदसि राजसूयकीः ॥ शिशुपालवधम् १४.३३ ॥ |
| दक्षिणेन पवनेन संभृतं प्रेक्ष्य चूतकुसुमं सपल्लवं । अन्वनैषुरवधूतविग्रहास्तं दुरुत्सहवियोगमङ्गनाः ॥ रघुवंशम् १९.४३ ॥ |
| दण्डं बिभर्त्ययमहो जगतस्ततः स्यात्कम्पाकुलस्य सकलस्य न पङ्कपातः । स्ववैद्ययोरपि मदव्ययदायिनीभिरेतस्य रुम्भिरमरः किमु कश्चिदस्ति ॥ नैषधीयचरितम् १३.१६ ॥ |
| दण्डवद्भुवि लुठन्स ननाम त्र्यम्बकं शरणभागिव कामः । आत्मशस्त्रविशिखासनबाणान्न्यस्य तत्पदयुगे कुसुमानि ॥ नैषधीयचरितम् २१.३९ ॥ |
| दत्तमात्तमदनं दयितेन व्याप्तमतिशाकेन रसेन । सस्वदे मुखसुरं प्रमदाभ्यो नाम रूढमपि च व्युदपादि ॥ शिशुपालवधम् १०.२३ ॥ |
| दत्तमिष्टतमया मधु पत्युर्बाढमाप पिबतो रसवत्तां । यत्सुवर्णमुकुटांशुभिरासाच्चेतनाविरहितैरपि पत्नीम् ॥ शिशुपालवधम् १०.६ ॥ |
| दत्ताभये त्वयि यमादपि दण्डधारे संजीवितः शिशुरसौ, मम चेयमृद्धिः । शम्बूक एष शिरसा चरणौ नतस्ते । सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ (उत्तररामचरितम् २.११) |
| दत्ते जयं जनितपत्त्रनिवेशनेयं साक्षीकृतेन्दुवदना मदनाय तन्वी । मध्यस्थदुर्बलतमत्वफलं किमेतद्भुक्तिर्यदत्र तव भर्त्सितमत्स्यकेतोः ॥ नैषधीयचरितम् २१.१३५ ॥ |
| दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो- र्दृप्तानां दमनाय दीपितनिजक्षत्रप्रतापाग्निभिः । आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥ (उत्तररामचरितम् ६.१८) |
| दत्तोऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता दैवाद् अद्य किल त्वमेव कृतवान् अस्या नवं विप्रियम् । मन्युर्दुःसह एष यात्युपशमं नो सान्त्ववादैः स्फुटं हे निस्त्रंश विमुक्तकण्ठकरुणं तावत्सखी रोदितु ॥ अमरुशतकम्-५॥ |
| दत्वात्मजीवं त्वयि जीवदेऽपि शुध्यामि जीवाधिकदे तु केन । विधेहि तन्मां त्वदृणान्यशोद्धुममुद्रदारिद्र्यसमुद्रमग्नाम् ॥ नैषधीयचरितम् ३.८६ ॥ |
| ददतमन्तरिताहिमदीधितिं खगकुलाय कुलायनिलायिताम् । जलदकालमबोधकृतं दिशामपराथाप रथवयवायुधः ॥ शिशुपालवधम् ६.४१ ॥ |
| ददाम किं ते सुधयाऽधरेण त्वदास्य एव स्वयमास्यते हि । चन्द्रं विजित्य स्वयमेव भावि त्वदाननं तन्मखभागभोजि ॥ नैषधीयचरितम् ८.१०२ ॥ |
| ददासि मे तन्न रुचेर्यदास्पदं न यत्र रागः सितयापि किं तया । इतीरिणे बिम्बफलं फलेच्छलाददायि बिम्बाधरयारुचेच्च तत् ॥ नैषधीयचरितम् १६.९५ ॥ |
| ददृशे न जनेन यन्नसौ भुवि तच्छायमवेक्ष्य तत्क्षणात् । दिवि दिक्षु वितीर्णचक्षुषा पृथुवेगद्रुतमुक्तदृक्पथः ॥ नैषधीयचरितम् २.७१ ॥ |
| ददृशेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः । रचितस्तिसृणां पुरां विधातुं वधं आत्मेव भयानकः परेषां ॥ किरातार्जुनीयम् १३.१७ ॥ |
| ददृशेऽपि भास्कररुचाह्नि न यः स तमीं तमोबिरभिगम्य ततां । द्युतिमग्रहीद्ग्रहगणो लघवः प्रकटीभवन्ति मलिनाश्रयतः ॥ शिशुपालवधम् ९.२३ ॥ |
| ददेऽपि तुभ्यं कियतीः कदर्थनाः सुरेषु रागप्रसवावकेशिनीः । अदम्भदूत्येन भजन्तु वा दयां दिशन्तु वा दण्डममी ममागसाम् ॥ नैषधीयचरितम् ९.१३१ ॥ |
| ददौ रसात्पङ्कजरेणुगन्धि गजाय गण्डूपजलं करेणुः । अर्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा ॥ कुमारसंभवम् ३.३७॥ |
| दधत इव विलासशालि नृत्यं मृदु पतता पवनेन कम्पितानि । इह ललितविलासिनीजनभ्रू- गतिकुटिलेषु पयःसु पङ्कजानि ॥ किरातार्जुनीयम् ५.३२ ॥ |
| दधतः शशाङ्कितशशाङ्करुचि लसदुरश्छदं वपुः । चक्रुरथ सह पुरन्धिजनैरयथार्थसिद्धिं सरकं महीभृतः ॥ शिशुपालवधम् १५.८० ॥ |
| दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः । विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥ किरातार्जुनीयम् ५.७ ॥ |
| दधतस्तनिमानमानपूर्व्या बभुरक्षिश्रवसो मुखे विशालाः । भरतज्ञकविप्रणीतकाव्यग्रथिताङ्का इव नाटकप्रपञ्चाः ॥ शिशुपालवधम् २०.४४ ॥ |
| दधति कुहरभाजामत्र भल्लूकयूना- मनुरसितगुरूणि स्त्यानमम्बूकृतानि । शिशिरकटुकषायः स्त्यायते सल्लकीना- मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ (उत्तररामचरितम् २.२१) |
| दधति क्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः । अधिकां स रोधसि बबन्ध धृतिं महते रुजन्नपि गुणाय महान् ॥ किरातार्जुनीयम् ६.७ ॥ |
| दधति सुमनसो वनानि बह्वीर्युवतियुता यदवः प्रयातुमीषुः । मनसिमहास्त्रमन्यथामी न कुसुमपञ्चकमलं विसोढुम् ॥ शिशुपालवधम् ७.२ ॥ |
| दधति स्फुटं रत्पतेरिषवः शिततां यदुत्पलपलाशदृशः । हृदयं निरन्तरबृहत्कठिनस्तनमण्डलावरणमप्यभिदन् ॥ शिशुपालवधम् ९.६६ ॥ |
| दधतिपरिपतन्त्यो जालवातायनेभ्यस्तरुणतपनभासो मन्दिराभ्यन्तरेषु । प्रणयिषु वनितानां प्रातरिच्छत्सु गन्तुं कुपितमदनमुक्तोत्तप्तनाराचलीलां ॥ शिशुपालवधम् ११.५० ॥ |
| दधतो भयानकतरत्वमुपगतवतः समानतां । धूमपटलपिहितस्य गिरेः समवर्मयन्सपदि मेदिनीभृतः ॥ शिशुपालवधम् १५.७५ ॥ |

| |
|---|
| दधतोऽपि रणे भीममभीक्ष्णं भावमासुरं । हताः परैरभिमुखाः सुरभूयमुपाययुः ॥ शिशुपालवधम् १९.७३ ॥ |
| दधतोऽसुलभक्षयागमास्तनुमेकान्तरतामममानुषीं । भुवि सम्प्रति न प्रतिष्ठिताः सदृशा यस्य सुरैररातयः ॥ शिशुपालवधम् १६.६५ ॥ |
| दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशी तलं । बभौ मुखेनाप्रतिमेन काचन श्रियाधिका तां प्रति मेनका च न ॥ शिशुपालवधम् ९.८६ ॥ |
| दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपुः । कथमृच्छतु यत्र नाम न क्षितिभृन्मन्दिरमिन्दुमौलिताम् ॥ नैषधीयचरितम् २.८२ ॥ |
| दधदसकलमेकं खण्डितामानमद्भिः श्रियमपरमपूर्णामुच्छ्वसद्भिः पलाशैः । कलरवमुपगीते षट्पदौघेन धत्तः कुमुदकमल षण्डे तुल्यरूपामवस्थां ॥ शिशुपालवधम् ११.१५ ॥ |
| दधद्भिरभितस्तटौ विकचवारिजाम्बूनदै- र्विनोदितदिनक्लमाः कृतरुचश्चजाम्बूनदैः । निषेव्य मधु माधवाः सरसमत्र कादम्बरं हरन्ति रतये रहः प्रियतमाङ्गकादम्बरम् ॥ शिशुपालवधम् ४.६६॥ |
| दधाति च विकसद्विचित्रकल्प- द्रुमकुसुमैरभिगुम्फितानिवैताः । क्षणमलघुविलम्बिपिच्छदाम्नः शिखरशिखाः शिखिशेखरानमुष्य ॥ शिशुपालवधम् ४.५०॥ |
| दधानमम्भोरुहकेसरद्युती जटाः शरच्चन्द्रमरीचिरोचिषम् । विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव ॥ शिशुपालवधम्  १.५ ॥ |
| दधानैर्घनसादृश्यं लसदायसदंशनैः । तत्र काञ्चनसच्छाया ससृजे तैः शराशनिः ॥ शिशुपालवधम् १९.११ ॥ |
| दधार गौरी हृदये देवं हिमकराङ्कितम् । अत्र श्लेषोदयान्नैव त्याज्यं हीति निरर्थकम् ॥ चन्द्रालोकः२.४४ ॥ |
| दधुरम्बुधिमन्थनाद्रिमन्थभ्रमणायस्तफणीन्द्रपित्तजानां । रुचमुल्लसमानवैनतेयद्युतिभिन्नाः फणभारिणो मणीनां ॥ शिशुपालवधम् २०.५६ ॥ |
| दधौ चलत्पृथुरसनं विवक्षया विदारितं विततबृहद्भुजालतः । विदूरथः प्रतिभयमास्यकन्दरं चलत्फणाधरमिव कोटरं तरुः ॥ शिशुपालवधम् १७..१७ ॥ |
| दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बदस्ति सत्त्वे । अभिभूय तथा हि मेघनीलः सकलं कम्पयतीव शैलराजं ॥ किरातार्जुनीयम् १३.८ ॥ |
| दन्ताग्रनिर्भिन्नपयोदमुन्मुखाः शिलोच्चयानारुरुहुर्महीयसः । तिर्यक्कटप्लाविमदाम्बुनिम्नगाविपूर्यमाणश्रवणोदरमं द्विपाः ॥ शिशुपालवधम् १२.४७ ॥ |
| दन्तानामधरमयावकं पदानि प्रत्यग्रास्तनुमविलेपनां नखाङ्गाः । आनिन्युः श्रियमधितोयमङ्गनानां शोभायै विपदि सदाश्रिता भवन्ति ॥ शिशुपालवधम् ८.५५ ॥ |
| दन्तार्कभूपधृतिदिङ्मितवासरे स्याद्वारे शुभे मृदुलघुध्रुवभैः शिशूनाम् । दोलाधिरूढिरथ निष्क्रमणं चतुर्थ मासे गमोक्तसमयेऽर्कमितेऽह्नि वा स्यात् ॥ मुहूर्त.संस्कारप्रकरणम् १५॥ |
| दन्तालिकाधरणनिश्चलपाणियुग्मं अर्धोदितो हरिरिवोदयशैलमूर्ध्नः । स्तोकेन नाक्रमत वल्लभपालमुच्चैः श्रीवृक्षकी पुरुषकोन्नमिताग्रकायः ॥ शिशुपालवधम् ५.५६ ॥ |
| दन्तोज्ज्वलासु विमलोपलमेखलान्ताः सद्रत्नचित्रकटकासु बृहन्नितम्बाः । अस्मिन्भजन्ति घनकोमलगण्डशैला नार्योऽनुरूपमधिवासमधित्यकासु ॥ शिशुपालवधम् ४.४०॥ |
| दन्तौश्चिच्छिदिरे कोपात्प्रतिपक्षं गजा इव । परनिस्त्रिंशनिर्लूनकरवालाः पदातयः ॥ शिशुपालवधम् १९.५५ ॥ |
| दमघोषसुतेन कश्चन प्रतिशिष्टः प्रतिभानवानथ । उपगम्यहरिं सदस्यदः स्फुटभिन्नार्थमुदाहरद्वचः ॥ शिशुपालवधम् १६.१ ॥ |
| दमनादमनाक्प्रसेदुषास्तनयां तथ्यगिरस्तपोधनात् । वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम् ॥ नैषधीयचरितम् २.१७ ॥ |
| दमस्वसः सेयमुपैति तृष्णा हरेर्जगत्यग्रिमलेख्यलक्ष्मीम् । दृशां यदब्धिस्तव नाम दृष्टित्रिभागलोभार्तिमसौ बिभर्ति ॥ नैषधीयचरितम् ८.७ ॥ |
| दमस्वसुः पाणिममुष्य गृह्णतः पुरोधसा संविदधेतरां विधेः । महर्षिणेवाङ्गिरसेन साङ्गता पुलोमजामुद्वहतः शतक्रतोः ॥ नैषधीयचरितम् १६.४५ ॥ |
| दमस्वसुश्चित्तमवेत्य हासिका जगाद देवीं कियदस्य वक्ष्यसि । भण प्रभूते जगति स्थिते गुणैरिहाप्यते संकटवासयातना ॥ नैषधीयचरितम् १२.५ ॥ |
| दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्योपहारं वधूः । कर्णालङ्कृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनम् ॥ अमरुशतकम्-१३॥ |
| दयस्व किं घातयसि त्वमस्माननङ्गचण्डालशरैरदृश्यैः । भिन्ना वरं तीक्ष्णकटाक्षबाणैः प्रेमस्तव प्रेमरसात्पवित्रैः ॥ नैषधीयचरितम् ८.९३ ॥ |
| दयितं प्रति यत्र संतता रतिहासा इव रेजिरे भुवः । स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरङ्कभित्तयः ॥ नैषधीयचरितम् २.७४ ॥ |
| दयितया मानपरयापरया त्वरितं ययावगदितापि सखी । किमु चोदिताः प्रियहितार्थकृतः कृतिनो भवन्ति सुहृदः सुहृदां ॥ शिशुपालवधम् ९.५७ ॥ |
| दयितां यदि तावदन्वगाद्विनिवृत्तं किमिदं तया विना । सहतां हतजीवितं मम प्रबलां आत्मकृतेन वेदनां ॥ रघुवंशम् ८.५० ॥ |
| दयिताय सासवमुदस्तमपतदवसादिनः करात् । कांस्यमुपहितसरोजपतद्भ्रमरौघभारगुरु राजयोषितः ॥ शिशुपालवधम् १५.८१ ॥ |
| दयिताहृतस्य युवभिर्मनसः परिमूढतामिव गतैः प्रथमं । उदिते ततः सपदि लब्धपदैः क्षणदाकरेऽनुपदिभिः प्रयये ॥ शिशुपालवधम् ९.७० ॥ |
| दयितैरिव खण्डिता मुरारेर्विशिखैः संमुखमुज्ज्वलाङ्गलेखैः । लघिमानमुपेयुषी पृथिव्यां विफला शत्रुशरावलिः पपात ॥ शिशुपालवधम् २०.२४ ॥ |
| दयोदयश्चेतसि चेत्तवाभूदलंकुरु द्यां विफलो विलम्बः । भुवः स्वरादेशमथाचरामो भूमौ धृतिं यासि यदि स्वभूमौ ॥ नैषधीयचरितम् ८.९६ ॥ |
| दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् । व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः  ॥ नीतिसंग्रहस्य मित्र-१.१५ ॥ |
| दरीमुखैरासवरागताम्रं विकासि रुक्मच्छदधाम पीत्वा । जवानिलाघूर्णितसानुजालो हिमाचलः क्षीब इवाचकम्पे ॥ किरातार्जुनीयम् १६.४६ ॥ |
| दर्पणनिर्मलासु पतिते घनतिमिरमुषि ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः । व्रीडमसंमुखोऽपि रमणैरपहृतवसनाः खाञ्चनकन्दरासु तरुणीरिह नयति रविः ॥ शिशुपालवधम् ४.६७॥ |
| दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः। प्रेक्ष्य बिम्बमुपबिम्बमात्मनः कानि कानि न चकार लज्जया॥ कुमारसंभवम् ७.११॥ |

| |
|---|
| दर्पणेषु परिभोगदर्शिनीर्नर्मपूर्वमनुपृष्ठसंस्थितः । छायया स्मितमनोज्ञया वधूर्ह्रीनिमीलितमुखीश्चकार सः ॥ रघुवंशम् १९.२८ ॥ |
| दर्पण कौतुकवता मयि बद्धलक्ष्यः पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा । द्वेधा समुद्धतमरुत्तरलस्य धत्ते मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥ (उत्तररामचरितम् ५.११) |
| दर्शनानुपदमेव कामतः स्वं वनीयकजनेऽधिगच्छति । प्रार्थनार्थरहितं तदाभवद्दीयतामिति वचोऽतिसर्जने ॥ शिशुपालवधम् १४.४८ ॥ |
| दलित कोमल पाटलकुड्मले निजवधूश्वसितानुविधायिनि । मरुति वाति विलासिभिरुन्मदभ्रमदलौ मदलौल्यमुपाददे ॥ शिशुपालवधम् ६.२३ ॥ |
| दलित मौक्तिकचूर्णविपाण्डवः स्फुरितनिर्झरशीकरचारवः । कुटजपुष्पपरागकणाः स्फुटं विदधिरे दधिरेणुविडम्बनाम् ॥ शिशुपालवधम् ६.३५ ॥ |
| दलोदरे काञ्चनकेतकस्य क्षणान्मसीभावुकवर्णलेखम् । तस्यैव यत्र स्वमनङ्गलेखं लिलेख भैमी नखलेखिनीभिः ॥ नैषधीयचरितम् ६.६३ ॥ |
| दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परं । तमधिगम्य तथैव पुनर्बभौ न न महीऽनमहीनपराक्रमं ॥ रघुवंशम् ८.५ ॥ |
| दशरास्मिशतोपमद्युतिं यशसा दिक्षु दशवपि श्रुतम् । दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥ रघुवंशम् ८.२९ ॥ |
| दशशतचतुर्वेदीशाखाविवर्तनमूर्तयः सविधमधुनाऽलंकुर्वन्ति ध्रुवं रविरश्मयः । वदनकुहरेऽप्यध्येतॄणामयं तदुदञ्चति श्रुतिपदभयस्तेषामेव प्रतिध्वनिरध्वनि ॥ नैषधीयचरितम् १९.१ ॥ |
| दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः । मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥ रघुवंशम् १०.७६ ॥ |
| दशाननेनापि जगन्ति जित्वा योऽयं पुरापारि न जातु जेतुम् । म्लानिर्विधोर्मानिनि संगतेयं तस्य त्वदेकाननिर्जितस्य ॥ नैषधीयचरितम् २२.१३१ ॥ |
| दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा । शीतलेन निरवापयत्क्षणं मौलिचन्द्रशकलेन शूलिनः॥ कुमारसंभवम् ७.१८॥ |
| दहति कण्ठमयं खलु तेन किं गरुडवद्द्विजवासनयोज्झितः । प्रकृतिरस्य विधुंतुद दाहिका मयि निरागसि का वद विप्रता ॥ नैषधीयचरितम् ४.७१ ॥ |
| दहनजा न पृथुर्दवथुव्यथा विरहजैव पृथुर्यदि नेदृशम् । दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः ॥ नैषधीयचरितम् ४.४६ ॥ |
| दहनमविशद्दीप्तिर्यास्तं गते गतवासरप्रशमसमयप्राप्ते पत्यौ विवस्वति रागिणि । अधरभुवनात्सोद्धृत्यैषा हठात्तरणेः कृतामरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्तिताम् ॥ नैषधीयचरितम् १९.४४ ॥ |
| दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् । शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ नीतिशतकम् २२ ॥ |
| दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत्कोऽप्यधीती कपोतः कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूषानुयातः । सर्वं विस्मृत्य दैवात्स्मृतिमुषसि गतां घोषयन्यो घुसंज्ञां प्राक्संस्कारेण संप्रत्यपि धुवति शिरः पट्टिकापाठजेन ॥ नैषधीयचरितम् १९.६२ ॥ |
| दातव्यमिति यद्दानं दीयतेऽनुपकारिणि । देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ॥ नीतिसंग्रहस्य मित्र-१.१६ ॥ |
| दाददो दद्दद्दादी दादादो दूददीददोः । दुद्दादं दददे दुद्दे ददाददददोऽददः ॥ शिशुपालवधम् १९.११४ ॥ |
| दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं सौर्यम् । त्यागं सहितं च वित्तं दुर्लभमेतच्चतुर्भद्रम् ॥ नीतिसंग्रहस्य मित्र-१.१५६ ॥ |
| दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य । यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ नीतिशतकम्४३ ॥ |
| दानन्ददत्तयपि जलैः सहसाधिरूढे को विद्यमानगतिरासितुमुत्सहते । यद्दन्तिनः कटकटाहतटान्मिमङ्क्षोर्मङ्क्षूदपाति परितः पटलैरसीनाम् ॥ शिशुपालवधम् ५.३७ ॥ |
| दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि । साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ॥ नैषधीयचरितम् ५.९२ ॥ |
| दानवाद्यगहनप्रभवस्त्वं सिंह मामव रवैर्घनघोरैः । वैरिदारिदिविषत्सुकृतास्त्रग्रामसंभवभवन्मनुजार्धः ॥ नैषधीयचरितम् २१.६ ॥ |
| दानवारिरसिकायविभूतेर्वश्मि तेऽस्मि सुतरां प्रतिपत्तिम् । इत्युदग्रपुलकं बलिनोक्तं त्वां नमामि कृतवामनमायम् ॥ नैषधीयचरितम् २१.६३ ॥ |
| दाने तपसि शौर्ये च यस्य न प्रथितं मनः । विद्यायामर्थलाभे च मातुरुच्चार एव सः ॥ नीतिसंग्रहस्य मित्र-०.12 ॥ |
| दानोपभोगहीनेन धनेन धनिनो यदि । भवामः किं न तेनैव धनेन धनिनो वयम् ॥ नीतिसंग्रहस्य मित्र-१.१५२ ॥ |
| दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते। निर्विण्णः शुचमेति शोकपिहितो बुद्धया परित्यज्यते निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम्॥ (मृच्छकटिकम् १.१४) |
| दारिद्र्यं बधिरतनौ दिवान्धलग्ने वैधव्यं शिशुमरणं निशान्धलग्ने । पंग्वङ्गे निखिलधनानिनाशमीयुः सर्वत्राधिपगुरुदृष्टिभिर्न दोषः ॥ मुहूर्त.विवाहप्रकरणम् ८३॥ |
| दारिद्र्यदारिद्रविणौघवर्षैरमोघमेघव्रतमर्थिसार्थे । संतुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम् ॥ नैषधीयचरितम् ३.२५ ॥ |
| दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न संतिष्ठते सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः। सत्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते पापं कर्म च यत्परैरपि कृतं तत्तस्य संभाव्यते॥ (मृच्छकटिकम् १.३६) |

| |
|---|
| दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात्परिभ्रश्यते निःसत्त्वं परिभूयते परिभवान्निर्वेदमापद्यते । निर्विण्णः शुचमेति शोकफिहितो बुद्ध्या परित्यज्यते निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ नीतिसंग्रहस्य मित्र-१.१२९ ॥ |
| दारिद्र्यान्मरणाद्वापि दारिद्र्यमवरं स्मृतम् । अल्पक्लेशेन मरणं दारिद्र्यमतिदुःसहम् ॥ नीतिसंग्रहस्य मित्र-१.१२२ ॥ |
| दारी दरदरिद्रोऽरिदारूदारोऽद्रिदूरदः । दूरादरौद्राददरद्रोदोरुद्दारुरादरी ॥ शिशुपालवधम् १९.१०६ ॥ |
| दासीषु नासीरचरीषु जातं स्फीतं क्रमेणालिषु वीक्षितासु । स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानाम् ॥ नैषधीयचरितम् १०.९३ ॥ |
| दास्राद्र्के मृगादिन्दौ सार्पाद्भौमे करादबुधे । मैत्राद्गुरो भृगौ वैश्वाद्गण्या मन्दे च वारुणात् ॥ मुहूर्तचिन्त.२५ ॥ |
| दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये । स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ नीतिशतकम् १ ॥ |
| दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये । स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥ पुरुषार्थोपदेशः-1॥ |
| दिक्षु पूर्वादितः शाला ध्रुवा भूर्द्वौ कृता गजाः । शालाध्रुवाङ्कसंयोगः सैको वेश्मध्रुवादिकम् ॥ मुहूर्त.वास्तुप्रकरणम् ८॥ |
| दिक्षु यत्खुरचतुष्टयमुद्रामभ्यवैमि चतुरोऽपि समुद्रान् । तस्य पोत्रिवपुषास्तव दंष्ट्रा तुष्टयेऽस्तु मम वाऽस्तु जगत्याः ॥ नैषधीयचरितम् २१.५८ ॥ |
| दिगन्तरेभ्यः पृथिवीपतीनामाकर्षकौतूहलसिद्धविद्याम् । ततः क्षितीशः स निजां तनूजां मध्येमहाराजकमाजुहाव ॥ नैषधीयचरितम् १०.९२ ॥ |
| दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसरावरोधिनीम् । बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम् ॥ नैषधीयचरितम् १.६ ॥ |
| दिगीश्वरार्थं न कथंचन त्वया कदर्थनीयास्मि कृतोऽयमञ्जलिः । प्रसद्यतां नाद्य निगाद्यमीदृशं दृशौ दधे बाष्परयास्पदे भृशम् ॥ नैषधीयचरितम् ९.६९ ॥ |
| दिग्भास्करा मनुमिताश्च शनौ शशिद्वि- नागा दिशो भवदिवाकरसम्मिताश्च । दुष्टः क्षणः कुलिककण्टककालवेलाः स्युश्चार्धयामयमघण्टगताः कलांशाः ॥ मुहूर्तचिन्त. ३९॥ |
| दिङ्नागहस्ताकृतिं उद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः । रराज सर्पावलिरुल्लसन्ती तरङ्गमालेव नभोर्णवस्य ॥ किरातार्जुनीयम् १६.३८ ॥ |
| दिङ्मुखव्यापिनस्तीक्ष्णान्ह्रादिनो मर्मभेदिनः । चिक्षेपैकक्षणेनैव सायकानहितांश्च सः ॥ शिशुपालवधम् १९.९५ ॥ |
| दिदृक्षमाणाः प्रतिरथ्यमाययुर्मुररिमारादनघं जनौघाः । अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति ॥ शिशुपालवधम्  ३.३० ॥ |
| दिदृक्षुरन्या विनिमेषावीक्षणां नृणामयोग्यां दधती तनुश्रियम् । पदाग्रमात्रेण यदस्पृशन्महीं न तावता केवलमप्सरोऽभवत् ॥ नैषधीयचरितम् १५.८५ ॥ |
| दिनमिव दिवाकीर्तिस्तीक्ष्णैः क्षुरैः सवितु करैः स्तिमिरकबरीलूनां कृत्वा निशां निरदीधरत् । स्फुरति परितः केशस्तोमैस्ततः पतयालुभिर्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥ नैषधीयचरितम् १९.५५ ॥ |
| दिनावसाने तरणेरकस्मान्निमज्जनाद्विश्वविलोचनानि । अस्य प्रसादादुडुपस्य नक्तं तमोविपद्द्वीपवतीं तरन्ति ॥ नैषधीयचरितम् २२.९९ ॥ |
| दिने दिने शैवलवन्त्यधस्तात्सोपानपर्वाणि विमुञ्चदम्भः । उद्दण्डपद्मं गृहदीर्घिकाणां नारीनितम्बद्वयसं बभूव ॥ रघुवंशम् १६.४६ ॥ |
| दिने मम द्वेषिणि कीदृगेषां प्रचार इत्याकलनाय चारीः । छाया विधाय प्रतिवस्तुलग्नाः प्रावेशयत्प्रष्टुमिवान्धकारः ॥ नैषधीयचरितम् २२.३९ ॥ |
| दिनेदिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च तापमृच्छ च । इतीव पान्थाञ्शपतः पिकान्द्विजान्सखेदमैक्षिष्ट स लोहितेक्षणान् अलिस्रजा ॥ नैषधीयचरितम् १.९ ॥ |
| दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् । तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम् ॥ रघुवंशम् ३.८ ॥ |
| दिलीपसूनोः स बृहद्भुजान्तरं प्रविश्य भीमासुरशोणितोचितः । पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ॥ रघुवंशम् ३.५४ ॥ |
| दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः । अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान्विलङ्घ्य सा ॥ रघुवंशम् ३.४ ॥ |
| दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः । अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥ कुमारसंभवम् ५.४५ ॥ |
| दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः । अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥ कुमारसंभवम् ५.४५॥ |
| दिवमिन्युधा गन्तुं कोमलामलसम्पदम् । दधौ दधानोऽसिलतां कोऽमलामलसम्पदम् ॥ शिशुपालवधम् १९.३१ ॥ |
| दिवसं भृशोष्णरुचिपादहतां रुदतीमिवानवरतलिरुतैः । मुहुरामृशन्मृगधरोऽग्रकरैरुदशिस्वसत्कुमुदिनीवनिताम् ॥ शिशुपालवधम् ९.३४ ॥ |
| दिवसोनुमित्रमगमद्वलयं किमिहास्यते बत मयाबलया । रुचिभर्तुरस्य विरहाधिगमादिति संध्ययापि सपदि व्यगमि ॥ शिशुपालवधम् ९.१७ ॥ |
| दिवस्पतेरादरदर्शिनादराददौकि यस्तं प्रति विश्वकर्मणा । तमेकमाणिक्यमयं महोन्नतं पतद्ग्रहं ग्राहितवान्नलेन सः ॥ नैषधीयचरितम् १६.२७ ॥ |
| दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥ कुमारसंभवम् १.१२ ॥ |
| दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन । चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य ?॥ कुमारसंभवम् ७.३५॥ |
| दिवारजन्यो रविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम् । आस्ये यदास्या न तदा तयोः शृईरेकश्रियेदं तु कदा न कान्तम् ॥ नैषधीयचरितम् ७.५५ ॥ |
| दिवो धवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गणालयम् । कथं भवेरस्य न जीवितेश्वरा न मोघयाच्ञः स हि भीरु भूरुहः ॥ नैषधीयचरितम् ९.७४ ॥ |
| दिवौकसं कामयते न मानवी नवीनमश्रावि तवाननादिदम् । कथं न वा दुर्ग्रहदोष एष ते हितेन सम्यग्गुरुणाऽपि शम्यते ॥ नैषधीयचरितम् ९.४१ ॥ |
| दिव्यकेसरिवपुः सुरद्विषो नैव लब्धशममायुधैरपि । दुर्निवाररणकण्डु कोमलैर्वक्ष एष निरदारयन्नखैः ॥ शिशुपालवधम् १४.७२ ॥ |

| |
|---|
| दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः । पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥ किरातार्जुनीयम् ५.२३ ॥ |
| दिव्यानामपि कृतविस्मयां पुरस्तादम्भस्तः स्फुरदरविन्दचारुहस्ताम् । उद्वीक्ष्यश्रियमिव काञ्चिदुत्तरन्तींमस्मार्षीज्जलनिधिमन्मथनस्य शौरिः ॥ शिशुपालवधम् ८.६४ ॥ |
| दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे । बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥ रघुवंशम् ३.१४ ॥ |
| दिशमर्कमिवावाचीं मूर्च्छागतमपाहरत् । मन्दप्रतापं तं सूतः शीघ्रमाजिविहायसः ॥ शिशुपालवधम् १९.६ ॥ |
| दिशामधीशांश्चतुरो यतः सुरानपास्य तं रागहृताः सिषेविरे । अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं श्रियः ॥ शिशुपालवधम्  १.४४ ॥ |
| दिशि दिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बराम् । स परमपरः क्षीरोदन्वान्यदीयमुदीयते मथितुरमृतं खेदच्छेदि प्रमोदनमोदनम् ॥ नैषधीयचरितम् २२.१५३ ॥ |
| दिष्टान्तमाप्स्यति भवानपि पुत्रशोकादन्ते वयस्यहमिवेति तमुक्तवन्तं । आक्रान्तपूर्वमिव मुक्तविषं भुजंगं प्रोवाच कोसलपतिः प्रथमापराद्धः ॥ रघुवंशम् ८.७९ ॥ |
| दीक्षामौञ्जिविवाहमुण्डनमपूर्वं देवतीर्थेक्षणं संन्यासाग्निपरिग्रहौ नृपतिसंन्दर्शाभिषेको गमम् । चातुर्मास्यसमावृती श्रवणयोर्वेधं परीक्षां त्यजेद्- वृद्धत्वास्तशिशुत्व इज्यसितयोर्न्यूनाधिमासे तथा ॥ मुहूर्तचिन्त.४७॥ |
| दीना दीन-मुखैः सदैव शिशुकैराकृष्ट-जीर्णाम्बरा क्रोशद्भिः क्षुधितैर्निरन्न-विधुरा दृश्या न चेद्गेहिनी। याच्ञा-भङ्ग-भयेन गद्गद-गल-त्रुट्यद्-विलीनाक्षरं को देहीति वदेत्स्व-दग्ध-जठरस्यार्थे मनस्वी पुमान्॥॥ वैराग्यशतकम् २१ ॥ |
| दीना दीनमुखैः स्वकीयशिशुकैराकृष्टजीर्णाम्बरा क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्येत चेद्गेहिनी । यान्चाभङ्गभयेन गद्गदगलत्रुट्यद्विलीनाक्षरं को देहीति वदेत् स्वदग्ध जठरस्यार्थे मनस्वी पुमान् ॥ पुरुषार्थोपदेशः-17॥ |
| दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी आदर्शः शिक्षितानां सुचरितनिकषः शील वेलासमुद्रः। सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्वो ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये॥ (मृच्छकटिकम् १.४८) |
| दीनेषु सत्स्वपि कृताफलवित्तरक्षैर्यक्षैरदर्शि न मुखं त्रपयैव भैम्याम् । ते जानते स्म सुरशाखिपतिव्रतां किं तां कल्पवीरुधमधिक्षिति नावतीर्णाम् ॥ नैषधीयचरितम् ११.१४ ॥ |
| दीपकैकावलीयोगान्मालादीपकमुच्यते । स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥ चन्द्रालोकः ५.८९ ॥ |
| दीपनिर्वाणगन्धं च सुहृद्वाक्यमरुन्धतीम् । न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः  ॥ नीतिसंग्रहस्य मित्र-१.७७ ॥ |
| दीपमुद्द्योतयेद्यावत्तावदभ्युदितो रविः । इष्यमाणविरुद्धार्थ-सम्प्राप्तिस्तु विषादनम् ॥ चन्द्रालोकः ५.५० ॥ |
| दीपमुद्द्योतयेद्यावत्तावन्निर्वाण एव सः । क्रियादिभिरनेकस्य तुल्यता तुल्ययोगिता ॥ चन्द्रालोकः ५.५१ ॥ |
| दीपयन्नथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः । हेमकुम्भ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥ किरातार्जुनीयम् ९.२३ ॥ |
| दीपितस्त्वमनुभावसम्पदा गौरवेण लघयन्महीभृतः । राजसे मुनिरपीह कारयन्नाधिपत्यमिव शातमन्यवं ॥ किरातार्जुनीयम् १३.३८ ॥ |
| दीपितस्मरमुरस्यपपीडं वल्लभे घनमभिष्वजमाने । वक्रतां न ययतुः कुचकुम्भौ सुभ्रुवः कठिनतातिशयेन ॥ शिशुपालवधम् १०.४७ ॥ |
| दीप्तिनिर्जितविरोचनादयं गां विरोचनसुतादभीप्सतः । आत्मभूरवरजाखिलप्रजः स्वर्पतेरवरजत्वमाययौ ॥ शिशुपालवधम् १४.७४ ॥ |
| दीर्घा वन्दनमालिका विरचिता हृष्ट्यैव नेन्दीवरैः पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः । दत्तः स्वेदमुचा पयोधरयुगे नार्घ्यो न कुम्भाम्भसा स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् ॥ अमरुशतकम्-४०॥ |
| दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः । यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥ मेघदूतम्, पूर्वमेघः ३१॥ |
| दीर्घेष्वमी नियमिताः पटमण्डपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः । वक्त्रोष्मणा मलिनयन्ति पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥ रघुवंशम् ५.७३ ॥ |
| दुःखेन भोजयितुमाशयिता शशाक तुङ्गाग्रकायमनमन्तमनादरेण । उत्क्षिप्तहस्ततलदत्तविधानपिण्ड-स्नेहस्रुति स्नपितबाहुरिभाधिराजं ॥ शिशुपालवधम् ५.५१ ॥ |
| दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः । केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनंजयस्त्वम् ॥ किरातार्जुनीयम् ३.४७ ॥ |
| दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः। वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः॥ कुमारसंभवम् ७.७३॥ |
| दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः । वेलासाक्शं स्फुटपेहराजिर्नवैरुदन्वानिव चन्द्रपादैः ॥ रघुवंशम् ७.१९ ॥ |
| दुग्धं त्याज्यं पूर्वमेव त्रिरात्रं क्षौरं त्याज्यं पञ्चरात्रं च पूर्वम् । क्षौद्रं तैलं वासरेऽस्मिन्वमिश्च त्याज्यं यत्नाद्भूमिपालेन नूनम् ॥ मुहूर्त.यात्राप्रकरणम् ९६॥ |
| दुधोह गां स यज्ञाय सस्याय मघवा दिवम् । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं ॥ रघुवंशम् १.२६ ॥ |
| दुरन्त 'मोहम्मद' मोहमर्दन, पुरा पुरारातिमयी चकार या । चितोड़नाम्नी किल तत्र वर्तते, पुरी सुधीरोरुण-वृन्दवन्दिता ॥ प्रतापविजयः-२९ ॥ |

| |
|---|
| दुराराधाश्चामी तुरगचलचिताः क्षितिभुजो वयं तु स्थूलेच्छा सुमहति पदे बद्धमनसः । जरा देहं, मृत्युर्हरति दयितं जीवितमिदं सखे! नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥ पुरुषार्थोपदेशः-72॥ |
| दुराराध्याश्चामी तुरग-चल-चित्ताः क्षितिभुजो वयं तु स्थूलेच्छाः सुमहति फले बद्ध-मनसः । जरा देहं मृत्युर्हरति दयितं जीवितमिदं सखे नान्यच्छ्रेयो जगति विदुषेऽन्यत्र तपसः ॥ वैराग्यशतकम् ७७ ॥ |
| दुरितैरपि कर्तुं आत्मसात्प्रयतन्ते नृपसूनवो हि यत् । तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया ॥ रघुवंशम् ८.२ ॥ |
| दुरीक्षतामभजत मन्मथस्तथा यथा पुरा परिचितदाहधार्ष्ट्यया । ध्रुवं पुरः सशरममुं तृतीयया हरोऽपि न व्यसहत वीक्षितुं दृशा ॥ शिशुपालवधम् १७..१० ॥ |
| दुरुद्वहाः क्षणमपरैस्तदन्तरे रणश्रवादुपचयमाशु बिभ्रति । महीभुजां महिमभृतां न संममुर्मुदोऽन्तरावपुषि बहिश्च कञ्चुकाः ॥ शिशुपालवधम् १७..२२ ॥ |
| दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् । मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ नीतिशतकम्५३ ॥ |
| दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् । मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ नीतिसंग्रहस्य मित्र-१.९० ॥ |
| दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् । मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥ नीतिसंग्रहस्य मित्र-१.८३ ॥ |
| दुर्जनेन समं सख्यं वैरं चापि न कारयेत् । उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ नीतिसंग्रहस्य मित्र-१.८१ ॥ |
| दुर्जातबन्धुरयमृक्षहरीश्वरो मे पौलस्त्य एष समरेषु पुरः प्रहर्ता । इत्यादृतेन कथितौ रघुनन्दनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ रघुवंशम् १३.७२ ॥ |
| दुर्दान्तमुत्पकृत्य निरस्तसादिनं सहासहाकारमलोकयज्जनः । पर्याणतः स्रस्तमुरोविलम्बिनस्तुरङ्गमं प्रद्रुतमेकया दिशा ॥ शिशुपालवधम् १२.२२ ॥ |
| दुर्लभं दिगधिपैः किमममीभिस्तादृशं कथमहो मदधीनम् । ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ॥ नैषधीयचरितम् ५.८ ॥ |
| दुर्वचं तदथ मा स्म भून्मृगस्त्वावसौ यदकरिष्यदोजसा । नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्त्रिणा ॥ किरातार्जुनीयम् १३.४९ ॥ |
| दुष्क्रम-ग्राम्य-सन्दिग्धास्त्रयो दोषाः क्रमादमी । त्वद्भक्तः कृष्ण! गच्छेयं नरकं स्वर्गमेव वा ॥ चन्द्रालोकः२.३२ ॥ |
| दुष्टे योगे हेम चन्द्रे च शङ्खं धान्यं तिथ्यर्द्धे तिथौ तण्डुलांश्च । वारे रत्नं भे च गां हेम नाड्यां दद्यात्सिन्धूत्थं च तारासु राजा ॥ मुहूर्त.संक्रान्तिप्रकरणम् १८॥ |
| दूते नलश्रीभृति भाविभावा कलङ्किनीयं जनि मेति नूनम् । न संव्यधान्नैषाधकायमायं विधिः स्वयंदूतमिमां प्रतीन्द्रम् ॥ नैषधीयचरितम् ८.१६ ॥ |
| दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषाधप्रधानम् । स भीमभूमीपतिराजधानीं लक्षीचकाराथ रथस्य तस्य ॥ नैषधीयचरितम् ६.१ ॥ |
| दूनास्तेऽरिबलादूना निरेभा बह्व मेनिरे । भीताः शितशराभीताः शंकरं तत्र शंकरं ॥ किरातार्जुनीयम् १५.३१ ॥ |
| दूरं गौरगुणैरहंकृतिभृतां जैत्राङ्ककारे चरत्येतद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि । धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते पीयूषस्रवकैतवाद्धृतदरः शीतद्युतिः स्विद्यति ॥ नैषधीयचरितम् १२.८४ ॥ |
| दूरतः स्तुतिरवाग्विषयस्ते रूपमस्मदभिधा तव निन्दा । तत्क्षमस्व यदहं प्रलपामीत्युक्तिपूर्वमयमेतदवोचत् ॥ नैषधीयचरितम् २१.५३ ॥ |
| दूरस्थितैर्वस्तुनि रक्तनीले विलोक्यते केवलनीलिमा यत् । शशस्य तिष्ठन्नपि पृष्ठलोम्नां तन्नः परोक्षः खलु रागभागः ॥ नैषधीयचरितम् २२.८३ ॥ |
| दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला । आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्कलेखा ॥ रघुवंशम् १३.१५ ॥ |
| दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किञ्चिन् नतभ्रूलतम् । मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ अमरुशतकम्-४४॥ |
| दूरादेव चमूर्भल्लैः कुमारो हन्ति स स्म याः । न पुनः सांयुगीं ताः स्म कुमारो हन्ति सस्मयाः ॥ शिशुपालवधम् १९.१७ ॥ |
| दूरारूढस्तिमिरजलधेर्वाडवश्चित्रभानुर्भानुस्ताम्यद्वनरुहवनीकेलिवैहासिकोऽयम् । न स्वात्मीयं किमिति दधते भास्वरश्वेतिमानं द्यामद्यापि द्युमणिकरणश्रेणयः शोणयन्ति ॥ नैषधीयचरितम् १९.६५ ॥ |
| दूरेऽपि तत्तावकगानपानाल्लब्धावधिः स्वादुरसोपभोगे । अवज्ञयैव क्षिपति क्षपायाः पतिः खलु स्वान्यमृतानि भासः ॥ नैषधीयचरितम् २२.१११ ॥ |
| दूरोत्क्षिप्तक्षिप्रचक्रेण कृत्तं मत्तो हस्तं हस्तिराजः स्वमेव । भीमं भूमौ लोलमानं सरोषः पादेनासृक्पङ्कपेषं पिपेष ॥ शिशुपालवधम् १८.४५ ॥ |
| दूर्वाग्रजाग्रत्पुलकावलिं तां नलाङ्गमङ्गाद्भृशमुल्लसन्तीम् । मानेन मन्ये नमिताननना सा सासूयमालोकत पुष्पमालाम् ॥ नैषधीयचरितम् १४.५ ॥ |
| दृगुपहत्यपमृत्युविरूपताः शमयतेऽपरनिर्जरसेविता । अतिशयान्ध्यवपुः क्षतिपाण्डुताः स्मर भवन्ति भवन्तमुपासितुः ॥ नैषधीयचरितम् ४.८६ ॥ |
| दृग्गोचरोऽभूदथ चित्रगुप्तः कायस्थ उच्चैर्गुण एतदीयः । ऊर्ध्वं तु पत्त्रस्य मषीद एको मषेर्ददञ्चोपरि पत्त्रमन्यः ॥ नैषधीयचरितम् १४.६६ ॥ |
| दृशा नलस्य श्रुतिचुम्बिनेषुणा करेऽपि चक्रच्छलनम्रकार्मुकः । स्मरः पराङ्गैरनुकल्प्य धन्वितां जनीमनङ्गः स्वयमार्दयत्ततः ॥ नैषधीयचरितम् १२.१०९ ॥ |
| दृशापि सालिङ्गितमङ्गमस्य जग्राह नाग्रावगताङ्गहर्षैः । सङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्वदृष्टम् ॥ नैषधीयचरितम् ८.१ ॥ |
| दृशास्य निर्दिश्य नरेश्वरान्तरं मधुस्वरा वक्तुमधीश्वरा गिराम् । अनूपयामास विदर्भजाश्रुती निजास्यचन्द्रस्य सुधाभिरुक्तिभिः ॥ नैषधीयचरितम् १२.६९ ॥ |
| दृशोरपि न्यस्तमिवास्त राज्ञां रागाद्दृगम्बुप्रतिबिम्बिमाल्यम् । नृपस्य तत्पीतवतोरिवाक्ष्णोः प्रालम्ब्यमालम्बनयुक्तमन्तः ॥ नैषधीयचरितम् १४.५८ ॥ |

| |
|---|
| दृशोरमङ्गल्यमिदं मिलज्जलं करेण तावत्परिमार्जयामि ते । अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोमिः सममात्ममौलिना ॥ नैषधीयचरितम् ९.१०६ ॥ |
| दृशोर्द्वयी ते विधिनास्ति वञ्चिता मुखस्य लक्ष्मीं तव यन्न वीक्षते । असावपि श्वस्तदिमां नलानने विलोक्य साफल्यमुपैतु जन्मनः ॥ नैषधीयचरितम् ९.६७ ॥ |
| दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलं च तस्याः । इदं प्रमोदाद्भुतसंभृतेन महीमहेन्द्रो मनसा जगाद ॥ नैषधीयचरितम् ७.९ ॥ |
| दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम् । न चेत्कृतः स्यादनयोः प्रयाणे विघ्नः श्रवःकूपनिपातभीत्या ॥ नैषधीयचरितम् ७.३४ ॥ |
| दृशौ मृषा पातकिनो मनोरथाः कथं पृथू वामपि विप्रलेभिरे । प्रियश्रियः प्रेक्षणघाति पातकं स्वमश्रुभिः क्षालयतं शतं समाः ॥ नैषधीयचरितम् ९.९१ ॥ |
| दृश्यतामयमनोकहान्तरे तिग्महेतिपृतनाभिरन्वितः । साहिवीचिरिव सिन्धुरुद्धतो भूपतिः समयसेतुवारितः ॥ किरातार्जुनीयम् १३.७० ॥ |
| दृषटोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान । क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ॥ शिशुपालवधम् ४.१७॥ |
| दृष्टः कातरनेत्रया चिरतरं बद्धाञ्जलिं याचित्पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः । इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ अमरुशतकम्-८१॥ |
| दृष्टदोषमपि तन्न सोऽत्यजत्सङ्गवस्तु भिषजां अनाश्रवः । स्वादुभिस्तु विषयैर्हृतस्ततो दुःखं इन्द्रियगणो निवार्यते ॥ रघुवंशम् १९.४९ ॥ |
| दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः । राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत् ॥ रघुवंशम् ११.४७ ॥ |
| दृष्टान्तश्चेद्भवन्मूर्तिस्तन्मृष्टा दैवदुर्लिपिः । जाता चेत्प्राक्प्रभा भानोस्तर्हि याता विभावरी ॥ चन्द्रालोकः ५.५७ ॥ |
| दृष्टावदानाद्व्यथतेऽरिलोकः प्रध्वंसं एति व्यथिताच्च तेजः । तेजोविहीनं विजहाति दर्पः शान्तार्चिषं दीपमिव प्रकाशः ॥ किरातार्जुनीयम् १७.१६ ॥ |
| दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे ।प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥ कुमारसंभवम् ३.४३ ॥ |
| दृष्टिस्तृणीकृतजगत्त्रयसत्वसारा धीरोद्धता नमयतीव गतिर्धरित्रीम् । कौमारकेऽपि गिरिवद्गुरुतां दधानो वीरो रसः किमयमेत्युत दर्प एव ॥ (उत्तररामचरितम् ६.१९) |
| दृष्टो निजां तावदियन्त्यहानि जयन्नयं पूर्वदशां शशाङ्कः । पूर्णस्त्वदास्येन तुलां गतश्चेदनन्तरं द्रक्ष्यसि भङ्गमस्य ॥ नैषधीयचरितम् २२.१३२ ॥ |
| दृष्ट्वा दृश्यान्याचरणीयानि विधाय प्रेक्षाकारी याति पदं मुक्तमपायैः । सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां यश्चोपास्ति साधु विधेयं स विधत्ते ॥ किरातार्जुनीयम् १८.२८ ॥ |
| दृष्ट्वेव निर्जतकलापभरामधस्ताद्व्याकीर्णमान्यकबरां कबरीं तरुण्याः । प्रादुद्रुवत्सपदि चन्द्रकवान्द्रुमाग्रात्संघर्षिणा सह गुणाभ्यधिकैर्दुरापम् ॥ शिशुपालवधम् ५.१९ ॥ |
| दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चाद् उपेत्यादराद् एकस्या नयने पिद्याय विहितक्रीडानुबन्धच्छलः । ईषद्वक्रिमकन्धरः सपुलकः प्रेमोल्लसन्मानसाम् अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ अमरुशतकम्-१६॥ |
| देवः पतिर्विदुषि नैष धराजगत्या निर्णीयते न किमु न व्रियते भवत्या । नायं नलः खलु तवातिमहानलाभो यद्येनमुज्झसि वरः कतरः परस्ते ॥ नैषधीयचरितम् १३.३४ ॥ |
| देवः स्वयं वसति तत्र किल स्वयंभूर्न्यग्रोधमण्डलतले हिमशीतले यः । स वां विलोक्य निजशिल्पमनन्यकल्पं सर्वेषु कारुषु करोतु करेण दर्पम् ॥ नैषधीयचरितम् ११.२९ ॥ |
| देवगुरौ वा शशिनि तनुस्थे वासरनाथे रिपुभवनस्थे । पञ्चमगेहे हिमकरपुत्रः कर्मणि सौरिः सुहृदि सितश्च ॥ मुहूर्त.यात्राप्रकरणम् ६८॥ |
| देवगृहाद्वा गुरुसदनाद्वा स्वगृहान्मुख्यकलत्रगृहाद्वा । प्राश्य हविष्यं विप्रानुमतः पश्यच्छृण्वन्मङ्गलमेयात् ॥ मुहूर्त.यात्राप्रकरणम् ९१॥ |
| देवद्व्यङ्कर्तवोऽष्टाष्टौ नाड्योऽङ्काः खनृपाः क्रमात् । वर्ज्याः सङ्क्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिन्दिताः ॥ मुहूर्त.विवाहप्रकरणम् ८०॥ |
| देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पति- स्त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि । ऐन्द्रावैष्णमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥ (उत्तररामचरितम् ५.२७) |
| देवाकानिनि कावादे वाहिकास्वस्वकाहि वा । काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥ किरातार्जुनीयम् १५.२५ ॥ |
| देवानियं निषाधराजरुचस्त्यजन्ती रूपादरज्यत नले न विदर्भसुभ्रूः । जन्मान्तराधिगतकर्मविपाकजन्मैवोन्मीलति क्वचन कस्यचनानुरागः ॥ नैषधीयचरितम् १३.३९ ॥ |
| देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः । मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात्पृष्ठविदिक्छुभो भवेत् ॥ मुहूर्त.वास्तुप्रकरणम् १९॥ |
| देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपप्य। शापावसाने प्रतिपन्नमूर्तेर्ययाचिरे पञ्चशरस्य सेवाम्॥ कुमारसंभवम् ७.९२॥ |
| देवी कथंचित्खलु तामदेवद्रीचीं भवन्तीं स्मितसिक्तसृक्का । आह स्म मां प्रत्यपि ते पुनः का शङ्का शशाङ्कादधिकाष्यबिम्बे ॥ नैषधीयचरितम् १४.४ ॥ |
| देवी च ते च जगदुर्जगदुत्तमाङ्गरत्नाय ते कथय कं वितराम कामम् । किंचित्त्वया नहि पतिव्रतया दुरापं भस्मास्तु यस्तव बत व्रतलोपमिच्छुः ॥ नैषधीयचरितम् १४.९३ ॥ |
| देवी पवित्रितचतुर्भुजवामभागा वागालपत्पुनरिमां गरिमाभिरामाम् । अस्यारिनिष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम् ॥ नैषधीयचरितम् ११.६६ ॥ |
| देवेन तेनैष च काश्यपिश्च साम्यं समीक्ष्योभयपक्षभाजौ । द्विजाधिराजौ हरिणाश्रितौ च युक्तं नियुक्तौ नयनक्रियायाम् ॥ नैषधीयचरितम् २२.९१ ॥ |
| देव्याः करे वरणमाल्यमथार्पये वा यो वैरसेनिरिह तत्र निवेशयेति । सैषा मया मखभुजां द्विषती कृता स्यात्स्वस्मै तृणाय तु विहन्मि न बन्धुरत्नम् ॥ नैषधीयचरितम् १३.५२ ॥ |
| देव्याः श्रुतौ नेति नलार्धनाम्नि गृहीत एव त्रपया निपीता । अथाङ्गुलीरङ्गुलिभिर्मृशन्ती दूरं सा नमयांचकार ॥ नैषधीयचरितम् १४.३२ ॥ |

| |
|---|
| देव्यापि दिव्याऽनु तनूः प्रकाशीकृता मुदश्चक्रभृतः सृजन्ती । अनिह्नुतैस्तामवधार्य चिह्नैस्तद्वाचि बाला शिथिलादभूताभूत् ॥ नैषधीयचरितम् १४.६९ ॥ |
| देव्याभ्यधायि भव भीरु धृतावधाना भूमीभुजो भजत भीमभुवो निरीक्षाम् । आलोकितामपि पुनः पिबतां दृशैनामिच्छा विगच्छति न वत्सरकोटिभिर्वा ॥ नैषधीयचरितम् ११.२४ ॥ |
| देशवंशजनैकोऽपि कायवाकचेतसां चयैः। येन नोपकृतः पुंसा तस्य जन्म निरर्थकम् ॥ नीतिसंग्रहस्य मित्र-०.११ ॥ |
| देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः । त्वं वसन्हृदये तस्याः साक्षात्पञ्चेषुरीक्ष्यसे ॥ चन्द्रालोकः ५.११४ ॥ |
| देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननैर् यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि । उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णां दृशं तामाशां पथिकस्तथापि किमपि ध्यायंश्चिरं वीक्षते ॥ अमरुशतकम्-९३॥ |
| देहिनेव यशसा भ्रमतोर्व्यां पाण्डुरेण रणरेणुभिरुच्चैः । विष्णुना जनयितुर्भवताभून्नाम विष्णुयशसश्च सदर्थम् ॥ नैषधीयचरितम् २१.९३ ॥ |
| दैत्यभर्तुरुदरान्धुनिविष्टां शक्रसंपदमिवोद्धरतस्ते । पातु पाणिशृणिपञ्चकमस्माञ्छिन्नरज्जुनिभलग्नतदन्त्रम् ॥ नैषधीयचरितम् २१.६१ ॥ |
| दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः । हेतिभिश्चेतनावद्भिरुदीरितजयस्वनं ॥ रघुवंशम् १०.१२ ॥ |
| दैत्येज्यो ह्यभिमुखदक्षिणे यदि स्याद् गच्छेयुर्न हि शिशुगर्भिणीनवोढाः । बालश्चेद्व्रजति विपद्यते नवोढा चेद्वन्ध्या भवति च गर्भिणी त्वगर्भा ॥ मुहूर्त.द्विरागमनप्रकरणम् २॥ |
| दोर्मूलमालोक्य कचं रुरुत्सोस्ततः कुचौ तावनुलेपयन्त्याः । नाभीमथैष श्लथवाससोऽनु मिमील दिक्षु क्रमकृष्टचक्षुः ॥ नैषधीयचरितम् ६.२ ॥ |
| दोलारोहेऽर्कभात्पञ्चशरपञ्चेषुसप्तभैः । नैरुज्यं मरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः ॥ मुहूर्त.संस्कारप्रकरणम् १४॥ |
| दोषमापतितं स्वान्ते प्रसरन्तं विश्रृङ्खलम् । निवारयति यस्त्रेधा दोषाङ्कुशशन्ति तम् ॥ चन्द्रालोकः२.४० ॥ |
| दोषे गुणत्वं तनुते दोषत्वं वा निरस्यति । भवन्तमथवा दोषं नयत्यत्याज्यतामसौ ॥ चन्द्रालोकः२.४१ ॥ |
| दौर्मन्त्र्यान् नृपतिर्विनश्यति, यतिः सङ्गात् सुतो लालनाद् विप्रोऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात् । ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात् मैत्री प्रार्थनया समृद्धिरनयात् त्यागात् प्रमादाद् धनम् ॥ पुरुषार्थोपदेशः -7॥ |
| दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनात्- विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् । ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयान् मैत्री चाप्रणयात्समृद्धिरनयात्त्यागप्रमादाद्धनम् ॥ नीतिशतकम्४२ ॥ |
| द्यां निरुन्धदतिनीलघनाभं ध्वान्तमुद्यतकरेण पुरस्तात् । क्षिप्यमाणमसितेतरभासा शम्भुनेव करिचर्म चकासे ॥ किरातार्जुनीयम् ९.२० ॥ |
| द्यामन्तरा वसुमतीमपि गाधिजन्मा यद्यन्यमेव निरमास्यत नाकलोकम् । चारुः स यादृगभविष्यदभूद्विमानैस्तादृक्तदभ्रमवलोकितुमागतानाम् ॥ नैषधीयचरितम् ११.३ ॥ |
| द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः । उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥ किरातार्जुनीयम् ८.३९ ॥ |
| द्युवियद्गामिनी तार- संरावविहतश्रुतिः । हैमीष्माला शुशुभे विद्युतामिव संहतिः ॥ किरातार्जुनीयम् १५.४३ ॥ |
| द्यूनाम्बरे यदैकोऽपि परांशस्थो ग्रहो गृहम् । अब्दान्तः परहस्तथं कुर्याच्चेद्वर्णपोऽबलः ॥ मुहूर्त.वास्तुप्रकरणम् २५॥ |
| द्यूने चन्द्रे समुदयगेऽर्के जीवे शुक्रे विदि धनसंस्थे । ईदृग्योगे चलति नरेशो जेता शत्रून् गरुड इवाहीन् ॥ मुहूर्त.यात्राप्रकरणम् ६२॥ |
| द्यौरुन्ननामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर्मयूखैः । क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः ॥ किरातार्जुनीयम् १६.३५ ॥ |
| द्रवत्वात्सर्वलोहानां निमित्तादमृगपक्षिणाम् । भयाल्लोभाच्च मूर्खाणां सङ्गतः दर्शनात्सताम् ॥ नीतिसंग्रहस्य मित्र-१.९४ ॥ |
| द्रागुपाह्रियत तस्य नृपैतद्दृष्टिदानबहुमानकृतार्थैः । स्वस्य दिश्यमथ रत्नमपूर्वं यत्नकल्पितगुणाधिकचित्रम् ॥ नैषधीयचरितम् २१.३ ॥ |
| द्राग्दृष्टयः क्षोणिभुजाममुष्मीन्नाश्चर्यपर्युत्सुकिता निपेतुः । अनन्तरं दन्तुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा दृगन्ताः ॥ नैषधीयचरितम् १०.४ ॥ |
| द्राधीयांस संहताः स्थेमभाजश्चारूदग्रास्तीक्ष्णतामत्यजन्तः । दन्ता दन्तैराहताः सामजानां भङ्गं जग्मुर्न स्वयं सामजाताः ॥ शिशुपालवधम् १८.३३ ॥ |
| द्रुततरकरदक्षाः क्षिप्तवैशखशैले दधति दधनि धीरानारवान्वारिणीव । शशिनमिव सुरौघाःसारमुद्धर्तुमेते कलशिमुदधिगुर्वी वल्लवा लोडयन्ति ॥ शिशुपालवधम् ११.८ ॥ |
| द्रुतद्रवद्रथचरणक्षतक्षमातलोल्लसद्बहुलरजोऽवगुण्ठितं । युगक्षयक्षणनिरवग्रहे जगत्पयोनिधेर्जल इव मग्नमाबभौ ॥ शिशुपालवधम् १७..६० ॥ |
| द्रुतपदमभियातुं इच्छतीनां गमनपरिक्रमलाघवेन तासां । अवनिषु चरणैः पृथुस्तनीनामलघुनितम्बतया चिरं निषेदे ॥ किरातार्जुनीयम् १०.२ ॥ |
| द्रुतपदमिति मा वयस्य यासिर्नन्तु सुतनं परिपालयानुयान्तीम् । नहि न विदितखेदमेदतीयस्तनजघनोद्वहने तवापि चेतः ॥ शिशुपालवधम् ७.१२ ॥ |
| द्रुतमध्वनन्नुपरि पाणिवृत्तयः पणवा इवाश्वचरणक्षता भुवः । ननृतुश्च वारिधरधीरवारणध्वनिहृष्टकूजितकलाः कलापिनः ॥ शिशुपालवधम् १३.५ ॥ |
| द्रुतविगमितविप्रयोगचिह्नामपि तनयां नृपतिः पदप्रणम्राम् । अकलयदसमाशुगाधिमग्नां झटिति पराशयवेदिनो हि विज्ञाः ॥ नैषधीयचरितम् ४.११९ ॥ |
| द्रुतशातकुम्भनिभमंशुमतो वपुरर्धमग्नवपुषः पयसि । रुरुचे विरिञ्चिनखभिन्नबृहद्दण्डकैकतरखण्डमिव ॥ शिशुपालवधम् ९.९ ॥ |
| द्रुतसमीरचलैः क्षणलक्षितव्यवहिता विटपैरिव मञ्जरी । नततमालनिभस्य नभस्तरोरचिररोचिररोचत वारिदैः ॥ शिशुपालवधम् ६.२८ ॥ |
| द्रुतहेमरुचः खगाः खगेन्द्रादलघूदीरितनादमुत्पतन्तः । क्षणमैक्षिषतोच्चकैश्चमूभिर्ज्वलतः सप्तरुचेरिव स्फुलिङ्गाः ॥ शिशुपालवधम् २०.५३ ॥ |
| द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि । न च प्ररोहाभिमुखोऽपिदृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः॥ कुमारसंभवम् ५.६० ॥ |

| |
|---|
| द्रोणः स तत्र वितरिष्यति भाग्यलभ्यसौभाग्यकाक्रमणमयीमुपदां गिरिस्ते । तद्द्वीपदीप इव दीप्तिभिरौषधीनां चूडामिलज्जलदकज्जलदर्शनीयः ॥ नैषधीयचरितम् ११.६९ ॥ |
| द्वजाग्रधामा ददृशे थ शौरेः संक्रान्तमूर्तिर्मणिमेदिनीषु । फणावतस्त्रासयितुं रसायास्तलं विविक्षुरिव पन्नगारिः ॥ शिशुपालवधम्  ३.२२ ॥ |
| द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः । कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ कुमारसंभवम् ५.७१ ॥ |
| द्वयन्त्ये नवांऽऽशे द्विगुणे शिवाहौ शुक्र: कुनागे द्विनगेऽग्निरूपे । वेदाम्बरे पञ्चनिधौ गजेषौ नन्देशयोर्भानुरसे शिवाग्नौ ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ३ ॥ |
| द्वात्रिंशद् द्वादशैकः षट्सर्वसंकलितध्वनेः । भेदाः स्युरेकपञ्चाशत्संभिन्नास्तु सहस्रशः ॥ चन्द्रालोकः७.१२ ॥ |
| द्वारि चक्षुरधिपाणि कपोलौ कीवितं त्वयि कुतः कलहोऽस्याः । कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ किरातार्जुनीयम् ९.४३ ॥ |
| द्विकुण्डली वृत्तसमाप्तिलिप्या कराङ्गुली काञ्चनलेखनीनाम् । कैश्यं मषीणां स्मितभा कठिन्याः काये यदीये निरमायि सारैः ॥ नैषधीयचरितम् १०.८७ ॥ |
| द्विग्द्वारभे लग्नगते प्रशस्ता यात्राऽर्थदात्री जयकारिणी च । हानिं विनाशं रिपुतो भयं च कुर्यात्तथादिक्प्रतिलोमलग्ने ॥ मुहूर्त.यात्राप्रकरणम् ४७॥ |
| द्विजपतिग्रसनाहितपातकप्रभवकुष्ठसितीकृतविग्रहः । विरहिणीवदनेन्दुजिघत्सया स्फुरति राहुरयं न निशाकरः ॥ नैषधीयचरितम् ४.७४ ॥ |
| द्विजा झषालिकर्कटास्ततो नृपा विशोऽङ्घ्रिजाः । वरस्य वर्णतोऽधिका वधूर्न शस्यते बुधैः ॥ मुहूर्त.विवाहप्रकरणम् २२॥ |
| द्वित्रैरेव तमस्तमालगहनग्रासे दवीभावुकैरुस्रैरस्य सहस्रपत्त्रसदसि व्यश्राणि घस्रोत्सवः । घर्माणां रयचुम्बितं वितनुते तत्पिष्टपिष्टीकृतक्ष्मादिग्व्योमतमोघमोघमधुना मोघं निदाघद्युतिः ॥ नैषधीयचरितम् १९.६४ ॥ |
| द्विधा त्रिधा चतुर्धा च तमेकमपि शत्रवः । पश्यन्तः स्पर्धया सद्यः स्वयं पञ्चत्वमाययुः ॥ शिशुपालवधम् १९.११७ ॥ |
| द्विधा प्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव । संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन॥ कुमारसंभवम् ७.९०॥ |
| द्विरदवलक्षमलक्ष्यत स्फुरितभृङ्गमृच्छवि केतकं । घनघनौघविघट्टनया दिवः कृशसिखं शशिखण्डमिव च्युतम् ॥ शिशुपालवधम् ६.३४ ॥ |
| द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः । प्रसहेत रणे तवानुजान्द्विषतां कः शतमन्युतेजसः ॥ किरातार्जुनीयम् २.२३ ॥ |
| द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् । जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ किरातार्जुनीयम् २.१७ ॥ |
| द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः । न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ॥ किरातार्जुनीयम् २.८ ॥ |
| द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम् । इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डि तुरंगमैः स्थली ॥ नैषधीयचरितम् १.७२ ॥ |
| द्विषद्विशसनच्छेदनिरस्तोरुयुगोऽपरः । सिक्तश्चास्त्रैरुभयथा बभूवारुणविग्रहः ॥ शिशुपालवधम् १९.५३ ॥ |
| द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः । परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥ किरातार्जुनीयम् १.४१ ॥ |
| द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः । स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ किरातार्जुनीयम् १.३ ॥ |
| द्विषां सम्पदमाच्छिद्य यः शत्रून्समपूरयत् । अस्थानस्थसमासं न विद्वज्जनमनोरमम् ॥ चन्द्रालोकः२.२४ ॥ |
| द्वीपं द्विपाधिपति मन्दपदे प्रशास्ति प्लक्षोपलक्षितमयं क्षितिपस्तदस्य । मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या साक्षाद्यथैव कमला यमलार्जुनारेः ॥ नैषधीयचरितम् ११.७३ ॥ |
| द्वीपस्य पश्य दयितं द्युतिमन्तमेनं क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण । यन्मण्डले स परिमण्डलसंनिवेशः पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः ॥ नैषधीयचरितम् ११.४९ ॥ |
| द्वीपस्य शाल्मल इति प्रथितस्य नाथः पाथोधिना वलयितस्य सुराम्बुनायम् । अस्मिन्वपुष्मति न विस्मयसे गुणाब्धौ रक्ता तिलप्रसवनासिकि नासि किं वा ॥ नैषधीयचरितम् ११.६७ ॥ |
| द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापे सुरभूमिभूपैः । तत्कालमालम्बि न केन यूना स्मरेषुपक्षानिलतूललीला ॥ नैषधीयचरितम् १०.२६ ॥ |
| द्वीशात्तोयाद्वासवात्पौष्णभाच्च ब्राह्मात्पुष्यादर्यमर्क्षाद्युगर्क्षैः । स्यादुत्पातो मृत्युकाणौ च सिद्धिर्वारेऽर्कादये तत्फलं नामतुल्यम् ॥ मुहूर्तचिन्त.३० ॥ |
| द्वीशाद्यपादत्रयजा कन्या देवरसौख्यदा । मूलान्त्यपादसार्पाद्यपादजाते तयोः शुभौ ॥ मुहूर्त.विवाहप्रकरणम् २०॥ |
| द्वेधा कथं कथय ते कृपया कृपा यत् मेधाविनामनुपमो विहितः सवेधाः । प्रातःस्तवम्प्रकुरुतेऽनुदिनानि मातः ! जातः कथं न शिशुरेष तवाङ्क तातः ॥ प्रतापविजयः-५ ॥ |
| द्वेष्याकीर्तिकलिन्दशैलसुतया नद्यास्य यद्दोर्द्वयी कीर्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे । तत्तस्मिन्विनिमज्ज्य बाहुजभटैरारम्भि रम्भापरीरम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥ नैषधीयचरितम् १२.१२ ॥ |
| द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधं । त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ रघुवंशम् १.२८ ॥ |
| द्वौ द्वौ ज्ञभृग्वोः पञ्चेन्दौ रवौ सार्धत्रयो गुरौ । रामा मन्दागुकेत्वारे सार्धैकैकं विशोपकाः ॥ मुहूर्त.विवाहप्रकरणम् ९२॥ |
| द्वौ विवक्षितवाच्यस्य लक्ष्यालक्ष्यक्रमात्मकौ । चत्वारिंशद्युतैकेन भेदाः षट् चानयोः क्रमात् ॥ चन्द्रालोकः७.४ ॥ |
| द्वौ स्तः सहचरा चारुविरुद्धान्योन्यसंगती । ध्वाङ्क्षाः सन्तश्च तनयं स्वं परं च न जानते ॥ चन्द्रालोकः२.३७ ॥ |
| धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः । एकाक्षरं विना भूभ्रू-क्ष्मादिकं खतलादिवत् ॥ चन्द्रालोकः२.७ ॥ |
| धनं तावदसुलभं लब्धं कृच्छ्रेण पाल्यते । लब्धनाशो यथा मृत्युस्तस्मादेतन्न चिन्तयेत् ॥ नीतिसंग्रहस्य मित्र-१.१७८ ॥ |
| धनलुब्धो ह्यसन्तुष्टोऽनियतात्माजितेन्द्रियः । सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम्  ॥ नीतिसंग्रहस्य मित्र-१.१३५ ॥ |

| |
|---|
| धनवानिति हि मदस्ते किं गतविभवो विषादमुपयासि । करनिहतकन्दुकसमाः पातोत्पाता मनुष्याणाम्  ॥ नीतिसंग्रहस्य मित्र-१.१७० ॥ |
| धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा । प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते  ॥ नीतिसंग्रहस्य मित्र-१.११७ ॥ |
| धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् । सन्निमित्ते वरं त्यागो विनाशे नियते सति  ॥ नीतिसंग्रहस्य मित्र-१.४४ ॥ |
| धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः । पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ नीतिसंग्रहस्य मित्र-१.१०९ ॥ |
| धनुः प्रबन्धध्वनितं रुषेव सकृद्विकृष्टा विततेव मौर्वी । संधानमुत्कर्षमिव व्युदस्य मुष्टेरसम्भेद इवापवर्गे ॥ किरातार्जुनीयम् १६.२० ॥ |
| धनुःप्रदात्री जननी वसुन्धरा, जल-प्रवर्षा- मिषतो रणस्थले । निरीक्ष्य सूनून मरणाय तत्परान् सुतान् परावर्त्तयितुं मनोऽकरोत् ॥ प्रतापविजयः-११२ ॥ |
| धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः । विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥ रघुवंशम् २.११ ॥ |
| धनुर्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन् । प्रसूनधन्वा शरसात्करोति मामिति क्रुधाक्रुश्यत तेन केतकम् ॥ नैषधीयचरितम् १.८१ ॥ |
| धनुर्मेषसिंहेषु यात्रा प्रशस्ता शनिज्ञोशनोराशिगे चैव मध्या । रवौ कर्कमीनालिसंस्थेऽतिदीर्घा जनुःपञ्चसप्तत्रिताराश्च नेष्टाः ॥ मुहूर्त.यात्राप्रकरणम् ८॥ |
| धनूषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ । नलिकेन तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः ॥ नैषधीयचरितम् २.२८ ॥ |
| धनेन किं यो न ददाति नाश्नुते बलेन किं यश्च रिपून्न याधते । श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो भवेत् ॥ नीतिसंग्रहस्य मित्र-१.१५३ ॥ |
| धनेन बलवान् लोको धनाद्भवति पण्डितः । पश्यैनं मूषिकं पापं स्वजातिसमतां गतम्  ॥ नीतिसंग्रहस्य मित्र-१.११८ ॥ |
| धन्याऽस्ति तेन जननी जनकोऽप्यनन्यो, वंशश्च तेन सुसमस्त समस्त तापः । कीर्तिश्च तस्य भुवने भुवनैकभूषा, प्राणान् समुत्सृजति यो निज- देश - हेतोः ॥ प्रतापविजयः-१०३ ॥ |
| धन्यानां गिरि-कन्दरेषु वसतां ज्योतिः परं ध्यायतामानन्दाश्रु-जलं पिबन्ति शकुना निःशङ्कमङ्केशयाः। अस्माकं तु मनोरथोपरचित-प्रासाद-वापी-तट-क्रीडा-कानन-केलि-कौतुक-जुषामायुः परं क्षीयते॥॥ वैराग्यशतकम् १४ ॥ |
| धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥ नैषधीयचरितम् ३.११६ ॥ |
| धन्योऽसि यस्य हरिरेष समक्ष एव दूरादपि क्रतुषु यज्वभिरिज्यते यः । दत्वार्घमत्रभवते भुवनेषु यावत्संसारमण्डलमवाप्नुहि साधुवादं ॥ शिशुपालवधम् १४.८७ ॥ |
| धयतु नलिने माध्वीकं वा न वाभिनवागतः कुमुदमकरन्दौघैः कुक्षिंभरिर्भ्रमरोत्करः । इह तु लिहते रात्रीतर्षं रथाङ्गविहंगमा मधु निजवधूवक्त्राम्भोजेऽधुनाधरनामकम् ॥ नैषधीयचरितम् १९.३३ ॥ |
| धरणिदेवोऽथवा कन्यकासोदरः शुभदिने गीतवाद्यादिभिः संयुतः । वरवृतिं वस्त्रयज्ञोपवीतादिना ध्रुवयुतैर्वह्निपूर्वात्रयैराचरेत् ॥ मुहूर्त.विवाहप्रकरणम् ११॥ |
| धरणीधरेन्द्रहितुर्भयादसौविषमेक्षणः स्फुटममूर्न पश्यति । मदनेनवीतभयमित्यधिष्ठिताः क्षणमीक्षते स्म स पुरोविलासिनीः ॥ शिशुपालवधम् १३.३९ ॥ |
| धरस्योद्धर्तासित्वमितिननु सर्वत्र जगति प्रतीतस्तत्किं मामतिभरमधः प्रापिपायिषुः । उपालब्धेवोच्चैर्गिरिपतिरिति श्रीपतिमसौ बलाक्रान्तः क्रडद्द्विरदमथितोर्वीरुहरवैः ॥ शिशुपालवधम् ५.६९ ॥ |
| धरातुराषाहि मदर्थयाब्जा काक्र्या न कार्यान्तरचुम्बिचित्ते । तदार्थितस्यानवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम् ॥ नैषधीयचरितम् ३.९५ ॥ |
| धराधिराजं निजगाद भारती तदुन्मुखेषद्वलिताङ्गसूचितम् । दमस्वसारं प्रति सारवत्तरं कुलेन शीलेन च राजसूचितम् ॥ नैषधीयचरितम् १२.६१ ॥ |
| धर्मं कञ्चित्पुरस्कृत्य प्रायः शब्दः प्रवर्तते । ययार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः ॥ चन्द्रालोकः १०.१ ॥ |
| धर्मगे भास्करे वित्तमोक्षे शशी वित्तगे धर्ममोक्षस्थितः शस्यते । कामगे धर्ममोक्षार्थगः शोभनो मोक्षगे केवलं धर्मगः प्रोच्यते ॥ मुहूर्त.यात्राप्रकरणम् १९॥ |
| धर्मबीजसलिला सरिदङ्घ्रावर्थमूलमुरसि स्फुरति श्रीः । कामदैवतमपि प्रसवस्ते ब्रह्म मुक्तिदमसि स्वयमेव ॥ नैषधीयचरितम् २१.१११ ॥ |
| धर्मराजसलिलेशहुताशैः प्राणतां श्रितममुं जगतस्तैः । प्राप्य हृष्टचलविस्तृततापैश्चेतसा निभृतमेतदचिन्ति ॥ नैषधीयचरितम् ५.६८ ॥ |
| धर्मलोपभयाद्राज्ञीं ऋतुस्नातामिमां स्मरन् । प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥ रघुवंशम् १.७६ ॥ |
| धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् । हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ किरातार्जुनीयम् ३.४ ॥ |
| धर्मार्थकाममोक्षाणां प्राणाः संस्थितहेतवः । तान्निघ्नता किं न हतं रक्षता किं न रक्षितम्  ॥ नीतिसंग्रहस्य मित्र-१.४३ ॥ |
| धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते । अजागलस्तनस्येव तस्य जन्म निरर्थकम्  ॥ नीतिसंग्रहस्य मित्र-०.17 ॥ |
| धर्मार्धं यस्य वित्तेहा वरं तस्य निरीहता । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्  ॥ नीतिसंग्रहस्य मित्र-१.१७४ ॥ |
| धवेन सादर्शि वधूररुन्धतीं सतीमिमां पश्य गतामिवाणुताम् । कृतस्य पूर्वं हृदि भूपतेः कृते तृणीकृतस्वर्गपतेर्जनादिति ॥ नैषधीयचरितम् १६.३९ ॥ |
| धातारं तपसा प्रीतं ययाचे स हि राक्षसः । दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥ रघुवंशम् १०.४४ ॥ |
| धातुर्नियोगादिह नैषधीयं लीलासरः सेवितुमागतेषु । हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः ॥ नैषधीयचरितम् ३.१८ ॥ |
| धान्यस्थितिः शुभकरी गदिता ध्रुवेज्य- द्वीशेन्द्रदस्रचरभेषु च धान्यवृद्धिः ॥ मुहूर्त.नक्षत्रप्रकरणम्  ३३ ॥ |
| धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः । बध्नाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ॥ रघुवंशम् १३.४७ ॥ |

| |
|---|
| धार्यं लाजावर्त्तकं राहुकेत्वो रौप्यं शुक्रेन्द्वोश्च मुक्ता गुरोस्तु । लौहं मन्दस्यारभान्वोः प्रवालं तारा जन्मर्क्षात्त्रिरावृत्तितः स्यात् ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ११ ॥ |
| धार्यः कथंकारमहं भवत्या वियद्विहारी वसुधैकगत्या । अहो शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाप्यनेन ॥ नैषधीयचरितम् ३.१५ ॥ |
| धार्ष्ट्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये । मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥ किरातार्जुनीयम् ९.७२ ॥ |
| धिक् तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि पूर्णमिन्दुम् । मन्ये स विज्ञः स्मृततन्मुखश्रीः कृत्वार्धमौज्झद्धरमूर्ध्नि यस्तम् ॥ नैषधीयचरितम् ३.३२ ॥ |
| धिक्चापले वत्सिमवत्सलत्वं यत्प्रेरणादुत्तरलीभवन्त्या । समीरसङ्गादिव नीरभङ्ग्या मया तटस्यस्त्वमुपद्रुतोऽसि ॥ नैषधीयचरितम् ३.५५ ॥ |
| धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः । तवार्णवस्येव तुषारसीकरैर्भवेदमीभिः कमलोदयः कियान् ॥ नैषधीयचरितम् १.१३ ॥ |
| धिग्ब्राह्मणं तमथ यः श्रुति-मन्त्र हीन, धिक् क्षत्रियं तमथ यः समरेऽतिदीनः । घिग् वैश्यमर्थिजन शोषणमात्र- पीनं, शूद्रं च धिक् सुजनसेवकताविहीनम् ॥ प्रतापविजयः- ९८ । |
| धिनोति नास्माञ्जलजेन पूजा त्वयान्वहं तन्वि वितन्यमाना । तव प्रसादोपनते तु मौलौ पूजास्तु नस्त्वत्पदपङ्कजाभ्याम् ॥ नैषधीयचरितम् ८.९७ ॥ |
| धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः । ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ॥ रघुवंशम् ३.३० ॥ |
| धियात्मनस्तावदचारु नाचरं परस्तु तद्वेद स यद्वदिष्यति । जनावनायोद्यमिनं जनार्दनं क्षये जगज्जीवपिबं शिवं वदन् ॥ नैषधीयचरितम् ९.१२४ ॥ |
| धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता । अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥ अमरुशतकम्-११॥ |
| धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलैर्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते । उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः कोऽयं भो! निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ॥ (स्वप्नवासवदत्तम् १. ३) |
| धुतापतत्पुष्पशिलीमुखाशुगैः शुचेस्तदासीत्सरसी रसस्य सा । रयाय बद्धादरयाश्रुधारया सनालनीलोत्पललोललोचना ॥ नैषधीयचरितम् ९.८६ ॥ |
| धुरन्धरेण ध्वनिनाऽऽप्रधर्षिणा, चञ्चच्चलेनाऽऽचलनेन चारुणा विपक्ष पक्ष-क्षतिकारिणाऽङ्घ्रिणा, स चेतकोभूयुधि चेतकोपमः ॥ प्रतापविजयः-१३७ ॥ |
| धूतधौतासयः प्रष्ठाः प्रतिष्ठन्तक्षमाभृतां । शौर्यनुरागनिकषः सा हि वेलानुजीविनां ॥ शिशुपालवधम् १९.३० ॥ |
| धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानां । आनिन्ये मदजनितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ किरातार्जुनीयम् ७.३ ॥ |
| धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् । पर्याक्षिपत्काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना॥ कुमारसंभवम् ७.१४॥ |
| धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः । इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥ मेघदूतम्, पूर्वमेघः ५॥ |
| धूमवत्त्वादिति यथा देवेत्यामन्त्रणं यथा । वाक्यान्येकार्थविश्रान्तान्याहुर्वाक्यकदम्बकम् ॥ चन्द्रालोकः १.१५ ॥ |
| धूमाकारं दधति पुरः सौवर्णे वर्णेनाग्नेः सदृशि तटे पश्यामी । श्यामीभूताः कुसुमसमूहोऽलीनां लीनामालीमिह तरवो बिभ्राणाः ॥ शिशुपालवधम् ४.३०॥ |
| धूमावलिश्मश्रु ततः सुपर्वा मुखं मखास्वादविदां तमूचे । कामं मदीक्षामयकामधेनोः पयायतामभ्युदयस्त्वदीयः ॥ नैषधीयचरितम् १४.७६ ॥ |
| धूर्भङ्गसंक्षोभविदारितोष्ट्रिका गलन्मधुप्लावितदूरवर्त्मनि । स्थाणौ निषङ्गिण्यनसि क्षणं पुरः शुशोच लाभाय कृतक्रयो वणिक् ॥ शिशुपालवधम् १२.२६ ॥ |
| धूलीभिर्दिवमन्धयन्बधिरयन्नाशाः खुराणां रवैर्वातं संयति खञ्जयञ्जवजवैस्तोत्रान्गुणैर्मूकयन् । धर्माराधनसंनियुक्तजगता राज्ञामुनाधिष्ठितः सान्द्रोत्फालमिषाद्विगायति पदा स्प्रष्टुं तुरंगोऽपि गाम् ॥ नैषधीयचरितम् १२.९९ ॥ |
| धृतं वतंसोत्पलयुग्ममेतया व्यराजदस्यां पतिते दृशाविव । मनोभुवान्ध्यं गमितस्य पश्यतः स्थिते लगित्वा रसिकस्य कस्यचित् ॥ नैषधीयचरितम् १५.३९ ॥ |
| धृततुषारकणस्य नभस्वतस्तरुलताङ्गुलितर्जनविभ्रमाः । पृथु निरन्तरमिष्टभुजान्तरं वनितयानितया न विषेहिरे ॥ शिशुपालवधम् ६.६० ॥ |
| धृतप्रत्यग्रशृङ्गाररसरागरपि द्विपैः । सरोषसम्भ्रमैर्बभ्रे रौद्र एव रणे रसः ॥ शिशुपालवधम् १९.३७ ॥ |
| धृतबिसवलयावलिर्वहन्ती कुमुदवनैकदुकूलमात्तबाणा । शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललम्बे ॥ किरातार्जुनीयम् १०.२४ ॥ |
| धृतबिसवलये निधाय पाणौ मुखं अधिरूषितपाण्डुगण्डलेखं । नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥ किरातार्जुनीयम् १०.४६ ॥ |
| धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डुरं विधिः । भ्रमयत्युचितं विदर्भजानननीराजनवर्धमानकम् ॥ नैषधीयचरितम् २.२६ ॥ |
| धृतवान्न चक्रमरिचक्रभयचकितमाहवे निजं । चक्रधर इति रथाङ्गमदः सततं बिभर्षि भुवनेषु रूढये ॥ शिशुपालवधम् १५.२६ ॥ |
| धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयञ्शुचिभिः । रजयांचकार विरजाः स मृगान्कमिवेशते रमयितुं न गुणाः ॥ किरातार्जुनीयम् ६.२४ ॥ |
| धृताङ्गरागे कलितद्युशोभां तस्मिन्सभां चुम्बति राजचन्द्रे । गता बताक्ष्णोर्विषयं विहाय क्व क्षात्त्रनक्षत्त्रकुलस्य कान्तिः ॥ नैषधीयचरितम् १०.३९ ॥ |
| धृताधृतेस्तस्य भवद्वियोगादन्यान्यशय्यारचनाय लूनैः । अप्यन्यदारिद्र्यहराः प्रवालैजीता दरिद्रास्तरवोऽमराणाम् ॥ नैषधीयचरितम् ८.६७ ॥ |
| धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः । श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥ नैषधीयचरितम् ३.८ ॥ |
| धृतिरस्तमिता रतिश्च्युता विरतं गेयं ऋतुर्निरुत्सवः । गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ रघुवंशम् ८.६६ ॥ |

| |
|---|
| धृतैतया हाटकपट्टिकालिके बभूव केशाम्बुदविद्युदेव सा । मुखेन्दुसंबन्धवशात्सुधाजुषः स्थिरत्वमूहे नियतं तदायुषः ॥ नैषधीयचरितम् १५.३२ ॥ |
| धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः । न बर्हभारः पतितस्य शङ्कोर्निषादिवक्षःस्थलमातनोति ॥ किरातार्जुनीयम् १६.१५ ॥ |
| धृत्वैकया रसनयामृतमीश्वरेन्दोरप्यन्यया त्वदधरस्य रसं द्विजिह्वः । आस्वादयन्युगपदेष परं विशेषं निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥ नैषधीयचरितम् ११.१९ ॥ |
| धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी सत्यं मित्रमिदं दया च भगिनी भ्राता मनःसंयमः । शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं ह्येते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥ वैराग्यशतकम् ॥ |
| धैर्यमुल्बणमनोभवभवा वामतां च वपुरर्पितवत्यः । व्रीडितं ललित सौरतधार्ष्ट्यास्तेनिरेऽभिरुचितेषु तरुण्यः ॥ शिशुपालवधम् १०.६८ ॥ |
| धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः । निरुद्धबाष्पोदयसन्नकण्ठं उवाच कृच्छ्रादिति राजपुत्री ॥ किरातार्जुनीयम् ३.३८ ॥ |
| धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः । वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः ॥ किरातार्जुनीयम् ३.३४ ॥ |
| ध्येयमेकमपथे स्थितं धियः स्तुत्यमुत्तममतीतवाक्पथं । आमनन्ति यमुपास्यमादराद्दूरवर्तिनमतीव योगिनः ॥ शिशुपालवधम् १४.६० ॥ |
| ध्रियते यावदेको पि रिपुस्तावत् कुतः शिवम् । पुरः क्लिश्नाति सोमं हि सैंहिकेयो सुरद्रुहाम् ।३५ ॥ शिशुपालवधम् |
| ध्रियमाणमप्यगलदश्रु चलति दयिते नतभ्रुवः । स्नेहमकृतकरसं दधतामिदमेव युक्तमतिमुग्धचेतसां ॥ शिशुपालवधम् १५.८९ ॥ |
| ध्रुवं विनीतः स्मितपूर्ववाग्युवा किमप्यपृच्छन्न विलोकयन्मुखम् । स्थितां पुरः स्फाटिककुट्टिमे वधूं तदङ्घ्रियुग्मावनिमध्यबद्धदृक् ॥ नैषधीयचरितम् १६.६७ ॥ |
| ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले । वधप्रवेशः सन्नेष्टो रिक्तारार्के बुधे परैः ॥ मुहूर्त.वधूप्रवेशप्रकरणम् २॥ |
| ध्रुवधान्ये जयनन्दौ खरकान्तमनोरमं सुमुखदुर्मुखोग्रं च । रिपुदं वित्तदं नाशं चाक्रन्दं विपुलविजयाख्यं स्यात् ॥ मुहूर्त.वास्तुप्रकरणम् १०॥ |
| ध्रुवमधीतवतीयमधीरतां दयितदूतपतद्गतवेगतः । स्थितिविरोधकरीं द्व्यणुकोदरी तदुदितः स हि यो यदनन्तरः ॥ नैषधीयचरितम् ४.३ ॥ |
| ध्रुवमस्मि शठः शुचिस्मिते विधितः कैतववत्सलस्तव । परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मां इतः ॥ रघुवंशम् ८.४९ ॥ |
| ध्रुवमागताः प्रतिहतिं कठिने मदनेषवः कुचतटेमहति । इतराङ्गवन्न यदिदं गरिमग्लपितावलग्नमगमत्तनुताम् ॥ शिशुपालवधम् ९.४९ ॥ |
| ध्रुवावलोकाय तदुन्मुखभ्रुवा निर्दिश्य पत्याभिदधे विदर्भजा । किमस्य न स्यादणिमाक्षिसाक्षिकस्तथापि तथ्यो महिमागमोदितः ॥ नैषधीयचरितम् १६.३८ ॥ |
| ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन । सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच॥ कुमारसंभवम् ७.८५॥ |
| ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णं ऋतुश्रियः । कुसुमकेसररेणुं अलिव्रजाः सपवनोपवनोत्थितमन्वयुः ॥ रघुवंशम् ८.४५ ॥ |
| ध्वजांशुकैर्धुवमनुकूलमारुतप्रसारितैः प्रसभकृतोपहूतयः । यदूनभि द्रुततरमुद्यतायुधाः क्रुधा परं रयमरयः प्रपेदिरे ॥ शिशुपालवधम् १७..४९ ॥ |
| ध्वजादिकाः सर्वदिशि ध्वजे मुखं कार्यं हरौ पूर्वयमोत्तरे तथा । प्राच्यां वृषे प्राग्यमयोर्गजेऽथवा पश्चादुदक्पूर्वयमे द्विजादितः ॥ मुहूर्त.वास्तुप्रकरणम् ५॥ |
| ध्वनतो नितरां रयेण गुर्व्यस्तडिदाकारचलद्गुणादसंख्याः । इषवो धनुषः सशब्दमाशु न्यपतन्नम्बुधरादिवाम्बुधराः ॥ शिशुपालवधम् २०.२१ ॥ |
| ध्वनयन्सभामथ सनीरघनरवगभीरवागभीः । वाचमवददतिरोषवशादतिनिष्ठुरस्फुटतराक्षरमसौ ॥ शिशुपालवधम् १५.१३ ॥ |
| ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणशिञ्जितानुयातः । प्रतिरवविततो वनानि चक्रे मुखरसं उत्सुकहंससारसानि ॥ किरातार्जुनीयम् १०.४ ॥ |
| ध्वांक्षे वज्रे मुद्गरे चेषुनाड्यो वर्ज्या वेदाः पद्मलुम्बे गदेऽश्वाः । धूम्रे काणे मौसले भूद्वयं द्वे रक्षोमृत्यूत्पातकालाश्च सर्वे ॥ मुहूर्तचिन्त.२६॥ |
| ध्वान्तस्य तेन क्रियमाणयेत्थं द्विषाः शशी वर्णनयाऽथ रुष्टः । उदयन्नुपाश्लोकि जपारुणश्रीर्नराधिपेनानुनयेच्छयेव ॥ नैषधीयचरितम् २२.४ ॥ |
| ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारु मतं मतं मे । औलूकमाहुः खलु दर्शनं तत्क्षमं तमस्तत्त्वनिरूपणाय ॥ नैषधीयचरितम् २२.३६ ॥ |
| ध्वान्ते द्रुमान्तानभिसारिकास्त्वं शङ्कस्व सङ्केतनिकेतमाप्ताः । छायाच्छलादुज्झितनीलचेला ज्योत्स्नानुकूलैश्चरिता दुकूलैः ॥ नैषधीयचरितम् २२.४२ ॥ |
| ध्वान्तैणनाभ्या शितिनाम्बरेण दिशः शरैः सूनशरस्य तारैः । मन्दाक्षलक्ष्या निशि मामनिन्दौ सेर्ष्या भवायान्त्यभिसारिकाभाः ॥ नैषधीयचरितम् २२.३३ ॥ |
| न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् । होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ नीतिशतकम्५७ ॥ |
| न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः । व्यवहारेण मित्राणि जायन्ते रिपवस्तथा  ॥ नीतिसंग्रहस्य मित्र-१.७२ ॥ |
| न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम् । तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम् ॥ नैषधीयचरितम् १.३ ॥ |
| न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनं तु दक्षिणम् । दिशापि मद्भस्म किरत्वयं तया प्रियो यया वैरविधिर्वधावधिः ॥ नैषधीयचरितम् ९.९३ ॥ |
| न किं नु भूयो भविता समुन्नतिर्न दासता नस्त्वरितं गमिष्यति । यदन्तु शीघ्रं जननी च जन्मभूः न किं पुन सौख्यमयी भविष्यति ॥ प्रतापविजयः-९० ॥ |
| न किलानुययुस्तस्य राजानो रक्षितुर्यशः । व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ रघुवंशम् १.२७ ॥ |
| न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि । न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ॥ रघुवंशम् ८.८ ॥ |
| न केवलं गच्छति तस्य काले ययुः शरीरावयवा विवृद्धिं । वंश्या गुणाः खल्वपि लोककान्ताः प्रारम्भसूक्ष्माः प्रथिमानमापुः ॥ रघुवंशम् १८.४९ ॥ |
| न केवलं जनैस्तस्य लघुसंधायिनो धनुः । मण्डलीकृतमोकान्ताद्बलमैक्षि द्विषामपि ॥ शिशुपालवधम् १९.९७ ॥ |

| |
|---|
| न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः । विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ॥ नैषधीयचरितम् १.१३१ ॥ |
| न केवलं यः स्वतया मुरारेरनन्यसाधारणतां दधानः । अत्यर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव स नन्दको भूत् ॥ शिशुपालवधम् ३.१८ ॥ |
| न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव । स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥ रघुवंशम् ८.९ ॥ |
| न खलु दूरगतोऽप्यधिवर्तते महमसाविति बन्धुतयोदितैः । प्रणयिनो निशमय्य वधूर्बहिः स्वरमृतैरमृतैरिव निर्ववौ ॥ शिशुपालवधम् ६.१९ ॥ |
| न खलु मोहबशेन तदाननं नलमनः शशिकान्तमबोधि तत् । इतरथा शशिनोऽभ्युदये ततः कथमसुस्रुवदस्रुमयं पयः ॥ नैषधीयचरितम् ४.३६ ॥ |
| न खलु वयममुष्य दानयोग्याः पिबति च पाति च यासकौ रहस्त्वाम् । व्रज विचपममुं ददस्व तस्यै भवतु यतः सदृशोश्चिराय योगः ॥ शिशुपालवधम् ७.५३ ॥ |
| न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलम् । यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥ नीतिसंग्रहस्य मित्र-१.२९ ॥ |
| न गर्वमेवं कुरु वीरताऽञ्चितं, प्रदर्शय स्वं बलमेव सैन्यगम् । वदन्ति वीरा न कदापि किन्तु ते, स्वकर्म भीमं विदधत्यभीतिक्षः ॥ प्रतापविजयः-८२ ॥ |
| न च मेऽवगच्छति यथा लघुतां करुणां यथा च कुरुते स मयि । निपुणं तथैनमुपगम्य वदेरभिदूति काचिदिति संदिदिशे ॥ शिशुपालवधम् ९.५६ ॥ |
| न च सुतनु न वेद्मि यन्महीयानसुनिरसस्तव निश्चयः परेण । वितथयति न जानातु मद्वचोऽसाविति च तथापि सखीषु मेऽभिमानः ॥ शिशुपालवधम् ७.८ ॥ |
| न चतं तदेति शपमानमपि यदनृपाः प्रचुक्रुधुः । शौरिसमयनिगृहीतधियः प्रभुचित्तमेव हि जनोऽनुवर्तते ॥ शिशुपालवधम् १५.४१ ॥ |
| न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृतेऽपि । आत्मानमेव स्थिरदुःखबाजं पुनः पुनर्दुष्कृतिनं निनिन्द ॥ रघुवंशम् १४.५७ ॥ |
| न चिकीर्षति यः स्मयोद्धतो नृपतिस्तच्चरणोपपगं शिरः । चरणं कुरुते गतस्मयः स्मसावेव तदीयमूर्धनि ॥ शिशुपालवधम् १६.६८ ॥ |
| न चोपलेभे पूर्वेषां ऋणनिर्मोक्षसाधनं । सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम् ॥ रघुवंशम् १०.२ ॥ |
| न जातरूपच्छदजातरूपताद्विजस्य दृष्टेयमिति स्तुवन्मुहुः । अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा ॥ नैषधीयचरितम् १.१२९ ॥ |
| न जाने संमुखायाते प्रियाणि वदति प्रिये । सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रताम् ॥ अमरुशतकम्-६३॥ |
| न तदद्भुतमस्य यन्मुखं युधि पश्यन्ति भिया न शत्रवः । द्रवतां ननु पृष्ठमीक्षते वदनं सोऽपि न जातु विद्विषां ॥ शिशुपालवधम् १६.६० ॥ |
| न तस्थौ भर्तृतः प्राप्तमानसम्प्रतिपत्तिषु । रणैकसर्गेषु भयं मानसं प्रति पत्तिषु ॥ शिशुपालवधम् १९.३८ ॥ |
| न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता । त्वदुदाहरणाकृतौ गुणा इति सामुद्रकसारमुद्रणा ॥ नैषधीयचरितम् २.५१ ॥ |
| न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि । नृणां पश्यत्यस्य क्वचन विशिखान्किं तु पतितद्विषद्वक्षःश्वभ्रैरनुमितिरसूञ्गोचरयति ॥ नैषधीयचरितम् १२.४९ ॥ |
| न तेजस्तेजस्वी प्रसृतमपरेषां विषहते स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः । मयूखैरश्रान्तं तपति यदि देवो दिनकरः किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ॥<br><br>(उत्तररामचरितम् ६.१४) |
| न तेन वाहेषु विवाहदक्षिणीकृतेषु संख्यानुभवेऽभवत्क्षमः । न शातकुम्भेषु न मत्तकुम्भिषु प्रयत्नवान्कोऽपि न रत्नराशिषु ॥ नैषधीयचरितम् १६.३४ ॥ |
| न तेन सज्यं क्वचिदुद्यतं धनुर्न वा कृतं कोपविजिह्ममाननम् । गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥ किरातार्जुनीयम् १.२१ ॥ |
| न दलति निचये तथोत्पलानां न च विषमच्छदगुच्छयूथिकासु । अभिरतुमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥ किरातार्जुनीयम् १०.३९ ॥ |
| न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति । यतु ददह्यते लोकमतो दुःखाकरोति माम् ॥ शिशुपालवधम् २.११ ॥ |
| न देवाय न विप्राय न बन्धुभ्यो न चात्मने । कृपणस्य धनं याति वह्नितस्करपार्थिवैः ॥ नीतिसंग्रहस्य मित्र-१.१५५ ॥ |
| न दोषं विद्वेषादपि निरवकाशं गुणमये वरेण प्राप्तास्त्रे न समरसमारम्बसदृशम् । जगुः पुण्यश्लोकं प्रतिनृपतयः किंतु विदधुः स्वनिश्वासैर्भैमीहृदयमुदयन्निर्भरदयम् ॥ नैषधीयचरितम् १४.९६ ॥ |
| न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः । स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥ नीतिसंग्रहस्य मित्र-१.१७ ॥ |
| न ध्यातं पदमीश्वरस्य विधिवत् संसारविच्छित्तये स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः । नारीपीनपयोधरोरुयुगलं स्वपनेऽपि नालिङ्गितं मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ पुरुषार्थोपदेशः-74॥ |
| न ध्यानं पदमीश्वरस्य विधिवत्संसार-विच्छित्तये स्वर्ग-द्वार-कपाट-पाटन-पटुर्धर्मोऽपि नोपार्जितः। नारी-पीन-पयोधरोरु-युगलं स्वप्नेऽपि नालिङ्गितं मातुः केवलमेव यौवन-वन-च्छेदे कुठारा वयम्॥॥ वैराग्यशतकम् ४५ ॥ |
| न नटा न विटा न गायका न च सभ्येतर-वाद-चुञ्चवः। नृपमीक्षितुमत्र के वयं स्तन-भारानमिता न योषितः॥॥ वैराग्यशतकम् ५६ ॥ |
| न नटा न विटा न गायका न च सभ्येतरवादचुञ्चवः। नृपमीक्षितुमत्र के वयं स्तनभारावनता न योषितः ॥ पुरुषार्थोपदेशः-42॥ |
| न नवः प्रभुरा फलोदयात्स्थिरकर्मा विरराम कर्मणः । न च योगविधेर्नवेतरः स्थिरधीरा परमात्मदर्शनात् ॥ रघुवंशम् ८.२२ ॥ |

| |
|---|
| न नीतमन्येन नतिं कदाचित् कर्णान्तिकप्राप्तगुणं क्रियासु । विधेयमस्याभवदन्तिकस्थं शार्ङ्गं धनुर्मित्रमिव द्रढीयः ॥ शिशुपालवधम्  ३.१९ ॥ |
| न नूनमारुढरुषा शरीरमनेन दग्धं कुसुमायुधस्य । व्रीजादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः॥ कुमारसंभवम् ७.६७॥ |
| न नोननुन्नोऽनुन्नेनो न ना नानानना ननु । नुन्नोऽनुन्नो न नुन्नेनो नानेनानुन्ननुन्ननुम् ॥ किरातार्जुनीयम् १५.१४ ॥ |
| न पाण्ड्यभूमण्डनमेणलोचने विलोचनेनापि नृपं पिपाससि । शशिप्रकाशाननमेनमीक्षितुं तरङ्गयापाङ्गदिशा दृशोस्त्विषः ॥ नैषधीयचरितम् १२.१५ ॥ |
| न पाहि पाहीति यदब्रवीरमुं ममौष्ठ तेनैवमभूदिति क्रुधा । रणक्षितावस्य विरोधिमूर्धभिर्विदश्य दन्तैर्निजमोष्ठमास्यते ॥ नैषधीयचरितम् १२.६३ ॥ |
| न पीयतां नाम चकोरजिह्वया कथंचिदेतन्मुखचन्द्रचन्द्रिका । इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी ॥ नैषधीयचरितम् १२.६ ॥ |
| न पूर्वदिशि शक्रभे न विधुसौरिवारे तथा न चाजपदभे गुरौ यमदिशीनदैत्येज्ययोः । न पाशिदिशि धातृभे कुजबुधेऽर्यमर्क्षे तथा न सौम्यककुभि व्रजेत्स्वजयजीवितार्थी बुधः ॥ मुहूर्त.यात्राप्रकरणम् १०॥ |
| न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि । द्रुमसानुमतां किं अन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥ रघुवंशम् ८.९० ॥ |
| न प्रसादमुचितं गमिता द्यैर्नोद्धृतं तिमिरमद्रिवनेभ्यः । दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥ किरातार्जुनीयम् ९.२५ ॥ |
| न प्रहर्तुमलमस्मि निदयं विप्र इत्यभिभवत्यपि त्वयि । शंष किं गतिमनेन पत्त्रिणा हन्मि लोकमुत ते मखार्जितम् ॥ रघुवंशम् ११.८४ ॥ |
| न मनोरमास्वपि विशेषविदां निरचेष्ट योग्यमिदमिति । गृहमेष्यति प्रियतमे सुदृशां वसनाङ्गरागसुमनःसु मनः ॥ शिशुपालवधम् ९.५० ॥ |
| न मन्मथस्त्वं स हि नास्तिमूर्तिर्न चाश्विनेयः स हि नाद्वितीयः । चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिको विशेषः ॥ नैषधीयचरितम् ८.२९ ॥ |
| न ममौ कपाटतटविस्तृतं तनौ मुरवैरिमवक्ष उरसि क्षमाभुजः । भुजयोस्तथापि युगलेन दीर्घयोर्विकटीकृतेन परितोऽभिषस्वजे ॥ शिशुपालवधम् १३.१० ॥ |
| न मातरि न दारेषु न सोदर्ये न चात्मजे । विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे  ॥ नीतिसंग्रहस्य मित्र-१.१९५ ॥ |
| न मुमोच लोचनजलानि दयितजयमङ्गलैषिणि । यातमवनिभवसन्नभुजान्न गलद्विवेद वलयं विलासिनी ॥ शिशुपालवधम् १५.८५ ॥ |
| न मृगः खलु कोऽप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे । विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ॥ किरातार्जुनीयम् १३.६ ॥ |
| न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु । तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरा ॥ रघुवंशम् ८.७ ॥ |
| न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी । न हीष्टमस्य त्रिदिवेऽपि भूपतेर्प्रियासखीरुत्तरकोसलेश्वरः ॥ रघुवंशम् ३.५ ॥ |
| न यक्षलक्षैः किमलक्षि नो वा सिद्धैः किमध्यासि समाप्तशोभा । सा किंनरैः किं न रसादसेवि नादर्शि हर्षेण महर्षिभिर्वा ॥ नैषधीयचरितम् १०.५६ ॥ |
| न यस्य देशे, रतिरस्त्यनुत्तमा, न वा स्वधर्मव्यथयाऽऽकुलम्मनः । न तत्कृतेऽसौ सफलो मम श्रमः, किमस्ति मिष्टं कपये पयः क्वचित् ॥ प्रतापविजयः-२३ ॥ |
| न या स्वकीयं विजहाति भारतं, मदानने नृत्यति चाऽप्यनारतम् । सरस्वती सा जननीव मद्वचः, कथं न कुर्यात् प्रतिभा प्रभारतम् ॥ प्रतापविजयः-२० ॥ |
| न यावदग्निभ्रममेत्युद्धतां नलस्य भैमीति हरेर्दुराशया । स बिन्दुरिन्दुः प्रहितः किमस्य सा न वेति भाले पठितुं लिपीमिव ॥ नैषधीयचरितम् १५.७ ॥ |
| न यावदेतावुदपश्यदुत्थितौ जनस्तुषारासाराञ्जनपर्वताविव । स्वहस्तदत्ते मुनिमास्ने मुनि श्चिरंतनस्तावदभिन्यवीविशत् ॥ शिशुपालवधम्  १.१५ ॥ |
| न योगादेरायतनं न सङ्केतनिकेतनम् । वृत्त्या निर्देशशब्दोऽयं मुख्यया स्वाभिधेयया ॥ चन्द्रालोकः १०.४ ॥ |
| न योजनशतं दूरं वाह्यमानस्य तृष्णया । सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः  ॥ नीतिसंग्रहस्य मित्र-१.१४० ॥ |
| न रागि चेतः परमा विलासिता वधूः शरीरेऽस्ति न चास्ति मन्मथः । नमस्क्रिया चोषसि दातुरित्यहो निसर्गदुर्बोधं इदं तवेहितं ॥ किरातार्जुनीयम् १८.३१ ॥ |
| न राजिकाराद्धमभोजि तत्र कैर्मुखेन सीत्कारकृता दधद्दधि । धुतोत्तमाङ्गैः कटुभावपाटवादकाण्डकण्डूयितमूर्धतालुभिः ॥ नैषधीयचरितम् १६.७३ ॥ |
| न लङ्घयामास महाजनानां शिरांसि नैवोद्धतिमाजगाम । अचेष्टताष्टापदभूमिरेणुः खुराहतो यत्सदृशं गरिम्णः ॥ शिशुपालवधम्  ३.२७ ॥ |
| न वनं पथि शिश्रियेऽमुना क्वचिदप्युच्चतरद्रुचा रुतम् । नैषधीयचरितम्न सगोत्रजमन्ववादि वा गतिवेगप्रसरद्द्रुचा रुतम् ॥ नैषधीयचरितम् २.७२ ॥ |
| न वर्तसे मन्मथनाटिका कथं प्रकाशरोमावलिसूत्रधारिणी । तवाङ्गहारे रुचिमेति नायकः शिखामणिश्च द्विजराड्विदूषकः ॥ नैषधीयचरितम् ९.११८ ॥ |
| न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः । इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ॥ नैषधीयचरितम् १.१२८ ॥ |
| न विदध्युरशङ्कमप्रियं महतः स्वार्थपराः परे कथं । भजते कुपितोऽप्युदारधीरनुनीतिं नतिमात्रकेण सः ॥ शिशुपालवधम् १६.५५ ॥ |
| न विदुषितरा कापि त्वतस्ततो नियतक्रियापतनदुरिते हेतुर्भर्तुर्मनस्विनि मा स्म भूः । अनिशभवदत्यागादेनं जनः खलु कामुकीसुभगमभिधास्यत्युद्दामा पराङ्कवदावदः ॥ नैषधीयचरितम् १९.२४ ॥ |
| न विभावयत्यनिशमक्षिगतामपि मां भवानतिसमीपतया । हृदयस्थितामपि पुनः परितः कथमीक्षते बहिरभीष्टतामाम् ॥ शिशुपालवधम् ९.८१ ॥ |
| न वेद्मि म प्रार्थितदुर्लभः कदा सखीभि  रस्रोत्तरमीक्षितामिमाम् । तपःकृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् ॥ कुमारसंभवम् ५.६१ ॥ |
| न व्यहन्यत कदापि मुदं यः स्वःसदामुपनयन्नभिलाषः । तत्पदे त्वदभिषेककृतां नः स त्यजत्वसमतामदमद्य ॥ नैषधीयचरितम् ५.१२३ ॥ |
| न शून्यतामगमदसौ निवेशभूः प्रभूततां दधति बले चलत्यपि । पयस्यभिद्रवति भुवं युगावधौ सरित्पतिर्न हि समुपैति रिक्ततां ॥ शिशुपालवधम् १७..४० ॥ |

| |
|---|
| न श्रद्दधासि यदि तन्मम मौनमस्तु कथ्या निजाप्ततमयैव तवानुभूत्या । न स्यात्कनीयसितरा यदि नाम काश्या राजन्वती मुदिरमण्डनधन्वना भूः ॥ नैषधीयचरितम् ११.११९ ॥ |
| न श्वेततां चरतु वा भुवनेषु राजहंसस्य न प्रियतमा कथमस्य किर्तिः । चित्रं तु यद्विशदिमाद्वयमाविशन्ती क्षीरं च नाम्बु च मिथः पृथगातनोति ॥ नैषधीयचरितम् ११.३१ ॥ |
| न षड्विधः षिङ्गजनस्य भोजने तथा यथा यौवतविभ्रमोद्भवः । अपारशृङ्गारमयः समुन्मिषन्भृशं रसस्तोषमधत्त सप्तमः ॥ नैषधीयचरितम् १६.१०९ ॥ |
| न षष्ठी न च द्वादशी नाऽष्टमी नो सिताद्या तिथिः पूर्णिमाऽमा न रिक्ता । हयादित्यमैत्रेन्दुजीवान्त्यहस्तश्रवोवासवैरेव यात्रा प्रशस्ता ॥ मुहूर्त.यात्राप्रकरणम् ९॥ |
| न संनिधात्री यदि विघ्नसिद्धये पतिव्रता पत्युरनिच्छया शची । स एव राजव्रजवैशसात्कुतः परस्परस्पर्धिवरः स्वयंवरः ॥ नैषधीयचरितम् ९.७८ ॥ |
| न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः । ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥ रघुवंशम् ३.२० ॥ |
| न संशयमनारुह्य नरो भद्राणि पश्यति । संशयं पुनरारुह्य यदि जीवति पश्यति ॥ नीतिसंग्रहस्य मित्र-१.७ ॥ |
| न संसारोत्पन्नं चरितमनुपश्यामि कुशलं विपाकः पुण्यानां जनयति भयं मे विमृशतः । महद्भिः पुण्यौघैश्चिरपरिगृहीता हि विषयाद् अनन्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ पुरुषार्थोपदेशः-13॥ |
| न संसारोत्पन्नं चरितमनुपश्यामि कुशलं विपाकः पुण्यानां जनयति भयं मे विमृशतः। महद्भिः पुण्यौघैश्चिर-परिगृहीताश्च विषयाः महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम्॥॥ वैराग्यशतकम् ११ ॥ |
| न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः । अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि ॥ किरातार्जुनीयम् १.४५ ॥ |
| न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा । न परं पथि पक्षपातितानवलम्बे किमु मादृशेऽपि सा ॥ नैषधीयचरितम् २.५२ ॥ |
| न स्म माति वपुषः प्रमदानामन्तरिष्टतमसङ्गमजन्मा । तद्बहुर्बहिरवाप्य विकासं व्यानशे तनुरुहाण्यपि हर्षः ॥ शिशुपालवधम् १०.५० ॥ |
| न स्रजो रुरुचिरे रमणीभ्यश्चन्दनानि विरहे मदिरा वा । साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥ किरातार्जुनीयम् ९.३५ ॥ |
| न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर्गुणं हि । अन्धस्य किं हस्ततलस्थितोऽपि प्रकाशयत्यर्थमिह प्रदीपः ॥ नीतिसंग्रहस्य मित्र-१.१६५ ॥ |
| न स्वेदिनश्चामरमारुतैर्न निमेषनेत्राः प्रतिवस्तुचित्रैः । म्लानस्रजो नातपवारणेन देवा नृदेवा बिभिदुर्न तत्र ॥ नैषधीयचरितम् १०.३३ ॥ |
| नंदा च भद्रा च जया च रिक्ता पूर्णेति तिथ्योऽशुभमध्यशस्ताः । सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमाकिगुरो च सिद्धाः ॥ मुहूर्तचिन्त.४ ॥ |
| नंदा भद्रा नंदिकाख्या जया च रिक्ता भद्रा चैव पूर्णा मृतार्कात् । याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठार्यम्णं ज्येष्ठांत्यं रवेर्दग्धभं स्यात् ॥ मुहूर्तचिन्त.५ ॥ |
| नक्रे भौमो गोहरिस्त्रीषु मन्दश्चन्द्रा द्वन्द्वेऽर्कोऽजभे ज्ञश्च कर्के । शुक्रः कोदण्डालिमीनेषु कुम्भे जूके जीवो घातवारा न शस्ताः ॥ मुहूर्त.यात्राप्रकरणम् ३१॥ |
| नखपदवलिनाभीसन्धिभागेषु लक्ष्यः क्षतिषु च दशनानामङ्गनायाः सशेषः । अपि रहसि कृतानां वाग्विहीनोऽपिजातः सुरतविलसितानां वर्णको वर्णकोऽसौ ॥ शिशुपालवधम् ११.२९ ॥ |
| नखरुचिरचिन्द्रचापं ललितगतेषु गतागतं दधाना । मुखरितवलयं पृथौ नितम्बे भुजलतिका मुहुरस्खलत्तरुण्याः ॥ शिशुपालवधम् ७.४ ॥ |
| नखांशुमञ्जरीकीर्णमसौतरुरिवोच्चकैः । बभौ विभ्रमद्धनुःशाखामधिरूढशिलीमुखां ॥ शिशुपालवधम् १९.१२ ॥ |
| नखेन कृत्वाधरसन्निभां निभाद्युवा मृदुव्यञ्जनमांसफालिकाम् । ददंश दन्तैः प्रशशंस तद्रसं विहस्य पश्यन्परिवेषिकाधरम् ॥ नैषधीयचरितम् १६.८२ ॥ |
| नगरप्रवेशविषयाद्यपद्रवे करपीडने विबुधतीर्थयात्रयोः । नृपपीडने नववधूप्रवेशने प्रतिभार्गवो भवति दोषकृन्न हि ॥ मुहूर्त.द्विरागमनप्रकरणम् ३॥ |
| नतभ्रुवः स्वच्छनखानुबिम्बनच्छलेन कोऽपि स्फुटकम्पकण्टकः । पयो ददत्याश्चरणे भृशं क्षतः स्मरस्य बाणैः शरणे न्यविक्षत ॥ नैषधीयचरितम् १६.६ ॥ |
| नत्वा शिरोरत्नरुचापि पाद्यं संपाद्यमाचारविदातिथिभ्यः । प्रियाक्षरालीरसधारयापि वैधी विधेया मधुपर्कतृप्तिः ॥ नैषधीयचरितम् ८.२ ॥ |
| नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलोपदेशान् । बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः ॥ रघुवंशम् ७.३८ ॥ |
| नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा । विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ नीतिसंग्रहस्य मित्र-१.१९ ॥ |
| ननु सन्दिशेति सुदृशोदितया त्रपया न किञ्चन किलाभिदधे । नजमैक्षि मन्दमनिशं निशितैः क्रशितं शरीरमशीरशरैः ॥ शिशुपालवधम् ९.६१ ॥ |
| ननु हो मथना राघो घोरा नाथमहो नु न । तयदातवदा भीमा माभीदा बत दायत ॥ किरातार्जुनीयम् १५.२० ॥ |
| नन्वत्र हव्य इति विश्रुतनाम्नि शाकद्वीपप्रशासिनि सुधीषु सुधीभवन्त्या । एतद्भुजाबिरुदबन्दिजयानयापि किं रागि राजनि गिराजनि नान्तरं ते शाकः ॥ नैषधीयचरितम् ११.३७ ॥ |
| नन्वात्मानं बहु विगणयन्नात्मना नावलम्बे तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम् कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ मेघदूतम्, उत्तरमेघः ४३ ॥ |
| नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपं नगम् । स ददर्श पतङ्गपुंगवो विटपच्छन्नतरक्षुपन्नगम् ॥ नैषधीयचरितम् २.६७ ॥ |
| नभसि जलदलक्ष्मीं सम्भृतां वीक्ष्य दिष्ट्या प्रसरसि यदि कान्तेत्यर्धमुक्त्वा कथञ्चित् । मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं तदनुकृतवती सा यत्र वाचो निवृत्ताः ॥ अमरुशतकम्-५०॥ |
| नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्त्रिणामिह विहरणैः श्यैनंपातां रवेरवधारयन् । शशविशसनत्रासादाशामयाच्चरमां शशी तदधिगमनात्तारापारापतैरुदडीयत ॥ नैषधीयचरितम् १९.१२ ॥ |
| नभोनदीकूलकुलायचक्रीकुलस्य नक्तं विरहाकुलस्य । दृशोरपां सन्ति पृषन्ति ताराः पतन्ति तत्संक्रमणानि धाराः ॥ नैषधीयचरितम् २२.२ ॥ |

| |
|---|
| नभोनदीव्यतिकरधौतमूर्तिभिर्वियद्गतैरनधिगतानि लेभिरे । चलच्चमूतुरगखुराहतोत्पतन्महीरजःस्नपनसुखानि दिग्गजैः ॥ शिशुपालवधम् १७..६४ ॥ |
| नमः करेभ्योऽस्तु विधेर्न वास्तु स्पृष्टं धियाप्यस्य न किं पुनस्तैः । स्पर्शादिदं स्याल्लुलितं हि शिल्पं मनोभुवोऽनङ्गतयानुरूपम् ॥ नैषधीयचरितम् १०.१२६ ॥ |
| नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः । फलं कर्मायत्तं यदि किममरगणैः किं च विधिना नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ नीतिशतकम्९४ ॥ |
| नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते । अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ रघुवंशम् १०.१६ ॥ |
| नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः, स्वार्थान् सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे । क्षान्त्यैवाऽऽक्षेपरुक्षाक्षरमुखरमुखान् दुर्जनान् दूषयन्तः, सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥ नीतिशतकम्७० ॥ |
| नम्रप्रत्यर्थिपृथ्वीपतिमुखकमलम्लानताभृङ्गजातच्छायान्तःपातचन्द्रायितचरणनखश्रेणिरैणेयनेत्रे । दृप्तारिप्राणवातामृतरसलहरीभूरिपानेन पीनं भूलोकस्यैष भर्ता भुजभुजगयुगं सांयुगीनं बिभर्ति ॥ नैषधीयचरितम् १२.५६ ॥ |
| नय नयनयोर्द्राक्पेयत्वं प्रविष्टवतीरमूर्भवनवलभीजालान्नाला इवार्ककराङ्गुलीः । भ्रमदणुगणक्रान्ता भान्ति भ्रमन्त्य इवाशु याः पुनरपि धृता कुन्दे किंवा न वर्धकिना दिवः ॥ नैषधीयचरितम् १९.५४ ॥ |
| नयगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः । अभिययुः सरसो मधुसंभृतां कमलिनीमलिनीरपत्रिणः ॥ रघुवंशम् ८.३० ॥ |
| नयति द्रुतमुद्धतिश्रितः प्रसभं भङ्गमभङ्गुरोदयः । गमयत्यवनीतलस्फुरद्भुजशाखं भृशमन्यमुन्नतिं ॥ शिशुपालवधम् १६.७२ ॥ |
| नयति भगवानम्भोजस्याऽनिबन्धनबान्धवः किमपि मघवप्रासादस्य प्रघाणमुपघ्नताम् । अपसरदरिध्वान्तप्रत्यग्वियत्पथमण्डलीलगनफलदश्रान्तस्वर्णाचलभ्रमविभ्रमः ॥ नैषधीयचरितम् १९.११ ॥ |
| नयनादिव शूलिनः प्रवृत्तैर्मनसोऽप्याशुतरं यतः पिशङ्गैः । विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः ॥ किरातार्जुनीयम् १३.२२ ॥ |
| नयनान्यरुणानि घूर्णयन्वचनानि स्खलयन्पदे पदे । असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ॥ कुमारसंभवम् ४.१२ ॥ |
| नरकच्छिदमिच्छतीक्षितुं विधिना येन स चेदिभूपतिः । द्रुतमेतु न हापयिष्यते सदृशं तस्य विधातुमुत्तरं ॥ शिशुपालवधम् १६.३३ ॥ |
| नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा । विरहिणामपि तद्रतवद्युवक्षणमितं न कथं गणितागमे ॥ नैषधीयचरितम् ४.४४ ॥ |
| नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम् । अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ॥ रघुवंशम् ३.३६ ॥ |
| नलं तदावेत्य तमाशये निजे घृणां विगानं च मुमोच भीमजा । जुगुप्समाना हि मनो धृतं तदा सतीधिया दैवतदूतधावि सा ॥ नैषधीयचरितम् ९.१३७ ॥ |
| नलं स तत्पक्षरवोर्ध्ववीक्षिणं स एष पक्षीति भणन्तमभ्यधात् । नयादयैनामतिमानिराशतामसून्विहातेयमतः परं परम् ॥ नैषधीयचरितम् ९.१२८ ॥ |
| नलप्रणालीमिलदम्बुजाक्षीसंवादपीयूषपिपासवस्ते । तदध्ववीक्षार्थमिवानिमेषा देशस्य तस्याभरणीबभूवुः ॥ नैषधीयचरितम् ६.३ ॥ |
| नलभ्रमेणापि भजेत भैमी कदाचिदस्मानिति शेषिताशा । अभून्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ॥ नैषधीयचरितम् १०.१८ ॥ |
| नलविमस्तकितस्य रणे रिपुर्मिलति किं न कबन्धगलेन वा । मृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम् ॥ नैषधीयचरितम् ४.६८ ॥ |
| नलस्य नासीरसृजां महीभुजां किरीटरत्नैः पुनरुक्तदीपया । अदीपि रात्रौ वरयात्रया तया चमूरजोमिश्रतमिस्रसंपदा ॥ नैषधीयचरितम् १६.४ ॥ |
| नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान्विधिराहृतास्यै । स्पर्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमाख्यत् ॥ नैषधीयचरितम् १०.२३ ॥ |
| नलस्य पृष्टा निषधागता गुणान्मिषेण दूतद्विजबन्दिचारणाः । निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया ॥ नैषधीयचरितम् १.३७ ॥ |
| नलस्य भाले मणिवीरपट्टिकानिभेन लग्नः परिधिर्विधोर्बभौ । तदा शशाङ्काधिकरूपतां गते तदानने मातुमशक्नुवन्निव ॥ नैषधीयचरितम् १५.६१ ॥ |
| नलस्य भाले मणिवीरपट्टिकानिभेन लग्नः परिधिर्विधोर्बभौ । तदा शशाङ्काधिकरूपतां गते तदानने मातुमशक्नुवन्निव ॥ नैषधीयचरितम् १५.६७ ॥ |
| नलात्स्ववैश्वस्त्यमनाप्तुमानता नृपस्त्रियो भीममहोत्सवागताः । तदङ्घ्रिलाक्षामदधन्त मङ्गलं शिरःसु सिन्दूरमिव प्रियायुषे ॥ नैषधीयचरितम् १५.७५ ॥ |
| नलानसत्यानवदत्स सत्यः कृतोपवेशान्सविधे सुवेषान् । नोभाविलाभूः किमु दर्पकश्च भवन्ति नासत्ययुतौ भवन्तः ॥ नैषधीयचरितम् १०.४५ ॥ |
| नलान्यवीक्षां विदधे दमस्वसुः कनीनिकागः खलु नीलिमालयः । चकार सेवां शुचिरक्ततोचितां मिलन्नपाङ्गः सविधे तु नैषधे ॥ नैषधीयचरितम् १२.१०८ ॥ |
| नलाय वालव्यजनं विधुन्वती दमस्य दास्या निभृतं पदेऽर्पितात् । अहासि लोकैः सरटात्पटोज्झिनी भयेन जङ्घायतिलङ्घिरंहसः ॥ नैषधीयचरितम् १६.५२ ॥ |
| नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या । कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ॥ नैषधीयचरितम् ३.४५ ॥ |
| नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे । अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥ नैषधीयचरितम् २.२३ ॥ |
| नलिनान्तिकोपहितपल्लवश्रिया व्यवधाय चारु मुखमेकपाणिना । स्फुरिताङ्गुलीविवरनिःसृतोल्लसद्दशनप्रभाङ्कुरमजृम्भतापरा ॥ शिशुपालवधम् १३.४३ ॥ |
| नलिनी निगूढसलिला च यत्र सा स्थलमित्यधः पतति या सुयोधने । अनिलात्मजप्रहसनाकुलाखिलक्षितिपक्षयागमनिमित्ततां ययौ ॥ शिशुपालवधम् १३.५९ ॥ |
| नले निधातुं वरणस्रजं तां स्मरः स्म रामां त्वरयत्यथैनाम् । अपत्रपा तां निषिषेध तेन द्वयानुरोधं तुलितं दधौ सा ॥ नैषधीयचरितम् १४.२५ ॥ |

| |
|---|
| नलेन ताम्बूलविलासितोज्झितैर्मुखस्य यः पूगकणैर्भृतो न वा । इति व्यवेचि स्वमयूखमण्डलादुदञ्चदुच्चारुणचारुणश्चिरात् ॥ नैषधीयचरितम् १६.२८ ॥ |
| नलेन भायाः शशिना निशेव त्वया स भायान्निशया शशीव । पुनःपुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः ॥ नैषधीयचरितम् ३.११७ ॥ |
| नवकदम्बजोऽरुणिताम्बरैरधिपुरन्ध्रि शिलीन्ध्रसुगन्धिभिः । मनसि रागवतामनुरागिता नवनवा वनवायुभिरादधे ॥ शिशुपालवधम् ६.३२ ॥ |
| नवकनकपिशङ्गं वासराणां विधातुः ककुभि कुलिशपाणेर्भाति भासां वितानं । जनितभुवनदाहारम्भमम्भांसि दग्ध्वा ज्वलितमिव महाब्धेरूर्ध्वमौर्वानलार्चिः ॥ शिशुपालवधम् ११.४३ ॥ |
| नवकुङ्कुमारुणपयोधरया स्वकरावसक्तरुचिराम्बरया । अतिसक्तिमेत्य वरुणस्य दिशा भृशमन्वरज्यदतुषारकरः ॥ शिशुपालवधम् ९.७ ॥ |
| नवकुमुदवनश्रीहासकेलिप्रसङ्गादधिकरुचिरशेषामप्युषां जागरित्वा । अयमपरदिशोऽङ्गे मुञ्चति स्रस्तहस्तः शिशयिषुरपि पाण्डुं म्लानमात्मानमिन्दुः ॥ शिशुपालवधम् ११.२२ ॥ |
| नवगन्धवारिविरजीकृताः पुरो घनधूपधूम कृतरेणुविभ्रमाः । प्रचुरोद्धतध्वजविलम्बिवाससः प्रवीथयोऽथ हरिणातिपेतिरे ॥ शिशुपालवधम् १३.४९ ॥ |
| नवचन्द्रकाकुसुमकीर्णतमःकबरीभृतो मलयजार्द्रमिव । ददृशे ललाटतटहारि हरेर्हरितो मुखे तुहिनरश्मिदलं ॥ शिशुपालवधम् ९.२८ ॥ |
| नवनखपदमङ्गं गोपयस्यंशुकेन स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टं । प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्नवपरिमलगन्धः केन शक्यो वरीतुं ॥ शिशुपालवधम् ११.३४ ॥ |
| नवनगवनलेखाश्यामध्याभिराभिः स्फटिककटकभूमिनाटयत्येष शैलः । अहिपरिकरभाजो भास्मनैरङ्गरागै- रधिगतधवलिम्नः शूलपाणेरभिख्याम् ॥ शिशुपालवधम् ४.६५॥ |
| नवपयः कणकोमल मालतीकुसुमसंततिसंततसङ्गिभिः । प्रचलितोडुनिभैः परिपाण्डिमाः शुभरजोभरजोऽलिभिराददे ॥ शिशुपालवधम् ६.३६ ॥ |
| नवपरिणयलज्जाभूषणां तत्र गौरीं वदनमपहरन्तीं तत्कृताक्षेपमीशः। अपि शयनसखीभ्यो दत्तवाचं कथंचि-त्प्रमथमुखविकारैर्हासयामास गूढम्॥ कुमारसंभवम् ७.९५॥ |
| नवपलाशपलाशवनं पुरः स्फुटस्फटपरागतपङ्गजं । मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुमनोभरैः ॥ शिशुपालवधम् ६.२ ॥ |
| नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितं । तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणं ॥ रघुवंशम् ८.५७ ॥ |
| नवपल्लवाञ्जलिभृतः प्रचये बृहतस्तरून्गमयतावनतिं । स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयताम्पयतीं वसुधां ॥ किरातार्जुनीयम् ६.२६ ॥ |
| नवभूम्यः शिववह्नयोऽक्षविश्वेऽर्ककृताः शक्ररसास्तुरङ्गतिथ्यः । द्विदिशोऽमावसवश्च पूर्वतः स्युस्तिथयः सम्मुखवामगा न शस्ताः ॥ मुहूर्त.यात्राप्रकरणम् ३४॥ |
| नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनाम् । विहितसांध्यमयूखं इव क्वचिन्निचितकाञ्चनभित्तिषु सानुषु ॥ किरातार्जुनीयम् ५.८ ॥ |
| नवहाटकेष्टकचितं ददर्श स क्षितिपस्य पस्त्यमथ तत्र संसदि । गगनस्पृशां मणिरुचां चयेन यत्सदनान्युदयस्मयत नाकिनामपि ॥ शिशुपालवधम् १३.६३ ॥ |
| नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः । दृशा नृपेण स्मितशोभिकुङ्मला दरादराभ्यां दरकम्पिनी पपे ॥ नैषधीयचरितम् १.८५ ॥ |
| नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ । चकासयन्तीमरविन्दजं रजः परिश्रमाम्भःपुलकेन सर्पता ॥ किरातार्जुनीयम् ४.८ ॥ |
| नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम् । क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शंभुना ॥ शिशुपालवधम्  १.४ ॥ |
| नवान्नं स्याच्चरक्षिप्रमृदुभे सत्तनौ शुभम् । विना नन्दाविषघटीमधुपौषाकिभूमिजान् ॥ मुहूर्त.नक्षत्रप्रकरणम् ३७॥ |
| नवौ युवानौ निजभावगोपिनावभूमिषु प्राग्विहितभ्रमिक्रमः । दृशोर्विधत्तः स्म यदृच्छया किल त्रिभागमन्योन्यमुखे पुनः पुनः ॥ नैषधीयचरितम् १६.७५ ॥ |
| नस्यागृहीतोऽपि धुवन्विषाणयोर्युगं ससूत्कारविवर्तितत्रिकः । गोणीं जनन स्म निधातुमुद्धृतामनुक्षणं नोक्षतरः प्रतीच्छति ॥ शिशुपालवधम् १२.१० ॥ |
| नाकलोकभिषाजोः सुषमा या पुष्पचापमपि चुम्बति सैव । वेद्मि तादृगभिषज्यदसौ तद्द्वारसंक्रमितवैद्यकविद्यः ॥ नैषधीयचरितम् ५.४६ ॥ |
| नाकेऽपि दीव्यत्तमदिव्यवाचि वचःस्रगाचार्यकवित्कविर्यः । दैतेयनीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत् ॥ नैषधीयचरितम् १०.५९ ॥ |
| नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि । इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ॥ नैषधीयचरितम् ५.१२१ ॥ |
| नाञ्जसा निगदितुं विभक्तिभिर्व्यक्तिभिश्च निखिलाभिरागमे । तत्र कर्मणि विपर्यणीनमन्मन्त्रमूहकुशलः प्रयोगिणः ॥ शिशुपालवधम् १४.२३ ॥ |
| नात्तगन्धमवधूय शत्रुभिश्छायया च शमितामरश्रमं । योऽभिमानमिव वृत्रविद्विषः पारिजातमुदमूलयद्दिवः ॥ शिशुपालवधम् १४.८४ ॥ |
| नात्र चित्रमनु तं प्रययौ यत्पर्वतः स खलु तस्य सपक्षः । नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥ नैषधीयचरितम् ५.२ ॥ |
| नादं निषादमधुरं ततमुज्जगार साभ्यासभागवनिभृत्कुलकुञ्जरस्य । स्तम्बेरमीव कृतसश्रुतिमूर्धकम्पा वीणा विचित्रकरचापलमाभजन्ती ॥ नैषधीयचरितम् २१.१२८ ॥ |
| नादातुमन्यकरिमुक्तमदाम्बुतिक्तं धूताङ्कुशेन न विहातुमपीच्छताम्भः । रुद्धे गजेन सरितः सरुषावतारे रिक्तोदपात्रकरमास्त चिरं जनौघः ॥ शिशुपालवधम् ५.३३ ॥ |
| नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत् । न व्यापारशतेनापि शुकवत्पाठ्यते बकः  ॥ नीतिसंग्रहस्य मित्र-०.४२ ॥ |
| नानवाप्तवसुनार्ऽथकाम्यता नाचिकित्सितगदेन रोगिणा । इच्छताशितुमनाशुषा न च प्रत्यगामि तदुपेयुषा सदः ॥ शिशुपालवधम् १४.४९ ॥ |
| नानाजाववजानाना सा जनौघघनौजसा । परानिहऽहानिराप तान्वियाततयान्विता ॥ शिशुपालवधम् १९.४० ॥ |
| नानाप्रभेदा नियता क्वचित्प्रकरणादिना । अर्थेऽर्थमन्यं यं वक्ति तद्वाच्यव्यङ्ग्यमिष्यते ॥ चन्द्रालोकः७.१७ ॥ |
| नानारत्नज्योतिषां संनिपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु । बद्धां बद्धां भित्तिशङ्कामम़ुष्मिन्नावानावान्मातरिश्वा निहन्ति ॥ किरातार्जुनीयम् ५.३६ ॥ |
| नानाविधाविष्कृसामजस्वरः सहस्रवर्त्मा चपलैर्दुरध्ययः । गान्धर्वभूयष्ठतया समानतां स सामवेदस्य दधौ बलोदधिः ॥ शिशुपालवधम् १२.११ ॥ |
| नान्दीश्राद्धोत्तरं मातुः पुष्पे लग्नान्तरे न हि । शान्त्या चौलं व्रतं पाणिग्रहः कार्योऽन्यथा न सत् ॥ मुहूर्त.संस्कारप्रकरणम् ५८॥ |

| |
|---|
| नापगेयमनयः सशरीरं दयां वरेण नितरामपि भक्तम् । मा स भूत्सुरवधूसुरतज्ञो दिव्यपि व्रतविलोपभियेति ॥ नैषधीयचरितम् २१.८२ ॥ |
| नापचारमगमन्क्कचित्क्रियाः सर्वमत्र समपादि साधनं । अत्यशेरत परस्परं धियः सत्त्रिणां नरपतेश्चसंपदः ॥ शिशुपालवधम् १४.३२ ॥ |
| नाप्रायमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् । आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥ नीतिसंग्रहस्य मित्र-१.१६३ ॥ |
| नाबुद्ध बाला विबुधेषु तेषु क्षोदं क्षितेरैक्षत नैषधे तु । पत्ये सृजन्त्याः परिरम्भमुर्व्याः संभूतसंभेदमसंशयं सा ॥ नैषधीयचरितम् १४.२ ॥ |
| नाभिदेशनिहितः सकम्पया शंकरस्य रुरुधे तया करः। तद्दुकूलमथ चाभवत्स्वयं दूरमुच्छ्वसितनीविबन्धनम्॥ कुमारसंभवम् ७.४॥ |
| नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा । अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ॥ रघुवंशम् १३.६ ॥ |
| नाभियोक्तुमनृतं त्वमिष्यते कस्तपस्विविशिखेषु चादरः । सन्ति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥ किरातार्जुनीयम् १३.५८ ॥ |
| नाभिह्रदैः परिगृहीतरयाणि निम्नैः सत्रीणांबृहज्जघनसेतुनिवारितानि । जग्मुर्जलानि जलमुडुकवाद्यवल्गु-वल्गद्धनस्तनतटस्खलितानि मन्दम् ॥ शिशुपालवधम् ५.२९ ॥ |
| नाभूद्भूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः । नास्थादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥ नैषधीयचरितम् १०.२ ॥ |
| नाभ्यधायि नृपते भवतेदं रोहिणीरमणवंशभुवैव । लज्जते न रसना तव वाम्यादर्थिषु स्वयमुरीकृतकाम्या ॥ नैषधीयचरितम् ५.११७ ॥ |
| नाभ्यस्ता प्रतिवादि-वृन्द-दमनी विद्या विनीतोचिता खड्गाग्रैः करि-कुम्भ-पीठ-दलनैर्नाकं न नीतं यशः। कान्ताकोमल-पल्लवाधर-रसः पीतो न चन्द्रोदये तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत्॥॥ वैराग्यशतकम् ४६ ॥ |
| नाम वल्लभजनस्य ते मया प्राप्य भाग्यमपि तस्य काङ्क्ष्यते । लोलुपं बत मनो ममेति तं गोत्रविस्खलितं ऊचुरङ्गनाः ॥ रघुवंशम् १९.२४ ॥ |
| नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाद्रियत द्राक् । पर्वतोऽपि लभतां कथमर्चां न द्विजः सविबुधप्रभुलम्भी ॥ नैषधीयचरितम् ५.१ ॥ |
| नामाक्षराणां मलना मा भूद्भर्तुरतः स्फुटं । अगृह्णत पराङ्गनामसूनस्रं न मार्गणाः ॥ शिशुपालवधम् १९.११० ॥ |
| नाम्भसां कमलशोभिनां तथा शाखिनां न च परिश्रमच्छिदाम् । दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः ॥ रघुवंशम् ११.१२ ॥ |
| नारिकेलसमाकारा दृश्यन्ते हि सुहृज्जनाः । अन्ये बदरिकाकारा बहिरेव मनोहराः ॥ नीतिसंग्रहस्य मित्र-१.९५ ॥ |
| नारीभिर्गुरुजघनस्थलानामास्यश्रीविजितविकासिवारिजानां । लोलत्वादपहरतां तदङ्गरागसंजज्ञे स कलुष आशयो जलानां ॥ शिशुपालवधम् ८.४७ ॥ |
| नारे ग्राह्यमृणं तु संक्रमदिने वृद्धौ करेऽर्केऽह्नि य- त्तद्वंशेषु भवेदृणं न च बुधे देयं कदाचिद्धनम् ॥ मुहूर्त.नक्षत्रप्रकरणम् २७ ॥ |
| नार्यस्तन्वि हठाद्धरन्ति रमणं तिष्ठन्ति नो वारिताः तत्किं ताम्यसि किं च रोदिषि मुधा तासां प्रियं मा कृथाः । कान्तः केलिरुचिर्युवा सहृदयस्तद्दिक्पतिः कातरः किं नो बर्करकर्कमैः प्रियशतैराक्रम्य विक्रीयते ॥ अमरुशतकम्-७॥ |
| नाल्पभक्तबलिरन्ननिवेद्यैस्तस्य हारिणमदेन स कृष्णः । शङ्खचक्रजलजातवदर्चः शङ्खचक्रजलपूजनयाभूत् ॥ नैषधीयचरितम् २१.४६ ॥ |
| नावा स्मरः किं हरभीतिगुप्ते पयोधरे खेलति कुम्भ एव । इत्यर्धचन्द्राभनखाङ्कचुम्बिकुचा सखी यत्र सखीभिरूचे ॥ नैषधीयचरितम् ६.६६ ॥ |
| नाशङ्कनीयमेतेषां मतमेतेन दूष्यते । किं तु चक्षुर्मृगाक्षीणां कज्जलेनेव भूष्यते ॥ चन्द्रालोकः १.७ ॥ |
| नासत्यान्तकवह्निधातृशशभृद्रुदादितीज्योरगा ऋक्षेशाः पितरो भगोऽर्यमरवी त्वष्टाशुगाश्च क्रमात् । शक्राग्नी खलुमित्रशक्रनिऋतिक्षीराणि विश्वे विधि- गोविन्दो वसुतोयपाजचरणाहिर्बुध्न्यपूषाभिधाः ॥ मुहूर्त.नक्षत्रप्रकरणम् १ ॥ |
| नासादसीया तिलपुष्पतूणं जगत्त्रयव्यस्तशरत्रयस्य । श्वासानिलामोदभरानुमेयां दधद्द्विबाणीं कुसुमायुधस्य ॥ नैषधीयचरितम् ७.३६ ॥ |
| नासीरसीमनि घनध्वनिरस्य भूयान्कुम्भीरवान्समकरः सहदानवारिः । उत्पद्मकाननसखः सुखमातनोति रत्नैरलंकरणभावमितैर्नदीनः ॥ नैषधीयचरितम् १३.२३ ॥ |
| नासुरोऽयं न वा नागो धरसंस्थो न राक्षसः । ना सुखोऽयं नवाभोगो धरणिस्थो हि राजसः ॥ किरातार्जुनीयम् १५.१२ ॥ |
| नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः । वीक्ष्य वः खलु तनूममृतादं दृङ्निमज्जनमुपैति सुधायाम् ॥ नैषधीयचरितम् ५.९४ ॥ |
| नास्पर्शि दृष्टापि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये । अन्येषु तैराकुलितस्तदस्यां वसत्यसापत्न्यसुखी गुणौघः ॥ नैषधीयचरितम् ७.१७ ॥ |
| नास्माकमस्मान्मदनापमृत्योस्त्राणाय पीयूषरसायनानि । प्रसीद तस्मादधिकं निजं तु प्रयच्छ पातुं रदनच्छदं नः ॥ नैषधीयचरितम् ८.१०४ ॥ |
| नास्य द्विजेन्द्रस्य बभूव पश्य दारान्गुरोर्यातवतोऽपि पातः । प्रवृत्तयोऽप्यात्ममयप्रकाशान्नहन्ति न ह्यन्तिमदेहमाप्तान् ॥ नैषधीयचरितम् २२.१२ ॥ |
| नास्यामृक्षं न तिथिकरणं नैव लग्नस्य चिन्ता नो वा वारो न च लवविधिर्नो मुहूर्तस्य चर्चा । नो वा योगो न मृतिभवनं नैव जामित्रदोषो गोधूलिः सा मुनिभिरुदिता सर्वकार्येषु शस्ता ॥ मुहूर्त.विवाहप्रकरणम् ९९॥ |
| निःशङ्कमङ्कुरिततां रतिवल्लभस्य देवः स्वचन्द्रकिरणामृतसेचनेन । तत्रावलोक्य सुदृशां हृदयेषु रुद्रस्तद्देहदाहफलमाह स किं न विद्मः ॥ नैषधीयचरितम् ११.९१ ॥ |
| निःशङ्कसंकोचितपङ्कजोऽयमस्यामुदीतो मुखमिन्दुबिम्बः । चित्रं तथापि स्तनकोकयुग्मं न स्तोकमप्यञ्चति विप्रयोगम् ॥ नैषधीयचरितम् ७.७७ ॥ |
| निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलं उज्झतामजस्रं । आमोदं व्यवहितभूरिपुष्पगन्धो भिन्नैलासुरभिं उवाह गन्धवाहः ॥ किरातार्जुनीयम् ७.३८ ॥ |
| निःशेषं शकलितवल्कलाङ्गसारैः कुर्वद्भिर्भुवमभितः कषायचित्रां ।ईशानः सकुसुमपल्लवैर्नगैस्तैराततेने बलिं इव रङ्गदेवताभ्यः ॥ किरातार्जुनीयम् १७.६२ ॥ |

| |
|---|
| निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ काव्यप्रकाशः (प्रथमोल्लासः) २ ॥ |
| निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु । नीलोर्ध्वरेखाशबलेन शंसन्दन्तद्वयेनाश्मविकुण्ठितेन ॥ रघुवंशम् ५.४४ ॥ |
| निःश्वासधूमं सह रत्नभाभिर्भित्त्वोत्थितं भूमिमिवोरगाणाम् । नीलोपलस्यूतविचित्रधातुमसौ गिरिं रैवतकं ददर्श ॥ शिशुपालवधम् ४.१॥ |
| निःश्वासधूमैः स्थगितांशुजालं फणावतामुत्फणमण्डलानाम् । गच्छन्निवास्तं वपुरभ्युवाह विलोचनानां सुखमुष्णरश्मिः ॥ किरातार्जुनीयम् १६.३९ ॥ |
| निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते निद्रा नेति न दृश्यते प्रियमुखं रात्रिन्दिवं रुद्यते । अङ्गं शोषमुपैति पादपतितः प्रेयांस्तथोपेक्षितः सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥ अमरुशतकम्-९८॥ |
| निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम् नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या तामेवोष्णैर्विरहशयनेष्वस्रुभिर्यापयन्तीम् ॥ मेघदूतम्, उत्तरमेघः २५ ॥ |
| निःश्शेषमाक्रान्तमहीतलो जलैश्चलन्समुद्रोऽपि समुज्झति स्थितिम् । ग्रामेषु सैन्यैरकरोदवारितैः किमव्यवस्थां चलितोऽपि केशवः ॥ शिशुपालवधम् १२.३६ ॥ |
| निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसंभृतेन मा । तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुश्चदूर्ध्वगम् ॥ कुमारसंभवम् ५.२३ ॥ |
| निखिलामिति कुर्वतश्चिरायद्रुतचामीकरचारुतामिव द्यां । प्रतिघातसमर्थमस्त्रमग्नेरथ मेघङ्करमस्मरन्मुरारिः ॥ शिशुपालवधम् २०.६५ ॥ |
| निगृह्य शोकं स्वयमेव धीमान्वर्णाश्रमावेक्षणजागरूकः । स भ्रातृसाधारणभोगं ऋद्धं राज्यं रजोरिक्तमनाः शशास ॥ रघुवंशम् १४.८५ ॥ |
| निचयिनि लवलीलताविकासे जनयति लोध्रसमीरणे च हर्षं । विकृतिं उपययौ न पाण्डुसूनुश्चलति नयान्न जिगीषतां हि चेतः ॥ किरातार्जुनीयम् १०.२९ ॥ |
| निजघ्निरे तस्य हरेषुजालैः पतन्ति वृन्दानि शिलीमुखानां । ऊर्जस्विभिः सिन्धुमुखागतानि यादांसि यादोभिरिवाम्बुराशेः ॥ किरातार्जुनीयम् १७.२६ ॥ |
| निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा सम्प्रदिष्टा । असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकान्ततोऽत्र ॥ मुहूर्त.विवाहप्रकरणम् ३०॥ |
| निजपाणिपल्लवतलस्खलनादभिनासिकविवरमुत्पतितैः । अपरा परीक्ष्य शनकैर्मुमुदे मुखवासमास्यकमलश्वसनैः ॥ शिशुपालवधम् ९.७२ ॥ |
| निजरजः पटवासमिवाकिरद्धृतपटोपमवारिमुचां दिशाम् । प्रियवियुक्तवधूजनचेतसामनवनी नवनीपवनावलिः ॥ शिशुपालवधम् ६.३७ ॥ |
| निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति । परार्थभारवाहीव स क्लेशस्यैव भाजनम्  ॥ नीतिसंग्रहस्य मित्र-१.१५१ ॥ |
| निजसौरभभ्रमितभृङ्गपक्षतिव्यजनानिलक्षयितघर्मवारिणः । अभिशौरि काचिदनिमेषदृष्टिना पुरदेवतेव वपुषा व्यभाव्यत ॥ शिशुपालवधम् १३.४५ ॥ |
| निजस्य वृत्तान्तमजानतां मिथो मुखस्य रोषात्परुषाणि जल्पतः । मृधं किमच्छत्त्रकदण्डताण्डवं भुजाभुजि क्षोणिभुजां दिदृक्षासे ॥ नैषधीयचरितम् ९.७९ ॥ |
| निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम् । तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः ॥ नैषधीयचरितम् १.६५ ॥ |
| निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोन्मृजाम् । त्वदास्यता यास्यति तावतापि किं वधूवधेनैव पुनः कलङ्कितः ॥ नैषधीयचरितम् ९.१४६ ॥ |
| निजाक्षिलक्ष्मीहसितैणशावकामसावभाणीदपरं परंतपम् । पुरैव तद्दिग्वलनश्रियां भुवा भ्रुवा विनिर्दिश्य सभासभाजितम् ॥ नैषधीयचरितम् १२.४२ ॥ |
| निजादनुव्रज्य स मण्डलावधेर्नलं निवृत्तो चटुलापतां गतः । तडागकल्लोल इवानिलं तटाद्धृतानतिर्व्यावव‍ृते वराटराट् ॥ नैषधीयचरितम् १६.११७ ॥ |
| निजानुजेनातिथितामुपेतः प्राचीपतेर्वाहनवारणेन । सिन्दूरसान्द्रे किमकारि मूर्ध्नि तेनारुणश्रीरयमुज्जिहीते ॥ नैषधीयचरितम् २२.४५ ॥ |
| निजामृतोद्यन्नवनीतजाङ्गीमेतां क्रमोन्मीलितपीतिमानम् । कृत्वेन्दुरस्या मुखमात्मनाभून्निद्रालुना दुर्घटमम्बुजेन ॥ नैषधीयचरितम् १०.१२९ ॥ |
| निजे सृजास्मासु भुजे भजन्त्यावादित्यवर्गे परिवेषवेषम् । प्रसीद निर्वापय तापमङ्गैरनङ्गलीलालहरीतुषारैः ॥ नैषधीयचरितम् ८.९२ ॥ |
| निजौजसोज्जासयितुं जगद्द्रुहामुपाजिहीथा न महीतलं यदि । समाहितैरप्यनिरूपितस्ततः पदं दृशः स्याः कथमीश मादृशाम् ॥ शिशुपालवधम्  १.३७ ॥ |
| नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन । चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ॥ रघुवंशम् ७.२५ ॥ |
| नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः । अचेतना सा च न वाचमर्हेद्वक्ता तु वक्त्रश्रमकर्म भुङ्क्ते ॥ नैषधीयचरितम् ६.१०३ ॥ |
| नित्याया निजवसतेर्निरासिरे यद्रागेण श्रियमरविन्दतः कराग्रैः । व्यक्तत्वं नियतमनेन निन्युरस्याः सापत्न्यं क्षितिसुतविद्विषो महिष्यः ॥ शिशुपालवधम् ८.१५ ॥ |
| निदधिरे दयितोरसि तत्क्षणस्पनवारितुषारभृतः स्तनाः । सरसचन्दनरेणुरनुक्षणं विचकरे च करेण वरोरुभिः ॥ शिशुपालवधम् ६.२४ ॥ |
| निद्रावशेन भवताप्यनपेक्षमाणा पर्युत्सुकत्वमबला निशि खण्डितेव । लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥ रघुवंशम् ५.६७ ॥ |
| निद्राविनोदितनितान्तरतिक्लमानामायामिमङ्गलनिनादविबोधितानां । रामासु भाविविरहाकुलितासु यूनां तत्पूर्वतामिव समादधिरे रतानि ॥ किरातार्जुनीयम् ९.७५ ॥ |
| निधाघधामानमिवाधिदीधितिं मुदा विकासं यतिमभ्युपेयुषी । विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटो भवत् ॥ शिशुपालवधम्  १.२४ ॥ |
| निधानगर्भामिव सागराम्बरां शमीं इवाभ्यन्तरलीनपावकाम् । नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्वां महिषीममन्यत ॥ रघुवंशम् ३.९ ॥ |
| निधिरनंशमभेद्यमवेक्ष्य ते जनमनः खलु लक्ष्मकल्पयत् । अपि स वज्रमदास्यत चेत्तदा त्वदिषुभिर्व्यदलिष्यदसावपि ॥ नैषधीयचरितम् ४.८९ ॥ |
| निध्वनज्जवहारीभा भेजे रागरसात्तमः । ततमानवजारासा सेना मानिजनाहवा ॥ शिशुपालवधम् १९.३४ ॥ |

| |
|---|
| निनाय सात्यन्तहिमोत्किरानिलाः सहस्यरात्रीरुदवासतत्परा । परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती ॥ कुमारसंभवम् ५.२६ ॥ |
| निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् । अद्यैव वा मरणामस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ पुरुषार्थोपदेशः-47॥ |
| निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्ठम् । अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ नीतिशतकम्८४ ॥ |
| निपततापि न मन्दरभूभृता त्वमुदधौ शशलाञ्छन चूर्णितः । अपि मुनेर्जठरार्चिषि जीर्णतां बत गतोऽसि न पीतपयोनिधेः ॥ नैषधीयचरितम् ४.५१ ॥ |
| निपतितेऽधिशिरोधरमायते समं अरत्नियुगेऽयुगचक्षुषः । त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टि मदादिव चस्खले ॥ किरातार्जुनीयम् १८.६ ॥ |
| निपपात सम्भ्रमभृतः श्रवणादसितभ्रुवः प्रणदितासिकुलं । दयितावलोकविकसन्नयनप्रसरप्रणुन्नमिव वारिरुहं ॥ शिशुपालवधम् ९.७१ ॥ |
| निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलं । पाणिनीयमिवावलोकि धीरैस्तत्समराजिरं ॥ शिशुपालवधम् १९.७५ ॥ |
| निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः । सोद्योगं नरमायान्ति विवशाः सर्वसम्पदः ॥ नीतिसंग्रहस्य मित्र-१.१६७ ॥ |
| निपीडनादिव मिथो दानतोयनारतं । वपुषामदयापातादिभानामभितोऽगलत् ॥ शिशुपालवधम् १९.६८ ॥ |
| निपीड्य तरसा तेन मुक्ताः काममनास्थया । उपाययुर्विलक्षत्वं विद्विषो न शिलीमुखाः ॥ शिशुपालवधम् १९.१८ ॥ |
| निपीतदूतालपितस्ततो नलं विदर्भभर्तागमयांबभूव सः । निशावसाने श्रुतताम्रचूडवाग्यथा रथाङ्गस्तपनं धृतादरः ॥ नैषधीयचरितम् १५.११ ॥ |
| निपीय पीयूषरसौरसीरसौ गिरः स्वकंदर्पहुताशनाहुतीः । कृतान्तदूतं न तया यथोदितं कृतान्तमेव स्वममन्यतादयम् ॥ नैषधीयचरितम् ९.७२ ॥ |
| निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपि । नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥ नैषधीयचरितम् १.१ ॥ |
| निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा । विडम्बयन्ती ददृशे वधूजनैरमन्ददष्टौष्ठकरावधूननं ॥ किरातार्जुनीयम् ८.६ ॥ |
| निबद्धनिःश्वासविकम्पिताधरा लता इव प्रस्फुरितैकपल्लवाः । व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥ किरातार्जुनीयम् ४.१५ ॥ |
| निमीलदाकेकरलोचचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः । निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥ किरातार्जुनीयम् ८.५३ ॥ |
| निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः । अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुनापि लोचनैः ॥ नैषधीयचरितम् १.२७ ॥ |
| निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन्कटाक्षैः । स रागदर्शीव भृशं ललज्जे स्वतः सतां ह्रीः परतोऽतिगुर्वी ॥ नैषधीयचरितम् ६.२२ ॥ |
| निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् । अदर्शि सङ्गोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः ॥ नैषधीयचरितम् १.४ ॥ |
| निमेषमात्रेऽगणितान् विनाशयन्, निशाचराऽऽभान् यवनान् निरन्तरम् । निभालयन् नाकनिकेतनाऽतिथीन्, ननर्स नासीर-गतो नटेन्द्रवत्॥ प्रतापविजयः-१२३ ॥ |
| निम्नानि दुःखादवतार्य सादिभिः सयत्नमाकृष्टकशाः शनैः शनैः । उत्तेरुरुत्तालखुरारवं द्रुताः श्लथीकृतप्रग्रहमर्वतां व्रजाः ॥ शिशुपालवधम् १२.३१ ॥ |
| निम्नेष्वोधीभूतमस्त्रक्षतानामस्रं भूमौ यच्चकासाञ्चकार । रागार्थं तत्किं नु कौसुम्भमम्भः संव्यानानामन्तकान्तः पुरस्य ॥ शिशुपालवधम् १८.६९ ॥ |
| नियतविषयवर्ती प्रायशो दण्डयोगाज् जगति परवशेऽस्मिन् दुर्लभः साधुवृत्तेः । कृशमपि विकलं वा व्याधितं वाधनं वा पतिमपि कुलनारी दण्डभीत्याभ्युपैति ॥ नीतिसंग्रहस्य मित्र-१.१९१ ॥ |
| नियुज्य तं होमतुरङ्गरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् । अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥ रघुवंशम् ३.३८ ॥ |
| नियुज्यमानेन पुरः कर्मण्यतिगरीयसि । रोप्यमाणोरुगुणं भर्त्रा कार्मुकमानमत् ॥ शिशुपालवधम् १९.९१ ॥ |
| निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवं । नतभ्रुवो मण्डयदि स्म विग्रहे बलिक्रिया चातिलकं तदास्पदं ॥ किरातार्जुनीयम् ८.५२ ॥ |
| निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् । प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥ किरातार्जुनीयम् १.१२ ॥ |
| निरन्तरत्वेन निधाय तन्वि तारासहस्राणि यदि क्रियेत । सुधांशुरन्यः स कलङ्कमुक्तस्तदा त्वदास्यश्रियमाश्रयेत ॥ नैषधीयचरितम् २२.११६ ॥ |
| निरन्तरस्थगितदिगन्तरं ततः समुच्चलद्बलमवलोकयञ्जनः । विकौतुकः प्रकृतमहाप्लवेऽभवद्विशृङ्खलं प्रचलितसिन्धुवारिणि ॥ शिशुपालवधम् १७..३० ॥ |
| निरन्तरालेऽपि विमुच्यमाने दूरं पथि प्राणभृतां गणेन । तेजोमहद्भिस्तमसेव दीपैर्द्विपैरसंबाधमयांबभूवे ॥ शिशुपालवधम् ३.६६ ॥ |
| निरर्थकं तुहीत्यादि पूरणैकप्रयोजनम् । अर्थे विदधदित्यादौ दधदाद्यमवाचकम् ॥ चन्द्रालोकः२.६ ॥ |
| निरस्य दूतः स्म तथा विसर्जितः प्रियोक्तिरप्याह कदुष्णमक्षरम् । कुतूहलेनेव मुहः कुहूरवः विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥ नैषधीयचरितम् ९.३८ ॥ |
| निराकृते यदुभिरिति प्रकोपिभिः स्पशे शनैर्गतवति तत्र विद्विषां । मुरद्विषः स्वनितभयानकानकं बलं क्षणादथ समनह्यताजये ॥ शिशुपालवधम् १७..२० ॥ |
| निरायतामनलशिखोज्ज्वलां ज्वलन्नखप्रभाकृतपरिवेषसंपदं । अविभ्रमद्भ्रमदनलोल्मुकाकृतिं प्रदेशिनीं जगदिव दग्धुमाहुकिः ॥ शिशुपालवधम् १७..९ ॥ |
| निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम् । तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥ किरातार्जुनीयम् ३.९ ॥ |
| निरीक्षितं चाङ्गमवीक्षितं च दृशा पिबन्ती रभसेन तस्य । समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रूः ॥ नैषधीयचरितम् ८.१२ ॥ |
| निरीक्षितुं वियति समेत्यकौतुकात्पराक्रमं समरमुखे महीभृतां । रजस्ततावनिमिषलोचनोत्पलव्यथाकृति त्रिदशगणैः पलाय्यत ॥ शिशुपालवधम् १७..६२ ॥ |
| निरीक्ष्य रम्याः परिवेषिका ध्रुवं न भुक्तमेवैभिरवाप्ततृप्तिभिः । अशक्नुविद्भिर्बहुभुक्तवत्तया यदुज्झिता व्यञ्जनपुञ्जराशयः ॥ नैषधीयचरितम् १६.१०५ ॥ |
| निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यं । असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥ किरातार्जुनीयम् ३.२१ ॥ |

| |
|---|
| निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः । हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रुः शफरीविवृत्तयः ॥ किरातार्जुनीयम् ४.३ ॥ |
| निरीय भूपेन निरीक्षितानना शशंस मौहूर्तिकसंसदंशकम् । गुणैररीणैरुदयास्तनिस्तुषां तदा स दातुं तनयां प्रचक्रमे ॥ नैषधीयचरितम् १५.८ ॥ |
| निरुक्तं स्यान्निर्वचनं नाम्नः सत्यं तथानृतम् । ईदृशैश्चरितै राजन् सत्यं दोषाकरो भवान् ॥ चन्द्रालोकः३.६ ॥ |
| निरुध्यमाना यदुभिः कथंचि= न्मुहुर्यदुच्चिक्षिपुरग्रपादौ । ध्रुवं गुरून् मार्गरुधः करीन्द्रानुल्लङ्घ्य गन्तुं तुरगास्तदीषुः ॥ शिशुपालवधम्  ३.२८ ॥ |
| निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः । न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः  ॥ नीतिसंग्रहस्य मित्र-१.६२ ॥ |
| निर्गुणोऽपि विमुखो न भूपतेर्दानशौण्डमनसः पुरोऽभवत् । वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्यमूषरम् ॥ शिशुपालवधम् १४.४६ ॥ |
| निर्घातोग्रैः कुञ्जलीनाञ्जिघांसुर्ज्यानिर्घोषैः क्षोभयामास सिंहान् । नूनं तेषामभ्यसूयापरोऽभूद्वीर्योदग्रे राजशब्दे मृगेषु ॥ रघुवंशम् ८.६४ ॥ |
| निर्जिताखिलमहार्णवौषधिस्यन्दसारममृतं ववल्गिरे । नाकिनः कथमपि प्रतीक्षितुं हूयमानमनले विषेहिरे ॥ शिशुपालवधम् १४.२९ ॥ |
| निर्दिश्य बन्धूनित इत्युदीरितं दमेन गत्वार्धपथे कृतार्हणम् । विनीतमा द्वारत एव पद्गतां गतं तमैक्षिष्ट मुदा विदर्भराट् ॥ नैषधीयचरितम् १६.१ ॥ |
| निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः । तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुशशयने निशां निनाय ॥ रघुवंशम् १.९५ ॥ |
| निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् । अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥ रघुवंशम् १०.७३ ॥ |
| निर्दोषा लक्षणवती सरीतिर्गुणभूषणा । सालङ्काररसानेक-वृत्तिर्वाक्काव्यनामभाक् ॥ चन्द्रालोकः १.७ ॥ |
| निर्धूतवीतमपि बालकमुल्ललन्तं यन्ता क्रमेण परिसान्त्वनतर्जनाभिः । शिक्षावशेन शनकैर्वशमानिनाय शास्त्रं हि निश्चितधियां क्व न सिद्धमेति ॥ शिशुपालवधम् ५.४७ ॥ |
| निर्धौते सति हरिचन्दने जलौघैरापाण्डोर्गतपरभागयाङ्गनायाः । अह्नाय स्तनकलशद्वयादुपेये विच्छेदः सहृदययेव हारयष्ट्या ॥ शिशुपालवधम् ८.५१ ॥ |
| निर्बन्धपृष्टः स जगाद सर्वं स्तुवन्ति पौराश्चरितं त्वदीयं । अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः ॥ रघुवंशम् १४.३२ ॥ |
| निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहं उक्तः । वित्तस्य विद्यापरिसंख्यया मे कोटीष्चतस्रो दश चाहरेति ॥ रघुवंशम् ५.२१ ॥ |
| निर्भिन्नपातिताश्वीय- निरुद्धरथवर्त्मनि । हतद्विपनगष्ठ्यूत- रुधिराम्बुनदाकुले ॥ किरातार्जुनीयम् १५.२४ ॥ |
| निर्याय विद्याथ दिनादिरम्याद्बिम्बादिवार्कस्य मुखान्महर्षेः । पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ किरातार्जुनीयम् ३.२५ ॥ |
| निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम् । तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ॥ रघुवंशम् ५.८ ॥ |
| निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन । अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या॥ कुमारसंभवम् ३.५२॥ |
| निर्विश्य निर्विरति काशिनिवासि भोगान्निर्माय नर्म च मिथो मिथुनं यथेच्छम् ।गौरीगिरीशघटनाधिकमेकभावं शर्मोर्मिकञ्चुकितमञ्चति पञ्चतायाम् ॥ नैषधीयचरितम् ११.११८ ॥ |
| निर्वृत्तजाम्बूनदपट्टशोभे न्यस्तं ललाटे तिलकं दधानः । तेनैव शून्यान्यरिसुन्दरीणां मुखानि स स्मेरमुखश्चकार ॥ रघुवंशम् १८.४४ ॥ |
| निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः । आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ चन्द्रालोकः६.१५ ॥ |
| निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभावभूः । क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिकः ॥ चन्द्रालोकः६.१३ ॥ |
| निर्वेधैः शशिकरमूलमैत्रपित्र्य ब्राह्मान्त्योत्तरपवनैः शुभो विवाहः । रिक्ताऽमारहिततिथौ शुभेऽह्नि वैश्व-प्रान्त्यांघ्रिः श्रुतितिथिभागतोऽभिजित्स्यात् ॥ मुहूर्त.विवाहप्रकरणम् ५५॥ |
| निलयः श्रियः सततमेतदिति प्रथितं यदेव जलजन्म तया । दिवसात्ययात्तदपि मुक्तमहो चपलाजनं प्रति न चोद्यमदः ॥ शिशुपालवधम् ९.१६ ॥ |
| निलयेषुनक्तमसिताश्मनां चयैर्बिसिनीवधूपरिभवस्पुटागसः । मुहरत्रसद्भिरपि यत्र गौरवाच्छशलाञ्छनांशव उपांशु जघ्निरे ॥ शिशुपालवधम् १३.५४ ॥ |
| निलीयते ह्रीविधुरः स्वजैत्रं शृउत्वा विधुस्तस्य मुखं मुखान्नः । सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ॥ नैषधीयचरितम् ३.३३ ॥ |
| निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा । अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया॥ कुमारसंभवम् ५.७३ ॥ |
| निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः । पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥ रघुवंशम् २.३ ॥ |
| निवर्त्य सो नुव्रजतः कृतानतीनतीन्द्रियज्ञाननिधिर्नभःसदः । समासदत् सादितदैत्यसम्पदः पदं महेन्द्रालयचारु चक्रिणः ॥ शिशुपालवधम्  १.११ ॥ |
| निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् । समनुकम्प्य सपत्नपरिग्रहाननलकानलकानवमां पुरीं ॥ रघुवंशम् ८.१४ ॥ |
| निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् । महोदधेः पूर इवेन्दुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि ॥ रघुवंशम् ३.१७ ॥ |
| निवारिताष्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः । न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः ॥ नैषधीयचरितम् १.११ ॥ |
| निवार्यतामालि! किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः । न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ॥ कुमारसंभवम् ५.८३ ॥ |
| निवासश्चिन्तायाः परपरिभवो वैरमपरं। जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्। वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो हृदिस्थः शोकाग्निर्न च दहति संतापयति च<br><br>॥ (मृच्छकटिकम् १.१५) |
| निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम् । मृदुतनोर्वितनोतु कथं न तामवनिभृत्तु निविश्य हृदि स्थितः ॥ नैषधीयचरितम् ४.११ ॥ |

| |
|---|
| निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः । नितम्बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥ किरातार्जुनीयम् ८.३ ॥ |
| निवृत्ता भोगेच्छा पुरुष-बहु-मानोऽपि गलितः समानाः स्वर्गयाताः सपदि सुहृदो जीवित-समाः। शनैर्यष्ट्युत्थानं घन-तिमिर-रुद्धे च नयने अहो मूढः कायस्तदपि मरणापाय-चकितः॥॥ वैराग्यशतकम् ९ ॥ |
| निवृत्ता भोगेच्छा, पुरुषबहुमानो विगलितः समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः । शनैर्यष्टयुद्धानं धनतिमिररुद्धे च नयने अहो कष्टः कायस्तदपि मरणापायचकितः ॥ पुरुषार्थोपदेशः-18॥ |
| निवेक्ष्यसे यद्यनले नलोज्झिता सुरे तदस्मिन्महती दया कृता । चिरादनेनार्थनयापि दुर्लभं स्वयं त्वयैवाङ्ग यदङ्गमर्प्यते ॥ नैषधीयचरितम् ९.४७ ॥ |
| निवेदितं निश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते । न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम् ॥ कुमारसंभवम् ५.४६ ॥ |
| निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम् । पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥ नैषधीयचरितम् ८.२४ ॥ |
| निवेशयामासिथ हेलयोद्धतं फणाभृतां छादनमेकमोकसः । जगत्त्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तम्भशिरःसु भूतलम् ॥ शिशुपालवधम्  १.३४ ॥ |
| निवेशितं यावकरागदीप्तये लगत्तदीयाधरसीम्नि सिक्थकम् । रराज तत्रैव निवस्तुमुत्सुकं मधूनि निर्धूय सुधासधर्मणि ॥ नैषधीयचरितम् १५.४३ ॥ |
| निवेश्य वामं भुजमासनार्धे तत्संनिवेशादधिकोन्नतांसः । कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ॥ रघुवंशम् ६.१६ ॥ |
| निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीश1प्रतिसक्तमानमाम् । उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ॥ कुमारसंभवम् ५.३ ॥ |
| निशम्य चैवं हामरं निहारयन्, शिरस्तलेऽन्नस्य कणं प्रधारयन् । समुत्थितो भोज्यमलं निवारयन्, ननाद वाक्यं च लसन्महारयम् ॥ प्रतापविजयः- ६९ ॥ |
| निशम्य तदूर्जितं शिनेर्वचनं नप्तुरनाप्तुरेनसां । पुनरुज्झितसाध्वसो द्विषामभिधत्ते स्म वचो वचोहरः ॥ शिशुपालवधम् १६.३८ ॥ |
| निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच । धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥ रघुवंशम् २.५२ ॥ |
| निशम्य राणा - कृतकुतटङ्कृति, स चेतकश्चारु चकार हुङ्कृतिम् । उदग्रवेगोच्छलदच्छ - केशरः, चचाल युद्धेऽप्यचलां प्रचालयन् ॥ प्रतापविजयः-१३० ॥ |
| निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा । नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ किरातार्जुनीयम् १.२७ ॥ |
| निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः । विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥ नैषधीयचरितम् ३.४८ ॥ |
| निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् । भूत्वा शरण्या शरणार्थमन्यां कथं प्रपत्स्ये त्वयि दीप्यमाने ॥ रघुवंशम् १४.६४ ॥ |
| निशान्तनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः । प्रियेण तस्यानपराधबाधिताः प्रकम्पनेनानुचकम्पिरे सुराः ॥ शिशुपालवधम्  १.६१ ॥ |
| निशासु भास्वत्कलनूपुराणां यः संचरोऽभूदभिसारिकाणां । नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः ॥ रघुवंशम् १६.१२ ॥ |
| निशि दशमितामालिङ्गन्त्यां विबोधविधित्सुभिर्निषधवसुधामीनाङ्कस्य प्रियाङ्कमुपेदुषः । श्रुतिमधुपदस्रग्वैदग्धीविभावितभाविकस्फुटरसभृशाभ्यक्ता वैतालिकैर्जगिरे गिरः ॥ नैषधीयचरितम् १९.१ ॥ |
| निशि निरशनाः क्षीरस्यन्तः क्षुधा।श्वकिशोरका मधुरमधुरं हेषन्ते ते विलोलितवालधि । तुरगसमजः स्थानोत्थायं क्वणन्मणिमन्थभूधरभवशिलालेहायेहाचणो लवणस्यति ॥ नैषधीयचरितम् १९.१८ ॥ |
| निशि शशिन्भज कैतवभानुतामसति भास्वति तापय पाप माम् । महमहन्यवलोकयितास्मि ते पुनरहर्पतिनिह्नुतदर्पताम् ॥ नैषधीयचरितम् ४.५४ ॥ |
| निशितासिरतोऽभीको न्येजतेऽमरणा रुचा । सारतो न विरोधी नः स्वाभासो भरवान्त ॥ किरातार्जुनीयम् १५.२२ ॥ |
| निशितासिलतालूनैस्तथा हस्तैर्न हस्तिनः । युध्यमाना यथा दन्तैर्भग्नैरापुर्विहस्तताम् ॥ शिशुपालवधम् १९.६७ ॥ |
| निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् । अपि स्वदेहात्किमुतेन्द्रियार्थाद्यशोधनानां हि यशो गरीयः ॥ रघुवंशम् १४.३५ ॥ |
| निश्चित्य शेषं तमसौ नरेशं प्रमोदमेदस्वितरान्तराभूत् । देव्या गिरां भावितभङ्गिराख्यच्चित्तेन चिन्तार्णवयादसेयम् ॥ नैषधीयचरितम् १४.१३ ॥ |
| निषादिसंनाहमणिप्रभौघे परीयमाणे करिशीकरेण । अर्कत्विषोन्मीलितमभ्युदेति न खण्डं आखण्डलकार्मुकस्य ॥ किरातार्जुनीयम् १६.१२ ॥ |
| निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा । घनाम्बुना राजपथे हि पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते ॥ नैषधीयचरितम् ९.३६ ॥ |
| निषेधवेषो विधिरेष तेऽथवा तवैव युक्ता खलु वाचि वक्रता । विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः ॥ नैषधीयचरितम् ९.५ ॥ |
| निषेव्यमाणेन शिवैरुद्भिरध्यास्यमाना हरिणा चिराय । उद्रश्मिरत्नाङ्कुरधाम्नि सिन्धावाहवास्त मेरावमरावतीं या ॥ शिशुपालवधम्  ३.६१ ॥ |
| निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् । तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥ कुमारसंभवम् ३.४२ ॥ |
| निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः । सीमानः प्रदरोदरेषु विरलस्वल्पाम्भसो यास्वयं तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ (उत्तररामचरितम् २.१६) |
| निष्प्रहन्तुममरेशविद्विषामर्थितः स्वयमथ स्वयंभुवा । सम्प्रति श्रयति सूनुतामयं कश्यपस्य वसुदेवरूपिणः ॥ शिशुपालवधम् १४.८२ ॥ |

| |
|---|
| निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना । चकासतं चारूचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥ शिशुपालवधम् १.८ ॥ |
| निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः । तवानुभावोऽयमबोधि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ किरातार्जुनीयम् १.६ ॥ |
| निसर्गभिन्नास्पदं एकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च । कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया ॥ रघुवंशम् ६.२९ ॥ |
| निसर्गरक्तैर्वलयावबद्धहताम्राश्मरश्मिच्छुरितैर्नखाग्रैः । व्यद्योततताद्यापि सुरारिवक्षोविक्षोभजासृक्स्नपितैरिवासौ ॥ शिशुपालवधम् ३.३.७ ॥ |
| निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्तिकूटावटस्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायं करः । उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरंगक्षुराक्षुण्णासु क्षितिषु क्षिपन्निव यशः क्षोणीजबीजव्रजम् ॥ नैषधीयचरितम् १२.६६ ॥ |
| निहतोन्मददुष्टकुञ्जराद्दधतो भूरि यशः क्रमार्जितं । न बिभेति रणे हरेरपि क्षितिपः का गणनास्य वृष्णिषु ॥ शिशुपालवधम् १६.७९ ॥ |
| निहितसरसयावकैर्बभासे चरणतलैः कृतपद्धतिर्वधूनां । अविरलवितत्तेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ किरातार्जुनीयम् १०.३ ॥ |
| नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोस्त्वत्सम्पर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः । यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥ मेघदूतम्, पूर्वमेघः २५॥ |
| नीते पलाशिन्युचिते शरीरवत्गजान्तकेनान्तमदान्तकर्मणा । संचेरुरात्मान इवापरं क्षणात्क्षमारुहं देहमिव प्लवंगमाः ॥ शिशुपालवधम् १२.७५ ॥ |
| नीते भेदं धौतधाराभिघातादम्भोदाभे शात्रवेणापरस्य । सासृग्राजिस्तीक्ष्णमार्गस्य मार्गो विद्युद्दीप्तः कङ्कटे लक्ष्यते स्म ॥ शिशुपालवधम् १८.२० ॥ |
| नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागा रत्नैः । ज्योत्स्नाशङ्कां इव वितरति हंसश्येनी मध्येऽप्यहनः स्फटिकरजतभित्तिच्छाया ॥ किरातार्जुनीयम् ५.३१ ॥ |
| नीत्वोच्चैर्विक्षिपन्तः कृततुहिनकणासारसङ्गान् परागान्कौन्दान् आनन्दितालीन् अतितरसुरभीन् भूरिशो दिङ्मुखेषु । एते ते कुङ्कुमाक्तस्तनकलसभरास्फालनाद् उच्छलन्तः पीत्वा शीत्कारिवक्त्रं शिशुहरिदृशां हैमना वान्ति वाताः ॥ अमरुशतकम्-७४॥ |
| नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् । दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥ मेघदूतम्, पूर्वमेघः २१॥ |
| नीपान्वयः पार्थिव एष वज्वा गुणैर्यमाश्रित्य परस्परेण । सिद्धाश्रमं शान्तमिवैत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः ॥ रघुवंशम् ६.४६ ॥ |
| नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं पर्यस्यन्नवसलिलारुणं वहन्ती । आतेने वनगहनानि वाहिनी सा घर्मान्तक्षुभितजलेव जह्नुकन्या ॥ किरातार्जुनीयम् ७.२५ ॥ |
| नीरन्ध्रं परिगमिते क्षयं पृषत्कैर्भूतानामधिपतिना शिलाविताने । च्छ्रायस्थगितनभोदिगन्तरालं चिक्षेप क्षितिरुहजालं इन्द्रसूनुः ॥ किरातार्जुनीयम् १७.६१ ॥ |
| नीरन्ध्रद्रुशिशिरां भुवं व्रजन्तीः साशङ्कं मुहुरिव कौतुकात्करैस्ताः । पस्पर्श क्षणमनिलाकुलीकृतानां शाखानामतुहिनरश्मिरन्तरालैः ॥ शिशुपालवधम् ८.३ ॥ |
| नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत् । भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः॥ कुमारसंभवम् ७.१२॥ |
| नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः । खे रराज निपतत्करजालं वारिधेः पयसि गाङ्गमिवाम्भः ॥ किरातार्जुनीयम् ९.१९ ॥ |
| नीलनीररुहमाल्यमयीं स न्यस्य तस्य गलनालविभूषाम् ।स्फाटिकीमपि तनुं निरमासीन्नीलकण्ठपदसान्वयतायै ॥ नैषधीयचरितम् २१.३६ ॥ |
| नीलेन पक्ष-निवहेन खमाहसन्तः, चञ्चवा फलानि विमलानि समञ्चयन्तः । 'श्रीराम' नाम मधुरं मधुरं क्वणन्तः, अद्यापि यत्र सुशुका विलसन्ति सन्तः ॥ प्रतापविजयः-१५२। |
| नीलेनानालनलिननिलीनोल्ललनालिना । ललनालालनेनालं लीलालोलेन लालिना ॥ शिशुपालवधम् १९.८४ ॥ |
| नीवारपाकादि कडम्गरीयैरामृश्यते जानपदैर्न कच्चित् । कालोपपन्नातिथिकल्पभागं वन्यं शरीरस्थितिसाधनं वः ॥ रघुवंशम् ५.९ ॥ |
| नीवारौदनमण्डमुष्णमधुरं सद्यः प्रसूतप्रिया- पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति । गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते ॥ (उत्तररामचरितम् ४.१) |
| नीवीबन्धोच्छ्वसनशिथिलं यत्र यक्षाङ्गनानां वासः कामादनिभृतकरेष्वाक्षिपत्सु प्रियेषु । अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्ह्रीमूढानां भवति विफलप्रेरणश्चूर्णमुष्टिः ॥ मेघदूतम्, उत्तरमेघः ६ ॥ |
| नीहार - सार - शिशिरं श्वसितं त्वदीयं, तन्मन्द मन्द मधुरं हसितं त्वदीयम् । तद्दुग्ध-मुग्ध-वदनं सदनं सुखानां लब्धा स्तनन्धयशिशु कदा वदाऽम्ब ! ॥ प्रतापविजयः-९ ॥ |
| नीहारजालमालिनः पुनरुक्तसान्द्राः कुर्वधूजनविलोचनपक्ष्ममालाः । क्षुण्णः क्षणं यदुबलैर्दिवमाततांसुः पांशुर्दिसां मुखमतुत्थयदुत्थितोऽद्रेः ॥ शिशुपालवधम् ५.११ ॥ |
| नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंतति । अवाप्तकिञ्जल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः ॥ किरातार्जुनीयम् ४.५ ॥ |
| नूनं तस्याः प्रबलरुदितोच्छूननेत्रं बहूनां निःश्वासानामशिशिरतया भिन्नवर्णाधरौष्ठम् हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वादिन्दोर्दैन्यं त्वदुपसरणक्लिष्टकान्तेर्बिभर्ति ॥ मेघदूतम्, उत्तरमेघः १८ ॥ |
| नूनं त्वया परिभवं च वनं च घोरं तां च व्यथां प्रसवकालकृतामवाप्य । क्रव्याद्गणेषु परितः परिवारयत्सु संत्रस्तया शरणमित्यसकृत्स्मृतोऽहम् ॥ (उत्तररामचरितम् ४.२३) |

| |
|---|
| नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः । न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ रघुवंशम् १.६६ ॥ |
| नूनमत्रभवतः शराकृतिं सर्वथायमनुयाति सायकः । सोऽयमित्यनुपपन्नसंशयः कारितस्त्वमपथे पदं यया ॥ किरातार्जुनीयम् १३.४५ ॥ |
| नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपातान्विजहुर्हरिण्यः । तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि ॥ रघुवंशम् १४.६९ ॥ |
| नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री । महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ॥ रघुवंशम् ६.५२ ॥ |
| नृपः कराभ्यामुदतोलयन्निजे नृपानयं यान्पततः पदद्वये । तदीयचूडाकुरुविन्दरश्मिभिः स्फुटेयमेतत्करपादरञ्जना ॥ नैषधीयचरितम् १२.८ ॥ |
| नृपः पुरस्थैः प्रतिबद्धवर्त्मा पश्चात्तनैः कश्चन नुद्यमानः । यन्त्रस्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥ नैषधीयचरितम् १०.६ ॥ |
| नृपतावधिक्षिपति शौरिमथ सुरसरित्सुतो वचः । स्माह चलयति भुवं मरुति क्षुभितस्य नादमनुकुर्वदम्बुधेः ॥ शिशुपालवधम् १५.४४ ॥ |
| नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा । परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरं ॥ रघुवंशम् ८.१८ ॥ |
| नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार चेतः । उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलङ्घ्यमस्ति ॥ किरातार्जुनीयम् १०.६ ॥ |
| नृपतेः प्रतिषिद्धं एव तत्कृतवान्पङ्क्तिरथो विलङ्घ्य यत् । अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः ॥ रघुवंशम् ८.७४ ॥ |
| नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु तथैव संस्थिता । प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ॥ रघुवंशम् ८.४० ॥ |
| नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः । शरणार्थमुवास वासरेऽप्यसदावृत्त्युदयत्तमं तमः ॥ नैषधीयचरितम् २.७५ ॥ |
| नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु । अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत ॥ नैषधीयचरितम् २.८ ॥ |
| नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः । स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि ॥ किरातार्जुनीयम् १०.४४ ॥ |
| नृपस्य तत्राधिकृताः पुनः पुनर्विचार्य तान्बन्धमवापिपन्कचाण् । कलापलीलोपनिधिर्गरुत्यजः स यैरपालापि कलापिसंपदः ॥ नैषधीयचरितम् १५.६४ ॥ |
| नृपस्य तत्राधिकृताः पुनः पुनर्विचार्य तान्बन्धमवापिपन्कचान् ।कलापलीलोपनिधिर्गरुत्यजः स यैरपालापि कलापिसंपदः ॥ नैषधीयचरितम् १५.५८ ॥ |
| नृपस्य वर्णाश्रमरक्षणं यत्स एव धर्मो मनुना प्रणीतः । निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ॥ रघुवंशम् १४.६७ ॥ |
| नृपाणां हितं क्षौरभे श्मश्रुकर्म दिने पञ्चमे पञ्चमेऽस्योदये वा । षडग्निस्त्रिमैत्रोऽष्टकः पञ्चपित्र्योऽब्दतोऽब्ध्यर्यमा क्षौरकृन्मृत्युमेति ॥ मुहूर्त.संस्कारप्रकरणम् ३६॥ |
| नृपानुपक्रम्य विभूषितासनान्सनातनी सा सुषुवे सरस्वती । विहारमारभ्य सरस्वतीः सुधासरःस्वतीवार्द्रतनूरनूत्थिताः ॥ नैषधीयचरितम् १२.४ ॥ |
| नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः । विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽदत्त न कौमुदीमुदः ॥ नैषधीयचरितम् १.९९ ॥ |
| नृपेऽनुरूपे निजरूपसंपदां दिदेश तस्मिन्बहुशः श्रुतिं गते । विशिष्य सा भीमनरेन्द्रनन्दना मनोभवाज्ञैकवशंवदं मनः ॥ नैषधीयचरितम् १.३३ ॥ |
| नृपेक्षणं सर्वकृतिश्च सङ्गरः शास्त्रं विवाहो गमदीक्षणे रवेः । वीर्येऽथ ताराबलतः शुभो विधुर्विधोर्बलेऽर्कोऽर्कबले कुजादयः ॥ मुहूर्त.संक्रान्तिप्रकरणम्  १९ ॥ |
| नृपेण पाणिग्रहणस्पृहेति नलं मनः कामयते ममेति । आश्लेषि न श्लेषकवेर्भवत्याः श्लोकद्वयार्थः सुधिया मया किम् ॥ नैषधीयचरितम् ३.६९ ॥ |
| नेच्छन्ती सममुना सरोऽवगाढुं रोधस्तः प्रतिजलमीरिता सखीभिः । आश्लक्षद्भयचकितेक्षणं नवोढा वोढारं विपदि न दूषितातिभूमिः ॥ शिशुपालवधम् ८.२० ॥ |
| नेता यस्य बृहस्पतिः, प्रहरणं वज्रं, सुराः सैनिकाः स्वर्गो दुर्गमनुग्रहः किल हरैरैरावतो वारणः । इत्यैश्वर्यबलान्वितोऽपि बलभिद्भग्नः परैः सङ्गरे, तद् व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ नीतिशतकम्८८ ॥ |
| नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः । मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ॥ रघुवंशम् ६.७ ॥ |
| नेत्रा नीताः सततगतिना यद्विमानाग्रभूमीरालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः । शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालैर्धूमोद्गारानुकृतिनिपुणं जर्जरा निष्पतन्ति ॥ मेघदूतम्, उत्तरमेघः ५ ॥ |
| नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषायग्रहाणि । प्रापुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानाम् ॥ नैषधीयचरितम् ३.३ ॥ |
| नेत्रारविन्दत्वमगान्मृगाङ्कः पुरा पुराणस्य यदेष पुंसः । अस्याङ्क एवायमगात्तदानीं कनीनिकेन्दिन्दिरसुन्दरत्वम् ॥ नैषधीयचरितम् २२.९ ॥ |
| नेयार्थं लक्षणात्यन्त-प्रसरादमनोहरम् । हिमांशोर्हारधिक्कार-जागरे यामिकाः कराः ॥ चन्द्रालोकः२.११ ॥ |
| नेष्टं ग्रहर्क्ष सकलार्धपादग्रासे क्रमात्तर्कगुणेन्दुमासान् । पूर्वं परस्तादुभयोस्त्रिघस्रग्रस्तेऽस्तगे वाप्युदितेऽर्धखण्डे ॥ मुहूर्तचिन्त.३३ ॥ |
| नैकवर्णमणिभूषणपूर्णे स क्षितीन्दुरनवद्यनिवेद्ये । अध्यतिष्ठदमलं मणिपीठं तत्र चित्रसिचयोच्चयचारौ ॥ नैषधीयचरितम् २१.३१ ॥ |
| नैक्षतार्थिनमवज्ञया मुहुर्याचितस्तु न च कालमाक्षिपत् । नादिताल्पमथ न व्यकत्थयद्दत्तमिष्टमपि नान्वशेत सः ॥ शिशुपालवधम् १४.४५ ॥ |
| नैनं त्यज क्षीरधिमन्थनाद्यैरस्यानुजायोदगमितामरैः श्रीः । अस्मै विमथ्येक्षुरसोदमन्यां श्राम्यन्तु नोत्थापयितुं श्रियं ते ॥ नैषधीयचरितम् ६.८ ॥ |
| नैरन्तर्यच्छिन्नदेहान्तरालं दुर्भक्षस्य ज्वालिना वाशितेन । योद्धुर्बाणप्रोतमादीप्य मांसं पाकापूर्वस्वादमादे शिवाभिः ॥ शिशुपालवधम् १८.७६ ॥ |
| नैरृतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात् । ज्योतिरिन्धनैपाति भास्करात्सूर्यकान्त इव ताडकान्तकः ॥ रघुवंशम् ११.२१ ॥ |
| नैव नः प्रियतमोभयथासौ यद्यमुं न वृणुते वृणुते वा । एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः ॥ नैषधीयचरितम् ५.६९ ॥ |

| |
|---|
| नैवाकृतिः फलति नैव कुलं न शीलं विद्यापि नैव न च यत्नकृतापि सेवा । भाग्यानि पूर्वतपसा खलु सञ्चितानि काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ नीतिशतकम्९६ ॥ |
| नैवाल्पमेधसि पटो रुचिमत्त्वमस्य मध्येसमिन्निवसतो रिपवस्तृणानि । उत्थानवानिह पराभवितुं तरस्वी शक्यः पुनर्भवति केन विरोधिनायम् ॥ नैषधीयचरितम् १३.१३ ॥ |
| नैषधे बत वृते दमयन्त्या व्रीडितो नहि बहिर्भवितास्मि । स्वां गृहेऽपि वनितां कथमास्यं ह्रीनिमीलि खलु दर्शयिताहे ॥ नैषधीयचरितम् ५.७१ ॥ |
| नो कर्कनक्रझषकुम्भनवांशलग्ने नोऽब्जे तनौ रविशशीज्यकुजे त्रिकोणे । केन्द्रर्क्षषट्त्रिभवगे च परैस्त्रिलाभ षट्खस्थितैर्निधनशुद्धियुते विलग्ने ॥ मुहूर्त.ग्न्याधानप्रकरणम् २॥ |
| नो ददासि यदि तत्त्वधियं मे यच्छ मोहमपि तं रघुवीर । येन रावणचमूर्युधि मूढा त्वन्मयं जगदपश्यदशेषम् ॥ नैषधीयचरितम् २१.७१ ॥ |
| नोच्चैर्यदा तरुतलेषु ममुस्तदानीं आधोरणैरभिहिताः पृथुमूलशाखाः । बन्धाय चिच्छिदुरिभास्तरसात्मनैव नैवात्मनीनमथ वा क्रियते मदान्धैः ॥ शिशुपालवधम् ५.४४ ॥ |
| नोज्झितुं युवतिमानसनिरासे दक्षमिष्टमधुवासरसां । चूतमालिरलिनामतिरागादक्षमिष्ट मधुवासरसारं ॥ शिशुपालवधम् ६.६८ ॥ |
| न्ाृणां करम्बितमुदामुदयन्मृगाङ्कशङ्कां सृजत्वनघजङ्घि परिभ्रमन्त्याः । तत्रोदयाद्रिशिखरे तव दृश्यमास्यं कश्मीरसंभवसमारचनाभिरामम् ॥ नैषधीयचरितम् ११.४४ ॥ |
| न्यग्रोधनादिव दिवः पतदातपादेर्न्यग्रोधमात्मभरधारमिवावरोहैः । तं तस्य पाकिफलनीलदलद्युतिभ्यां द्वीपस्य पश्य शिखिपत्त्रजमातपत्रम् ॥ नैषधीयचरितम् ११.३ ॥ |
| न्यधित तद्धृदि शल्यमिव द्वयं विरहितां च तथापि च जीवितम् । किमथ तत्र निहत्य निखातवान्रतिपतिः स्तनबिल्वयुगेनं तत् ॥ नैषधीयचरितम् ४.४१ ॥ |
| न्यवीविशत्तानथ राजसिंहान्सिंहासनौघेषु विदर्भराजः । शृङ्गेषु यत्र त्रिदशैरिवैभिरशोभि कार्तस्वरभूधरस्य ॥ नैषधीयचरितम् १०.६७ ॥ |
| न्यवेशि रत्नत्रितये जिनेन यः स धर्मचिन्तामणिरुज्झितो यया । कपालिकोपानलभस्मनः कृते तदेव भस्म स्वकुले स्तृतं तथा ॥ नैषधीयचरितम् ९.७१ ॥ |
| न्यस्तं ततस्तेन मृणालदण्डखण्डं बभासे हृदि तापभाजि । तच्चित्तमग्नैर्मदनस्य बाणैः कृतं शतच्छिद्रमिव क्षणेन ॥ नैषधीयचरितम् ८.८३ ॥ |
| न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः। व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ॥ कुमारसंभवम् १.७ ॥ |
| न्यस्ताक्षरां अक्षरभूमिकायां कात्स्न्र्येन गृह्णाति लिपिं न यावत् । सर्वाणि तावच्छ्रुतवृद्धयोगात्फलान्युपायुङ्क्त स दण्डनीतेः ॥ रघुवंशम् १८.४६ ॥ |
| न्यस्तेयं पश्य कन्दर्प-प्रताप-धवलद्युतिः । केतकी शेखरे शम्भोर्धत्ते चन्द्रकलातुलाम् ॥ चन्द्रालोकः२.३५ ॥ |
| न्यूनं त्वत्खड्गसंभूत-यशःपुष्पं नभस्तटम् । अधिकं भवतः शत्रून्दशत्यसिलताफणी ॥ चन्द्रालोकः२.१८ ॥ |
| पक्वं महाकालफलं किलासीत्प्रत्यग्गिरेः सानुनि भानुबिम्बम् । भिन्नस्य तस्यैव दृषन्निपाताद्बीजानि जानामितमां तमांसि ॥ नैषधीयचरितम् २२.२९ ॥ |
| पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः । नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते ॥ रघुवंशम् १३.७ ॥ |
| पक्षादितस्त्वोजतिथौ घटेणौ मृगेन्द्रनक्रौ मिथुनाङ्गने च । चापेन्दुभे कर्कहरी हयान्त्यौ गोऽन्त्यौ च नेष्टे तिथिशून्यलग्ने ॥ मुहूर्तचिन्त.१७ ॥ |
| पक्षादितोऽर्कदलतण्डुलवारिसर्पिः श्राणा हविष्यमपि हेमजलं त्वपूपम् । भुक्त्वा व्रजेद्रुचकमम्बु च धेनुमूत्रं यावान्नपायसगुडानसृगन्नमुद्गान् ॥ मुहूर्त.यात्राप्रकरणम् ८८॥ |
| पङ्कसंकरविगर्हितमर्हं न श्रियः कमलमाश्रयणाय । अर्थिपाणिकमलं विमलं तद्वासवेश्म विदधीत सुधीस्तत् ॥ नैषधीयचरितम् ५.८७ ॥ |
| पङ्ग्वन्धकाणलग्नानि मासशून्याश्च राशयः । गौडमालवयोस्त्याज्या अन्यदेशे न गर्हिता ॥ मुहूर्तचिन्त.१९ ॥ |
| पचेलिमं दाडिममर्कबिम्बमुत्तार्य संध्या त्वगिवोज्झितास्य । तारामयं बीजभुजादसीयं कालेन निष्ठ्यूतमिवास्थियूथम् ॥ नैषधीयचरितम् २२.१४ ॥ |
| पञ्चद्व्यद्रिकृताष्टरामरसभूयामादिघट्यः शरा विष्टेरास्यमसद्गजेन्दुरसरामाद्रयाश्विवाणाब्धिषु । यामेष्वन्त्यघटीत्रयं शुभकरं पुच्छ तथा वासरे विष्टिस्तिथ्यपरार्धजा शुभकरी रात्रौ तु पूर्वार्धजा ॥ मुहूर्तचिन्त. ४४॥ |
| पञ्चप्रसूतेरपि तस्य राज्ञः प्रियो विशेषेण सुबाहुशत्रुः । वधूचतुष्केऽपि तथैव नान्या प्रिया तनूजाऽस्य यथैव सीता ॥ (उत्तररामचरितम् ४.१६) |
| पञ्चमासाधिके मातुर्गर्भे चौलं शिशोर्न सत् । षञ्चवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि ॥ मुहूर्त.संस्कारप्रकरणम् ३१॥ |
| पञ्चास्याजौ गोमृगौ तौलिकुम्भौ कन्यामीनौ कर्क्यली चापयुग्मे । तत्राऽन्योन्यं चन्द्रभान्वोर्निरुक्तं क्रान्तेः साम्यं नो शुभं मङ्गलेषु ॥ मुहूर्त.विवाहप्रकरणम् ६१॥ |
| पञ्चेषुविजयाशक्तौ भवस्य क्रुध्यतो जयात् । येनान्यविगृहीतारिजयकालनयः श्रितः । १७.२३ ॥ नैषधीयचरितम् |
| पटलमम्बुमुचां पथिकाङ्गना सपदि जीवितसंशयमेष्यती । सनयनाम्बुसखीजन संभ्रमाद्विधुरबन्धुरबन्धुरमैक्षत ॥ शिशुपालवधम् ६.२९ ॥ |
| पटालग्ने पत्यौ नमयति मुखं जातविनया हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् । न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥ अमरुशतकम्-३७॥ |
| पटुत्वं सत्यवादित्वं कथायोगेन बुद्ध्यते । अस्तब्धत्वमचापल्यं प्रत्यक्षेनावगम्यते ॥ नीतिसंग्रहस्य मित्र-१.१०० ॥ |
| पणबन्धमुखान्गुणानजः षडुपायुङ्क्त समीक्ष्य तत्फलं । रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्टकाञ्चनः ॥ रघुवंशम् ८.२१ ॥ |
| पतगश्चिरकाललालनादतिविश्रम्भमवापितो नु सः । अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः ॥ नैषधीयचरितम् २.७ ॥ |
| पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते । इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥ नैषधीयचरितम् २.१३ ॥ |
| पततां परितः परिस्फुरद्भिः परिपिङ्गीकृतदिङ्मुखैर्मयूखैः । सुतरामभवददुरीक्ष्यबिम्बस्तपनस्तत्किरणैरिवात्मदर्शः ॥ शिशुपालवधम् २०.७५ ॥ |

| |
|---|
| पतत्त्रिणां द्राधिमशालिना धनुर्गुणेन संयोगजुषां मनोभुवः । कचेन तस्यार्जितमार्जनश्रिया समेत्य सौभाग्यमलम्भि कुग्नलैः ॥ नैषधीयचरितम् १५.६५ ॥ |
| पतत्त्रिणां द्राधिमशालिना धनुर्गुणेन संयोगजुषां मनोभुवः । कचेन तस्यार्जितमार्जनश्रिया समेत्य सौभाग्यमलम्भि कुङ्नलैः ॥ नैषधीयचरितम् १५.५९ ॥ |
| पतत्प्रकर्षं हीनाऽनुप्रासादित्वे यथोत्तरम् । गम्भीरारम्भदम्भोलि-पाणिरेष समागतः ॥ चन्द्रालोकः२.२० ॥ |
| पतत्येतत्तेजोहुतभुजि कदाचिद्यदि तदा पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः । यशोऽमुष्येवोपार्जयितुमसमर्थेन विधिना कथंचित्क्षीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः ॥ नैषधीयचरितम् १२.४६ ॥ |
| पतत्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वलम् । चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ॥ नैषधीयचरितम् १.१२७ ॥ |
| पतन् पतङ्गप्रतिमस्तपोनिधिः पुरो स्य यावन्न भुवि व्यलीयत । गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः ॥ शिशुपालवधम्  १.१२ ॥ |
| पतन्ति नास्मिन्विशदाः पतत्त्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः । तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणं ॥ किरातार्जुनीयम् ४.२३ ॥ |
| पतिं नगानामिव बद्धमूलं उन्मूलयिष्यंस्तरसा विपक्षं । लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेग इवेश्वरेण ॥ किरातार्जुनीयम् १७.५ ॥ |
| पतिंवरायाः कुलजं वरस्य वा यमः कमप्याचरितातिथिं यदि । कथं न गन्ता विफलीभविष्णुतां स्वयंवरः साध्वि समृद्धिमानपि ॥ नैषधीयचरितम् ९.८१ ॥ |
| पतिते पतङ्गमृगराजि निजप्रतिबिम्बरोषित इवाम्बुनिधौ । अथ नागयूथमलिनानि जगत्परितस्तमांसि परितस्तरिरे ॥ शिशुपालवधम् ९.१८ ॥ |
| पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः । स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा ॥ किरातार्जुनीयम् ६.२७ ॥ |
| पत्तिः पत्तिं वाहमेयाय वाजी नागं नागः स्यन्दनस्थो रथस्थं । इत्थं सेना वल्लभस्येव रागादङ्गेनाङ्गं प्रत्यनीकस्य भेजे ॥ शिशुपालवधम् १८.२ ॥ |
| पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढम् । यन्ता गजस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥ रघुवंशम् ७.३७ ॥ |
| पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् । सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान॥ कुमारसंभवम् ७.१९॥ |
| पत्युर्गिरीणामयशः सुमेरुप्रदक्षिणाद्भास्वदनादृतस्य । दिशस्तमश्चैत्ररथान्यनामपत्रच्छटाया मृगनाभिशेभि ॥ नैषधीयचरितम् २२.३ ॥ |
| पत्यौ वृते भीमजया न वह्नावह्ना स्वमह्नाय निजुह्नुवे यः । जनादपत्रप्य स हा सहायस्तस्य प्रकाशोऽभवदप्रकाशः ॥ नैषधीयचरितम् १४.६४ ॥ |
| पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्? धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम्? यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः? ॥ नीतिशतकम् ९३ ॥ |
| पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम् । तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम्॥ कुमारसंभवम् ७.८९॥ |
| पत्रिवत्यभिमते मधुतुल्यस्वादमोष्ठकं विदद्ङ्क्षौ । लभ्यते स्म परिरक्ततयात्मा यावकेन वियतापि युवत्याः ॥ शिशुपालवधम् १०.९ ॥ |
| पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय । त्वया विपत्स्वप्यविपत्ति रम्यमाविष्कृतं प्रेम परं गुणेषु ॥ किरातार्जुनीयम् ३.१५ ॥ |
| पथामनीयन्त तथाधिवासनान्मधुव्रतानामपि दत्तविभ्रमाः । वितानतामातपनिर्भयास्तदा पटच्छिदाकालिकपुष्पजाः स्रजः ॥ नैषधीयचरितम् १५.१४ ॥ |
| पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् । विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ॥ कुमारसंभवम् १.६ ॥ |
| पदं शतेनाप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः । कुरु प्रसादं तदलंकुरुष्व स्वीकारकृद्भ्रूनटनश्रमेण ॥ नैषधीयचरितम् ६.८२ ॥ |
| पदद्वयेऽस्या नवयावरञ्जना जनैस्तदानीमुदनीयतार्पिता । चिराय पद्मौ परिरभ्य जाग्रती निशीव विश्लिष्य नवा रविद्युतिः ॥ नैषधीयचरितम् १५.४६ ॥ |
| पदातिथेयांल्लिखितस्य ते स्वयं वितन्वती लोचननिर्झरानियम् । जगाद यां सैव मुखान्मम त्वया प्रसूनबाणोपनिषन्निशम्यताम् ॥ नैषधीयचरितम् ९.१४३ ॥ |
| पदाहतः कोपमयो महाफणी मुहुर्मुहुर्न्यञ्चित भोगमण्डलः । पुनर्हतः पादतलेन साम्प्रतं, न मानसिंहो भवता तिरस्कृतः ॥ प्रतापविजयः-७८॥ |
| पदे तदंशे वाक्यांशे वाक्ये वाक्यकदम्बके । यथानुसारमभ्यूहेद्दोषान्शब्दार्थसम्भवान् ॥ चन्द्रालोकः२.३९ ॥ |
| पदे पदे भाविनि भाविनी तं यथा करप्राप्यमवैति नूनम् । तथा सखेलं चलता लतासु प्रतार्य तेनाचकृषे कृशाङ्गी ॥ नैषधीयचरितम् ३.११ ॥ |
| पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा । तदा घटेतापि न वा तदेतत्प्रतिप्रतीकाद्भुतरूपशिल्पम् ॥ नैषधीयचरितम् ७.१ ॥ |
| पदेपदे सन्ति भटा रणोद्भटा नतेषु हिंसारस एष पूर्यते । धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥ नैषधीयचरितम् १.१३२ ॥ |
| पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे । भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम् ॥ नैषधीयचरितम् १.७ ॥ |
| पदोपहारेऽनुपनम्रतापि संभाव्यतेऽपां त्वरयापराधः । तत्कर्तुमर्हाञ्जलिसञ्जनेन स्वसंभृतिः प्राञ्जलतापि तावत् ॥ नैषधीयचरितम् ८.२२ ॥ |
| पद्मभूरिति सृजञ्जगद्रजः सत्वमच्युत इति स्थितिं नयन् । संहरन्हर इति श्रितस्तमस्त्रैधमेष भजति त्रिभिर्गुणैः ॥ शिशुपालवधम् १४.६१ ॥ |
| पद्माकरो दिनकरो विकचीकरोति, चन्द्रो विकासयति कैरवचक्रवालम् । नाभ्यर्थितो जलधरोऽपि जलं ददाति, सन्तः स्वयं परहिते विहिताभियोगाः ॥ नीतिशतकम्७४ ॥ |
| पद्माकारैर्योधवक्त्रैरिभानां कर्णभ्रष्टैश्चामरैरेव हंसैः । सोपस्काराः प्रावहन्नस्रतोयाः स्रोतस्विन्यो वीचिषुच्चैस्तरद्भिः ॥ शिशुपालवधम् १८.७२ ॥ |
| पद्माङ्कसद्मानमवेक्ष्य लक्ष्मीमेकस्य विष्णोः श्रयणात्सपत्नीम् । आस्येन्दुमस्या भजते जिताब्जं सरस्वती तद्विजिगीषया किम् ॥ नैषधीयचरितम् ७.४९ ॥ |
| पद्मान्हिमे प्रावृषि खञ्जरीटान्क्षिप्त्न्यर्मादाय विधिः क्वचित्तान् । सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृष्टिद्वयमेतदीयम् ॥ नैषधीयचरितम् १०.१२ ॥ |

| |
|---|
| पद्मैरनन्वीतवधूमुखद्युतो गताः न हंसैः श्रियमातपत्रजां । दूरेऽभवन्भोजवलयस्य गच्छतः शैलोपमातीतगजस्य निम्नगाः ॥ शिशुपालवधम् १२.६१ ॥ |
| पद्म्यां नृपः संचरमाण एष चिरं परिभ्रम्य कथंकथंचित् । विदर्भराजप्रभवाभिरामं प्रासादमभ्रंकषमाससाद ॥ नैषधीयचरितम् ६.५७ ॥ |
| पन्थानमाशु विजहीहि पुरः स्तनौ ते पश्यन्प्रतिद्वरदकुम्भविशङ्गिचेताः । स्तम्बेरमः पारिणिनंसुरावुपैति षिङ्गैरगद्यत ससंभ्रममेव काचित् ॥ शिशुपालवधम् ५.३४ ॥ |
| पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसम्पदः । रथाङ्गसीमन्तितसान्द्रकर्दमान्प्रसक्तसम्पातपृथक्कृतान्पथः ॥ किरातार्जुनीयम् ४.१८ ॥ |
| पपौ न कोऽपि क्षममास्यमेलितं जलस्य गण्डूषमुदीतसंमदः । चुचुम्ब तत्र प्रतिबिम्बितं मुखं पुरः स्फुरत्याः स्मरकाक्रमुकभ्रुवः ॥ नैषधीयचरितम् १६.६५ ॥ |
| पपौ रणे यश्च किलोष्णशोणितं नृमूर्तिधारी यम- लोक शासनः । स भीमनामा रिपुरक्तरञ्जनः, न किं कुले नः प्रबभूव वीर-राट् ॥ प्रतापविजयः-९१ ॥ |
| पयः स्मिता मण्डकमण्डनाम्बरा वटाननेन्दुः पृथुलड्डुकस्तनी । पदं रुचेर्भोज्यभुजां भुजिक्रिया प्रिया बभूवोज्ज्वलकूरहारिणी ॥ नैषधीयचरितम् १६.१०७ ॥ |
| पयमुचामभिपततां दिवि द्रुतं विपर्ययः परित इवातपस्य सः । समक्रमः समविषमेष्वथ क्षणात्क्ष्मातलं बलजलराशिरानशे ॥ शिशुपालवधम् १७..४६ ॥ |
| पयसि सलिलराशेर्नक्तमन्तर्निमग्नः स्फुटमनिशमतापि ज्वालया बाडवाग्नेः । यदयमिदमिदानीमङ्गमुद्यन्दधाति ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान् ॥ शिशुपालवधम् ११.४५ ॥ |
| पयोघटैराश्रमबालवृक्षान्संवर्धयन्ती स्वबलानुरूपैः । असंशयं प्राक्तनयोपपत्तेः स्तनंधयप्रीतिमवाप्स्यसि त्वं ॥ रघुवंशम् १४.७८ ॥ |
| पयोधरैः पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्याः । ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ॥ रघुवंशम् १३.६० ॥ |
| पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम् । स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ॥ नैषधीयचरितम् १.११७ ॥ |
| पयोनिलीनाभ्रमुकामुकावलीरदाननन्तोरगपुच्छसुच्छवीन् । जलार्धरुद्धस्य तटान्तभूभिदो मृणालजालस्य मिषाद्बभार यः ॥ नैषधीयचरितम् १.१०८ ॥ |
| पयोमुचां मेचकिमानमुच्चैरुच्चाटयामास ऋतुः शरद्या । अपारि वामोरु तयापि किंचिन्न प्रोञ्छितुं लाञ्छनकालिमाष्य ॥ नैषधीयचरितम् २२.११४ ॥ |
| परपराक्षिसादृश्यमदूरोज्झितवर्त्मसु । मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ रघुवंशम् १.४० ॥ |
| परभृतयुवतीनां सम्यगायाति गातुं न तव तरुणि वाणी यं सुधासिन्धुवेणी । कति न रसिककण्ठे कर्तुमभ्यस्यतेऽसौ भवदुपविपिनाम्रे ताभिराम्रेडितेन ॥ नैषधीयचरितम् २१.१५७ ॥ |
| परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृति विक्षिपन्वनेषु । स जवेन पतन्परःशतानां पततां व्रात इवारवं वितेने ॥ किरातार्जुनीयम् १३.२६ ॥ |
| परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव । विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥ कुमारसंभवम् ४.१० ॥ |
| परस्परं परिकुपितस्य पिंषतः क्षतोर्मिकाकनकपरागपङ्किलं । करद्वयं सपदि सुधन्वनो निजैरनारतस्रुतिभिरधाव्यताम्बुभिः ॥ शिशुपालवधम् १७..८ ॥ |
| परस्परर्द्धिपराध्यर्रुपाः पौरस्त्रियो यत्र विधाय वेधाः । श्रीनिर्मितिप्राप्तघुणक्षतैकवर्णोपमावाच्यमलं भभार्ज ॥ शिशुपालवधम्  ३.५७ ॥ |
| परस्परस्पर्शरसोर्मिसेकात्तयोः क्षणं चेतसि विप्रलम्भः । स्नेहातिदानादिव दीपिकार्चिर्निमिष्य किंचिद्विगुणं दिदीपे ॥ नैषधीयचरितम् ६.५५ ॥ |
| परस्पराकूतजदूतकृत्ययोरनङ्गमाराद्धुमपि क्षणं प्रति । निमेषणेनैव कियच्चिरायुषा जनेषु यूनोरुदपादि निर्णयः ॥ नैषधीयचरितम् १६.७७ ॥ |
| परस्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी । नौसंश्रयः पार्श्वगतां किरातीं उपात्तवालव्यजनां बभाषे ॥ रघुवंशम् १६.५७ ॥ |
| परस्पराविरुद्धास्ते तद्रघोरनघं कुलं । अलं उद्द्योतयामासुर्देवारण्यमिवर्तवः ॥ रघुवंशम् १०.८१ ॥ |
| परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव । अमर्त्यभावेऽपि कयोश्चिदासीदेकासरःप्रार्थितयोर्विवादः ॥ रघुवंशम् ७.५३ ॥ |
| परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् । अस्मिन्द्वये रुपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्॥ कुमारसंभवम् ७.६६॥ |
| परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् । अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥ रघुवंशम् ७.१४ ॥ |
| परस्य दारान्खलु मन्यमानैरस्पृश्यमानाममरैर्धरित्रीम् । भक्त्यैव भर्तुश्चरणौ दधानां नलस्य तत्कालमपश्यदेषा ॥ नैषधीयचरितम् १४.१८ ॥ |
| परस्य न स्प्रष्टुमिमामधिक्रिया प्रिया शिशुः प्रांशुरसाविति ब्रुवन् । रथे स भैमीं स्वयमध्यरूरुहन्न तत्किलाश्लिक्षदिमां जनेक्षितः ॥ नैषधीयचरितम् १६.११४ ॥ |
| परस्य भूयान्विवरेऽभियोगः प्रसह्य संरक्षणमात्मरन्ध्रे । भीष्मेऽप्यसम्भाव्यमिदं गुरौ वा न सम्भवत्येव वनेचरेषु ॥ किरातार्जुनीयम् १६.२३ ॥ |
| परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः । तमिद्धमाराधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजङ्गता ॥ शिशुपालवधम्  १.६४ ॥ |
| परां कोटिं स्नेहे परिचयविकासादधिगते रहो विस्रब्धाया अपि सहजलज्जाजडदृशः । मयैवादौ ज्ञातः करतलपरामर्शकलया द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥ (उत्तररामचरितम्  ६.२८) |
| परानमी यदपवदन्त आत्मनः स्तुवन्ति च स्थितिरसतामसाविति । निनाय नो विकृतिमविस्मितः स्मितं मुखं शरच्छशधरमुग्धमुद्धवः ॥ शिशुपालवधम् १७..१९ ॥ |
| परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः । भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ॥ रघुवंशम् ६.४ ॥ |
| परार्ध्यवेषाभरणैः पुरःसरैः समं जिहाने निषधावनीभुजि । दधे सुनासीरपदाभिधेयतां स रूढिमात्राद्यदि वृत्रशात्रवः ॥ नैषधीयचरितम् १६.३ ॥ |
| पराहतध्वस्तशिखे शिखावतो वपुष्यधिक्षिप्तसमिद्धतेजसि । कृतास्पदास्तप्त इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ॥ किरातार्जुनीयम् १६.५६ ॥ |
| परिक्षते वक्षसि दन्तिदन्तैः प्रियाङ्कशीता नभसः पतन्ती । नेह प्रमोहं प्रियसाहसानां मन्दारमाला विरलीकरोति ॥ किरातार्जुनीयम् १६.११ ॥ |

| |
|---|
| परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये स पश्चात् सम्पूर्णः कलयति धरित्रीं तृणसमाम् । अतश्चानेकान्ता गुरुलघुतयार्थेषु धनिनाम् अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ पुरुषार्थोपदेशः-9॥ |
| परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये स पश्चात् सम्पूर्णः गणयति धरित्रीं तृणसमाम् । अतश्चानैकान्त्याद् गुरुलघुतयार्थेषु धनिनाम् अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ नीतिशतकम्४५ ॥ |
| परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः । फणिभाषितभाष्यफक्किकाविषमा कुण्डलनामवापिता ॥ नैषधीयचरितम् २.९५ ॥ |
| परिचयं चलक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनं । श्रमजयात्प्रगुणां च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ ॥ रघुवंशम् ८.४९ ॥ |
| परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः । अपरिच्छेदकर्तृणां विपदः स्युः पदे पदे  ॥ नीतिसंग्रहस्य मित्र-१.१४२ ॥ |
| परिणतमदिराभं भास्करणोंशुबाणैस्तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः । रुधिरमिव वहन्त्यो भान्ति बालातपेनच्छुरितमुभयरोधोवारितं वारि नद्यः ॥ शिशुपालवधम् ११.४९ ॥ |
| परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् । अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ किरातार्जुनीयम् २.४ ॥ |
| परिणामोऽनयोर्यस्मिन्नभेदः पर्यवस्यति । कान्तेन पृष्टा रहसि मौनमेवोत्तरं ददौ ॥ चन्द्रालोकः ५.२२ ॥ |
| परितः प्रमिताक्षरापि सर्वं विषयं व्याप्तवती गता प्रतिष्ठां । न खलु प्रतिहन्यते कुतश्चित्परिभाषेव गरीयसी यदाज्ञा ॥ शिशुपालवधम् १६.८० ॥ |
| परितः प्रसभेन नीयमानः शरवर्षैरवसायमाश्रयाशः । प्रबलेषु कृती चकार विद्युद्व्यपदेशेन घनेष्वनुप्रवेशं ॥ शिशुपालवधम् २०.७२ ॥ |
| परितप्यत एव नोत्तमः परितप्तोऽप्यपरः सुसंवृतिः । परवृद्धिभिराहितव्यथः स्फुटनिर्भिन्नदुराशयोऽधमः ॥ शिशुपालवधम् १६.२३ ॥ |
| परितप्यते व्रज धृतिं त्यज भीतिमहेतुकामयमचण्डमरीचिरुदञ्चति । ज्वलयति स्फुटमातपमुर्मुरैरनुभवं वचसा सखि लुम्पसि ॥ नैषधीयचरितम् ४.१०६ ॥ |
| परितश्च धौतमुखरुक्मविलसदहिमांशुमण्डलाः । तेनुरतनुवपुषः पृथिवीं स्फुटलक्ष्यतेजस इवात्मजाः श्रियः ॥ शिशुपालवधम् १५.७८ ॥ |
| परितोषयिता न कश्चन स्वगतो यस्य गुणोऽस्ति देहिनः । परदोषकथाभिरल्पकः स्वजनं तोषयितुं किलेच्छति ॥ शिशुपालवधम् १६.२८ ॥ |
| परिधार्धं पञ्च शूले षट् च गण्डातिगण्डयोः । व्याघाते नव नाड्यश्च वर्ज्याः सर्वेषु कर्मषु ॥ मुहूर्तचिन्त.३५ ॥ |
| परिपाटलाब्जदलचारुणासकृच्चलिताङ्गुलीकिसलयेन पाणिना ।सशिरःप्रकम्पमपरा रिपुं मधोरनुदीर्णवर्णनिभृतार्थमाह्वयत् ॥ शिशुपालवधम् १३.४२ ॥ |
| परिपाति स केवलं शिशूनिति तन्नामनि मा स्म विश्वसीः । तरुणानपि रक्षति क्षमी स शरण्यः शरणागतान्द्विषः ॥ शिशुपालवधम् १६.५४ ॥ |
| परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः । महारथः सत्यधनस्य मानसं दुनोति ते कच्चिदयं वृकोदरः ॥ किरातार्जुनीयम् १.३४ ॥ |
| परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः । मुखैश्चलत्कुण्डलरश्मिरञ्जितैर्नवातपामृष्टसरोजचारुभिः ॥ किरातार्जुनीयम् ४.१४ ॥ |
| परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतां स्वयं भवति यद्यथा भवति तत्तथा नान्यथा। अतीतमननुस्मरन्नपि च भाव्य-सङ्कल्पयन्नतर्कित-समागमानुभवामि भोगनाहम्॥॥ वैराग्यशतकम् ६३ ॥ |
| परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः । मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजाः ॥ नैषधीयचरितम् २.५ ॥ |
| परिमोहयमाणेन शिक्षालाघवलीलया । जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥ किरातार्जुनीयम् १५.३६ ॥ |
| परिमोहिणा परिजनेन कथमपि चिरादुपाहृतं । वर्म करतलयुगेन महत्तनुचूर्णपेषमपिषद्द्रुषा परः ॥ शिशुपालवधम् १५.७६ ॥ |
| परिम्लाने माने मुखशशिनि तस्याः करधृते मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे । तया पक्ष्मप्रान्तव्रजपुटनिरुद्धेन सहसा प्रसादो बाष्पेन स्तनतटविशीर्णेन कथितः ॥ अमरुशतकम्-२१॥ |
| परिवर्तिनि संसारे मृतः को वा न जायते । स जातो येन जातेन याति वंशः समुन्नतिम् ॥ नीतिशतकम्३२ ॥ |
| परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः । जग्राहैकं शरं मुक्त्वा कटाक्षान्शत्रुयोषिताम् ॥ चन्द्रालोकः ५.९४ ॥ |
| परिवेष्टितमूर्तयश्च मूलादुरगैराशिरसः सरत्नपुष्पैः । दधुरायतवल्लिवेष्टितानामुपमानं मनुजा महीरुहाणाम् ॥ शिशुपालवधम् २०.४९ ॥ |
| परिशिथिलितकर्णग्रीवमामीलिताक्षः क्षणमयमनुभूय स्वप्नमूर्ध्वज्रुरेव । रिरसयिषति भूयः शष्पमग्रे विकीर्णं पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥ शिशुपालवधम् ११.११ ॥ |
| परिष्वजस्वानवकाशबाणता स्मरस्य लग्ने हृदयद्वयेऽस्तु नौ । दृढा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता ॥ नैषधीयचरितम् ९.११६ ॥ |
| परिसंख्या निषिध्यैकमन्यस्मिन्वस्तुयन्त्रणम् । स्नेहक्षयः प्रदीपेषु स्वान्तेषु न नतभ्रुवाम् ॥ चन्द्रालोकः ५.९५ ॥ |
| परिसरविषयेषु लीढमुक्ता हरिततृणोद्गमशङ्कया मृगीभिः । इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः ॥ किरातार्जुनीयम् ५.३८ ॥ |
| परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनां । विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः ॥ किरातार्जुनीयम् १०.२० ॥ |
| परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः । उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयतां ॥ किरातार्जुनीयम् ८.४५ ॥ |
| परीतमुक्षावजये जयश्रिया नदन्तमुच्चैः क्षतसिन्धुरोधसम् । ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवाम् ॥ किरातार्जुनीयम् ४.११ ॥ |
| परेण भग्नेऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव । धूमो निवर्तेत समीरणेन यतो हि कक्षस्तत एव वह्निः ॥ रघुवंशम् ७.५५ ॥ |

| |
|---|
| परेतभर्तुर्मनसेव दूतीं नभस्वतेवानिलसख्यभाजः । त्रिस्रोतसेवाम्बुपतेस्तदाशु स्थिरास्थमायातवतीं निरास्थम् ॥ नैषधीयचरितम् ६.१०९ ॥ |
| परेतभर्तुर्महिषो मुना धनुर्विधातुमुत्खातविषाणमण्डलः । हृते पि भारे महतस्त्रपाभरा दुवाह दुःखेन भृशानतं शिरः ॥ शिशुपालवधम् १.५७ ॥ |
| परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशति हृदयक्लेशकलिलम् । प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणो विविक्तः संकल्पः किमभिलषितं पुश्यति न ते ॥ पुरुषार्थोपदेशः-56॥ |
| परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृदय क्लेश-कलितम्। प्रसन्ने त्वय्यन्तः-सवयमुदित-चिन्तामणि-गणो विविक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते॥॥ वैराग्यशतकम् ६१ ॥ |
| परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् । वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ नीतिसंग्रहस्य मित्र-१.७८ ॥ |
| परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् । धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ नीतिसंग्रहस्य मित्र-१.१०७ ॥ |
| पर्जन्य इव भूतानामाधारः पृथिवीपतिः । विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ नीतिसंग्रहस्य मित्र-१.१९० ॥ |
| पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोरन्तः प्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य । आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्वदृष्ट्या शंभोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥ (मृच्छकटिकम् १.१) |
| पर्यङ्कतापन्नसरस्वदङ्कां लङ्कां पुरीमप्यभिलाषि चित्तम् । कुत्रापि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशये शयालु ॥ नैषधीयचरितम् ३.६६ ॥ |
| पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं संनमितोभयांसम् । उत्तानपाणिद्वयसंनिवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये ॥ कुमारसंभवम् ३.४५ ॥ |
| पर्यच्छे सरसि हृतेंऽशुके पयोभिर्लोलाक्षे सुरतगुरावपत्रपिष्णोः । सुश्रेण्या दलवसनेन वीचिहस्तन्यस्तेन द्रुतमकृताब्जिनि सखात्वं ॥ शिशुपालवधम् ८.४६ ॥ |
| पर्यन्तसंचारितचामरस्य कपोललोलोभयकाकपक्षत् । तस्याननादुच्चरितो विवादश्चक्शाल वेलास्वपि नार्णवानाम् ॥ रघुवंशम् १८.४३ ॥ |
| पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम् । पर्यभूत्खलु करैर्द्विजराजः कर्म कः स्वकृतमत्र न भुङ्क्ते ॥ नैषधीयचरितम् ५.६ ॥ |
| पर्यस्तापह्नुतिर्यत्र धर्ममात्रं निषिध्यते । नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम् ॥ चन्द्रालोकः ५.२५ ॥ |
| पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालौष्ठमनोहराभ्यः । लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ कुमारसंभवम् ३.३९ ॥ |
| पर्यायश्चेदनेकत्र स्यादेकस्य समन्वयः । पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा ॥ चन्द्रालोकः ५.९३ ॥ |
| पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता । धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥ चन्द्रालोकः ५.१३ ॥ |
| पर्वतेन परिपीय गभीरं नारदीयमुदितं प्रतिनेदे । स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः ॥ नैषधीयचरितम् ५.४४ ॥ |
| पलाशदामेतिमिलच्छिलीमुखैर्वृता विभूषामणिरश्मिकार्मुकैः । अलक्षि लक्षैर्धनुषामसौ तदा रतीशसर्वस्वतयाऽभिरक्षिता ॥ नैषधीयचरितम् १५.५३ ॥ |
| पल्वोपमितसाम्यसपक्षं दष्टत्यधरबिम्बमभीष्टे । पर्यकूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण ॥ शिशुपालवधम् १०.५३ ॥ |
| पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः । रजोभिस्तुरगोत्कीर्णैरस्पृष्टालवेष्टनौ ॥ रघुवंशम् १.४२ ॥ |
| पवनात्मजेन्द्रसुतमध्यवर्तिना नितरामरोचि रुचिरेण चक्रिणा । दधतेव योगमुभयग्रहान्तरस्थितिकारितं दुरुधराख्यमिन्दुना ॥ शिशुपालवधम् १३.२२ ॥ |
| पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा । कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥ नैषधीयचरितम् १.३ ॥ |
| पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः । कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः॥ कुमारसंभवम् ६.९५॥ |
| पश्चात्कृतानामप्यस्य नराणामिव पत्रिणां । योयो गुणेन संयुक्तः स स कर्णान्तमाययौ ॥ शिशुपालवधम् १९.९३ ॥ |
| पश्चात्क्रिया तूणयुगस्य भर्तुर्जज्ञे तदानीमुपकारिणीव । सम्भावनायामधरीकृतायां पत्युः पुरः साहसं आसितव्यं ॥ किरातार्जुनीयम् १७.४२ ॥ |
| पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव । शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान् किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥ (उत्तररामचरितम् ४.२६) |
| पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः । नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ मेघदूतम्, पूर्वमेघः ३६॥ |
| पश्य द्रुतास्तंगतसूर्यनिर्यत्करावलीहैङ्गुलवेत्रयात्र । निषिध्यमानाहनि संध्ययापि रात्रिप्रतीहारपदेऽधिकारम् ॥ नैषधीयचरितम् २२.६ ॥ |
| पश्यन्कृतार्थैरपि वल्लवीजनो जनाधिनाथं न ययौ वितृष्णतां । एकान्तमौग्ध्यानवबुद्धविभ्रमैः प्रसिद्धविस्तारगुणैर्विलोचनैः ॥ शिशुपालवधम् १२.३९ ॥ |
| पश्यन्वृतोऽप्येष निमेषमद्रेरधित्यकाभूमितिरस्करिण्या । प्रवर्षति प्रेयसि चन्द्रिकामिश्चकोरचञ्चूचुलुकप्रमिन्दुः ॥ नैषधीयचरितम् २२.४१ ॥ |

| |
|---|
| पश्यन्स तस्मिन्मरुतादि तन्व्याः स्तनौ परिस्प्रष्टुमिवास्तवस्त्रौ । अक्षान्तपक्षान्तमृगाङ्कमास्यं दधार तिर्यन्वलितं विलक्षः ॥ नैषधीयचरितम् ६.१८ ॥ |
| पश्याः पुरंध्रीः प्रति सान्द्रचन्द्ररजाःकृतक्रीडकुमारचक्रे । चित्राणि चक्रे ध्वनि चक्रवर्तिचिहनं तदङ्घ्रिप्रतिमासु चक्रम् ॥ नैषधीयचरितम् ६.३९ ॥ |
| पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं किं मामालपतीत्ययं खल शठः कोपस्तयाप्याश्रितः । इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥ अमरुशतकम्-२०॥ |
| पश्यावरोधैः शतशो मदीयैर्विगाहयमानो गलिताङ्गरागैः । संध्योदयः साभ्र इवैष वर्णं पुष्यत्यनेकं सरयूप्रवाहः ॥ रघुवंशम् १६.५८ ॥ |
| पश्योच्चसौधस्थितिसौख्यलक्ष्ये त्वत्केलिकुल्याम्बुनि बिम्बमिन्दोः । चिरं निमज्ज्येह सतः प्रियस्य भ्रमेण यच्चुम्बति राजहंसी ॥ नैषधीयचरितम् २२.१२२ ॥ |
| पांसुला बहुपतिर्नियतं या वेधसारचि रुषा नवखण्डा । तां भुवं कृतवतो द्विजभुक्तां युक्तकारितरता तव जीयात् ॥ नैषधीयचरितम् २१.६७ ॥ |
| पाञ्चजन्यमधिगत्य करेणापाञ्चजन्यमसुरानिति वक्षि । चेतनाः स्थ किल पश्यत किं नाचेतनोऽपि मयि मुक्तविरोधः ॥ नैषधीयचरितम् २१.९९ ॥ |
| पाञ्चालिकी च लाटीया गौडीया च यथारसम् । वैदर्भी च यथासङ्ख्यं चतस्रो रीतयः स्मृताः ॥ चन्द्रालोकः६.२२ ॥ |
| पाणये बलरिपोरथ भैमीशीतकोमलकरग्रहमर्हम् । भेषजं चिरचिताशनिवासव्यापदामुपदिदेश रतीशः ॥ नैषधीयचरितम् ५.४५ ॥ |
| पाणिं पात्रयतां निसर्गशुचिना भैक्षेण सन्तुष्यतां यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् । अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशा मध्वा कोऽपि शिवप्रसादसुलभः सम्पत्स्यते योगिनाम् ॥ वैराग्यशतकम् ९० ॥ |
| पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं विस्तीर्णं वस्त्रमाशादशकममलिनं तल्पमस्वल्पमुर्वी । येषां निःसङ्गतान्तःकरणपरिणतिः स्वात्मसन्तोषिणस्ते धन्याः सन्यस्दैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ पुरुषार्थोपदेशः-71॥ |
| पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वीम् । येषां निःसङ्गताङ्गीकरणपरिणतस्वान्तसन्तोषिणस्ते धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ वैराग्यशतकम् ९९ ॥ |
| पाणिपर्वणि यवः पुनराख्यद्देवतर्पणयवार्पणमस्य । न्युप्यमानजलयोगितिलौघैः स द्विरुक्तकरकालतिलोऽभूत् ॥ नैषधीयचरितम् २१.२ ॥ |
| पाणिपल्लवविधूननमन्तः सीत्कृतानि नयनार्धनिमेषाः । योषितां रहसि गद्गदवाचां अस्त्रतामुपययुर्मदनस्य ॥ किरातार्जुनीयम् ९.५० ॥ |
| पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो । दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर चिरस्य निरस्य ॥ नैषधीयचरितम् ५.९९ ॥ |
| पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति । भावसाध्वसपरिग्रहादभूत्कामदोहद मनोहरं वपुः॥ कुमारसंभवम् ७.१॥ |
| पाणिरोधमविरोधवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः । कामिनः स्म कुरुते करभोरुर्हारि शुष्करुदितं च सुखेऽपि ॥ शिशुपालवधम् १०.६९ ॥ |
| पाणौ फणी भजति कङ्कणभूयमैशे सोऽयं मनोहरमणीरमणीयमुच्चैः । कोटीरबन्धनधनुर्गुणयोगपट्टव्यापारपारगममुं भज भूतभर्तुः ॥ नैषधीयचरितम् ११.१८ ॥ |
| पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः । त्वय्यासन्ने फलपरिणतिश्यामजम्बूवनान्ताः सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥ मेघदूतम्, पूर्वमेघः २३॥ |
| पाण्ड्योऽयमंसार्पितलम्बहारः क्ëप्ताङ्गरागो हरिचन्दनेन । आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥ रघुवंशम् ६.६० ॥ |
| पातालमाविशसि यासि नभो विलङ्घ्य दिङ्मण्डलं भ्रमसि मानस चापलेन। भ्रान्त्यापि जातु विमलं कथमात्मनीनं न ब्रह्म संसरसि विर्वृतिं लभसे येन॥॥ वैराग्यशतकम् ७१ ॥ |
| पातालमाविशसि यासि नभो विलङ्घ्य दिङ्मण्डलं भ्रमसि मानस! चापलेन । भ्रान्त्यपि जातु विमलं कथमात्मनीनं न ब्रह्म संस्पृशसि निर्वृतिमेषि येन ॥ पुरुषार्थोपदेशः-93॥ |
| पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै- रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः । कल्पाक्षेपकठोरभैरवमरुद्ध्यस्तैरभिस्तीर्यते लीनाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ (उत्तररामचरितम् ५.१४) |
| पातितोत्तुङ्गमाहात्म्यैः संहृतायतकीर्तिभिः । गुर्वीं कां आपदं हन्तुं कृतमावृत्तिसाहसं ॥ किरातार्जुनीयम् १५.११ ॥ |
| पातुं आहितरतीन्यभिलेषुस्तर्षयन्त्यपुनरुक्तरसानि । सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥ किरातार्जुनीयम् ९.५१ ॥ |
| पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या नादत्ते प्रियमण्डना अपि भवतां स्नेहेन या पल्लवम् । आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ अभिज्ञानशाकुन्तलम् ४.९ ॥ |
| पातुर्दृशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयास्ते । ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ॥ नैषधीयचरितम् ३.१०४ ॥ |
| पातोपग्रहलत्तासु नेष्टोऽङ्घ्रिः खेटपत्समः । वारस्त्रिघ्नोऽष्टभिस्तष्टः सैकः स्यादर्धयामकः ॥ मुहूर्त.विवाहप्रकरणम् ६४॥ |
| पात्रीकृतात्मा गुरुसेवनेन स्पृष्टाकृतिः पत्त्रथेन्द्रकेतोः । तं पुत्रिणां पुष्करपत्त्रनेत्रः पुत्रः समारोपयदग्रसंख्यां ॥ रघुवंशम् १८.३० ॥ |
| पाथोधिमाथसमयोत्थितसिन्धुपुत्रीपत्पङ्कजार्पणपवित्रशिलासु तत्र । पत्या सहावह विहारमयैर्विलासैरानन्दमिन्दुमुखि मन्दरकन्दरासु ॥ नैषधीयचरितम् ११.६ ॥ |

| |
|---|
| पादन्यासक्वणितरशनास्तत्र लीलावधूतै रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः । वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दूनामोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान्॥ मेघदूतम्, पूर्वमेघः ३५॥ |
| पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव चक्षुः खेदात्सजलगुरुभिः पक्ष्मभिश्छादयन्तीं साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥ मेघदूतम्, उत्तरमेघः २६ ॥ |
| पादासक्ते सुचिरमिह ते वामता कैव कान्ते सन्मार्गस्थे प्रणयिनि जने कोपने कोऽपराधः । इत्थं तस्याः पर्जनकथा कोपवेगोपशान्तौ बाष्पोद्भेदैस्तद् अनु सहसा न स्थितं न प्रयातम् ॥ अमरुशतकम्-६५॥ |
| पादैः पुरः कूबरिणां विदारिताः प्रकाममाक्रान्ततलास्ततो गजैः । भग्नोन्नतानन्तरपूरितान्तरा बभुर्भुवः कृष्टसमीकृता इव ॥ शिशुपालवधम् १२.२१ ॥ |
| पादोनरेखापरपूर्वयोजनैः पलैर्युतोनास्तिथयो दिनार्द्धतः । ऊनाधिकास्तद्विवरोद्भवैः पलैरूर्ध्वं तथाऽधो दिनपप्रवेशनम् ॥ मुहूर्तचिन्त.५४॥ |
| पानधौतनवयावकरागं सुभ्रुवो निभृतचुम्बनदक्षाः । प्रेयसामधररागरसेन स्वं किलाधरमुपालि ररञ्जुः ॥ शिशुपालवधम् १०.२६ ॥ |
| पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् । विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥ नीतिसंग्रहस्य मित्र-१.१४४ ॥ |
| पापान्तः पापयुग्द्यूने पापाच्चन्द्रः शुभोऽप्यसत् । शुभांशे वाधिमित्रांशे गुरुदृष्टोऽशुभोऽपि सन् ॥ मुहूर्त.संक्रान्तिप्रकरणम् ७ ॥ |
| पापान्निवारयति योजयते हिताय, गुह्यं च गूहति गुणान् प्रकटीकरोति । आपद्गतं च न जहाति ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ नीतिशतकम्७३ ॥ |
| पापैस्तनौ रुङ्निधने मृतिः सुते पुत्रार्तिरर्थव्ययगैर्दरिद्रता । स्यात्खेऽलसो भ्रष्टपदो द्युनाम्बुगैः सर्वं शुभं केन्द्रगतैः शुभग्रहैः ॥ मुहूर्त.राजाभिषेकप्रकरणम् ३॥ |
| पापौ कर्तरिकारकौ रिपुगृहे नीचास्तगौ कर्तरी- दोषो नैव सितेऽरिनीचगृहगे तत्षष्ठदोषोऽपि न । भौमेऽस्ते रिपुनीचगे नहि भवेद्भौमोऽष्टमो दोषकृन् नीचे नीचनवांशके शशिनि रिःफाष्टारिदोषोऽपि न ॥ मुहूर्त.विवाहप्रकरणम् ८८॥ |
| पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च । तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥ (उत्तररामचरितम् ७.२१) |
| पारेजलं नीरनिधेरपश्यन्मुरारिनीलपलाशराशीः । वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ॥ शिशुपालवधम् ३.६९ ॥ |
| पार्थबाणाः पशुपतेरावव्रुर्विशिखावलिं । पयोमुच इवारन्ध्राः सावित्रीं अंशुसंहतिं ॥ किरातार्जुनीयम् १५.४० ॥ |
| पार्थिवं हि निजमाजिषु वीरा दूरमूर्ध्वगमनस्य विरोधि । गौरवादवपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् ॥ नैषधीयचरितम् ५.१५ ॥ |
| पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम् । यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ॥ रघुवंशम् ११.५४ ॥ |
| पाश्चात्यभागमिह सानुषु सन्निषण्णाः पश्यन्ति शान्तमलसान्द्रतरांशुजालम् । संपूर्णलब्धललनालापनोपमान- मुत्सङ्गसङ्गिहरिणमस्य मृगाङ्गमूर्तेः ॥ शिशुपालवधम् ४.२२॥ |
| पिकरुतिश्रुतिकम्पिनि शैवलं हृदि तया निहितं विचलद्बभौ । सततदगतहृच्छयकेतुना हृतमिव स्वतनूधनघर्षिणा ॥ नैषधीयचरितम् ४.३५ ॥ |
| पिकस्य वाङ्मात्रकृताद्व्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि । बालस्य चूडाशशिनोऽपराधान्नाराधनं शिलति शूलिनोऽपि ॥ नैषधीयचरितम् ८.६४ ॥ |
| पिकाद्वने शृण्वति भृङ्गहुंकृतैर्दशामुदञ्चत्करुणे वियोगिनाम् । अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः ॥ नैषधीयचरितम् १.८८ ॥ |
| पिण्डीभूते दिनकृति हेमन्ततौ स्यादर्धास्ते तपसमये गोधूलिः । सम्पूर्णास्ते जलधरमालाकाले त्रेधा योज्या सकलशुभे कार्यादौ ॥ मुहूर्त.विवाहप्रकरणम् १००॥ |
| पिण्डे नवाङ्काङ्गगजाग्निनागनागाब्धिनागैर्गुणिते क्रमेण । विभाजिते नागनगाङ्कसूर्यनागर्क्षतिथ्यृक्षखभानुभिश्च ॥ मुहूर्त.वास्तुप्रकरणम् ११॥ |
| पितर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे । त्वदर्थमर्थित्वकृति प्रतीतिः कीदृश्ङ्मयि स्यान्निषधेश्वरस्य ॥ नैषधीयचरितम् ३.७२ ॥ |
| पिता च यस्य क्षिति-राजरञ्जनः, 'हुमायूँनामा रिपुरोष-भञ्जनः । प्रभञ्जस्तस्य सुतो भवेन्न किं, विपक्षि- सेन्यङ्गत- गर्व-गञ्जनः ॥ प्रतापविजयः-४५ ॥ |
| पिता पितःणामनृणस्तमन्ते वयस्यनन्तानि सुखानि लिप्सुः । राजानमाजानुविलम्बिबाहुं कृत्वा कृती वल्कलवान्बभूव ॥ रघुवंशम् १८.२६ ॥ |
| पिता समाराधनतत्परेण पुत्रेण पुत्री स यथैव तेन । पुत्रस्तथैवाधिकवत्सलेन स तेन पित्रा पितृमान्बभूव ॥ रघुवंशम् १८.११ ॥ |
| पितात्मनः पुण्यमनापदः क्षमा धनं मनस्तुष्टिरथाखिलं नलः । अतः परं पुत्रि न कोऽपि तेऽहमित्युदस्रुरेष व्यसृजन्निजौरसीम् ॥ नैषधीयचरितम् १६.११८ ॥ |
| पितामहस्ते यवनाय कन्यकां, ददौ यतः किन्न कुलं कलङ्कितम् । तथापि सार्धं मयकैन भोजनं, न मान! एवं भज माननीयताम् ॥ प्रतापविजयः-७२॥ |
| पितामहो यस्य महापराक्रमी, गुणेन नाम्ना च बभूव 'बर्बरः' । विजित्य 'पानीपत' - युद्धमत्र यः प्रसिद्धतामाप धराप मण्डले ॥ प्रतापविजयः-४४ ॥ |
| पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने । पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥ रघुवंशम् ३.२२ ॥ |
| पितुरनन्तरं उत्तर्कोसलान्समधिगम्य समाधिजितेन्द्रियः । दशरथः प्रशशास महारथो यमवतामवतां च धुरि स्थितः ॥ रघुवंशम् ८.१ ॥ |
| पितुर्नियोगाद्वनवासं एवं निस्तीर्य रामः प्रतिपन्नराज्यः । धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिं ॥ रघुवंशम् १४.२१ ॥ |
| पित्रा निसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्कगतामभोक्ता । इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम् ॥ रघुवंशम् १३.६७ ॥ |

| |
|---|
| पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् । यः ससोम इव घर्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः ॥ रघुवंशम् ११.६४ ॥ |
| पित्र्ये गृहे चेत्कुचपुष्पसम्भवः स्त्रीणां न दोषः प्रतिशुक्रसम्भवः । भृग्वङ्गिरोवत्सवसिष्ठकश्यपात्रीणां भरद्वाजमुनेः कुले तथा ॥ मुहूर्त.द्विरागमनप्रकरणम् ४॥ |
| पिदधानमन्वगुपगम्य दृशौ ब्रुवते जनाय वद कोऽयमिति । अभिधातुमध्यवससौ न गिरा पुलकैः प्रियं नववधून्यगदत् ॥ शिशुपालवधम् ९.७६ ॥ |
| पिपासुरस्मीति विबोधिता मुखं निरीक्ष्य बाला सुहितेन वारिणः । पुनः कर् कर्तुमना गलन्तिकां हसात्सखीनां सहसा न्यवर्तत ॥ नैषधीयचरितम् १६.८४ ॥ |
| पिमन्धराभिरलघूरुभरादधिवेश्म पत्युरुपचारविधौ । स्खलिताभिरप्यनुपदं प्रमदाः प्रणयातिभूमिमगमन्गतिभिः ॥ शिशुपालवधम् ९.७८ ॥ |
| पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति । सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम् ॥ शिशुपालवधम्  १.६ ॥ |
| पिहितं परवृत्तान्त-ज्ञातुरन्यस्य चेष्टितम् । प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत् ॥ चन्द्रालोकः ५.१०९ ॥ |
| पीडिते पुर उरः प्रतिषेधं भर्तरि स्तनयुगेन युवत्याः । स्पष्टमेव दलतः प्रतिनार्यस्तन्मयत्वमभवद्धृदयस्य ॥ शिशुपालवधम् १०.४६ ॥ |
| पीतशीतमधुरैर्मिथुनानामाननैः परिहृतं चषकान्तः । व्रीडया रुददिवालिविरावैर्नीलनीरजमगच्छदधस्तात् ॥ शिशुपालवधम् १०.११ ॥ |
| पीतस्तुषारकिरणो मधुनैव सार्धम् अन्तः प्रविश्य चषके प्रतिबिम्बवर्ती । मानान्धकारमपि मानवतीजनस्य नूनं बिभेद यद् असौ प्रससाद सद्यः ॥ अमरुशतकम्-४९॥ |
| पीतावदातारुणनीलभासां देहोपदेहात्किरणैर्मणीनाम् । गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान्पुनरुक्तयन्तीम् ॥ नैषधीयचरितम् १०.९८ ॥ |
| पीतो यतः प्रभृति कामपिपासितेन तस्या मयाधररसः प्रचुरः प्रियायाः । तृष्णा ततः प्रभृति मे द्विगुणत्वमेति तावण्यमस्ति बहु तत्र किमपि चित्रम् ॥ अमरुशतकम्-६८॥ |
| पीतो वर्णगुणः स चातिमधुरः कायेऽपि तेऽयं यथा यं बिभ्रत्कनकं सुवर्णमिति कैराद्दृत्य नोत्कीर्त्यते । का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु यस्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः ॥ नैषधीयचरितम् २१.१५२ ॥ |
| पीत्वा जलानां निधिनातिगर्धाद् वृद्धिं गतेऽप्यात्मनि नैव मान्तीः । क्षिप्ता इवेन्दोः सारुचोऽधिवेलं मुक्तावलीराकलयांचकार ॥ शिशुपालवधम्  ३.७२ ॥ |
| पीत्वा तवाधरसुधां वसुधासुधांशुर्न श्रद्दधातु रसमिक्षुरसोदवाराम् । द्वीपस्य तस्य दधतां परिवेषवेषं सोऽयं चमत्कृतचकोरचलाचलाक्षि ॥ नैषधीयचरितम् ११.७५ ॥ |
| पीयूषधारानधराभिरन्तस्तासां रसोदन्वति मज्जयामः । रम्भादिसौभाग्यरहः कथाभिः काव्येन काव्यं सृजताद्दृताभिः ॥ नैषधीयचरितम् ३.४२ ॥ |
| पीयूषवर्षप्रभवं चन्द्रालोकमनोहरम् । सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम् ॥ चन्द्रालोकः १०.५ ॥ |
| पीयूषिणां विषवताञ्च मदाऽञ्चितानां, श्यामारुणोज्जवलतया समलङ्कृतानाम् । लीलावतामलसपक्ष्मललोचनानां, मातः ! भविष्यति कदा मयि पक्षपातः ॥ प्रतापविजयः-८॥ |
| पुंसः पदं मध्यममुत्तमस्य द्विधेव कुर्वन्धनुषः प्रणादैः । नूनं तथा नैषा यथास्य वेषः प्रच्छन्नमप्यूहयते हि चेष्टा ॥ किरातार्जुनीयम् १६.१९ ॥ |
| पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाप्यनीक्षानियमव्रतिन्यः । छायासु रूपं भुवि वीक्ष्य तस्य फलं दृशोरानशिरे महिष्यः ॥ नैषधीयचरितम् ६.४३ ॥ |
| पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् । तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः  ॥ नीतिसंग्रहस्य मित्र-०.13 ॥ |
| पुण्ये ग्रामे वने वा महति सित-पटच्छन्न-पाली कपालिं ह्यादाय न्याय-गर्भ-द्विज-हुत-हुत-भुग्धूम-धूम्रोपकण्ठे। द्वारं द्वारं प्रविष्टो वरमुदर-दरी-पूरणाय क्षुधार्तो मानी प्राणैः सनाथो न पुनरनुदिनं तुल्य-कुल्येषु दीनः॥॥ वैराग्यशतकम् २३ ॥ |
| पुण्ये ग्रामे वने वा महति सितपटच्छिन्नपालीं कपालीमादायाम्नायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे । द्वाराद् द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो मानी प्राणी सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥ पुरुषार्थोपदेशः-75॥ |
| पुण्ये मनः कस्य मुनेरपि स्यात्प्रमाणमास्ते यदघेऽपि धावत् । तच्चिन्ति चित्तं परमेश्वरस्तु भक्तस्य हृष्यत्करुणो रुणद्धि ॥ नैषधीयचरितम् ८.१७ ॥ |
| पुण्यैर्मूल-फलैस्तथा प्रणयिनीं वृत्तिं कुरुष्वाधुना भू-शय्यां नव-पल्लवैरकृपणैरुत्तिष्ठ यावो वनम्। क्षुद्राणामविवेक-मूढ-मनसां यत्रेश्वराणां सदा वित्त-व्याधि-विकार-विह्वल-गिरां नामापि न श्रूयते॥॥ वैराग्यशतकम् २६ ॥ |
| पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः । आरम्भं प्रथमं चक्रुर्देवधुन्दुभयो दिवि ॥ रघुवंशम् १०.७७ ॥ |
| पुत्री विधोस्ताण्डविकास्तु सिन्धोरश्या चकोरस्य दृशोर्वयस्या । तथापि सेयं कुमुदस्य कापि ब्रवीति नामैव हि कौमुदीति ॥ नैषधीयचरितम् २२.७१ ॥ |
| पुत्री सुहृद्येन सरोरुहाणां यत्प्रेयसी चन्दनवासिता दिक् । धैर्यं विभुः सोऽपि तयैव हेतोः स्मरप्रतापज्वलने जुहाव ॥ नैषधीयचरितम् ८.७७ ॥ |
| पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता । चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिं ॥ रघुवंशम् ६.७६ ॥ |
| पुनः स्वगुणसम्प्राप्तिर्विज्ञेया पूर्वरूपता । हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ॥ चन्द्रालोकः ५.१०३ ॥ |
| पुनःपुनः काचन कुर्वती कचच्छटाधिया धूपजधूमसंयमम् । सखी स्मितैस्तर्कितत‍न्निजभ्रमा बबन्ध तन्मूर्धजचामरं चिरात् ॥ नैषधीयचरितम् १५.३ ॥ |
| पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम् । अंशुकान्तं शशी कुर्वन्नम्बरान्तमुपैत्यसौ ॥ चन्द्रालोकः ५.७ ॥ |
| पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् । लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥ कुमारसंभवम् ५.१३ ॥ |
| पुमानिवास्पर्शि मया व्रजन्त्या छाया मया पुंसः इव व्यलोकि । ब्रुवन्निवातर्कि मयापि कश्चिदिति स्म स स्त्रैणगिरः शृणोति ॥ नैषधीयचरितम् ६.४७ ॥ |
| पुर एव शार्ङ्गिणि सवैरमथ पुनरमुं तदर्चया । मन्युरभजदवगाढतरः समदोषकाल इव देहिनं ज्वरः ॥ शिशुपालवधम् १५.२ ॥ |

| |
|---|
| पुरं निषादाधिपतेरिदं तदयस्मिन्मया मौलिमणिं विहाय । जटास् बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥ रघुवंशम् १३.५९ ॥ |
| पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः । भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥ रघुवंशम् २.७४ ॥ |
| पुरः पश्चाद् भृगोर्बाल्यं त्रिदशाहं च वार्द्धकम् । पक्षं पञ्चदिनं ते द्वे गुरोः पक्षमुदाहृते ॥ मुहूर्त.संस्कारप्रकरणम् २७॥ |
| पुरः प्रयुक्तैर्युद्धं तच्चलितैर्लब्धशुद्धिभिः । आलापैरिव गान्धर्वमदीप्यत पदातिभिः ॥ शिशुपालवधम् १९.४७ ॥ |
| पुरः सुरीणां भण केव मानवी न यत्र तास्तत्र तु शोभिकापि सा । अकाञ्चनेऽकिंचननायिकाङ्गके किमारकूटाभरणेन न श्रियः ॥ नैषधीयचरितम् ९.२८ ॥ |
| पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् । भवादृशाश्चेदधिकुर्वते परान्निराश्रया हन्त हता मनस्विता ॥ किरातार्जुनीयम् १.४३ ॥ |
| पुरःस्थलाङ्गूलमदात्खला वृसीमुपाविशत्तत्र ऋजुर्वरद्विजः । पुनस्तदुत्थाप्य निजामतेर्वदाऽहसच्च पश्चात्कृतपुच्छतत्प्रदा ॥ नैषधीयचरितम् १६.५३ ॥ |
| पुरःस्थितस्य क्वचिदस्य भूपारत्नेषु नार्यः प्रतिबिम्बितानि । व्योमन्यदृश्येषु निजान्यपश्यन्विस्मित्य विस्मित्य सहस्रकृत्वः ॥ नैषधीयचरितम् ६.४१ ॥ |
| पुरभिदा गमितस्त्वमदृश्यतां त्रिनयनत्वपरिप्लुतिशङ्कया । स्मर निरैष्यत कस्यचनापि न त्वयि किमक्षिगते नयनैस्त्रिभिः ॥ नैषधीयचरितम् ४.७७ ॥ |
| पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या । तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥ रघुवंशम् २.२० ॥ |
| पुरस्कृत्य फलं प्राप्तैः सत्पक्षाश्रययशालिभिः । कृतपुङ्खतया लेभे लक्षमप्याशु मार्गणैः ॥ शिशुपालवधम् १९.६३ ॥ |
| पुरस्तन्व्या गोत्रस्खलनचकितोऽहं नतमुखः प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः । स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो गता येन व्यक्तं पुनरवयवैः सैव तरुणी ॥ अमरुशतकम्-४६॥ |
| पुरा परित्यज्य मयात्यसर्जि स्वमासनं तत्किमिति क्षणं न । अनर्हमप्येतदलंक्रियेत प्रयातुमीहा यदि चान्यतोऽपि ॥ नैषधीयचरितम् ८.२३ ॥ |
| पुरा प्रभिन्नाम्बुददुर्दिनीकृतां निनिन्द चन्द्रद्युतिसुन्दरीं दिवम् । शिरोरुहौघेण घनेन वर्षता क्वचिद्दुकूलेन सितांशुनोज्ज्वला ॥ नैषधीयचरितम् १५.२२ ॥ |
| पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहाम् । बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ (उत्तररामचरितम् २.२७) |
| पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः । आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥ रघुवंशम् १.७५ ॥ |
| पुरा शरक्षतिजनितानि संयुगे नयन्ति नः प्रसभमसृञ्जि पङ्कतां । इति ध्रुवं व्यलगिषुरात्तभीतयः खमुच्चकैरनलसखस्य केतवः ॥ शिशुपालवधम् १७..५५ ॥ |
| पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन्मृगैः सार्धमृषिर्मघोनाः । समाधिभीतेन किलोपनीतः पञ्चाप्सरोयौवनकूटबन्धम् ॥ रघुवंशम् १३.३९ ॥ |
| पुरा हठाक्षिप्ततुषारपाण्डुरच्छदा वृतेर्वीरुधि बद्धविभ्रमाः । मिलन्निमीलं ससृजुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः ॥ नैषधीयचरितम् १.९७ ॥ |
| पुराऽगतो नैव वरं स नागतः, प्रतापसिंहः कथमत्र नागतः । अनागते हन्त ममाशनं कथं, तदत्र शीघ्रं वद किन्नु कारणम् ॥ प्रतापविजयः-६७॥ |
| पुराकृतिः स्त्रैणमिमां विधातुमभूद्विधातुः खलु हस्तलेखः । येयं भवद्भाविपुरंध्रिसृष्टिः सास्यै यशस्तज्जयजं प्रदातुम् ॥ नैषधीयचरितम् ७.१५ ॥ |
| पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता । बभूव कृतसंस्कारा चरितार्थैव भारती ॥ रघुवंशम् १०.३७ ॥ |
| पुराणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कञ्चुकाः । स्वरूपशोभैकगुणानि नाकिनां गणैस्तमाशङ्क्य तदादि चक्रिरे ॥ शिशुपालवधम् १.४५ ॥ |
| पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः । अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥ किरातार्जुनीयम् १.३८ ॥ |
| पुराभूदस्माकं नियतमविभिन्ना तनुरियं ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः । इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ॥ अमरुशतकम्-६६॥ |
| पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः । विगृह्य चक्रे नमुचिद्विषा वशी य इत्थनस्वास्थ्यमहर्दिवं दिवः ॥ शिशुपालवधम् १.५१ ॥ |
| पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च । स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥ रघुवंशम् ८.७८ ॥ |
| पुरुषायुषजीविन्यो निरातङ्का निरीतयः । यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं ॥ रघुवंशम् १.६३ ॥ |
| पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः । अंशैरनुययुर्विष्णुं पुष्पैर्वायुं इव द्रुमाः ॥ रघुवंशम् १०.५० ॥ |
| पुरे पथि द्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयेव । नभोऽपि किर्मीरमकारि तेषां महीभुजामाभरणप्रभाभिः ॥ नैषधीयचरितम् १०.३१ ॥ |
| पुरैव तस्मिन्समदेशि तत्सुताभिकेन यः सौहृदनाटिनाग्निना । नलाय विश्राणयति स्म तं रथं नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ नैषधीयचरितम् १६.२३ ॥ |
| पुरोपकण्ठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ । प्रध्मातशङ्खे परितो दिगन्तांस्तूर्यस्वने मूर्छति मङ्गलार्थे ॥ रघुवंशम् ६.९ ॥ |
| पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा । तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥ किरातार्जुनीयम् १.३९ ॥ |
| पुष्पं फलं चार्तवमाहरन्त्यो बीजं च बालेयमकृष्टरोहि । विनोदयिष्यन्ति नवाभिषङ्गां उदारवाचो मुनिकन्यकास्त्वां ॥ रघुवंशम् १४.७७ ॥ |
| पुष्पं फलं तदनु गन्धवहः समीरः, खद्योत-पंक्तिरमला च पिकालि-गीतिः । अद्यापि यत्र सरल-प्रकृति-प्रणीतं, पञ्चोपचारमिव पूजनमस्ति मातुः ॥ प्रतापविजयः-१६१ ॥ |

| |
|---|
| पुष्पाणि बाणाः कुचमण्डनानि भ्रुवौ धनुर्भालमलंकरिष्णु । रोमावली मध्यविभूषणं ज्या तथापि जेता रतिजानिरेतैः ॥ नैषधीयचरितम् ७.८७ ॥ |
| पुष्पायुधस्यास्थिभिरर्धदग्धैः सितासितश्रीरघटि द्विजेन्द्रः । स्मरारिणा मूर्धनि यद्धृतोऽपि तनोति तत्तौष्टिकपौष्टिकानि ॥ नैषधीयचरितम् २२.६७ ॥ |
| पुष्पेषुणा ध्रुवममूनिषुवर्षजप्तिहुंकारमन्त्रबलभस्मितशान्तशक्तीन् । शृङ्गारसर्गरसिकद्व्यणुकोदरि त्वं द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥ नैषधीयचरितम् ११.२६ ॥ |
| पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भालमूले धनू रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राष्ट्रं च यश्चिक्षिपे । निर्विद्याश्रयदाश्रयं स वितनुस्त्वां तज्जयायाधुना पत्रालीस्त्वदुरोजशैलनिलया तत्पर्णशालायते ॥ नैषधीयचरितम् ३.१२८ ॥ |
| पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारुहंसेन मां चेन्निर्यान्तीं मन्त्रमूर्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः । तत्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते सोऽपि श्लोकानकाण्डे रचयति रुचिरान्कौतुकं दृश्यमस्याः ॥ नैषधीयचरितम् १४.९ ॥ |
| पुष्यध्रुवेन्दुहरिसर्पजलैः सजीवैस्तद्वासरेण च कृतं सुतराज्यदं स्यात् । द्वीशाश्वितक्षवसुपाशिशिवैः सशुक्रैर्वारे सितस्य च गृहं धनधान्यदं स्यात् ॥ मुहूर्त.वास्तुप्रकरणम् २६॥ |
| पुस्तकेषु च नाधीतं नाधीतं गुरुसन्निधौ । न शोभते सम्भामध्ये जारगर्भ इव स्त्रियाः ॥ नीतिसंग्रहस्य मित्र-०.३९ ॥ |
| पूजाविधौ मखभुजामुपयोगिनो ये विद्वत्कराः कमलनिर्मलकान्तिभाजः । लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णैस्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥ नैषधीयचरितम् ११.११ ॥ |
| पूतपाणिचरणः शुचिनोच्चैरध्वनानितरपादहतेन । ब्रह्मचारिपरिचारि सुरार्चा वेश्म राजऋषिरेष विवेश ॥ नैषधीयचरितम् २१.२१ ॥ |
| पूरं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति । पयांसि दोग्धि प्रियविप्रयोगसशोककोकीनयने कियन्ति ॥ नैषधीयचरितम् २२.६१ ॥ |
| पूर्णाऽसि वाणि! रजनी त्वमहं शशाङ्कः विद्युच्छटाऽसितदहं सजलो धनाङ्कः । कस्तूरिका त्वमसि चेत्तदहं मृगाङ्कः त्वं याऽसि साऽसि परमेष शिशुस्तवाङ्कः ॥ प्रतापविजयः-१४ ॥ |
| पूर्णे निशीथे यदि संक्रमः स्याद्दिनद्वयं पुण्यमथोदयास्तात् । पूर्वं परस्ताद्यदि याम्यसौम्यायने दिने पूर्वपरे तु पुण्ये ॥ मुहूर्त.संक्रान्तिप्रकरणम् ६ ॥ |
| पूर्णेन्दुतः प्राग्वदनं नवम्यादिषूत्तरास्यं त्वथ पश्चिमास्यम् । दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं वदन्ति ॥ मुहूर्त.वास्तुप्रकरणम् १७॥ |
| पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत्क्वापि निधाय वेधाः । तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥ नैषधीयचरितम् १०.६२ ॥ |
| पूर्णेन्दुमास्यं विदधुः पुनस्ते पुनर्मुखीचक्रुरनिद्रमब्जम् । स्ववक्त्रमादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथातिमञ्जु ॥ नैषधीयचरितम् १०.२ ॥ |
| पूर्णेन्दुसुन्दर-मुखि! प्रतिभाऽभिरामे! वामे विधेः, स्ववचसां वचसां विरामे । गीर्वाणवाणि! भुवनाऽऽभरणं भवत्याः वन्दे दयार्द्रचरण शरण जगत्याः ॥ प्रतापविजयः-१ ॥ |
| पूर्वं त्वयाप्यभिमतं गतमेवमासीच्छ्लाध्यं गमिष्यसि पुनर्विजयेन भर्तुः । कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥ (स्वप्नवासवदत्तम् १. ४) |
| पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षमं अश्वसादी । तुरंगमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥ रघुवंशम् ७.४७ ॥ |
| पूर्वं मया विरहनिःसहयापि दृष्टः सोऽयं प्रियस्तत इतो निषधाधिराजः । भूयः किमागतवती मम सा दशेयं पश्यामि यद्विलसितेन नलानलीकान् ॥ नैषधीयचरितम् १३.४५ ॥ |
| पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् । केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः ॥ रघुवंशम् ११.८० ॥ |
| पूर्वपुण्यविभवव्ययलब्धाः श्रीभरा विपद एव विमृष्टाः । पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः ॥ नैषधीयचरितम् ५.१७ ॥ |
| पूर्वमङ्ग जुहुधि त्वमेव वा स्नातवत्यवभृथे ततस्त्वयि । सोमपायिनि भविष्यते मया वाञ्छितोत्तमवितानयाजिना ॥ शिशुपालवधम् १४.१० ॥ |
| पूर्वमेष किल सृष्टवानपस्तासु वीर्यमनिवार्यमादधौ । तच्च कारणमभूद्धिरण्मयं ब्रह्मणोऽसृजदसाविदं जगत् ॥ शिशुपालवधम् १४.६७ ॥ |
| पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः । उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत् ॥ रघुवंशम् ११.१० ॥ |
| पूर्वस्तयोरात्मसमे चिरोढां आत्मोद्भवे वर्णचतुष्टयस्य । धुरं निधायैकनिधिर्गुणानां जगाम यज्वा यजमानलोकं ॥ रघुवंशम् १८.१२ ॥ |
| पूर्वाग्निपित्र्यान्तकताराकाणां भूपप्रकृत्युग्रतुरङ्गमाः स्युः । स्वातीविशाखेन्द्रभुजङ्गमानां नाड्यो निषिद्धा मनुसम्मिताश्च ॥ मुहूर्त.यात्राप्रकरणम् १२॥ |
| पूर्वात्रयं याम्यमधे उग्रं क्रूरं कुजस्तथा । तस्मिन् घाताग्निशाठ्यानि विषशस्त्रादि सिद्ध्यति ॥ मुहूर्त.नक्षत्रप्रकरणम् ४ ॥ |
| पूर्वानुभूतं स्मरता च यत्र कम्पोत्तरं भीरु तवोपगूढम् । गुहाविसारीण्यतिवाहितानि मया कथंचिद्घनगर्जितानि ॥ रघुवंशम् १३.२८ ॥ |
| पूर्वार्धमाग्नेयमघानिलानां त्यजेद्धि चित्राहियमोत्तरार्धम् । नृपः समस्तां गमने जयार्थी स्वातीं मघां चोशनसो मतेन ॥ मुहूर्त.यात्राप्रकरणम् १३॥ |
| पूर्वाशवीज्यमघेन्दुकर्णदहनद्वीशेन्द्रचित्रास्तथा शुक्रारौ कुलसंज्ञकाश्च तिथयोऽर्काष्टेन्द्रवेदैर्मिताः । यायी स्यादकुले जयी च समरे स्थायी च तद्वत्कुले सन्धिः स्यादुभयोः कुलाकुलगणे भूमीशयोर्युध्यतोः ॥ मुहूर्त.यात्राप्रकरणम् १७॥ |
| पूर्वाह्णे ध्रुवमिश्रभैर्न नृपतेर्यात्रा न मध्याह्नके तीक्ष्णाख्यैरपराह्णके न लघुभैर्नो पूर्वरात्रे तथा । मित्राख्यैर्न च मध्यरात्रिसमये चोग्रैस्तथा नोचरै रात्र्यन्ते हरिहस्तपुष्यशशिभिः स्यात्सर्वकाले शुभा ॥ मुहूर्त.यात्राप्रकरणम् ११॥ |
| पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथ विष्णुपूजा । मासेऽष्टमे विष्णुविधातृजीवैर्लग्ने शुभे मृत्युगृहे च शुद्धे ॥ मुहूर्त.संस्कारप्रकरणम् १०॥ |
| पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी । तमातपक्लान्तमनातपत्रमाचारपूतं पवनस्सिषेवे ॥ रघुवंशम् २.१३ ॥ |
| पृथक्कथितसादृश्यं दृश्यं सादृश्यरूपकम् । उल्लसत्पञ्चशाखस्ते राजते भुजभूरुहः ॥ चन्द्रालोकः ५.२० ॥ |
| पृथक्प्रकारेङ्गितशंसिताशयो युवा ययोदासि तयापि तापितः । ततो निराशः परिभावयन्परामये तयातोषि सरोषायैव सः ॥ नैषधीयचरितम् १६.१०६ ॥ |

| |
|---|
| पृथग्विधान्यस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते । मुक्ता वितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः ॥ किरातार्जुनीयम् १६.३४ ॥ |
| पृथिवीं बिभर्थ यदि पूर्वमिदमपि गुणाय वर्तते । भूमिभृदिति परहारितभूस्त्वमुदाह्रियस्व कथमन्यथा जनैः ॥ शिशुपालवधम् १५.२९ ॥ |
| पृथिवीं शासतस्तस्य पाकशासनतेजसः । किंचिदूनमनूनर्द्धेः शरदां अयुतं ययौ ॥ रघुवंशम् १०.१ ॥ |
| पृथुकदम्बकदम्बकराजितं ग्रहितमालतमालवनाकुलम् । लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदन्तिनम् ॥ किरातार्जुनीयम् ५.९ ॥ |
| पृथुदर्विभृतस्ततः फणीन्द्रा विषमाशीभिरनारतं वमन्तः । अभवन्युगपद्विलोलजिह्वायुगलीढोभयसृक्कभागमाविः ॥ शिशुपालवधम् २०.४२ ॥ |
| पृथुदाम्नि तत्र परिबोधि च मा भवतीभिरन्यमुनिवद्विकृतिः । स्वयशांसि विक्रमवतामवतां न वधूष्वघानि विमृष्यन्ति धियः ॥ किरातार्जुनीयम् ६.४५ ॥ |
| पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया । विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥ नैषधीयचरितम् २.३६ ॥ |
| पृथुवारिधिवीचिमण्डलान्तर्विलसत्फेनवितानपाण्डुराणि । दधति स्म भुजङ्गमाङ्गमध्ये नवनिर्मोकरुचिं ध्वजांशुकानि ॥ शिशुपालवधम् २०.४७ ॥ |
| पृथोरध्यक्षिपधृद्रुक्मी यया चापमुदायुधः । तयैव वाचापगमं ययाचापमुदायुधः ॥ शिशुपालवधम् १९.९ ॥ |
| पृथ्वीवराहमभिपूज्य कुजे विशुद्धेऽरिक्ते तिथौ व्रजति पञ्चममासि बालम् । बद्ध्वा शुभेऽह्नि काटसूत्रमथ ध्रुवेन्दु ज्येष्ठर्क्षमैत्रलघुभैरुपवेशयेकौत्कौ ॥ मुहूर्त.संस्कारप्रकरणम् २१॥ |
| पृथ्वीश एष नुदतु त्वदनङ्गतापमालिङ्ग्य कीर्तिचयचामरचारुचापः । सङ्ग्रामसंगतविरोधिशिरोधिदण्डखण्डिक्षुरप्रशरसंप्रसरत्प्रतापः ॥ नैषधीयचरितम् ११.१२३ ॥ |
| पृष्टः स्वैश्चापरोपैः सह स हि मकरेणात्मभूः केतुनाऽभूद्धत्तां नस्त्वत्प्रसादादथ मनसिजतां मानसो नन्दनः सन् । भ्रूभ्यां ते तन्वि धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितैः स्तादस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः ८.१०५ ॥ नैषधीयचरितम् |
| पृष्ठेऽपि किं तिष्ठति नाथ रङ्कुर्विधोरङ्क इवेति शङ्का । तत्त्वाय तिष्ठस्व मुखे स्व एवं यद्द्वैरथे पृष्ठमपश्यदस्य ॥ नैषधीयचरितम् २२.८१ ॥ |
| पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः । एकातपोअत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ॥ रघुवंशम् १८.४ ॥ |
| पौनः पुन्यादस्रगन्धेन मत्तो मृद्गन्कोपाल्लोकमायोधनोर्व्यां । पादे लग्नमत्र मालामिभेन्द्रः पाशीकल्पामायतामाचकर्ष ॥ शिशुपालवधम् १८.५७ ॥ |
| पौरस्त्यशैलं जनतोपनीतां गृह्णन्यथाह्नः पतिरर्घ्यपूजाम् । तथातिथेयीमथ संप्रतीच्छन्प्रियार्पितामासनमाससाद ॥ नैषधीयचरितम् ८.५२ ॥ |
| पौरस्त्यायां घुसृणमसृणश्रीजुषो वैजयन्त्याः स्तोमैश्चित्तं हरिति हरति क्षीरकण्ठैर्मयूखैः । भानुर्जाम्बूनदतनुरसौ शक्रसौधस्य कुम्भः स्थाने पानं तिमिरजलधेर्भाभिरेतद्भवाभिः ॥ नैषधीयचरितम् १९.६३ ॥ |
| पौरेषु सोऽहं वहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम् । सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेन्द्रः ॥ रघुवंशम् १४.३८ ॥ |
| पौलस्त्यस्य जटयुषा विघटितः कार्ष्णायसोऽयं रथस्ते चैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः । खड्गच्छिन्नजटायुपक्षतिरितः सीतां चलन्तीं वहन्नन्तर्व्यापृतविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥ (उत्तररामचरितम् ३.४३) |
| पौषे पक्षत्यादिका द्वादशैवं तिथ्यो माघादौ द्वितीयादिकास्ताः । कामात्तिस्रः स्युस्तृतीयादिवच्च याने प्राच्यादौ फलं तत्र वक्ष्ये ॥ मुहूर्त.यात्राप्रकरणम् २०॥ |
| पौष्णध्रुवाश्विकरपञ्चकवासवेज्यादित्येप्रवालरदशङ्खसुवर्णवस्त्रम् । धार्यं विरिक्तशनिचन्द्रकुजेऽह्नि न रक्तंभौमे ध्रुवादितियुगे सुभगा न दध्यात् ॥ मुहूर्त.नक्षत्रप्रकरणम् १०॥ |
| पौष्णध्रुवेन्दुकरवातहयेषु सूती-स्नानं समित्रभरवीज्यकुजेषु शस्तम् । नार्द्रात्रयश्रुतिमघान्तकमिश्रमूलत्वाष्ट्रे ज्ञसौरिवसुषड्रविरिक्ततिथ्याम् ॥ मुहूर्त.संस्कारप्रकरणम् १२॥ |
| पौष्णेशशाक्राद्रससूर्यनन्दा पूर्वार्द्धमध्यापरभागयुग्मम् । भर्ता प्रियः प्राग्युजि भे स्त्रियाः स्यान्मध्ये द्वयोः प्रेम परे प्रिया स्त्री ॥ मुहूर्त.विवाहप्रकरणम् ३५॥ |
| पौष्पं धनुः किं मदनस्य दाहे श्यामीभवत्केसरशेषमासीत् । व्यधाद्द्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त ॥ नैषधीयचरितम् ७.२४ ॥ |
| प्रकटं मृदु नाम जल्पतः परुषं सूचयतोर्थमन्तरा । शकुनादिव मार्गवर्तिभिः पुरुषादुद्विजितव्यमीदृशात् ॥ शिशुपालवधम् १६.१९ ॥ |
| प्रकटतरमिमं मा द्राक्षुरन्या रमण्यः स्फुटमिति सविशङ्गं कान्तया तुल्यवर्णः । चरणतलसरोजाक्रान्तिसंक्रान्तयासौ वपुषि नखविलेखो लाक्षया रक्षितस्ते ॥ शिशुपालवधम् ११.३२ ॥ |
| प्रकटमलिनलक्ष्मा मृष्टपत्रावलीकैरधिगततरतिशोभैः प्रत्युषः प्रोषितश्रीः । उपहसित इवासौ चान्द्रमाः कामिनीनां परिणतशरकाण्डापाण्डुभिर्गण्डभागैः ॥ शिशुपालवधम् ११.३० ॥ |
| प्रकटान्यपि नैपुणं महत्परवाच्यानि चिराय गोपितुं । विवरीतुमथात्मनो गुणान्भृशमाकौशलमार्यचेतसां ॥ शिशुपालवधम् १६.३० ॥ |
| प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती । धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरायिता ॥ नैषधीयचरितम् १.११५ ॥ |
| प्रकुप्यतः श्वसनसमीरणाहतिस्फुटोष्मभिस्तनुवसनान्तमारुतैः । युधाजितः कृतपरितूर्णवीजनं पुनस्तरां वदनसरोजमस्विदत् ॥ शिशुपालवधम् १७..६ ॥ |
| प्रकृतजपविधीनामास्यमुद्रश्मिदन्तं मुहुरपिहितमोष्ठ्यैरक्षरैर्लक्ष्यमन्यैः । अनुकृतिमनुवेलं घट्टितोद्घट्टितस्य व्रजति नियमभाजां मुग्धमुक्तापुटस्य ॥ शिशुपालवधम् ११.४२ ॥ |
| प्रकृतमनुससार नाभिनेयं प्रविकसदङ्गुलि पाणिपल्लवं वा । प्रथममुपहितं विलासि चक्षुः सिततुरगे न चचाल नर्तकीनां ॥ किरातार्जुनीयम् १०.४१ ॥ |
| प्रकृतिं प्रतिपादुकैश्च पादैश्चक्ëषे भानुमतः पुनः प्रसर्तुं । तमसोऽभिभवादपास्य मूर्च्छामुपजीवत्सहसैव जीवलोकः ॥ शिशुपालवधम् २०.३९ ॥ |
| प्रकृतिरेतु गुणः स न योषितां कथमिमां हृदयं मृदु नाम यत् । तदिषुभिः कुसुमैरपि दुन्वता सुविवृतं विबुधेन मनोभुवा ॥ नैषधीयचरितम् ४.२३ ॥ |
| प्रक्षीण एवायुषि कर्मकृष्टे नरान्न तिष्ठत्युपतिष्ठते यः । बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः ॥ नैषधीयचरितम् ६.१ ॥ |

| |
|---|
| प्रचलत्पतगेन्द्रपत्रवातप्रसभोन्मूलितशैलदत्तमार्गैः । भयविह्वलमाशु दन्दशूकैर्विवशैराविविशे स्वमेव धाम ॥ शिशुपालवधम् २०.५८ ॥ |
| प्रचलिते चलितं स्थितमास्थिते विनमिते नतमुन्नतमुन्नतौ । वृषकपिध्वजयोरसहिष्णुना मुहुरभावभयादिव भूभृता ॥ किरातार्जुनीयम् १८.१० ॥ |
| प्रचोदिताः परिचितयन्तृकर्मभिर्निषादिभिर्विदितयताङ्कुशक्रियैः । गजाः सकृत्करतललोलनालिकाहता मुहुः प्रणदितघण्डमाययुः ॥ शिशुपालवधम् १७..३५ ॥ |
| प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं कामं मया कृतमिदं हितमित्यवेक्ष्य । सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ किं वक्ष्यतीति हृदयं परिशङ्कितं मे ॥ (स्वप्नवासवदत्तम् ६. १५) |
| प्रजा इवङ्गादरविन्दनाभेः शंभोर्जटाजूटतटादिवापः । मुखादिवाथ श्रुतयो विधातुः पुरान्निरीयुर्मुरजिद्ध्वजिन्यः ॥ शिशुपालवधम्  ३.६४ ॥ |
| प्रजानां विनयाधानाद्रक्षणाद्भरणादपि । स पिता पितरस्तासां केवलं जन्महेतवः ॥ रघुवंशम् १.२४ ॥ |
| प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् । सहस्रगुमुत्स्रष्टुमादत्ते हि रसं रविः ॥ रघुवंशम् १.१८ ॥ |
| प्रजापतिक्रतुनिधनार्थमुत्थितंव्यतर्कयज्ज्वरमिव रौद्रमुद्धतं । समुद्यतं सपदि वधाय विद्विषामतिक्रुधं निषधमनौषधं जनः ॥ शिशुपालवधम् १७..७ ॥ |
| प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव । सौम्येति चाभाष्य यथार्थभाषी प्रापय्य वाल्मीकिपदं त्यजैनां ॥ रघुवंशम् १४.४५ ॥ |
| प्रणतः शिरसा करिष्यते सकलैरेत्य समं धराधिपैः । तव शासनमाशु भूपतिः परवानद्य यतस्त्वयैव सः ॥ शिशुपालवधम् १६.४ ॥ |
| प्रणतिप्रवणान्विहाय नः सहजस्नेहनिबद्धचेतसः । प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥ किरातार्जुनीयम् २.४४ ॥ |
| प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः । अचलनलिनलक्ष्मीहारि नालं बभूव स्तिमितममरभर्तुर्द्रष्टुं अक्ष्णां सहस्रं ॥ किरातार्जुनीयम् ६.४७ ॥ |
| प्रणयकोपभृतोऽपि पराङ्मुखाः सपदि वारिधरारवभीरवः । प्रणयिनः परिरब्धुमथाङ्गना ववलिरे वलिरेचितमध्यमाः ॥ शिशुपालवधम् ६.३८ ॥ |
| प्रणयप्रकाशनविदो मधुराः सुतरामभीष्टजनचित्तहृतः । प्रजिघाय कान्तमनु मुग्धतरस्तरुणीजनो दृश इवाथ सखीः ॥ शिशुपालवधम् ९.५५ ॥ |
| प्रणिधाय चित्तमथ भक्ततया विदितेऽप्यपूर्व इव तत्र हरिः । उपलब्धुमस्य नियमस्थिरतां सुरसुन्दरीरिति वचोऽभिदधे ॥ किरातार्जुनीयम् ६.३९ ॥ |
| प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनितां । श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवतां ॥ किरातार्जुनीयम् ६.१९ ॥ |
| प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् । अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ रघुवंशम् १०.१५ ॥ |
| प्रतनूल्लसिताचिरद्युतः शरदं प्राप्य विखण्डितायुधाः । दधतेऽरिभिरस्य तुल्यतां यदि नासारभृतः पयोभृतः ॥ शिशुपालवधम् १६.६१ ॥ |
| प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशङ्गयन्त्यः । निश्चक्रमुः प्राणहरेक्षणानां ज्वाला महोल्का इव लोचनेभ्यः ॥ किरातार्जुनीयम् १६.४० ॥ |
| प्रतममलघुमौक्तकाभमासीच्छ्रमजलमुज्ज्वलगण्डमण्डलेषु । कठिनकुचतटाग्रपाति पश्चादथ शतसर्करतां जगाम तासां ॥ शिशुपालवधम् ७.६९ ॥ |
| प्रतापजातोऽमरसिंहनामवान्, तदीयमातिथ्यमल तदाऽकरोत् । स्वयम्प्रतापस्तु कदाप्यहो! सकृत्, न चाहृवयत्तं न तदन्तिकङ्गतः ॥ प्रतापविजयः-६५ ॥ |
| प्रताप-वाक्य क्रकचेन मानवान्, निकृत्तमर्मा गमनोद्यतो भवत् । सदैव, केनापि कटु-प्रलापिना, वचस्तदैवेत्थमभाणि दुःसहम् ॥ प्रतापविजयः- ८५ ॥ |
| प्रतापसिंहस्य तथाऽपि वर्णनं, मया यथाशक्ति स-भक्ति चित्रिता । पवित्रिता भारतभूरियं यया पवित्रयिष्यत्यथ किन्न साऽद्य नाम् ॥ प्रतापविजयः-२२ ॥ |
| प्रतापसिंहस्य महोत्तमं यशः,रिपूच्छलच्छोणित- शाणलेखनैः ।  शिलोच्चये भाति यदीयकेऽङ्कितं, प्रिया न कंसा किल 'हल्दिघाटिका' ॥ प्रतापविजयः-१०८ ॥ |
| प्रतिकामिनीति ददृशुश्चकिताः स्मरजन्मघर्मपयसोपचिताः । सुदृशोभिभर्तृशशैरश्मिगलज्जलबिन्दुमिन्दुमणिदारुवधूम् ॥ शिशुपालवधम् ९.३५ ॥ |
| प्रतिकुञ्चितकूर्परेण तेन श्रवणोपान्तिकनीयमानगव्यं । ध्वनति स्म धनुर्घनान्तमत्तप्रचुरक्रौञ्चरवानुकारमुच्चैः ॥ शिशुपालवधम् २०.१९ ॥ |
| प्रतिकूलमुपगते हि विधौ विफलत्वमेति बहुसाधनता । अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥ शिशुपालवधम् ९.६ ॥ |
| प्रतिकृतिरचनाभयो दूतिसंदर्शिताभ्यः समधिकतररूपाः शुद्धसंतानकामैः । अधिविविदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥ रघुवंशम् १८.५३ ॥ |
| प्रतिक्रियायै विधुरः स तस्मात्कृच्छ्रेण विश्लेषमियाय हस्तः । पराङ्मुखत्वेऽपि कृतोपकारात्तूणीमुखान्मित्रकुलादिवार्यः ॥ किरातार्जुनीयम् १७.४१ ॥ |
| प्रतिक्षणं विधुवति शारणे शिरः शिखिद्युतः कनककिरीटरश्मयः । अशङ्कितं युधमधुना विशन्त्वमी क्षमापतीनिति निरराजयन्निव ॥ शिशुपालवधम् १७..१६ ॥ |
| प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम् । अकारि तत्पूर्वनिबद्धया तया सरागमस्या रशनागुणास्पदम् ॥ कुमारसंभवम् ५.१० ॥ |
| प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च । संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥ कुमारसंभवम् ३.६६॥ |
| प्रतिघः कुतोऽपि समुपेत्य नरपतिगणं समाश्रयत् । जामिहरणजनितानुशयः समुदाचचार निज एव रुक्मिणः ॥ शिशुपालवधम् १५.५३ ॥ |
| प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजां अपि लोचनानि । गरुत्मता संहतिभिर्विहायः क्षणप्रकाशाभिरिवावतेने ॥ किरातार्जुनीयम् १६.४३ ॥ |
| प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाससुगन्धिनानिलेन । नव इव विबभौ सचित्तजन्मा गतधृतिराकुलितश्च जीवलोकः ॥ किरातार्जुनीयम् १०.२१ ॥ |
| प्रतिनादपूरितदिगन्तरः पतन्पुरगोपुरं प्रति स सैन्यसागरः । रुरुचे हिमाचलगुहामुखोन्मुखः पयसां प्रवाह इव सौरसैन्धवः ॥ शिशुपालवधम् १३.२७ ॥ |
| प्रतिपक्षजिदप्यसंशयं युधि चैद्येन विजेष्यते भवान् । ग्रसते हि तमोपहं मुहुर्ननु राहवाहवमहर्पतिं तमः ॥ शिशुपालवधम् १६.५७ ॥ |
| प्रतिपत्तुमङ्ग घटते च न तव नृपयोग्यमर्हणं । कृष्ण कलय ननु कोऽहमिति स्फुटमापदां पदमनात्मवेदिता ॥ शिशुपालवधम् १५.२२ ॥ |
| प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः । रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥ कुमारसंभवम् ४.१६ ॥ |

| |
|---|
| प्रतिप्रतीकं प्रथमं प्रियायामथान्तरानन्दसुधासमुद्रे । ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ॥ नैषधीयचरितम् ७.२ ॥ |
| प्रतिप्रयातेषु तपोधनेषु सुखादविज्ञातगतार्धमासान् । सीतास्वहस्तोपहृताग्र्यपूजान्रक्षःकपीन्द्रान्विससर्ज रामः ॥ रघुवंशम् १४.१९ ॥ |
| प्रतिफलति करौघे संमुखावस्थितायां रजतकटकभित्तौ सान्द्रचन्द्रांशुगौर्यां । बहिरभिहतमद्रेः संहतं कन्दरान्तर्-गतमपि तिमिरौघं घर्मभानुर्भिनत्ति ॥ शिशुपालवधम् ११.५८ ॥ |
| प्रतिबोधजृम्भणविभीनमुखी पुलिने सरोरुहदृशा ददृशे । पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुरिव शुक्तिवधूः ॥ किरातार्जुनीयम् ६.१२ ॥ |
| प्रतिभिद्य कान्तमपराधकृतं यदि तावदस्य पुनरेव मया । क्रियतेऽनुवृत्तिरुचितैव ततः कलयेदमानमनसं सखि मां ॥ शिशुपालवधम् ९.५८ ॥ |
| प्रतिभैव श्रुताभ्यास-सहिता कवितां प्रति । हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव ॥ चन्द्रालोकः १.६ ॥ |
| प्रतिमासमसौ निशापतिः खग संगच्छति यद्दिनाधिपम् । किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ॥ नैषधीयचरितम् २.५८ ॥ |
| प्रतियोजयितव्यवल्लकीसमवस्थां अथ सत्त्वविप्लवात् । स निनाय नितान्तवत्सलः परिगृह्योचितमङ्कमङ्गनाम् ॥ रघुवंशम् ८.४१ ॥ |
| प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे । अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ॥ शिशुपालवधम् १६.२५ ॥ |
| प्रतिशरणमशीर्णज्योतिरग्न्याहितानां विधिविहितविरिब्धैः सामिधेनीरधीत्य । कृतगुरुदुरितौघध्वंसमध्वर्युवर्यैर्हुतमयमुपलीढे साधु साम्नाय्यमग्निः ॥ शिशुपालवधम् ११.४१ ॥ |
| प्रतिषेधः प्रसिद्धानां कारणानामनादरः । न युद्धेन भ्रुवोः स्पन्देनैव वीरा निपातिताः ॥ चन्द्रालोकः३.५ ॥ |
| प्रतिहट्टपथे घरट्टजात्पथिकाह्वानदसक्तुसौरभैः । कलहान्न घनान्यदुत्थितादधुनाप्युज्झति घर्घरस्वरः ॥ नैषधीयचरितम् २.८५ ॥ |
| प्रतीक्ष्यं च प्रतीक्ष्यायै पितृष्वस्रे सुतस्य ते । सहिष्ये शतमागांसि प्रत्यश्रौषीः किलेति यत् ॥ शिशुपालवधम्  २.१०८ ॥ |
| प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेतृतोज्झिता । अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत ॥ नैषधीयचरितम् १.१३ ॥ |
| प्रतीपमुपमानस्य हीनत्वमुपमेयतः । दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना ॥ चन्द्रालोकः ५.१०० ॥ |
| प्रत्यंसं विलुलितमूर्धजा चिराय स्नानार्द्रं वपुरुदवापयत्किलैका । नाजानादभिमतमन्तिकेऽभिवीक्ष्य स्वेदाम्बुद्रवमभवत्तरां पुनस्तत् ॥ शिशुपालवधम् ८.६८ ॥ |
| प्रत्यक्षलक्ष्यामवलम्ब्य मूर्तिं हुतानि यज्ञेषु तवोपभोक्ष्ये । संशेरतेऽस्माभिरवीक्ष्य भुक्तं मखं हि मन्त्राधिकदेवभावे ॥ नैषधीयचरितम् १४.७३ ॥ |
| प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव । आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ रघुवंशम् १०.२९ ॥ |
| प्रत्यङ्गभूषाच्छमणिच्छलेन यल्लग्नतन्निश्चललोकनेत्राम् । हाराग्रजाग्रद्गरुडाश्मरश्मिपीनाभनाभीकुहरान्धकाराम् ॥ नैषधीयचरितम् १०.१०४ ॥ |
| प्रत्यङ्गमस्यामभिकेन रक्षां कर्तुं मघोनेव निजास्त्रमस्ति ।वज्रं च भूषामणिमूर्तिधारि नियोजितं तद्द्युतिकार्मुकं च ॥ नैषधीयचरितम् ७.१९ ॥ |
| प्रत्यतिष्ठिपदिमां खलु देवीं कर्म सर्वसहनव्रतजन्म । यूयमप्यहह पूजनमस्या यन्निजैः सृजथ पादपयोजैः ॥ नैषधीयचरितम् ५.९६ ॥ |
| प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः । जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ ॥ चन्द्रालोकः ५.९९ ॥ |
| प्रत्यन्यदन्ति निशिताङ्कुशदूरभिन्न-निर्याणनिर्यदसृजं चलितं निपादी । रोद्धुं महेभपरिव्रढिमानमागादाक्रन्तितो न वशमेति महान्परस्य ॥ शिशुपालवधम् ५.४१ ॥ |
| प्रत्यन्यनागं चल्तस्तरावता निरस्य कुण्ठं दधतान्यमङ्कुशं । मूर्धानमूर्ध्वायतदन्तमण्डलं धुवन्नरोधि द्विरदो निषादिना ॥ शिशुपालवधम् १२.१२ ॥ |
| प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलामयी । स्वं वपुः स किल किल्बिषच्छिदां रामपादरजसामनुग्रहः ॥ रघुवंशम् ११.३४ ॥ |
| प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् । भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः ॥ रघुवंशम् ११.८८ ॥ |
| प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसङ्गे वितथप्रयत्नः । जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥ रघुवंशम् २.४२ ॥ |
| प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थपृथ्वीधरः पृथुरयं मथुराधिनाथः । अश्मश्रुजातमनुयाति न शर्वरीशः श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य ॥ नैषधीयचरितम् ११.१०३ ॥ |
| प्रत्यर्थियौवतवतंसतमालमालोन्मीलत्तमःप्रकरतस्करशौर्यसूर्ये । अस्मिन्नवन्तिनृपतौ गुणसंततीनां विश्रान्तिधामनि मनो दमयन्ति किं ते ॥ नैषधीयचरितम् ११.८८ ॥ |
| प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये । आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति  ॥ नीतिसंग्रहस्य मित्र-१.१३ ॥ |
| प्रत्यार्द्रीकृततिलकास्तुषारपातैः प्रह्लादं शमितपरिश्रमा दिशन्तः । कान्तानां बहुमतिमाययुः पयोदा नाल्पीयान्बहु सुकृतं हिनस्ति दोषः ॥ किरातार्जुनीयम् ७.१५ ॥ |
| प्रत्यावृत्तं भङ्गभाजि स्वसैन्ये तुल्यं मुक्तैराकिरन्ति स्म कश्चित् । एकौघेन स्वर्णपुङ्खैर्द्विषन्तः सिद्धाः माल्यैः साधुवादैर्द्वयेऽपि ॥ शिशुपालवधम् १८.५५ ॥ |
| प्रत्यासन्ने दन्तिनि प्रातिपक्षे यन्त्रा नागः प्रास्तवक्त्रच्छदोऽपि । क्रोधाक्रान्तः क्रूरनिर्दारिताक्षः प्रेक्षांचक्रे नैव किञ्चिन्मदान्धः ॥ शिशुपालवधम् १८.२८ ॥ |
| प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् । स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥ मेघदूतम्, पूर्वमेघः ४॥ |
| प्रत्याह वैनं शरमोक्षवन्ध्यो मा पत्त्रपर्वात्स्वरभेदमाप्तः । प्रहीणपूर्वध्वनिनाधिरूढस्तुलामसारेन शरद्घनेन ॥ रघुवंशम् २.४२* ॥ |
| प्रत्याहतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यस्तनोति । तेजांसि भानोरिव निष्पतन्ति यशांसि वीर्यज्वलितानि तस्य ॥ किरातार्जुनीयम् १७.१५ ॥ |
| प्रत्युद्व्रजन्त्या प्रियया विमुक्तं पर्यङ्कमङ्कस्थितसज्जशय्यम् । अध्यास्य तामप्यधिवास्य सोऽयं संध्यामुपश्लोकयति स्म सायम् ॥ नैषधीयचरितम् २२.२ ॥ |
| प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनं । गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ॥ रघुवंशम् ११.८५ ॥ |

| |
|---|
| प्रत्युवाच तमृषिर्निशम्यतां सारतोऽयमथ वा कृतं गिरा । चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ॥ रघुवंशम् ११.४१ ॥ |
| प्रथमं अन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः । सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ॥ रघुवंशम् ८.३४ ॥ |
| प्रथमं कलाभवदथार्धमथो हिमदीधितिर्महदभूदुदितः । दधति ध्रुवं क्रमश एव न तु द्युतिशालिनोऽपि सहसोपचयम् ॥ शिशुपालवधम् ९.२९ ॥ |
| प्रथमं पथि लोचनातिथिं पथिकाप्रार्थितसिद्धिशंसिनम् । कलसं जलसंभृतं पुरः कलहंसः कलयांबभूव सः ॥ नैषधीयचरितम् २.६५ ॥ |
| प्रथमं शरीरजविकारकृतमुकुलबन्धमव्यथी । भाविकलहफलयोगमसौ वचनेन कोपकुसुमं व्यचीकसत् ॥ शिशुपालवधम् १५.१२ ॥ |
| प्रथमककुभः पान्थत्वेन स्फुटेक्षितवृत्रहाण्यनुपदमिह द्रक्ष्यन्ति त्वां महांसि महस्पतेः । पटिमवहनादूहापोहक्षमाणि वितन्वतामहह युवयोस्तावल्लक्ष्मीविवेचनचातुरीम् ॥ नैषधीयचरितम् १९.२६ ॥ |
| प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् । तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभून्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥ रघुवंशम् ७.७१ ॥ |
| प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलैस्तिमिरपरिषद्दूर्वापर्वावलीशबलीकृतैः । अथ रविरुचां ग्रासातिथ्यं नभः स्वविहारिभिः सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ॥ नैषधीयचरितम् १९.१४ ॥ |
| प्रदक्षिणं दैवतहर्म्यमद्रिं सदैव कुर्वन्नपि शर्वरीशः । द्रष्टा महेन्द्रानुजदृष्टिमूर्त्या न प्राप तद्दर्शनविघ्नतापम् ॥ नैषधीयचरितम् १०.५४ ॥ |
| प्रदक्षिणगताः श्रेष्ठा यात्रायां मृगपक्षिणः । ओजा मृगा व्रजन्तोऽतिधन्या वामे खरस्वनः ॥ मुहूर्त.यात्राप्रकरणम् १०७॥ |
| प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे । मेरोरुपान्तेष्विव वर्तमानमन्योन्संसक्तमहस्त्रियामम्॥ कुमारसंभवम् ७.७९॥ |
| प्रदक्षिणप्रक्रमणात्कृषानोरुदर्चिषस्तन् मिथुनं चकाशे । मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ॥ रघुवंशम् ७.२४ ॥ |
| प्रदक्षिणप्रक्रमणालवालविलेपधूपाचरणाम्बुसेकैः । इष्टं च मृष्टं च फलं सुवाना देवा हि कल्पद्रुमकाननं नः ॥ नैषधीयचरितम् १४.२ ॥ |
| प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता । प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥ रघुवंशम् २.२१ ॥ |
| प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च । धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ॥ रघुवंशम् २.७१ ॥ |
| प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः । अनुत्सेको लक्ष्म्यामनभिभवगन्धाः परकथाः सतां केनोद्दिष्टं विषमसिधाराव्रतमिदम् ॥ नीतिशतकम्६४ ॥ |
| प्रदीपं वर्धयेत्तत्र तटस्थं मङ्गलोदयः । पटोऽयं दग्ध इत्यादौ स्फुटं नास्ति प्रयोजनम् ॥ चन्द्रालोकः९.७ ॥ |
| प्रधिमण्डलोद्धतपरागघनवलयमध्यवर्तिनः । पेतुरशनाय इवाशनकैर्गुरुनिःस्वनव्यथितजन्तवो रथाः ॥ शिशुपालवधम् १५.७९ ॥ |
| प्रनृत्तशववित्रस्त- तुरगाक्षिप्तसारथौ । मारुतापूर्णतूणीर- विक्रुष्टहतसादिनि ॥ किरातार्जुनीयम् १५.२६ ॥ |
| प्रपे रूपी पुरारेपाः परिपूरी परः परैः । रोपैरपारैरुपरि पुपूरेऽपि पुरोऽपरैः ॥ शिशुपालवधम् १९.९४ ॥ |
| प्रप्य भीममसौ जन्यं सौजन्यं दधदानते । विध्यन्मुमोच न रिपूनरिपूगान्तकः शरैः ॥ शिशुपालवधम् १९.१३ ॥ |
| प्रप्यते स्म गतचित्रकचित्रैश्चत्रमार्द्रनखलक्ष्मकपोलैः ।दध्रिरेऽथ रभसच्युतपुष्पाः स्वबिन्दुकुसुमान्यलकान्ताः ॥ शिशुपालवधम् १०.७८ ॥ |
| प्रप्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव । उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥ रघुवंशम् ७.७ ॥ |
| प्रफुल्लतापिच्छनिभैरभीशुभिः शुभैश्च सप्तच्छदपांसुपाण्डुभिः । परस्परेण च्छुरितामलच्छवी तदैकवर्णाविव तौ बभूवतुः ॥ शिशुपालवधम्  १.२२ ॥ |
| प्रबन्धे चेति षोढासौ रसाद्याख्योऽस्फुटक्रमः । एषु सप्तदशस्वेकं परित्यज्यास्फुटक्रमम् ॥ चन्द्रालोकः७.१० ॥ |
| प्रबभूव नालमवलोकयितुं परितः सरोजरजसारुणितं । सरिदुत्तरीयमिव संहतिमत्स तरङ्गरङ्गि कलहंसकुलं ॥ किरातार्जुनीयम् ६.६ ॥ |
| प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकं । दिवसं शारदं इव प्रारम्भसुखदर्शनं ॥ रघुवंशम् १०.९ ॥ |
| प्रबोधकालेऽहनि बाधितानि ताराः खपुष्पाणि निदर्शयन्ती । निशा ह शून्याध्वनि योगिनीयं मृषा जगद्दृष्टमपि स्फुटाभम् ॥ नैषधीयचरितम् २२.२४ ॥ |
| प्रभञ्जनस्याऽपि जवं विभञ्जयन्, प्रदर्शयन् भीममसीमसाहसम् । प्रताप-कुन्तः कुटिलान् प्रकर्तयन्, न कं समातङ्कितवानशङ्कितः॥ प्रतापविजयः-१२६ ॥ |
| प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः । स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ किरातार्जुनीयम् २.१२ ॥ |
| प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा । अवजितभुवनस्तथा हि लेभे सिततुरगे विजयं न पुष्पमासः ॥ किरातार्जुनीयम् १०.३५ ॥ |
| प्रभवेर्न मृषा विलेखने क्वचनाऽपि प्रबले! मम प्रिये । न च हिन्दुमताभिघातिनी, यवनानां न च पक्षपातिनी ॥ प्रतापविजयः-१८  ॥ |
| प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणं । कौत्सुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥ रघुवंशम् १०.१० ॥ |
| प्रभुत्वभूम्नानुगृहाण वा न वा प्रणाममात्राधिगमेऽपि कः श्रमः । क्व याचतां कल्पलतासि मां प्रति क्व दृष्टिदाने तव बद्धमुष्टिता ॥ नैषधीयचरितम् ९.१०९ ॥ |
| प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरो तिरागाद्दशमं चिकर्तिषुः । अतर्कयद्विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः ॥ शिशुपालवधम्  १.४९ ॥ |
| प्रभ्रष्टै सरभसमम्भसोऽवगाहक्रीडाभिर्विदलितयूथिकापिशङ्गैः । आकल्पैः सरसि हिरण्मयैर्वधूनामौर्वाग्निद्युतिशकलैरिव व्यराजि ॥ शिशुपालवधम् ८.४९ ॥ |

| |
|---|
| प्रमत्त आशीविषवत् समन्ध्यन् निबन्धयश्चापि महामतङ्गजान् प्रतापसिंहाश्रित- पृष्ठभीषणः, रणाङ्गणे रिङ्गणमाततान सः॥ प्रतापविजयः-१३१ ॥ |
| प्रमदां अनु संस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् । न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया ॥ रघुवंशम् ८.७२ ॥ |
| प्रमन्यवः प्रागपि कोसलेन्द्रे प्रत्येकमात्तस्वतया बभूवुः । अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ॥ रघुवंशम् ७.३४ ॥ |
| प्रमुखेऽभिहताश्च पत्रवाहाः प्रसभं माधवमुक्तवत्सदन्तैः । परिपूर्णतरं भुवो गतायाः परतः कातरवत्प्रतीपमीयुः ॥ शिशुपालवधम् २०.२५ ॥ |
| प्रमुदितवरपक्षं एकतस्तत्क्षितिपतिमण्डलमन्यतो वितानम् । उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ॥ रघुवंशम् ६.८६ ॥ |
| प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता । न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवं ॥ किरातार्जुनीयम् ८.१४ ॥ |
| प्रयतः प्रशमं हुताशनस्य क्वचिदालक्ष्यत मुक्तमूलमर्चिः । बलभित्प्रहितायुधाभिघातात्त्रुटितं पत्रिपतेरिवैकपत्रं ॥ शिशुपालवधम् २०.७३ ॥ |
| प्रयस्यतां तद्भवितुं सुराणां दृष्टेन पृष्टेन परस्परेण । नैवानुमेने नलसाम्यसिद्धिः स्वाभाविकात्कृत्रिममन्यदेव ॥ नैषधीयचरितम् १०.१९ ॥ |
| प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम् । इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुद्धतं रजः ॥ नैषधीयचरितम् १.६९ ॥ |
| प्रयुक्तपाणिग्रहणं यदन्यद्वधूवरं पुष्यति कान्तिमग्र्याम् । सांनिध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य ॥ कुमारसंभवम् ७.७८॥ |
| प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि । यतः सतां संनतगात्रि! संगतं मनीषिभिः साप्तपदीनमुच्यते ॥ कुमारसंभवम् ५.३९॥ |
| प्रलयमखिलतारालोकमह्नाय नीत्वा श्रियमनतिशयश्रीः सानुरागां दधानः । गगनसलिलराशिं रात्रिकल्पावसाने मधुरिपुरिव भास्वानेष एकोऽधिशेते ॥ शिशुपालवधम् ११.६६ ॥ |
| प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः । स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ किरातार्जुनीयम् १.२३ ॥ |
| प्रलेहजस्नेहधृतानुबिम्बनां चुचुम्ब कोऽपि श्रितभोजनच्छलः । मुहुः परिस्पृश्य कराङ्गुलीमुखैस्ततो नु रक्तैः स्वमवापितैर्मुखम् ॥ नैषधीयचरितम् १६.८६ ॥ |
| प्रलोभिताप्याकृतिलोभनीया पतिं पुरस्योरुगपूर्वनाम्नः । तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥ रघुवंशम् ६.५८ ॥ |
| प्रवद्धमन्द्राम्बुदनादधीरं । कृष्णार्णवाभ्यर्णचरैकहंसः । मन्दानिलापूरकृतं दधानो इन्ध्वानमश्रूयत पाञ्चजन्यः ॥ शिशुपालवधम्  ३.२० ॥ |
| प्रववृतेऽथ महाहवमल्लयोरचलसंचलनाहरणो रणः । करणशृङ्खलसंकलनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ॥ किरातार्जुनीयम् १८.८ ॥ |
| प्रवसतः सुतरामुदकम्पयद्विलकन्दलकम्पनलालितः । नमयति स्म वनानि मनस्विनीजननमनो घनमारुतः ॥ शिशुपालवधम् ६.३० ॥ |
| प्रवसते भरतार्जुनवैन्यवत्स्मृतिधृतोऽपि नल त्वमभीष्टदः । स्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम् ॥ नैषधीयचरितम् ५.१३४ ॥ |
| प्रवालभङ्गारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः । महीरुहः पुष्पसुगन्धिराददे वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ किरातार्जुनीयम् ८.२१ ॥ |
| प्रवासनाशौ मरणं जयश्च हास्यारतिक्रीडितसुप्तभुक्ताः । ज्वराख्यकम्पस्थिरता हयवस्था मेषात्क्रमान्नामसदृक्फला स्युः ॥ मुहूर्त.संक्रान्तिप्रकरणम्  १५ ॥ |
| प्रविकर्षनिनादभिन्नरन्ध्रः पदविष्टम्भनिपीडितस्तदानीं । अधिरोहति गाण्डिवं महेषौ सकलः संशयमारुरोह शैलः ॥ किरातार्जुनीयम् १३.१६ ॥ |
| प्रविकसति चिराय द्योतिताशेषलोके दशशतकरमूर्तावक्षिणीव द्वितीये । सितकरवपुषासौ लक्ष्यते संप्रति द्यौर्विगलितकिरणेन व्यङ्गितैकेक्षणेव ॥ शिशुपालवधम् ११.६३ ॥ |
| प्रविदारितारुणतरोग्रनयनकुसुमोज्ज्वलः स्फुरन् । प्रातरहिमकरताम्रतनुर्विषजद्रुमोऽपर इवाभवद्द्रुमः ॥ शिशुपालवधम् १५.४९ ॥ |
| प्रविवत्सतः प्रियतमस्य निगडमिव चक्षुरक्षिपत् । नीलनलिनदलदामरुचि प्रतिपादयुग्ममचिरोढसुन्दरी ॥ शिशुपालवधम् १५.८६ ॥ |
| प्रवृत एव स्वयमुज्झितश्रमः क्रमेण पेष्टुं भुवनद्विषामसि । तथापि वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुभं मनः ॥ शिशुपालवधम्  १.४० ॥ |
| प्रवृत्तनक्तंदिवसंधिदीप्तैर्नभस्तलं गां च पिशङ्गयष्टिः । अन्तर्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानां ॥ किरातार्जुनीयम् १६.४७ ॥ |
| प्रवृत्तमात्रेण पयांसि पातुमावर्तवेगाद्भ्रमता घनेन । आभाति भूयिठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः ॥ रघुवंशम् १३.१४ ॥ |
| प्रवृतेविकसद्ध्वानंसाधनेप्यविषादिभिः । ववृषेविकसद्दानंयुधमाप्यविषाणिभिः ॥ शिशुपालवधम् १९.४६ ॥ |
| प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थं एव क्षणदा च तन्वी । उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्तां ॥ रघुवंशम् १६.४५ ॥ |
| प्रवृद्धसिन्धूर्मिचयस्थवीयसां चयैर्विभिन्नाः पयसां प्रपेदिरे । उपात्तसंध्यारुचिभिः सरूपतां पयोदविच्छेदलवैः कृशानवः ॥ किरातार्जुनीयम् १६.६० ॥ |
| प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत् । न शक्ष्यतो लक्षयितुं विमिश्रं दस्रौ सहस्रैरपि वत्सराणाम् ॥ नैषधीयचरितम् १०.६४ ॥ |
| प्रवेशान्निर्गमं तस्मात्प्रवेशं नवमे तिथौ । नक्षत्रे च तथा वारे नैव कुर्यात्कदाचन ॥ मुहूर्त.यात्राप्रकरणम् ८२॥ |
| प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः । मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ॥ रघुवंशम् ५.६२ ॥ |
| प्रशंसितुं संसदुपान्तरञ्जिनं श्रिया जयन्तं जगतीश्वरं जिनम् । गिरः प्रतस्तार पुरावदेव ता दिनान्तसंध्यासमयस्य देवता ॥ नैषधीयचरितम् १२.८७ ॥ |
| प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यत नूतनेश्वरं । नभसा निभृतेन्दुना तुलां उदितार्केण समारुरोह तत् ॥ रघुवंशम् ८.१५ ॥ |
| प्रशस्ततेजा अनघो दृढव्रतः, स राघवः किं न मदीय- वंशजः । निहत्य युद्धे किल योऽत्र रावणं, महीतलं चारु चकार शीतलम् ॥ प्रतापविजयः-९२ ॥ |
| प्रशान्तघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिमृष्टपङ्कजः । ददौ भुजालम्बं इवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥ किरातार्जुनीयम् ८.२८ ॥ |
| प्रशान्तशास्त्रार्थविचारचापलं निवृत्तनानारसकाव्यकौतुकम् । निरस्तनिःशेषविकल्पविप्लवं प्रहर्तुमन्विच्छति शूलिनं मनः ॥ पुरुषार्थोपदेशः-100॥ |

| |
|---|
| प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा । किञ्जल्कव्यवहितताम्रदानलेखैरुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ किरातार्जुनीयम् ७.३५ ॥ |
| प्रश्नतनोर्यदि पापनभोगः पञ्चमगो रिपुदृष्टशरीरः । नीचगतश्च तदा खलु कन्या सा कुलटा त्वथवा मृतवत्सा ॥ मुहूर्त.विवाहप्रकरणम् ५॥ |
| प्रश्नलग्नक्षणे यादृशापत्ययुक् स्वेच्छया कामिनी तत्र चेदाव्रजेत् । कन्यका वा सुतो वा तदा पण्डितैस्तादृशापत्यमस्या विनिर्दिश्यते ॥ मुहूर्त.विवाहप्रकरणम् ८॥ |
| प्रश्ने गम्यदिगीशात्खेटः पञ्चमगो यः । बोभूयाद्बलयुक्तः स्वामाशां नयतेऽसौ ॥ मुहूर्त.यात्राप्रकरणम् ७॥ |
| प्रश्नोत्तरं क्रमेणोक्तौ स्यूतमुत्तरमुत्तरम् । यत्रासौ वेतसी पान्थ तत्रासौ सुतरा सरित् ॥ चन्द्रालोकः ५.१०८ ॥ |
| प्रसकलकुचबन्धुरोद्धुरोरःप्रसभविभिभिन्नतनूत्तरीयबन्धा । अनमवदुदरोच्छ्वसद्दुकूलस्फुटतरलक्ष्यगभीरनाबिमूला ॥ शिशुपालवधम् ७.३४ ॥ |
| प्रसक्तदावानलधूमधूम्रा निरुन्धती धाम सहस्ररश्मेः । महावनानीव महातमिस्रा छाया ततानेशबलानि काली ॥ किरातार्जुनीयम् १६.२६ ॥ |
| प्रसन्नचेता बलिनां धुरन्धरः, लसल्लाटः परिणद्ध कन्धरः । नवाब्ज-नेत्रः शरदिन्दुसुन्दरः स वेषतोऽभूद् भुवने पुरन्दरः ॥ प्रतापविजयः-३९ ॥ |
| प्रसरसि भयविक्लवा किमर्थं प्रचलितकुण्डलघृष्टगण्डपार्श्वा। विटजननखघट्टितेव वीणा जलधरगर्जितभीतसारसीव॥ (मृच्छकटिकम् १.२५) |
| प्रसह्य मणिमुद्धरेन् मकरवक्त्रदंष्ट्राङ्कुरात् समुद्रमपि सन्तरेत् प्रचलदूर्मिमालाकुलम् । भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेत् न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ पुरुषार्थोपदेशः-4॥ |
| प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्स मुद्रमपि सन्तरेत् प्रचलदूर्मिमालाकुलम् । भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्- न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ नीतिशतकम्४ ॥ |
| प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्यः किमुताधिकर्तुम् । नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः ॥ किरातार्जुनीयम् ३.४४ ॥ |
| प्रसादमासाद्य सुरैः कृतं सा सस्मार सारस्वतसूक्तिसृष्टेः । देवा हि नान्यद्वितरन्ति किंतु प्रसद्य ते साधुधियं ददन्ते ॥ नैषधीयचरितम् १४.९ ॥ |
| प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन । प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रं ॥ किरातार्जुनीयम् ३.२ ॥ |
| प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव । उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान॥ कुमारसंभवम् ७.५८॥ |
| प्रसाधितस्याथ मुरद्विषो भूद न्यैव लक्ष्मीरिति युक्तमेतत् । वपुष्यशेषे खिललोककान्ता सानन्यकाम्या ह्युसीतरा तु ॥ शिशुपालवधम् ३.१२ ॥ |
| प्रसारिणि सपदि नभस्तले ततः समीरणभ्रमितपरागरूषिता । व्यभाव्यत प्रलयजकालिकाकृतिर्विदूरतः प्रतिबलकेतनावलिः ॥ शिशुपालवधम् १७..४४ ॥ |
| प्रसारितापः शुचिभानुनास्तु मरुः समुद्रत्वमपि प्रपद्य । भवन्मनस्कारलवोद्गमेन क्रमेलकानां निलयः पुरेव ॥ नैषधीयचरितम् १४.८४ ॥ |
| प्रसीद तस्मै दमयन्ति संततं त्वदङ्गसग्गप्रभवैर्जगत्प्रभुः । पुलोमजालोचनतीक्ष्णकण्टकैस्तनुं घनामातनुतां स कण्टकैः ॥ नैषधीयचरितम् ९.५३ ॥ |
| प्रसीद यच्छ स्वशरान्मनोभुवे स हन्तु मां तैर्धुतकौसुमाशुगः । त्वदेकचित्ताहमसून्विमुञ्चती त्वमेव भूत्वा तृणवज्जयामि तम् ॥ नैषधीयचरितम् ९.१४७ ॥ |
| प्रसीद विश्राम्यतु वीर ! वज्रं शरैर्मदीयैः कतमः सुरारिः । बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥ कुमारसंभवम् ३.९॥ |
| प्रसूतवत्ता नलकूबरान्वयप्रकाशितास्यापि महारथस्य यत् । कुबेरदृष्टान्तबलेन पुष्पकप्रकृष्टतैतस्य ततोऽनुमीयते ॥ नैषधीयचरितम् १६.२४ ॥ |
| प्रसूनता तत्करपल्लवस्थितैरुड्डच्छविर्व्योमविहारिभिः पथि । मुखेऽमराणामनले रदावलेरभाजि लाजैरनयोज्झितैर्द्युतिः ॥ नैषधीयचरितम् १६.४ ॥ |
| प्रसूनबाणाद्वयवादिनी सा काचिद्द्विजेनोपनिषत्पिकेन । अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्षभुजा तरुभ्यः ॥ नैषधीयचरितम् ७.४८ ॥ |
| प्रसूनमित्येव तदङ्गवर्णना न सा विशेषात्कतमत्तदित्यभूत् । तदा कदम्बं तदवर्णि लोमभिर्मुदस्रुणा प्रावृषि हर्षमागतैः ॥ नैषधीयचरितम् ९.१३९ ॥ |
| प्रसूप्रसादाधिगता प्रसूनमाला नलस्योद्भ्रमवीक्षितस्य । क्षिप्तापि कण्ठाय तयोपकण्ठं स्थितं तमालम्बत सत्यमेव ॥ नैषधीयचरितम् ६.४९ ॥ |
| प्रसृतं रभसादयोभिनीला प्रतिपदं परितोऽभिवेष्टयन्ती । तनुरायतिशालिनी महाहेर्गजमन्दुरिव निश्चलं चकार ॥ शिशुपालवधम् २०.५१ ॥ |
| प्रसेदिवांसं न तमाप कोपः कुतः परस्मिन्पुरुषे विकारः । आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ किरातार्जुनीयम् १७.२३ ॥ |
| प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम् । मेधां बुधः सुधामिन्दुर्बिभर्ति वसुधां भवान् ॥ चन्द्रालोकः ५.५३ ॥ |
| प्रस्थानं वलयैः कृतं प्रियसखैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः । गन्तुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गन्तव्ये सति जीवितप्रियसुहृत्सार्थः किमु त्यज्यते ॥ अमरुशतकम्-३१॥ |
| प्रस्थानमत्र धनुषां हि शतानि पञ्च केचिच्छतद्वयमुशन्ति दशैव चान्ये । सम्प्रस्थितो य इह मन्दिरतः प्रयातो गन्तव्यदिक्षु तदपि प्रयतेन कार्यम् ॥ मुहूर्त.यात्राप्रकरणम् ९४॥ |
| प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजपतिना सदानपङ्के । शय्यान्ते कुलमलिनां क्षणं विलीनं संरम्भच्युतमिव शृङ्खलं चकाशे ॥ किरातार्जुनीयम् ७.३१ ॥ |
| प्रस्थाने भूमिपालो दशदिवसमभिव्याप्य नैकत्र तिष्ठेत् सामन्तः सप्तरात्रं तदितरमनुजः पञ्चरात्रं तथैव । ऊर्ध्वं गच्छेच्छुभाहेऽप्यथ गमनदिनात्सप्तरात्राणि पूर्वं चाशक्तौ तद्दिनेऽसौ रिपुविजयमना मैथुनं नैव कुर्यात् ॥ मुहूर्त.यात्राप्रकरणम् ९५॥ |
| प्रस्थाय हस्तेऽनिलतक्षधिष्ण्ये स्थित्वा जयार्थी प्रवसेद् द्विदैवे । वस्वन्त्यपुष्ये निजसीम्नि चैकरात्रोषितः क्ष्मां लभतेऽवनीशः ॥ मुहूर्त.यात्राप्रकरणम् ५३॥ |

| |
|---|
| प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः । मानिनीभिरपहस्तितधैर्यः सादयन्निव मदोऽवललम्बे ॥ किरातार्जुनीयम् ९.३६ ॥ |
| प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः । निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ रघुवंशम् १.८९ ॥ |
| प्रस्वेदवारिसविशेषविषक्तमङ्गे कूर्पासकं क्षतनखक्षतमुत्क्षिपन्ती । आविर्भवद्वनपयोधरबाहुमूला शातोदरी युवदृशां क्षणमुत्सवोऽभूत् ॥ शिशुपालवधम् ५.२३ ॥ |
| प्रहरकमपनीय स्वं निदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति । मुहुरविशदवर्णां निद्रया शून्यशून्यां दददपि गिरमन्तर्बुद्ध्यते नो मनुष्यः ॥ शिशुपालवधम् ११.४ ॥ |
| प्रहरविरतौ मध्ये वाहनस्ततोऽपि परेऽथवा किमुत सकले जाते वाह्निप्रिय त्वमिहैष्यसि । इति दिनशतप्राप्यं देशं प्रियस्य यियासतो हरति गमनं बालालापैः सबाष्पगलज्जलैः ॥ अमरुशतकम्-९॥ |
| प्रहर्तुकामोऽरि-बलं सुविह्वल, स-विग्रहो एष साऽऽग्रहः । स्ववज्रनिर्घोष-पुरस्सरोऽथवा, विराजते वज्र घरं विडम्बयन् ॥ प्रतापविजयः-११८ ॥ |
| प्रहारमूर्छापगमे रथस्थान्यन्तःनुपालभ्य निवर्तिताश्वाः । यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ॥ रघुवंशम् ७.४४ ॥ |
| प्रहितः प्रधनाय माधवानहमाकारयितुं महीभृता । न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव ॥ शिशुपालवधम् १६.५२ ॥ |
| प्रहीयते कार्यवशागतेषु स्थानेषु विष्टब्धतया न देहः । स्थितप्रयातेषु ससौष्ठवश्च लक्ष्येषु पातः सदृशः शराणाम् ॥ किरातार्जुनीयम् १६.२२ ॥ |
| प्रह्वानतीव क्वचिदुद्धतिश्रितः क्वचित्प्रकाशानथ गह्वरनापि । साम्यादपेतानिति वाहिनी हरेस्तदातिचक्राम गिरीन्गुरूनपि ॥ शिशुपालवधम् १२.७६ ॥ |
| प्राक् सिद्धस्वगुणोत्कर्षोऽनुगुणः परसन्निधेः । कर्णोत्पलानि दधते कटाक्षैरपि नीलताम् ॥ चन्द्रालोकः ५.१०६ ॥ |
| प्राक्पादयोः पतति खादति पृष्ठमांसं कर्णे फलं किमपि रौति शनैर्विचित्रम् । छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः सर्वं खलस्य चरितं मशकः करोति ॥ नीतिसंग्रहस्य मित्र-१.८२ ॥ |
| प्राक्पुष्पवर्षैर्वियतः पतद्भिर्द्रष्टुं न दत्तामथ न द्विरेफैः । तद्भीतिभुग्नेन ततो मुखेन विधेरहो वाञ्छितविघ्नयत्नः ॥ नैषधीयचरितम् १०.१०१ ॥ |
| प्रागिव प्रसुवते नृपवंशाः किं नु संप्रति न वीरकरीरान् । ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतन्ति ॥ नैषधीयचरितम् ५.१४ ॥ |
| प्रागेतद्वपुरामुखेन्दु सृजतः स्रष्टुः समस्तस्त्विषां कोशः शोषमगादगाधजगतीशिल्पेऽप्यनल्पायितः । निश्शेषद्युतिमण्डलव्ययवशादीषलभैरेष वा शेषः केशमयः किमन्धतमसस्तोभैस्ततो निर्मितः ॥ नैषधीयचरितम् १२.९३ ॥ |
| प्राग्ब्रह्मौदनपाकाद् व्रतबन्धानन्तरं यदि चेत् । उत्पातानध्ययनोत्पत्तावपि शान्तिपूर्वकं तत्स्यात् ॥ मुहूर्त.संस्कारप्रकरणम् ५६॥ |
| प्राग्भवैरुदगुदग्भवगुम्फान्मुक्तियुक्तिविहताविह तावत् । नापरः स्फुरति कस्यचनापि त्वत्समाधिमवधूय समाधिः ॥ नैषधीयचरितम् २१.१०४ ॥ |
| प्राग्भागतः पतदिहेदमुपत्यकासु शृङ्गारितायतमहेभकराभमम्भः । संलक्ष्यतेविविधरत्नकरानुविद्ध- मूर्ध्वप्रसारितसुराधिपचापचारु ॥ शिशुपालवधम् ४.४९॥ |
| प्राग्भूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः । भुवस्तले कुण्डिनगामि राज्ञां तद्वासुकेश्चाश्वतरोऽन्वगच्छत् ॥ नैषधीयचरितम् १०.८ ॥ |
| प्राची यदा हसति हे प्रिय ! मन्दमन्दं, वायुर्यदा वहति नन्दनजं मरन्दम् । या प्रत्यहं किल तदा मतिमाननीयां शोभां दधात्युषसि काञ्चन काञ्चनीयाम् ॥ प्रतापविजयः-१५४ ॥ |
| प्राचीं प्रयाते विरहादयं ते तापाच्च रूपाच्च शशाङ्कशङ्की । परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥ नैषधीयचरितम् ८.६२ ॥ |
| प्राच्यां गच्छेद्गजेनैव दक्षिणस्यां रथेन हि । दिशि प्रतीच्यामश्वेन तथोदीच्यां नरैर्नृपः ॥ मुहूर्त.यात्राप्रकरणम् ९०॥ |
| प्राच्यादौ तरणिस्तनौ भृगुसुतो लाभव्यये भूसुतः कर्मस्थोऽथ तमो नवाष्टमगृहे सौरिस्तथा सप्तमे । चन्द्रः शत्रुगृहात्मजेऽपि च बुधः पातालगो गीष्पति- र्वित्तभ्रातृगृहे विलग्नसदनाल्ललाटिकाः तीर्तिताः ॥ मुहूर्त.यात्राप्रकरणम् ५१॥ |
| प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः । वृषेव पयसां सारमाविष्कृतमुदन्वता ॥ रघुवंशम् १०.५३ ॥ |
| प्राञ्जलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा । संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री ॥ किरातार्जुनीयम् ९.१० ॥ |
| प्राणच्छिदा दैत्यपतेर्नखानामुपेयुषां भूषणतां क्षतेन । प्रकाशकार्कश्यगुणौ दधानाः स्तनौ तरुण्यः परिवव्रुरेनम् ॥ शिशुपालवधम् ३.१३ ॥ |
| प्राणमायतवतो जलमध्ये मज्जिमानमभजन्मुखमस्य । आपगापरिवृढोदरपूरे पूर्वकालमुषितस्य सितांशोः ॥ नैषधीयचरितम् २१.१३ ॥ |
| प्राणवत्प्रणयिराध न राधा पुत्रशत्रुसखिता सदृशी ते । श्रीप्रियस्य सदृगेव तवश्रीवत्समात्महृदि धर्तुमजस्रम् ॥ नैषधीयचरितम् २१.८४ ॥ |
| प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा । आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥ नीतिसंग्रहस्य मित्र-१.१२ ॥ |
| प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् । तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ नीतिशतकम् २६ ॥ |
| प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं, युवतिजनकथामूकभावः परेषाम् । तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ पुरुषार्थोपदेशः-81॥ |
| प्राणादपि प्रियतमा निज-पूर्वजाना, मान्या पुनर्भवतु जन्म-धरा स्वतन्त्रा । साऽऽभारतीरितगुणावलिरध भूयः, सा भारती भवतु भारत-भू विभूत्यै ॥ प्रतापविजयः-६३॥ |
| प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः । हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ॥ रघुवंशम् ५.२९ ॥ |

| |
|---|
| प्रातः प्रातरुपागतेन जनिता निर्निद्रिता चक्षुषोर्मन्दायां मयि गौरवव्यपगमाद् उत्पादितं लाघवम् । किं मुग्धे न मया कृतं रमणधीर्मुक्ता त्वया गम्यतां दुस्थं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तच्छ्रोष्यसि ॥ अमरुशतकम्-२९॥ |
| प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखण्डनव्यथाः । प्राञ्जलिः प्रणयिनीः प्रसादयन्सोऽदुनोत्प्रणयमन्थरः पुनः ॥ रघुवंशम् १९.२१ ॥ |
| प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य । तौ दंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥ रघुवंशम् २.७० ॥ |
| प्रातर्वर्णनयानया निजवपुर्भूषाप्रसादानदाद्देवी वः परितोषितेति निहितामान्तःपुरीभिः पुरः । सूता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मयक्रोधावेगसरागलोचनरुचा दारिद्र्यविद्राविणीम् ॥ नैषधीयचरितम् १९.६६ ॥ |
| प्रातानुगः सपदि शासनमस्य राजा संपाद्य पातकविलुप्तधृतिर्निवृत्तः । अन्तर्निविष्टपदमात्मविनाशहेतुं शापं दधज्ज्वलनं और्वमिवाम्बुराशिः ॥ रघुवंशम् ८.८२ ॥ |
| प्रातिभत्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः । गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः ॥ शिशुपालवधम् १०.१२ ॥ |
| प्रापितेन चटुकाकुविडम्बं लम्भितेन बहुयाचनलज्जाम् । अर्थिना यदघमर्जति दाता तन्न लुम्पति विलम्ब्य ददानः ॥ नैषधीयचरितम् ५.८४ ॥ |
| प्राप्ता तवापि नृप जीवितदेवतेयं घर्माम्बुशीकरकरम्बनमम्बुजाक्षी । ते ते यथा रतिपतेः कुसुमानि बाणाः स्वेदस्तथैव किमु तस्य शरक्षतास्रम् ॥ नैषधीयचरितम् २१.१३९ ॥ |
| प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किम् । सम्पूजिताः प्रणयिनो विभवैस्ततः किं कल्पस्थितं तनुभृतां तनुभिस्ततः किम् ॥ पुरुषार्थोपदेशः-90॥ |
| प्राप्ताः श्रियः सकल-काम-दुधास्ततः किं न्यस्तं पदं शिरसि विद्विषतां ततः किम्। सम्पादिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितास्तनुभृतां तनवस्ततः किम्॥॥ वैराग्यशतकम् ६८ ॥ |
| प्राप्तैव तावत्तव रूपसृष्टिं निपीय दृष्टिर्जनुषः फलं मे । अपि श्रुती नामृतमाद्रियेतां तयोः प्रसादीकुरुषे गिरं चेत् ॥ नैषधीयचरितम् ८.४९ ॥ |
| प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् । द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥ किरातार्जुनीयम् ३.४५ ॥ |
| प्राप्य नाभिनदमज्जनमाशु प्रस्थितं निवसनग्रहणाय । औपनीविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम् ॥ शिशुपालवधम् १०.६० ॥ |
| प्राप्य मन्मथरसादतिभूमिं दुर्वहस्तनभराः सुरतस्य । शश्रमुः श्रमजलार्द्रललाटश्लिष्टकेशमसितायतकेश्यः ॥ शिशुपालवधम् १०.८० ॥ |
| प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः । तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥ किरातार्जुनीयम् ९.५८ ॥ |
| प्राप्यते यदिह दूरमगत्वा यत्फलत्यपरलोकगताय । तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकं ऋते भवतस्तत् ॥ किरातार्जुनीयम् १८.२५ ॥ |
| प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् । स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्॥ मेघदूतम्, पूर्वमेघः ३०॥ |
| प्रायेण नीचानपि मेदिनीभृतो जनः समेनैव पथाधिरोहति । सेना मुरारेः पथ एव सा पुनर्महामहीध्रान्परितोऽध्यरोहयत् ॥ शिशुपालवधम् १२.४६ ॥ |
| प्रायो विषाणपरिमोषलघूत्तमाङ्गान्खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः । शृण्गं स दृप्तविनयाधिकृतः परेषामभ्युच्छ्रितं न ममृषे न तु दीर्घ आयुः ॥ रघुवंशम् ८.६२ ॥ |
| प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः । विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति ॥ नीतिशतकम् २७ ॥ |
| प्रालेयशीतलमचलेश्वरमीश्वरोऽपि सान्द्रभचर्मवसनावरणाधिशेते । सर्वर्तुनिवृत्तिकरे निवसन्नुपैति  न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि ॥ शिशुपालवधम् ४.६४॥ |
| प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् । तेनोदीचीं दिशमभिसरेस्तिर्यगायामशोभी श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥ मेघदूतम्, पूर्वमेघः ५७॥ |
| प्राशंसि संसद्गुरुणापि चार्वी चार्वाकतासर्वविदूषकेण । आष्थानपट्टं रसनां यदीयां जानामि वाचामधिदेवतायाः ॥ नैषधीयचरितम् १०.५८ ॥ |
| प्राशुराशु हवनीयमत्र यत्तेन दीर्घममरत्वमध्यगुः । उद्धतानधिक मेधितौजसो दानवांश्च विबुधाः विजिग्यिरे ॥ शिशुपालवधम् १४.३१ ॥ |
| प्रासदशोभातिशयालुभिः पथि प्रभोनिवासाः पटवेश्मभिर्बभुः । नूनं सहानेन वियोगविक्लवा पुरः पुरश्रीरपि निर्ययौ तदा ॥ शिशुपालवधम् १२.६३ ॥ |
| प्रासादकालागुरुधूमराजिस्तस्याः पुरो वायुवशेन भिन्ना । वनान्निवृत्तेन रघूद्वहेन मुक्ता स्वयं वेणिरिवाभासे ॥ रघुवंशम् १४.१२ ॥ |
| प्रासादे सा दिशि दिशि च सा पृष्ठतः सा पुरः सा पर्यङ्के सा पथि पथि च सा तद्वियोगातुरस्य । हंहो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा सा सा सा सा जगति सकले कोऽयमद्वैतवादः ॥ अमरुशतकम्-१०५॥ |
| प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम् । भृत्यभावि दुहितुः परिग्रहाद्दिश्यतां कुलमिदं निमेरिति ॥ रघुवंशम् ११.४९ ॥ |
| प्रियं न मृत्युं न लभे त्वदीप्सितं तदेव न स्यान्मम यत्त्वमिच्छसि । वियोगमेवेच्छ मनः प्रियेण मे तव प्रसादान्न भवत्वसौ मम ॥ नैषधीयचरितम् ९.९२ ॥ |
| प्रियं प्रिया च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहमित्तिकावपि । इति स्म सा कारुवरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ॥ नैषधीयचरितम् १.३८ ॥ |
| प्रियंवदात्प्रापमसौ कुमारः प्रायुङ्क्त राजस्वधिराजसूनुः । गान्धर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वपनिवृत्तलौल्यः ॥ रघुवंशम् ७.६१ ॥ |
| प्रियः प्रियैकाचरणाच्चिरेण तां पितुः स्मरन्तीमचिकित्सदाधिषु । तथास्त तन्मातृवियोगवाडवः स तु प्रियप्रेममहाम्बुधावपि ॥ नैषधीयचरितम् १६.११९ ॥ |
| प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्विति । जगदतुर्निहिते हृदि नीरजे दवथुकुड्मलनेन पृथुस्तनीम् ॥ नैषधीयचरितम् ४.३ ॥ |

| |
|---|
| प्रियकरपरिमार्गदङ्गनानां यदाभूत्पुनरधिकतरैव स्वेदतोयोदयश्रीः । थ वपुरभिषेक्तुं तास्तदाम्भोभिरीषुर्वनविहरणखेदम्लानमम्लानशोभाः ॥ शिशुपालवधम् ७.७५ ॥ |
| प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः । उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः ॥ रघुवंशम् ८.२३ ॥ |
| प्रियतमेन यया सरुषा स्थितं न सह सा सहसा परिरभ्य तम् । श्लथयितुं क्षणमक्षमतामङ्गना न सह सा सहसा कृतवेपथुः ॥ शिशुपालवधम् ६.५७ ॥ |
| प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः प्रकृत्या कल्याणी मतिरनवगीतः परिचयः । पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ (उत्तररामचरितम् २.२) |
| प्रियमभिकुसुमोद्यतस्य बाहोर्नवनखमण्डनचारु मूलमन्या । मुहुरितरकराहितेन पीनस्तनतटरोधि तिरोदधेऽंशुकेन ॥ शिशुपालवधम् ७.३२ ॥ |
| प्रियमिति वनिता नितान्तमागःस्मरणसरोषकषायिताक्षी । चरणगतसखीवचोऽनुरोधात्किल कथमप्यनुकूलयाञ्चकार ॥ शिशुपालवधम् ७.११ ॥ |
| प्रियसखीनिवहेन सहाथ सा व्यरचयद्गिरमर्धसमस्यया । हृदयमर्मणि मन्मथसायकैः क्षततमा बहु भाषितुमक्षमा ॥ नैषधीयचरितम् ४.१०२ ॥ |
| प्रियसखीसदृशं प्रतिबोधिताः किमपि काम्यगिरा परपुष्टया । प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयादुरनाचिं अङ्गनाः ॥ शिशुपालवधम् ६.८ ॥ |
| प्रिया न्याय्यावृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं ह्यसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः। विपद्युच्चैः स्थेयं, पदमनुविधेयं च महतां सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ पुरुषार्थोपदेशः-52॥ |
| प्रिया मनोभूशरदावदाहे देवीस्त्वदर्थेन निमज्जयद्भिः । सुरेषु सारैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ॥ नैषधीयचरितम् ८.८८ ॥ |
| प्रियां विकल्पोपहृतां स यावद्दिगीशसंदेशमजल्पदल्पम् । अदृश्यवाग्भीषितभूरिभीरुर्भवो रवस्तावदचेतयत्तम् ॥ नैषधीयचरितम् ६.१७ ॥ |
| प्रियांशुकग्रन्थिनिबद्धवाससं तदा पुरोधा विदधे विदर्भजाम् । जगाद विच्छिद्य पटं प्रयास्यतो नलादविश्वासमिवैष विश्ववित् ॥ नैषधीयचरितम् १६.३७ ॥ |
| प्रियाङ्गपान्था कुचयोर्निवृत्य निवृत्य लोला नलदृग्भ्रमन्ती । बभौतमां तन्मृगनाभिलेपतमःसमासादितदिग्भ्रमेव ॥ नैषधीयचरितम् ७.६ ॥ |
| प्रियानखीभूतवतो मृदेदं व्यधाद्विधिः साधुदशत्वमिन्दोः । एतत्पदच्छद्मसरागपद्मसौभाग्यभाग्यं कथमन्यथा स्यात् ॥ नैषधीयचरितम् ७.१०६ ॥ |
| प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगन्तसंपदाम् । यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥ रघुवंशम् ३.१० ॥ |
| प्रियामुखीभूय सुखी सुधांशुर्जयत्ययं राहुभयव्ययेन । इमां दधाराधरबिम्बलीलां तस्यैव वालं करचक्रवालम् ॥ नैषधीयचरितम् ७.५२ ॥ |
| प्रियावियोगक्वथितादिवैलाच्चन्द्राच्च राहुग्रहपीडिताते । ध्मातादभवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पम् ॥ नैषधीयचरितम् १०.२२ ॥ |
| प्रियासु बालासु रतक्षमासु च द्विपत्रितं पल्लवितं च बिभ्रतम् । स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ॥ नैषधीयचरितम् १.११८ ॥ |
| प्रियाह्रियालम्ब्य विलम्बमाविला विलासिनः कुण्डिनमण्डनायितम् । समाजमाजग्मुरथो रथोत्तमास्तमा समुद्रादपरेऽपरे नृपाः ॥ नैषधीयचरितम् १२.१ ॥ |
| प्रिये वृणीष्वामरभावमस्मदिति त्रपाकृद्वचनं न किं नः । त्वत्पादपद्मे शरणं प्रविश्य स्वयं वयं येन जिजीविषामः ॥ नैषधीयचरितम् ८.१०३ ॥ |
| प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया । समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवं ॥ किरातार्जुनीयम् ८.१५ ॥ |
| प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने । स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ किरातार्जुनीयम् ८.३७ ॥ |
| प्रियेण साथ प्रियमेवमुक्ता विदर्भभूमीपतिवंशमुक्ता । स्मितांशुजालं वितातार तारा दिवः स्फुरन्तीव कृतावतारा ॥ नैषधीयचरितम् २२.१०५ ॥ |
| प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सान्त्वनैः । जनस्य रूढप्रणयस्य चेतसः किं अप्यमर्षोऽनुनये भृशायते ॥ किरातार्जुनीयम् ८.५४ ॥ |
| प्रियेषु यैः पार्थ विनोपपत्तेर्विचिन्त्यमानैः क्लममेति चेतः । तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम् ॥ किरातार्जुनीयम् ३.५२ ॥ |
| प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः । सविभ्रमाधूतकराग्रपल्लवो यथार्थतां आप विलासिनीजनः ॥ किरातार्जुनीयम् ८.४९ ॥ |
| प्रियो यदि स्याद् भगवान् महामहाः, स एकलिङ्गोऽमर-वृन्द-वन्दितः । प्रिया यदि स्याल्ललनापवित्रता, प्रियो यदि स्यात् भवतामयञ्जनः ॥ प्रतापविजयः-९६ ॥ |
| प्रीणाति यः सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमिच्छति तत्कलत्रम् । तन्मित्रमापदि सुखे च समक्रियं य- देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ नीतिशतकम्६८ ॥ |
| प्रीतिमेष्यति कृतेन ममेदृक्कर्मणा पुररिपुर्मदनारिः । तत्पुरः पुरमतोयमधाक्षीद्धूपरूपमथ कामशरं च ॥ नैषधीयचरितम् २१.३७ ॥ |
| प्रीतिरस्य ददतोऽभवत्तथा येन तत्प्रियचिकीर्षवो नृपाः । स्पर्शितैरधिकमागमन्मुदं नाधिवेश्म निहितैरुपायनैः ॥ शिशुपालवधम् १४.४१ ॥ |
| प्रीत्या नियुक्तांल्लिहती स्तनन्धयान्निगृह्य पारीमुभयेन जानुनोः । वर्धिष्णुधाराध्वनि रोहिणीः पयश्चिरं निदध्यौ दुहतः स गोदुहः ॥ शिशुपालवधम् १२.४० ॥ |
| प्रीत्यै यूनां व्यवहिततपनाः प्रौढद्वान्तं दिनमिह जलदाः । दोषामन्यं विदधाति सुरत-क्रीडायासश्रमपटवः ॥ शिशुपालवधम् ४.६२॥ |
| प्रेक्षणीयकमेव क्षणमासन्ह्रीविभङ्गुरविलोचनपाताः । संभ्रमद्रुतगृहीतदुकूलच्छाद्यमानवपुषः सुरतान्ताः ॥ शिशुपालवधम् १०.८२ ॥ |
| प्रेक्ष्य दर्पणतल्स्थमात्मनो राजवेषमतिशक्रशोभिनं । पिप्रिये स न तथा यथा युवा व्यक्तलक्ष्म परिभोगमण्डनं ॥ रघुवंशम् १९.३० ॥ |
| प्रेम तस्य न गुणेषु नाधिकं न स्म वेद न गुणान्तरं च सः । दित्सया तदपि पार्थिवोऽर्थिनं गुण्यगुण्य इति न व्यजीगणत् ॥ शिशुपालवधम् १४.४७ ॥ |
| प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महीक्षितं । निन्युरुत्सवविधिच्छलेन तं देव्य उज्जितरुषः कृतार्थतां ॥ रघुवंशम् १९.२० ॥ |

| |
|---|
| प्रेम्णोरः प्रणयिनि सिञ्चति प्रियायाः संतापं नवजलविप्रुषो गृहीत्वा । उद्धूताः कठिनकुचस्थलाभिघातादासन्नां भृशमपराङ्गनामधाक्षुः ॥ शिशुपालवधम् ८.४० ॥ |
| प्रेयसी जितसुधांशुमुखश्रीर्या न मुञ्चति दिगन्तगतापि । भङ्गिसङ्गमकुरङ्गदृगर्थे कः कदर्थयति तामपि कीर्तिम् ॥ नैषधीयचरितम् ५.१३१ ॥ |
| प्रेयसीकुचवियोगहविर्भुग्जन्मधूमवितर्तीरिव बिभ्रत् । स्नायिनः करसरोरुहयुग्मं तस्य गर्भधृतदर्भमराजत् ॥ नैषधीयचरितम् २१.९ ॥ |
| प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि । क्षीरसिन्धुरिव मन्दरभिन्नः काननान्यविरलोच्चतरूणि ॥ किरातार्जुनीयम् ९.२८ ॥ |
| प्रेषिताः पृथगथो दमयन्त्यै चित्तचौर्यचतुरा निजदूत्यः । तद्गुरुं प्रति च तैरुपहाराः संख्यसौख्यकपटेन निगूढाः ॥ नैषधीयचरितम् ५.५६ ॥ |
| प्रैयरूपकविशेषनिवेशैः संवदद्भिरमराः श्रुतपूर्वैः । एष एव स नलः किमितीदं मन्दमन्दमितरेतरमूचुः ॥ नैषधीयचरितम् ५.६६ ॥ |
| प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभो ऽथो राशीश्वरसौहृदेऽपि गदितो नाड्यृक्षशुद्धिर्यदि । अन्यर्क्षैऽशपयोर्बलित्वसख्ये नाड्यृक्षशुद्धौ तथा ताराशुद्धिवशेन राशिवशताभावे निरुक्तो बुधैः ॥ मुहूर्त.विवाहप्रकरणम् ३२॥ |
| प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखैस्तुरङ्गमैरायतकीर्णवालधि । उत्कर्णमुद्वाहितधीरकन्धरैरतीर्यताग्रे तटदत्तदृष्टिभिः ॥ शिशुपालवधम् १२.७३ ॥ |
| प्रौढोक्तिस्तदशक्तस्य तच्छक्तत्वावकल्पनम् । कलिन्दजातीररुहाः श्यामलाः सरलद्रुमाः ॥ चन्द्रालोकः ५.४७ ॥ |
| प्लक्षे महीयसि महीवलयातपत्रे तत्रेक्षिते खलु तवापि मतिर्भवित्री । खेलां विधातुमधिशाखविलम्बिदोलालोलाखिलाङ्गजनताजनितानुरागे ॥ नैषधीयचरितम् ११.७४ ॥ |
| प्लुतमिव शिशिरांशोरंशुभिर्यन्निशासु स्फटिकमयराजद्राजताद्रिस्थलाभं । अरुणितमकठोरैर्वेश्म काश्मीरजाम्भः-स्नपितमिव तदेतद्भानुभिर्भाति भानोः ॥ शिशुपालवधम् ११.५३ ॥ |
| प्लुतेभकुम्भोरसिजैर्हृदयक्षतिजन्मभिः । प्रावर्तयन्नदीरस्रैर्द्विषां तद्योषितां च सः ॥ शिशुपालवधम् १९.११५ ॥ |
| फलं स्वेच्छा-लभ्यं प्रतिवनमखेदं क्षितिरुहां पयः स्थाने स्थाने शिशिर-मधुरं पुण्य-सरिताम्। मृदु-स्पर्शा शय्या सुललित-लता-पल्लव-मयी सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः॥॥ वैराग्यशतकम् २७ ॥ |
| फलद्भिरुष्णांशुकराभिमर्शात्कर्शानवं धाम पतङ्गकान्तैः । शशंस यः पात्रगुणाद्गुणानां संक्रान्तिमाक्रान्तगुणातिरेकाम् ॥ शिशुपालवधम् ४.१६॥ |
| फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग विगृह्णता । अहह नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति ॥ नैषधीयचरितम् ४.८२ ॥ |
| फलमलमशनाय स्वादु पानाय तोयं क्षितिरपि शयनार्थं वाससे वल्कलं च। नव-घन-मधुपान-भ्रान्त-सर्वेन्द्रियाणामविनयमनुमन्तुं नोत्सहे दुर्जनानाम्॥॥ वैराग्यशतकम् ५४ ॥ |
| फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते । स्थितैः समादाय महर्षिवार्द्धकाद्वने तदातिथ्यमशिक्षि शाखिभिः ॥ नैषधीयचरितम् १.७७ ॥ |
| फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः । त्वयाद्य त्वस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते ॥ नैषधीयचरितम् १.१३३ ॥ |
| फेनानामुरसिरुहेषु हारलीला चेलश्रीर्जघनस्थलेषु शैवलानाम् । गण्डेषु स्फुटरचनाब्जपत्त्रवल्ली पर्याप्तं पयसि विभूषणं वधूनाम् ॥ शिशुपालवधम् ८.५९ ॥ |
| बटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः । श्रेष्ठो गुरुः खषट्त्र्याद्ये पूजयाऽन्यत्र निन्दितः ॥ मुहूर्त.संस्कारप्रकरणम् ४६॥ |
| बद्धकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये । वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः ॥ किरातार्जुनीयम् ९.६४ ॥ |
| बद्धदर्भमयकाञ्चिदामया वीक्षितानि यजमानजायया । शुष्मणि प्रणयनादिसंस्कृते तैर्हवींषि जुहवांबभूविरे ॥ शिशुपालवधम् १४.२२ ॥ |
| बधिरा धन्वितुलालयोऽपराह्णे मिथुनं कर्कटकोऽङ्गना निशान्धाः । दिवसान्धा हरिगोक्रियास्तु कुब्जा मृगकुम्भान्तिमभानि सन्ध्ययोर्हि ॥ मुहूर्त.विवाहप्रकरणम् ८२॥ |
| बधुजनकथा तथ्यैवेयं तनौ तनुजन्मनः पितृशितिहरिद्वर्णाद्याहारजः किल कालिमा । शमनयमुनाक्रोडैः कालैरितस्तमसां पिबादपि यदमलच्छायात्कायादभूयत भास्वतः ॥ नैषधीयचरितम् १९.४५ ॥ |
| बध्वो युगपत्सहस्वशः, सुकोमला हा कलिकाकुरादपि । स्वधर्म-संरक्षण-हेतवे तनुं, विदग्धवत्यो ज्वलने तृणोपमाः ॥ प्रतापविजयः-३० ॥ |
| बन्धाढ्यनानारतमल्लयुद्धप्रमोदितैः केलिवने मरुद्भिः । प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि युवां युवानौ ॥ नैषधीयचरितम् ३.१२४ ॥ |
| बन्धाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुषः स्यात् । एकं विना मादृशि तन्नरस्य स्वर्भोगभाग्यं विरलोदयस्य ॥ नैषधीयचरितम् ३.२ ॥ |
| बन्धूकपयोजपूजने कृतां विधोर्गन्धफलीबलिश्रियम् । निनिन्द लब्धाधरलोचनार्चनं मनःशिलाचित्रकमेत्य तन्मुखम् ॥ नैषधीयचरितम् १५.२८ ॥ |
| बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहोज्जिहाना । रागश्रिया शैशवयौवनीयां स्वमाह संध्यामधरोष्ठलेखा ॥ नैषधीयचरितम् ७.३७ ॥ |
| बन्धौ विपन्नेऽनेकेन नरेणेह तदन्तिके । अशोचि सैन्ये घण्टाभिर्न रेणे हतदन्तिके ॥ शिशुपालवधम् १९.८० ॥ |
| बन्ध्या चर्म तुषास्थि सर्पलवणाङ्गारेन्धनक्लीबविट् तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः । नग्नाभ्यक्तविमुक्तकेशपतिता व्यङ्गश्रुधार्ता असृक् स्त्रीपुष्पं सरठः स्वगेहदहनं मार्जारयुद्धं क्षुतम् ॥ मुहूर्त.यात्राप्रकरणम् १०२॥ |
| बबन्ध चास्राकुलदृष्टिरस्याः स्थानान्तरे कल्पितसंनिवेशाम् । धात्र्यङ्गुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रम्॥ कुमारसंभवम् ७.२५॥ |
| बबृंहिरे गजपतयो महानकाः प्रदध्वनुर्जयतुरगा जिहेषिरे । असंभवद्गिरिवरगह्वरैरभूत्तदा रवैर्दलित इव स्व आश्रयः ॥ शिशुपालवधम् १७..३१ ॥ |
| बभार बीजं निजकीर्तये रदौ द्विषामकीर्त्यै खलु दानविप्लुषः ।श्रवःश्रमैः कुम्भकुचां शिरःश्रियं मुदे मदस्वेदवतीमुपास्त यः ॥ नैषधीयचरितम् १६.३३ ॥ |
| बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ । युगान्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी ॥ किरातार्जुनीयम् १७.३९ ॥ |

| |
|---|
| बभूव न स्तम्भविजित्वरी तयोः श्रुतिक्रियारम्भपरम्परात्वरा । न कम्पसंपत्तिमलुम्पदग्रतः स्थितोऽपि वह्निः समिधा समेधितः ॥ नैषधीयचरितम् १६.४४ ॥ |
| बभूव भस्मैव सिताङ्गरागः, कपालमेवामलशेखरश्रीः। उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः॥ कुमारसंभवम् ७.३२॥ |
| बभूव भैम्याः खलु मानसौकसं जिघांसतो धैर्यभरं मनोभुवः । उपभ्रु तद्वर्तुलचित्ररूपिणी धनुःसमीपे गुलिकेव संभृता ॥ नैषधीयचरितम् १५.६८ ॥ |
| बभूव रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचन्द्रः । कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ॥ रघुवंशम् १४.८४ ॥ |
| बभूव लोकोत्तर भव्य भाग्यवान्, महामहीपो मुगलान्वये महान् । न राजराजैर्विहितप्रणामको नामकः ॥ प्रतापविजयः-४३ ॥ |
| बभौ च संपर्कमुपेत्य बाला नवेव दीक्षाविधिसायकेन । करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशाङ्करेखा॥ कुमारसंभवम् ७.८॥ |
| बभौ स दशनज्योत्स्ना सा विभोर्वदनोद्गता । निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवर्तिनी ॥ रघुवंशम् १०.३८ ॥ |
| बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद् वासः कनककपिशं वैजयन्तीं च मालाम् । रन्ध्रान् वेणोरधरसुधयापूरयन् गोपवृन्दै- र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ॥ श्रीमद्भागवत पुराण १०.२१.५ ॥ |
| बलमार्तभयोपशान्तये विदुषां संनतये बहु श्रुतम् । वसु तस्य न केवलं गुणवत्तापि परप्रयोजना ॥ रघुवंशम् ८.३१ ॥ |
| बलवदपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय । भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षणमुन्मनीचकार ॥ किरातार्जुनीयम् १०.३७ ॥ |
| बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः । क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥ किरातार्जुनीयम् २.३७ ॥ |
| बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः । नियमेन मया निबर्हणीयः परमं लाभं अरातिभङ्गमाहुः ॥ किरातार्जुनीयम् १३.१२ ॥ |
| बलावलेपादधुनापि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा । सतीव योषित् प्रकृतिः सुनिश्चिता पुमांसमन्वेति भवान्तरेष्वपि ॥ शिशुपालवधम्  १.७२ ॥ |
| बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनापनुवन्ति । उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि ॥ रघुवंशम् १६.२१ ॥ |
| बलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः। गात्राणि शिथिलायन्ते तृष्णैका तरुणायते॥॥ वैराग्यशतकम् ८ ॥ |
| बलिसद्मदिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः । अधराथ कृता ययेव सा विपरीताजनि भूविभूषया ॥ नैषधीयचरितम् २.८४ ॥ |
| बलोर्मिभिस्तत्क्षणहीयमानरथ्याभुजाया वलयैरिवास्याः । प्रायेण निष्क्रामति चक्रपाणौ नेष्टं पुरो द्वारवतीत्वमासीत् ॥ शिशुपालवधम्  ३.६८ ॥ |
| बहिरपि विलसन्त्यः काममानिन्यिरे यद्दिवसकररुचोऽन्तं ध्वान्तमन्तर्गृहेषु । नियतविषयवृत्तेरप्यनल्पप्रताप-क्षतसकलविपक्षस्तेजसः स स्वभावः ॥ शिशुपालवधम् ११.५९ ॥ |
| बहु बर्हिचन्द्रिकनिभं विदधे धृतिमस्य दानपयसां पटलम् । अवगाढं ईक्षितुं इवैभपतिं विकसद्विलोचनशतं सरितः ॥ किरातार्जुनीयम् ६.११ ॥ |
| बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः । हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ॥ नैषधीयचरितम् २.८८ ॥ |
| बहुजगदपुरस्तात्तस्य मत्ता किलाहं चकर च किल चाटु प्रौढयोषिद्वदस्य । विदितमिति सखीभ्यो रात्रिवृत्तं विचिन्त्य व्यपगतमदयाह्नि व्रीडितं मुग्धवध्वा ॥ शिशुपालवधम् ११.३९ ॥ |
| बहुधा गतां जगति भूतसृजा कमनीयतां समभिहृत्य पुरा । उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥ किरातार्जुनीयम् ६.४२ ॥ |
| बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः । त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ रघुवंशम् १०.२७ ॥ |
| बहुनखरता येषामग्रे खलु प्रतिभासते कमलसुहृदस्तेऽमी भानोः प्रवालरुचः कराः । उचितमुचितं जालेष्वन्तःप्रवेशिभिरायतैः कियदवयवैरेषामालिङ्गिताङ्गुलिलङ्गिमा ॥ नैषधीयचरितम् १९.५३ ॥ |
| बहुभिर्बहुधोल्लेखादेकस्योल्लेखिता मता । स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः ॥ चन्द्रालोकः ५.२३ ॥ |
| बहुरूपकशालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कवः । यदनेककसौधकंधराहरिभिः कुक्षिगतीकृता इव ॥ नैषधीयचरितम् २.८३ ॥ |
| बहुलाञ्जनपङ्कपट्टनीलद्युतयो देहमितस्ततः श्रमन्तः । दधिरे फणिनस्तुरङ्गमेषु स्फुटपल्याणनिबद्धवर्ध्रलीलां ॥ शिशुपालवधम् २०.५० ॥ |
| बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य । क्षुभितं वनगोचराभियोगाद्गणमाशिश्रियदाकुलं तिरश्चां ॥ किरातार्जुनीयम् १३.१० ॥ |
| बहूनि भीमस्य वसूनि दक्षिणां प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणम् । जनेषु रोमाञ्चमितेषु मिश्रतां ययुस्तयोः कण्टककुड्मलश्रियः ॥ नैषधीयचरितम् १६.४३ ॥ |
| बहोर्दुरापस्य वराय वस्तुनश्चितस्य दातुं प्रतिबिम्बकैतवात् । बभौतरामन्तरवस्थितं दधद्यदर्थमभ्यर्थितदेयमर्थिने ॥ नैषधीयचरितम् १६.१७ ॥ |
| बह्वपि प्रियमयं तव ब्रुवन्न व्रजत्यनृतवादितां जनः । सम्भवन्ति यददोषदूषिते सार्व सर्वगुणसम्पदस्त्वयि ॥ शिशुपालवधम् १४.४ ॥ |
| बाढं एषु दिवसेषु कर्म साधयति पुत्रजन्मने । इत्यदर्शितरुजोऽस्य मन्त्रिणः शश्वदूचुरघशङ्किनीः प्रजाः ॥ रघुवंशम् १९.५२ ॥ |
| बाणच्छिदस्ते विशिखाः स्मरारेरवाङ्मुखीभूतफलाः पतन्तः । अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः ॥ किरातार्जुनीयम् १७.३० ॥ |
| बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलाम् । विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत् ॥ रघुवंशम् ११.१९ ॥ |
| बाणाक्षिप्तारोहशून्यासनानां प्रक्रान्तानामन्यसैन्यैर्ग्रहीतुं । संरब्धानां भ्राम्यतामाजिभूमौ वारी वारैः सस्मरे वारणानां ॥ शिशुपालवधम् १८.५६ ॥ |
| बाणाहवव्याहतशम्भुशक्तेरासत्तिमासद्य जनार्दनस्य । शरीरिणा जैत्रशरेण यत्रे निःशङ्कमूषे मकरध्वजेन ॥ शिशुपालवधम्  ३.६० ॥ |
| बाणाहितपूर्णतूणीरकोटरैर्धन्विशाखिभिः । गोधाश्लिष्टभुजाशाखैरभूद्भीमा रणाटवी ॥ शिशुपालवधम् १९.३९ ॥ |

| |
|---|
| बालकेलिषु तदा यदलावीः कर्परीभिरभिहत्य तरङ्गान् । भाविबाणभुजभेदनलीलासूत्रपात्र इव पातु तदस्मान् ॥ नैषधीयचरितम् २१.८ ॥ |
| बालां विलोक्य विबुधैरपि मायिभिस्तैरच्छद्मितामियमलीकनलीकृतस्वैः । आह स्म तां भगवती निषधाधिनाथं निर्दिश्य राजपरिषत्परिवेषभाजम् ॥ नैषधीयचरितम् १३.२७ ॥ |
| बालातपैः कृतकगैरिकतां कृतां द्विस्तत्रोदयाचलशिलाः परिशीलयन्तु । त्वद्विभ्रमभ्रमणजश्रमवारिधारिपादाङ्गुलीगलितया नखलाक्षयापि ॥ नैषधीयचरितम् ११.४३ ॥ |
| बाले नाथ विमुञ्च मानिनि रुषं रोषान् मया किं कृतं खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि । तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन् मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ अमरुशतकम्-५३॥ |
| बाले! लीलामुकुलितममी मन्थरा दृष्टिपाताः किं क्षिप्यन्ते विरम विरम, व्यर्थ एष श्रमस्ते । सम्प्रत्यन्ये वयमुपरतं बाल्यमास्था वनान्ते क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः ॥ पुरुषार्थोपदेशः-83॥ |
| बालेऽधराधरितनैकविधप्रवाले पाणौ जगद्विजयकार्मणमस्य पश्य । ज्याघातजेन रिपुराजकधूमकेतुतारायमाणमुपरज्य मणिं किणेन ॥ नैषधीयचरितम् ११.१०४ ॥ |
| बालेन नक्तंसमयेन मुक्तं रौप्यं लसद्बिम्बमिवेन्दुबिम्बम् । भ्रमिक्रमादुज्झितपट्टसूत्रनेत्रावृतिं मुञ्चति शोणिमानम् ॥ नैषधीयचरितम् २२.५३ ॥ |
| बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि । सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥ कुमारसंभवम् ३.२९॥ |
| बालो वा यदि वा वृद्धो युवा वा गृहमागतः । तस्य पूजा विधातव्या सर्वत्राभ्यागतो गुरुः ॥ नीतिसंग्रहस्य मित्र-१.११२ ॥ |
| बालो वा यदि वा वृद्धो युवा वा गृहमागतः । तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥ नीतिसंग्रहस्य मित्र-१.६१ ॥ |
| बाहुपीडनकचग्रहणाभ्यामाहतेन नखदन्तनिपातैः । बोधितस्तनुशयतरुणीनामुन्मिमील विशदं विषमेषुः ॥ शिशुपालवधम् १०.७२ ॥ |
| बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः । राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥ रघुवंशम् २.३२ ॥ |
| बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः । आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥ रघुवंशम् १०.११ ॥ |
| बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन् । उच्चैस्तु तच्चित्रममुष्य भग्नस्यालोक्यते निर्व्यथनं यदन्तः ॥ नैषधीयचरितम् ७.६८ ॥ |
| बिभर्ति वंशः कतमस्तमोपहं भवादृशं नायकरत्नमीदृशम् । तमन्यसामान्यधियावमानितं त्वया महान्तं बहु मन्तुमुत्सहे ॥ नैषधीयचरितम् ९.६ ॥ |
| बिभेति रुष्टासि किलेत्यकस्मात्स त्वां किलापेति हसत्यकाण्डे ।यान्तीमिव त्वामनु यात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोधम् ॥ नैषधीयचरितम् ३.११२ ॥ |
| बिभेमि चिन्तामपि कर्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा । मृणालतन्तुच्छिदुरा सतीस्थितिर्लवादपि त्रुट्यति चापलात्किल ॥ नैषधीयचरितम् ९.३१ ॥ |
| बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं द्वौ मतौ मम रिपू समागसौ । होमधेनुहरणाच्च हैहयस्त्वं च इर्तिमपहर्तुमुद्यतः ॥ रघुवंशम् ११.७४ ॥ |
| बिभ्रतौ मधुरतामतिमात्रं रागिभिर्युगपदेव पपाते । आननैर्मधुरसो विकसद्भिर्नासिकाभिरसितोत्पलगन्धः ॥ शिशुपालवधम् १०.८ ॥ |
| बिभ्रत्या कौस्तुभं न्यासं स्तनान्तरविलम्बिनं । पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥ रघुवंशम् १०.६३ ॥ |
| बिभ्राणमायतिमतीमवृथा शिरोधिं प्रत्यग्रतामतिरसामधिकं दधन्ति । लोलोष्ट्रमौष्ट्रकमुदग्रमुखं तरूणामभ्रंलिहानि लिलिहे नवपल्लवानि ॥ शिशुपालवधम् ५.६४ ॥ |
| बिम्बितं वृतपरिस्रुति जानन्भाजने जलजमित्यबलायाः । घ्रातुमक्षि पतति भ्रमरः स्म भ्रान्तिभाजि भवति क्व विवेकः ॥ शिशुपालवधम् १०.५ ॥ |
| बिम्बोष्ठं बहु मनुते तुरङ्गवक्त्र- श्चुम्बन्तं मुखमिह किंनरं प्रियायाः । श्लिष्यन्तंमुहुरितरोऽपि तं निजस्त्री- मुत्तुङ्गस्तनभरभङ्गभीरुमध्यां ॥ शिशुपालवधम् ४.३८॥ |
| बृहच्छिलानिष्ठुरकण्ठघट्टनाविकीर्णलोलाग्निकणं सुरद्विषः । जगत्प्रभोरप्रसहिष्णु वैष्णवं न चक्रमस्याक्रमताधिकन्धरम् ॥ शिशुपालवधम् १.५४ ॥ |
| बृहत्तुलैरप्यतुलैर्वितानमालावनद्धैरपि चावितानैः । रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशालैरपि भूरिशालैः ॥ शिशुपालवधम् ३.४९ ॥ |
| बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति । संभूयाम्भोधिमभ्येति महानद्या नगापगा ॥ शिशुपालवधम् २.१०० ॥ |
| बोद्धारो मत्सरग्रस्ताः, प्रभवः स्मयदूषिताः । अबोधोपहताश्चान्ये, जीर्णमङ्के सुभाषितम् ॥ पुरुषार्थोपदेशः-2 ॥ |
| ब्यन्त्यादितिध्रुवमघानिलसार्पधिष्ण्ये, रिक्ते तिथौ चरतनौ विकवीन्दुवारे । स्नानं रुजा विरहितस्य जनस्य शस्तं, हीने विधौ खलखगैर्भवकेन्द्रकोणे ॥ मुहूर्त.नक्षत्रप्रकरणम् ४०॥ |
| ब्रवीति ते किं किमियं न जाने संदेहदोलामवलम्ब्य संवित् । कस्यापि धन्यस्य गृहातिथिस्त्वमलीकसंभावनयाथवालम् ॥ नैषधीयचरितम् ८.४८ ॥ |
| ब्रवीति दासीह किमप्यसंगतं ततोऽपि नीचेयमति प्रगल्भते । अहो सभा साधुरितीरिणः क्रुधा न्यषेधदेतत्क्षितिपानुगाञ्जनः ॥ नैषधीयचरितम् १२.५१ ॥ |
| ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः । शबरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ पुरुषार्थोपदेशः-95॥ |
| ब्रह्म-ज्ञान-विवेक-निर्मल-धियः कुर्वन्त्यहो दुष्करं यन्मुञ्चन्त्युपभोग-भाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः। सम्प्राप्तान्न पुरा न सम्प्रति न च प्राप्तौ दृढ-प्रत्ययान्वाञ्छा-मात्र-परिग्रहानपि परं त्यक्तुं न शक्ता वयम्॥॥ वैराग्यशतकम् १३ ॥ |
| ब्रह्मणोऽस्तु तव शक्तिलतायां मूर्ध्नि विश्वमथ पत्युरहीनाम् । बालतां कलयतो जठरे वा सर्वथासि जगतामवलम्बः ॥ नैषधीयचरितम् २१.११ ॥ |
| ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे, विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे । रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः, सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ नीतिशतकम्९५ ॥ |
| ब्रह्माण्डं त्वद्यशः पूर-गर्भितं भूमिभूषण । आकर्णय पयःपूर्णसुवर्णकलशायते ॥ चन्द्रालोकः२.२६ ॥ |

| |
|---|
| ब्रह्माण्डं मण्डलीमात्रं किं लोभाय मनस्विनः । शफरीस्फुर्तेनाब्धिः क्षुब्धो न खलु जायते ॥ वैराग्यशतकम् ९२ ॥ |
| ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्रं शरदां तपांसि । एतान्यदर्शन्गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥ (उत्तररामचरितम् १.१५) |
| ब्रह्माद्वयस्यान्वभवत्प्रमोदं रोमाग्र एवाग्रनिरीक्षितेऽस्याः । यथौचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदं तथासौ ॥ नैषधीयचरितम् ७.३ ॥ |
| ब्रह्मार्थकर्मार्थकवेदभेदा द्विधा विधाय स्थितयात्मदेहम् । चक्रे पराच्छादनचारु यस्या मीमांसया मांसलमूरुयुग्मम् ॥ नैषधीयचरितम् १०.८१ ॥ |
| ब्रह्मावर्तं जनपदमधश्छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः । राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ मेघदूतम्, पूर्वमेघः ४८॥ |
| ब्रह्मेन्द्रादि-मरुद्-गणांस्तृण-कणान्यत्र स्थितो मन्यते यत्स्वादादविरसा भवन्ति विभवास्त्रैलोक्य-राज्यादयः। भोगः कोऽपि स एवैकः परमो नित्योदितो जृम्भते भोः साधो क्षण-भङ्गुरे तदितरे भोगे रतिं मा कृथाः॥॥ वैराग्यशतकम् ४० ॥ |
| ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् । अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ॥ रघुवंशम् ५.३६ ॥ |
| ब्रुवते स्म दूत्य उपसृत्य नरान्तरवत्प्रगल्भमतिगर्भगिरः । सुहृदर्थमीहितमजिह्मधियां प्रकृतेर्विराजति विरुद्धमपि ॥ शिशुपालवधम् ९.६२ ॥ |
| ब्रूमः किमस्य नलमप्यलमाजुहूषोः कीर्तिं स चैष च समादिशतः स्म कर्तुम् । स्वद्वीपसीमसरिदीश्वरपूरपारवेलाचलाक्रमणविक्रममक्रमेण ॥ नैषधीयचरितम् ११.७९ ॥ |
| ब्रूमः किमस्य वरवर्णिनि वीरसेनोद्भूतिं द्विषद्बलविजित्वरपौरुषस्य । सेनाचरीभवदिभाननदानवारिवासेन यस्य जनितासुरभीरणश्रीः ॥ नैषधीयचरितम् १३.३ ॥ |
| ब्रूमः शङ्खं तव नल यशः श्रेयसे सृष्टशब्दं यत्सोदर्यं स दिवि लिखितः स्पष्टमस्ति द्विजेन्द्रः । अद्धा श्रद्धाकरमिह करच्छेदमप्यस्य पश्य म्लानिस्थानं तदपि नितरां हारिणो यः कलङ्कः ॥ नैषधीयचरितम् १९.५६ ॥ |
| भं नागतष्टं व्यय ईरितोऽसौ ध्रुवादिनामाक्षरयुक्तपिण्डः । तष्टो गुणैरिन्द्रकृतान्तभूया ह्यंशा भवेयुर्न शुभोऽन्तकोऽत्र ॥ मुहूर्त.वास्तुप्रकरणम् ७॥ |
| भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयाऽतिशेषे । व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥ रघुवंशम् ५.१४ ॥ |
| भक्तिभाजमनुगृह्य दृशा मां भाष्करेण कुरु वीततमस्कम् । अर्पितेन मम नाथ न तापं लोचनेन विधुना विधुनासि ॥ नैषधीयचरितम् २१.११६ ॥ |
| भक्तिमन्त इह भक्तवत्सले सन्ततस्मरणरीणकल्मषाः । यान्ति निर्वहणमस्य संसृतिक्लेशनाटकविडम्बनाविधेः ॥ शिशुपालवधम् १४.६३ ॥ |
| भक्तिर्भवे मरण-जन्म-भयं हृदि-स्थं स्नेहो न बन्धुषु न मन्मथजा विकाराः। संसर्ज दोष-रहिता विजया वनान्ता वैराग्यमस्ति किमितः परमर्थनीयम्॥॥ वैराग्यशतकम् ६९ ॥ |
| भक्तिर्भवे मरणजन्मभयं हृदिस्थं स्नेहो न बन्धुषु न मन्मथजो विकारः। संसर्गदोषरहिता विजिता वनान्ता वैराग्यमस्ति किमतः परमर्थनीयम् ॥ पुरुषार्थोपदेशः-91॥ |
| भक्त्या गुरौ मय्यनुकम्पाय च प्रीतास्मि ते पुत्र वरं वृणीष्व । न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥ रघुवंशम् २.६३ ॥ |
| भक्त्या तयैव प्रससाद तस्यास्तुष्टं स्वयं देवचतुष्टयं ततः । स्वेनानलस्य स्फुटतां यियासोः फूत्कृत्यपेक्षा कियती खलु स्यात् ॥ नैषधीयचरितम् १४.८ ॥ |
| भक्षितेनापि भवता नाहारो मम पुष्कलः । त्वयि जीवति जीवामि चित्रग्रीव इवानघ  ॥ नीतिसंग्रहस्य मित्र-१.८५ ॥ |
| भक्ष्यभक्षयोः प्रीतिर्विपत्तेः कारणं मतम् । शृगालात्पाशबद्धोऽसौ मृगः काकेन रक्षितः  ॥ नीतिसंग्रहस्य मित्र-१.५५ ॥ |
| भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे । इति चोपनतां क्षितिपृशं विवशा शापनिवृत्तिकारणं ॥ रघुवंशम् ८.८१ ॥ |
| भग्नद्रुमाश्चक्रुरितस्ततो दिशः समुल्लसत्केतननाकुलाः । पिष्टाद्रिपृष्ठास्तरसा च दन्तिनश्चलन्निजाङ्गाचलदुर्गमा भुवः ॥ शिशुपालवधम् १२.४९ ॥ |
| भग्नप्रक्रममारब्ध-शब्दनिर्वाह हीनता । अक्रमः कृष्ण पूज्यन्ते त्वामनाराध्य देवताः ॥ चन्द्रालोकः२.२७ ॥ |
| भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा, कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः । तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा, लोकाः! पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ नीतिशतकम्८५ ॥ |
| भग्ने निवासोऽयमिहास्य पुष्पैः सदानतः येन विषाणि नागः । तीव्राणि तेनोज्झति कोपितोऽसौ ससानतोयेन विषाणि नागः ॥ शिशुपालवधम् ४.६३॥ |
| भग्नेऽपीभे स्वे परावर्त्य देहं योद्धा सार्धं व्रीडया मुञ्चतेषून् । साकं यन्तुः संमदेनानुबन्धी दूनोऽभीक्ष्णं वारणः प्रत्यरोधि ॥ शिशुपालवधम् १८.३९ ॥ |
| भग्नैर्दण्डैरातपत्राणि भूमौ पर्यस्तानि प्रौढचन्द्रद्युतीनि । आहाराय प्रेतराजस्य रौप्यस्थालानीव स्थापितानि स्म भान्ति ॥ शिशुपालवधम् १८.६७ ॥ |
| भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः । शशो यदस्यास्ति शशी ततोऽयमेवं मृगोऽस्यास्ति मृगीति नोक्तः ॥ नैषधीयचरितम् २२.८४ ॥ |
| भङ्गश्लेषः पदस्तोमस्यैव चेत्पृथगर्थता । अजरामरता कस्य नायोध्येव पुरी प्रिया ॥ चन्द्रालोकः ५.६४ ॥ |
| भङ्गाकीर्तिमषीमलीमसतमप्रत्यर्थिसेनाभटश्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः । तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः ॥ नैषधीयचरितम् १२.१९ ॥ |
| भङ्गुरं न वितथं न कथं वा जीवलोकमवलोकयसीमम् । येन धर्मयशसी परिहातुं धीरहो चलति धीर तवापि ॥ नैषधीयचरितम् ५.११८ ॥ |
| भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः । अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥ नैषधीयचरितम् २.३३ ॥ |

| |
|---|
| भजते विदेशमधिकेन जितस्तदनुप्रवेशमथवा कुशलः । मखमिन्दुरुज्ज्वलकपोलमतः प्रतिमाच्छलेन सुदृशामविशत् ॥ शिशुपालवधम् ९.४८ ॥ |
| भज्यमानमतिमात्रकर्षणात्तेन वज्रपरुषस्वनं धनुः । भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिति न्यवेदयत् ॥ रघुवंशम् ११.४६ ॥ |
| भणचलच्चित्रपटप्रिये जने, वृथा यथा शास्त्र-पुराण- जल्पना । तथाऽद्य यूनां निवहे प्रभा-हते, वृथाऽस्मदीया रण- कीर्ति-कल्पना ॥ प्रतापविजयः-२१ ॥ |
| भद्रातिथी रविजभूतनयार्कवारे द्वीशार्यमाजचरणादितिवह्निवैश्वे । त्रैषुष्करो भवति मृत्युविनाशवृद्धौत्रैगुण्यदो द्विगुणकृद्वसुतक्षचान्द्रे ॥ मुहूर्त.नक्षत्रप्रकरणम् ५०॥ |
| भद्रानिद्रासंक्रमे दर्शरिक्तासन्ध्याषष्ठीद्वादशीवैधृतेषु । रोगेऽष्टम्यां चन्द्रसूर्योपरागे पाते चाद्यं नो रजोदर्शनं सत् ॥ मुहूर्त.संस्कारप्रकरणम् ३॥ |
| भद्राषष्ठीपर्वरिक्ताश्च सन्ध्याभौमार्कार्कीनाद्यरात्रीश्चतस्रः । गर्भाधानं त्र्युत्तरेन्द्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वम्बुपे सत् ॥ मुहूर्त.संस्कारप्रकरणम् ६॥ |
| भमीविवाहं सहते स्म कस्मादर्धं तनुर्या गिरिजात्मभर्तुः । तेनाव्रजन्त्या विदधे विदर्भानीशानयानाय तयान्तरायः ॥ नैषधीयचरितम् १०.१४ ॥ |
| भयादिवाश्लिष्य झषाहतेऽम्भसि प्रियं मुदानन्दयति स्म मानिनी । अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामाः कृतकैरपीहितैः ॥ किरातार्जुनीयम् ८.४६ ॥ |
| भर्तापि तावत्क्रथकैषिकानामनुष्ठितानन्तरजाविवाहः । सत्त्वानुरूपाहरणी कृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ॥ रघुवंशम् ७.३२ ॥ |
| भर्तुः कण्ठच्छविरिति गणैः सादरं दृश्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य । धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः॥ मेघदूतम्, पूर्वमेघः ३३॥ |
| भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं तत्संदेशान्मनसि निहितादागतं त्वत्समीपम् यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ मेघदूतम्, उत्तरमेघः ३३ ॥ |
| भर्तृभिः प्रणयसम्भ्रमदत्तां वारुणीं अतिरसां रसयित्वा । ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ किरातार्जुनीयम् ९.५४ ॥ |
| भर्तृषूपसखि निक्षिपतीनामात्मनो मधुमदोद्यमितानां । व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥ किरातार्जुनीयम् ९.६६ ॥ |
| भव लघुयुताकान्तः संध्यामुपास्स्व तपोमल त्वरयति कथं संध्येयं त्वां न नाम निशानुजा । द्युतिपतिरथावश्यंकारी दिनोदयमासिता हरिपतिहरित्पूर्णभ्रूणायिता कियतः क्षनान् ॥ नैषधीयचरितम् १९.२२ ॥ |
| भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषां । दहते भवबीजसंततिं शिखिनेऽनेकशिखाय ते नमः ॥ किरातार्जुनीयम् १८.३८ ॥ |
| भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोध्बेदशून्याः प्रदीपाः । अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मञ्जुवाक्पञ्जरस्थः ॥ रघुवंशम् ५.७४ ॥ |
| भवति स्फुटमागतो विपक्षान्न सपक्षोऽपि हि निर्वृतेर्विधाता । शिशुपालबलानि कृष्णमुक्तः सुतरां तेन तताप तोमरौघः ॥ शिशुपालवधम् २०.२९ ॥ |
| भवतु विदितं छद्मालापैरलं प्रिय गम्यतां तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।तव यथा तथाभूतं प्रेम प्रपन्नमिमां दशां प्रकृतिचपले का नः पीडा गते हतजीविते ॥ अमरुशतकम्-२७॥ |
| भवत्पदाङ्गुष्ठमपि श्रिता श्रीर्ध्रुवं न लब्धा कुसुमायुधेन । रतीशजेतुः खलु चिह्नमस्मिन्नर्धेन्दुरास्ते नखवेषधारी ॥ नैषधीयचरितम् ८.३६ ॥ |
| भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी । विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि! त्वयि ॥ कुमारसंभवम् ५.४२ ॥ |
| भवद्भिरधुनाराति- परिहापितपौरुषैः । ह्रदैरिवार्कनिष्पीतैः प्राप्तः पङ्को दुरुत्सहः ॥ किरातार्जुनीयम् १५.१७ ॥ |
| भवद्वियोगाच्छिदुरार्तिधारा यमस्वसुर्मज्जति निःशरण्यः ।मूर्च्छामयद्वीपमहान्ध्यपङ्के हा हा महीभृद्भटकुञ्जरोऽयम् ॥ नैषधीयचरितम् ३.११३ ॥ |
| भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितुर्मुखात्पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे । ततः पुण्यश्लोकः क्षितिभुवनलोकस्य भविता भवानाख्यातः सन्कलिकलुषहारी हरिरिव ॥ नैषधीयचरितम् १४.९२ ॥ |
| भवनोदरेषु परिमन्दतया शयितोऽलसः स्फटिकयष्टिरुचः । अवलम्ब्य जालकमुखोपगतानुदतिष्ठदिन्दुकिरणान्मदनः ॥ शिशुपालवधम् ९.३९ ॥ |
| भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि । कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ किरातार्जुनीयम् १.३२ ॥ |
| भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्भूमिविलम्बिनो घनाः । अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥ नीतिशतकम्७१ ॥ |
| भवन्नदृश्यः प्रतिबिम्बदेहव्यूहं वितन्वन्मणिकुट्टिमेषु । पुरं परस्य प्रविशन्वियोगी योगीव चित्रं स रराज राजा ॥ नैषधीयचरितम् ६.४६ ॥ |
| भवन्भवाय लोकानामाकम्पितमहीतलः । निर्घात इव निर्घोषभीमस्तस्यापतद्रथः ॥ शिशुपालवधम् १९.४ ॥ |
| भवन्सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी तमुर्वश्याः प्राणानपि विजयमानस्तनुरुचा । हरारब्धक्रोधेन्धनमदनसिंहासनमसावलंकर्मीणश्रीरुदभवदलंकर्तुमधुना ॥ नैषधीयचरितम् १५.८९ ॥ |
| भववीतये हतबृहत्तमसामवबोधवारि रजसः शमनं । परिपीयमाणमिव वोऽसकलैरवसादं एति नयनाञ्जलिभिः ॥ किरातार्जुनीयम् ६.४१ ॥ |
| भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् । तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ किरातार्जुनीयम् १.२८ ॥ |
| भवानपि त्वद्दयितापि शेषे सायुज्यमासादयतं शिवाभ्याम् । प्रेत्यास्मि कीदृग्भवितेति चिन्ता संतापमन्तस्तनुते हि जन्तोः ॥ नैषधीयचरितम् १४.७४ ॥ |
| भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ । स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥ रघुवंशम् २.५६ ॥ |

| |
|---|
| भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम् । खगवागियमित्यतोऽपि किं न मुदं धास्यति कीरगीरिव ॥ नैषधीयचरितम् २.१५ ॥ |
| भविष्यतः पत्युरुमा च शंभोः समाससाद प्रतिहारभूमिम् । योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ॥ कुमारसंभवम् ३.५८॥ |
| भवेच्छ्रुतिकटुर्वर्णैः श्रवणोद्वेजने पटुः । संविन्दते व्याकरणविरुद्धं च्युतसंस्कृति ॥ चन्द्रालोकः२.२ ॥ |
| भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा । हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ॥ चन्द्रालोकः ५.६८ ॥ |
| भव्यानि हानीरगुरेतदङ्गाद्यथा यथानर्ति तथा तथा तैः । अस्याधिकस्योपमयोपमाता दाता प्रतिष्ठां खलु तेभ्य एव ॥ नैषधीयचरितम् ७.१६ ॥ |
| भव्यो भवन्नपि मुनेरिह शासनेन क्षात्रे स्थितः पथि तपस्य हतप्रमादः । प्रायेण सत्यपि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥ किरातार्जुनीयम् ५.४९ ॥ |
| भस्मसात्कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागराम् । आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ॥ रघुवंशम् ११.८६ ॥ |
| भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः । यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ॥ कुमारसंभवम् १.१५ ॥ |
| भाग्यार्यमश्रुतिमघेन्द्रविधातृमूल- मैत्रान्त्यभेषु कथितं कणमर्दनं सत् । द्वीशाजपान्निर्ऋतिधातृशतार्यमर्क्षे सस्यस्य रोपणमिहार्किकुजौ विना सत् ॥ मुहूर्त.नक्षत्रप्रकरणम्  ३२॥ |
| भातु नाम सुदृशां दशनाङ्कः पाटलो धवलगण्डतलेषु । दन्तवाससि समानगुणश्रीः संमुखोऽपि परभागमवाप ॥ शिशुपालवधम् १०.८६ ॥ |
| भाद्रे चन्द्रदृशौ नभस्यनलनेत्रे माधवे द्वादशी पौषे वेदशरा इषे दशशिवा मार्गेऽद्रिनागा मधौ । गोऽष्टौ चोभयपक्षगाश्च तिथयः शून्या बुधैः कीर्तिता ऊर्जाषाढतपस्यशुक्रतपसां कृष्णे शराङ्गाब्धयः ॥ मुहूर्तचिन्त.१० ॥ |
| भानि स्थाप्यान्यब्धिदिक्षु सप्तसप्तानलर्क्षतः । वायव्याग्नेयदिक्संस्थं पारिघं नैव लङ्घयेत् ॥ मुहूर्त.यात्राप्रकरणम् ३६॥ |
| भानुसूनुमनुगृह्य जय त्वं राममूर्तिहतवृत्रहपुत्रः । इन्द्रनन्दनसपक्षमपि त्वां नौमि कृष्न निहतार्कतनूजम् ॥ नैषधीयचरितम् २१.९५ ॥ |
| भारतीयार्यमर्यादां देवभाषां च वेदितुम् ।  कुमार्यश्च कुमाराश्च पठेयुर्नीतिसंग्रहम् ॥ नीतिसंग्रहस्य मित्र-०.2 ॥ |
| भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः । तस्माद्विवाहसमयः परिचिन्त्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः ॥ मुहूर्त.विवाहप्रकरणम् १॥ |
| भावसूचितमदृष्टविप्रियं चाटुमत्क्षणवियोगकातरम् । कैश्चिदेव दिवसैस्तथा तयोः प्रेम गूढमितरेतराश्रयम्॥ कुमारसंभवम् ७.१५॥ |
| भावस्य शान्तिरुदयः सन्धिः शबलता तथा । काव्यस्य काञ्चनस्येव कुङ्कुमं कान्तिसंपदे ॥ चन्द्रालोकः६.२० ॥ |
| भावानामुदयः सन्धिः शबलत्वमिति त्रयः । अलङ्कारानिमान्सप्त केचिदाहुर्मनीषिणः ॥ चन्द्रालोकः ५.११८ ॥ |
| भाविकं भूतभाव्यर्थ-साक्षाद्दर्शनवर्णनम् । अलं विलोकयाद्यापि युद्ध्यन्तेऽत्र सुराऽसुराः ॥ चन्द्रालोकः ५.११३ ॥ |
| भावी करः कररुहाङ्कुरकोरकोऽपि तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः । अन्तस्त्वदास्यहृतसारतुषारभानुशोकानुकारिकरिदन्तजकङ्कणाङ्कः ॥ नैषधीयचरितम् ११.१०८ ॥ |
| भाषा स्वभाव-सरसा त्वमह प्रसङ्गः, मन्दाकिनी मधुमयी त्वमहं तरङ्गः । मन्दारबालकलिका त्वमहं तवङ्गः,ज्योतिर्मयी विजयसे त्वमहं पतङ्गः ॥ प्रतापविजयः-१३ ॥ |
| भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववाशिरे । क्षत्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः ॥ रघुवंशम् ११.६१ ॥ |
| भास्वत्करव्यतिकरोल्लसिताम्बरान्तस्तापत्रपा इव महाजनदर्शनेन । संविव्युरम्बरविकासि चमूसमुत्थं पृथ्वीरजः करभकण्ठकडारमाशः ॥ शिशुपालवधम् ५.३ ॥ |
| भास्वद्वंशकरीरतां दधदयं वीरः कथं कथ्यतामध्युष्टापि हि कोटिरस्य समरे रोमाणि सत्त्वाङ्कुराः । नीतः संयति बन्दिभिः श्रुतिपथं यन्नामवर्णावलीमन्त्रः स्तम्भयति प्रतिक्षितिभृतां दोस्तम्भकुम्भीनसान् ॥ नैषधीयचरितम् १२.१ ॥ |
| भास्वन्मयीं मीलयतो दृशं द्राङ्मिथोमिलद्व्यञ्चलमादिपुंसः । आचक्ष्महे तन्वि तमांसि पक्ष्म श्यामत्वलक्ष्मीविजितेन्दुलक्ष्म ॥ नैषधीयचरितम् २२.३४ ॥ |
| भिक्षा-शतं तदपि नीरसमेक-बारं शय्या च भूः परिजनो निज-देह-मात्रम्। वस्त्रं विशीर्ण-शत-खण्ड-मयी च कन्था हा हा तथापि विषया न परित्यजन्ति॥॥ वैराग्यशतकम् १५ ॥ |
| भिक्षाशनं तदपि नीरसमेकवारं शय्या मही परिजनो निजदेहमात्रम् । वस्त्रं च जीर्णपटखण्डमयी च कन्था हा हा तथापि विषया न परित्यजन्ति ॥ पुरुषार्थोपदेशः-27॥ |
| भिक्षाशी यज्ञकृद्दीर्घजीवी ज्ञानी च पित्तरुक् । कुष्ठी चान्नक्लेशवातव्याधिमान् भोगभागिति ॥ मुहूर्त.संस्कारप्रकरणम् २०॥ |
| भिक्षासी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा हानादानविरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः । रथ्याकीर्णविशीर्णजीर्णवसनः सम्प्राप्तकन्थासनो निर्मानो निरहङ्कृतिः शमसुखाभोगैकबद्धस्पृहः ॥ वैराग्यशतकम् ९५ ॥ |
| भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वतो दुर्मात्सर्य-मदाभिमान-मथनं दुःखौघ-विध्वंसनम्। सर्वत्रान्वहमप्रयत्न-सुलभं साधु-प्रियं पावनं शम्भोः सत्रमवायमक्षय-निधिं शंसन्ति योगीश्वराः॥॥ वैराग्यशतकम् ३० ॥ |
| भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ । तत्फले यदि परं तव हेला क्लेशलब्धमधिकादरदं तु ॥ नैषधीयचरितम् ५.२१ ॥ |
| भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः पूर्वस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ मेघदूतम्, उत्तरमेघः ४१ ॥ |
| भित्त्वेव भाभिः सवितुर्मयूखाञ्जज्वाल विष्वग्विसृतस्फुलिङ्गः । विदीर्यमाणाश्मनिनादधीरं ध्वनिं वितन्वन्नकृशः कृशानुः ॥ किरातार्जुनीयम् १६.५१ ॥ |
| भित्वा घोणामायसेनाधिवक्षः स्थूरीपृष्ठो गार्ध्रपक्षेण विद्धः । शिक्षाहेतोर्गाढरज्ज्वेव बद्धो हर्तुं वक्त्रं नाशकद्दुर्मुखोऽपि ॥ शिशुपालवधम् १८.२२ ॥ |

| |
|---|
| भिन्नानस्त्रैर्मोहभाजोऽभिजातान्हन्तुं लोलं वारयन्तः स्ववर्गं । जीवग्राहं ग्राहयामासुरन्ये योग्येनार्थाः कस्य न स्याज्जनेन ॥ शिशुपालवधम् १८.६६ ॥ |
| भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम् । यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव ॥ (स्वप्नवासवदत्तम् ५. १२) |
| भिन्नेषुरत्नकिरणैः किरणेष्विहेन्दो- रुच्चावचैरुपगतेषु सहस्रसंख्यां । दोषापि नूनमहिमांशुरसौ किलेति व्याकोशकोकनदतां दधते नलिन्यः ॥ शिशुपालवधम् ४.४६॥ |
| भिन्नोरस्कौशत्रुणाकृष्य दूरादासन्नत्वात्कौचिदेकेषेणैव । अन्योऽन्यावष्टम्भसामर्थ्ययोगार्ध्वावेव स्वर्गतावप्यभूताम् ॥ शिशुपालवधम् १८.६५ ॥ |
| भीमं वनं भवति तस्य पुरं प्रधानं सर्वो जनः स्वजनतामुपयाति तस्य । कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ नीतिशतकम् १०२ ॥ |
| भीमकान्तैर्नृपगुणैः स भभूवोपजीविम् । अधृष्यश्चाभिगम्यश्च याधोरत्नैरिवार्णवः ॥ रघुवंशम् १.१६ ॥ |
| भीमजा च हृदि मे परमास्ते जीवितादपि धनादपि गुर्वी । न स्वमेव मम साऋहति यस्याः षोडशीमपि कलां किल नोर्वी ॥ नैषधीयचरितम् ५.८२ ॥ |
| भीमजामन् चलत्प्रतिवेलं संयियंसुरिव राजऋषीन्द्रः । आववार हृदयं न समन्तादुत्तरीयपरिवेषमिषेण ॥ नैषधीयचरितम् २१.१५ ॥ |
| भीमतामपरोऽम्भोधिसमेऽधित महाहवे । दाक्षे कोपः शिवस्येव समेधितमहा हवे ॥ शिशुपालवधम् १९.५४ ॥ |
| भीमस्तयागद्यत मोदितुं ते वेला किलेयं तदलं विषद्य । मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च विचित्रमेषाम् ॥ नैषधीयचरितम् १०.८९ ॥ |
| भीमात्मजापि कृतदैवतभक्तिपूजा पत्यौ च भुक्तवति भुक्तवती ततोऽनु । तस्याङ्कमङ्कुरिततत्परिरिप्समध्यमध्यास्त भूषणभरातिभरालसाङ्गी ॥ नैषधीयचरितम् २१.१२२ ॥ |
| भीमास्त्रराजिनस्तस्य बलस्य ध्वजराजिनः । कृतघोराजिनश्चक्रे भुवः सरुधिरा जिनः ॥ शिशुपालवधम् १९.११२ ॥ |
| भीष्मोक्तं तदिति वचो निशम्य सम्यक्साम्राज्यश्रियमधिगच्छता नृपेण । दत्तेऽर्धे महति महीभृतां पुरोऽपि त्रैलोक्ये मधुभिदभूदनर्घ एव ॥ शिशुपालवधम् १४.८८ ॥ |
| भुक्त्वा गच्छति यदि चेत्तैलनुडक्षारपक्वमांसानि । विनिवर्तते स रुग्णः स्त्रीद्विजमवमान्य गच्छतो मरणम् ॥ मुहूर्त.यात्राप्रकरणम् ९७॥ |
| भुजंगमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम् । कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमती दधानम्॥ कुमारसंभवम् ३.४६॥ |
| भुजगराजसितेन नभःश्रिया कनकराजिविराजितसानुना । समुदितं निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिं ॥ किरातार्जुनीयम् ५.४ ॥ |
| भुजेऽपसर्पत्यपि दक्षिणे गुणं सहेषुणादाय पुरःप्रसर्पिणे । धनुः परीरम्भमिवास्य संमदान्महाहवे वामबाहवे ॥ नैषधीयचरितम् १२.६४ ॥ |
| भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि । प्रस्नवेणाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥ रघुवंशम् १.८४ ॥ |
| भुवं भृकुट्या भृशमाविभीषयन् भुजङ्गभीमोऽमितभूति-भूषितः । विधातुकामः प्रलयं भयङ्करं, लयङ्करः किं भव एव भात्ययम् ॥ प्रतापविजयः-११६ ॥ |
| भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् । उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ॥ नैषधीयचरितम् २.१८ ॥ |
| भुवनमोहनजेन किमेनसा तव बभूव परेत पिशाचता । यदधुना विरहाधिमलीमसामभिभवन्भ्रमसि स्मर मद्विधाम् ॥ नैषधीयचरितम् ४.८४ ॥ |
| भुवाह्वयन्तीं निजतोरणस्रजा गजालिकर्णानिलखेलया ततः । ददर्श दूतीमिव भीमजन्मनह स तत्प्रतीहारमहीं महीपतिः ॥ नैषधीयचरितम् १६.७ ॥ |
| भुवि भ्रमित्वानवलम्बमम्बरे विहर्तुमभ्यासपरम्परापरा । अहो महावंशममुं समाश्रिता सकौतुकं नृत्यति कीर्तिनर्तकी ॥ नैषधीयचरितम् १२.१६ ॥ |
| भूतभूतिरहीनभोगभाग्विजितानेकपुरोऽपि विद्विषां । रुचिमिन्दुदले करोत्यजः परिपूर्णेन्दुरुचिर्महीपतिः ॥ शिशुपालवधम् १६.७१ ॥ |
| भूतादिकालभेदेन निह्नवः स्यादनेकधा । अनेनापि प्रभेदेन व्यक्तिवल्ली विजृम्भते ॥ चन्द्रालोकः७.१६ ॥ |
| भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते । जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥ रघुवंशम् २.४८ ॥ |
| भूपं व्यलोकत न दूरतरानुरक्तं सा कुण्डिनावनिपुरंदरनन्दिनी तम् । अन्यानुरागविरसेन विलोकनाद्वा जानामि सम्यगविलोकनमेव रम्यम् ॥ नैषधीयचरितम् ११.९३ ॥ |
| भूपञ्चाङ्कद्व्यङ्गदिग्वह्निसप्तवेदाष्टेशार्काश्च घाताख्यचन्द्रः । मेषादीनां राजसेवाविवादे वर्ज्यो युद्धाद्ये च नान्यत्र वर्ज्यः ॥ मुहूर्त.यात्राप्रकरणम् २७॥ |
| भूपेषु तेषु न मनागपि दत्तचित्ता विस्मेरया वचनदेवतया तयाथ । वाणीगुणोदयतृणीकृतपाणिवीणानिक्वाणया पुनरभाणि मृगेक्षणा सा ॥ नैषधीयचरितम् ११.८२ ॥ |
| भूभर्तुः समधिकमादधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः । संसक्तौ किं असुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः ॥ किरातार्जुनीयम् ७.२७ ॥ |
| भूभर्तुरस्य रतिरेधि मृगाक्षि मूर्ता सोऽयं तवास्तु कुसुमायुध एव मूर्तः । भातं च ताविव पुरा गिरिशं विराद्धमाराद्धुमाशु पुरि तत्र कृतावतारौ ॥ नैषधीयचरितम् ११.१२१ ॥ |
| भूभृद्भवाङ्कभुवि राजशिखामणेः सा त्वं चास्य भोगसुभगस्य समः क्रमोऽयम् । यन्नाकपालकलनाकलितस्य भर्तुरत्रापि जन्मनि सती भवती स भेदः ॥ नैषधीयचरितम् २१.१३२ ॥ |
| भूभृद्भिरप्यस्खलिताः खलून्नतैरप्यपह्नवाना सरितः पृथूरपि । अन्वर्थसंज्ञयैव परं त्रिमार्गगा ययावसंख्यैः पथिभिश्चमूरसौ ॥ शिशुपालवधम् १२.२३ ॥ |
| भूभृद्भिर्लम्भिताऽसौ करुणरसनदीमूर्तिमद्देवतात्वं तातेनाभ्यर्थ्ययोग्याःसपदिनिजसखीर्दापयामासतेभ्यः । वैदर्भ्यास्तेऽप्यलाभात्कृतगमनमनःप्राणवाञ्छां विजघ्नुः सख्यः संशिक्ष्य विद्याः सततधृतवयस्यानुकाराभिराभिः ॥ नैषधीयचरितम् १४.९७ ॥ |
| भूमवत्कलयता युधि कालं म्लेच्छकल्पशिखिनां करवालम् । कल्किना दशतयं मम कल्कं त्वं व्युदस्य दशमावतरेण ॥ नैषधीयचरितम् २१.९२ ॥ |
| भूमिद्व्यब्ध्यद्रिदिक्सूर्याङ्गाष्टाङ्केशाग्निसायकाः । मेषादिघातलग्नानि यात्रायां वर्जयेत्सुधीः ॥ मुहूर्त.यात्राप्रकरणम् ३३॥ |
| भूमीभृतः समिति जिष्णुमपव्यपायं जानीहि न त्वमघवन्तममुं कथंचित् । गुप्तं घटप्रतिभटस्तनि बाहुनेत्रं नालोकसेऽतिशयमद्भुतमेतदीयम् ॥ नैषधीयचरितम् १३.६ ॥ |

| |
|---|
| भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धं इति व्यथावान् । स निर्ववामास्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्यां ॥ किरातार्जुनीयम् १७.७ ॥ |
| भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ॥ मेघदूतम्, उत्तरमेघः ४५ ॥ |
| भूयसामेकसम्बन्धभाजां गुम्फः समुच्चयः । नश्यन्ति पश्चात्पश्यन्ति भ्रश्यन्ति च तव द्विषः ॥ चन्द्रालोकः ५.९७ ॥ |
| भूयस्ततो निखिलवाङ्मयदेवता सा हेमोपमेयतनुभा समभाषतैनाम् । एतं स्वबाहुबहुवारनिवारितारिं चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ॥ नैषधीयचरितम् ११.४८ ॥ |
| भूयस्ततो रघुपतिर्विलसत्पताकमध्यास्त कामगति सावरजो विमानम् । दोषातनं बुधबृहस्पतियोगदृश्यस्तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥ रघुवंशम् १३.७६ ॥ |
| भूयांस क्वचिदपि काममस्खलन्तस्तुङ्गत्वं दधति च यद्यपि द्वयेऽपि । कल्लोलाः सलिलनिधेरवाप्य पारं शीर्यन्ते न गुणमहोर्मयस्तदीयाः ॥ शिशुपालवधम् १६.८२ ॥ |
| भूयो निनादय, निनादय वाणि! वीणां, चचच्चराचरविमोहविधौ प्रवीणम् । यन्निस्सरत्स्वरसुधा रसपान - मत्तः, भूयात्तवायमजरः शिशुरीशदत्तः ॥ प्रतापविजयः-१६ ॥ |
| भूयोऽपि बाला नलसुन्दरं तं मत्वामरं रक्षिजनाक्षिबन्धात् । आतिथ्यचाटून्यपदिश्य तत्स्थां श्रियं प्रियास्यास्तुतव स्तुतः सा ॥ नैषधीयचरितम् ८.३१ ॥ |
| भूयोऽपि भूपमपरं प्रति भारती तां त्रस्यच्चमूरुचलचक्षुषमाचचक्षे । एतस्य काशिनृपतेस्त्वमवेक्ष्य लक्ष्मीमक्ष्णोः सुखं जनय खञ्जनमञ्जुनेत्रे ॥ नैषधीयचरितम् ११.११३ ॥ |
| भूयोऽर्थमेनं यदि मां त्वमात्थ तदा पदावालभसे मघोनः । सतीव्रतैस्तीव्रमिमं तु मन्तुमन्तर्वरं वज्रिणि मार्जितास्मि ॥ नैषधीयचरितम् ६.११ ॥ |
| भूरिप्रभावेण रणाभियोगात्प्रीतो विजिह्मश्च तदीयवृद्ध्या । स्पष्टोऽप्यविस्पष्टवपुःप्रकाशः सर्पन्महाधूम इवाद्रिवह्निः ॥ किरातार्जुनीयम् १७.२ ॥ |
| भूरिभिर्भारिभिर्भीरैर्भूभारैरभिरेभिरे । भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ शिशुपालवधम् १९.६६ ॥ |
| भूरिसृष्टिधृतभूवलयानां पृष्ठसीमनि किणैरिव चक्रैः । चुम्बितावतु जगत्सितिरक्षाकर्मठस्य कमठस्तव मूर्तिः ॥ नैषधीयचरितम् २१.५७ ॥ |
| भूरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानां । नास्त्यत्र तेजस्विभिरुत्सुकानामह्नि प्रदोषः सुरसुन्दरीणां ॥ किरातार्जुनीयम् १६.७ ॥ |
| भूलोकभर्तुर्मुखपाणिपादपद्मैः परीरम्भमवाप्य तस्य । दमस्वसुर्दृष्टिसरोजराजिश्चिरं न तत्याज सबन्धुबन्धम् ॥ नैषधीयचरितम् ८.१४ ॥ |
| भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमादेतस्य स्तुमहे महेमरदनस्पर्धीनि कैरक्षरैः । लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदैरस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्मितः ॥ नैषधीयचरितम् १२.९१ ॥ |
| भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याकृत प्राकृतबुद्धिमेव ।प्रसूनबाणे विबुधाधिनाथस्तेनाथ साऽशोभि सभा नलेन ॥ नैषधीयचरितम् १०.३८ ॥ |
| भूषास्थिदाम्नस्त्रुटितस्य नाट्यात्पश्योडुकोटीकपटं वहद्भिः । दिग्मण्डलं मण्डयतीह खण्डैः सायंनटस्तारकराट्किरीटः ॥ नैषधीयचरितम् २२.८ ॥ |
| भृङ्गश्रेणीश्यामभासां समूहैर्नाराचानां विद्धनीरन्ध्रदेहः । निर्भीकत्वादाहवेनाहतेच्छो हृष्यन्हस्ती हृष्टरोमेव रेजे ॥ शिशुपालवधम् १८.४१ ॥ |
| भृभृतं पृथुतपोघनमाप्तस्तं शुचिः स्नपयति स्म पुरोधाः । संदधज्जलधरस्खलदोघस्तीर्थवारिलहरीरुपरिष्टात् ॥ नैषधीयचरितम् २१.८ ॥ |
| भृशं वियोगानलतप्यमान किं विलीयसे न त्वमयोमयं यदि । स्मरेषुभिर्भेद्य न वज्रमप्यसि ब्रवीषि न स्वान्त कथं न दीर्यसे ॥ नैषधीयचरितम् ९.८९ ॥ |
| भृशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोऽभिलापः । अधिकवितललोचनं वधूनामयुगपदुन्नमितभ्रु वीक्षितं च ॥ किरातार्जुनीयम् १०.६१ ॥ |
| भृशतापभृता मया भवान्मरुदासादि तुषारसारवान् । धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव सन्निधिः ॥ नैषधीयचरितम् २.५३ ॥ |
| भृशमङ्गसादकरुणत्वमविशददृशः कपोलयोः । वाक्यमसकलमपास्य मदं विदधुस्तदीयगुणमात्मना शुचः ॥ शिशुपालवधम् १५.८२ ॥ |
| भृशमदूयत याधरपल्लवक्षतिरनावरणा हिममारुतैः । दशनरश्मिपटेन च सीत्कृतैर्निवासितेव सितेन सुनिर्ववौ ॥ शिशुपालवधम् ६.५८ ॥ |
| भृशमबिभरुस्तारा हाराच्च्युता इव मौक्तिकाः सुरसुरतजक्रीडालूनाद्द्युसद्वियदङ्गणम् । बहुकरकृतात्प्रातःसंमार्जनादधुना पुनर्निरुपधिनिजावस्थालक्ष्मीविलक्षणमीक्ष्यते ॥ नैषधीयचरितम् १९.१३ ॥ |
| भृशस्विदः पुलकविकासिमूर्तयो रसाधिके मनसि निविष्टसाहसाः । मुखे युधः सपदि रतेरिवाभवन्ससम्भ्रमाः क्षितिपचमूवधूगणाः ॥ शिशुपालवधम् १७..४८ ॥ |
| भेदकातिशयोक्तिश्चेदेकस्यैवान्यतोच्यते ।अहो अन्यैव लावण्यलीला बालाकुचस्थले ॥ चन्द्रालोकः ५.४५ ॥ |
| भेरिभिराक्रुष्टमहागुहामुखो ध्वजांशुकैस्तर्जितकन्दलीवनः । उत्तङ्गमातङ्गजितालघूपलो बलैः स पश्चात्कियते स्म भूधरः ॥ शिशुपालवधम् १२.२७ ॥ |
| भैमीं च दूत्यं च न किंचिदापमिति स्वयं भावयतो नलस्य । आलोकमात्राद्यदि तन्मुखेन्दोरभून्न भिन्नं हृदयारविन्दम् ॥ नैषधीयचरितम् ६.८९ ॥ |
| भैमीं निरीक्ष्याभिमुखीं मघोनः स्वाराज्यलक्ष्मीरभृताभ्यसूयाम् । दृष्ट्वा ततस्तत्परिहारिणीं तां व्रीडं बिडौजःप्रवणाभ्यपादि ॥ नैषधीयचरितम् १४.३५ ॥ |
| भैमीङ्गितानि शिबिकामधरे वहन्तः साक्षान्न यद्यपि कथंचन जानते स्म । जज्ञुस्तथापि सविधस्थितसंमुखीनभूपालभूषणमणिप्रतिविम्बितेन ॥ नैषधीयचरितम् ११.९४ ॥ |
| भैमीनिरस्तं स्वमवेत्य दूतीमुखात्किलेन्द्रप्रमुखा दिगीशाः । स्यदे मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमीयुः ॥ नैषधीयचरितम् १०.१७ ॥ |
| भैमीनिराशे हृदि मन्मथेन दत्तस्वहस्तादविरहाद्विहस्तः । स तामलीकामवलोक्य तत्र क्षणादपश्यन्व्यषदद्विबुद्धः ॥ नैषधीयचरितम् ६.१६ ॥ |
| भैमीपदस्पर्शकृतार्थरथ्या सेयं पुरीत्युत्कलिकाकुलस्ताम् । नृपो निपीय क्षणमीक्षणाभ्यां भृशं निशश्वास सुरैः क्षताशः ॥ नैषधीयचरितम् ६.५ ॥ |
| भैमीमवापयत जन्यजनस्तदन्यं गङ्गामिव क्षितितलं रघुवंशदीपः । गाङ्गेयपीतकुचकुम्भयुगां च हारचूडासमागमवशेन विभूषितां च ॥ नैषधीयचरितम् ११.९५ ॥ |

| |
|---|
| भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः । गन्धर्ववध्वः स्वरमध्वरीणतत्कण्ठनालैकधुरीणवीणः ॥ नैषधीयचरितम् ६.६५ ॥ |
| भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम् । नातर्कि मध्ये स्फुटमप्युदीतं तस्यानुबिम्बं मणिवेदिकायाम् ॥ नैषधीयचरितम् ६.७४ ॥ |
| भैमीसमीपे स निरीक्ष्य यत्र ताम्बूलजाम्बूनदहंसलक्ष्मीम् । कृतप्रियादूत्यमहोपकारमरालमोहद्रढिमानमूहे ॥ नैषधीयचरितम् ६.७२ ॥ |
| भैम्या समं नाजगणद्वियोगं स दूतधर्मे स्थिरधीरधीशः । पयोधिपाने मुनिरन्तरायं दुर्वारमप्यौर्वमिवौर्वशेयः ॥ नैषधीयचरितम् ६.२ ॥ |
| भैम्या स्रजःसञ्जनया पथि प्राक्स्वयंवरं संजनयांबभूव । संभोगमालिङ्गनयास्य वेधाः शेषं तु कं हन्तुमियद्यतध्वे ॥ नैषधीयचरितम् १४.४४ ॥ |
| भैषज्यं सल्लघुमृदुचरे मूलभे द्व्यङ्गलग्ने शुक्रेन्द्व्यज्ये विदि च दिवसे चापि तेषां रवेश्च । शुद्धे रिःफद्युनमृतिगृहे सत्तिथौ नौ जनेर्भे सूचीकर्माप्यदितिवसुभे तक्षमेत्राश्विधिष्ण्ये ॥ मुहूर्त.नक्षत्रप्रकरणम् १५ ॥ |
| भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः। कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णा ॥ नीतिशतकम् 0॥ |
| भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः। कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः॥॥ वैराग्यशतकम् ७ ॥ |
| भोगा भङ्गुर-वृत्तयो बहुविधास्तैरेव चायं भवस्तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टतैः। आशा-पाश-शतापशान्ति-विशदं चेतः समाधीयतां कामोत्पत्ति-वशात्स्वधामनि यदि श्रद्धेयमस्मद्वचः॥॥ वैराग्यशतकम् ३९ ॥ |
| भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद् भङ्गुरम् । लोला यौवनलालना तनुभृतामित्याकलय्य द्रुतं योगे ध्येयसमाधियोगसुभगे बुद्धिं विदध्वं बुधाः ॥ पुरुषार्थोपदेशः-73॥ |
| भोगा मेघ-वितान-मध्य-विलसत्-सौदामिनी-चञ्चला आयुर्वायु-विघट्टिताब्ज-पटली-लीनाम्बुवद्भङ्गुरम्। लीला यौवन-लालसास्तनुभृतामित्याकलय्य द्रुतं योगे धैर्य-समाधि-सिद्धि-सुलभे बुद्धिं विदध्वं बुधाः॥॥ वैराग्यशतकम् ३५ ॥ |
| भोगास्तुङ्ग-तरङ्ग-भङ्ग-तरलाः प्राणाः क्षण-ध्वंसिनः स्तोकान्येव दिनानि यौवन-सुखं स्फूर्तिः प्रियासु स्थिता। तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका लोकानुग्रह-पेशलेन मनसा यत्नः समाधीयताम्॥॥ वैराग्यशतकम् ३४ ॥ |
| भोगिभिः क्षितितले दिवि वासं बन्धमेष्यसि चिरं ध्रियमाणः । पाणिरेष भुवनं वितरेति छद्मवाग्भिरव वामन विश्वम् ॥ नैषधीयचरितम् २१.६४ ॥ |
| भोगिभोगादनासीनं ददृशुस्तं दिवौकसः । तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥ रघुवंशम् १०.७ ॥ |
| भोगे रोगमयं कुले च्युतिभयं वित्ते नृपालाद्भयं माने दैन्य-भयं बले रिपु-भयं रूपे जराया भयम्। शास्त्रे वादिभयं गुणे खल-भयं काये कृतान्ताद्भयं सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम्॥॥ वैराग्यशतकम् ३१ ॥ |
| भौमार्करिक्तामाद्यूने चरोनेऽङ्गे विपञ्चकः । व्यष्टान्त्यस्थैः शुभैर्गेहारम्भस्त्र्यायारिगैः खलैः ॥ मुहूर्त.वास्तुप्रकरणम् १८॥ |
| भ्रमणरयविकीर्णस्वर्णभासा खगेन क्वचन पतनयोग्यं देशमन्विष्यताधः । मुखविधुमदसीयं सेवितुं लम्बमानः शशिपरिधिरिवोर्ध्वं मण्डलस्तेन तेने ॥ नैषधीयचरितम् २.१०८ ॥ |
| भ्रमन्नमुष्यामुपकारिकायामायस्य भैमीविरहात्क्रशीयान् । असौ मुहुः सौधपरम्पराणां व्यधत्त विश्रान्तिमधित्यकासु ॥ नैषधीयचरितम् ६.३६ ॥ |
| भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः । ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलं ॥ रघुवंशम् ८.३५ ॥ |
| भ्रमामि ते भैमि सरस्वतीरसप्रवाहचक्रेषु निपत्य कत्यदः । त्रपामपाकृत्य मनाक्कुरु स्फुटं कृतार्थनीयः कतमः सुरोत्तमः ॥ नैषधीयचरितम् ९.५१ ॥ |
| भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या । करकिसलयतालैर्मुग्धया नर्त्यमानं सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥ (उत्तररामचरितम् ३.१९) |
| भ्रश्यद्भिर्जलमभि भूषणैर्वधूनामङ्गेभ्यो गुरुभिरमज्जि लज्जयेव । निर्माल्यैरथ ननृतेऽवधीरितानामप्युच्चैर्भवति लघीयसां हि धार्ष्ट्यम् ॥ शिशुपालवधम् ८.६० ॥ |
| भ्रातरि सौरिर्भूमिसुतो वैरिणि लग्ने देवगुरुः । आयगतेऽर्के शत्रुजयश्चेदनुकूलो दैत्यगुरुः ॥ मुहूर्त.यात्राप्रकरणम् ५९॥ |
| भ्रातुः सहोदर-वरस्य वधाय पूर्वं, - तस्याऽस्ति ते करुणया किमु नाम कार्यं, वोऽभ्युद्यतोऽभवदो समरेऽप्रधर्षः शीघ्रं कृता न जनता न नतानना चेत् ॥ प्रतापविजयः-६१ ॥ |
| भ्रान्तं देशमनेक-दुर्ग-विषमं प्राप्तं न किञ्चित्फलं त्यक्त्वा जाति-कुलाभिमानमुचितं सेवा कृता निष्फला। भुक्तं मान-विवर्जितं परगृहेष्वाशङ्कया काकवत् तृष्णे जृम्भसि पाप-कर्म-पिशुने नाद्यापि सन्तुष्यसि॥॥ वैराग्यशतकम् २ ॥ |
| भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किश्चित् फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला । भुक्तं मानविवर्जितं परगृहे आशङ्कया काकवत् तृष्णे जृम्भणि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥ पुरुषार्थोपदेशः-14॥ |
| भ्रान्तः कष्टमहो गतस्स नृपतिः सामन्तचक्रं च तत् पार्श्वे तस्य च या विदग्धपरिषत् ताश्चन्द्रबिम्बाननाः । उद्रिक्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः सर्वं यस्य वशात् स्मृतेः पथमगात् कालाय तस्मै नमः ॥ पुरुषार्थोपदेशः-60॥ |
| भ्रान्तापह्नुतिरन्यस्य शङ्कया तथ्यनिर्णये । शरीरं तव सोत्कम्पं ज्वरः किं न सखि स्मरः ॥ चन्द्रालोकः ५.२६ ॥ |

| |
|---|
| भ्रुवौ दलाभ्यां प्रणवस्य यस्यास्तद्बिन्दुना भालतमालपत्त्रम् । तदर्धचन्द्रेण विधिर्विपञ्ची निक्वाणनाकोणधनुः प्रणिन्ये ॥ नैषधीयचरितम् १०.८६ ॥ |
| भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते कार्कश्यं गमितेऽपि चेतसि तनूरोमाञ्चमालम्बते । रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥ अमरुशतकम्-२४॥ |
| भ्रूभेद मात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार । तस्याविलाम्भःपरिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ॥ रघुवंशम् १३.३६ ॥ |
| भ्रूभेदो रचितः चिरं नयनयोरभ्यस्तमामीलनं रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः । धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथञ्चिन् मया बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवस्थिता ॥ अमरुशतकम्-९२॥ |
| भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः । निजां यदप्लोषदशामपेक्ष्य संप्रत्यनेनाधिकवीर्यतार्जि ॥ नैषधीयचरितम् ७.२५ ॥ |
| भ्रूवल्लिवेल्लितमथाकृतिभङ्गिमेषा लिङ्गं चकार तदनादरणस्य विज्ञा । राज्ञोऽपि तस्य तदलाभजतापवह्निशिखनीबभूव मलिनच्छविभूमधूमः ॥ नैषधीयचरितम् ११.३३ ॥ |
| भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानां । आददे मृदुविलोकपलाशैरुत्पलैश्चषकवीचिषु कम्पः ॥ किरातार्जुनीयम् ९.५६ ॥ |
| भ्रूश्चित्रलेखा च तिलोत्तमास्या नासा च रम्भा च यदूरुसृष्टिः । दृष्टा ततः पूरयतीयमेकानेकाप्सरःप्रेक्षणकौतुकानि ॥ नैषधीयचरितम् ७.९२ ॥ |
| मखमाक्षितुं क्षितिपतेरुपेयुषां परितः प्रकल्पितनिकेतनं बहिः । उपरुध्यमानमिव भूभृतां बलैः पुटभेदनं दनुसुतारिरैक्षत ॥ शिशुपालवधम् १३.२६ ॥ |
| मखविघ्नाय सकलमित्थमुत्थाप्य राजकम् । हन्त जातमजातारेः प्रथमेन त्वयारिणा ॥ शिशुपालवधम्  २.१०२ ॥ |
| मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे । अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥ रघुवंशम् ३.४४ ॥ |
| मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः । चिरेण तन्मध्यममुञ्चतास्य दृष्टिः कृशीय स्खलनाद्भिया नु ॥ नैषधीयचरितम् ७.५ ॥ |
| मग्नां द्विषच्छद्मनि पङ्कभूते सम्भवानां भूतिमिवोद्धरिष्यन् । आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशं उन्मनीभूः ॥ किरातार्जुनीयम् ३.३९ ॥ |
| मघाकरस्वातिमैत्रमूलश्रुत्यम्बुपान्त्यभम् । याम्यब्राह्मेशसार्पञ्च मेषादेर्घातभं न सत् ॥ मुहूर्त.यात्राप्रकरणम् ३२॥ |
| मघादिपञ्चपादेषु गुरुः सर्वत्र निन्दितः । गङ्गागोदान्तरं हित्वा शेषाङ्घ्रिषु न दोषकृत् ॥ मुहूर्तचिन्त.५० ॥ |
| मज्जत्वम्भसि यातु मेरुशिखरं शत्रुं जयत्वाहवे, वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षताम् । आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परम् नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ नीतिशतकम् १०१ ॥ |
| मणिः शाणोल्लीढः समरविजयी हेतिदलितो मदक्षीणो नागः शरदि सरिदाश्यानपुलिना । कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥ पुरुषार्थोपदेशः -8॥ |
| मणिः शाणोल्लीढः समरविजयी हेतिनिहितो मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः । कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता- तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥ नीतिशतकम्४४ ॥ |
| मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः । दधतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ किरातार्जुनीयम् ५.५ ॥ |
| मणीसनाभौ मुकुरस्य मण्डले बभौ निजास्यप्रतिबिम्बदर्शिनी । विधोरदूरं स्वमुखं विधाय सा निरूपयन्तीव विशेषमेतयोः ॥ नैषधीयचरितम् १५.५ ॥ |
| मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या । शब्दो महाराज इति प्रतीतस्तथैव तस्मिन्युयुजेऽर्भकेऽपि ॥ रघुवंशम् १८.४२ ॥ |
| मतः किमैरावतकुम्भकैतवप्रगल्भपीनस्तनदिग्धवस्तव । सहस्रनेत्रान्न पृथग्मते मम त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ॥ नैषधीयचरितम् ९.५२ ॥ |
| मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम् । अवेहि गन्धर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥ रघुवंशम् ५.५३ ॥ |
| मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् । सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ किरातार्जुनीयम् २.३३ ॥ |
| मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः । सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतसम्पदः ॥ किरातार्जुनीयम् २.५२ ॥ |
| मत्कुणाविव पुरा परिप्लवौ सिन्धुनाथशयने निषेदुषः । गच्छतः स्म मधुकैटभौ विभोर्यस्य नैद्रसुखविघ्नतां क्षणं ॥ शिशुपालवधम् १४.६८ ॥ |
| मत्तपः क्व न तनु क्व फलं वा यूयमीक्षणपथं व्रजथेति । ईदृशं परिणमन्ति पुनर्नः पूर्वपूरुषतपांसि जयन्ति ॥ नैषधीयचरितम् ५.९५ ॥ |
| मत्तेभकुम्भदलने भुवि सन्ति शूराः केचित् प्रचण्डमृगराजवधेऽपि दक्षाः । किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य कन्दर्पदर्पदमने विरला मनुष्याः ॥ पुरुषार्थोपदेशः-11॥ |
| मत्परं दुर्लभं मत्वा नूनमावर्जितं मया । पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥ रघुवंशम् १.६७ ॥ |
| मत्प्रीतिमाधित्ससि कां त्वदीक्षा मुदं मदक्ष्णोरपि यातिशेताम् । निजामृतैर्लोचनसेचनाद्वा पृथक्किमिन्दुः सृजति प्रजानाम् ॥ नैषधीयचरितम् ३.५८ ॥ |
| मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् । सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघैस्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ मेघदूतम्, उत्तरमेघः ८ ॥ |
| मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि । बभुः पिबन्तः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ॥ रघुवंशम् ७.४० ॥ |
| मदनतापभरेण विदीर्य नो यदुदपाति हृदा दमनस्वसुः । निबिडपीनकुचद्वययन्त्रणा तमपराधमधात्प्रतिबध्नती ॥ नैषधीयचरितम् ४.१ ॥ |

| |
|---|
| मदनमदनविकासस्पष्टधार्ष्ट्येदयानां रतिकलहविकीर्णैर्भूषणैरर्चितेषु । विदधति न गृहेषूत्फुल्लपुष्पोपहारं विफलविनययत्नाः कामिनीनां वयस्याः ॥ शिशुपालवधम् ११.३६ ॥ |
| मदनरसमहौघपूर्णनाभीह्रदपरिवाहितरोमराजयस्ताः । सरित इव सविभ्रमप्रयातप्रणदितहंसकभूषणा विरेजुः ॥ शिशुपालवधम् ७.२३ ॥ |
| मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे । वचनीयमिदं व्यवस्थितं रमण ! त्वामनुयामि यद्यपि ॥ कुमारसंभवम्४.२१ ॥ |
| मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषा । निशोऽपि सोमेतरकान्तशङ्कामोंकारमग्रेसरमस्य कुर्याः ॥ नैषधीयचरितम् ३.७५ ॥ |
| मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता । अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥ किरातार्जुनीयम् २.४९ ॥ |
| मदरुचिमरुणेनोद्गच्छता लम्भितस्य त्यजत इव चिराय स्थायिनीमाशु लज्जां । वसनमिव मुखस्य स्रंसते संप्रतीदं सितकरकरजालं वासवाशायुवत्याः ॥ शिशुपालवधम् ११.१६ ॥ |
| मदर्थसंदेशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते । विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये स कीदृग्भविता तव क्षणः ॥ नैषधीयचरितम् १.१३७ ॥ |
| मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयति स्वयं हतैः । लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ किरातार्जुनीयम् २.१८ ॥ |
| मदस्रुतिश्यामितगण्डलेखाः क्रामन्ति विक्रान्तनराधिरूढाः । सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपन्तः ॥ किरातार्जुनीयम् १६.२ ॥ |
| मदान्मदग्रे भवताथवा भिया परं दिगन्तादपि यात जीवत । इति स्म यो दिक्करिणः स्वकर्णयोर्विनैव वर्णस्रजमागतैर्गतैः ॥ नैषधीयचरितम् १६.३२ ॥ |
| मदाम्भसा परिगलितेन सप्तधा गजाञ्जनः शमितरजश्चयानधः । उपर्यवस्थितघनपांशुमण्डलानलोकयत्ततपटमण्डपानिव ॥ शिशुपालवधम् १७..६८ ॥ |
| मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे । अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिं ॥ रघुवंशम् ८.६८ ॥ |
| मदीयदेशोऽस्म्यहमेव भूपति, प्रसिद्धमेतद्वसुधातलेऽस्त्यलम् । कथं न लज्जाऽहह मां न बाधते, यदद्य देशो यवनैर्वशीकृतः ॥ प्रतापविजयः-९३॥ |
| मदुग्रतापव्ययशक्तशीकरः सुराः स वः केन पपे कृपार्णवः । उदेति कोटिर्न मुदे मदुत्तमा किमाशु संकल्पकणश्रमेण वः ॥ नैषधीयचरितम् ९.९५ ॥ |
| मदेकपुत्राजननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी । गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि न ॥ नैषधीयचरितम् १.१३५ ॥ |
| मदोत्कटो मानि- महत्त्व-मर्दनः, समुष्टिबन्धो जनमारण-व्रती । मुहूर्तमात्रस्य कृते महीङ्गतो, महाङ्गधारी किमयं महार्जुनः॥ प्रतापविजयः-११९ ॥ |
| मदोत्कटो मानि- महत्त्व-मर्दनः, समुष्टिबन्धो जनमारण-व्रती मुहूर्तमात्रस्य कृते महीङ्गतो, महाङ्गधारी किमयं महार्जुनः ॥ प्रतापविजयः- ११९ ॥ |
| मद्यमन्दविगलत्त्रपमीषच्चक्षुरुन्मिषितपक्ष्म दधत्या । वीक्ष्यते स्म शनकैर्नववध्वा कामिनोमुखमधोमुखयैव ॥ शिशुपालवधम् १०.१७ ॥ |
| मद्विप्रलभ्यं पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः । अशक्यशङ्काव्यभिचारहेतुर्वाणी न वेदा यदि सन्तु के तु ॥ नैषधीयचरितम् ३.७८ ॥ |
| मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः । शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥ कुमारसंभवम् ३.३६॥ |
| मधुकरविटपानमितास्तरुपङ्क्तीर्बिभ्रतःऽस्य विटपानमिताः । परिपाकपिशङ्गलतारजसा रोधश्चकास्ति कपिशं गलता ॥ शिशुपालवधम् ४.४८॥ |
| मधुकरैरपवादकरैरिव स्मृतिभुवः पथिकाः हरिणा इव । कलतया वचसः परिवादिनीस्वरजिता वशमाययुः ॥ शिशुपालवधम् ६.९ ॥ |
| मधुमथनवधूरिवाह्वयन्ति भ्रमरकुलानि जगुर्यदुत्सुकानि । तदभिनयमिवावलिर्वनानामतनुत नूतनपल्लवाङ्गुलीभिः ॥ शिशुपालवधम् ७.२५ ॥ |
| मधुरं बहिरन्तरप्रियं कृतिनावाचि वचस्तथा त्वया । सकलार्थतया विभाव्यते प्रियमन्तर्बहिरप्रियं यथा ॥ शिशुपालवधम् १६.१७ ॥ |
| मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया । मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥ शिशुपालवधम् ६.२० ॥ |
| मधुरान्नतभ्रू ललितं च दृशोः सकरप्रयोगचतुरं च वचः । प्रकृति स्थमेव निपुणागमितं स्फुचनृत्तलीलमभवत्सुतनोः ॥ शिशुपालवधम् ९.७९ ॥ |
| मधुरायां समाक्रान्ता वर्गस्थाः पञ्चमैर्निजैः । लकारश्च लसंयुक्तो ह्रस्वव्यवहितौ रणौ ॥ चन्द्रालोकः६.२३ ॥ |
| मधुरैरपि भूयसा स मेध्यैः प्रथमं प्रत्युत वारिभिर्दिदीपे । पवमानसखस्ततः क्रमेण प्रणयक्रोध इवाशमद्विवादैः ॥ शिशुपालवधम् २०.७१ ॥ |
| मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः । परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ किरातार्जुनीयम् २.५५ ॥ |
| मधुश्च ते मन्मथ ! साहचर्यादसावनुक्तोऽपि सहाय एव । समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥ कुमारसंभवम् ३.२१॥ |
| मध्यं तनूकृत्य यदीदमीयं वेधा न दध्यात्कमनीयमंशम् । केन स्तनौ संप्रति यौवनेऽस्याः सृजेदनन्यप्रतिमाङ्गयष्टेः ॥ नैषधीयचरितम् ७.८२ ॥ |
| मध्यमोपलनिभे लसदंशावेकतश्च्युतिं उपेयुषि भानौ । द्यौरुवाह परिवृत्तिविलोलां हारयष्टिं इव वासरलक्ष्मीं ॥ किरातार्जुनीयम् ९.२ ॥ |
| मध्ये बद्धाणिमा यत्सगरिममहिमश्रोणिवक्षोजयुग्मा जाग्रच्चेतोवशित्वा स्मितधृतलघिमा मां प्रतीशित्वमेषि । सूक्तौ प्राकाम्यरम्या दिशि विदिशि यशोलब्धकामावसाया भूतीरष्टावपीशस्तददित मुदितः स्वस्य शिल्पाय तुभ्यम् ॥ नैषधीयचरितम् २१.१६ ॥ |
| मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः । ह्रियेव ताभ्यश्चलतीयमद्धा पथान्न सत्सङ्गगुणेन नद्धा ॥ नैषधीयचरितम् ३.६५ ॥ |
| मध्येसभं सावततार बाला गन्धर्वविद्याधरकण्ठनाला । त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्तितदृक्तरङ्गा ॥ नैषधीयचरितम् १०.७४ ॥ |
| मध्येसमुद्रं ककुभः पिशङ्गीर्या कुर्वती कांचनभूमिभासा । तुरङ्गकान्ताननहव्यवाहज्वालेव भित्त्वा जलमुल्ललास ॥ शिशुपालवधम् ३.३२ ॥ |
| मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः । तत्स्वप्नसंभोगवितीर्णदन्तदंशेन किं वा न मयापराद्धम् ॥ नैषधीयचरितम् ७.४ ॥ |
| मनःशिलाभङ्गनिभेन पश्चान्निरुध्यमानं निकरेण भासां । व्यूढैरुरोभिश्च विनुद्यमानं नभः ससर्पेव पुरः खगानां ॥ किरातार्जुनीयम् १६.४५ ॥ |

| |
|---|
| मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः । सहजेतरे जयशमौ दधती बिभरांबभूव युगपन्महसी ॥ किरातार्जुनीयम् ६.२२ ॥ |
| मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि मां । ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ॥ रघुवंशम् ८.५२ ॥ |
| मनसि वचसि काये पुण्यपीयूषपूर्णास् त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः। परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ पुरुषार्थोपदेशः-53॥ |
| मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः । परगुणपरमाणून्पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ नीतिशतकम्७९ ॥ |
| मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयान्तरुपेतयोः । ग्रहणशक्तिरभूदिदमीययोरपि न संमुखवास्तुनि वस्तुनि ॥ नैषधीयचरितम् ४.१२ ॥ |
| मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः । का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदलज्जा ॥ नैषधीयचरितम् ३.५९ ॥ |
| मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनाम् । मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्  ॥ नीतिसंग्रहस्य मित्र-१.१०२ ॥ |
| मनस्वि- मानोन्नत- मौलि-खण्डकः, स्वदीप्ति-सम्भासित-सर्वदिङ्मुखः । प्रतापहस्ते प्रतपन् प्रतापवान्, न कस्य कुन्तः कृतवान् प्रकम्पनम्॥ प्रतापविजयः-१२० ॥ |
| मनस्विनामुदितगुरुप्रतिश्रुतिः श्रुतस्तथा न निजमृदङ्गनिःस्वनः । यथा पुरःसमरसमुद्यतद्विषद्वलानकध्वनिरुदकर्षयन्मनः ॥ शिशुपालवधम् १७..४२ ॥ |
| मनस्वि-मानोत्रत- मौलि-खण्डकः, सर्वदिङ्मुखः । प्रतापहस्ते प्रतपन् प्रतापवान्, न कस्य कुन्तः कृतवान् प्रकम्पनम् ॥ प्रतापविजयः-१२० ॥ |
| मनस्वी मिर्यते कामं कार्पण्यं न तु गच्छति । अपि निर्वाणमायाति नानलो याति शीतताम्  ॥ नीतिसंग्रहस्य मित्र-१.१२५ ॥ |
| मनुष्यवाह्यं चतुरश्रयानमध्यास्य कन्या परिवारशोभि । विवेश मञ्चान्तरराजमार्गं पतिंवरा क्ꣷप्तविवाहवेषा ॥ रघुवंशम् ६.१० ॥ |
| मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम् । यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ॥ कुमारसंभवम् ३.५० ॥ |
| मनो-१४ र्द्विद्वैवानिलसौम्यशाक्रभे कुपक्षतः २१ शैवकरेऽष्टितो-१६ जभे । युगाश्वितो २४ बुध्न्यभतोययाम्यभे खचन्द्रतो १० मित्रभवासवश्रुतौ ॥ मुहूर्त.विवाहप्रकरणम् ५०॥ |
| मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः । षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥ रघुवंशम् १.३९ ॥ |
| मनोज-मूर्च्छन्मदिरामदालसाः, मनोज्ञ- 'हाला'- रसपानलालसाः । पठन्तु वा नैव पठन्तु का क्षतिः वृथैव तैषां न विधीयते नतिः ॥ प्रतापविजयः-२५॥ |
| मनोज्ञगन्धं सहकारभङ्गं पुराणसीधुं नवपाटलं च । संबध्नता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः ॥ रघुवंशम् १६.५२ ॥ |
| मनोभुवस्ते भविनां मनः पिता निमज्जयन्नेनसि तन्न लज्जसे । अमुद्रि सत्पुत्रकथा त्वयेति सा स्थिता सती मन्मथनिन्दिनी धिया ॥ नैषधीयचरितम् ९.१३८ ॥ |
| मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति । अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् ॥ नैषधीयचरितम् १.३९ ॥ |
| मनोरमं प्रापितमन्तरं भ्रुवोरलंकृतं केसररेणुणाणुना । अलक्तताम्राधरपल्लवश्रिया समानयन्तीमिव बन्धुजीवकम् ॥ किरातार्जुनीयम् ४.७ ॥ |
| मनोहरैः प्रकृतिमनोरमाकृतिर्भियप्रदैः समितिषु भीमदर्शनः । सदैवतैः सततमथानपायिभिर्निजाङ्गवन्मुरजिदसेव्यतायुधैः ॥ शिशुपालवधम् १७..२६ ॥ |
| मन्त्रैः पुरं भीमपुरोहितस्य तद्बद्धरक्षं विशति क्व रक्षः । तत्रोद्यमं दिक्पतिराततान यातुं ततो जातु न यातुधानः ॥ नैषधीयचरितम् १०.११ ॥ |
| मन्था नगः स भुजगप्रभुवेष्टघृष्टिलेखावलद्धवलनिर्झरवारिधारः । त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेषशेषाङ्गवेष्टिततनुभ्रममातनोतु ॥ नैषधीयचरितम् ११.६२ ॥ |
| मन्थादिव क्षुभ्यति गाङ्गमम्भो व्याप्तं च देवर्षिभिरन्तरिक्षम् । आश्चर्यमार्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुपैति ॥ (उत्तररामचरितम् ७.१७) |
| मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगन्धः । गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥ मेघदूतम्, पूर्वमेघः ९॥ |
| मन्दं मुद्रितपांशवः परिपतज्झङ्कारझञ्झामरुद् वेगध्वस्तकुटीरकान्तरगतच्छिद्रेषु लब्धान्तराः । कर्मव्यग्रकुटुम्बिनीकुचतटस्वेदच्छिदः प्रावृषः प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोबिन्दवः ॥ अमरुशतकम्-४८॥ |
| मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् । प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥ रघुवंशम् १.३ ॥ |
| मन्दमस्यन्निषुलतां घृणया मुनिरेष वः । प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥ किरातार्जुनीयम् १५.१३ ॥ |
| मन्दाकिनीनन्दनयोर्विहारे देवे धवे देवरि माधवे वा । श्रेयः श्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि भावयस्व ॥ नैषधीयचरितम् ६.८३ ॥ |
| मन्दाक्षनिस्पन्दतनोर्मनोभूदुष्प्रेरमप्यानयति स्म तस्याः । मधूकमालामधुरं करं सा कण्ठोपकण्ठं वसुधासुधांशोः ॥ नैषधीयचरितम् १४.४७ ॥ |
| मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः । तच्छंसिते किंचन संशयालुर्गिरा मुखाम्भोजमयं युयोज ॥ नैषधीयचरितम् ३.६१ ॥ |
| मन्दोत्कण्टः कृतास्तेन गुणाधिकतया गुरौ । फलेन सहकारस्य फुष्पोद्गम इव प्रजाः ॥ रघुवंशम् ४.९ ॥ |
| मन्द्रैगजानां रथमण्डलस्वनैर्निजुहनुवे तादृशमेव बृंहितं । तारैर्बभूवे परभागलाभतः परिस्फुटैस्तेषु तुरङ्गहेषितैः ॥ शिशुपालवधम् १२.१५ ॥ |
| मन्मथाय यदथादित राज्ञां हृतिदूत्यविधये विधिराज्ञाम् । तेन तत्परवशाः पृथिवीशः संगरं गरमिवाकलयन्ति ॥ नैषधीयचरितम् ५.३१ ॥ |
| मन्यसे रिवधः श्रेयान् प्रीतये नाकिनामिति । पुरोडाशभुजामिष्टमिष्टं कर्तुमलन्तराम् ॥ शिशुपालवधम्  २.१०६ ॥ |
| मन्ये न ते प्रभवितास्मि निबद्धवेणी श्रेणीभरे विकच- कोकनदः कदापि । किन्तेन मञ्जुतम मञ्जिमनूपुरेऽपि, प्राप्स्यामि किन्नहि पदं कलशिञ्चितानाम् ॥ प्रतापविजयः-१२ ॥ |

| |
|---|
| मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण । एकाकिपाशं वरुणं विजिग्येऽनङ्गीकृतायासतती रतीशः ॥ नैषधीयचरितम् ७.६४ ॥ |
| मन्वाद्यास्त्रितिथी मधौ तिथिरवी ऊर्जे शुचौ दिक्तिथी ज्येष्ठेऽन्त्ये च तिथिस्त्विषे नव तपस्यश्वाः सहस्ये शिवाः । भाद्रेऽग्निश्च सिते त्वमाष्ट नभसः कृष्णे युगाद्याः सिते गोऽग्नी बाहुलराधयोर्मदनदशौ भाद्रमाघासिते ॥ मुहूर्तचिन्त.५७॥ |
| मम त्वदच्छाङ्घ्रिनखामृतद्युतेः किरीटमाणिक्यमयूखमञ्जरी । उपासनामस्य करोतु रोहिणी त्यज त्यजाकारणरोषणे रुषम् ॥ नैषधीयचरितम् ९.१०७ ॥ |
| मम मदनमनङ्गं मन्मथं वर्धयन्ती निशि च शयनके मम निद्रामाक्षिपन्ती। प्रसरसि भयभीता प्रस्खलन्ती स्खलन्ती मम वशमनुयाता रावणस्येव कुन्ती॥ (मृच्छकटिकम् १.२१) |
| मम रूपकीर्तिमहरद्भुवि यस्तदनु प्रविष्टहृदयेयमिति । त्वयि मत्सरादिव निरस्तदयः सुतरां क्षिणोति खलु तां मदनः ॥ शिशुपालवधम् ९.६३ ॥ |
| मम श्रमश्चेतनयानया फली बलीयसालोपि च सैव वेधसा । न वस्तु दैवस्वरसाद्विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः ॥ नैषधीयचरितम् ९.१२६ ॥ |
| ममादरीदं विदरीतुमान्तरं तदर्थिकल्पद्रुम किंचिदर्थये । भिदां हृदि द्वारमवाप्य मा स मे हतासुभिः प्राणसमः समं गमः ॥ नैषधीयचरितम् ९.१ ॥ |
| ममानुमैवं बहुकालनीलीनिपातनीलः खलु हेमशैलः । इन्दोर्जगच्छायमये प्रतीके पीतोऽपि भागः प्रतिबिम्बितः स्यात् ॥ नैषधीयचरितम् २२.९४ ॥ |
| ममापि किं नो दयसे दयाघन त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः । निमज्जयन्संतमसे पराशयं विधिस्तु वाच्यः क्व तवागसः कथा ॥ नैषधीयचरितम् ९.९८ ॥ |
| ममाशयः स्वप्नदशाज्ञयापि वा नलं विलङ्घ्येतरमस्पृशद्यदि । कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ॥ नैषधीयचरितम् ९.३२ ॥ |
| ममासनार्धे भव मण्डनं न न प्रिये मदुत्सङ्गविभूषणं भव । अहं भ्रमादालपमङ्ग मृष्यतां विना ममोरः कतमत्त्वासनम् ॥ नैषधीयचरितम् ९.११४ ॥ |
| ममैव पाणौकरणेऽग्निसाक्षिकं प्रसङ्गसंपादितमङ्ग संगतम् । न हा सहाधीतिधृतः स्पृहा कथं तवार्यपुत्रीयमजर्यमर्जितुम् ॥ नैषधीयचरितम् ९.६८ ॥ |
| ममैव वाहर्दिनमश्रुदुर्दिनैः प्रसह्य वर्षासु ऋतौ प्रसञ्जिते । कथं नु शृण्वन्तु सुषुप्य देवता भवत्वरण्येरुदितं न मे गिरः ॥ नैषधीयचरितम् ९.९६ ॥ |
| ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि विपद्यते यदि । तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥ नैषधीयचरितम् १.१४ ॥ |
| ममौ पुरः क्षणमिव पश्यतो महत्तनूदरस्थितभुवनत्रयस्य तत् । विशालतां दधति नितान्तमायते बलं द्विषां मधुमथनस्य चक्षुषि ॥ शिशुपालवधम् १७..४७ ॥ |
| मयाङ्ग पृष्टः कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान् । न मह्यमत्रोत्तरधारयस्य किं ह्रियेऽपि सेयं भवतोऽधमर्णता ॥ नैषधीयचरितम् ९.३ ॥ |
| मयापि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्णसुधामकुर्वते । परेण पुंसा हि ममापि संकथा कुलाबलाचारसहासनासहा ॥ नैषधीयचरितम् ९.१६ ॥ |
| मयि तस्य सुवृत्त वर्तते लघुसंदेशपदा सरस्वती । शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ॥ रघुवंशम् ८.७७ ॥ |
| मयि स्थितिर्नम्रतयैव लभ्यते दिगेव तु स्तब्धतया विलङ्घ्यते । इतीव चापं दधदाशुगं क्षिपन्नयं नयं सम्यगुपादिशद्द्विषाम् ॥ नैषधीयचरितम् १२.३४ ॥ |
| मयेन भीमं भगवन्तमर्चता नृपेति पूजा प्रभुनाम्नि या कृता । अदत्त भीमोऽपि स नैषधाय तां हरिन्मणेर्भोजनभाजनम् महत् ॥ नैषधीयचरितम् १६.२९ ॥ |
| मयैव संबोध्य नलं व्यलापि यत्स्वमाह मद्बुद्धमिदं विमृश्य तत् । असाविति भ्रान्तिमसाद्दमस्वसुः स्वभाषितस्वोद्भ्रमविभ्रमक्रमः ॥ नैषधीयचरितम् ९.१४ ॥ |
| मरकतमयमेदिनीषु भानो- स्तरुविटपान्तरपातिनो मयूखाः । अवनतशितिकण्ठकण्ठलक्ष्मी-मिह दधति श्फुरिताणुरेणुजालाः ॥ शिशुपालवधम् ४.५६॥ |
| मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः । क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ ॥ रघुवंशम् ८.८७ ॥ |
| मरुतः शिवा नवतृणा जगती विमलं नभो रजसि वृष्टिरपां । गुणसम्पदानुगुणतां गमितः कुरुतेऽस्य भक्तिमिव भूतगणः ॥ किरातार्जुनीयम् ६.३३ ॥ |
| मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम् । अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥ रघुवंशम् २.१० ॥ |
| मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्छलच्चन्दनसारसौरभम् । स वारनारीकुचसंचितोपमं ददर्श मालूरफलं पचेलिमम् ॥ नैषधीयचरितम् १.९४ ॥ |
| मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा । दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥ नीतिसंग्रहस्य मित्र-१.११ ॥ |
| मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते । शक्यस्तेनानुमानेन परोऽपि परिरक्षितुम् ॥ नीतिसंग्रहस्य मित्र-१.६८ ॥ |
| मर्त्यदुष्प्रचरमस्त्रविचारं चारुशिष्यजनतामनुशिष्य । स्वेदबिन्दुकितगोधिरधीरं स श्वसन्नभवदाप्लवनेच्छुः ॥ नैषधीयचरितम् २१.६ ॥ |
| मर्त्यमात्रमवदीधरद्भवान्मैनमानमितदैत्यदानवं । अंश एष जनतातिवर्तिनो वेधसः प्रतिजनं कृतस्थितेः ॥ शिशुपालवधम् १४.५९ ॥ |
| मर्त्यलोकदुरवापमवाप्तरसोदयं नूतनत्वमतिरिक्ततयानुपदं दधत् । श्रीपतिः पतिरसाववनेश्च परस्परं सङ्कथामृतमनेकमसिस्वदतामगुभौ ॥ शिशुपालवधम् १३.६९ ॥ |
| मर्त्यलोकमदनः सदशत्वं बिभ्रदभ्रविशदद्युतितारम् । अम्बरं परिदधे विधुमौलेः स्पर्धयेव दशदिग्वसनस्य ॥ नैषधीयचरितम् २१.१४ ॥ |
| मर्मरैरगुरुधूपगन्धिभिर्व्यक्तहेमर्शनैस्तमेकतः । जहुराग्रथनमोक्षलोलुपं हैमनैर्निव्सनैः सुमध्यमाः ॥ रघुवंशम् १९.४१ ॥ |
| मलयमरुतां व्राता याता विकासितमल्लिका परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि । घन घटयितुं निस्नेहं त्वां य एव निवर्तने प्रभवति गवां किन्नश्छिन्नं स एव धनञ्जयः ॥ अमरुशतकम्-८४॥ |
| मलिनं रणरेणुभिर्मुहुर्द्विषतां क्षालितमङ्गनाश्रुभिः । नृपमौलिमरीचिवर्णकैरथ यस्याङ्घियुगं विलिप्यते ॥ शिशुपालवधम् १६.६२ ॥ |

| |
|---|
| मल्लिकाकुसुमदण्डभकेन स भ्रामीवलयितेन कृते तम् । आसने निहितमैक्षत साक्षात्कुण्डलीन्द्रतनुकुण्डलभाजम् ॥ नैषधीयचरितम् २१.४३ ॥ |
| महतः कुकुरान्धकद्रुमानतिमात्रं दववद्दहन्नपि । अतिचित्रमिदं महीपतिर्यदकृष्णामवनीं करिष्यति ॥ शिशुपालवधम् १६.७९ ॥ |
| महतः प्रणतेष्विव प्रसादः स मणेरंशुचयः ककुंमुखेषु । व्यकसद्विकसद्विलोचनेभ्यो दददालोकमनाविलं बलेभ्यः ॥ शिशुपालवधम् २०.३८ ॥ |
| महतस्तरसा विलङ्घयन्निजदोषेण कुधीर्विनश्यति । कुरुते न खलु स्वयेच्छया शलभानिन्धनमिद्धदीधितिः ॥ शिशुपालवधम् १६.३५ ॥ |
| महताप्यर्थसारेण यो विश्वसिति शत्रुषु । भार्यासु च विरक्तासु तदन्तं तस्य जीवनम् ॥ नीतिसंग्रहस्य मित्र-१.९२ ॥ |
| महते फलाय तदवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः । न जगाम विस्मयवशं वशिनां न निहन्ति धैर्यमनुभावगुणः ॥ किरातार्जुनीयम् ६.२८ ॥ |
| महत्त्वयोगाय महामहिम्नामाराधनीं तां नृप देवतानाम् । दातुं प्रदानोचित भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् ॥ किरातार्जुनीयम् ३.२३ ॥ |
| महाजनाचारपरम्परेदृशी स्वनाम नामाददते न साधवः । अतोऽभिधातुं न तदुत्सहे पुनर्जनः किलाचारमुचं विगायति ॥ नैषधीयचरितम् ९.१३ ॥ |
| महात्मानो नुगृह्णन्ति भजमानान् रिपूनपि । सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥ शिशुपालवधम् २.१०४ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । अनेनासावाद्यः सुकविजयदेवेन रचिते चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ चन्द्रालोकः १.१६ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । चतुर्थः सैकोयं सुकविजयदेवेन रचिते चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ चन्द्रालोकः ५.१२६ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । चतुर्थस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ चन्द्रालोकः४.१३ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । तृतीयस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ चन्द्रालोकः३.१२ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैक-चतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । द्वितीयस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ चन्द्रालोकः२.४५ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । मयूखस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके महति ऋतुसङ्ख्यः सुखयतु ॥ चन्द्रालोकः६.२९ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । मयूखस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके महति दशसङ्ख्यः सुखयतु ॥ चन्द्रालोकः १०.७ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । मयूखस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके महति नवसङ्ख्यः सुखयतु ॥ चन्द्रालोकः९.१७ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । मयूखस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके महति मुनिसङ्ख्यः सुखयतु ॥ चन्द्रालोकः७.१८ ॥ |
| महादेवः सत्रप्रमुखमखविद्यैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ । मयूखस्तेनासौ सुकविजयदेवेन रचिते चिरं चन्द्रालोके महति वसुसङ्ख्यः सुखयतु ॥ चन्द्रालोकः८.११ ॥ |
| महादेवो देवः सरिदपि च सैषा सुरसरिद्गुहा एवागारं वसनमपि ता एव हरितः । सुहृदा कालोऽयं व्रतमिदमदैन्यव्रतमिदं कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता ॥ वैराग्यशतकम् ८५ ॥ |
| महानटः किं नु सभानुरागे संध्याय संध्यां कुनटीमपीशाम् । तनोति तन्वावियतापि तारश्रेणिस्रजा सांप्रतमङ्ग हारम् ॥ नैषधीयचरितम् २२.७ ॥ |
| महानले भिन्नसिताभ्रपातिभिः समेत्य सद्यः कथनेन फेनतां । व्रजद्भिरार्द्रेन्धनवत्परिक्षयं जलैर्वितेने दिवि धूमसंततिः ॥ किरातार्जुनीयम् १६.५७ ॥ |
| महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे । श्रितोदयाद्रेरभिसायकमुच्चकै रचूचुरच्चन्द्रमसो भिरामताम् ॥ शिशुपालवधम् १.१६ ॥ |
| महारथस्याध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशः सितम् । रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः ॥ नैषधीयचरितम् १.६१ ॥ |
| महारथानां प्रतिदन्त्यनीकमधिस्यदस्यन्दनमुत्थितानां । आमूललूनैरतिमन्युनेव मातङ्गहस्तैर्व्रियते न पन्थाः ॥ किरातार्जुनीयम् १६.१४ ॥ |
| महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते । अशेत सा बाहुलतोपधायिनी निषेदुपी स्थण्डिल एव केवले ॥ कुमारसंभवम् ५.१२ ॥ |
| महार्हसिंहासनसंस्थितोऽसौ सरत्नमर्घ्यं मधुपर्कमिश्रम् । भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः ॥ रघुवंशम् ७.१८ ॥ |
| महाशय्या पृथ्वी विपुलमुपधानं भुजलतां वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः । शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितः सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ वैराग्यशतकम् ९४ ॥ |
| महास्त्रदुर्गे शिथिलप्रयत्नं दिग्वारणेनेव परेण रुग्णे । भुजङ्गपाशान्भुजवीर्यशाली प्रबन्धनाय प्रजिघाय जिष्णुः ॥ किरातार्जुनीयम् १६.३६ ॥ |
| महिमानं यदुत्कीर्त्य तव संह्रियते वचः । श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ रघुवंशम् १०.३३ ॥ |
| महिम्नामेतस्मिन्विनयशिशिरो मौग्ध्यमसृणो विदिग्धैर्निर्ग्राह्यो न पुरविदग्धैरतिशयः । मनो मे संमोहस्थिरमपि हरत्येष बलवानयोधातुं यद्वत्परिलघुरयस्कान्तशकलः ॥<br><br>(उत्तररामचरितम् ४.२१) |
| मही कृतार्था यदि मानवोऽसि जितं दिवा यद्यमरेषु कोऽपि । कुलं त्वयालंकृतमौरगं चेन्नाधोऽपि कस्योपरि नागलोकः ॥ नैषधीयचरितम् ८.४४ ॥ |

| |
|---|
| महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेऽर्पितात्मा । तस्मात्सयोगादधिगम्य योगमजन्मनेऽकल्पत जन्मभीरुः ॥ रघुवंशम् १८.३३ ॥ |
| महीपतेरेकदिने पुरात् पुरे यदा भवेतां गमनप्रवेशकौ । भवारशूलप्रतिशुक्रयोगिनीविचारयेन्नैव कदापि पण्डितः ॥ मुहूर्त.यात्राप्रकरणम् ८०॥ |
| महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन । नावर्तमाना निनदन्ति भीमं अपां निधेराप इव ध्वजिन्यः ॥ किरातार्जुनीयम् १६.१३ ॥ |
| महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः । महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥ किरातार्जुनीयम् १.२० ॥ |
| महीभ्रतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया । द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥ नैषधीयचरितम् १.२६ ॥ |
| महीमघोनां मदनान्धतातमीतमःपटारम्भणतन्तुसंततिः । अबन्धि तन्मूर्धजपाशमञ्जरी कयापि धूपग्रहधूमकोमला ॥ नैषधीयचरितम् १५.२९ ॥ |
| महीमहेन्द्रः खलु नैषधेन्दुस्तद्बोधनीयः कथमित्थमेव । प्रयोजनं सांशयिकं प्रतीद्दक्पृथग्जनेनेव स मद्विधेन ॥ नैषधीयचरितम् ३.७१ ॥ |
| महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम् । प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत् ॥ नैषधीयचरितम् १.११९ ॥ |
| महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य च । नलेन मेने सलिले निलीनयोस्त्विषं विमुञ्चन्विधुकालकूटयोः ॥ नैषधीयचरितम् १.११३ ॥ |
| महीयसा महति दिगन्तदन्तिनामनीकजे रजसि मुखानुषङ्गिणि । विसारितामजिहत कोकिलावलीमलीमसा जलदमदाम्बुराजयः ॥ शिशुपालवधम् १७..५७ ॥ |
| महीशय्या शय्या विततमुपधानं भुजलता वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः। स्फुरचन्द्रो दीपो विरतिवनितासमुदितः सुखं शेते शान्तः तनुविभवभूमिर्नृप इव ॥ पुरुषार्थोपदेशः-96॥ |
| महेन्द्रदूत्यादि समस्तमात्मनस्ततः स विस्मृत्य मनोरथस्थितैः । क्रियाः प्रियाया ललितैः करम्बिता वितर्कयन्नित्थमलीकमालपत् ॥ नैषधीयचरितम् ९.१०२ ॥ |
| महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकि लीलः । चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्त्रलेखाः ॥ रघुवंशम् ६.७२ ॥ |
| महेन्द्रमुच्चैःश्रवसा प्रतार्य यन्निजेन पत्याऽकृत सिन्धुरन्वितम् । स तद्ददेऽस्मै हयरत्नमर्पितं पुराऽनुबन्धुं वरुणेन बन्धुताम् ॥ नैषधीयचरितम् १६.२५ ॥ |
| महेन्द्रहेतेरपि रक्षणं भयादयदर्थिसाधारणमस्त्रभृद्व्रतम् । प्रसूनबाणादपि मामरक्षतः क्षतं तदुच्चैरवकीर्णिनस्तव ॥ नैषधीयचरितम् ९.१५ ॥ |
| महेश्वरे वा जगतामधीश्वरे जनार्दने वा जगदन्तरात्मनि । न वस्तु-भेद-प्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दु-शेखरे ॥ वैराग्यशतकम् ८४ ॥ |
| महेषुजलधौ शत्रोर्वर्तमाना दुरुत्तरे । प्राप्य पारमिवेशानमाशश्वास पताकिनी ॥ किरातार्जुनीयम् १५.३२ ॥ |
| महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव । रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गाम्भीर्यमनोहरं वपुः ॥ रघुवंशम् ३.३२ ॥ |
| महोच्चलद्वारणवैरि-वारणाः!, कथं नु यूयं किल शान्त-मानसाः । पतङ्गवद् वह्निमुखं विविक्षवो, न यावदेते यवना दहन्त्यलम् ॥ प्रतापविजयः-९५॥ |
| महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः । न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ किरातार्जुनीयम् १.१८ ॥ |
| मा कातराः ! स्पृशत मां प्रियपारतन्त्र्याः ! अद्यापि यत्र विहिता जननी स्वतन्त्रा । यत्रेदमेव गदतीव ततिस्तरूणां, शाखाकदम्ब - कृत - मर्मरमातनोति ॥ प्रतापविजयः-१५७ ॥ |
| मा गमन्मदविमूढधियो नः प्रोज्झ्य रन्तुं इति शङ्कितनाथाः । योषितो न मदिरां भृशं ईषुः प्रेम पश्यति भयान्यपदेऽपि ॥ किरातार्जुनीयम् ९.७० ॥ |
| मा गाश्चिरायैकचरः प्रमादं वसन्नसम्बाधशिवेऽपि देशे । मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ किरातार्जुनीयम् ३.५३ ॥ |
| मा जानीत विदर्भजामविदुषीं कीर्तिं मुदः श्रोयसीं सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीम् । कः शच्या रचयांचकार चरिते काव्यं स नः कथ्यतामेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः ॥ नैषधीयचरितम् १५.९२ ॥ |
| मा धनानि कृपणः खलु जीवंस्तृष्णयार्पयतु जातु परस्मै । तत्र चैष कुरुते मम चित्रंयत्तु नार्पयति तानि मृतोऽपि ॥ नैषधीयचरितम् ५.८९ ॥ |
| मा पुनस्तमभिसीसरमागस्कारिणं मदविमोहितचित्ता । योषिदित्यभिलाष न हालां दुस्त्यजः खलु सुखादपि मानः ॥ शिशुपालवधम् १०.२१ ॥ |
| मा भूदाश्रमपीडेति परिमेयपुरःसरौ । अनुभावविशेषात्तु सेनापरिवृताविव ॥ रघुवंशम् १.३७ ॥ |
| मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः संतापे दिशतु शिवः शिवां प्रसक्तिं । रक्षन्तस्तपसि बलं च लोकपालाः कल्याणीं अधिकफलां क्रियां क्रियासुः ॥ किरातार्जुनीयम् ५.५० ॥ |
| मा विहासिष्ट समरं समरन्तव्यसंयतः । क्षतं क्षुण्णासुरगणैरगणैरिव किं यशः ॥ किरातार्जुनीयम् १५.८ ॥ |
| मां त्रिविक्रम पुनीहि पदे ते किं लगन्नजनि राहुरुपानत् । किं प्रदक्षिणनकृद्भ्रमिपाशं जाम्बवानदित ते बलिबन्धे ॥ नैषधीयचरितम् २१.९७ ॥ |
| मां वरिष्यति तदा यदि मत्तो वेद नेयमियदस्य महत्त्वम् । ईद्दशी च कथमाकलयित्री मद्विशेषमपरान्नृपपुत्री ॥ नैषधीयचरितम् ५.७ ॥ |
| मांसमूत्रपुरीषास्थिपूरितेऽत्र कलेवरे । विनश्वरे विहायास्थां यशः पालय मित्र मे  ॥ नीतिसंग्रहस्य मित्र-१.४७ ॥ |
| मांसव्यधोचितमुखैः शून्यतां दधदक्रियं । शकुन्तिभिः शत्रुबलं व्यापि तस्येषुभिर्नभः ॥ शिशुपालवधम् १९.११३ ॥ |
| माणिक्यमुक्ताफलविद्रुमाणि गारुत्मकं पुष्पकवज्रनीलम् । गोमेदवौदूर्यकमर्कतः स्यू रत्नान्यथो ज्ञस्य मुदे सुवर्णम् ॥ मुहूर्त.संक्रान्तिप्रकरणम्  १०॥ |
| मातङ्गनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य समुद्रफेनान् । कपोलसंसर्पितया य एषां व्रजन्ति कर्णक्षणचामरवम् ॥ रघुवंशम् १३.११ ॥ |
| मातङ्गानां दन्तसंघट्टजन्मा हेमच्छेदच्छायाचञ्चच्छिखाग्रः । लग्नोऽप्यग्निश्चामरेषु प्रकामं माञ्जिष्ठेषु व्यज्यते न स्म सैन्यैः ॥ शिशुपालवधम् १८.३४ ॥ |

| |
|---|
| मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल! भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः। य ष्मत्सङ्गवशोपजातसुकृतस्फारीभवन्निर्मल-ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ पुरुषार्थोपदेशः-101॥ |
| मातर्मेदिनि तात मारुति सखे तेजः सुबन्धो जल भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः । युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमा लीने परब्रह्मणि ॥ वैराग्यशतकम् १०० ॥ |
| मातर्लक्ष्मि भजस्व कञ्चिदपरं मत्काङ्क्षिणी मा स्म भूर्भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि । सद्यः स्यूतपलाशपत्रपुटिकापात्रैः पवित्रीकृतैर्भिक्षावस्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे ॥ वैराग्यशतकम् ९३ ॥ |
| मातर्लक्ष्मि! भजस्व कञ्चिदपरं मत्काङ्क्षिणी मा च भूर् भोगेभ्यः स्पृहयालवस्तव वशे का निःस्पृहाणामसि । सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते भिक्षासक्तुभिरेव सम्प्रति वयं वृत्ति समीहामहे ॥ पुरुषार्थोपदेशः-82॥ |
| माता मित्रं पिता चेति स्वभावात्त्रितयं हितम् । कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥ नीतिसंग्रहस्य मित्र-१.३८ ॥ |
| माता शत्रुः पिता वैरी येन बालो न पाठितः । न शोभते सभामध्ये हंसमध्ये बको यथा ॥ नीतिसंग्रहस्य मित्र-०.३७ ॥ |
| मातृवत्परदारेषु परद्रव्येषु लोष्ट्रवत् । आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥ नीतिसंग्रहस्य मित्र-१.१४ ॥ |
| मातृवर्गचरणस्पृषौ मुनेस्तौ प्रपद्य पदवीं महौजसः । रेजतुर्गतिवशात्प्रवर्तिनौ भास्करस्य मधुमाधवाविव ॥ रघुवंशम् ११.७ ॥ |
| मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं ब्रुवन्तु । सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥ पुरुषार्थोपदेशः-78॥ |
| माधुर्यं पुनरुक्तस्य वैचित्र्यं चारुतावहम् । वयस्य पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम् ॥ चन्द्रालोकः४.६ ॥ |
| माध्यंदिनादनु विधेर्वसुधासुधांशुरास्वादितामृतमयौदनमोदमानः । प्राञ्चं स चित्रमविदूरितवैजयन्तं वेश्माचलं निजरुचीभिरलंचकार ॥ नैषधीयचरितम् २१.१२१ ॥ |
| मानभङ्गपचटुना सुरतेच्छां तन्वता प्रथयता दृशि रागं । लेभिरे सपदि भावयतान्तर्योषितः प्रणयिनेव मदेन ॥ शिशुपालवधम् १०.२५ ॥ |
| मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् । मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥ किरातार्जुनीयम् ९.२६ ॥ |
| मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य मघोनी । खण्डितं निजमसूचयदुच्चैर्मानमाननसरोरुहनत्या ॥ नैषधीयचरितम् ५.४७ ॥ |
| माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि क्षीणे बन्धु-जने गते परिजने नष्टे शनैर्यौवने । युक्तं केवलमेतदेव सुधियां यज्जह्नु-कन्या-पयःपूताग्राव-गिरीन्द्र-कन्दर-तटी-कुञ्जे निवासः क्वचित् ॥ वैराग्यशतकम् ७८ ॥ |
| माने म्लायिनि, खण्डिते च वसुनि, व्यर्थे प्रयातेऽर्थिनि क्षीणे बन्धुजने, गते परिजने, नष्टे शनैर्यौवने । युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः पूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे निवासः क्वचित् ॥ पुरुषार्थोपदेशः-55॥ |
| मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः । गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥ रघुवंशम् २.४४ ॥ |
| माममीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम् । यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥ नैषधीयचरितम् ५.९ ॥ |
| मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर्लब्धायास्ते कथमपि सति स्वप्नसंदर्शनेषु पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास्तरुकिसलयेष्वसुलेशाः पतन्ति ॥ मेघदूतम्, उत्तरमेघः ४० ॥ |
| माया स्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यमुताहमन्यः । गाण्डीवमुक्ता हि यथा पुरा मे पराक्रमन्ते न शराः किराते ॥ किरातार्जुनीयम् १६.१८ ॥ |
| मायानलत्वं त्यजतो निलीनैः पूर्वैरहंपूर्विकया मघोनः । भीमोद्भवासात्त्विकभावशोभा दिदृक्षयेवाविरभावि नेत्रैः ॥ नैषधीयचरितम् १४.६१ ॥ |
| मायानलोदाहरणान्मिथस्तैरूचे समाः सन्त्यमुना कियन्तः । आत्मापकर्षे सति मत्सराणां द्विषः परस्पर्धनया समाधिः ॥ नैषधीयचरितम् १०.४३ ॥ |
| मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपम् सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् । खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य॥ मेघदूतम्, पूर्वमेघः १३॥ |
| मार्गणैरथ तव प्रयोजनं नाथसे किमु पतिं न भूभृतः । त्वद्विधं सुहृदं एत्य स अर्थिनं किं न यच्छति विजित्य मेदिनीं ॥ किरातार्जुनीयम् १३.५९ ॥ |
| मार्गैषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना । चकार रेवेव महाविरावा बद्धप्रतिश्रुन्ति गुहामुखानि ॥ रघुवंशम् १६.३१ ॥ |
| मार्जारो महिषो मेषः काकः कापुरुषस्तथा । विश्वासात्प्रभवन्त्येते विश्वासस्तत्र नो हितः ॥ नीतिसंग्रहस्य मित्र-१.८८ ॥ |
| मार्तण्डे मृतपक्षगे हिमकरश्चेज्जीवपक्षे शुभा यात्रा स्याद्विपरीतगे क्षयकरी द्वौ जीवपक्षे शुभा । ग्रस्तर्क्षं मृतपक्षतः शुभकरं ग्रस्तात्तथा कर्तरी यायीन्दुः स्थितिमान् रविर्जयकरौ तौ द्वौ तयोर्जीवगौ ॥ मुहूर्त.यात्राप्रकरणम् १५॥ |
| माला परम्परा चैषां भूयसामनुकूलके । मनुष्ये भवतः क्वापि ह्यलङ्काराङ्गतां गते ॥ चन्द्रालोकः ५.१२१ ॥ |
| मावापदुन्निद्रसरोजपूजा श्रियं शशी पद्मनिमीलितेजाः । अक्षिद्वयेनैव निजाङ्करङ्कोरलंकृतस्तामयमेति मन्ये ॥ नैषधीयचरितम् २२.९५ ॥ |
| मासमेकं नरो याति द्वौ मासौ मृगशूकरौ । अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ नीतिसंग्रहस्य मित्र-१.१६० ॥ |

| |
|---|
| मासेश्वराः सितकुजेज्यरवीन्दुसौरि चन्द्रात्मजास्तनुपचन्द्रदिवाकराः स्युः । स्त्रीणां विधोर्बलमुशन्ति विवाहगर्भ संस्कारयोरितरकर्मसु भर्तुरेव ॥ मुहूर्त.संस्कारप्रकरणम् ९॥ |
| माहेन्द्रं नगमभितः करेणुवर्याः पर्यन्तस्थितजलदा दिवः पतन्तः । सादृश्यं निलयननिष्प्रकम्पपक्षैराजग्मुर्जलनिधिशायिभिर्नगेन्द्रैः ॥ किरातार्जुनीयम् ७.२० ॥ |
| मित्त्रप्रियोपजननं प्रति हेतुरस्य संज्ञा श्रुतासुहृदयं न जनस्य कस्य । छायेदृगस्य च न कुत्रचिदध्यगायि तप्तं यमेन नियमेन तपोऽमुनैव ॥ नैषधीयचरितम् १३.१७ ॥ |
| मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः पात्रं यत्सुखदुःखयोः सममिदं पुण्यात्मना लभ्यते । ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलास् ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥ नीतिसंग्रहस्य मित्र-१.१९९ ॥ |
| मित्रकृत्यमपदिश्य पार्श्वतः प्रस्थितं तमनवस्थितं प्रियाः । विद्म हे शठ पलायनच्छलान्यञ्जसेति रुरुधुः कचग्रहैः ॥ रघुवंशम् १९.३१ ॥ |
| मित्रक्षिप्रचरध्रुवे रविशुभाहे लग्नवर्गे विदो जीवस्यापि तनौ गुरौ निगदिता धर्मक्रिया तद्बले ॥ मुहूर्त.नक्षत्रप्रकरणम् ३०॥ |
| मित्रमिष्टं उपकारि संशये मेदिनीपतिरयं तथा च ते । तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥ किरातार्जुनीयम् १३.५१ ॥ |
| मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च । अश्लीलानुपयुक्तांशपरित्यागेन दर्शितः ॥ नीतिसंग्रहस्य मित्र-०.6 ॥ |
| मित्रार्कध्रुववासवाम्बुपमघातोयान्त्यपुष्येन्दुभिः पापैर्हीनबलैस्तनौ सुरगुरौ ज्ञे वा भृगौ खे विधौ । आप्ये सर्वजलाशयस्य खननं व्यम्भोमघैः सेन्द्रभै- स्तैर्नृत्यं हिबुके शुभैस्तनुगृहे ज्ञेऽब्जे ज्ञराशौ शुभम् ॥ मुहूर्त.नक्षत्रप्रकरणम्  २५ ॥ |
| मित्रे चऽस्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीष्पते- र्मित्राण्यर्ककुजेन्दवो बुधसितौ शत्रू समः सूर्यजः । मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः ॥ मुहूर्त.विवाहप्रकरणम् २८॥ |
| मिथः पृथग्वाक्यपदैः संकीर्णं यत्तदेव तत् । वक्त्रेण भ्राजते रात्रिः कान्ता चन्द्रेण राजते ॥ चन्द्रालोकः२.२५ ॥ |
| मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ । अविधाय विवाहसत्क्रियामनयोर्गम्यत इव्यसांप्रतं ॥ रघुवंशम् ८.६१ ॥ |
| मिथुनकुम्भमृगाऽलिवृषाजगे मिथुनगेऽपि रवौ त्रिलवे शुचेः । अलिमृगाजगते करपीडनं भवति कार्तिकपौषमधुष्वपि ॥ मुहूर्त.विवाहप्रकरणम् १३॥ |
| मिश्रीभूते तत्र सैन्यद्वयेऽपि प्रायेणायं व्यक्तमासीद्विशेषः । आत्मीयास्ते ये पराञ्चः पुरस्तादभ्यावर्ती संमुखो यः परोऽसौ ॥ शिशुपालवधम् १८.१८ ॥ |
| मिहिरकिरणाभोगं भोक्तुं प्रवृत्ततया पुरः कलितचुलुकापोशानस्य ग्रहार्थमियं किमु । इति विकसितेनैकेन प्राग्दलेन सरोजिनी जनयति मतिं साक्षात्कर्तुर्जनस्य दिनोदये ॥ नैषधीयचरितम् १९.२८ ॥ |
| मीनोक्षकर्कालिमृगस्त्रियोऽष्टमं लग्नं यदा नाष्टमगेहदोषकृत् । अन्योन्यमित्रत्ववशेन सा वधूर्भवेत्सुतायुर्गृहसौख्यभागिनी ॥ मुहूर्त.विवाहप्रकरणम् ४७॥ |
| मीयतां कथमभीप्सितमेषां दीयतां कथमयाचितमेव । तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः ॥ नैषधीयचरितम् ५.८३ ॥ |
| मीलन्न शेकेऽभिमुखागताभ्यां धर्तुं निपीड्य स्तनसान्तराभ्याम् । स्वाङ्गान्यपेतो विजगौ स पश्चात्पुमङ्गसङ्गोत्पुलके पुनस्ते ॥ नैषधीयचरितम् ६.२१ ॥ |
| मीलितं बहुसादृश्याद्भेदवच्चेन्न लक्ष्यते । रसो नालक्षि लाक्षायाश्चरणे सहजारुणे ॥ चन्द्रालोकः ५.३३ ॥ |
| मुकुटांशुरञ्जितपरागमग्रतः स न यावदाप शिरसा महीतलं । क्षितिपेन तावदनपेक्षितक्रमं भुजपञ्जरेण रभसादगृह्यत ॥ शिशुपालवधम् १३.९ ॥ |
| मुकुलितमतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाद्वलस्थलीषु । अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः ॥ किरातार्जुनीयम् १०.२७ ॥ |
| मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रै- र्वापीष्वन्तर्लीनमहानीलदलासु । शस्त्रीश्यामैरंशुभिराशु द्रुतमम्भ- श्छायामच्छामृच्छति नीलीसलिलस्य ॥ शिशुपालवधम् ४.४४॥ |
| मुक्तमाप्य दमनस्य भगिन्या भूमिरात्मदयितं धृतरागा । अङ्गमङ्गमनुकं परिरेभे तं मृदो जलमृदूर्गृहयालुम् ॥ नैषधीयचरितम् २१.११ ॥ |
| मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि सम्भृतसान्द्रः । सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥ किरातार्जुनीयम् ९.५ ॥ |
| मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा । उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ रघुवंशम् १०.१३ ॥ |
| मुक्तानेकशरं प्रणानहरदभूयसां द्विषां । तदीयं धनुरन्यस्य न हि सेहे सजीवतां ॥ शिशुपालवधम् १९.१०१ ॥ |
| मुक्ताभिः सलिलरयास्तशुक्तिमुक्ताभिः कृतरुचि सैकतं नदीनाम् । स्त्रीलोकः परिकलयाञ्चकार तुल्यं पल्यङ्कैर्विगलितहारचारुभिः स्वैः ॥ शिशुपालवधम् ८.९ ॥ |
| मुक्तासृणानि परितः कचकं चरन्तस्त्रुट्याद्वितानतनिकाव्यतिषङ्गभाजः । सस्रुः सरोषपरिचारकवार्यमाणा दमाञ्चलस्खलितलोलपदं तुरङ्गाः ॥ शिशुपालवधम् ५.६१ ॥ |
| मुखं चन्द्रश्रियं धत्ते श्वेतश्मश्रुकराङ्कुरैः । अत्र हास्यरसोद्देशे ग्राम्यत्वं गुणतां गतम् ॥ चन्द्रालोकः२.४२ ॥ |
| मुखं प्रसन्नं विमला च दृष्टिः कथानुरागो मधुरा च वाणी । स्नेहोऽधिकः सम्भ्रमदर्शनं च सदानुरक्तस्य जनस्य लक्ष्म  ॥ नीतिसंग्रहस्य मित्र-१.११५ ॥ |
| मुखं यदस्मायि विभुज्य सुभ्रुवा ह्रियं यदालम्ब्य नतास्यमासितम् । अवादि वा यन्मृदु गद्गदं युवा तदेव जग्राह तदाप्तिलग्नकम् ॥ नैषधीयचरितम् १६.६१ ॥ |
| मुखकमलकमुन्नमय्य यूना यदभिनवोढवधूर्बलादचुम्बि । तदपि न किल बालपल्लवाग्रग्रहयापरया विविदे विदग्धसक्या ॥ शिशुपालवधम् ७.४४ ॥ |
| मुखपाणिपदाक्ष्णी पङ्कजै रचिताङ्गेष्वपरेषु चम्पकैः । स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम् ॥ नैषधीयचरितम् २.९६ ॥ |
| मुखमुल्लसितत्रिरेखमुच्चैर्भिदुरभ्रूयुगभीषणं दधानः । समितावितिं विक्रमानमृष्यन्गतभीराह्वतचेदिराण्मुरारिं ॥ शिशुपालवधम् २०.१ ॥ |
| मुखरय स्वयशोनवडिण्डिमं जलनिधेः कुलमुज्ज्वलयाधुना । अपि गृहाण वधूवधपौरुषं हरिणलाञ्छन मुञ्च कदर्थनाम् ॥ नैषधीयचरितम् ४.५३ ॥ |

| |
|---|
| मुखसरोजरुचं मदपाटलामनुचकार चकोरदृशां यतः । धृतनवातपमुत्सुकतामतो न कमलं कमलम्भयदम्भसि ॥ शिशुपालवधम् ६.४८ ॥ |
| मुखानि मुक्तामणितोरणोद्गतैर्मरीचिभिः पान्थविलासमाश्रितैः । पुरस्य तस्याखिलवेश्मनामपि प्रमोदहासच्छुरितानि रेजिरे ॥ नैषधीयचरितम् १५.१३ ॥ |
| मुखाब्जमावर्तनलोलनालं कृत्वालिहूंहूंरवलक्ष्यलक्ष्यम् । भीमोद्भवा तां ननुदेऽङ्कपालीं देव्या नवोढेव दृढां विवोढुः ॥ नैषधीयचरितम् १४.३९ ॥ |
| मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः । अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः ॥ रघुवंशम् १३.९ ॥ |
| मुखे निधाय क्रमुकं नलानुगैरथौज्झि पर्णालिरवेक्ष्य वृश्चिकम् । दमार्पितान्तर्मुखवासनिर्मितं भयाविलैः स्वभ्रमहासिताखिलैः ॥ नैषधीयचरितम् १६.११ ॥ |
| मुखेन तेत्रोपविशत्वसाविति प्रयाच्य सृष्टानुमतिं खलाहसत् । वराङ्गभागः स्वमुखं मतोऽधुना स हि स्फुटं येन किलोपविश्यते ॥ नैषधीयचरितम् १६.५ ॥ |
| मुखेन सा केतकपत्रपाण्डुना कृशाङ्गयष्टिः परिमेयभूषणा । स्थितात्पतारां करुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बयत् ॥ रघुवंशम् ३.२भ् ॥ |
| मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना । तुपारवृष्टिक्षतपद्मसंपदां सरोजसंधानमिवाकरोदपाम् ॥ कुमारसंभवम् ५.२७ ॥ |
| मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती । शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥ किरातार्जुनीयम् ४.३६ ॥ |
| मुख्यार्थस्याविवक्षायां पूर्वाऽर्वाची च रूढितः । प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता ॥ चन्द्रालोकः९.१ ॥ |
| मुग्धः स मोहात्सुभगान्न देहाद्ददभवद्भ्रूरचनाय चापम् । भ्रूभङ्गजेयस्तव यन्मनोभूरनेन रूपेण यदातदाभूत् ॥ नैषधीयचरितम् ८.३९ ॥ |
| मुग्धत्वादविदितकैतवप्रयोगा गच्छन्त्यः सपदि पराजयं तरुण्यः । ता कान्तैः सह करपुष्करेरिताम्बुव्यात्युक्षीमभिसरणग्लहामदीव्यन् ॥ शिशुपालवधम् ८.३२ ॥ |
| मुग्धा दधामि कथमित्थमथापशङ्कां संक्रन्दनादिकपटः स्फुटमीदृशोऽयम् । देव्यानयैव रचिता हि तथा तथैषां गाथा यथा दिगधिपानपि ताः स्पृशन्ति ॥ नैषधीयचरितम् १३.४६ ॥ |
| मुग्धायाः स्मरललितेषु चक्रवाक्या निशङ्कं दयिततमेन चुम्बितायाः । प्रणेशानभि विदधुर्वधूतहस्ताः सीत्कारं समुचितमुत्तरं तरुण्यः ॥ शिशुपालवधम् ८.१३ ॥ |
| मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिं वधान ऋजुतां दूरे कुरु प्रेयसि । सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति ॥ अमरुशतकम्-६७॥ |
| मुचुकुन्दतल्पशरणस्य मगधपतिशातितौजसः । सिद्धमबल सबलत्वमहो तव रोहिणीततनयसाहचर्यतः ॥ शिशुपालवधम् १५.२४ ॥ |
| मुञ्चतीशे शरान्जिष्णौ पिनाकस्वनपूरितः । दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥ किरातार्जुनीयम् १५.३४ ॥ |
| मुदमब्दभुवामपां मयूराः सहसायन्त नदी पपाट लाभे । अलिना रतमालिनी शिल्लीन्ध्रे सह सायन्तनदीपपाटलाभे ॥ शिशुपालवधम् ६.७२ ॥ |
| मुदितमधुभुजो भुजेन शाखाश्चलितविशृङ्खलशङ्खकं धुवत्याः । तरुरतिशायितापराङ्गनायाः शिरसि मुदेव मुमोच पुष्पवर्षम् ॥ शिशुपालवधम् ७.३० ॥ |
| मुदितमधुलिहो वितानीकृताः स्रज उपरि वितत्य सातानिकीः । जलद इव निषेदिवांसं वृषे मरुदुपसुखयांबभूवेश्वरं ॥ किरातार्जुनीयम् १८.२० ॥ |
| मुदितयुवमनस्कास्तुल्यमेव प्रदोषे रुचमदधुरभय्यः कल्पिता भूषिताश्च । परिमलरुचिराभिर्न्यक्कृतास्तु प्रभाते युवतिभिरुपभोगान्नीरुचः पुष्पमालाः ॥ शिशुपालवधम् ११.२७ ॥ |
| मुदितैस्तदेति दितिजन्मनांरिपावविनीयसम्भ्रमविकासिभक्तिभिः । उपसेदिवद्भिरुपदेष्टरीव तैर्ववृते विनीतमविनीतशासिभिः ॥ शिशुपालवधम् १३.२४ ॥ |
| मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृङ्गैः । भवन्ति नोद्दामगिरां कवीनामुच्छ्रायसौन्दर्यगुणा मृषोद्याः ॥ शिशुपालवधम् ४.१०॥ |
| मुद्राणां पातनं सद्ध्रुवमृदुचरक्षिप्रभैर्वीन्दुसौरे घस्रे पूर्णाजयाख्ये न च गुरुभृगुजास्ते विलग्ने शुभैःस्यात् । वस्त्राणां क्षालनं सद्वसुहयदिनकृत्पञ्चकादित्यपुष्ये नो रिक्तापर्वषष्ठीपितृदिनरविजज्ञेषु कार्यं कदापि ॥ मुहूर्त.नक्षत्रप्रकरणम् २०॥ |
| मुद्रितान्यजनसंकथनः सन्नारदं बलरिपुः समवादीत् । आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासः ॥ नैषधीयचरितम् ५.१२ ॥ |
| मुधार्पितं मूर्धसु रत्नमेभिर्यन्नाम तानि स्वयमेत एव । स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणाऋथमर्थ्यम् ॥ नैषधीयचरितम् १०.६३ ॥ |
| मुनिजनशिशुरेकः सर्वतः संप्रकोपा- न्नव इव रघुवंशस्याप्रसिद्धिप्ररोहः । दलितकरिकपोलग्रन्थिटङ्कारघोर- ज्वलितशरसहस्रः कौतुकं मे करोति ॥ (उत्तररामचरितम् ५.३) |
| मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि । अलघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगं ॥ किरातार्जुनीयम् १०.१६ ॥ |
| मुनिद्रुमः कोरकितः शितिद्युतिर्वनेऽमुनामन्यत सिंहिकासुतः । तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन् ॥ नैषधीयचरितम् १.९६ ॥ |
| मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन । मदनमुपदधे स एव तासां दुरधिगमा हि गतिः प्रयोजनानां ॥ किरातार्जुनीयम् १०.४० ॥ |
| मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः । परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यं ॥ किरातार्जुनीयम् १३.७ ॥ |
| मुनिर्यथात्मानमथ प्रबोधवान् प्रकाशयन्तं स्वमसावबुध्यत । अपि प्रपन्नां प्रकृतिं विलोक्य तामवाप्तसंस्कारतयासृजद्गिरः ॥ नैषधीयचरितम् ९.१२१ ॥ |
| मुनिव्रतेस्त्वामतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदाम् । शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ॥ कुमारसंभवम् ५.४८ ॥ |
| मुनीषुदहनातप्तांल्लज्जया निविवृत्सतः । शिवः प्रह्लादयामास तान्निषेधहिमाम्बुना ॥ किरातार्जुनीयम् १५.३० ॥ |
| मुनेर्विचित्रैरिषुभिः स भूयान्निन्ये वशं भूतपतेर्बलौघः । सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः ॥ किरातार्जुनीयम् १७.१९ ॥ |
| मुमोच कोपात्तरुणारुणाऽधरः कच- प्रबन्धान् यवनीजनस्य यः । सहिन्दुना केन स रक्त बिन्दुना, न लालनीयो जगदेकरनवत् ॥ प्रतापविजयः-३७ ॥ |

| |
|---|
| मुषितमनसश्चित्रं भैमि त्वयाद्य कलागृहैर्निषाधवसुधानाथस्यापि श्लथश्लथता विधौ । अजगणदयं संध्यां वन्ध्यां विधाय न दूषणं नमसितुमना यन्नाम स्यान्न संप्रति पूषणम् ॥ नैषधीयचरितम् १९.२३ ॥ |
| मुहुः प्रतिस्खलितपरायुधा युधि स्थवीयसीरचलनितम्बनिर्भराः । अदंशयन्नरहितशौर्यदंशनास्तनूरयं नय इति वृष्णिभूभृतः ॥ शिशुपालवधम् १७..२१ ॥ |
| मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन । अलिकुलमलकाकृतिं प्रपेदे नलिनमुखान्तविसर्पि पङ्कजिन्याः ॥ किरातार्जुनीयम् १०.३३ ॥ |
| मुहुरसुसममाध्नती नितान्तं प्रणदितकाञ्चि नितम्बमण्डलेन । विषमितपृथुहारयष्टि तिर्यक्कुचमितरं तदुरस्थले निपीड्य ॥ शिशुपालवधम् ७.१७ ॥ |
| मुहुरिति वनविभ्रमाभिषङ्गादतमि तदा नितरां नितम्बिनीभिः । मृदुतरतनवोऽनलसाः प्रकृत्या चिरमपि ताः किमुत प्रयासभाजः ॥ शिशुपालवधम् ७.६८ ॥ |
| मुहुरुपहसितामिवालिनादैर्वितरसि नः कालिकां किमर्थमेनाम् । वसतिमुपगतेन धाम्नि तस्याः शठ कलिरेष महांस्त्वयाद्य दत्तः ॥ शिशुपालवधम् ७.७५ ॥ |
| मुहुश्चलत्पल्लवलोहिनीभिरुच्चैः शिखाभिः शिखिनोऽवलीढाः । तलेषु मुक्ताविशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः ॥ किरातार्जुनीयम् १६.५३ ॥ |
| मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम । निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः ॥ नैषधीयचरितम् १.१३६ ॥ |
| मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् । समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे॥ कुमारसंभवम् ७.४२॥ |
| मूर्धाभिषिक्तः खलु यो ग्रहाणां तद्भासमास्कन्दत ऋक्षशोभम् । दिवान्धकारं स्फुटलब्धरूपमालोकतालोकमुलूकलोकः ॥ नैषधीयचरितम् २२.३८ ॥ |
| मूलमध्यशिखरस्थितवेधःशौरिशंभुकरकाङ्घ्रिशिरःस्थैः । तस्य मूर्ध्नि चकरे शुचि दर्भैर्वारि वान्तमिव गाङ्गतरङ्गैः ॥ नैषधीयचरितम् २१.१२ ॥ |
| मूलाग्निदास्रे नव पित्र्यभे नखा बुध्न्यार्यमेज्यादितिधातृभे नगाः । मासोऽब्जवैश्वेऽथ यमाहिमूलभे मिश्रेशपित्र्ये फणिदंशने मृतिः ॥ मुहूर्त.नक्षत्रप्रकरणम् ४६॥ |
| मूलार्द्राभरणीपित्र्यमघे सौम्ये घटे तनौ । सुखे शुक्रेऽष्टमे शुद्धे सिद्धिर्वीराभिचारयोः ॥ मुहूर्त.नक्षत्रप्रकरणम् ३९॥ |
| मूलाहिमिश्रोग्रमधोमुखं भवेदूर्ध्वास्यमार्द्रेज्यहरित्रयंध्रुवम् । तिर्यङ्मुखं मैत्रकरानिलादिति-ज्येष्ठाश्विभानीदृशकृत्यमेषु सत् ॥ मुहूर्त.नक्षत्रप्रकरणम् ९॥ |
| मूलेऽङ्गबाणा ५६ द्विषनाडिकाः कृता-४ वर्ज्याः शुभेऽथो विषनाडिका ध्रुवाः । निघ्ना भभोगेन खतर्क ६० भाजिताः स्पष्टा भवेयुर्विषनाडिकास्तथा ॥ मुहूर्त.विवाहप्रकरणम् ५१॥ |
| मूलेन्द्रार्द्राहिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम् । तत्राभिचारघातोग्रभेदाः पशुदमादिकम् ॥ मुहूर्त.नक्षत्रप्रकरणम् ८॥ |
| मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् । लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ नीतिशतकम्६१ ॥ |
| मृगया न विगीयते नृपैरपि धर्मागममर्मपारगैः । स्मरसुन्दर मां यदत्यजस्तव धर्मः सदयोदयोज्ज्वलः ॥ नैषधीयचरितम् २.९ ॥ |
| मृगवनोपगमक्षमवेषभृद्विपुलकण्ठनिषक्तशरासनः । गगनमश्वखुरोद्धुत रेणुभिर्नृसविता सवितानमिवाकरोत् ॥ रघुवंशम् ८.५० ॥ |
| मृगविद्विषामिव यदित्थमजनि मिषतां पृथासुतैः । अस्य वनशुन इवापचितिः परिभाव एव भवतां भुवोऽधिपाः ॥ शिशुपालवधम् १५.३४ ॥ |
| मृगस्य नेत्रद्वितयं तवास्ये विधौ विधुत्वानुमितस्य दृश्यम् । तस्यैव चञ्चत्कचपाशवेषः पुच्छः स्फुरच्चामरगुच्छ एषः ॥ नैषधीयचरितम् ८.४ ॥ |
| मृगस्य लोभात्खलु सिंहिकायाः सूनुर्मृगाङ्कं कवलीकरोति । स्वस्यापि दानादमुमङ्कसुप्तं नोज्झन्मुदा तेन च मुच्यतेऽयम् ॥ नैषधीयचरितम् २२.६८ ॥ |
| मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नित दृष्टिपाताः । मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः॥ कुमारसंभवम् ३.३१॥ |
| मृगाक्षि यन्मण्डलमेतदिन्दोः स्मरस्य तत्पाण्डुरमातपत्रम् । यः पूर्णिमानन्तरमस्य भङ्गः स च्छत्त्रभङ्गः खलु मन्मथस्य ॥ नैषधीयचरितम् २२.१३ ॥ |
| मृगात्कराच्छ्रुतेस्त्रयेऽश्विमूलपूर्विकात्रये गुरुद्वयेऽर्कजीववित्सितेऽह्नि षट्छरत्रिके । शिवार्कदिग्द्विके तिथौ ध्रुवान्त्यमित्रभे परैः शुभैरधीतिरुत्तमा त्रिकोणकेन्द्रगैः स्मृता ॥ मुहूर्त.संस्कारप्रकरणम् ३८॥ |
| मृगान्त्यचित्रामित्रक्षं मृदु मैत्रं भृगुस्तथा । तत्र गीताम्बरक्रीडामित्र कार्यं विभूषणम् ॥ मुहूर्त.नक्षत्रप्रकरणम् ७ ॥ |
| मृगे गत्वा शिवे स्थित्वाऽदितौ गच्छञ्जयेद्रिपून् । मैत्रे प्रस्थाय शाक्रे हि स्थित्वा मूले व्रजंस्तथा ॥ मुहूर्त.यात्राप्रकरणम् ५२॥ |
| मृग्यमाणमपि यद्दुरासदं भूरिसारमुपनीय तत्स्वयं । आसतावसरकाङ्क्षिणो बहिस्तस्य रत्नमुपदीकृतं नृपाः ॥ शिशुपालवधम् १४.३९ ॥ |
| मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्माम् । व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ॥ रघुवंशम् १३.२५ ॥ |
| मृणालसूत्रामलमन्तरेण स्थितश्चलच्चमरयोर्द्वयं सः । भेजे भितः पातुकसिद्धसिन्धोरभूतपूर्वां श्रियमम्बुराशेः ॥ शिशुपालवधम् ३.३ ॥ |
| मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् । तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥ कुमारसंभवम् ५.२९ ॥ |
| मृणालिनीनामनुरञ्जितं त्विषा विभिन्नमम्भोजपलाशशोभया । पयः स्फुरच्छालिशिखापिशङ्गितं द्रुतं धनुष्खण्डमिवाहिविद्विषः ॥ किरातार्जुनीयम् ४.२७ ॥ |
| मृतपक्षरिक्तरवितर्कसंख्यकास्तिथयश्च सौरिरविभौमवासराः । अपि वामपृष्ठगविधुस्तथाडलोवसुपञ्चकाभिजिदथापि दक्षिणे ॥ मुहूर्त.यात्राप्रकरणम् १११॥ |
| मृतिभवनांशो यदि च विलग्ने तदधिपतिर्वा न शुभकरः स्यात् । व्ययभवनं वा भवति तदंशस्तदधिपतिर्वा कलहकरः स्यात् ॥ मुहूर्त.विवाहप्रकरणम् ४८॥ |
| मृत्पिण्डशेखरितकोटिभिरर्धचन्द्रं शृङ्गैः शिखाग्रगतलक्ष्ममलं हसद्भिः । उच्छृङ्गितान्यवृषभाः सरितां नदन्तो रोधांसि धीरमपचस्किरिरे महोक्षाः ॥ शिशुपालवधम् ५.६३ ॥ |
| मृत्पिण्डो जल-रेखया बल-यतिः सर्वोऽप्ययं नन्वणुः स्वांशीकृत्य स एव सङ्गर-शतै राज्ञां गणा भुञ्जते। ये दद्युर्ददतोऽथवा किमपरं क्षुद्रा दरिद्रं भृशं धिग्धिक्तान्पुरुषाधमान्धनकणान्वाञ्छन्ति तेभ्योऽपि ये॥॥ वैराग्यशतकम् ५९ ॥ |

| |
|---|
| मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुः स्वांशीकृत्य तदेव संगरशतै राज्ञां गणा भुज्यते । ते दद्युर्ददतेऽथ वा किमपि न क्षुद्रा द्ररिद्रा भृशं धिक् धिक् तान् पुरुषाधमान् धनकणान् वाञ्छन्ति तेभ्योऽपि ये ॥ पुरुषार्थोपदेशः41 ॥ |
| मृत्युंजयस्यैष वसञ्जटायां न क्षीयते तद्भयदूरमृत्युः । न वर्धते च स्वसुधाप्तजीवस्रग्मुण्डराहूद्भवभीरतीव ॥ नैषधीयचरितम् २२.६४ ॥ |
| मृत्युः षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे । द्विर्द्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्यकृत् ॥ मुहूर्त.विवाहप्रकरणम् ३१॥ |
| मृत्युक्रकचदग्धादीनिन्दौ शस्ते शुभाञ्जगुः । केचिद्यामोत्तरं चान्ये यात्रायामेव निन्दितान् ॥ मुहूर्तचिन्त. ४१॥ |
| मृत्युभीतिकरपुण्यजनेन्द्रत्रासदानजमुपार्ज्य यशस्तत् । ह्रीणवानसि कथं न विहाय क्षुद्रदुर्जनभिया निजदारान् ॥ नैषधीयचरितम् २१.७५ ॥ |
| मृत्युहेतुषु न वज्रनिपाताद्भीतिमर्हति जनस्त्वयि भक्तः । यत्तदोच्चरति वैष्णवकण्ठान्निष्प्रयत्नमपि नाम तव द्राक् ॥ नैषधीयचरितम् २१.११३ ॥ |
| मृत्यौ स्वर्णतिलान्विपद्यपि गुडं शाकं त्रिजन्मस्वथो दद्यात्प्रत्यरितारकासु लवणं सर्वो विपत्प्रत्यरिः । मृत्युश्चादिमपर्यये न शुभदोऽथैषां द्वितीयऽशका नादिप्रान्त्यतृतीयका अथ शुभाः सर्वे तृतीये स्मृताः॥ मुहूर्त.संक्रान्तिप्रकरणम्  १३ ॥ |
| मृदितकिसलयः सुराङ्गनानां ससलिलवल्कलभारभुग्नशाखः । बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानां ॥ किरातार्जुनीयम् १०.९ ॥ |
| मृदुचरणतलाग्रदुःस्थितत्वादसहतरा कुचकुम्भयोर्भरस्य । उपरिनिरवलम्बनं प्रियस्य न्यपतदथोच्चतरोच्चिचीषयान्या ॥ शिशुपालवधम् ७.४८ ॥ |
| मृदुध्रुवक्षिप्रचरे ज्ञे ग्रौ वा खलग्नेगे । विधौ ज्ञजीववर्गस्थे शिल्पविद्या प्रशस्यते ॥ मुहूर्त.नक्षत्रप्रकरणम् ४१॥ |
| मृदुध्रुवक्षिप्रचरेषु मूलभे वास्त्वर्चनं भूतबलिं च कारयेत् । त्रिकोणकेन्द्रायधनत्रिगैः शुभैर्लग्ने त्रिषष्ठायगतैश्च पापकैः ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ३॥ |
| मृद्घटवत्सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति । सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु सन्धेयः  ॥ नीतिसंग्रहस्य मित्र-१.९३ ॥ |
| मृषा निशानाथमहः सुधा वा हरेदसौ वा न जराविनाशौ । पीत्वा कथं नापरथा चकोरा विधोर्मरीचीनजरामराः स्युः ॥ नैषधीयचरितम् २२.१०२ ॥ |
| मृषाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजाम् । विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम् ॥ नैषधीयचरितम् १.५१ ॥ |
| मृष्टचन्दनविशेषकभक्तिर्मृष्टपाटभूषणकदर्थितमाल्यः । सापराध इव मण्डनमासीदात्मनैव सुदृशामुपभोगः ॥ शिशुपालवधम् १०.८४ ॥ |
| मेचकोत्पलमयी बलिबन्द्धुस्तद्वलिस्रगुरसि स्फुरति स्म । कौस्तुभाख्यमणिकुट्टिमवास्तुश्रीकटाक्षविकटायितकोटिः ॥ नैषधीयचरितम् २१.४४ ॥ |
| मेदस्विनः सरभसोपगतानभीकान्भङ्क्त्वा परानन्नड्हो मुहुराहवेन । ऊर्जस्वलेन सुरभीरनु निःसपत्नं जग्मे जयोद्धुरविशालविषाणमुक्ष्णा ॥ शिशुपालवधम् ५.६५ ॥ |
| मेनका मनसि तापमुदीतं यत्पिधित्सुरकरोदवहित्थाम् । तत्स्फुटं निजहृदः पुटपाके पङ्कलिप्तिमसृजद्बहिरुत्थाम् ॥ नैषधीयचरितम् ५.५१ ॥ |
| मेवाड़ - मण्डल :- मणिः स महाप्रतापी, दृष्ट्वा दशां विमल-भारतवर्ष मध्ये। इत्थं चकार जगतां प्रथितां प्रतिज्ञां, प्रज्ञां नियोज्य निपुणश्च विचार्य विज्ञान् ॥ प्रतापविजयः-५० ॥ |
| मेषादिगेऽर्केऽष्टशरा नगाक्षाः सप्तेषवः सप्तशरा गजाक्षाः । गोक्षाः खतर्काः कुरसाः कुतर्काः क्वङ्गानि षष्टिर्नवपञ्च भुक्तिः ॥ मुहूर्त.विवाहप्रकरणम् १०२॥ |
| मेषादिराशिजवधूवरयोर्बटोश्च तैलादिलापनविधौ कथिताऽत्र सङ्ख्या । शैलादिशः शरदिगक्षनगाद्रिबाण- बाणाक्षबाणगिरयो विबुधैस्तु कैश्चित् ॥ मुहूर्त.विवाहप्रकरणम् ११०॥ |
| मेषेऽर्के सन् व्रतोद्वाहौ गङ्गागोदान्तरेऽपि च । सर्वः सिंहगुरुर्वर्ज्यः कलिङ्गे गौडगुर्जरे ॥ मुहूर्तचिन्त.५१ ॥ |
| मैत्रार्कपुष्याश्विनभैर्निरुक्ता यात्रा शुभा सर्वदिशासु तज्ज्ञैः । वक्री ग्रहः केन्द्रगतोऽस्य वर्गो लग्ने दिनं चास्य गमेनिषिद्धम् ॥ मुहूर्त.यात्राप्रकरणम् ३८॥ |
| मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु । तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः॥ कुमारसंभवम् ७.६॥ |
| मैत्र्यां राशिस्वामिनोरंशनाथद्वन्द्वस्यापि स्याद्गणानां न दोषः । खेटारित्वं नाशयेत्सद्भकूटं खेटप्रीतिश्चापि दुष्टं भकूटम् ॥ मुहूर्त.विवाहप्रकरणम् ३३॥ |
| मैथिलः सपदि सत्यसंगरो राघवाय तनयामयोनिजां । संनिधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान् ॥ रघुवंशम् ११.४८ ॥ |
| मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षणोः । तन्निशम्य बहवता समर्थये वीर्यशृङ्गमिव भग्नमात्मनः ॥ रघुवंशम् ११.७२ ॥ |
| मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः । ख्यातिं चसत्त्वपुरुषान्यतयाधिगम्य वाञ्चन्ति तामपि समाधिभृतः निरोद्धुम् ॥ शिशुपालवधम् ४.५५॥ |
| मैव वाङ्मनसयोर्विषयो भूस्त्वां पुनर्न कथमुद्दिशतां ते । उत्कचातकयुगस्य घनः स्यात्तृप्तये घनमनाप्नुवतोऽपि ॥ नैषधीयचरितम् २१.५५ ॥ |
| मोष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान् । शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः ॥ रघुवंशम् १०.४८ ॥ |
| मोहं मार्जय तामुपार्जय रतिं चन्द्रार्ध-चूडामणौ चेतः स्वर्ग-तरङ्गिणी-तट-भुवामासङ्गमङ्गीकुरु। को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु च ज्वालाग्रेषु च पन्नगेषु सरिद्वेगेषु च प्रत्ययः॥॥ वैराग्यशतकम् ६५ ॥ |
| मोहाय देवाप्सरसां विमुक्तास्ताराः शराः पुष्पशरेण शङ्के । पञ्चास्यवत्पञ्चशरस्य नाम्नि प्रपञ्चवाची खलु पञ्चशब्दः ॥ नैषधीयचरितम् २२.१९ ॥ |
| मौक्तिकं चेल्लतां सूते तत्पुष्पैस्ते समं यशः वाञ्छितादधिकप्राप्तिरयत्नेन प्रहर्षणम् ॥ चन्द्रालोकः ५.४९ ॥ |
| मौनान्मूकः प्रवचनपटुश्चाटुलो जल्पको वा धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः । क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ नीतिशतकम्५८ ॥ |
| म्रदीयसा स्नानजलस्य वाससा प्रमार्जनेनाधिकमुज्ज्वलीकृताः । अदभ्रमभ्राजत साश्मशाणनात्प्रकाशरोचिःप्रतिमेव हेमजा ॥ नैषधीयचरितम् १५.२४ ॥ |

| |
|---|
| म्लानं पाण्डु कृशं वियोगविधुरं लम्बालकं सालसं भूयस्तत्क्षणजातकान्ति रभसप्राप्ते मयि प्रोषिते । साटोपं रतिकेलिकालसरसं रम्यं किमप्यादराद् यत्पीतं सुतनोर्मया वदनकं वक्तुं न तत्पार्यते ॥ अमरुशतकम्-९४॥ |
| म्लानिस्पृशः स्पर्शनिषेधभूमेः सेयं त्रिशङ्कोरिव संपदस्य । न किंचिदन्यत्प्रति कौशिकीये दृशौ विहाय प्रियमातनोति ॥ नैषधीयचरितम् २२.३७ ॥ |
| य इहात्मविदो विपक्षमध्ये सहसंवृद्धियुजो पि भूभुजः स्युः । बलिपृष्टकुलादिवान्यपुष्टैः पृथगस्मादचिरेण भाविता तैः ॥ शिशुपालवधम् २.११६ ॥ |
| य एकलो भारत-भूपते प्रियः, प्रसिद्धसेनापतिरस्ति वीरराट् । रिपुत्वमङ्गीकरणं ततोऽभयं विभावयेत् को नु भवन्तमन्तरा ॥ प्रतापविजयः-७९ ॥ |
| य एव उद्गीर्ण-जनो रणेऽभवत् क्षणेऽभवद्धूलिमयो धरा- धृतः । विदार्य वक्षश्च तदीयमत्यहो ! ययौ स मृत्योः समरेऽग्रदूतताम्॥ प्रतापविजयः-१३५ ॥ |
| य एष जागर्ति शशः शशाङ्के बुधो विधत्ते क इवात्र चित्रम् । अन्तः किलैतत्पितुरम्बुराशेरासीत्तुरङ्गोऽपि मतङ्गजोऽपि ॥ नैषधीयचरितम् २२.९६ ॥ |
| यं प्रासूत सहस्रपादुदभवत्पादेन खजः कथं स च्छायातनयः सुतः किल पितुः सादृश्यमन्विच्छति । एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने साहसैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन्भानुमान् ॥ नैषधीयचरितम् ५.१३६ ॥ |
| यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य । तत्र भूदनलता जनिकर्त्री मा तदप्यनलतैव तु हेतुः ॥ नैषधीयचरितम् ५.६३ ॥ |
| यं लघुन्यपि लघूकृताहितः शिष्यभूतमशिषत्स कर्मणि । सस्पृहं नृपतिभिर्नृपोऽपरैर्गौरवेण ददृशेतरामसौ ॥ शिशुपालवधम् १४.४२ ॥ |
| यं समेत्य च ललाटलेखया बिभ्रतः सपदि शंभुविभ्रमं । चण्डमारुतमिव प्रदीपवच्चेदिपस्य निरवाद्विलोचनं ॥ शिशुपालवधम् १४.८५ ॥ |
| यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे । भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥ कुमारसंभवम् १.२ ॥ |
| यः कोलतां बल्लवतां च बिभ्रद्दंष्ट्रामुदस्याशु भुजां च गुर्वी । मग्नस्य तोयापदि दुस्तरायां गोमण्डलस्योद्धरणं चकार ॥ शिशुपालवधम् १४.८६ ॥ |
| यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः । सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ काव्यप्रकाशः (प्रथमोल्लासः) १ ॥ |
| यः पूरयन्कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन । उद्गास्यतामिच्छति किंनराणां तानप्रदायित्वमिवोपगन्तुम् ॥ कुमारसंभवम् १.८ ॥ |
| यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रतामस्मिन्नेव बिभर्ति यञ्च किरति कूरध्वनिं निष्ठुरः । दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन्गुणं विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणाम् ॥ नैषधीयचरितम् १२.९७ ॥ |
| यः प्रेर्यमाणोऽपि हृदा मघोनस्त्वदर्थनायां ह्रियमापदागः । स्वयंवरस्थानजुषस्त्वमस्य बधान कण्ठं वरणस्रजाशु ॥ नैषधीयचरितम् ६.७९ ॥ |
| यः सर्वेषामावरीता वरीयान्सर्वैर्भावैर्नावृतोऽनादिनिष्ठः । मार्गातीतायेन्द्रियाणां नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै ॥ किरातार्जुनीयम् १८.४० ॥0 |
| यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया । तं क्षुरप्रशकलीकृतां कृती पत्त्रिणां व्यभजदाश्रमाद्बहिः ॥ रघुवंशम् ११.२९ ॥ |
| यः स्तब्धं दिवसान्तमानतशिरा नास्ते समुल्लम्बितो यस्योद्धर्षणलोष्टकैरपि सदा पृष्ठे न जातः किणः । यस्यैतश्च न कुकुरैरहरहर्जङ्घान्तरं चर्व्यते ते तस्यात्यायतकोमलस्य सततं धूतप्रसङ्गेन किम्? ॥ (मृच्छकटिकम् २.१२) |
| यः स्पर्धया येन निजप्रतिष्ठां लिप्सुः स एवाह तदुन्नतत्वम् । कः स्पर्धितुः स्वाभिहितस्वहानेः स्थानेऽवहेलां बहुलां न कुर्यात् ॥ नैषधीयचरितम् १०.५ ॥ |
| यः स्यादमीषु परमाऋथनलः स मालामङ्गीकरोतु वरणाय ममेति चैनाम् । तं प्रापयामि यदि तत्तु विसृज्य लज्जां कुर्वे कथं जगति शृङ्वति ही विडम्बः ॥ नैषधीयचरितम् १३.५३ ॥ |
| यक्षकर्दममृदुन्मृदिताङ्गं प्राक्कुरङ्गमदमीलितमौलिम् । गन्धवार्भिरनुबन्धितभृङ्गैरङ्गना सिषिचुरुच्चकुचास्तम् ॥ नैषधीयचरितम् २१.७ ॥ |
| यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः । अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत् ॥ रघुवंशम् ११.१८ ॥ |
| यच्चण्डिमारणविधिव्यसनं च तत्त्वं बुद्ध्वाशयाश्रितममुष्य च दक्षिणत्वम् । सैषा नले सहजरागभरादमुष्मिन्नात्मानमर्पयितुमर्हसि धर्मराजे ॥ नैषधीयचरितम् १३.३ ॥ |
| यच्छति प्रतिमुखं दयितायै वाचमन्तिकगतेऽपि शकुन्तौ ।नीयते स्म नतिं उज्झितहर्षं पङ्कजं मुखं इवाम्बुरुहिण्या ॥ किरातार्जुनीयम् ९.१४ ॥ |
| यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च । प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं खयमन्वतिष्ठत् ॥ कुमारसंभवम् १.१७ ॥ |
| यज्ञान्ते तमवभृथाबिषेकपूतं सत्कारैः शमितपराजयव्यलीकान् । आमन्त्र्योत्सुकवनितात्पतद्विसृष्टाः स्वानि स्वान्यवनिभुजः पुराणि जग्मुः ॥ रघुवंशम् ४.८७ ॥ |
| यतः परार्घ्यानि भृतान्यनूनै प्रस्थैर्मुहुर्भूरिभिरुच्चिखानि । आढ्यादिवप्रापणिकादजस्रं जग्राह रत्नान्यमितानि लोकः ॥ शिशुपालवधम् ४.११॥ |
| यतः स धर्ता जगतां जगाम धर्त्रा धरित्र्याः फणिना ततो धः । महाभराभुग्नशिरःसहस्रसाहायकव्यग्रभुजं प्रसस्रे ॥ शिशुपालवधम् ३.२४ ॥ |
| यतिपार्थिवलिङ्गधारिणौ ददृशते रघुराघवौ जनैः । अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ ॥ रघुवंशम् ८.१६ ॥ |
| यतो मेरुः श्रीमान्निपतति युगान्ताग्नि-वलितः समुद्राः शुष्यन्ति प्रचुर-मकर-ग्राह-निलयाः। धरा गच्छत्यन्तं धरणिधर-पादैरपि धृता शरीरे का वार्ता करिकलभ-कर्णाग्र-चपले॥॥ वैराग्यशतकम् ७२ ॥ |
| यतोऽजनि श्रीर्बलवान्बलं द्विषन्बभूव यस्याजिषु वारणेन सः । अपूपुरत्तान्कमलार्थिनो घनान्समुद्रभावं स बभार तद्भुजः ॥ नैषधीयचरितम् १५.७३ ॥ |

| |
|---|
| यत्कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते जातं यद्धनकाननैकशरणप्राप्तेन दावाग्निना । एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती धिक्तं वाडवमम्भसि द्विषि भिया येन प्रविष्टं पुनः ॥ नैषधीयचरितम् १२.८१ ॥ |
| यत्कुम्भयोनेरदिगम्य रामः कुशाय राज्येन समं दिदेश । तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज ॥ रघुवंशम् १६.७२ ॥ |
| यत्तव स्तवविधौ विधिरास्ये चातुरीं चरति तच्चतुरास्यः । त्वय्यशेषविदि जाग्रति शर्वः सर्वविद्ब्रुवतया शितिकण्ठः ॥ नैषधीयचरितम् २१.९१ ॥ |
| यत्तान्निजे सा हृदि भावनाया बलेन साक्षादकृताखिलस्थान् । अभूदभीष्टप्रतिभूः स तस्या वरं हि दृष्टा ददते परं ते ॥ नैषधीयचरितम् १४.४ ॥ |
| यत्नाद्रक्षन्सुस्थितत्वादनाशं निश्चत्यन्यश्चेतसा भावितेन । अन्त्यावस्थाकालयोग्योपयोगं दध्रेऽभीष्टं रागमापद्धनं वा ॥ शिशुपालवधम् १८.३१ ॥ |
| यत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति यस्मात् । बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम् ॥ नैषधीयचरितम् ५.२९ ॥ |
| यत्पद्ममादित्सु तवाननीयां कुरङ्गलक्ष्मा च मृगाक्षि लक्ष्मीम् । एकार्थलिप्साकृत एष शङ्के शशाङ्कपङ्केरुहयोर्विरोधः ॥ नैषधीयचरितम् २२.११७ ॥ |
| यत्पाथोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमान्दृष्टीः पूर्णयति स्म यज्जलरुहामक्ष्णा सहस्रं हरिः । साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं यन्मूलाद्रियतेतरां कविनृभिः पद्मोपमा चक्षुषः ॥ नैषधीयचरितम् १९.५९ ॥ |
| यत्पूजां नयनद्वयोत्पलमयीं वेधा व्यधात्पद्मभूर्वाक्पारीणरुचिः स चेन्मुखमयं पद्मः प्रिये तावकम् । कः शीतांशुरसौ तदा मखमृगव्याधोत्तमाङ्गस्थलस्थास्नुस्वस्तटिनीतटावनिवनीवानीरवासी बकः ॥ नैषधीयचरितम् २२.१४ ॥ |
| यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थिजनाय । सार्थनोक्तिविफलत्वविशङ्कात्रासमूर्च्छदपमृत्युचिकित्सा ॥ नैषधीयचरितम् ५.८५ ॥ |
| यत्प्रियव्यतिकराद्वनितानामङ्गजेन पुलकेन बभूवे । प्रापि तेन भृशमुच्छ्वसिभिर्नीविभिः सपदि बन्धनमोक्षः ॥ शिशुपालवधम् १०.५१ ॥ |
| यत्प्रीतिमद्भिर्वदनैः स्वसाम्यादचुम्बि नाकाधिपनायिकानाम् । ततस्तदीयाधरयावयोगादुदेति बिम्बारुणबिम्ब एषः ॥ नैषधीयचरितम् २२.४६ ॥ |
| यत्र कान्तकरपीडितनीलग्रावरश्मिचिकुरासु विरेजुः । गातृमूर्धविधुतेरनुबिम्बात्कुट्टिमक्षितिषु कुट्टिमितानि ॥ नैषधीयचरितम् २१.३ ॥ |
| यत्र द्रुमा अपि मृगा अपि बन्धवो मे यानि प्रियासहचरश्चिरमध्यवात्सम् । एतानि तानि बहुकन्दरनिर्झराणि गोदावरीपरिसरस्य गिरेस्तटानि ॥ (उत्तररामचरितम् ३.८) |
| यत्र मौक्तिकमणेर्विरहेण प्रीतिकामधृतवह्निपदेन । कङ्कुमेन परिपूरितमन्तः शुक्तयः शुशुभिरेऽनुभवन्त्यः ॥ नैषधीयचरितम् २१.२४ ॥ |
| यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि । निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ नीतिसंग्रहस्य मित्र-१.७० ॥ |
| यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानामङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः । त्वत्संरोधापगमविशदैश्चोतिताश्चन्द्रपादैर्व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ मेघदूतम्, उत्तरमेघः ४ ॥ |
| यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषाङ्गनानाम् । दरीगृहद्वारविलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति ॥ कुमारसंभवम् १.१४ ॥ |
| यत्राधिरूढेनमहीरुहोच्चैरुन्निद्रपुष्पाक्षिसहस्रभाजा । सुराधिपाधिष्ठितहस्तिमल्ललीलां दधौ राजतगण्डशैलः ॥ शिशुपालवधम् ४.१३॥ |
| यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते । इत्थं नेयो रजनिदिवसौ दोलयन् द्वाविवाक्षौ कालः काल्या सह बहुकलः क्रीडति प्राणिशारैः ॥ पुरुषार्थोपदेशः-62॥ |
| यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते। इत्थं नयौ रजनि-दिवसौ लोलयन्द्वाविवाक्षौ कालः कल्यो भुवन-फलके क्रीडति प्राणि-शारैः॥॥ वैराग्यशतकम् ४२ ॥ |
| यत्राभिलाषस्तव तत्र देशे नन्वस्तु धन्वन्यपि तूर्णमर्णः । आपो वहन्तीह हि लोकयात्रां यथा न भूतानि तथाऽपराणि ॥ नैषधीयचरितम् १४.८३ ॥ |
| यत्रावदत्तामतिभीय भैमी त्यज त्यजेदं सखि साहसिक्यम् । त्वमेव कृत्वा मदनाय दत्से बाणान्प्रसूनानि गुणेन सज्जान् ॥ नैषधीयचरितम् ६.६८ ॥ |
| यत्रैकयालीकनलीकृतालीकण्ठे मृषाभीमभवीभवन्त्या । तद्दृक्पथे दौहदिकोपनीता शालीनमाधायि मधूकमाला ॥ नैषधीयचरितम् ६.६१ ॥ |
| यत्रोज्झिताभिर्मुहुरम्बुवाहैः समुन्नमद्भिर्न समुन्नमद्भिः । वनं बबाधे विषपावकोत्था विपन्नगानामविपन्नगानां ॥ शिशुपालवधम् ४.१५॥ |
| यत्रोपमानचित्रेण सर्वथाप्युपरज्यते । उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥ चन्द्रालोकः ५.१८ ॥ |
| यत्स भग्नसहकारमासवं रक्तपाटलसमागमं पपौ । तेन तस्य मधुनिर्गमात्कृशश्चित्तयोनिरभवत्पुनर्नवः ॥ रघुवंशम् १९.४६ ॥ |
| यत्सालमुत्तुङ्गतया विजेतुं दूरादुदस्थीयत सागरस्य । महोर्मिभिर्व्याहतवाञ्छितार्थैर्व्रीडादिवाभ्याशगतैर्विलिल्ये ॥ शिशुपालवधम् ३.३९ ॥ |
| यथा कृतिः काचन ते यथावा दौवारिकान्धंकरणी च शक्तिः । रुच्यो रुचीभिर्जितकाञ्चनीभिस्तथासि पीयूषभुजां सनाभिः ॥ नैषधीयचरितम् ८.२८ ॥ |
| यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः । तवैव संदेषहराद्विशंपतिः शृणोति लोकेश तथा विधीयताम् ॥ रघुवंशम् ३.६६ ॥ |
| यथा निजे वर्त्मनि भाति भाभिश्च्यायामयश्चाप्सु सहस्ररश्मिः । तथा नभस्याशु रणस्थलीषु स्पष्टद्विमूर्तिर्ददृशे स भूतैः ॥ किरातार्जुनीयम् १७.५७ ॥ |

| |
|---|
| यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् । न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥ कुमारसंभवम् ५.९ ॥ |
| यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति । एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥ नीतिसंग्रहस्य मित्र-०.३४ ॥ |
| यथा यथा पटहरवः समीपतामुपागमत्स हरिवराग्रतः सरः । तथा तथा हृषितवपुर्मुदाकुला द्विषां चमूरजनि जनीव चेतसा ॥ शिशुपालवधम् १७..४३ ॥ |
| यथा यूनस्तद्वत्परमरमणीयापि रमणी कुमाराणामन्तःकरणहरणं नैव कुरुते । मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः किमस्या नाम स्यादरसपुरुषानादरभरैः ॥ नैषधीयचरितम् २२.१५२ ॥ |
| यथा श्रुतं वेदविदांवर ! त्वया जनोऽयमुच्चैःपदलङ्घनोत्सुकः । तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते ॥ कुमारसंभवम् ५.६४ ॥ |
| यथाआमिषमाकाशे पक्षिभिः श्वापदैर्भुवि । भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान् ॥ नीतिसंग्रहस्य मित्र-१.१७५ ॥ |
| यथातथा नाम गिरः किरन्तु ते श्रुती पुनर्मे बधिरे तदक्षरे । पृषत्किशोरी कुरुतामसंगतां कथं मनोवृत्तिमपि द्विपाधिपे ॥ नैषधीयचरितम् ९.२९ ॥ |
| यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम् । शरीरमात्रं विकृतिं प्रपेदे, तथैव तस्थुः फणरत्नशोभाः॥ कुमारसंभवम् ७.३४॥ |
| यथामिषे जग्मुरनामिषभ्रमं निरामिषे चामिषमोहमूहिरे । तथा विदग्धैः परिकर्मनिर्मितं विचित्रमेते परिहस्य भोजिताः ॥ नैषधीयचरितम् १६.८१ ॥ |
| यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः । वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपतां ॥ किरातार्जुनीयम् ८.२ ॥ |
| यथायथेह त्वदुपेक्षयानया निमेषमप्येष जनो विलम्बते । रुषा शरव्यीकरणे दिवौकसां तथातथाद्य त्वरते रतेः पतिः ॥ नैषधीयचरितम् ९.२ ॥ |
| यथावदस्मै पुरुषोत्तमाय तां स साधुलक्ष्मीं बहुवाहिनीश्वरः । शिवामथ स्वस्य शिवाय नन्दनां ददे पतिः सर्वविदे महीभृताम् ॥ नैषधीयचरितम् १६.१२ ॥ |
| यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् । यथापराधदण्डानां यथाकालप्रभोधिनाम् ॥ रघुवंशम् १.६ ॥ |
| यथासंख्यं द्विधार्थाश्चेत्क्रमादेकैकमन्विताः । शत्रुं मित्रं द्विषत्पक्षं जय रञ्जय भञ्जय ॥ चन्द्रालोकः ५.९२ ॥ |
| यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवसः सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति । तरुच्छाया तोयं यदपि तपसां योग्यमशनं फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ (उत्तररामचरितम् २.१) |
| यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनी तथैवास्मिन्दृष्टिर्मम, कलहकामः पुनरयम् । रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु- र्धृतप्रेमा बाहुर्विकचविकरालव्रणमुखः ॥ (उत्तररामचरितम् ५.२६) |
| यथोदयगिरेर्द्रव्यं सन्निकर्षेण दीप्यते । तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते ॥ नीतिसंग्रहस्य मित्र-०.४५ ॥ |
| यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पत्तनम् । विदर्भजाया मदनस्तथा मनो नलावरुद्धं वयसैव वेशितः ॥ नैषधीयचरितम् १.३२ ॥ |
| यदक्रमं विक्रमशक्तिसाम्यादुपाचरद्द्वावपि पञ्चबाणः । कथं न वैमत्यममुष्य चक्रे शरैरनर्धार्धविभागभाग्भिः ॥ नैषधीयचरितम् ८.४ ॥ |
| यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया । मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ॥ नैषधीयचरितम् २.८९ ॥ |
| यदङ्गनारुपसरुपतायाः किंचिद्गुणं भेदकनिच्छतीभिः । आराधितो द्धा मनुरप्सराभिश्चक्रे प्रजाः स्वाः सनिमेषचिह्नाः ॥ शिशुपालवधम् ३.४१ ॥ |
| यदङ्गभूमी बभतुः स्वयोषितामुरोजपत्त्रावलिनेत्रकज्जले । रणस्थलस्थण्डिलशायिताव्रतैर्गृहीतदीक्षैरिव दक्षिणीकृते ॥ नैषधीयचरितम् १६.२२ ॥ |
| यदचेतनोऽपि पादैः स्पृष्ट प्रज्वलति सवितुरिनकान्तः। तत्तेजस्वी पुरुषः परकृत निकृतिं कथं सहते॥ नीतिशतकम् ॥ ३७ ॥ |
| यदतनुज्वरभाक्तनुते स्म सा प्रियकथासरसीरसमञ्जनम् । सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ॥ नैषधीयचरितम् ४.२ ॥ |
| यदतनुस्त्वमिदं जगते हितं क्व स मुनिस्तव यः सहते हतीः । विशिखमाश्रवणं परिपूर्य चेदविचलद्भुजमुज्झितुमीशिषे ॥ नैषधीयचरितम् ४.९४ ॥ |
| यदतिमहती भक्तिर्भानौ तदेनमुदित्वरं त्वरितमुपतिष्ठस्वाध्वन्य त्वमध्वरपद्धतेः । इह हि समये मन्देहेषु व्रजन्त्युदवज्रतामभि रविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल ॥ नैषधीयचरितम् १९.४१ ॥ |
| यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः । अलभत शमनस्वसुः शिशुत्वं दिवसकराङ्कतले चला लुठन्ति ॥ नैषधीयचरितम् २.१०३ ॥ |
| यदधोऽधः क्षितौ वित्तं निचखान मितम्पचः । तदधो निलयं गन्तुं चक्रे पन्थानमग्रतः ॥ नीतिसंग्रहस्य मित्र-१.१५० ॥ |
| यदनर्गलगोपुराननस्त्वमितो वक्ष्यसि किञ्चिदप्रियं । विवरिष्यति तच्चिरस्य नः समयोद्वीक्षणरक्षितां क्रुधं ॥ शिशुपालवधम् १६.३७ ॥ |
| यदपूपुजस्त्वमिह पार्थ मुरजितमपूजितं सतां । प्रेम विलसति महत्तदहो दयितं जनः खलु गुणीति मन्यते ॥ शिशुपालवधम् १५.१४ ॥ |
| यदपूरि पुरा महीपतिर्न मुखेन स्वयमगसा शतं । अथ संप्रति पर्यपूपुरत्तदसौ दूतमुखेन शार्ङ्गिणः ॥ शिशुपालवधम् १६.३६ ॥ |
| यदम्बुपूरप्रतिबिम्बितायतिर्मरुत्तरङ्गैस्तरलस्तटद्रुमः । निमज्ज्य मैनाकमहीभृतः सतस्ततान पक्षान्धुवतः सपक्षताम् ॥ नैषधीयचरितम् १.११६ ॥ |

| |
|---|
| यदराज्ञि राजवदिहार्घ्यमुपहितमिदं मुरद्विषि । ग्राम्यमृग इव हविस्तदयं भजते ज्वलत्सु न महीशवह्निषु ॥ शिशुपालवधम् १५.१५ ॥ |
| यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् । कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥ नैषधीयचरितम् २.११ ॥ |
| यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा । अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ किरातार्जुनीयम् २.२ ॥ |
| यदशक्यं न तच्छक्त्यं यच्छक्त्यं शक्यमेव तत् । नोदके शकटं याति न च नौर्गच्छति स्थले ॥ नीतिसंग्रहस्य मित्र-१.९१ ॥ |
| यदष्यपीता वसुधालयैः सुधा तदप्यदः स्वादु ततोऽनुमीयते । अपि क्रतूषर्बुधदग्धगन्धिने स्पृहां यदस्मै दधते सुधान्धसः ॥ नैषधीयचरितम् १६.७१ ॥ |
| यदस्य भूलोकभुजो भुजोष्मभिस्तपर्तुरेव क्रियतेऽरिवेश्मनि । प्रपां न तत्रारिवधूस्तपस्विनी ददातु नेत्रोत्पलवासिभिर्जलैः ॥ नैषधीयचरितम् १२.७२ ॥ |
| यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम । तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥ नैषधीयचरितम् १.८ ॥ |
| यदस्याः पत्युर्वा रहसि परमन्त्रायितमभूदभूवं दम्पत्योः पृथगहमुपालम्भविषयः । प्रसादे कोषे वा तदनु मदधीनो विधिरभू- दलं वा तत्स्मृत्वा दहति यदवस्कन्द्य दयम् ॥ (उत्तररामचरितम् ४.१४) |
| यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवं तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः । यदा किञ्चित् किञ्चित् बुधजनसकाशादवगतं तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ पुरुषार्थोपदेशः-49॥ |
| यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः । यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ नीतिशतकम्८ ॥ |
| यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती । तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम् ॥ कुमारसंभवम् ५.५९ ॥ |
| यदा तु भाग्यक्षयपीड़ितां दशां नरः कृतान्तोपहितां प्रपद्यते। तदास्य मित्राण्यपि यान्त्यमित्रतां चिरानुरक्तोऽपि विरज्यते जनः॥ (मृच्छकटिकम् १.५३) |
| यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितम् । तदानपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥ कुमारसंभवम् ५.१८ ॥ |
| यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनम् । इति स्वहस्तोल्लिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः ॥ कुमारसंभवम् ५.५८ ॥ |
| यदा मेरुः श्रीमान् निपतति युगान्ताग्निदलितः समुद्राः शुष्यन्ति प्रचुरमकरग्राहसलिलाः। धरा गच्छत्यन्तं धरणिधरपादैरपि धृता शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ पुरुषार्थोपदेशः-88॥ |
| यदा लग्नांशेशो लवमथ तनुं पश्यति युतो भवेद्वाऽयं वोढुः शुभफलमनल्पं रचयति । लवद्यूनस्वामी लवमदनभं लग्नमदनं प्रपश्येद्वा वध्वाः शुभमितरथा ज्ञेयमशुभम् ॥ मुहूर्त.विवाहप्रकरणम् ७६॥ |
| यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः । जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥ रघुवंशम् ३.४८ ॥ |
| यदादिहेतुः सुरभिः समुद्भवे भवेद्यदाज्यं सुरभिर्ध्रुवं ततः । वधूभिरेभ्यः प्रवितीर्य पायसं तदोघकुल्यातटसैकतं कृतम् ॥ नैषधीयचरितम् १६.७ ॥ |
| यदापवार्यापि न दातुमुत्तरं शशाक सख्याः श्रवसि प्रियस्य सा । विहस्य सख्येव तमब्रवीत्तदा ह्रियाऽधुना मौनधना भवत्प्रिया ॥ नैषधीयचरितम् ९.१४२ ॥ |
| यदाभूदज्ञानं स्मरतिमिरसंस्कारजनितं तदा दृष्टं नारीमयमिदमशेषं जगदिति । इदानीमस्माकं पटुतरविवेकाञ्जनजुषां समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म तनुते ॥ पुरुषार्थोपदेशः-99॥ |
| यदासत्सङ्गरहितो भविष्यसि भविष्यसि । यदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ नीतिसंग्रहस्य मित्र-१.१९२ ॥ |
| यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात् । पारेपरार्धं गणितं यदि स्याद्गणेयनिः शेषगुणोऽपि स स्यात् ॥ नैषधीयचरितम् ३.४ ॥ |
| यदि नाङ्गनेति मतिरस्य मृदुरजनि पूतनां प्रति । स्तन्यमघृणमनसः पिबतः किल धर्मतो भवति सा जनन्यपि ॥ शिशुपालवधम् १५.३६ ॥ |
| यदि नित्यमनित्येन निर्मलं मलवाहिना । यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ॥ नीतिसंग्रहस्य मित्र-१.४८ ॥ |
| यदि पृच्छितनौ वसुधा रुचिरा शुभवस्तु यदि श्रुतिदर्शनगम् । यदि पृच्छति चादरतश्च शुभग्रहदृष्टयुतं चरलग्नमपि ॥ मुहूर्त.यात्राप्रकरणम् ४॥ |
| यदि प्रसादीकुरुते सुधांशेरेषा सहस्रांशमपि स्मितस्य । तत्कौमुदीनां कुरुते तमेव निमिच्छय देवः सफलं स जन्म ॥ नैषधीयचरितम् ७.४३ ॥ |
| यदि भवति सितातिरिक्तपक्षे तनुगृहतः समराशिगः शशाङ्कः । अशुभखचरवीक्षितोऽरिरन्ध्रे भवति विवाहविनाशकारकोऽयम् ॥ मुहूर्त.विवाहप्रकरणम् ६॥ |
| यदि मनसि शमः किं अङ्ग चापं शठ विषयास्तव वल्लभा न मुक्तिः । भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशं ॥ किरातार्जुनीयम् १०.५५ ॥ |
| यदि मयि लघिमानमागतायां तव धृतिरस्ति गतास्मि सम्प्रतीयम् । द्रुततरपदपातमापपात प्रियमिति कोपपदेन कापि संख्या ॥ शिशुपालवधम् ७.१४ ॥ |
| यदि मास्सु चतुर्षु पौषमासादिषु वृष्टिर्हि भवेदकालवृष्टिः । पशुमर्त्यपदाङ्किता न यावद्वसुधा स्यान्न हि तावदत्र दोषः ॥ मुहूर्त.यात्राप्रकरणम् ९८॥ |
| यदि वार्चनीयतम एष किमपि भवतां पृथासुताः । शौरिरवनिपतिभिर्निखिलैरवमाननार्थमिह किं निमन्त्रितैः ॥ शिशुपालवधम् १५.१८ ॥ |
| यदि स्वभावान्मम नोज्ज्वलं कुलं ततस्तदुद्भावनमौचिती कुतः । अथावदातं तदहो विडम्बना तथा कथा प्रेष्यतयोपसेदुषः ॥ नैषधीयचरितम् ९.१ ॥ |

| |
|---|
| यदि स्वमुद्बन्धुमना विना नलं भवेर्भवन्तीं हरिरन्तरिक्षागाम् । दिविस्थितानां प्रथितः पतिस्ततो हरिष्यति न्याय्यमुपेक्षते हि कः ॥ नैषधीयचरितम् ९.४६ ॥ |
| यदुच्यते पार्वति ! पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः । तथा हि ते शीलमुदारदर्शने ! तपस्विनामप्युपदेशतां गतम् ॥ कुमारसंभवम् ५.३६ ॥ |
| यदुत्पतत्पृथुतरहारमण्डलं व्यवर्तत द्रुतमभिदूतमुल्मुकः । बृहच्छिलातलकठिनांसघट्टितं ततोऽभवद्भ्रमितामिवाखिलं सदः ॥ शिशुपालवधम् १७..५ ॥ |
| यदुभर्तुरागमनलब्धजन्मनः प्रमदादमानिव पुरे महीयसि । सहसा ततः स सहितोऽनुजन्मभिर्वसुधाधिपोऽभिमुखमस्यनिर्ययौ ॥ शिशुपालवधम् १३.२ ॥ |
| यदृच्छासंवादः किमु गुणगणानामतिशयः पुराणो वा जन्मान्तरनिबिडबद्धः परिचयः । निजो वा संबन्धः किमु विधिवशात्कोऽप्यविदितो ममैतस्मिन्दृष्टे दयमवधानं रचयति<br><br>॥ (उत्तररामचरितम् ५.१६) |
| यदेतत् स्वाच्छन्द्यं विहरणमकार्पण्यमशनं सहार्यैः संवासः श्रुतमुपशमैकाश्रयफलम् । मनो मन्दस्पन्दं बहिरिति चिरस्यापि विमृशन् न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ पुरुषार्थोपदेशः-70॥ |
| यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं सहार्यैः संवासः श्रुतमुपशमैक-व्रत-फलम् । मनो मन्द-स्पन्दं बहिरपि चिरस्यापि विमृशन्न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ वैराग्यशतकम् ८२ ॥ |
| यदेतदस्यानुतटं विभाति वनं ततानेकतमालतालम् । न पुष्पितात्र स्थगितार्करस्मावनान्तताने कतमा लतालं ॥ शिशुपालवधम् ४.३९॥ |
| यद् व्यज्यमानं मनसः स्तैमित्याय स नो ध्वनिः । अन्यथा तु गुणीभूत-व्यङ्ग्यमापतितं त्रिधा ॥ चन्द्रालोकः८.१ ॥ |
| यद्ददाति यदश्नाति तदेव धनिनो धनम् । अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि  ॥ नीतिसंग्रहस्य मित्र-१.१६१ ॥ |
| यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने । तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि  ॥ नीतिसंग्रहस्य मित्र-१.१६२ ॥ |
| यद्धात्रा निजभालपट्टलिखितं स्तोकं महद् वा धनं तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् । तद् धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ नीतिशतकम्४९  ॥ |
| यद्भं द्व्यङ्कसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात् स्वं वर्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितम् । काकिण्यस्त्वनयोश्च तद्विवरतो यस्याधिकाः सोऽर्थदो- ऽथ द्वारं द्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः ॥ मुहूर्त.वास्तुप्रकरणम् १॥ |
| यद्भर्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा ध्रुवं दैग्दाहैरिव भस्मभिर्मघवता वृष्टैर्धृतोद्धूलना । शंभोर्मा बत सांधिवेलनटनं भाजि व्रतं द्रागिति क्षोणी नृत्यति मूर्तिरष्टवपुषोऽसृग्वृष्टिसंध्याधिया ॥ नैषधीयचरितम् १२.९२ ॥ |
| यद्यदेव रुरुचे रुचिरेभ्यः सुभ्रुवो रहसि तदकुर्वन् । आनुकूलिकतया हि नराणामाक्षिपन्ति हृदयानि तरुण्यः ॥ शिशुपालवधम् १०.७९ ॥ |
| यद्यदेव हि वाञ्छेत ततो वाञ्छा प्रवर्तते । प्राप्त एवार्थतः सोऽर्थो यतो वाञ्छा निवर्तते  ॥ नीतिसंग्रहस्य मित्र-१.१८० ॥ |
| यद्यप्यहं कृत परश्शत पाप- पीनः, मातस्तथापि शिशुरस्मि न तावकीनः । तन्मे कृपां कुरु कृपामयि! यद् लसद्भा मद्भारती भवतु भारत भूमि भूषा ॥ प्रतापविजयः-६॥ |
| यद्येकस्मिन् दिवसे महीपतेर्निर्गमप्रवेशौ स्तः । तर्हि विचार्यः सुधिया प्रवेशकालो न यात्रिकस्तत्र ॥ मुहूर्त.यात्राप्रकरणम् ८१॥ |
| यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् । अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति  ॥ नीतिसंग्रहस्य मित्र-१.५४ ॥ |
| यद्वस्तुनोऽन्यथारूपं तथा स्यात्पूर्वरूपता । दीपे निर्वापिते ह्यासीत्काञ्चीरत्नैरहर्महः ॥ चन्द्रालोकः ५.१०४ ॥ |
| यन्तोऽस्पृशन्तश्चरणैरिवावनिं जवात्प्रकीर्णैरभितः प्रकीर्णकैः । अद्यापि सेनातुरगाः सविस्मयैरलूनपक्षा इव मेनिरे जनैः ॥ शिशुपालवधम् १२.१७ ॥ |
| यन्त्रप्रवाहैः शिशिरैः परीतान्रसेन धौतान्मलयोद्भवस्य । शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपं ऋद्धिमन्तः ॥ रघुवंशम् १६.४९ ॥ |
| यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् । कथाच्छलेन बालानां नीतिस्तदिह कथ्यते  ॥ नीतिसंग्रहस्य मित्र- ०. 5 ॥ |
| यन्मतौ विमलदर्पणिकायां संमुखस्थमखिलं खलु तत्त्वम् । तेऽपि किं वितरथेदृशमाज्ञां या न यस्य सदृशी वितरीतुम् ॥ नैषधीयचरितम् ५.१०६ ॥ |
| यन्मुखग्रहणमक्षताधरं दानमव्रणपदं नखस्य यत् । यद्रतं च सदयं प्रियस्य तत्पार्वती विषहते स्म नेतरत्॥ कुमारसंभवम् ७.९॥ |
| यन्मौलिरत्नमुदितासि स एष जम्बूद्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति । दोलायितेन बहुना भवभीतिकम्प्रः कंदर्पलोक इव खात्पतितस्त्रुटित्वा ॥ नैषधीयचरितम् ११.८३ ॥ |
| यमनियमकृशीकृतस्थिराङ्गः परिददृशे विधृतायुधः स ताभिः । अनुपमशमदीप्ततागरीयान्कृतपदपङ्क्तिरथर्वणेव वेदः ॥ किरातार्जुनीयम् १०.१० ॥ |
| यमात्मनः सद्मनि संनिकृष्टो मन्द्रध्वनित्याजितयामतूर्यः । प्रासादवातायनदृष्यवीचिः प्रबोधयत्यर्णव एव सुप्तं ॥ रघुवंशम् ६.५६ ॥ |
| यमुनामतीतमथ शुश्रुवानमुं तपसस्तनूज इति नाधुनोच्यते । स यदाचलन्निजपुरादहर्निशं नृपतेस्तदादि समचारि वार्तया ॥ शिशुपालवधम् १३.१ ॥ |
| यमेन जिह्वा प्रहितेव या निजा तमात्मजां याचितुमर्थिना भृशम् । स तां ददेऽस्मै परिवारशोभिनीं करग्रहार्हामसिपुत्रिकामपि ॥ नैषधीयचरितम् १६.२१ ॥ |

| |
|---|
| यया पूतंमन्यो निधिरपि पवित्रस्य महसः पतिस्ते पूर्वेषामपि खलु गुरूणां गुरूतमः । त्रिलोकीमङ्गल्यामवनितललीनेन शिरसा जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ (उत्तररामचरितम् ४.१०) |
| यया समासादितसाधनेन सुदुश्चरामाचरता तपस्यां । एते दुरापं समवाप्य वीर्यमुन्मीलितारः कपिकेतनेन ॥ किरातार्जुनीयम् ३.२२ ॥ |
| ययौ विमृश्योर्ध्वदिशः पतिर्न स्वयंवरं वीक्षितधर्मशास्त्रः । व्यलोकि लोके श्रुतिषु स्मृतौ वा समं विवाहः क्व पितामहेन ॥ नैषधीयचरितम् १०.१६ ॥ |
| यशः पदाङ्गुष्ठनखौ मुखं च बिभर्ति पूर्णेन्दुचतुष्टयं या । कलाचतुःषष्टिरुपैतु वासं तस्यां कथं सुभ्रुवि नाम नास्याम् ॥ नैषधीयचरितम् ७.१०७ ॥ |
| यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः । कवचं च सरत्नमुद्वहञ्ज्वलितज्योतिरिवान्तरं दिवः ॥ किरातार्जुनीयम् ३.५८ ॥ |
| यशो यदस्याजनि संयुगेषु कण्डूलभावं भजता भुजेन । हेतोर्गुणादेव दिगापगालीकूलंकषत्वव्यसनं तदीयम् ॥ नैषधीयचरितम् ३.३९ ॥ |
| यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा । निरुत्सुकानामभियोग्गभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ किरातार्जुनीयम् ३.४० ॥ |
| यशोभिराब्रह्मसभं प्रकाशः सम्यग्महीं शासति शासनाङ्कां । प्रजाश्चिरं सुप्रजसि प्रजेशे ननन्दुरानन्दजलाविलाक्ष्यः ॥ रघुवंशम् १८.२९ ॥ |
| यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति । बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ॥ कुमारसंभवम् १.४ ॥ |
| यष्टुं इच्छसि पितॄन्न साम्प्रतं संवृतोऽर्चिचयिषुर्दिवौकसः । दातुमेव पदवीं अपि क्षमः किं मृगेऽङ्ग विशिखं न्यवीविशः ॥ किरातार्जुनीयम् १३.६५ ॥ |
| यस्तन्वि भर्ता घुसृणेन सायं दिशः समालम्भनकौतुकिन्याः । तदा स चेतः प्रजिघाय तुभ्यं यदा गतो नैति निवृत्य पान्थः ॥ नैषधीयचरितम् ८.८ ॥ |
| यस्तवेह सवने न भूपतिः कर्म कर्मकरवत्करिष्यति । तस्य नेष्यति वपुः कबन्धतां बन्धुरेव जगतां सुदर्शनः ॥ शिशुपालवधम् १४.१६ ॥ |
| यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्ते । नैषधीयचरितम्अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव ॥ नैषधीयचरितम् ३.१२१ ॥ |
| यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभमात्मकर्म । तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति ॥ नीतिसंग्रहस्य मित्र-१.४० ॥ |
| यस्मादन्तःस्थितः सर्वः स्वयमर्थोऽवभासते । सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः ॥ चन्द्रालोकः४.३ ॥ |
| यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवः । न च विद्यागमः कश्चित्तं देशं परिवर्जयेत् ॥ नीतिसंग्रहस्य मित्र-१.१०८ ॥ |
| यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि । धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः ॥ किरातार्जुनीयम् ३.१९ ॥ |
| यस्मिन्नलस्पृष्टकमेत्य हृष्टा भूयोऽपि तं देशमगान्मृगाक्षी । निपत्य तत्रास्य धरारजःस्थे पादे प्रसीदेति शनैरवादीत् ॥ नैषधीयचरितम् ६.३५ ॥ |
| यस्मिन्नुपहतो लुप्तो विसर्ग इह तत्तथा । कुसन्धिः पटवागच्छ विसन्धिर्नृपती इमौ ॥ चन्द्रालोकः२.१६ ॥ |
| यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानां । वातोऽपि नासरंसयदंशुकानि को लम्बयेदाहरणाय हस्तम् ॥ रघुवंशम् ६.७५ ॥ |
| यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः । स न जिग्ये महान्तो हि दुर्धर्षाः क्ष्माधरा इव ॥ चन्द्रालोकः ५.६९ ॥ |
| यस्य कस्य प्रसूतोऽपि गुणवान् पूज्यते नरः । धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥ नीतिसंग्रहस्य मित्र-०.15 ॥ |
| यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः । कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते ॥ शिशुपालवधम् १४.७८ ॥ |
| यस्य त्वया व्रणविरोपणमिङ्गुदीनाम् तैलं न्यषिच्यत मुखे कुशसूचिविद्धे । श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ अभिज्ञानशाकुन्तलम् ४.१४ ॥ |
| यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः । यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥ नीतिसंग्रहस्य मित्र-१.३९ ॥ |
| यस्या महानीलतटीरिव द्रुताः प्रयान्ति पीत्वा हिमपिण्डपाण्डुराः । कालीरपास्ताभिरिवानुरञ्जिताः क्षणेन भिन्नाञ्जनवर्ता घनाः ॥ शिशुपालवधम् १२.६८ ॥ |
| यस्या विभोरखिलवाङ्मयविस्तरोऽयमाख्यायते परिणतिर्मुनिभिः पुनः सा । उद्गत्वरामृतकरार्धपरार्ध्यभालां बालामभाषत सभासततप्रगल्भा ॥ नैषधीयचरितम् ११.१६ ॥ |
| यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे यत्सम्बन्धकथाभिरेव सततं दीर्घाभिरास्थीयत । एकः सम्प्रति नाशितप्रियतमस्तामेव रामः कथं पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा ॥ (उत्तररामचरितम् २.२८) |
| यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचनान्युत्तमस्त्रीसहायाः । आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ मेघदूतम्, उत्तरमेघः ३ ॥ |
| यस्याः कृते न गणिता विकटाऽटवी सा सन्धाविताश्च शतशो बत शैल-खण्डाः । स्वाधीनतामयि सुकुन्त! गृहाण तां त्वं, सद्योऽद्य नृत्तरत! कृत्तसलीम- मौलिः ॥ प्रतापविजयः-१४५ ॥ |
| यस्यामजिह्मा महतीमपङ्काः सीमानमत्यायतयोऽत्यजन्तः । जनैरजातस्खलनैर्न जातु द्वये प्यमुच्यन्त विनीतमार्गाः ॥ शिशुपालवधम् ३.५६ ॥ |
| यस्यामतिश्लक्ष्णतया गृहेषु विधातुमालेख्यमशक्नुवन्तः । चक्रुर्युवानः प्रतिबिम्बिताङ्गाः सजीवचित्रा इव रत्नभित्तीः ॥ शिशुपालवधम् ३.४५ ॥ |
| यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः । यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥ नीतिसंग्रहस्य मित्र-१.१२० ॥ |

| |
|---|
| यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले । कलिन्दकन्या मथुरां गताऽपि गङ्गोर्मिसंसक्त जलेव भाति ॥ रघुवंशम् ६.४८ ॥ |
| यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छङ्खक्युलाकुलेन । वप्रेण पर्यन्तचरोडुचक्रः सुमेरुवप्रो न्वहमन्वकारि ॥ शिशुपालवधम् ३.३६ ॥ |
| यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः । स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ नीतिशतकम्४१ ॥ |
| यस्यास्तीरे निचितशिखरः पेशलैरिन्द्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः । मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ मेघदूतम्, उत्तरमेघः ११ ॥ |
| यस्येश्वरेण यदलेखि ललाटपट्टे तत्स्यादयोग्यमपि योग्यमपास्य तस्य । का वासनास्तु बिभृयामिह यां हृदाहं नार्कातपैर्जलजमेति हिमैस्तु दाहम् ॥ नैषधीयचरितम् १३.५ ॥ |
| यस्य्ऽ आत्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संनिविष्ट । हर्म्याग्रसंरूढतृणाङ्कुरेषु तेजोऽविशह्यं रिपुमन्दिरेषु ॥ रघुवंशम् ६.४७ ॥ |
| या कथञ्चाचन सखीवचनेन प्रागभिप्रियतमं प्रजगल्भे । व्रीडाजाड्यमभजन्मधुपा सा स्वां मदात्प्रकृतिमेति हि सर्वः ॥ शिशुपालवधम् १०.१८ ॥ |
| या घर्मभानोस्तनयापि शीतलैः स्वसा यमस्यापि जनस्य जीवनैः । कृष्णापि शुद्धेरधिकं विधातृभिर्विहन्तुमहांसि जलैः पटीयसी ॥ शिशुपालवधम् १२.६७ ॥ |
| या दाहपाकौपयिकी तनुर्मे भूयात्त्वदिच्छावशवर्तिनी सा । तया पराभूततनोरनङ्गात्तस्याः प्रभुः सन्नधिकस्त्वमेधि ॥ नैषधीयचरितम् १४.७७ ॥ |
| या न ययौ प्रियमन्यवधूभ्यः सारतरागमना यतमानं । तेन सहेत बिभर्ति रसः स्त्री सा रतरागमनायतानां ॥ शिशुपालवधम् ४.४५॥ |
| या पाशिनैवाशनिपाणिनैव गाथा यमेनैव समाग्निनैव । तामेव मेने मिलितां नलस्य सैषा विशेषाय तदा नलस्य ॥ नैषधीयचरितम् १४.१२ ॥ |
| या बिभर्ति कलवल्लकीगुणस्वानमानमतिकालिमालया । नात्र कान्तमुपगीतया तया स्वानमानमति कालिमालया ॥ शिशुपालवधम् ४.५७॥ |
| या मञ्जुनपुररवैः रमणी-मणीनां, पीयूषतोऽपि मधुरैर्मधुरा पुराऽऽसीत् । श्रेयं "चित्तौड़" नगरी नगरीष्वनन्या, कस्याऽद्य नैव हृदयं हठतो दुनोति ॥ प्रतापविजयः-५४॥ |
| या सर्वतोमुखतया व्यवतिष्ठमाना यादोरणैर्जयति नैकविदारका या । एतस्य भूरितरवारिनिधिश्चमूः सा यस्याः प्रतीतिविषयः परतो न रोधः ॥ नैषधीयचरितम् १३.२२ ॥ |
| या साधूंश्च खलान् करोति विदुषो मूर्खान् हितान्द्वेषिणः प्रत्यक्षं कुरुते परीक्षममृतं हालाहलं तत्क्षणात् । तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं हे साधो! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥ नीतिशतकम्९८ ॥ |
| या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ अभिज्ञानशाकुन्तलम् १.१ ॥ |
| या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव । विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव ॥ नैषधीयचरितम् १०.८८ ॥ |
| यां चन्द्रकैर्मदजलस्य महानदीनां नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः । तां प्रत्यवापुरविलम्बितमुत्तरन्तो धौताङ्गलग्ननवनीलपयोजवस्त्रैः ॥ शिशुपालवधम् ५.४० ॥ |
| यां चिन्तयामि सततं मयि सा विरक्ता साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः। अस्मत्कृते च परितुष्यति काचिदन्या धिक् तां च तञ्च मदनञ्च इमाञ्च माञ्च ॥ नीतिशतकम् २ ॥ |
| यां मनोरथमयीं हृदि कृत्वा यः श्वसिम्यथ कथं स तदग्रे । भावगुप्तिमविलम्बितुमीशे दुर्जया हि विषया विदुषापि ॥ नैषधीयचरितम् ५.१०९ ॥ |
| यां यां प्रियः प्रैक्षत कातराक्षीं सा सा ह्रिया नम्रमुखी बभूव । निःशङ्कमन्याः सममाहितेर्ष्यैस्तत्रान्तरे जघ्नुरमुं कटाक्षैः ॥ शिशुपालवधम् ३.१५ ॥ |
| यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् । सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानाम् ॥ रघुवंशम् १३.६२ ॥ |
| याऽऽसीत् पुरा हरितशस्यदलाऽभिरामा, स्निग्धाभ्रनील-वसना कृत-सर्वकामा । सा जन्म-भूः प्रतिपदं नररक्तरक्ताऽ- भक्ताऽद्य जीवति कथञ्चिदहोऽत्यशक्ता ॥ प्रतापविजयः-५५॥ |
| याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य । तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥ नैषधीयचरितम् ५.८८ ॥ |
| याचितश्चिरयति क्व नु धीरः प्राणने क्षणमपि प्रतिभूः कः । शंसति द्विनयनी दृढनिद्रां द्राङ्निमेषमिषघूर्णनपूर्णा ॥ नैषधीयचरितम् ५.१२६ ॥ |
| याचे नलं किमिमरानथवा तदर्थं नित्यार्चनादपि ममाफलिनैरलं तैः । कंदर्पशोषणशिलीमुखपातपीतकारुण्यनीरनिधिगह्वरधोरचित्तैः ॥ नैषधीयचरितम् १३.४८ ॥ |
| यातस्य ग्रथिततरङ्गसैकताभे विच्छेदं विपयसि वारिवाहजाले । आतेनुस्त्रिदशवधूजनाङ्गभाजां संधानं सुरधनुषः प्रभा मणीनां ॥ किरातार्जुनीयम् ७.१६ ॥ |
| याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्या नितरां कृशामि कथयत्येवं सबाष्पे मयि । लज्जामन्थरतारकेण निपतद्धाराश्रुणा चक्षुषा दृष्ट्वा मां हासितेन भाविमरणोत्साहस्तया सूचितः ॥ अमरुशतकम्-१०॥ |
| यातैश्चातुर्विध्यमस्त्रादिभेदादव्यासङ्गैः सौष्ठवाल्लाघवाच्च । शिक्षाशक्तिं प्राहरन्दर्शयन्तो मुक्तामुक्तैरायुधैरायुधीयाः ॥ शिशुपालवधम् १८.११ ॥ |
| यात्रानिवृत्तौ शुभदं प्रवेशनं मृदुध्रुवैः क्षिप्रचरैः पुनर्गमः । द्वीशेऽनले दारुणभे तथोग्रभे स्त्रीगेहपुत्रात्मविनाशनं क्रमात् ॥ मुहूर्त.यात्राप्रकरणम् १०९॥ |
| यात्रायां प्रविदितजन्मनां नृपाणां दातव्यं दिवसमबुद्धजन्मनां च । प्रश्नाद्यैरुदयनिमित्तमूलभूतैर्विज्ञाते ह्यशुभशुभे बुधः प्रदद्यात् ॥ मुहूर्त.यात्राप्रकरणम् १॥ |
| यानाज्जनः परिजनैरवतार्यमाणा राज्ञीर्नरापनयनाकुलसौविदल्लाः । स्रस्तावगुण्ठनपटाः क्षणलक्ष्यमाण-वक्रश्रियः सभयकौतुकमीक्षते स्म ॥ शिशुपालवधम् ५.१७ ॥ |
| यानि कानि च मित्राणि कर्तव्यानि शतानि च । पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥ नीतिसंग्रहस्य मित्र-१.५३ ॥ |
| यानेन तन्व्या जितदन्तिनाथौ पादाब्जराजौ परिशुद्धपार्ष्णी । जाने न शुश्रूषयितुं स्वमिच्छू नतेन मूर्ध्ना कतरस्य राज्ञः ॥ नैषधीयचरितम् ७.१०२ ॥ |
| यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते । प्रसीद तानप्यनृणान्विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसंध्यम् ॥ नैषधीयचरितम् ६.८५ ॥ |

| |
|---|
| यान्तीनां सममसितभ्रुवां नतत्वादंसानां महति नितान्तमन्तरेऽपि. । संसक्तैर्विपुलतया मिथो नितम्बैः सम्बाधं बृहदपि तद्बभूव वर्त्म ॥ शिशुपालवधम् ८.२ ॥ |
| यान्वरं प्रति परेऽर्थयितारस्तेऽपि यं वयमहो स पुनस्त्वम् । नैव नः खलु मनोरथमात्रं शूर पूरय दिशोऽपि यशोभिः ॥ नैषधीयचरितम् ५.१३२ ॥ |
| यापदृष्टिरपि या मुखमुद्रा याचमानमनु या च न तुष्टिः । त्वादृशस्य सकलः स कलङ्कः शीतभासि शशकः परमङ्कः ॥ नैषधीयचरितम् ५.१२ ॥ |
| याबभार कृतानेकमाया सेना ससारतां । धनुः स कर्षन्रहितमायासेनाससार तां ॥ शिशुपालवधम् १९.१५ ॥ |
| यामि यामिह वरीतुमहो तद्दूततां नु करवाणि कथं वः । ईदृशां न महतां बत जाता वञ्चने मम तृणस्य घृणापि ॥ नैषधीयचरितम् ५.१०७ ॥ |
| यामिकाननुपमृद्य च मादृक् तां निरीक्षितुमपि क्षमते कः । रक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारी ॥ नैषधीयचरितम् ५.११ ॥ |
| यामूढवानूढवराहमूर्तिर्मुहूर्तमादौ पुरुषः पुराणः । तेनोह्यते सांप्रतमक्षतैव क्षतारिणा सम्यगसौ पुनर्भूः ॥ शिशुपालवधम् १६.८१ ॥ |
| याम्यत्रयविशाखेन्द्रसार्पपित्र्येशभिन्नभे । भृग्विज्यार्कदिने नौकाघटं सत्तनौ शुभम् ॥ मुहूर्त.नक्षत्रप्रकरणम् ३८॥ |
| याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः । षडशीत्यानने सौम्ये परा नाड्योऽतिपुण्यदाः ॥ मुहूर्त.संक्रान्तिप्रकरणम् ८॥ |
| यावच्चक्रे नाञ्जनं बोधनाय व्युत्थानज्ञो हस्तिचारी मदस्य । सेनास्वानाददन्तिनामात्मनैव स्थूलास्तावत्प्रावहन्दानकुल्याः ॥ शिशुपालवधम् १८.२६ ॥ |
| यावच्चन्द्रः पूषभात्कृत्तिकाद्ये पादे शुक्रोऽन्धो न दुष्टोऽग्रदक्षे । मध्येमार्गमार्गवास्तेऽपि राजा तावत्तिष्ठेत्सम्मुखत्वेऽपि तस्य ॥ मुहूर्त.यात्राप्रकरणम् ४२॥ |
| यावत्पौलस्त्यवास्तूभवदुभयहरिल्लोमलेखोत्तरीये सेतुप्रालेयशैलौ चरति नरपतेस्तावदेतस्य कीर्तिः । यावत्प्राक्प्रत्यगाशापरिवृढनगरारम्भणस्तम्भमुद्रावद्री संध्यापताकारुचिरचितशिखाशोणशोभावुभौ च ॥ नैषधीयचरितम् १२.४७ ॥ |
| यावत्प्रतापनिधिराक्रमते न भानुरहनाय तावदरुणेन तमो निरस्तम् । आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ॥ रघुवंशम् ५.७१ ॥ |
| यावत्प्रभाहतमदो मम भारतं मा, भूयः प्रभा-रतमलं भुवने भवेद्वै । तावत्कदापि कथमप्यति नैव नूनं, यास्यामि जन्मनगरं नगरं गरीयः ॥ प्रतापविजयः-५१ ॥ |
| यावत्स एव समयः सममेव तावदव्याकुलाः पटमयान्यभितो वितत्य । पर्यापतत्क्रयिकलोकमगण्यपण्य-पूर्णपणा विणुनो विपणीर्विभेजुः ॥ शिशुपालवधम् ५.२४ ॥ |
| यावत्स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा यावच्चेन्द्रिय-शक्तिरप्रतिहता यावत्क्षयो नायुषः। आत्म-श्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्सन्दीप्ते भवने तु कूप-खननं प्रत्युद्यमः कीदृशः॥॥ वैराग्यशतकम् ७५ ॥ |
| यावदागमयतेऽथ नरेन्द्रान्स स्वयंवरमहाय महीन्द्रः । तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥ नैषधीयचरितम् ५.१ ॥ |
| यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम् । तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः ॥ रघुवंशम् ११.३ ॥ |
| यावद्व्यगाहन्त न दन्तिनां घटास्तुरङ्गमैस्तावददुदीरितं खुरैः । क्षिप्तं समीरैः सरितां पुरः पतज्जलान्यनैषीद्रज एव पङ्कताम् ॥ शिशुपालवधम् १२.५८ ॥ |
| यावन्तमिन्दुं प्रतिपत्प्रसूते प्रासावि तावानयमब्धिनापि ।तत्कालमीशेन धृतस्य मूर्ध्नि विधोरणीयस्त्वमिहास्ति लिङ्गम् ॥ नैषधीयचरितम् २२.८५ ॥ |
| यावन्न सत्कृतैर्भर्तुः स्नेहस्यानृण्यमिच्छुभिः । अमर्षादितरैस्तावत्तत्यजे युधि जीवितं ॥ शिशुपालवधम् १९.५७ ॥ |
| यावश्चोतुमदो निशाञ्जनमथो कालागुरुश्चन्द्रको जातिर्दैवतभूतसर्पविहगाः पश्वेणविप्रास्ततः । क्षत्री वेश्यकशूद्रसङ्करभवाः पुष्पं च पुंनागकं जातीबांकुलकेतकानि च तथा विल्वार्कदूर्वाम्बुजम् ॥ मुहूर्त.संक्रान्तिप्रकरणम् १६ ॥ |
| यासां बलिः सपदि मद्गृहदेहलीनां हंसैश्च सारसगणैश्च विलुप्तपूर्वः। तास्वेव सम्प्रति विरूढतृणाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः॥ (मृच्छकटिकम् १.९) |
| यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् । वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ अभिज्ञानशाकुन्तलम् ४.६ ॥ |
| यास्यामिति समुद्यतस्य गदितं विस्रब्धमाकर्णितं गच्छन्दूरमुपेक्षितो मुहुरसौ व्यावृत्य तिष्ठन्नपि । तच्छून्ये पुनरास्थितास्मि भवने प्राणास्त एते दृढाः सख्यस्तिष्ठत जीवितव्यसनिनी दम्भादहं रोदिमि ॥ अमरुशतकम्-७७॥ |
| यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम् । वैद्यं प्रति प्रतिष्ठासुरासीत् कार्यद्वयाकुलः ॥ शिशुपालवधम् २.१ ॥ |
| यियासतस्तस्य महीध्ररन्ध्रभिदा पटीयान् पटहप्रणादः । जलान्तराणीव महार्णवौघः शब्दान्तराण्यन्तरयांचकार ॥ शिशुपालवधम् ३.२३ ॥ |
| यियासितामथ मधुभिद्विवस्वता जनो जरन्महिषविषाणधूसरां । पुरः पतत्परबलरेणुमालिनीमलक्षयद्दिशमभिधूमितामिव ॥ शिशुपालवधम् १७..४१ ॥ |
| युक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवन्तः । समुच्छिनत्सि त्वमचिन्त्यधामा कर्माण्युपेतस्य दुरुत्तराणि ॥ किरातार्जुनीयम् १८.२९ ॥ |
| युक्तार्थानां तां च विना खण्डवाक्यं स इष्यते । वाक्यं च खण्डवाक्यं च पदमेकमपि क्वचित् ॥ चन्द्रालोकः १.१४ ॥ |
| युक्तिर्विशेषसिद्धिश्चेद्विचित्रार्थान्तरान्वयात् । नवस्त्वं नीरदः कोऽपि स्वर्णैर्वर्षसि यन्मुहुः ॥ चन्द्रालोकः३.९ ॥ |
| युक्त्यास्वाद्यलसद्रसैकवसतिः साहित्यसारस्वत-क्षीराम्भोधिरगाधतामुपदधत्सेव्यः समाश्रीयताम् । श्रीरस्मादुपदेशकौशलमयं पीयूषमस्माज्जग-ज्जाग्रद्भासुरपद्मकेशरयशःशीतांशुरस्माद् बुधाः ॥ चन्द्रालोकः १.३ ॥ |

| |
|---|
| युगपदयुगसप्तिस्तुल्यसंख्यैर्मयूखैर्दशशतदलभेदं कौतुकेनाशुकृत्वा । श्रियमलिकुलगीतैर्लालितां पङ्कजान्तर्-भवनमधिशयानामादरात्पश्यतीव ॥ शिशुपालवधम् ११.६१ ॥ |
| युगपद्विकासमुदयाद्गमिते शशिनः शिलीमुखगणोऽलभत । द्रुतमेत्य पुष्पधनुषो धनुषः कुमुदेऽङ्गनामनसि चावसरम् ॥ शिशुपालवधम् ९.४१ ॥ |
| युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्याजामसंभवा मुदः ॥ शिशुपालवधम् १.२३ ॥ |
| युद्धमित्थं विधूतान्यमानवानभियो गतः । चैद्यः परान्पराजिग्ये मानवानभियोगतः ॥ शिशुपालवधम् १९.८२ ॥ |
| युद्ध्वा चामिमुखं रणस्य चरणस्यैवादसीयस्य वा बुद्ध्वाऽन्तः स्वपरान्तरं निपतताममुन्मुच्य बाणावलीः । छिन्नं वावनतीभवन्निजभियः खिन्नं भरेणाथ वा राज्ञानेन हठाद्विलोठितमभूद्भूमावरीणां शिरः ॥ नैषधीयचरितम् १२.४८ ॥ |
| युधे परैः सह दृढबद्धकक्षया कलक्वणन्मधुपकुलोपगीतया । अदीयत द्विपघटया सवारिभिः करोदरैः स्वयमथ दानमक्षयं ॥ शिशुपालवधम् १७..२४ ॥ |
| युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम् । स्मरेषुधीकृत्य धिया भयान्धया स पाटलायाः स्तबकं प्रकम्पितः ॥ नैषधीयचरितम् १.९५ ॥ |
| युवनोन्नतविलासिनीस्तनक्षोभलोलकमलाश्च दीर्घिकाः । गूढमोहनगृहास्तदम्बुभिः स व्यगाहत विगाढमन्मथः ॥ रघुवंशम् १९.९ ॥ |
| युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः । वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥ रघुवंशम् ३.३४ ॥ |
| युवा समादित्सुरमत्रगं घृतं विलोक्य तत्रैणदृशोऽनुबिम्बनम् । चकार तन्नीविनिवेशिनं करं बभूव तच्च स्फुटकण्टकोत्करम् ॥ नैषधीयचरितम् १६.८५ ॥ |
| युवानमालोक्य विदग्धशीलया स्वपाणिपाथोरुहनालनिर्मितः । श्लथोऽपि सख्यां परिधिः कलानिधौ दधावहो तं प्रति गाढबन्धताम् ॥ नैषधीयचरितम् १६.५९ ॥ |
| युवान्तरं सा वचसामधीश्वरा स्वरामृतन्यक्कृतमत्तकोकिला । शशंस संसक्तकरैव तद्दिशा निशापतिज्ञातिमुखीमिमां प्रति ॥ नैषधीयचरितम् १२.१४ ॥ |
| युवामिमे मे स्त्रितमे इतीरिणौ गले तथोक्ता निजगुच्छमेकिका । न भास्यदस्तुच्छगलो वदन्निति न्यधत्त जन्यस्य ततः पराकृषत् ॥ नैषधीयचरितम् १६.५१ ॥ |
| युष्मान्वृणीते न बहून्सतीयं शेषावमानाच्च भवत्सु नैकम् । तदवः समेतान्नृपमेनमंशान्वरीतुमन्विष्यति लोकपालाः ॥ नैषधीयचरितम् १४.४३ ॥ |
| यूनि रागतरलैरपि तिर्यक्पातिभिः श्रुतिगुणेन युतस्य । दीर्घदर्शिभिरकारि वधूनां लङ्घनं न नयनैः श्रवणस्य ॥ शिशुपालवधम् १०.४० ॥ |
| यूपवत्यवसिते किर्याविधौ कालवित्कुशिकवंशवर्धनः । राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयां ब्वभूव सः ॥ रघुवंशम् ११.३७ ॥ |
| यूयं वयं वयं यूयमित्यासीन्मतिरावयोः । तज्जातमधुना येन यूयं यूयं वयं वयम् ॥ पुरुषार्थोपदेशः-94॥ |
| ये त्वां मुक्तध्वनिमसहनाः कायभङ्गाय तस्मिन्दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम् । तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ मेघदूतम्, पूर्वमेघः ५४॥ |
| ये पक्षिणः प्रथममम्बुनिधिं गतास्ते येऽपीन्द्रपाणितुलायुधलूनपक्षाः । तेजग्मुरद्रिपतयः सरसीर्विगाढुं आक्षिप्तकेतुकुथसैन्यगजच्छलेन ॥ शिशुपालवधम् ५.३१ ॥ |
| ये वर्तन्ते धनपतिपुरः प्रार्थना-दुःख-भाजो ये चाल्पत्वं दधति विषयाक्षेप-पर्याप्त-बुद्धेः। तेषामन्तःस्फुरितहसितं वासराणि स्मरेयं ध्यानच्छेदे शिखरि-कुहर-ग्राव-शय्या-निषण्णः॥॥ वैराग्यशतकम् २८ ॥ |
| ये वर्धन्ते धनपतिपुरः प्रार्थनादीर्घदुःखा ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्वेः । तेषामन्तः स्फूतिहसितं वासराणं स्मरेयं ध्यानच्छेदे शिखरिशिखरग्रावशय्यानिषण्णाः ॥ पुरुषार्थोपदेशः-68॥ |
| ये षोडशाद्या द्विगुणास्ते स्युर्वाक्यपदाश्रयात् । प्रबन्धेऽपि द्वादश स्युरर्थशक्तिभुवो भिदः ॥ चन्द्रालोकः७.११ ॥ |
| ये सन्तोष-निरन्तर-प्रमुदितास्तेषां न भिन्ना मुदो ये त्वन्ये धन-लुब्ध-सङ्कल-धियस्तेषां न तृष्णाहता। इत्थं कस्य कृते कुतः स विधिना कीदृक्-पदं सम्पदां स्वात्मन्येव समाप्त-हेम-महिमा मेरुर्न मे रोचते॥॥ वैराग्यशतकम् २९ ॥ |
| ये हिरण्यकशिपुं रिपुमुच्चै रावणं च कुरुवीरचयं च । हन्त हन्तुमभवंस्तव योगास्ते नरस्य च हरेश्च जयन्ति ॥ नैषधीयचरितम् २१.१०२ ॥ |
| येन रोषपरुषात्मनः पितुः शासने स्थिभिदोऽपि तस्थुषा । वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥ रघुवंशम् ११.६५ ॥ |
| येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः । मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति  ॥ नीतिसंग्रहस्य मित्र-१.१७२ ॥ |
| येनाङ्गमूहे व्रणवत्सरुचा परतोऽमरैः । समत्वं स ययौ खड्गत्सरुचापरतोऽमरैः ॥ शिशुपालवधम् १९.७४ ॥ |
| येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे । व्यावर्तनैरहिपतेरयमाहिताङ्कः खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ किरातार्जुनीयम् ५.३० ॥ |
| येनामुना बहुविगाढसुरेश्वराध्वराज्याभिषेकविकसन्महसा बभूवे । आवर्जनं तमनु ते ननु साधु नामग्राहं मया नलमुदीरितमेवमत्र ॥ नैषधीयचरितम् १३.२९ ॥ |
| येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः। तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः ॥ पुरुषार्थोपदेशः-23॥ |
| येनोद्गच्छद्विसकिसलयस्निग्धदन्ताङ्कुरेण व्याकृष्टस्ते सुतनु ! लवलीपल्लवः कर्णमूलात् । सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥ (उत्तररामचरितम् ३.१५) |
| येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः । ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥ नीतिशतकम् १३ ॥ |

| |
|---|
| येषु येषु सरसा दमयन्ती भूषणेषु यदिवापि गुणेषु । तत्र तत्र कलयापि विशेषो यः स हि क्षितिभृतां पुरुषार्थः ॥ नैषधीयचरितम् ५.३२ ॥ |
| यैरन्वमायि ज्वलनस्तुषारे सरोजिनीदाहविकारहेतोः । तदीयधूमौघतया हिमांशौ शङ्के कलङ्कोऽपि समर्थितस्तैः ॥ नैषधीयचरितम् २२.९२ ॥ |
| यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि  ॥ नीतिसंग्रहस्य मित्र-१.२०० ॥ |
| यो बाह्यः स खलु जलैर्निरासि रागो यश्चित्ते स तु तदवस्थ एव तेषां । धीराणां व्रजति हि सर्व एव नान्तःपातित्वादभिभवनीयतां परस्य ॥ शिशुपालवधम् ८.५८ ॥ |
| यो मघोनि दिवमुच्चरमाणे रम्भया मलिनिमालमलम्भि । वर्ण एव स खलूज्ज्वलमस्याः शान्तमान्तरमभाषत भङ्ग्या ॥ नैषधीयचरितम् ५.४८ ॥ |
| योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम् । एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते  ॥ नीतिसंग्रहस्य मित्र-१.६७ ॥ |
| योऽधिकाद्योजनशतान् पश्यतीहामिषं खगः । स एव प्राप्तकालस्तु पाशबन्धं न पश्यति  ॥ नीतिसंग्रहस्य मित्र-१.५० ॥ |
| योगं च तं योग्यतमाय तस्मै तपःप्रभावाद्वितितार सद्यः । येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥ किरातार्जुनीयम् ३.२६ ॥ |
| योगनिद्रान्तविशदैः पावनैरवलोकनैः । भृग्वादीननुगृह्णन्तं सौख शायनिकानृषीन् ॥ रघुवंशम् १०.१४ ॥ |
| योगात्सिद्धिर्धरणिपतीनामृक्षगुणैरपि भूदेवानाम् । चौराणां शुभशकुनैरुक्ता भवति मुहूर्तादपि मनुजानाम् ॥ मुहूर्त.यात्राप्रकरणम् ५७॥ |
| योगे क्षेममथाधियोगगमने क्षेमं रिपूणां वधं चाथो क्षेमयशोवनीश्च लभते योगाधियोगे व्रजन् ॥ मुहूर्त.यात्राप्रकरणम् ७६॥ |
| योग्यस्य त्रिनयनलोचनार्चिर्निदग्धस्मरपूतनाधिराज्यलक्ष्म्याः । कान्तायाः करकलशोद्यतैः पयोभिरवक्त्रेन्दोरकृतमहाभिषेकमेकः ॥ शिशुपालवधम् ८.३३ ॥ |
| योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्तुम् । द्रष्टुं परैस्तान्परिकर्तुमन्यैः स्वमात्रशेषाः ककुभो बभूवुः ॥ नैषधीयचरितम् १०.३ ॥ |
| योषितः पतितकाञ्चनकाञ्चौ मोहनातिरभसेन नितम्बे । मेखलेव परितः स्म विचित्रा राजते वननखक्षतलक्ष्मीः ॥ शिशुपालवधम् १०.८५ ॥ |
| योषितः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म । कान्तवक्षसि बभूव पतन्त्या मण्डनं लुलितमण्डनतैव ॥ किरातार्जुनीयम् ९.४१ ॥ |
| योषितामतितरां नखलूनं गात्रमुज्जवलतया न खलूनं । क्षोभमाशु हृदयं नयदूनां रागवृद्धिमकरोन्न यदूनां ॥ शिशुपालवधम् १०.९० ॥ |
| योषितामुडुपतेरिवाचिषां स्पर्शनिर्वृतिमसावनाप्नुवन् । आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः ॥ रघुवंशम् १९.३४ ॥ |
| योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयिताङ्कं । कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदं ॥ किरातार्जुनीयम् ९.६८ ॥ |
| यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्  ॥ नीतिसंग्रहस्य मित्र-०.४ ॥ |
| रचितं रतिपण्डित ! त्वया स्वयमङ्गेषु ममेदमार्तवम् । ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥ कुमारसंभवम् ४.१८ ॥ |
| रक्तश्रुतिं जपासूनसमरागामिषुव्यधात् । कश्चित्पुरः सपत्नेषु समरागमिषुव्यधात् ॥ शिशुपालवधम् १९.६४ ॥ |
| रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य । एकः सख्यास्तव सह मया वामपादाभिलाषी काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ मेघदूतम्, उत्तरमेघः १२ ॥ |
| रक्षःस्वरक्षणमवेक्ष्य निजं निवृत्तो विद्याधरेष्वधरतां वपुषैव भैम्याः । गन्धर्वसंसदि न गन्धमपि स्वरस्य तस्या विमृश्य विमुखोऽजनि यानवर्गः ॥ नैषधीयचरितम् ११.१३ ॥ |
| रक्षितारमिति तत्र कर्मणि न्यस्य दुष्टदमनक्षमं हरिं । अक्षतानि निरवर्तयत्तदा दानहोमयजनानि भूपतिः ॥ शिशुपालवधम् १४.५१ ॥ |
| रक्षोनराऽमरगणाः क्रमतो मघाहिवस्विन्द्रमूलवरुणानलतक्षराधाः । मूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितीन्दुहरिपौष्णमरुल्लघूनि ॥ मुहूर्त.विवाहप्रकरणम् २९॥ |
| रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा यल्लोकेष्वविकलमाप्तमाधिपत्यं । पाविन्याः शरणगतार्तिहारिणे तन्माहात्म्यं भव भवते नमस्क्रियायाः ॥ किरातार्जुनीयम् १८.३६ ॥ |
| रक्षोवधान्तो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय । अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ॥ रघुवंशम् १४.४१ ॥ |
| रघुं एव निवृत्तयौवनं तममन्यन्त नवेश्वरं प्रजाः । स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान्गुणानपि ॥ रघुवंशम् ८.५ ॥ |
| रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः । न तु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ॥ रघुवंशम् ८.१३ ॥ |
| रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः । निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ॥ रघुवंशम् ३.६१ ॥ |
| रघुवंशप्रदीपेन तेनाप्रतिम तेजसा । रक्षागृहगता दीपाः प्रत्यादिष्ट इवाभवन् ॥ रघुवंशम् १०.६९ ॥ |
| रघूणाम् अन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् । तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ रघुवंशम् १.९ ॥ |
| रघोरवष्टम्भमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः । नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकम् ॥ रघुवंशम् ३.५३ ॥ |
| रचय चारुमते स्तनयोर्वृतिं कलय केशिनि कैश्यमसंयतम् । अवगृहाण तरङ्गिणि नेत्रयोर्जलझराविति शुश्रुविरे गिरः ॥ नैषधीयचरितम् ४.११५ ॥ |
| रचयति रुचिः शोणीमेतां कुमारितरा रवेर्यदलिपटली नीलीकर्तुं व्यवस्यति पातुका । अजनि सरसी कल्माषी तद्ध्रुवं धवलस्फुटत्कवलकलिकाषण्डैः पाण्डूकृतोदरमण्डला ॥ नैषधीयचरितम् १९.३९ ॥ |
| रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् । तीर्थाभिषेकजां शुद्धिं आदधाना महीक्षितः ॥ रघुवंशम् १.८५ ॥ |
| रजःपदं षट्पदकीटजुष्टं हित्वात्मनः पुष्पमयं पुराणम् । अद्यात्मभूराद्रियतां स भैम्या भ्रूयुग्ममन्तर्धृतमुष्टि चापम् ॥ नैषधीयचरितम् १०.११९ ॥ |

| |
|---|
| रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः कुशकिसलयस्याच्छैरग्रेशयैरुदबिन्दुभिः । सुषिरकुशलेनायःसूचीशिखाङ्कुरसंकरं किमपि गमितान्यन्तर्मुक्ताफलान्यवमेनिरे ॥ नैषधीयचरितम् १९.६ ॥ |
| रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः । वसतिं प्रिय ! कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥ कुमारसंभवम् ४.११ ॥ |
| रजनीमवाप्य रुचमाप शशी सपदि व्यभूषयदसावपि तां । अविलम्बितक्रममहो महतामितरेतरकृतिमच्चरितम् ॥ शिशुपालवधम् ९.३३ ॥ |
| रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हैङ्गुलपद्मतूणे । हैमैकपुङ्ख्यास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥ नैषधीयचरितम् ७.७ ॥ |
| रज्यस्व राज्ये जगतामितीन्द्राद्याच्ञाप्रतिष्ठां लभसे त्वमेव । लघूकृतस्वं बलियाचनेन तत्प्राप्तये वामनमामनन्ति ॥ नैषधीयचरितम् ६.८४ ॥ |
| रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु । पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥ किरातार्जुनीयम् ९.१५ ॥ |
| रणसंमदोदयविकासिबलकलकलाकुलीकृते । शारिमशकधिरोपयितुं द्विरदे मदच्युति जनः कथञ्चन ॥ शिशुपालवधम् १५.७७ ॥ |
| रणाङ्गणं सर इव प्लावितं मदवारिभिः ।गजः पृथुकराकृष्टशतपत्रमलोडयत् ॥ शिशुपालवधम् १९.६९ ॥ |
| रणे रभसनिर्भिन्नद्विपपाटविकासिनि । न तत्र गतभीः कश्चिद्द्विपपाट विकासिनि ॥ शिशुपालवधम् १९.५६ ॥ |
| रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुङ्कारपराङ्मुखीकृताः । प्रहर्तुरेवोरगराजरज्जवो जवेन कण्ठं सभयं प्रपेदिर ॥ शिशुपालवधम् १.५६ ॥ |
| रणोन्मुखस्तिष्ठतु सज्जितो भवान् ध्रुवं मदीयाऽऽगमनं भविष्यति । अथाऽऽवयोरेकजनश्च सङ्गरे यशोऽवशेषो भविता नु भूतले ॥ प्रतापविजयः-७६ ॥ |
| रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः । स्फुटीभवद्ग्रामविशेषमूर्च्छना मवेक्षमाणं महतीं मुहुर्मुहुः ॥ शिशुपालवधम् १.१० ॥ |
| रतान्तरे यत्र गृहान्तरेषु वितर्दिनिर्यूहविटङ्कनीडः । रुतानि शृण्वन् वयसां गणो न्तेवासित्वमाप स्फुटमङ्गनानाम् ॥ शिशुपालवधम् ३.५४ ॥ |
| रतिपतिप्रहितानिलहेतितां प्रतियती सुदती मलयानिले । तदुरुतापभयात्तमृणालिकामयमियं भुजगास्त्रमिवादित ॥ नैषधीयचरितम् ४.४ ॥ |
| रतिपतिप्रहितेव कृतक्रुधः प्रियतमेषु वधूरनुनायिका । बकुलपुष्परसासवपेशलध्वनिरगान्निरगात्मधुपावलिः ॥ शिशुपालवधम् ६.७ ॥ |
| रतिपतेर्विजयास्त्रमिषुर्यथा जयति भीमसुतापि तथैव सा । स्वविशिखानिव पञ्चतया ततो नियतमैहत योजयितुं स ताम् ॥ नैषधीयचरितम् ४.३७ ॥ |
| रतिरतिपतिद्वैतश्रीकौ धुरं बिभृमस्तरां प्रियवचसि यन्नग्नाचार्या वदामतमां ततः । अपि विरचितो विद्मः पुण्यद्रुहः खलु नर्मणः परुषमरुषे नैकस्यै वामुदेति मुदेऽपि तत् ॥ नैषधीयचरितम् १९.२१ ॥ |
| रतिरभसविलासाभ्यासतान्तं न यावन्नयनयुगममीलत्तावदेवाहतोऽसौ । रजनिविरतिशंसी कामिनीनां भविष्यद्-विरहविहितनिद्राभङ्गमुच्चैर्मृदङ्गः ॥ शिशुपालवधम् ११.२ ॥ |
| रतिर्देवादिविषया सन्ति च व्यभिचारिणः । वेद्यमाना निगद्यन्ते भावाः साहित्यवेदिभिः ॥ चन्द्रालोकः६.१४ ॥ |
| रतिवियुक्तमनात्मपरज्ञ किं स्वमिव मामपि तापितवानसि । कथमतापभृतस्तव संगमादितरथा हृदयं मम दह्यते ॥ नैषधीयचरितम् ४.७९ ॥ |
| रतिस्मरौ नूनमिमावभूतां राज्ञां सहरेषु तथा हि बाला । गतेयमात्मप्रतिरूपं एव मनो हि जन्मान्तरसंगतिज्ञम् ॥ रघुवंशम् ७.१५ ॥ |
| रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण । काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम् ॥ रघुवंशम् ६.२ ॥ |
| रतौ ह्रिया यत्न निशम्य दीपात्जालागताभ्यो धिगृहं गृहिण्यः । बिभ्युर्बिडालेक्षणभीषणाभ्यो वैदूर्यकुड्येषु शशिद्युतिभ्यः ॥ शिशुपालवधम् ३.४४ ॥ |
| रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद् वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य । येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः॥ मेघदूतम्, पूर्वमेघः १५॥ |
| रत्नैर्महार्हैस्तुतुषुर्न देवाः न भेजिरे भीमविशेषेण भीतिम् । सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥ नीतिशतकम्८१ ॥ |
| रत्याख्यस्थायिभावात्मा वल्लभादिविभावितः । आलस्येर्ष्याजुगुप्साभ्यो विना संचारिभिर्युतः ॥ चन्द्रालोकः६.४ ॥ |
| रथचरणधराङ्गनाकराब्जव्यतिकरसम्पदुपात्तसोमनस्याः । जगति सुमनसस्तदादि नूनं दधति परिस्फुटमर्थतोऽभिधानं ॥ शिशुपालवधम् ७.२८ ॥ |
| रथमास्थितस्य च पुराभिवर्तिनस्तिसृणां पुरामिव रिपोर्मुरद्विषः । अथ धर्ममूर्तिरनुरागभावितः स्वयमादित प्रवयणं प्रजापतिः ॥ शिशुपालवधम् १३.१९ ॥ |
| रथवाजिपत्तिकरिणीसमाकुलं तदनीकयोः समगत द्वयं मिथः । दधिरे पृथक्करिण एव दूरतो महतां हि सर्वमथवा जनातिगं ॥ शिशुपालवधम् १३.१७ ॥ |
| रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् । विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत ॥ रघुवंशम् ३.२४ ॥ |
| रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे । चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः ॥ शिशुपालवधम् १.२१ ॥ |
| रथाङ्गभर्त्रे भिनवं वराय यस्याः पितेव प्रतिपादितायाः । प्रेम्णोपकण्ठं मुहुरङ्कभाजो रत्नावलीरम्बुधिराबबन्ध ॥ शिशुपालवधम् ३.३५ ॥ |
| रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा ।सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवान्वयायि यः ॥ नैषधीयचरितम् १.१११ ॥ |
| रथाङ्गसंक्रीडितमश्वहेषा बृहन्ति मत्तद्विपबृंहितानि । संघर्षयोगादिव मूर्छितानि ह्लादं निगृहणन्ति न दुन्दुभीनां ॥ किरातार्जुनीयम् १६.८ ॥ |
| रथात्स यन्त्रा निगृहीतवाहात्तां भ्रातृहयायां पुलिनेऽवतार्य । गङ्गां निषादाहृतनौविशेषस्ततार संधां इव सत्यसंधः ॥ रघुवंशम् १४.५२ ॥ |
| रथादसौ सारथिना सनाथाद्राजावतीर्याथ पुरं विवेश । निर्गत्य बिम्बादिव भानवीयात्सौधाकरं मण्डलमंशुसङ्घः ॥ नैषधीयचरितम् ६.७ ॥ |

| |
|---|
| रथी निषङ्गी कवची धनुष्मान्दृप्तः स राजन्यकमेकवीरः । निवारयामास महावराहः कल्पक्षयोद्धूतमिवार्णवाम्भः ॥ रघुवंशम् ७.५६ ॥ |
| रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च दृष्टपाराः ।स्वयंवरं शंबरवैरिकायव्यूहश्रियः श्रीजितयक्षराजाः ॥ नैषधीयचरितम् १०.१ ॥ |
| रथो रथाङ्गध्वनिना विजज्ञे विलोलघण्टाक्वणितेन नागः । स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोधः ॥ रघुवंशम् ७.४१ ॥ |
| रथ्याघोषैर्बृंहणैर्वारणानामैक्यं गच्छन्वाजिनां ह्रेषया च । व्योमव्यापी सन्ततं दुन्दुभीनामव्यक्तोऽभूदीशितेव प्रणादः ॥ शिशुपालवधम् १८.३ ॥ |
| रन्तुं क्षतोत्तुङ्गनितम्बभूमयो मुहुर्व्रजन्तः प्रमदं मदोद्धताः । पङ्गं करापाकृतशैवलांशुकाः समुद्रगाणामुदपादयन्निभाः ॥ शिशुपालवधम् १२.५९ ॥ |
| रभसप्रवृत्तकुरुचक्रदुन्दुभिध्वनिभिर्जनस्य बधिरीकृतश्रुतेः । समवादि वक्तृभिरभीष्टसङ्कथाप्रकृतार्थशेषमथ हस्तसंज्ञया ॥ शिशुपालवधम् १३.३ ॥ |
| रभसेन हारपददन्तकाञ्चयः प्रतिमूर्धजं निहितकर्णपूरकाः । परिवर्तिताम्बरयुगाः समापतन्वलयीकृतश्रवणपूरकाः स्त्रियः ॥ शिशुपालवधम् १३.३२ ॥ |
| रमसादुदस्थुरथ युद्धमनुचितभियोऽभिलाषुकाः । सान्द्रमुकुटकिरणोच्छलितस्फटिकांशवः सदसि मेदिनीभृतः ॥ शिशुपालवधम् १५.५९ ॥ |
| रम्भादिलोभात्कृतकर्मभिर्मा शून्यैव भूर्भूत्सुरभूमिपान्थैः । इत्येतयालोपि दिवोऽपि पुंसां वैमत्यमत्यप्सरसा रसायाम् ॥ नैषधीयचरितम् १०.११३ ॥ |
| रम्भापि किं चहनयति प्रकाण्डं न चात्मनः स्वेन न चैतदूरू । स्वस्यैव येनोपरि सा ददाना पत्त्राणि जागर्त्यनयोर्भ्रमेण ॥ नैषधीयचरितम् ७.९३ ॥ |
| रम्यं हर्म्य-तलं न किं वसतये श्रव्यं न गेयादिकं किं वा प्राण-समासमागम-सुखं नैवाधिक-प्रीतये । किन्तु भ्रान्त-पतङ्ग-क्षपवनव्यालोल-दीपाङ्कुरच्छाया-चञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥ वैराग्यशतकम् ८० ॥ |
| रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं किं वा प्राणसमागमसुखं नैवाधिकं प्रीतये । किन्तूद्भ्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुर च्छायाचञ्चलमाकलय्य सततं सन्तो वनान्तं गताः ॥ पुरुषार्थोपदेशः-85॥ |
| रम्या इति प्राप्तवतीः पताका रागं विविक्ता इति वर्द्धयन्तीः । यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः ॥ शिशुपालवधम्  ३.५२ ॥ |
| रम्या नवद्युतिरपैति न शाद्वलेभ्यः श्यामीभवन्त्यनुदिनं नलिनीवनानि । अस्मिन्विचित्रकुसुमस्तबकाचितानां शाखाभृतां परिणमन्ति न पल्लवानि ॥ किरातार्जुनीयम् ५.३७ ॥ |
| रम्याश्चन्द्र-मरीचयस्तृणवती रम्या वनान्त-स्थली रम्यं साधु-समागमागत-सुखं काव्येषु रम्याः कथाः । कोपोपाहित-बाष्प-बिन्दु-तरलं रम्यं प्रियाया मुखं सर्वं रम्यमनित्यतामुपगते चित्ते न किञ्चित्पुनः ॥ वैराग्यशतकम् ७९ ॥ |
| रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः । प्रियोक्तिदानादरनम्रताद्यैरुपाचरच्चारु स राजचक्रम् ॥ नैषधीयचरितम् १०.२७ ॥ |
| रयेण रणकाम्यन्तौ दूरादुपगतविभौ । गतासुरन्तरा दन्ती वरण्डक इवाभवत् ॥ शिशुपालवधम् १९.६५ ॥ |
| रयेण सा संनिदधे पतन्ती भवोद्भवेनात्मनि चापयष्टिः । समुद्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव ॥ किरातार्जुनीयम् १७.५२ ॥ |
| रराज दोर्मण्डनमण्डलीजुषोः स वज्रमाणिक्यसितारुणत्विषोः । मिषेण वर्षन्दशदिङ्मुखोन्मुखौ यशःप्रतापाववनीजयार्जितौ ॥ नैषधीयचरितम् १५.७५ ॥ |
| रराज संपादकमिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिषिद्धमार्गम् । महारथः पुण्यरथं स शार्ङ्गी क्षिप्रं क्षपानाथ इवाधिरुढः ॥ शिशुपालवधम्  ३.२१ ॥ |
| रवावर्यमा ब्रह्मरक्षश्च सोमे कुजे वह्निपित्र्ये बुधे चाभिजित्स्यात् । गुरौ तोयरक्षो भृगौ ब्रह्मपित्र्ये शनावीशसार्पौ मुहूर्ता निषिद्धाः ॥ मुहूर्त.विवाहप्रकरणम् ५४॥ |
| रविकान्तमयेन सेतुना सकलाहं ज्वलनाहितोष्मणा । शिशिरे निशिगच्छतां पुरा चरणौ यत्र दुनोति नो हिमं ॥ नैषधीयचरितम् २.९३ ॥ |
| रवितुरङ्गतनूरुहतुल्यतां दधति यत्र शिरीषरजोरुचः । उपययौ विदधन्नवमल्लिकाः शुचिरसौ चिरसौरभसंपदः ॥ शिशुपालवधम् ६.२२ ॥ |
| रविनिशाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपिबन्धनम् । मतिमतां च विलोक्य दरिद्रतां विधिरहो! बलवानिति मे मतिः ॥ नीतिशतकम् ९१ ॥ |
| रविरथहयानश्वस्यन्ति ध्रुवं वडवा बलप्रतिबलबलावस्थायिन्यः समीक्ष्य समीपगान् । निजपरिवृढं गाढप्रेमा रथाङ्गविहंगमी स्मरशरपराधीनस्वान्ता वृषस्यति संप्रति ॥ नैषधीयचरितम् १९.१७ ॥ |
| रविरुचिऋचामोकारेषु स्फुटामलबिन्दुतां गमयितुममूरुच्चीयन्ते विहायसि तारकाः । स्वरविरचनायासामुच्चैरुदात्ततया हृताः शिशिरमहसो बिम्बादस्मादसंशयमंशवः ॥ नैषधीयचरितम् १९.७ ॥ |
| रवेर्भतोऽब्जभोन्मितिर्नगावशेषिता द्व्यगा । महाडलो न शस्यते त्रिषण्मिता भ्रमो भवेत् ॥ मुहूर्त.यात्राप्रकरणम् २५॥ |
| रवैर्गुणास्फालभवैः स्मरस्य स्वर्णाथकर्णौ बधिरावभूताम् । गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि ॥ नैषधीयचरितम् ८.६८ ॥ |
| रसगुणशशिनागाब्ध्याढ्यसंक्रान्तियातां शकमितिरथ तष्टाऽङ्कैर्यदा षञ्च शेषाः । रुगनलनृपचौरा मृत्युसञ्ज्ञश्च बाणो नवहृतशरशेषे शेषकैक्ये सशल्यः ॥ मुहूर्त.विवाहप्रकरणम् ७३॥ |
| रसभावतदाभास-भावशान्तिनिबन्धनाः । रसवत्प्रेयऊर्जस्वि-समाहितमयाभिधाः ॥ चन्द्रालोकः ५.११७ ॥ |
| रसस्य शृङ्गार इति श्रुतस्य क्व नाम जागर्ति महानुदन्वान् । कस्मादुदस्थादियमन्यथा श्रीर्लावण्यवैदग्ध्यनिधिः पयोधेः ॥ नैषधीयचरितम् १०.११५ ॥ |
| रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः । अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्तवक्त्रावरणं बभूव ॥ रघुवंशम् १३.८ ॥ |
| रसाद्यनुचिते वर्णे प्रतिकूलाक्षरं विदुः । न मामङ्गद जानासि रावणं रणदारुणम् ॥ चन्द्रालोकः२.१५ ॥ |
| रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते । देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ रघुवंशम् १०.१७ ॥ |

| |
|---|
| रसालसालः समदृश्यतामुना स्फुरद्द्विरेफारवरोषहुंकृतिः । समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम् ॥ नैषधीयचरितम् १.८९ ॥ |
| रसालां पायसं काञ्जीं शृतं दुग्धं तथादधि । पयोऽशृतं तिलान्नं च भक्षयेद्वारदोहदम् ॥ मुहूर्त.यात्राप्रकरणम् ८७॥ |
| रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद्गुणाद्भुतः । सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥ नैषधीयचरितम् १.२ ॥ |
| रह सहचरीमेतां राजन्नपि स्त्रितमां क्षाणं तरणिकिरणैः स्तोकान्मुक्तैः समालभते नभः । उदधिनिरयद्भास्वत्स्वर्णोदकुम्भदिदृक्षुतां दधति नलिनं प्रस्थायिन्यः श्रियः कुमुदान्मुदा ॥ नैषधीयचरितम् १९.२५ ॥ |
| रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तया । क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम्  ॥ नीतिसंग्रहस्य मित्र-१.९९ ॥ |
| रहितरत्नचयान्न शिलोच्चयानफलताभवना न दरीभुवः । विपुलिनाम्बुरुहा न सरिद्वधूरकुसुमान्दधतं न महीरुहः ॥ किरातार्जुनीयम् ५.१० ॥ |
| रागं प्रतीत्य युवयोस्तमिमं प्रतीची भानुश्च किं द्वयमजायत रक्तमेतत् । तद्वीक्ष्य वां किमिह केलिसरित्सरोजैःकामेषुतोचितमुखत्वमधीयमानम् ॥ नैषधीयचरितम् २१.१४ ॥ |
| रागजान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु । सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥ किरातार्जुनीयम् ९.६३ ॥ |
| रागशोकपरीतापबन्धनव्यसनानि च । आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्  ॥ नीतिसंग्रहस्य मित्र-१.४१ ॥ |
| रागान्धीकृतनयनेन नामधेयव्यत्यासादभिमुखमीरितः प्रियेण । मानिन्या वपुषि पतन्निसर्गमन्दो भिन्दानो हृदयमसाहि नोदवज्रः ॥ शिशुपालवधम् ८.३९ ॥ |
| राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः । अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ॥ रघुवंशम् ११.३५ ॥ |
| राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन् समस्पृषत् । निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये ॥ रघुवंशम् ११.८९ ॥ |
| राङ्गणे कः खलु वीक्ष्य तं भयाज्जहावसूत्रैव भटोटोऽपि सन् । न तेजसा तत्प्रभवेण केऽभवन् स्थिताः सुदूरेऽपि विदीर्णवक्षसः॥ प्रतापविजयः-१२१ ॥ |
| राजतः सलिलादग्नेश्चोरतः स्वजनादपि । भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव  ॥ नीतिसंग्रहस्य मित्र-१.१७६ ॥ |
| राजद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिः स्फुटगतिभिर्ध्वजाङ्कुशानां । तेजोभिः कनकनिकाषराजिगौरैरायामः क्रियत इव स्म सातिरेकः ॥ किरातार्जुनीयम् ७.६ ॥ |
| राजन्दुधुक्षसि यदि क्षितिधेनुमेतां तेनाद्य वत्समिव लोकममुं पुषाण । तस्मिंश्च सम्यगनिशं परिपोष्यमाणे नानाफलैः फलति कल्पलतेव भूमिः ॥ नीतिशतकम्४६ ॥ |
| राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः । रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः ॥ शिशुपालवधम् १९.१०२ ॥ |
| राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयं । मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ॥ रघुवंशम् १४.३७ ॥ |
| राजसत्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा । नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः ॥ रघुवंशम् ११.९० ॥ |
| राजसेवी वैश्यवृत्तिः शस्त्रवृत्तिश्च पाठकः । प्राज्ञोऽर्थवान् म्लेच्छसेवी केन्द्रे सूर्यादिखेचरैः ॥ मुहूर्त.संस्कारप्रकरणम् ५१॥ |
| राजा द्विजानामनुमासभिन्नः पूर्णां तनूकृत्य तनूं तपोभिः । कुहूषु दृश्येतरतां किमन्य सायुज्यमाप्नोति भवन्मुखस्य ॥ नैषधीयचरितम् ८.३७ ॥ |
| राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयैव राज्यम् । भुङ्क्ते श्रितशृश्रोत्रियसात्कृतश्रीः पूर्वं त्वहो शेषमशेषमन्त्यम् ॥ नैषधीयचरितम् ३.२४ ॥ |
| राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् । राजन्यसति लोकेऽस्मिन् कुतो भार्या कुतो धनम्  ॥ नीतिसंग्रहस्य मित्र-१.१८९ ॥ |
| राजान्तराभिमुखमिन्दुमुखीमथैनां जन्या जनीं हृदयवेदितयैव निन्युः । अन्यानपेक्षितविधौ न खलु प्रधानवाचां भवत्यवसरः सति भव्यभृत्ये ॥ नैषधीयचरितम् ११.३४ ॥ |
| राजाभिषेकः शुभ उत्तरायणे गुर्विन्दुशुक्रैरुदितैर्बलान्वितैः । भौमार्कलग्नेशदशेशजन्मपैर्नो चैत्ररिक्तारनिशामलिम्लुचे ॥ मुहूर्त.राजाभिषेकप्रकरणम् १॥ |
| राजीवराजीवशलोलभृङ्गं मुष्णान्तमुष्णं ततिभिस्तरूणाम् । कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षेभितमुद्वहन्तम् ॥ शिशुपालवधम् ४.९॥ |
| राजौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत् । उद्वेगरागादिमृजावदाताश्चत्वार एते तदवैमि मुक्ताः ॥ नैषधीयचरितम् ७.४६ ॥ |
| राज्ञां पथि स्त्यानतयानुपूर्व्या विलङ्घनाशक्तिविलम्बभाजाम् । आह्वानसंज्ञानमिवाग्रकम्पैर्ददुर्विदर्भेन्द्रपुरीपताकाः ॥ नैषधीयचरितम् १०.७ ॥ |
| राज्ञामस्य शतेन किं कलयतो हेतिं शतघ्नीं कृतं लक्षैर्लक्षभिदो दशैव जयतः पद्मानि पद्मैरलम् । कर्तुं सर्वपरिच्छिदः किमपि नो शक्यं परार्धेन वा तत्संख्यापगमं विनास्ति न गतिः काचिद्बतैतद्द्विषाम् ॥ नैषधीयचरितम् १२.५८ ॥ |
| राज्ञि कृष्णलघुधूपनधूमाः पूजयत्यहिरिपुध्वजमस्मिन् । निर्ययुर्भवधृता भुजगा भीदुर्यशोमलिनिता इव जालैः ॥ नैषधीयचरितम् २१.४७ ॥ |
| राज्ञि भानुमदुपस्थितयेऽस्मिन्नात्तमम्बु किरति स्वकरेण । भ्रान्तयः स्फुरति तेजसि चक्रस्त्वष्टृतर्कुचलदर्कवितर्कम् ॥ नैषधीयचरितम् २१.१८ ॥ |
| राणाऽऽकृतिञ्च तमवेक्ष्य सलीम-सेना, रोषोत्कटा कृतवती कठिनं प्रहारम् 1 यस्माच्चतुर्दशसहस्र रघुप्रवीरा जग्मुः - 'स्वदेश' - ममतोचित-दिव्यलोकान् ॥ प्रतापविजयः-१५१ ॥ |
| रात्रावनाविष्कृतदीपभासः कान्तामुखश्रीवियुता दिवापि । तिरस्क्रियन्ते कृमितन्तुजालैर्विच्छिन्नधूमप्रसरा गवाक्षाः ॥ रघुवंशम् १६.२० ॥ |
| रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो धावन्त्युद्यमिनस्तथैव निभृत-प्रारब्ध-तत्-तत्-क्रियाः। व्यापारैः पुनरुक्त-भूत-विषयैरित्थं विधेनामुना संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे॥॥ वैराग्यशतकम् ४४ ॥ |
| रात्रिः सैव पुनः स एव दिवसोऽमुत्राऽमुको मानवः धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तक्रियाः । व्यापारैः पुनरुत्क्तभुक्तविरसैरित्थंविधेनामुना संसारेण कदर्थिताः कथमहो मोहान् न लज्जामहे ॥ पुरुषार्थोपदेशः-22॥ |

| |
|---|
| रात्रिरागमलिनानि विकासं पङ्कजानि रहयन्ति विहाय । स्पष्टतारकमियाय नभः श्रीर्वस्तुं इच्छति निरापदि सर्वः ॥ किरातार्जुनीयम् ९.१६ ॥ |
| रात्रिर्गता मतिमतां वर मुञ्च शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता । तां एकतस्तव बिभर्ति गुरुर्विनिद्रस्तस्या भवानपरधुर्यपदावलम्बी ॥ रघुवंशम् ५.६६ ॥ |
| रात्रिवृत्तमनुयोक्तुमुद्यतं सा प्रभातसमये सखीजनम् । नाकरोदपकुतूहलं ह्रिया शंसितुं तु हृदयेन तत्वरे॥ कुमारसंभवम् ७.१०॥ |
| रात्रौ चौररुजौ दिवा नरपतिर्वह्निः सदा सन्ध्योः मृत्युश्चाथ शनौ नृपो विदि मृतिर्भौमेऽग्निचौरौ रवौ । रोगोऽथ व्रतगेहगोपनृपसेवायानपाणिग्रहे वर्ज्याश्च क्रमतो बुधे रुगनलक्ष्मापालचौरा मृतिः ॥ मुहूर्त.विवाहप्रकरणम् ७४॥ |
| राधामूलमृदुध्रु वर्क्षवरुणक्षिप्रैर्लतापादपा- रोपोऽथो नृपदर्शनं ध्रुवमृदुक्षिप्रश्रवोवासवैः । तीक्ष्णोग्राम्बुपभेषु मद्यमुदितं क्षिप्रांत्यवह्नीन्दुभा- दित्येन्द्राम्बुपवासवेषु हि गवां शस्तः क्रयो विक्रयः ॥ मुहूर्त.नक्षत्रप्रकरणम् १३॥ |
| राम इत्यभिरामेण तेनाप्रतिम तेजसा । नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलं ॥ रघुवंशम् १०.६८ ॥ |
| रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य । विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबभूवः ॥ नैषधीयचरितम् ५.६५ ॥ |
| रामनाम इति तुल्यमात्मजे वर्तमानमहिते च दारुणे । हृद्यमस्य भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ॥ रघुवंशम् ११.६८ ॥ |
| राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी । गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥ रघुवंशम् ११.२० ॥ |
| रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान् । तेषु क्षरत्सु बहुधा मदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते ॥ रघुवंशम् १३.७४ ॥ |
| रामाणां रमणीयवक्त्रशशिनः स्वेदोदबिन्दुप्लुतो व्यालोलालकवल्लरीं प्रचलयन् धुन्वन् नितम्बाम्बरम् । प्रातर्वाति मधौ प्रकामविकसद्राजीवराजीरजो जालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥ अमरुशतकम्-५८॥ |
| रामाणामवजितमाल्यसौकुमार्ये सम्प्राप्ते वपुषि सहत्वमातपस्य । गन्धर्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः ॥ किरातार्जुनीयम् ७.७ ॥ |
| रामालिरोमावलिदिग्विगाहि ध्वान्तायते वाहनमन्तकस्य । यद्वीक्ष्य दूरादिव बिभ्यतः स्वानश्वान्गृहीत्वापसृतो विवस्वान् ॥ नैषधीयचरितम् २२.२८ ॥ |
| रामे रिपुः शरानाजिमहेष्वास विचक्षणे । कोपादथैनं शितमा महेष्वा स विचक्षणे ॥ शिशुपालवधम् १९.५ ॥ |
| रामेण त्रिःसप्तकृत्वो हृदानां चित्रं चक्रे पञ्चकं क्षत्रियास्त्रैः । रक्ताम्भोभिःस्तत्क्षणादेव तस्मिन्संख्येऽसंख्याः प्रवहन्द्वीपवत्यः ॥ शिशुपालवधम् १८.७० ॥ |
| रामेन्द्वग्नियुगान्यसच्छुभकराण्युप्तौ हलेऽर्कोज्झिता- द्भाद्रामाष्टनवाष्टभानि मुनिभिः प्रोक्तान्यसत्सन्ति च ॥ मुहूर्त.नक्षत्रप्रकरणम् २९ ॥ |
| रामेषुमर्मव्रणनार्तिवेगाद्रत्नाकरः प्रागयमुत्पपात । ग्राहौघकिर्मीरितमीनकम्बु नभो न भोः कामशरासनभ्रु ॥ नैषधीयचरितम् २२.१८ ॥ |
| रावणावग्रहक्लान्तमिति वागमृतेन सः । अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥ रघुवंशम् १०.४९ ॥ |
| राशिः स्वजन्मसमये शुभसंयुतो यो यः स्वारिभान्निधनगोऽपि च वेशिसञ्ज्ञः । लग्नोपगः स गमने जयदोऽथ भूपयोगैर्गमो विजयदो मुनिभिः प्रदिष्टः ॥ मुहूर्त.यात्राप्रकरणम् ४८॥ |
| राश्यादिगौ रविकूजौ फलदौ सितेज्यौ मध्ये सदा शशिसुतश्चरमेऽब्जमन्दौ अध्वान्नवह्निभयसन्मतिवस्त्रसौख्य- दुःखानि मासिजनिभे रविवासरादौ ॥ मुहूर्त.संक्रान्तिप्रकरणम् १९ ॥ |
| राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव । नाडीदोषो नो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात् ॥ मुहूर्त.विवाहप्रकरणम् ३७॥ |
| राहुस्त्रीस्तनयोरकारि सहसा येनाश्लथालिङ्गन-व्यापारैकविनोददुर्ललितयोः कार्कश्यलक्ष्मीर्वृथा । तेनाक्रोशत एव तस्य मुरजित्तत्कालोलानल-ज्वालापल्लवितेन मूर्धविकलं चक्रेण चक्रे वपुः ॥ शिशुपालवधम् २०.७८ ॥ |
| रिक्तां पर्व निशां निरासनरणग्रामप्रयाणोद्यत- स्नाताभ्यक्तकृताशनैर्नहि पुनः कार्या हितप्रेप्सुभिः ॥ मुहूर्त.संस्कारप्रकरणम् ३४॥ |
| रिक्तानन्दाष्टदर्शं हरिदिवसमथो सौरिभौमार्कवारा- ल्लग्नं जन्मर्क्षलग्नाष्टमगृहलवगं मीनमेषालिकं च । हित्वा षष्ठात्समे मास्यथ हि मृगदृशां पञ्चमादोजमासे नक्षत्रैः स्यात् स्थिराख्यैः समृदुलघुचरैर्बालकाऽन्नाशनं सत् ॥ मुहूर्त.संस्कारप्रकरणम् १७॥ |
| रिक्ताभौमघटान्विना च विपणिर्मैत्रध्रुवक्षिप्रभै- र्लग्ने चन्द्रसिते व्ययाष्टरहितैः पापैः शुभैद्वर्यायखे ॥ मुहूर्त.नक्षत्रप्रकरणम् १७ ॥ |
| रिक्तारवर्जे दिवसेऽतिशस्ता शशाङ्कपापैस्त्रिभवाङ्गसंस्थैः । व्यष्टान्त्यगैः सत्खचरैर्मृगेन्द्रे सूर्यो घटे को युवतौ च विष्णुः ॥ मुहूर्त.नक्षत्रप्रकरणम् ६२॥ |
| रिक्ते सविस्रम्भं अथ+अर्जुनस्य निषङ्गवक्त्रे निपतात पाणिः । अन्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरन्ध्रे ॥ किरातार्जुनीयम् १७.३६ ॥ |
| रिपुजन्मलग्नभमथाधिपौ तयोस्तत एव वोपचयसद्म चेद्भवेत् । हिबुके द्युनेऽथ शुभवर्गकस्तनौ यदि मस्तकोदयगृहं तदा जयः ॥ मुहूर्त.यात्राप्रकरणम् ३॥ |
| रिपुतनुनिधने शुक्रजीवेन्दवो ह्यथ बुधभृगुजौ तुर्यगेहस्थितौ । मदनभवनगश्चन्द्रमा वाऽम्बुगःशशिसुतभृगुजान्तर्गतश्चन्द्रमाः ॥ मुहूर्त.यात्राप्रकरणम् ७३॥ |
| रिपुतरा भवनादविनिर्यतीं विधुरुचिर्गृहजालबिलैर्नुताम् । इतरथात्मनिवारणशङ्कया ज्वरयितुं बिशवेशधराविशत् ॥ नैषधीयचरितम् ४.२४ ॥ |
| रिपुलग्नकर्महिबुके शशिजे परिवीक्षिते शुभनभोगमनैः । व्ययलग्नमन्मथगृहेषु जयः परिवर्जितेष्वशुभनामधरैः ॥ मुहूर्त.यात्राप्रकरणम् ७१॥ |
| रुग्णोरुरोधः परिपूरिताम्भसः समस्थलीकृत्य पुरातनीर्नदीः । कूलंकषौघाः सरितस्थापराः प्रवर्तयामासुरिभा मदाम्बुभिः ॥ शिशुपालवधम् १२.६० ॥ |
| रुचयोस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः किल । अनुसायमभुर्विलेपना पणकश्मीरजपण्यवीथयः ॥ नैषधीयचरितम् २.९ ॥ |
| रुचिकरमपि नार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे । ज्वलयति महतां मनांस्यमर्षे न हि लभतेऽवसरं सुखाभिलाषः ॥ किरातार्जुनीयम् १०.६२ ॥ |

| |
|---|
| रुचिधाम्नि भर्तरि भृशं विमलाः परलोकमभ्युपगते विवशुः । ज्वलनं त्विषः कथमितरथा सुलभोऽन्यजन्मनि स एव पतिः ॥ शिशुपालवधम् ९.१३ ॥ |
| रुचिरचरणः सूतोरुश्रीसनाथरथः शनिं शमनमपि स त्रातुं लोकानसूत सुताविति । रथपदकृपासिन्धुर्बन्धुर्दृशामपि दुर्जनैर्यदुपहसितो भास्वान्नास्मान्हसिष्यति कः खलः ॥ नैषधीयचरितम् १९.४७ ॥ |
| रुचिरचित्रतनूरुहशालिभिर्विचलितैः परितः प्रियकव्रजैः । विविधरत्नमयैरभिबात्यसाववयवैरिव जङ्गमतां गतैः ॥ शिशुपालवधम् ४.३२॥ |
| रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः । नयति संततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः ॥ किरातार्जुनीयम् ५.१९ ॥ |
| रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पतताम् । धृतसत्पथस्त्रिपथगां अभितः स तमारुरोह पुरुहूतसुतः ॥ किरातार्जुनीयम् ६.१ ॥ |
| रुजन्परेषून्बहुधाशुपातिनो मुहुः शरौघैरपवारयन्दिशः । चलाचलोऽनेक इव क्रियावशान्महर्षिसंघैर्बुबुधे धनंजयः ॥ किरातार्जुनीयम् १५.५१ ॥ |
| रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते । परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनां ॥ रघुवंशम् ८.८५ ॥ |
| रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या मीनक्षोभाकुलकुवलयश्रीतुलामेष्यतीति ॥ मेघदूतम्, उत्तरमेघः २९ ॥ |
| रुद्रेषुविद्रावितमार्तमारात्तारामृगं व्योमनि वीक्ष्य बिभ्यत् । मन्येऽयमन्यः शरणं विवेश मत्वेशचूडामणिमिन्दुमेणः ॥ नैषधीयचरितम् २२.८ ॥ |
| रुन्धती नयनवाक्यविकासं सादितो भयकरा परिरम्भे । व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥ किरातार्जुनीयम् ९.६७ ॥ |
| रुरुधिषा वदनाम्बुरुहश्रियः सुतनु सत्मलङ्करणाय ते । तदपि सम्प्रति सन्निहिते मधावधिगमं धिगमङ्गलमश्रुणः ॥ शिशुपालवधम् ६.१७ ॥ |
| रुषद्व्यग्न्यग्निभूरामद्व्यब्ध्यग्न्यब्धियुगाग्नयः । घातचन्द्रे धिष्ण्यपादा मेषाद्वर्ज्या मनीषिभिः ॥ मुहूर्त.यात्राप्रकरणम् २९॥ |
| रुषा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयांचकार । तदा श्रमाम्भः कणभूषिताङ्गीं स कीरवन्मानुषवागवादीत् ॥ नैषधीयचरितम् ३.१२ ॥ |
| रुषारुणा सर्वगुणैर्जयन्त्या भैम्याः पदं श्रीः स्म विधेर्वृणीते । ध्रुवं स तामच्छलयद्यतः सा भृशारुणैतत्पदभाग्विभाति ॥ नैषधीयचरितम् ७.१०१ ॥ |
| रूपं तदोजस्वि तदेव वीर्यं तदैव नैसर्गिकमुन्नतत्वम् । न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥ रघुवंशम् ५.३७ ॥ |
| रूपं प्रतिच्छायिकयोपनीतमालोकि ताभिर्यदि नाम कामम् । तथापि नालोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम् ॥ नैषधीयचरितम् ६.४५ ॥ |
| रूपं यदाकर्ण्य जनाननेभ्यस्तत्तद्दिगन्ताद्वयमागमाम । सौन्दर्यसारादनुभूयमानादस्यास्तदस्माद्बहु नाकनीयः ॥ नैषधीयचरितम् १०.११४ ॥ |
| रूपकातिशयोक्तिश्चेद्रूप्यं रूपकमध्यगम् । पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः ॥ चन्द्रालोकः ५.४६ ॥ |
| रूपमप्रतिविधानमनोज्ञं प्रेम कार्यमनपेक्ष्य विकासि । चाटु चाकृतकसंभ्रममासां कार्मणत्वमगमन्रमणेषु ॥ शिशुपालवधम् १०.३७ ॥ |
| रूपमस्य विनिरूप्य तथातिम्लानिमाप रविवंशवतंसः । कीर्त्यते यदधुनापि स देवः काल एव सकलेन जनेन ॥ नैषधीयचरितम् ५.६२ ॥ |
| रूपयौवनसम्पन्ना विशालकुलसम्भवाः । विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः  ॥ नीतिसंग्रहस्य मित्र-०.३८ ॥ |
| रे रे चातक! सावधानमनसा मित्र! क्षणं श्रूयता- मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः । केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ नीतिशतकम्५१ ॥ |
| रे रे मदीयकरमुग्ध ! कठोरकुन्त! प्रक्रान्तधार! कुटिलाऽऽक्रमणेन किन्ते । यच्छासति त्वयि सदा रिपुशोणितार्द्रे, जीवन्ति दुष्टहतका यवना जगत्याम्॥ प्रतापविजयः-६०॥ |
| रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः । चतुर्दशाष्टादश चात्र विद्या द्वेधापि सन्तीति शशंस वेधाः ॥ नैषधीयचरितम् ३.३५ ॥ |
| रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परं । न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ रघुवंशम् १.१७ ॥ |
| रेखाविभक्तः सुविभक्तगात्र्याः किचिन्मधूच्छिष्ट विमृष्टरागः। कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः॥ कुमारसंभवम् ७.१८॥ |
| रेचितं परिजनेन महीयः केवलाभिरतदम्पति धाम । साम्यमाप कमलासखविष्वक्सेनसेवितयुगान्तपयोधेः ॥ शिशुपालवधम् १०.५५ ॥ |
| रेजतुश्च सुतरां महौजसः कौशिकस्य पदवीमनुद्रुतौ । उत्तरां प्रति दिशं विवस्वतः प्रस्थितस्य मधुमाधवाविव ॥ रघुवंशम् ११.६* ॥ |
| रेजुर्भ्रष्टा वक्षसः कुङ्कुमाङ्का मुक्ताहाराः पार्थिवानां व्यसूनां । हासाल्लक्ष्याः पूर्णकामस्य मन्ये मृत्योर्दन्ताः पीतरक्तासवस्य ॥ शिशुपालवधम् १८.६८ ॥ |
| रेजे जनैः स्नपनसान्द्रतरार्द्रमूर्तिर्देवैरिवानिमिषदृष्टिभिरीक्ष्यमाणः । श्रीसंनिधानरमणीयतरोऽश्व उच्चैरुच्चैश्रवा जलनिधेरिव जातमात्रः ॥ शिशुपालवधम् ५.५७ ॥ |
| रेणुकातनयतामुपागतः शातितप्रचुरपत्रसंहति । लूनभूरिभुजशाखमुज्झितच्छायमर्जुनवनं व्यधादयं ॥ शिशुपालवधम् १४.८० ॥ |
| रेफाक्रान्ता वर्ग्ययणाष्टवर्गात्पञ्चमादृते । कपाक्रान्तस्तवर्गः स्यात्प्रौढायां च कमूर्धता ॥ चन्द्रालोकः६.२४ ॥ |
| रेवतीशसुषमा किल नीलस्याम्बरस्य रुचिरा तनुभासा । कामपाल भवतः कुमुदाविर्भावभावितरुचेरुचितैव ॥ नैषधीयचरितम् २१.८७ ॥ |
| रेवापूर्वे गण्डकीपश्चिमे च शोणस्योदग्दक्षिणे नीच ईज्यः । वर्ज्यो नायं कौङ्कणे मागधे च गौडे सिन्धौ वर्जनीयः शुभेषु ॥ मुहूर्तचिन्त.५२ ॥ |
| रोगी चिरप्रवासी परान्नभोजी परावसथशायी । यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः  ॥ नीतिसंग्रहस्य मित्र-१.१३३ ॥ |
| रोचिष्णुकाञ्चनचयांशुपिशङ्गिताशा वंशध्वजैर्जलदसंहतिमुल्लिखन्त्यः । भूभर्तुरायत निरन्तरसंनिवृष्टाः पादा इवाभिवभुरावलयो रथानां ॥ शिशुपालवधम् ५.२० ॥ |

| |
|---|
| रोदोरन्ध्रं व्यश्नुवानानि लोलैरङ्गस्यान्तर्मादितैः स्थावराणि । केचित्गुर्वीमेत्य संयन्निषद्यां क्रीणन्ति स्म प्राणमूल्यैर्यशांसि ॥ शिशुपालवधम् १८.१५ ॥ |
| रोमाङ्कुरैर्दन्तुरिताखिलाङ्गी रम्याधरा सा सुतरां विरेजे । शरव्यदण्डैः श्रितमण्डनश्रीः स्मारी शरोपासनवेदिकेव ॥ नैषधीयचरितम् १४.५४ ॥ |
| रोमाञ्चिताङ्गीमनु तत्कटाक्षैर्भ्रान्तेन कान्तेन रतेर्निदिष्टः । मोघः शरौघः कुसुमानि नाभूतद्धैर्यपूजां प्रति पर्यवस्यन् ॥ नैषधीयचरितम् ६.२३ ॥ |
| रोमाणि सर्वाण्यपि बालभावाद्वरश्रियं वीक्षितुमुत्सुकानि । तस्यास्तदा कण्टकिताङ्गयष्टेरुद्ग्रीविकादानमिवान्वभूवन् ॥ नैषधीयचरितम् १४.५३ ॥ |
| रोमावलिभ्रूकुसुमैः स्वमौर्वीचापेषुभिर्मध्यललाटमूर्ध्नि । व्यस्तैरपि स्थास्नुभिरेतदीयैर्जैत्रः स चित्रं रतिजानिवीरः ॥ नैषधीयचरितम् ७.८६ ॥ |
| रोमावलीदण्डनितम्बचक्रे गुणं च लावण्यजलं च बाला । तारु\ण्यमूर्तेः कुचकुम्भकर्तुर्बिभर्ति शङ्के सहकारिचक्रम् ॥ नैषधीयचरितम् ७.९ ॥ |
| रोमावलीरज्जुमुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् । मद्दृष्टितृष्णा विरमेद्यदि स्यान्नैषां बतैषासिचयेन गुप्तिः ॥ नैषधीयचरितम् ७.८४ ॥ |
| रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुंगवकेतुरासीत् । वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य॥ कुमारसंभवम् ७.७७॥ |
| रोषावेशादाभिमुख्येन कौचित्पाणिग्राहं रंहसैवोपयातौ । हित्वा हेतीर्मल्लवन्मुष्टिघातं घ्नन्तौ बाहूबाहवि व्यासृजेतां ॥ शिशुपालवधम् १८.१२ ॥ |
| रोषावेशाद्गच्छतां प्रत्यमित्रं दूरोत्क्षिप्तस्थूलबाहुध्वजानां । दीर्घास्तिर्यग्वैजयन्तीसदृश्यः पादातानां भ्रेजिरे खड्गलेखाः ॥ शिशुपालवधम् १८.४ ॥ |
| रोहणः किमपि यः कठिनानां कामधेनुरपि या पशुरेव । नैनयोरपि वृथाभवदर्थी हा विधित्सुरसि वत्स किमेतत् ॥ नैषधीयचरितम् ५.१२५ ॥ |
| रौद्राहिशाक्राम्बुपयाम्यपूर्वाद्विदेववस्वग्निषु पापवारे। रिक्ताहरिस्कन्ददिने च रोगे शीघ्रं भवेद्रोगिजनस्य मृत्युः ॥ मुहूर्त.नक्षत्रप्रकरणम् ४७ ॥ |
| लकारोऽन्यैरसंयुक्तौ लघवो घभधा रसौ । ललितायां तथा शेषा भद्रायामिति वृत्तयः ॥ चन्द्रालोकः६.२६ ॥ |
| लक्षकस्थं स्फुटं यत्र सा विचक्षणलक्षणा । अस्फुटत्वं तटस्थत्वं लक्ष्यस्थत्वममुष्य च ॥ चन्द्रालोकः९.५ ॥ |
| लक्षणीयस्वशब्दस्य मीलनामीलनाद् द्विधा । लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्गभेदतः ॥ चन्द्रालोकः९.२ ॥ |
| लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः । आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ॥ रघुवंशम् ११.६ ॥ |
| लक्ष्मीभृतोऽम्भोधितटाधिवासान् द्रुमानसौ नीरदनीलभासः । लतावधूसंप्रयुजोऽधिवेलं बहूकृतान् स्वानिव पश्यति स्म ॥ शिशुपालवधम् ३.७० ॥ |
| लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि । सामुत्र दूषणमजीगणदेकमेव नात्रार्थी बभूव मघवा यदमुष्य देवः ॥ नैषधीयचरितम् ११.४६ ॥ |
| लक्ष्मीविलासवसतेः सुमनःसु मुख्यादस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम् । स्थानान्तरं तदनु निन्युरिमां विमानवाहाः पुनः सुरभितामिव गन्धवाहाः ॥ नैषधीयचरितम् ११.४७ ॥ |
| लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः । वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ॥ रघुवंशम् ११.५९ ॥ |
| लक्ष्यलक्षकवैशिष्ट्याद् द्विविधा लक्षणा पुनः । सरसं काव्यममृतं विद्या स्थिरतरं धनम् ॥ चन्द्रालोकः९.१४ ॥ |
| लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहं । आकर्णकृष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार ॥ रघुवंशम् ८.५७ ॥ |
| लक्ष्ये धृतं कुण्डलिके सुदत्या ताटङ्कयुग्मं स्मरधन्विने किम् । सव्यापसव्यं विशिखा विसृष्टास्तेनानयोर्यान्ति किमन्तरेव ॥ नैषधीयचरितम् १०.११७ ॥ |
| लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य । रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलंचकार ॥ कुमारसंभवम् ३.३० ॥ |
| लग्नगतः स्याद् देवपुरोधाः । लाभधनस्थैः शेषनभोगैः ॥ मुहूर्त.यात्राप्रकरणम् ६१॥ |
| लग्नद्विरेफं परिभूय पद्मं समेघलेखं शशिनश्च विम्बम् । तदाननश्रीरलकैः प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम्॥ कुमारसंभवम् ७.१६॥ |
| लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽपिता नो वा पादतले तया निपतितं तिष्ठेति नोक्तं वचः । काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः शठः तन्व्या बाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ अमरुशतकम्-६२॥ |
| लग्नाच्चन्द्रान्मदनभवनगे खेटे न स्यादिह परिणयनम् । किं वा बाणाशुगमितलवगे जामित्रं स्यादशुभकरामिदम् ॥ मुहूर्त.विवाहप्रकरणम् ६७॥ |
| लग्नात्पापाघृज्वनृजू व्ययार्थस्थौ यदा तदा । कर्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा ॥ मुहूर्त.विवाहप्रकरणम् ४४॥ |
| लग्नाद्भावाः क्रमाद्देहकोशधानुष्कवाहनम् । मन्त्रोऽरिर्मार्ग आयुश्च हृद्व्यापाराऽऽगमव्ययाः ॥ मुहूर्त.यात्राप्रकरणम् ५५॥ |
| लग्नाम्बरायेषु भृगुज्ञभानुभिः केन्द्रे गुरौ वर्षशतायुरालयः । बन्धौ गुरुर्व्योम्नि शशी कुजार्कजौ लाभे तदाशीतिसमायुरालयः ॥ मुहूर्त.वास्तुप्रकरणम् २३॥ |
| लग्ने चन्द्रे वाऽपि वर्गोत्तमस्थे यात्रा प्रोक्ता वाञ्छितार्थैकदात्री । अम्भोराशौ वा तदंशे प्रशस्तं नौकायानं सर्वसिद्धिप्रदायि ॥ मुहूर्त.यात्राप्रकरणम् ४६॥ |
| लग्ने जन्मर्क्षतन्वोर्मृतिगृहमहितर्क्षाच्च षष्ठं तदीशा वा लग्ने कुम्भमीनर्क्षनवलवतनू चापि पृष्ठोदयं च । पृष्ठाशासंस्थमृक्षं दशमशनिरथो सप्तमे चापि काव्यः केन्द्रे वक्राश्च वक्रिग्रहदिवसविवाहोक्तदोषाश्च नेष्टाः ॥ मुहूर्त.यात्राप्रकरणम् ११२॥ |
| लग्ने देवगुरौ हलप्रवहणं शस्तं न सिंहे घटे कर्काजेणधटे तनौ क्षयकरं रिक्तासु वष्ट्यां तथा ॥ मुहूर्त.नक्षत्रप्रकरणम् २८॥ |
| लग्ने यदि जीवः पापा यदि लाभे कर्मण्यपि वा चेद्राज्याधिगमः स्यात् । द्यूने बुधशुक्रौ चन्द्रो हिबुके वा तद्वत्फलमुक्तं सर्वैर्मुनिवर्यैः ॥ मुहूर्त.यात्राप्रकरणम् ७२॥ |
| लग्ने शुभे चाष्टमशुद्धिसंयुते रक्षा पशूनां निजयोनिभे चरे । रिक्ताष्टमीदर्शकुजश्रवोध्र्वत्वाष्ट्रेषु यानं स्थितिवेशनं न सत् ।१४॥ मुहूर्त.नक्षत्रप्रकरणम् |
| लग्नेनाढ्या याततिथ्योऽङ्कतष्टाः शेषे नागद्व्यब्धितर्केन्दुसंख्ये । रोगो वह्नी राजचौरौ च मृत्युर्बाणश्चायं दाक्षिणात्यप्रसिद्धः ॥ मुहूर्त.विवाहप्रकरणम् ७२॥ |

| |
|---|
| लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलं । अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ किरातार्जुनीयम् २.५३ ॥ |
| लघूकरिष्यन्नतिभारभङ्गुरामम् किल त्वं त्रिदिवादवातरः । उद्धलोकत्रितयेन सांप्रतं गुरूर्धरित्री क्रियतेतरां त्वया ॥ शिशुपालवधम्  १.३६ ॥ |
| लघौ लघावेव पुरः परे बुधैर्विधेयमुत्तेजनमात्मतेजसः । तृणे तृणेढि ज्वलनः खलु ज्वलन्त्रमात्करीषद्रुमकाण्डमण्डलम् ॥ नैषधीयचरितम् ९.१५२ ॥ |
| लङ्केश्वरप्रणतिभङ्गदृढव्रतं तद् वन्द्यं युगं चरणयोर्जनकात्मजायाः । ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधोरन्योन्यपावनमभूदुभयं समेत्य ॥ रघुवंशम् १३.७८ ॥ |
| लङ्घयन्नहरहर्भवदाज्ञामस्मि हा विधिनिषेधमयीं यः । दुर्लभं स तपसापि गिरैव त्वत्प्रसादमहमिच्छुरलज्जः ॥ नैषधीयचरितम् २१.११७ ॥ |
| लज्जते न गदितः प्रियं परो वक्तुरेव भवति त्रपाधिका । व्रीडमेतिन तव प्रियं वदन्ह्रीमतात्रभवतैव भूयते ॥ शिशुपालवधम् १४.२ ॥ |
| लज्जागुणौघजननीं जननीमिव स्वा- मत्यन्तशुद्धहृदयामनुवर्तमानम् । तेजस्विनः सुखमसूनपि सन्त्यजन्ति, सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ नीतिशतकम् १०९ ॥ |
| लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठापितहेमवेत्रः । मुखार्पिकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैपीत् ॥ कुमारसंभवम् ३.४१॥ |
| लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् । रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्त्वान् ॥ रघुवंशम् २.८ ॥ |
| लताबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः । असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः ॥ नैषधीयचरितम् १.१०६ ॥ |
| लधुललितपदं तदंसपीठद्वयनिहितोभयपाणिपल्लवान्या । सकठिनकुचचूचुकप्रणोदं प्रियमबला सविलासमन्विनाय ॥ शिशुपालवधम् ७.१९ ॥ |
| लब्धं न लेखप्रभुणापि पातुं पीत्वा मुखेन्दोरधरामृतं ते । निपीय देवैर्विघसीकृतायां घृणां विधोरस्य दधे सुधायाम् ॥ नैषधीयचरितम् २२.११८ ॥ |
| लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी । भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधयितुमस्य कल्पिता ॥ रघुवंशम् १९.३ ॥ |
| लब्धसौरभगुणो मदिराणामङ्गनास्यचषकस्य च गन्धः । मोदितालिरितरेतरयोगादन्यतामभजतातिशयं नु ॥ शिशुपालवधम् १०.२४ ॥ |
| लब्धस्पर्शं भूव्यधादव्यथेन स्थित्वा किंचिद्दन्तयोरन्तराले । ऊर्ध्वाधोसिच्छिन्नदन्तप्रवेष्टं जित्वोत्तस्थे नागमन्येन सद्यः ॥ शिशुपालवधम् १८.४७ ॥ |
| लभेत सिकतासु तैलमपि यत्नतः पीडयन् पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः । कदाचिदपि पर्यटञ्छशविषाणमासादयेत्-न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ नीतिशतकम्५ ॥ |
| लभेत सिकतासु तैलमपि यत्नतः पीडयन् पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः। कदाचिदपि पर्यटन् शशविषाणमासादयेत् न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥ पुरुषार्थोपदेशः-5॥ |
| लभ्दान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते । बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागं ॥ रघुवंशम् १६.७ ॥ |
| लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः । स्वन्तमन्तविरसा जिगीषतां मित्रलाभं अनु लाभसम्पदः ॥ किरातार्जुनीयम् १३.५२ ॥ |
| लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः । अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ किरातार्जुनीयम् ३.१७ ॥ |
| लयनेषु लोहितकनिर्मिता भुवः शितिरत्नरश्मिहरितीकृतान्तराः । जमदग्निसूनुपितृतर्पणीरपोवहति स्म या विरलशैवला इव ॥ शिशुपालवधम् १३.५२ ॥ |
| ललाटिकासीमनि चूर्णकुन्तला बभुः स्फुटं भीमनरेन्द्रजन्मनः । मनःशिलाचित्रकदीपसंभवा भ्रामीभृतः कज्जलधूमवल्लयः ॥ नैषधीयचरितम् १५.३३ ॥ |
| ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला । बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवं ॥ रघुवंशम् १.८३ ॥ |
| ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरं । पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितं ॥ रघुवंशम् ८.३६ ॥ |
| लवङ्गमालाकलितावतंसास्ते नारिकेलान्तरपः पिबन्तः । आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमापुः ॥ शिशुपालवधम्  ३.८० ॥ |
| लवपतिशुभमित्रं वीक्षतेंऽशं तनुं वा परिणयनकरस्य स्याच्छुभं शास्त्रदृष्टम् । मदनलवपमित्रं सौम्यमंशद्युनं वातनुमदनगृहं चेद्वीक्षते शर्म वध्वाः ॥ मुहूर्त.विवाहप्रकरणम् ७८॥ |
| लवेशो लवं लग्नपो लग्नगेहं प्रपश्येन्मिथो वा शुभं स्याद्वरस्य । लवद्यूनपोऽशद्युनं लग्नपोऽस्तं मिथो वेक्षते स्याच्छुभं कन्यकायाः ॥ मुहूर्त.विवाहप्रकरणम् ७७॥ |
| लसन्नखादर्शमुखाम्बुजस्मितप्रसूनवाणीमधुपाणिपल्लवम् । यियासतस्तस्य नृपस्य जज्ञिरे प्रशस्तवस्तूनि तदेवयौवतम् ॥ नैषधीयचरितम् १५.८२ ॥ |
| लाक्षालक्ष्मललाटपट्टमभितः केयूरमुद्रा गले वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागो घनः । दृष्टा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥ अमरुशतकम्-८८॥ |
| लाङ्गूलचालनमधश्चरणावपातं  भूमौ निपत्य वदनोदरदर्शनं च । श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु  धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ नीतिशतकम्३१ ॥ |
| लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः। यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति वालव्यजनैश्चमर्यः॥ कुमारसंभवम् १.१३ ॥ |
| लाजाकुष्ठबलाप्रियङ्गुधनसिद्धार्थैर्निशादारुभिः पुङ्खालोध्रयुतैर्जलैर्निगदितं स्नानं ग्रहोत्थाघहृत् । धेनुः कम्ब्वरुणो वृषश्च कनकं पीताम्बरं घोटकः श्वेतो गौरसिता महासिरज इत्येता रवेर्दक्षिणाः॥ मुहूर्त.संक्रान्तिप्रकरणम्  १६॥ |
| लाटानुप्रासभूर्भिन्नाभिप्राया पुनरुक्तता । यत्र स्यान्न पुनः शत्रोर्गर्जितं तज्जितं जितम् ॥ चन्द्रालोकः ५.४ ॥ |
| लाभाष्टमे चाद्यशरे रसान्त्ये नागद्वये ज्ञो द्विशिरेऽब्धिरामे । रसाङ्कयोर्नागविधौ खनागे लाभव्यये देवगुरुः शराब्धौ ॥ मुहूर्त.संक्रान्तिप्रकरणम्  २॥ |
| लाभो द्रव्याप्तिर्धनं सौख्यमुक्तं भीतिर्लाभो मृत्युरर्थागमश्च । लाभः कष्टद्रव्यलाभौ सुखं च कष्टं सौख्यं क्लेशलाभौ सुखं च ॥ मुहूर्त.यात्राप्रकरणम् २२॥ |

| |
|---|
| लाभो रामैः पुच्छगैः स्वामिनाशो वेदैर्नैःस्वं वामकुक्षौ मुखस्थैः । रामैः पीडा सन्ततं चार्कधिष्ण्यादश्वै रुद्रैर्दिग्भिरुक्तं हयसत्सत् ॥ मुहूर्त.वास्तुप्रकरणम् १४॥ |
| लावण्य-लालसित-लोचनलोक-लक्ष्मीं । द्रक्ष्यामि भारति ! कदा तव मञ्जुमूर्तिम् ॥ प्रतापविजयः-१० ॥ |
| लावण्येन तवाखिलेन वदनं तत्पात्रमात्रस्पृशा चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण यः । तल्लेखापि शिखामणिः सुषमयाहंकृत्य शभोरभूदब्जं तस्य पदं यदस्पृशदतः पद्मं च सन्न श्रियाः ॥ नैषधीयचरितम् २२.१४५ ॥ |
| लावण्येन तवास्यमेव बहुना तत्पात्रमात्रस्पृशा चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण तु । निर्माय द्वयमेतदप्सु विधिना पाणी खलु क्षालितौ तल्लेशैरधुनापि नीरनिलयैरम्भोजमारभ्यते ॥ नैषधीयचरितम् २२.१४४ ॥ |
| लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः स्कह्यः सततरुदितोच्छूणनयनाः । परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना ॥ अमरुशतकम्-६॥ |
| लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः । वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामौप्दाछलेन ॥ रघुवंशम् ७.३० ॥ |
| लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः । चक्षुर्झरैरर्पितमात्मचक्षू रागं स धत्ते रचितं त्वया नु ॥ नैषधीयचरितम् ३.१०३ ॥ |
| लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेरितवाचिकस्य । इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानैः ॥ नैषधीयचरितम् ६.७७ ॥ |
| लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि रोहिताश्वे । पिनाकिना हूतमहाम्बुवाहमस्त्रं पुनः पाशभृतः प्रणिन्ये ॥ किरातार्जुनीयम् १६.५४ ॥ |
| लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरम् । श्रितमर्ककरैः पितासु यन्नृपसद्मामलपद्मरागजम् ॥ नैषधीयचरितम् २.१ ॥ |
| लीलयापि तव नाम जना ये गृह्णते नरकनाशकरस्य । तेभ्य एव नरकैरुचिता भीस्ते तु बिभ्यतु कथं नरकेभ्यः ॥ नैषधीयचरितम् २१.११२ ॥ |
| लीलयैव सुतनोस्तुलयित्वा गौरवाढ्यमपि लावणिकेन । मानवञ्जनविदा वदनेन क्रीतमेव हृदयं दयितस्य ॥ शिशुपालवधम् १०.३८ ॥ |
| लीलाचलत्स्त्रीचरणारुणोत्पलस्खलत्तुलाकोटिनिनादकोमलः । शौरेरुपानूपमापाहरन्मनः स्वनान्तरादुन्मदसारसारवः ॥ शिशुपालवधम् १२.४४ ॥ |
| लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः । मुग्धा कुद्मलिताननेन दधतो वायुं स्थिता तस्य सा भ्रान्त्या धूर्ततया च वेपथुमती तेनानिशं चुम्बिता ॥ अमरुशतकम्-७०॥ |
| लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः । सेकः शीकरिणा करेण विहितः कामं विरामे पुनर्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ (उत्तररामचरितम् ३.१६) |
| लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बा रजनय इव निन्द्राक्लान्तनीलोत्पलाक्ष्यः । तिमिरमिव दधानाः स्रंसिनः केशपाशानवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः ॥ शिशुपालवधम् ११.२० ॥ |
| लूनग्रीवात्सायकेनापरस्य दयामत्युच्चैराननादुत्पतिष्णोः । त्रेसे मुग्धैः सैंहिकेयानुकारादप्रौद्राकारादप्सरोवक्त्रचन्द्रैः ॥ शिशुपालवधम् १८.५९ ॥ |
| लेखया विमलविद्रुमभासा संततं तिमिरमिन्दुरुदासे । दंष्ट्रया कनकटङ्कपिशङ्ग्या मण्डलं भुव इवादिवराहः ॥ किरातार्जुनीयम् ९.२२ ॥ |
| लेखा नितम्बिनि बलादिसमृद्धराज्यप्राज्योपभोगपिशुना दधते सरागम् । एतस्य पाणिचरणं तदनेन पत्या सार्धं शचीव हरिणा मुदमुद्वहस्व ॥ नैषधीयचरितम् १३.७ ॥ |
| लोक एष परलोकमुपेता हा विहाय निधने धनमेकः । इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ॥ नैषधीयचरितम् ५.९१ ॥ |
| लोकं विधात्रा विहितस्य गोप्तुं क्षत्त्रस्य मुष्णन्वसु जैत्रमोजः । तेजस्विताया विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ किरातार्जुनीयम् ३.४१ ॥ |
| लोकत्रयेऽतिविदिता बलिवेदिकेय यत्र प्रतापनृपतेरनुयायिवर्गः । सङ्क्रीतवान् किल परश्शतमौलिदानात् स्वातन्त्र्यमार्यवर- वीरवसुन्धरायाः ॥ प्रतापविजयः- १६७ ॥ |
| लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता । पञ्च यत्र न विद्यन्ते न कुर्यात्तत्र संस्थितिम् ॥ नीतिसंग्रहस्य मित्र-१.११० ॥ |
| लोकस्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान्महेन्द्रः । किंकर्तुमर्थी यदि सोऽपि रागाज्जागर्ति कक्षा किमतः परापि ॥ नैषधीयचरितम् ६.८१ ॥ |
| लोकान्तरसुखं पुण्यं तपोदानसमुद्भवं । संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ रघुवंशम् १.६९ ॥ |
| लोकालोकव्याहतं घर्मरश्मेः शालीनं वा धाम नालं प्रसर्तुं । लोकस्याग्रे पश्यतो धृष्टमाशु क्रामत्युच्चैर्भूभृतो यस्य तेजः ॥ शिशुपालवधम् १६.८३ ॥ |
| लोकालोकी कलोऽकल्ककलिलोऽलिकुलालकः । कालोऽकलोऽकलिः काले कोलकेलिकिलिः किल ॥ शिशुपालवधम् १९.९८ ॥ |
| लोकाश्रयो मण्डपमादिसृष्टिब्रह्माण्डमाभात्यनुकाष्ठमस्य । स्वकान्तिरेणूत्करवान्तिमन्ति घुणव्रणद्वारनिभानि भानि ॥ नैषधीयचरितम् २२.२६ ॥ |
| लोकेन भावी पितुरेव तुल्यः संभावितो मौलिपरिग्रहात्सः । दृष्टो हि वृण्वन्कलभप्रमाणोऽप्याशाः पुरोवातमवाप्य मेघः ॥ रघुवंशम् १८.३८ ॥ |
| लोकेशकेशवशिवानपि यश्चकार शृङ्गारसान्तरभृशान्तरशान्तभावान् । पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन संक्षोभयन्वितनुतां वितनुर्मदं वः ॥ नैषधीयचरितम् ११.२५ ॥ |
| लोकैरशेषैरविनिश्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे । स्ववर्तितत्तज्जनयन्त्रणार्तिविश्रान्तिमायुः ककुभां विभागाः ॥ नैषधीयचरितम् १०.४ ॥ |
| लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा । वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥ किरातार्जुनीयम् ९.६० ॥ |

| |
|---|
| लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् । सौजन्यं यदि किं निजैः सुमहिमा यद्यस्ति किं मण्डनैः सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ नीतिशतकम्५५ ॥ |
| लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते । लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्  ॥ नीतिसंग्रहस्य मित्र-१.२७ ॥ |
| लोभाद्वाथ भयाद्वापि  यस्त्यजेच्छरणागतम् । ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः  ॥ नीतिसंग्रहस्य मित्र-१.१८४ ॥ |
| लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् । तृषार्तो दुःखमाप्नोति परत्रेह च मानवः  ॥ नीतिसंग्रहस्य मित्र-१.१३४ ॥ |
| लोलदृष्टि वदनं दयितायाश्चुम्बति प्रियतमे रभसेन । व्रीडया सह विनीवि नितम्बादंशुकं शिथिलतामुपपदे ॥ किरातार्जुनीयम् ९.४७ ॥ |
| लोलद्भ्रूलतया विपक्षदिगुपन्यासेऽवधूतं शिरस्तद्वृत्तान्तनिरीक्षणे कृतनमस्कारो विलक्षः स्थितः । कोपात्ताम्रकपोलभित्तिनि मुखे दृष्ट्या गतः पादयोर् उत्सृष्टो गुरुसन्निधावपि विधिर्द्वाभ्यां न कालोचितः ॥ अमरुशतकम्-७९॥ |
| लोलहेतिरसनाशतप्रभामण्डलेन लसता हसन्निव । प्राज्यमाज्यमसकृद्वषट्कृतं निर्मलीमसमलीढ पावकः ॥ शिशुपालवधम् १४.२५ ॥ |
| लोलासिकालियकुला यमस्यैव स्वसा स्वयं । चिकीर्षुरुल्लसल्लोहवर्मश्यामा सहायतां ॥ शिशुपालवधम् १९.२८ ॥ |
| लोलैररित्रैश्चरणैरिवाभितो जवात्व्रजन्तीभिरसौ सरिज्जनैः । नौभिः प्रतेरे परितः प्लवोदितभ्रमीनिमीलल्ललनावलम्बितैः ॥ शिशुपालवधम् १२.७१ ॥ |
| लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियैर् अन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितम् । पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते यत्स्नेहोचितमीहितं प्रियतम त्वं निर्गतः श्रोष्यसि ॥ अमरुशतकम्-६१॥ |
| लौल्यमेत्य गृहिणीपरिग्रहान्नर्तकीष्वसुलभासु तद्वपुः । वर्तते स्म स कथंचिदालिखन्नङ्गुलीक्षरणसन्नवर्तिकः ॥ रघुवंशम् १९.१९ ॥ |
| वंशस्थितिं वंशकरेण तेन संभाव्य भावी स सखा मघोनः । उपस्पृषन्स्पर्शनिवृत्तलौल्यस्त्रिपुष्करेषु त्रिदशत्वमाप ॥ रघुवंशम् १८.३१ ॥ |
| वंशोचितत्वादभिमानवत्या सम्प्राप्तया सम्प्रियतामसुभ्यः । समक्षमादित्सितया परेण वध्वेव कीर्त्या परितप्यमानः ॥ किरातार्जुनीयम् १७.४ ॥ |
| वक्तुः कविनिबद्धस्य कवेर्वा प्रौढिनिर्मितः । स्वसिद्धो वा व्यञ्जकोऽर्थश्चत्वारस्त्रिगुणास्ततः ॥ चन्द्रालोकः७.८ ॥ |
| वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीप्सितम् । स्वाङ्कुरितमतद्रूपं स्वयमुल्लसितं गिरः ॥ चन्द्रालोकः७.१३ ॥ |
| वक्त्रे भूरविभात्प्रवेशसमये कुम्भेऽग्निदाहः कृताः, प्राच्यामुद्वसनं कृता यमगता लाभः कृताः पश्चिमे । श्रीर्वेदाः कलिरुत्तरे युगमिता गर्भे विनाशो गुदे, रामाः स्थैर्यमतः स्थिरत्वमनलाः कण्ठे भवेत्सर्वदा ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ६॥ |
| वक्त्रेन्दुसंनिधिनिमीलदलारविन्दद्वन्द्वभ्रमक्षममथाञ्जलिनात्ममौलौ । कृत्वापराधभयचञ्चलमीक्षमाणा सान्यत्र गन्तुममरैः कृपयान्वमानि ॥ नैषधीयचरितम् ११.११ ॥ |
| वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः । विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥ मेघदूतम्, पूर्वमेघः २७॥ |
| वक्रास्तनीचोपगते भृगोः सुते राजा व्रजन् याति वशं हि विद्विषाम् । बुधोऽनुकूलो यदि तत्र सञ्चलन् रिपूञ्जयेन्नैव जयः प्रतीन्दुजे ॥ मुहूर्त.यात्राप्रकरणम् ४१॥ |
| वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम् । मुञ्च मानन्दिनं प्राप्तं मन्द नन्दी हरान्तिके ॥ चन्द्रालोकः ५.१११ ॥ |
| वक्षस्त्वदुग्रविरहादपि नास्य दीर्णं वज्रायते पतनकुण्ठतशत्रुशस्त्रम् । तत्कन्दकन्दलतया भुजयोर्न तेजो वह्निर्नमत्यरिवधूनयनाम्बुनापि ॥ नैषधीयचरितम् ११.१२४ ॥ |
| वक्षोभ्यो घनमनुलेपनं यदूनामुत्तंसानाहरत वारि मूर्धजेभ्यः । नेत्राणां मदरुचिरक्षतैव तस्थौ चक्षुष्यः खलु महतां परैरलङ्घ्यः ॥ शिशुपालवधम् ८.५७ ॥ |
| वचनैरसतां महीयसो न खलु व्येति गुरुत्वमुद्धतैः । किमपैति रजोभिरौर्वरैरवकीर्णस्य मणेर्महार्घता ॥ शिशुपालवधम् १६.२७ ॥ |
| वचसि भवति सङ्गत्यागमुद्दिश्य वार्ता श्रुतमुखरमुखानां केवलं । पण्डितानाम् जघनमरुणरत्नग्रन्थिकाञ्चीकलापं कुवलयनयनानां को विहातुं समर्थः ॥ पुरुषार्थोपदेशः-10॥ |
| वज्रं शुक्रेऽब्जे सुमुक्ता प्रवालं भौमेऽगौ गोमेदमार्कौ सुनीलम् । केतौ वैदूर्यं गुरौ पुष्पकं ज्ञे पाचिः प्राङ्माणिक्यमर्के तु मध्ये ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ९ ॥ |
| वणिक्पथे पूगकृतानि यत्र भ्रमागतैरम्बुधिरम्बुराशिः । लोलैरलोलद्युतिभाञ्जि मुष्णन् रत्नानि रत्नाकरतामवाप ॥ शिशुपालवधम्  ३.३७ ॥ |
| वत ददासि न मृत्युमपि स्मर स्खलति ते कृपया न धनुः करात् । अथ मृतोऽसि मृतेन च मुच्यते न खलु मुष्टिरुरीकृतबन्धनः ॥ नैषधीयचरितम् ४.८५ ॥ |
| वतंसनीलाम्बुरुहेण किं दृशा विलोकमाने विमनीबभूवतुः । अपि श्रुती दर्शनसक्तचेतसां न तेन ते शुश्रुवतुर्मृगीदृशाम् ॥ नैषधीयचरितम् १५.८७ ॥ |
| वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः । ऊधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥ रघुवंशम् २.६६ ॥ |
| वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते संवृत्तिः प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः । सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ हा हा देवि किमुत्पथैर्मम मनः पारिप्लवं धावति ॥ (उत्तररामचरितम् ४.२२) |
| वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ । भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ॥ रघुवंशम् २.२२ ॥ |
| वद प्रतापं तममानकारिणं यदेव मानो भवता तिरस्कृतः । इहाश्वथाऽऽयास्यति सौषधिर्यतः शिरोव्यथा ते न पुनर्भवेद् भवे ॥ प्रतापविजयः- ७० ॥ |

| |
|---|
| वद विधुंतुदमालि मदीरितैस्त्यजसि किं द्विजराजधिया रिपुम् । किमु दिवं पुनरेति यदीदृशः पतित एष निषेव्य हि वारुणीम् ॥ नैषधीयचरितम् ४.७ ॥ |
| वदनगर्भगतं न निजेच्छया शशिनमुज्झति राहुरसंशयम् । अशित एव गलत्ययमत्ययं सखि विना गलनालबिलाध्वना ॥ नैषधीयचरितम् ४.६५ ॥ |
| वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया । चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया ॥ शिशुपालवधम् ६.१४ ॥ |
| वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति कर्मसाक्षी । शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति॥ कुमारसंभवम् ७.८३॥ |
| वधूर्भक्तिमती चैनामर्चितां आ तपोवनात् । प्रयता प्रातरन्वेतु पितेव धुरि पुत्रिणां ॥ रघुवंशम् १.९१ ॥ |
| वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीर प्रसवा भवेति । वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्य चिन्तास्तिमिता बभूव॥ कुमारसंभवम् ७.८७॥ |
| वध्वा वरस्याऽपि कुले त्रिपूरुषे नाशं व्रजेत्कश्चन निश्चयोत्तरम् । मासोत्तरं तत्र विवाह इष्यते शान्त्याऽथवा सूतकनिर्गमे परैः ॥ मुहूर्त.विवाहप्रकरणम् १७॥ |
| वनस्पतिस्कन्धनिषण्णबालप्रवालहस्ताः प्रमदा इवात्र । पुष्पेक्षणैलम्भितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रततत्यः ॥ शिशुपालवधम् ४.३५॥ |
| वनान्तपर्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नवतीर्णदृक्पथे । व्यवर्ति दृष्टिप्रकरैः पुरौकसामनुव्रजद्बन्धुसमाजबन्धुभिः ॥ नैषधीयचरितम् १.७५ ॥ |
| वनान्तरादुपावृत्तैः समित्कुशफलाहरैः । पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥ रघुवंशम् १.४९ ॥ |
| वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ । कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥ किरातार्जुनीयम् १.३६ ॥ |
| वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुरा कृतानि ॥ नीतिशतकम्९७ ॥ |
| वनेऽवने वनसदां मार्गं मार्गमुपेयुषां । वाणैर्बाणैः समासक्तं शङ्केऽशं केन शाम्यति ॥ किरातार्जुनीयम् १५.१० ॥ |
| वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः। भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥ कुमारसंभवम् १.१० ॥ |
| वनेषु सायनतनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु । प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार ॥ रघुवंशम् १६.४७ ॥ |
| वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् । विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ रघुवंशम् १.८८ ॥ |
| वन्येभदानानिलगन्धदुर्धुराः क्षणं तरुच्छेदविनोदितक्रुधः । व्यालद्विपा यन्तृभिरुन्मतिष्णवः कथंचिदीरादपनयेन निन्यिरे ॥ शिशुपालवधम् १२.२८ ॥ |
| वपुरन्वलिप्त परिरम्भसुखव्यवधानभीरुकतया न वधूः । क्षमस्य वाढमिदमेव हि यत्प्रियसंगमेष्वनवलेपमदः ॥ शिशुपालवधम् ९.५१ ॥ |
| वपुरम्बुविहारमिहं शुचिना रुचिरं कमनीयतरा गतिमा । रमणेन रमण्यचिरांशुलतारुचिरङ्कमनीयत रागमिता ॥ शिशुपालवधम् ६.७१ ॥ |
| वपुरवियुतसिद्धा एव लक्ष्मीविलासाः प्रतिकलकमनीयां कान्तिमुद्भेदयन्ति । अमलिनमिव चन्द्रं रश्मयः स्वे यथा वा विकसितमरविन्दं विन्दवो माकरन्दाः ॥ (उत्तररामचरितम् ६.२४) |
| वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु । वरेषु यद्धालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥ कुमारसंभवम् ५.७२ ॥ |
| वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् । ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीं ॥ रघुवंशम् ८.३८ ॥ |
| वपुषा पुराणपुरुषः पुरः क्षितौ परिपुञ्ज्यमानपृथुहारयष्टिना । भुवनैर्नतोऽपि विहितात्मगौरवः प्रणनाम नाम तनयं पितृष्वसुः ॥ शिशुपालवधम् १३.८ ॥ |
| वपुषां परमेण भूधराणामथ सम्भाव्यपराक्रमं विभेदे । मृगमाशु विलोकयांचकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः ॥ किरातार्जुनीयम् १३.१ ॥ |
| वयं कलादा इव दुर्विदग्धं त्वद्गौरिमस्पर्धि दहेम हेम । प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु बभ्रु ॥ नैषधीयचरितम् ८.९९ ॥ |
| वयं क्व वर्णाश्रमधर्ममर्मगा, सदा सदाचार-विचार-धारकाः । स्वजाति-हीनाः कुलधर्मतश्च्युता क्व हन्त । यूयं कृमितुल्यजन्तवः ॥ प्रतापविजयः-७३ ॥ |
| वयं येभ्यो जाताश्चिर-परिगता एव खलु ते समं यैः संवृद्धाः स्मृति-विषयतां तेऽपि गमिताः। इदानीमेते स्मः प्रतिदिवसमासन्न-पतना गतास्तुल्यावस्थां सिकतिलनदी-तीर-तरुभिः॥॥ वैराग्यशतकम् ४८ ॥ |
| वयं येभ्यो जाताश्चिरपरिगृहीताश्च खलु ते समं यैः संमृद्धाः स्मृतिविषयतां तेऽपि गमिताः। इदानीमेते स्मः प्रतिदिवसमासन्नपतना गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ पुरुषार्थोपदेशः-61॥ |
| वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह परितोषो निर्विशेषो विशेषः । स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि हि परितुष्टे कोऽर्थवान् को दरिद्रः ॥ पुरुषार्थोपदेशः-37॥ |
| वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः सम इह परितोषो निर्विशेषो विशेषः। स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥॥ वैराग्यशतकम् ५३ ॥ |
| वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी । विधिनापि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः ॥ नैषधीयचरितम् २.३ ॥ |
| वयस्ययाकूतविदा दमस्वसुः स्मितं वितत्याभिदधेऽथ भारती । इतः परेषामपि पश्य याचतां भवन्मुखेन स्वनिवेदनत्वराम् ॥ नैषधीयचरितम् १२.५९ ॥ |
| वयोवशस्तोकविकस्वरस्तनीं तिरस्तिरश्चुम्बति सुन्दरे दृशा । स्वयं किल स्रस्तमुरःस्थमम्बरं गुरुस्तनी ह्रीणतरा परादधे ॥ नैषधीयचरितम् १६.६९ ॥ |
| वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान् । प्रकृत्या ह्यमणिः श्रेयान्नालंकारश्च्युतोपलः ॥ किरातार्जुनीयम् १५.१५ ॥ |
| वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश- प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः । तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ नीतिशतकम्३६ ॥ |

| |
|---|
| वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह । न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥ नीतिशतकम् १४ ॥ |
| वरं मौनं कार्यं न च वचनमुक्तं यदनृतं वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् । वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिर् वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥ नीतिसंग्रहस्य मित्र-१.१३० ॥ |
| वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयः पत्रफलाम्बुभक्षितम् । तृणानि शय्या वसनं च वल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥ नीतिसंग्रहस्य मित्र-१.१४५ ॥ |
| वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः । नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः ॥ नीतिसंग्रहस्य मित्र-१.१२८ ॥ |
| वरं शून्या शाला न च खलु वरो दुष्टवृषभो वरं वेश्या पत्नी न पुनरविनीता कुलवधूः । वरं वासोऽरण्ये न पुनरविवेकाधिपपुरे वरं प्राणत्यागो न पुनरधमानामुपगमः ॥ नीतिसंग्रहस्य मित्र-१.१३१ ॥ |
| वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम् । घनरत्नकपाटपक्षतिः परिरभ्यानुनयन्नुवास याम् ॥ नैषधीयचरितम् २.८६ ॥ |
| वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा । उभयमेतद् उपैत्वथवा क्षयं प्रियजनेन न यत्र समागमः ॥ अमरुशतकम्-६०॥ |
| वररोऽविवरो वैरिविवारी वारिरारवः । विववार वरो वैरं वीरो रविरिवौर्वरः ॥ शिशुपालवधम् १९.१०० ॥ |
| वरस्य पाणिः परधातकौतुकी वधूकरः पङ्कजकान्तितस्करः । सुराज्ञि तौ तत्र विदर्भमण्डले ततो निबद्धौ किमु कर्कशैः कुशैः ॥ नैषधीयचरितम् १६.१४ ॥ |
| वराटिकोपक्रिययापि लभ्यान्नेभ्याः कृतज्ञानथवाद्रियन्ते । प्राणैः पणैः स्वं निपुणं भणन्तः क्रीणन्ति तानेव तु हन्त सन्तः ॥ नैषधीयचरितम् ३.८८ ॥ |
| वरुणगृहिणीमाशामासादयन्तममुं रुचीनिचयसिचयांशांशभ्रंशक्रमेण निरंशुकम् । तुहिनमहसं पश्यन्तीव प्रसादमिषादसौ निजमुखमितः स्मेरं धत्ते हरेर्महिषीहरित् ॥ नैषधीयचरितम् १९.३ ॥ |
| वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः । समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतः पदे पदे ॥ किरातार्जुनीयम् ८.२२ ॥ |
| वर्गावुभौ देवमहीधराणां द्वारेपुरस्योद्धटितापिधाने । समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ॥ कुमारसंभवम् ७.५३॥ |
| वर्जयन्त्या जनैः संगमेकान्तत- स्तर्कयन्त्या सुखं सङ्गमे कान्ततः । योषयैष स्मरासन्नतापाङ्गया सेव्यतेऽनेकया संन्नतापङ्गया ॥ शिशुपालवधम् ४.४२॥ |
| वर्जयेत्सर्वकार्येषु हस्तार्कं पञ्चमीतिथौ । भौमाश्विनीं च सप्तश्यां षष्ठ्यां चन्द्रन्दैवं तथा ॥ मुहूर्तचिन्त.२० ॥ |
| वर्णं सितं शिरसि वीक्ष्य शिरोरुहाणां स्थानं जरा-परिभवस्य तदा पुमांसम्। आरोपितास्थि-शतकं परिहृत्य यान्ति चण्डाल-कूपमिव दूरतरं तरुण्यः॥॥ वैराग्यशतकम् ७४ ॥ |
| वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः । प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥ कुमारसंभवम् ३.२८॥ |
| वर्णाश्रमाचारपथात्प्रजाभिः स्वाभिः सहैवास्खलते नलाय । प्रसेदुषो वेद्दशवृत्तभङ्ग्या दित्सैव कीर्तेर्भुवमानयद्वः ॥ नैषधीयचरितम् १४.४५ ॥ |
| वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम् । गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः ॥ मुहूर्त.विवाहप्रकरणम् २१॥ |
| वर्णोदकैः काञ्चनशृङ्गमुक्तैस्तमायताक्ष्यः प्रणयादसिञ्चन् । तथागतः सोऽतिररां बभासे सधातुनिस्यन्द इवाद्रिराजः ॥ रघुवंशम् १६.७० ॥ |
| वर्ध्राबद्धा धौरितेन प्रयातामश्वीयानामुच्चकैरुच्चलन्तः । रौक्मा रेजुः स्थासका मूर्तिभाजो दर्पस्येव व्याप्तदेहस्यशेषाः ॥ शिशुपालवधम् १८.५ ॥ |
| वर्षातपानावरणं चिराय काष्ठौघमालम्ब्य समुत्थितेषु । बालेषु ताराकवकेष्विहैकं विकस्वरीभूतमवैमि चन्द्रम् ॥ नैषधीयचरितम् २२.९८ ॥ |
| वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु । तत्रास्मि पत्युर्वरिवस्ययेह शर्मोर्मिकिर्मीरितधर्मलिप्सुः ॥ नैषधीयचरितम् ६.९७ ॥ |
| वर्ष्म द्विपानां विरुवन्त उच्चकैर्वनेचरेभ्यश्चिरमाचचक्षिरे । गण्डस्थलाघर्षगलन्मदोदकद्रवद्रमस्कन्धनिलायिनोऽलयः ॥ शिशुपालवधम् १२.६४ ॥ |
| वलयार्पितासितमहोपलप्रभाबहुलीकृतप्रतनुरोमराजिना । हरिवीक्षणाक्षणिकचक्षुषान्यया करपल्लवेन गलदम्बरं दधे ॥ शिशुपालवधम् १३.४४ ॥ |
| वलस्य कृष्टेव हलेन भाति या कलिन्दकन्या घनभङ्गभङ्गुरा । तदार्पितैस्तां करुणस्य कुड्नलैर्जहास तस्याः कुटिला कचच्छटा ॥ नैषधीयचरितम् १५.३१ ॥ |
| ववेन्दुना तन्नभसोपमेयं शावैकसिंहेन च काननेन । रघोः कुलं कुड्मलपङ्कजेन तोयेन चाप्रौष्ठनरेन्द्रमासीत् ॥ रघुवंशम् १८.३७ ॥ |
| वशिनं क्षितेरयनयाविवेश्वरं नियमो यमश्च नियतं यतिं यथा । विजयश्रिया वृतमिवार्कमारुतावनुसस्रतुस्तमथ दस्रयोः सुतौ ॥ शिशुपालवधम् १३.२३ ॥ |
| वशी सुतस्तस्य वशंवदत्वात्स्वेषां इवासीद्द्विषतामपीष्टः । सकृद् विविग्नानपि हि प्रयुक्तं माधुर्यमीष्टे हरिणान्ग्रहीतुम् ॥ रघुवंशम् १८.१३ ॥ |
| वसन्स तस्यां वसतौ रघूणां पुराणशोभां अधिरोपितायां । न मैथिलेयः स्पृहयां बभूव भर्त्रे दिवो नाप्यलकेश्वराय ॥ रघुवंशम् १६.४२ ॥ |
| वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् । पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥ रघुवंशम् २.१९ ॥ |
| वसिष्ठमन्त्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु । मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ॥ रघुवंशम् ५.२७ ॥ |
| वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः । जराग्रस्तैर्गात्रैरथ खलु सुदूराश्रमतया चिरेणागच्छन्ति त्वरितमनसो विश्लथजटाः ॥ (उत्तररामचरितम् ६.३९ ) |
| वसुधान्तनिःसृतमिवाहिपतेः पटलं फणामणिसहस्ररुचाम् । स्फुरदंशुजालमथ शीतरुचः ककुभं समस्कुरुत माधवनीम् ॥ शिशुपालवधम् ९.२५ ॥ |

| |
|---|
| वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः । गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥ किरातार्जुनीयम् १.१३ ॥ |
| वसौकसारां अभिभूय साहं सौराज्यबद्धोत्सवया विभूत्या । समग्रशक्तौ त्वयि सूर्यवंष्ये सति प्रपन्ना करुणामवस्थां ॥ रघुवंशम् १६.१० ॥ |
| वस्तु वास्तु घटते न भिदानां यौक्तनैकविधबाधविरोधैः । तत्त्वदीहितविजृम्भिततत्तद्भेदमेतदिति तत्वनिरुक्तिः ॥ नैषधीयचरितम् २१.१०८ ॥ |
| वस्तु विश्वमुदरे तव दृष्ट्वा बाह्यवत्किल मृकण्डुतनूजः । स्वं विमिश्रमुभयं न विविञ्चन्निर्ययौ स कतमस्त्वमवैषि ॥ नैषधीयचरितम् २१.१०९ ॥ |
| वस्त्राणां नवभागकेषु च चतुष्कोणेऽमरा राक्षसा- मध्यत्र्यंशगता नरास्तु सदशे पाशे च मध्यांशयोः । दग्धे वास्फुटितेऽम्बरे नवतरे पङ्कादिलिप्ते न स- द्रक्षोंऽशे नृसुरांशयोः शुभमसत्सर्वांशके प्रान्ततः ।॥ मुहूर्त.नक्षत्रप्रकरणम् ११॥ |
| वस्त्वलङ्कारयोर्व्यक्तेर्भेदौ द्वौ शब्दशक्तिजौ । अर्थशक्तिसमुत्थस्य भेदा द्वादश तद्यथा ॥ चन्द्रालोकः७.६ ॥ |
| वहति भुवनश्रेणिं शेषः फणाफलकस्थितां कमठपतिना मध्येपृष्ठं सदा स च धार्यते । तमपि कुरुते क्रोडाधीनं पयोधिरनादराद् अहह महतां निःसीमानश्चरित्रविभूतयः ॥ नीतिशतकम्३५ ॥ |
| वहति यः परितः कनकस्थलीः सहरिता लसमाननवांशुकः । अचल एष भवानिव राजते स हरितालसमाननवांशुकः ॥ शिशुपालवधम् ४.२१॥ |
| वहतो बहुशैवलक्ष्मता धृतरुद्राक्षमधुव्रतं खगः । स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव ॥ नैषधीयचरितम् २.६ ॥ |
| वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणान् मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते । व्यालो माल्यगुणायते विषरसः पीयूष वर्षायते, यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ नीतिशतकम् १०८ ॥ |
| वाक्ययोरर्थसामान्ये प्रतिवस्तूपमा मता । तापेन भ्राजते सूरः शूरश्चापेन राजते ॥ चन्द्रालोकः ५.५५ ॥ |
| वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना । या दातुः सौम्यता सेयं सुधांशोरकलङ्कता ॥ चन्द्रालोकः ५.५८ ॥ |
| वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ रघुवंशम् १.१ ॥ |
| वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत् । खलत्वमल्पीयसि जल्पिते तु तदस्तु बन्दिभ्रमभूमितैव ॥ नैषधीयचरितम् ८.३२ ॥ |
| वाग्देवतापि स्मितपूर्वमुर्वीसुपर्वराजं रभसाद्बभाषे । त्वत्प्रेयसीसंमदमाचरन्त्या मत्किं न किंचिद्ग्रहणोचितं ते ॥ नैषधीयचरितम् १४.८६ ॥ |
| वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः । तत्याज तोषं परपुष्टघुष्टे घृणां च वीणाक्वणिते वितेने ॥ नैषधीयचरितम् ३.६ ॥ |
| वाचंयमत्वात्प्रणतिं ममैष कम्पेन किंचित्प्रतिगृह्य मूर्ध्नः । दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिधत्ते ॥ रघुवंशम् १३.४४ ॥ |
| वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम् । मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ॥ रघुवंशम् १४.६१ ॥ |
| वाजिनः शत्रुसैन्यस्य समारब्धनवाजिनः । वाजिनश्च शरा मध्यमविशन्द्रुतवाजिनः ॥ शिशुपालवधम् १९.६२ ॥ |
| वाजिभूमिरिभराजकाननं सन्ति रत्ननिचयाश्च भूरिशः । काञ्चनेन किमिवास्य पत्त्रिणा केवलं न सहते विलङ्घनम् ॥ किरातार्जुनीयम् १३.५५ ॥ |
| वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता, विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् । भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले, येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ नीतिशतकम्६२ ॥ |
| वाणी मन्मथतीर्थमुज्ज्वलरसस्रोतस्वती कापि ते खण्डः खण्ड इतीदमीयपुलिनस्यालप्यते वालुका । एतत्तीरमृदैव किं विरचिताः पूताः सिताश्चक्रिकाः किं पीयूषमिदंपयांसि किमिदं तीरे तवैवाधरौ ॥ नैषधीयचरितम् २१.१५६ ॥ |
| वाणीभिराभिः परिपत्त्रिमाभिर्नरेन्द्रमानन्दजडं चकार । मुहूर्तमाश्चर्यरसेन भैमी हैमीव वृष्टिः स्तिमितं च तं सा ॥ नैषधीयचरितम् २२.१०३ ॥ |
| वाताभ्राग्निमहीपचोरमरणं रुम्बज्रवादाः क्षति- र्योगाङ्के दलिते समे मनुयुतेऽयौगे तु सैकेऽर्धिते । भं दास्रादथ सम्मितास्तु मनुभी रेखाः क्रमात्संलिखेद् वेधोऽस्मिन् ग्रहचन्द्रयोर्न शुभदः स्यादेकरेखास्थयोः ॥ मुहूर्त.विवाहप्रकरणम् ७१॥ |
| वातोर्मिदोलनचलद्दलमण्डलाग्रभिन्नाभ्रमण्डलगलज्जलजातसेकः । स्तम्बः कुशस्य भविताम्बरचुम्बिचूडश्चित्राय तत्र तव नेत्रनिपीयमानः ॥ नैषधीयचरितम् ११.५९ ॥ |
| वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा हैमैः स्यूता कमलमुकुलैः स्निग्धवैडूर्यनालैः । यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ मेघदूतम्, उत्तरमेघः १० ॥ |
| वाप्पाकुलेऽमलतमे न गृहीतजन्मा, नाहम्प्रताप इति विश्रुतभीमकर्मा । वीराङ्गगना न जननी मम नास्मि शूरः चेन्नम्लेच्छ-मण्डलमलं निखिलं न हन्मि ॥ प्रतापविजयः-५९॥ |
| वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा। ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज॥ (मृच्छकटिकम् १.३२) |
| वामनादणुतमादनुजीयास्त्वं त्रिविक्रमतनूभृतदिक्कः । वीतहिंसनकथादथ बुद्धात्कल्किना हतसमस्त नमस्ते ॥ नैषधीयचरितम् २१.९६ ॥ |
| वामनाश्रमपदं ततः परं पावनं श्रुअमृषेरुपेयिवान् । उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः ॥ रघुवंशम् ११.२२ ॥ |
| वामाङ्गे कोकिला पल्ली पोतकी सूकरी रला । पिङ्गला छुच्छुका श्रेष्ठाः शिवाः पुरुषसंज्ञिताः ॥ मुहूर्त.यात्राप्रकरणम् १०५॥ |

| |
|---|
| वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे । सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥ रघुवंशम् २.३१ ॥ |
| वामो रविर्मृत्युसुतार्थलाभतोऽर्के पन्चभे प्राग्वदनादिमन्दिरे । पूर्णातिथौ प्राग्वदने गृहे शुभो नन्दादिके याम्यजलोत्तरानने ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ५॥ |
| वामो वास्याः कररुहपदैर्मुच्यमानो मदीयैर्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या संभोगान्ते मम समुचितो हस्तसंवाहनानां यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ मेघदूतम्, उत्तरमेघः ३० ॥ |
| वारणागगभीरा सा साराभीगगणारवा । कारितारिवधा सेना नासेधा वारितारिका ॥ शिशुपालवधम् १९.४४ ॥ |
| वारणार्थपदगद्गदवाचामीर्ष्यया मुहुरपत्रपया च । कुर्वते स्म सुदृशामनुकूलं प्रतिकूलिकतयैव युवानः ॥ शिशुपालवधम् १०.७० ॥ |
| वाराणसी निविशते न वसुंधरायां तत्र स्थितिर्मखभुजां भुवने निवासः । तत्तीर्थमुक्तवपुषामत एव मुक्तिः स्वर्गात्परं पदमुदेतु मुदे तु कीदृक् ॥ नैषधीयचरितम् ११.११६ ॥ |
| वारादेर्घटिका द्विघ्नाः स्वाक्षहृच्छेषर्वाजताः । सैकास्तष्टा नगैः कालहोरेशा दिनपात्क्रमात् ॥ मुहूर्तचिन्त.७५॥ |
| वारिधेरिव कराग्रवीचिभिर्दिङ्मतङ्गजमुखान्यभिघ्नतः । यस्य चारुनखशुक्तयः स्फुरन्मौक्तिकप्रकरगर्भतां दधुः ॥ शिशुपालवधम् १४.७३ ॥ |
| वारिपूर्वमखिलासु सत्क्रियालब्धशुद्धिषु धनानि बीजवत् । भावि बिभ्रति फलं महद्द्विजक्षेत्रभूमिषु नराधिपोऽवपत् ॥ शिशुपालवधम् १४.३४ ॥ |
| वारे प्रोक्तं कालहोरासु तस्य धिष्ण्ये प्रोक्तं स्वामितिथ्यंशकेऽस्य । कुर्याद्दिक्छूलादिचिन्त्यं क्षणेषु नैवोल्लङ्घ्यः पारिघश्चापि दण्डः ॥ मुहूर्तचिन्त.७६ ॥ |
| वारे भौमार्किहीने ध्रुवमृदुलघुभैर्विष्णुमूलादितीन्द्र- स्वातीवस्वभ्युपेतैर्मिथुनमृगसुताकुम्भगोमीनलग्ने । सौम्यैः केन्द्रत्रिकोणैरशुभगगनगैः शत्रुलाभत्रिसंस्थै- स्ताम्बूलं सार्धमासद्वयमितसमये प्रोक्तमन्नाशने वा ॥ मुहूर्त.संस्कारप्रकरणम् २३॥ |
| वार्तापि नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यं निरुन्धे । विरञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥ नैषधीयचरितम् ३.४४ ॥ |
| वाल्मीकिरश्लाघत तामनेकशाखत्रयीभूरुहराजिभाजा । क्लेशं विना कण्ठपथेन यस्य दैवी दिवः प्राग्भुवमागमद्वाक् ॥ नैषधीयचरितम् १०.५७ ॥ |
| वासः परं नेत्रमहं न नेत्रं किमु त्वमालिङ्गय तन्मयापि । उरोनितम्बोरु कुरु प्रसादमितीव सा तत्पदयोः पपात ॥ नैषधीयचरितम् ७.८ ॥ |
| वासराणि कतिचित्कथंचन स्थाणुना रतमकारि चानया । ज्ञातमन्मथरसा शनैःशनैः सा मुमोच रतिदुःखशीलताम्॥ कुमारसंभवम् ७.१३॥ |
| वाससां शिथिलतामुपनाभि ह्रीनिरासं अपदे कुपितानि । योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयं ॥ किरातार्जुनीयम् ९.६५ ॥ |
| वासांसि न्यवसत यानि योषितस्ताः शुभ्राभ्रद्युतिभिरहासि तैर्मुदेव । अत्याक्षुः स्नपनगलज्जलानि यानि स्थूलाश्रुस्रुतिभिररोदिः तैः शुचेव ॥ शिशुपालवधम् ८.६६ ॥ |
| वाहनाजनि मानासे साराजावनमा ततः. मत्तसारगराजेभे भारीहावज्जनध्वनि ॥ शिशुपालवधम् १९.३३ ॥ |
| विकचकमलगन्धैरन्धयन्भृङ्गमालाः सुरभितमकरन्दं मन्दमावाति वातः । प्रमदनमदनमाद्यद्यौवनोद्दामरामारमणरभसखेदस्वेदविच्छेददक्षः ॥ शिशुपालवधम् ११.१९ ॥ |
| विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसम् । शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम् ॥ किरातार्जुनीयम् ५.१३ ॥ |
| विकचोत्पलचारुलोचनस्तव चैद्येन घटामुपेयुषः । यदुपुङ्गव बन्धुसौहृदात्त्वयि पाता ससुरो नवासवः ॥ शिशुपालवधम् १६.१२ ॥ |
| विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः । कान्ताचित्तेऽधरे वाऽपि कुरु त्वं वीतरागताम् ॥ चन्द्रालोकः ५.९६ ॥ |
| विकसत्कलायकुसुमासितद्युतेरलघुडुपाण्डु जगतामधीशितुः । यमुनाह्रदोपरिगहंसमण्डलद्युतिजिष्णु जिष्णुरभृतोष्णवारणम् ॥ शिशुपालवधम् १३.२१ ॥ |
| विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तं । ददृशुरिव सुराङ्गना निषण्णं सशरमनङ्गमशोकपल्लवेषु ॥ किरातार्जुनीयम् १०.३२ ॥ |
| विकार्मुकः कर्मसु शोचनीयः परिच्युतौदार्य इवोपचारः । विचिक्षिपे शूलभृता सलीलं स पत्रिभिर्दूरमदूरपातैः ॥ किरातार्जुनीयम् १७.५३ ॥ |
| विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः । विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ॥ किरातार्जुनीयम् १५.५२ ॥ |
| विकासिनीलायतपुष्पनेत्रा मृगीयमिन्दीवरिणी वनस्था । विलोकते कान्तमिहोपरिष्टान्मृगं तवैषाननचन्द्रभाजम् ॥ नैषधीयचरितम् २२.१२५ ॥ |
| विकीर्णसप्तर्षिबलि प्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्चयुतैः । यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ॥ कुमारसंभवम् ५.३७॥ |
| विकोशनिर्धौततनोर्महासेः फणावतश्च त्वचि विच्युतायां । प्रतिद्विपाबद्धरुषः समक्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥ किरातार्जुनीयम् १७.४५ ॥ |
| विक्रीय दिश्यानि धनान्युरुणि द्वैप्यानसावुत्तमलाभभाजः । तरीषु तत्रत्यमफल्गु भाण्डं सांयात्रिकानावपतोऽभ्यनन्दत् ॥ शिशुपालवधम्  ३.७५ ॥ |
| विख्यातस्योपमानस्य यत्र स्यादुपमेयता । इन्दुर्मुखमिवेत्यादौ स्यात्प्रतीपोपमा तदा ॥ चन्द्रालोकः ५.१४ ॥ |
| विगणय्य कारणमनेकगुणं निजयाथवा कथितमल्पतया । असदप्यदः सहितुमर्हति नः क्व वनेचराः क्व निपुणा मतयः ॥ किरातार्जुनीयम् ६.३७ ॥ |
| विगततिमिरपङ्गं पश्यति व्योम यावद्धुवति विरहखिन्नः पक्षती यावदेव । रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना सरिदपरतटान्तादागता चक्रवाकी ॥ शिशुपालवधम् ११.२६ ॥ |
| विगतरागगुणोऽपि जनो न कश्चलति वाति पयोदनभस्वति । अभिहितेऽलिभिरेवमिवोच्चकैरननृते ननृते नवपल्लवैः ॥ शिशुपालवधम् ६.३९ ॥ |
| विगतवारिधरावरणाः क्वचिद्ददृशुरुल्लसितासितासिताः । क्वचिदिवेन्द्रगजाजिनकञ्चुकाः शरदि नीरदिनीर्यदेवो दिशः ॥ शिशुपालवधम् ६.५१ ॥ |
| विगतसस्यजिघत्समघट्टयत्कलमगोपवधूर्न मृगव्रजम् । श्रुततदीरितकोमलगीतकध्वनिमिषेऽनिमेषेक्षणमग्रतः ॥ शिशुपालवधम् ६.४९ ॥ |
| विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरुभिः । विभिद्यमाना विससार सारसानुदस्य तीरेषु तरङ्गसंहतिः ॥ किरातार्जुनीयम् ८.३१ ॥ |

| |
|---|
| विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे । आचकाङ्क्ष घनशब्दविक्लवास्ता विवृत्य विशतीर्भुजान्तरं ॥ रघुवंशम् १९.३८ ॥ |
| विचकर्ष च संहितेषुरुच्चैश्चरणास्कन्दननामिताचलेन्द्रः । धनुरायतभोगवासुकिज्या- वदनग्रन्थिविमुक्तवह्नि शम्भुः ॥ किरातार्जुनीयम् १३.१८ ॥ |
| विचित्रं चेत्प्रयत्नः स्याद्विपरीतफलप्रदः । नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥ चन्द्रालोकः ५.८२ ॥ |
| विचित्रया चित्रयतेव भिन्नां रुचं रवेः केतनरत्नभासा । महारथौघेन न संनिरुद्धाः पयोदमन्द्रध्वनिना धरित्री ॥ किरातार्जुनीयम् १६.३ ॥ |
| विचित्रलक्षणो न्यासो निर्वाहः प्रौढिरौचिती । शास्त्रान्तर-रहस्योक्तिः संग्रहो दिक्प्रदर्शिता ॥ चन्द्रालोकः४.१२ ॥ |
| विचित्रवादित्रनिनादमूर्च्छितः सुदूरचारी जनतामुखारवः । ममौ न कर्णेषु दिगन्तदन्तिनां पयोधिपूरप्रतिनादमेदुरः ॥ नैषधीयचरितम् १५.१८ ॥ |
| विचिन्तयन्नुपनतमाहवं रसादुरः स्फुरत्तनुरुहमग्रपाणिना । परामृशत्कठिनकठोरकामिनीकुचस्थलप्रमुषितचन्दनं पृथुः ॥ शिशुपालवधम् १७..११ ॥ |
| विचिन्त्य नानाभुवनागतांस्तानमर्त्यसंकीर्त्यचरित्रगोत्रान् । कथ्याः कथंकारममी सुतायामिति व्यषादि क्षितिपेन तेन ॥ नैषधीयचरितम् १०.६८ ॥ |
| विचिन्त्य बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागम् । आचष्ट विस्पष्टमभाषमाणामेनां स चक्राङ्गपतङ्गशक्रः ॥ नैषधीयचरितम् ३.६८ ॥ |
| विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात् । व्यलोकयच्चम्पककोरकावलीः स शम्बरारेर्बलिदीपिका इव ॥ नैषधीयचरितम् १.८६ ॥ |
| विचैत्रव्रतमासादौ विभौमास्ते विभूमिजे । छूरिकाबन्धनं शस्तं नृपाणां प्राग्विवाहतः ॥ मुहूर्त.संस्कारप्रकरणम् ५९॥ |
| विच्छित्तिर्नवचन्दनेन वपुषो भिन्नोऽधरोऽलक्तकै-रच्छाच्छे पतिताञ्जने च नयने श्रोण्योऽलसन्मेखलाः । प्राप्तो मौक्तिकहारमुन्नतकुचाभोगस्तदीयद्विषा-मित्थं नित्यविभूषणा युवतयः संपत्सु चापत्स्वपि ॥ शिशुपालवधम् १६.८४ ॥ |
| विजनमिति बलादमुं गृहीत्वा क्षणमथ वीक्ष्य विपक्षमन्तिकोऽन्या । अभिपतितुमना लघुत्वभीतेरभवदमुञ्चति वल्लभेऽतिगुर्वी ॥ शिशुपालवधम् ७.५१ ॥ |
| विजितक्रुधमीक्षतामसौ महतां त्वामहितं महीभृतां । असकृज्जितसंयतं पुरो मुदितः सप्रमदं महीपतिः ॥ शिशुपालवधम् १६.१५ ॥ |
| विजित्य दास्यादिव वारिहारितामवापितास्तत्कुचयोर्द्वयेन ताः । शिखामवाक्षुः सहकारशाखिनस्त्रपाभरम्लानिमिवानतैर्मुखैः ॥ नैषधीयचरितम् १५.२ ॥ |
| विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः । स वल्कवासांसि तवाधुनाहरन्करोति मन्युं न कथं धनंजयः ॥ किरातार्जुनीयम् १.३५ ॥ |
| विजित्य शोलापुर-गं महारणं स मानसिंहो जयमालिकाऽञ्चितः । बभूव मानोन्नतऽभाल-भाक् पथि प्रतापसिंहस्य निकेतनेऽतिथिः ॥ प्रतापविजयः-६४ ॥ |
| विज्ञप्तिमन्तःसभयः स भैम्या मध्येसभं वासवसम्भलीयाम् । संभालयामास भृशं कृशाशस्तदालिवृन्दैरभिनन्द्यमानाम् ॥ नैषधीयचरितम् ६.७६ ॥ |
| विज्ञेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयास्मिन्समयं समीक्ष्य । आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः कार्यस्य कार्यस्य शुभा विभाति ॥ नैषधीयचरितम् ३.९६ ॥ |
| विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते । मुनिनेव मृकण्डुसूनुना जगतीवस्तु पुरोदरे हरेः ॥ नैषधीयचरितम् २.९१ ॥ |
| विततपृथुवरत्रातुल्यरूपैर्मयूखैः कलश इव गरीयान्दिग्भिराकृष्यमाणः । कृतचपलविहङ्गालापकोलाहलाभिर्जलनिधिजलमध्यादेष उत्तार्यतेऽर्कः ॥ शिशुपालवधम् ११.४४ ॥ |
| विततवलिविभाव्यपाण्डुलेखाकृतपरभाघविलीनरोमराजिः । कृशमपि कृशतां पुनर्नयन्ती विपुलतरोन्मुखलोचनावलग्नम् ॥ शिशुपालवधम् ७.३३ ॥ |
| विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः । दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जाह्नवीम् ॥ किरातार्जुनीयम् ५.१५ ॥ |
| वितन्वतस्तस्य शरान्धकारं त्रस्तानि सैन्यानि रवं निशेमुः । प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥ किरातार्जुनीयम् १७.२० ॥ |
| वितीर्णे सर्वस्वे तरुणकरुणापूर्णमनसा स्मरन्तः संसाराद् द्विगुणपरिणामावधिगतः । कदा पुण्यारण्ये परिणतशिरच्चन्द्रकिरणं त्रियामां नेष्यामो हरचरणचित्तैकशरणाः ॥ पुरुषार्थोपदेशः-65॥ |
| वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः स्मरन्तः संसारे विगुणपरिणामां विधिगतिम् । वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणास्त्रियामा नेस्यामो हरचरणचिन्तैकशरणाः ॥ वैराग्यशतकम् ८६ ॥ |
| वित्तगतः शशिपुत्रो भ्रातरि वासरनाथः । लग्नगते भृगुपुत्रे स्युः शलभा इव सर्वे ॥ मुहूर्त.यात्राप्रकरणम् ६३॥ |
| वित्थ चित्तमखिलस्य न कुर्यां धुर्यकार्यपरिपन्थि तु मौनम् । ह्रीर्गिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवागपरास्ता ॥ नैषधीयचरितम् ५.१०५ ॥ |
| विदग्धबालेङ्गितगुप्तिचातुरी प्रवह्लिकोत्पाटनपाटवे हृदः । निजस्य टीकां प्रबबन्ध कामुकः स्पृशद्भिराकूतशतैस्तदौचितीम् ॥ नैषधीयचरितम् १६.१०२ ॥ |
| विदग्धलीलोचितदन्तपत्रिकाचिकीर्षया नूनमनेन मानिना । न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति ॥ शिशुपालवधम् १.६० ॥ |
| विदतुर्यमुत्तमशेषपरिषदि नदीजधर्मजौ । यातु निकषमधियुद्धमसौ वचनेन किं भवतु साध्वसाधु वा ॥ शिशुपालवधम् १५.६५ ॥ |
| विदर्भजायाः करवारिजेन यन्नलस्य पाणेरुपरि स्थितं किल । विशङ्क्य सूत्रं पुरुषायितस्य तद्भविष्यतोऽस्मायि तदा तदालिभिः ॥ नैषधीयचरितम् १६.१५ ॥ |
| विदर्भनाम्नस्त्रिदिवस्य वीक्षितुं रसोदयादप्सरसस्तमुज्ज्वलम् । गृहाद्गृहादेत्य धृतप्रसाधना व्यराजयन्राजपथानथाधिकम् ॥ नैषधीयचरितम् १५.७९ ॥ |
| विदर्भपुत्रीश्रवणावतंसिकामणीमहःकिंशुककार्मुकोदरे । उदीतनेत्रोत्पलबाणसंभृतिर्नलं परं लक्ष्यमवैक्षत स्मरः ॥ नैषधीयचरितम् १५.४ ॥ |
| विदर्भराजः क्षितिपाननुक्षणं शुभक्षणासन्नतरत्वसत्वरः । दिदेश दूतान्पथि यान्यथोत्तरं चमूममुष्योपचिकाय तच्चयः ॥ नैषधीयचरितम् १६.५ ॥ |
| विदर्भराजप्रभवा ततः परं त्रपासखी वक्तुमलं न सा नलम् । पुरस्तमूचेऽभिमुखं यदत्रपा ममज्ज तेनैव महाह्रदे ह्रियः ॥ नैषधीयचरितम् ९.१४१ ॥ |

| |
|---|
| विदर्भराजोऽपि समं तनूजया प्रविश्य हृष्यन्नवरोधमात्मनः । शशंस देवीमनुजातसंशयां प्रतीच्छ जामातरमुत्सुके नलम् ॥ नैषधीयचरितम् १५.५ ॥ |
| विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः । फलानि धूमस्य धयानधोमुखान्स दाडिमे दोहदधूपिनि द्रुमे ॥ नैषधीयचरितम् १.८२ ॥ |
| विदलत्पुष्कराकीर्णाः पतच्छङ्खकुलाकुलाः । तरत्पत्ररथा नद्यः प्रासर्पन्नक्तवारिजाः ॥ शिशुपालवधम् १९.७७ ॥ |
| विदलितमहाकूलामुक्ष्णां विषाणविघट्टनै- रलघुचरणाकृष्टग्राहां विपणिभिरुन्मदैः । सपदि सरितं सा श्रीभर्तुर्बृहद्रथमण्डल-स्खलिलमुल्लङ्घ्यैनां जगाम वरूथिनी ॥ शिशुपालवधम् १२.७७ ॥ |
| विदारिताऽस्यः परितः स्फुरत्सटः, भयानकाऽऽकारधरोऽधिकाननम् । प्रसुप्त-सिंहोऽच हठात्प्रबोधितः न मानसिंहो भवता तिरस्कृतः ॥ प्रतापविजयः-७७॥ |
| विदितं तप्यमानं च तेन मे भुवनत्रयम् । अकामोपनतेनेव साधोर्हृदयमेनसा ॥ रघुवंशम् १०.४० ॥ |
| विदितं दिवि केऽनीके तं यातं निजिताजिनि । विगदं गवि रोद्धारो योद्धा यो नतिमेति नः ॥ शिशुपालवधम् १९.९० ॥ |
| विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यविधौ । अनपेतकालमभिरामकथाः कथयांबभूवुरिति गोत्रभिदे ॥ किरातार्जुनीयम् ६.३० ॥ |
| विदुरेष्यदपायमात्मना परतः श्रद्दधतेऽथवा बुधाः । न परोपहितं न च स्वतः प्रमिमीतेऽनुभवादृतेऽल्पधीः ॥ शिशुपालवधम् १६.४० ॥ |
| विदुषीव दर्शनममुष्य युवतिरतिदुर्लभं पुनः । यान्तमनिमिषमतृप्तमनाः पतिमीक्षते स्म भृशया दृशः पथः ॥ शिशुपालवधम् १५.९४ ॥ |
| विदूरपातेन भिदां उपेयुषश्च्युताः प्रवाहादभितः प्रसारिणः । प्रियाङ्कशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिन्दवः ॥ किरातार्जुनीयम् ८.१० ॥ |
| विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया । खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमम् ॥ रघुवंशम् ११.७६ ॥ |
| विद्या ददाति विनयं विनयाद्याति पात्रताम् । पात्रत्वात्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ नीतिसंग्रहस्य मित्र- ०. 4 ॥ |
| विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता। आलोलायत-लोचनाः प्रियतमाः स्वप्नेऽपि नालिङ्गिताः कालोऽयं पर-पिण्ड-लोलुपतया काकैरिव प्रेर्यते॥॥ वैराग्यशतकम् ४७ ॥ |
| विद्या नाधिगता कलङ्करहिता, वित्तं च नोपार्जितं शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता । आलोलायतलोचना युवतयः स्वपनेऽपि नालिङ्गिताः कालोऽयं परपिण्डभक्षणतया काकैरिव प्रेरितः ॥ पुरुषार्थोपदेशः-24॥ |
| विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः । विद्या बन्धुजनो विदेशगमने विद्या परा देवता विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ॥ नीतिशतकम् २० ॥ |
| विद्या विदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति कत्यन्तरभेदभाजः । इतीव रेखाभिरपश्रमस्ताः संख्यातवान्कौतुकवान्विधाता ॥ नैषधीयचरितम् ७.४१ ॥ |
| विद्यानिरतः शुभराशिलवे पापांशगते हि दरिद्रतरः । चन्द्रे स्वलवे बहुदुःखयुतः कर्णादितिभे धनवान्स्वलवे ॥ मुहूर्त.संस्कारप्रकरणम् ५०॥ |
| विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् । अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ मेघदूतम्, उत्तरमेघः १ ॥ |
| विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः कोपात्कोऽपि निवर्तते यदि भटः कीर्त्या जगत्युद्भटः । आगच्छन्नपि संमुखं विमुखतामेवाधिगच्छत्यसौ द्रागेतच्छुरिकारयेण ठणिति च्छिन्नापसर्पच्छिराः ॥ नैषधीयचरितम् १२.३ ॥ |
| विद्वद्भिरागमपरैर्विवृतं कथञ्चि- च्छ्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः । श्रेयान्द्विजातिरिव हन्तुमघानि दक्षं गूढार्थमेष निधिमन्त्रगणं बिभर्ति ॥ शिशुपालवधम् ४.३७॥ |
| विद्विषोऽद्विषुरुद्वीक्ष्य तथाप्यासन्निरेनसः । अरुच्यमपि रोगघ्नं निसर्गादेव भेषजम् ॥ शिशुपालवधम् १९.८९ ॥ |
| विधातुमवतीर्णोऽपि लघिमानमसौ भुवः । अनेकमरिसंघातमकरोद्भूमिवर्धनं ॥ शिशुपालवधम् १९.१०५ ॥ |
| विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः । ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः ॥ शिशुपालवधम् १.१७ ॥ |
| विधाय ताम्बूलपुटीं कराङ्कगां बभाण ताम्बूलकरङ्कवाहिनी । दमस्वसुर्भावमवेत्य भारतीं नयानया वक्त्रपरिश्रमं शमम् ॥ नैषधीयचरितम् १२.७६ ॥ |
| विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडाम्बिनीमयम् । उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना ॥ नैषधीयचरितम् १.१२४ ॥ |
| विधाय मूर्धानमधश्चरं चेन्मुञ्चेत्तपोभिः स्वमसारभावम् । जाड्यं च नाञ्चेत्कदली बलीयस्तदा यदि स्यादिदमूरुचारुः ॥ नैषधीयचरितम् ७.९४ ॥ |
| विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः । क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥ किरातार्जुनीयम् १.१४ ॥ |
| विधाय विध्वंसनमात्मनीनं शमैकवृत्तेर्भवतश्छलेन । प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥ किरातार्जुनीयम् ३.१६ ॥ |
| विधाय वैरं सामर्षे नरो रौ य उदासते । प्रक्षिप्योदर्चिर्षं कक्षे शेरते ते भिमारुतम् ॥ शिशुपालवधम् २.४२ ॥ |
| विधाय शीघ्रं समरेऽथ सर्वथा स-मान! ते दुर्मद-मानमर्दनम् । तथा समुन्मूल्य कुलैककण्टकं ततः कृतार्थो भविताऽस्मि भूतले ॥ प्रतापविजयः-८४ ॥ |
| विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम् । त्वन्नामवर्णा इव कर्णपीता मयास्य संक्रीडति चक्रिचक्रे ॥ नैषधीयचरितम् ३.५ ॥ |
| विधिना कृतमर्धवैशसं ननु ! मां कामवधे विमुञ्चता । अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ॥ कुमारसंभवम् ४.३१ ॥ |

| |
|---|
| विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम् । उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ कुमारसंभवम् ५.३२ ॥ |
| विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलबलमगाधे मग्नमापत्पयोधौ । रिपुतिमिरमुदस्योदीयमानं दिनादौ दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ किरातार्जुनीयम् १.४६ ॥ |
| विधिस्तुषारर्तुदिनानि कर्तकर्त विनिर्माति तदन्तभित्तैः । ज्योत्स्नीर्नचेत्तत्प्रतिमा इमा वा कथं कथं तानि च वामनानि ॥ नैषधीयचरितम् २२.५७ ॥ |
| विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् । विफलितजलसेकप्रक्रियागौरवेण व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥ नैषधीयचरितम् २.१०६ ॥ |
| विधुकुजयुतलग्ने सौरिदृष्टेऽथ चन्द्रे मृतिभमदनसंस्थे लग्नगे भास्करेऽपि । हिबुकनिधनहोराद्यूनगे चापि पापे सपदि भवति भङ्गः प्रश्नकर्तुस्तदानीम् ॥ मुहूर्त.यात्राप्रकरणम् ५॥ |
| विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम् । शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः ॥ नैषधीयचरितम् २.९४ ॥ |
| विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम् । अवसीदति यत्सुरैरपि त्वयि सम्भावितवृत्ति पौरुषम् ॥ किरातार्जुनीयम् २.७ ॥ |
| विधुरमानि तया यदि भानुमान्कथमहो स तु तद्धृदयं तथा । अपि वियोगभरास्फुटनस्फुटीकृतदृषत्त्वमजिज्वलदंशुभिः ॥ नैषधीयचरितम् ४.२ ॥ |
| विधुविरोधितिथेरभिधायिनीं ननु न किं पुनरिच्छसि कोकिलाम् । सखि किमर्थगवेषणया गिरं किरति सेयमनर्थमयीं मयि ॥ नैषधीयचरितम् ४.१०८ ॥ |
| विधूतकेशाः परिलोलितस्रजः सुराङ्गनानां प्रविलुप्तचन्दनाः । अतिप्रसङ्गाद्विहितागसो मुहुः प्रकम्पं ईयुः सभया इवोर्मयः ॥ किरातार्जुनीयम् ८.३३ ॥ |
| विधृते दिवा सवयसा च पुरः परिपूर्णमण्डलविकाशभृति । हिमधाम्नि दर्पणतले च मुहुः स्वमुखश्रियं मृगदृशो ददृशुः ॥ शिशुपालवधम् ९.५३ ॥ |
| विधेः कदाचिद्भ्रमणीविलासे श्रमातुरेभ्यः स्वमहत्तरेभ्यः । स्कन्धस्य विश्रान्तिमदां तदादि श्रम्यामि नाविश्रमविश्वगोऽपि ॥ नैषधीयचरितम् ३.१९ ॥ |
| विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिं । अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजं ॥ रघुवंशम् १.५६ ॥ |
| विधोर्बलमवेक्ष्य वा दलनकण्डनं वारकं गृहाङ्गणविभूषणान्यथ च वेदिकामण्डपान् । विवाहविहितोडुभिर्विरचयेत्तथोद्वाहतो न पूर्वमिदमाचरेत् त्रिनवषण्मिते वासरे ॥ मुहूर्त.विवाहप्रकरणम् ९६॥ |
| विधोर्विधिर्बिम्बशतानि लोपंलोपं कुहूरात्रिषु मासिमासि । अभङ्गुरश्रीकममुं किमस्या मुखेन्दुमस्थापयदेकशेषम् ॥ नैषधीयचरितम् ७.५९ ॥ |
| विधौ सितांशगे सिते त्रिकोणगे तनौ गुरौ । समस्तवेदविद् व्रती यमांशगेऽतिनिर्घृणः ॥ मुहूर्त.संस्कारप्रकरणम् ५३॥ |
| विनमद्भिरधः स्थितैः खगैर्झटिति श्येननिपातशङ्किभिः । स निरैक्षि दृशैकयोपरि स्यदझांकारितपत्रपद्धतिः ॥ नैषधीयचरितम् २.७ ॥ |
| विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाम्भसः । ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रियः ॥ किरातार्जुनीयम् ४.२ ॥ |
| विनयति सुदृशो दृशः परागं प्रणयिनि कौसुममाननानिलेन । तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रोषरझोभिरापुपूरे ॥ शिशुपालवधम् ७.५७ ॥ |
| विनष्टार्थस्य लाभोऽन्धे शीघ्रं मन्दे प्रयत्नतः । स्याददूरे श्रवणं मध्ये श्रुत्याप्ती न सुलोचने ॥ मुहूर्त.नक्षत्रप्रकरणम्  २३ ॥ |
| विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः । मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः ॥ नैषधीयचरितम् ३.३७ ॥ |
| विना वर्तनमेवैते न त्यजन्ति ममान्तिकम् । तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान्  ॥ नीतिसंग्रहस्य मित्र-१.४६ ॥ |
| विना सीतादेव्या किमिव हि न दुःखं रघुपतेः प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति । स च स्नेहस्तावानयमपि वियोगो निरवधिः किमेवं त्वं पृच्छस्यनधिगतरामायण इव ॥<br><br>(उत्तररामचरितम्  ६.३०) |
| विनापि भूषामवधिः श्रियामियं व्यभूषि विज्ञाभिरदर्शि चाधिका । न भूषयैषाधिचकास्ति किं तु सानयेति कस्यास्तु विचारचातुरी विधाय ॥ नैषधीयचरितम् १५.२७ ॥ |
| विनाप्यर्थैर्धीरः स्पृशति  बहुमानोन्नतिपदं समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः । स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां द्युतिं सैंहीं श्वा किं धृतकनकमालोऽपि लभते  ॥ नीतिसंग्रहस्य मित्र-१.१६९ ॥ |
| विनिद्रपत्त्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम् । दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम् ॥ नैषधीयचरितम् १.७८ ॥ |
| विनिर्यतीनां गुरुस्वेदमन्थरं सुराङ्गनानामनुसानुवर्त्मनः । सविस्मयं रूपयतो नभश्चरान्विवेश तत्पूर्वमिवेक्षणादरः ॥ किरातार्जुनीयम् ८.२६ ॥ |
| विनिवारितभानुतापमेकं सकलस्यापि मुरद्विषो बलस्य । शरजालमयं समं समन्तादुरु सद्मेव नराधिपेन तेने ॥ शिशुपालवधम् २०.१६ ॥ |
| विनिहत्य भवन्तमूर्जितश्रीर्युधि सद्यः शिशुपालतां यथार्थां । रुदतां भवदङ्गनागणानाङ्करुणान्तःकरणः करिष्यतेऽसौ ॥ शिशुपालवधम् १६.८५ ॥ |
| विनिहितं परितापिनि चन्दनं हृदि तया धृतबुद्बुदमाबभौ । उपनमन्सुहृदं हृदयेशयं विधुरिवाङ्कगतोडुपरिग्रहः ॥ नैषधीयचरितम् ४.२८ ॥ |
| विनेतृभर्तृद्वयभीतिदान्तयोः परस्परस्मादनवाप्तवैशसः । अजायत द्वारि नरेन्द्रसेनयोः समागमः स्फारमुखारवोद्गमः ॥ नैषधीयचरितम् १६.९ ॥ |
| विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते । विद्या हृद्याऽपि सावद्या बिना विनयसम्पदम् ॥ चन्द्रालोकः ५.६१ ॥ |
| विनोदनिच्छन्नथ दर्पजन्मनो रणेन कण्ड्वास्त्रिदशैः समं पुनः । स रावणो नाम निकामभीषणं बभूव रक्षः क्षतरक्षणं दिवः ॥ शिशुपालवधम्  १.४८ ॥ |
| विन्ध्यस्य संस्तम्भयिता महाद्रेर्निःशेषपीतोज्झितसिन्धुराजः । प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥ रघुवंशम् ६.६१ ॥ |
| विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाबद्धमुक्ताफलभक्तिचित्रे । आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयांबभूवुः॥ कुमारसंभवम् ७.१०॥ |

| |
|---|
| विन्यस्तशुक्लागुरु चक्रुरङ्गं गोरोचनापत्रविभक्तमस्याः। सा चक्रवाकाङ्कितसैकतायास्त्रिस्रोतसः कान्तिमतीत्य तस्थौ॥ कुमारसंभवम् ७.१५॥ |
| विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये । हृतस्य शेषानिव कुङ्कुमस्य तान्विकत्थनीयान्दधुरन्यथा स्त्रियः ॥ किरातार्जुनीयम् ८.३४ ॥ |
| विपञ्चिराच्छादि न वेणुभिर्न ते प्रणीतगीतैर्न च तेऽपि झर्झरैः । न ते हुहुक्केन न सोऽपि ढक्कया न मर्दलैः सापि न तेऽपि ढक्कया ॥ नैषधीयचरितम् १५.१७ ॥ |
| विपत्त्रलेखा निरलक्तकाधरा निरञ्जनाक्षीरपि बिभ्रतीः श्रियं । निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनं ॥ किरातार्जुनीयम् ८.४० ॥ |
| विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा । जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः ॥ कुमारसंभवम् ५.७६ ॥ |
| विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः। यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ पुरुषार्थोपदेशः-46॥ |
| विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्यपटुता युधि विक्रमः । यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ नीतिसंग्रहस्य मित्र-१.३२ ॥ |
| विपदि धैर्यमथाभ्युदये क्षमा, सदसि वाक्यपटुता युधिविक्रमः । यशसि चाभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ नीतिशतकम्६३ ॥ |
| विपदेति तावदवसादकरी न च कामसम्पदभिकामयते । न नमन्ति चैकपुरुषं पुरुषास्तव यावदीश न नतिः क्रियते ॥ किरातार्जुनीयम् १८.२३ ॥ |
| विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः । नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ किरातार्जुनीयम् २.१४ ॥ |
| विपाण्डु संव्यानमिवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः । अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासा वनराजियोषितः ॥ किरातार्जुनीयम् ४.२८ ॥ |
| विपाण्डुभिर्ग्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः । इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥ किरातार्जुनीयम् ४.२४ ॥ |
| विपाशैरावतीतीरे शुतुद्र्याश्च त्रिपुष्करे । विवाहादिशुभे नेष्टं होलिकाप्राग्दिनाष्टकम् ॥ मुहूर्तचिन्त. ४०॥ |
| विपुलकमपि यौवनोद्धतानां घनपुलकोदयकोमलं चकाशे । परिमलितमपि प्रियैः प्रकामं कुचयुगमुज्ज्वलमेष कामिनीनां ॥ शिशुपालवधम् ७.७० ॥ |
| विपुलतरनितम्बाभोगरुद्धे रमण्याः शयितुमनधिगच्छञ्जीवितेशोऽवकाशं । रतिपरिचयनश्यन्नैन्द्रतन्द्रः कथञ्चिद्गमयति शयनीये शर्वरी किं करोतु ॥ शिशुपालवधम् ११.५ ॥ |
| विपुल-हृदयैरीशैरेतज्जगज्जनितं पुरा विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा। इह हि भुवनान्यन्यैर्धीराश्चतुर्दश भुञ्जते कतिपय-पुर-स्वाम्ये पुंसां क एष मद-ज्वरः॥॥ वैराग्यशतकम् ५७ ॥ |
| विपुलहृदयैर्धन्यैः कैश्चिज्जगज्जनितं पुरा विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा । इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ पुरुषार्थोपदेशः-36॥ |
| विपुलाचलस्थलघनेन जिगमिषुभिरङ्गनाः प्रियैः । पीनकुचतटनिपीडदलद्वरवारबाणमुरसालिलिङ्गिरे ॥ शिशुपालवधम् १५.८४ ॥ |
| विपुलालवालभृतवारिदर्पणप्रतिमागतैरभिविरेजुरात्मभिः । यदुपान्तिकेषु दधतो महीरुहः सपलाशराशिमिव मूलसंहतिं ॥ शिशुपालवधम् १३.५७ ॥ |
| विपुलेन निपीड्य निर्दयं मुदमायातु नितान्तमुन्मनाः । प्रचुराधिगताङ्गनिर्वृतिं परितस्त्वां खलु विग्रहेण सः ॥ शिशुपालवधम् १६.३ ॥ |
| विपुलेन सागरशयस्यकुक्षिणा भुवनानि यस्य पपिरे युगक्षये । मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥ शिशुपालवधम् १३.४० ॥ |
| विप्रपाणिषु भृशं वसुवर्षी पात्रसात्कृतपितृक्रतुकव्यः । श्रेयसा हरिहरं परिपूज्य प्रह्व एष शरणं प्रविवेश ॥ नैषधीयचरितम् २१.१२ ॥ |
| विप्रांश्च मिश्रभभृगौ तु पशूंश्च मिश्रतीक्ष्णार्कजेऽन्त्यजसुखा खलु राक्षसी च । त्र्यंशे दिनस्य नृपतीन् प्रथमे निहन्ति मध्ये द्विजानपि विशोऽपरके च शूद्रान् ॥ मुहूर्त.संक्रान्तिप्रकरणम् २॥ |
| विप्राज्ञया तथोद्वाहे राज्ञा प्रीत्यार्पितं च यत् । निन्द्येऽपि घिष्ण्ये-वारादौ वस्त्रं धार्यं जगुर्बुधाः ॥ मुहूर्त.नक्षत्रप्रकरणम् १२॥ |
| विप्राणां व्रतबन्धनं निगदितं गर्भाज्जनेर्वाऽष्टमे वर्षे वाप्यथ पञ्चमे क्षितिभुजां षष्ठे तथैकादशे । वैश्यानां पुनरष्टमेऽप्यथ पुनः स्याद् द्वादशे वत्सरे कालेऽथ द्विगुणे गते निगदिते गौणं तदाहुर्बुधाः ॥ मुहूर्त.संस्कारप्रकरणम् ३९॥ |
| विप्राधीशौ भार्गवेज्यौ कुजार्कौ राजन्यानामोषधीशो विशां च । शूद्राणां ज्ञश्चान्त्यजानां शनिः स्याच्छाखेशाः स्युर्जीवशुक्रारसौम्याः ॥ मुहूर्त.संस्कारप्रकरणम् ४३॥ |
| विप्राश्वेभफलान्नदुग्धदधिगोसिद्धार्थपद्माम्बरं वेश्यावाद्यमयूरचाषनकुला बद्धैकपश्वामिषम् । सद्वाक्यं कुसुमेक्षुपूर्णकलशच्छत्राणि मृत्कन्यका रत्नोष्णीषसितोक्षमद्यसमुतस्त्रीदीप्तवैश्वानराः ॥ मुहूर्त.यात्राप्रकरणम् १००॥ |
| विप्रे धयत्युदधिमेकतमं त्रसत्सु यस्तेषु पञ्चसु बिभाय न सीधुसिन्धुः । तस्मिन्ननेन च निजालिजनेन च त्वं सार्धं विधेहि मधुरा मधुपानकेलीः ॥ नैषधीयचरितम् ११.६८ ॥ |
| विफलीकृतयत्नस्य क्षतबाणस्य शम्भुना । गाण्डीवधन्वनः खेभ्यो निश्चचार हुताशनः ॥ किरातार्जुनीयम् १५.४६ ॥ |
| विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः । तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे ॥ कुमारसंभवम् ४.१९ ॥ |
| विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरन्ध्रात् । निरस्तधूमस्य च रात्रिवह्नेर्विना तनुत्रेण रुचिं स भेजे ॥ किरातार्जुनीयम् १७.४६ ॥ |
| विभक्तात्मा विभुस्तासां एकः कुक्षिष्वनेकधा । उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥ रघुवंशम् १०.६६ ॥ |
| विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते । रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा ॥ चन्द्रालोकः १.९ ॥ |
| विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः । अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरः स्थितम् ॥ नैषधीयचरितम् १.१६ ॥ |
| विभवेऽपि सति त्वया विना सुखं एतावदजस्य गण्यतां । अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्तदाश्रयाः ॥ रघुवंशम् ८.६९ ॥ |

| |
|---|
| विभावना विनाऽपि स्यात्कारणं कार्यजन्म चेत् । पश्य, लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् ॥ चन्द्रालोकः ५.७७ ॥ |
| विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव । बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥ रघुवंशम् ३.३७ ॥ |
| विभावी विभवी भाभो विभाभावी विवो विभीः । भवाभिभावी भावावो भवाभावो भुवो विभुः ॥ शिशुपालवधम् १९.८६ ॥ |
| विभिन्दता दुष्कृतिनीं मम श्रुतिं दिगिन्द्रदुर्वाचिकसूचिसंचयैः । प्रयातजीवामिव मां प्रति स्फुटं कृतं त्वयाप्यन्तकदूततोचितम् ॥ नैषधीयचरितम् ९.६२ ॥ |
| विभिन्नपर्यन्तगमीनपङ्क्तयः पुरो विगाढाः सखिभिर्मरुत्वतः । कथंचिदापः सुरसुन्दरीजनैः सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥ किरातार्जुनीयम् ८.३० ॥ |
| विभिन्नवर्णागरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या । रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥ शिशुपालवधम् ४.१४ ॥ |
| विभिन्नशङ्खः कलुषीभवन्मुहुर्मदेन दन्तीव मनुष्यधर्मणः । निरस्तगाम्भीर्यमपास्तपुष्पकः प्रकम्पयामास न मानसं न सः ॥ शिशुपालवधम् १.५५ ॥ |
| विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशांपतिस्तं । सौपर्णमस्त्रं प्रतिसंजहार प्रहेष्वनिर्बन्धरुषो हि सन्तः ॥ रघुवंशम् १६.८० ॥ |
| विभूषणस्रंसनशंसनार्पितैः करप्रहारैरपि धूननैरपि । अमान्तमन्तः प्रसभं पुराऽपरा सखीषु संमापयतीव संमदम् ॥ नैषधीयचरितम् १५.८६ ॥ |
| विभूषणांशुप्रतिबिम्बितैः स्फुटं भृशावदातैः स्वनिवासिभिर्गुणैः । मृगेक्षणानां समुपासि चामरैर्विधूयमानैः स विधुप्रभैः प्रभुः ॥ नैषधीयचरितम् १६.२ ॥ |
| विभूषणैः कञ्चुकिता बभुः प्रजा विचित्रचित्रैः स्नपितत्विषो गृहाः । बभूव तस्मिन्मणिकुट्टिमैः पुरे वपुः स्वमुर्व्योः परिवर्तितोपमम् ॥ नैषधीयचरितम् १५.१५ ॥ |
| विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा । कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥ कुमारसंभवम् ५.७८ ॥ |
| विभूषाणेभ्योऽवरमंशुकेषु ततोऽवरं सान्द्रमणिप्रभासु । सम्यक्पुनः क्वापि न राजकस्य पातुं दृशा धातृधृतावकाशाम् ॥ नैषधीयचरितम् १०.१ ॥ |
| विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः । नेतारिलोकेषु करोति यद्यत्तत्तच्चकारास्य शरेषु शम्भुः ॥ किरातार्जुनीयम् १७.२७ ॥ |
| विभ्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक्तस्य खलु स्खलन्ती । स्थिरा चिरादास्त तदूरुरम्भास्तम्भावुपाश्लिष्य करेण गाढम् ॥ नैषधीयचरितम् ७.७ ॥ |
| विभ्राणया बहलयावककङ्कपिङ्कपिच्छावचूडामनुमाधवमास जग्मुः । चञ्च्वग्रदष्टचटुलाहितपताकयान्ये स्वावासभागमुरगाशनकेतुयष्ट्या ॥ शिशुपालवधम् ५.१३ ॥ |
| विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् । बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ कुमारसंभवम् ५.८ ॥ |
| विमुच्यमानैरपि तस्य मन्थरं गवां हिमानीविशदैः कदम्बकैः । शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ किरातार्जुनीयम् ४.१२ ॥ |
| वियति वेगपरिप्लुतमन्तरा समभिसृत्य रयेण कपिध्वजः । चरणयोश्चरणानमितक्षितिर्निजगृहे तिसृणां जयिनं पुरां ॥ किरातार्जुनीयम् १८.१२ ॥ |
| वियोगबाष्पाञ्चितनेत्रपद्मच्छद्मार्पितोत्सर्गपयःप्रसूनौ । कर्णौ किमस्या रतितत्पतिभ्यां निर्वेदयपूपौ विधिशिल्पमीदृक् ॥ नैषधीयचरितम् ७.६१ ॥ |
| वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत् । ततो दुराकर्षतया तदन्तकृद्विगीयसे मन्मथदेहदाहिना ॥ नैषधीयचरितम् १.७९ ॥ |
| वियोगिदाहाय कटूभवत्त्विषस्तुषारभानोरिव खण्डमाहृतम् । सितं मृदु प्रागथ दाहदायि तत्खलः सुहृत्पूर्वमिवाहितस्ततः ॥ नैषधीयचरितम् १६.७४ ॥ |
| वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् । फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥ नैषधीयचरितम् १.८३ ॥ |
| विरक्तसंध्याकपिशं पुरस्ताद्यतो रजः पार्थिवमुज्जिहीते । शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥ रघुवंशम् १३.६४ ॥ |
| विरचिता मधुनोपवनश्रियामभिनवा इव पत्त्रविशेषकाः । मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः ॥ रघुवंशम् ८.३२ ॥ |
| विरमत बुधा ! योषित्सङ्गात् सुखात् क्षणिकोत्सवात् कुरुत करुणामैत्रीप्रज्ञावधूजनसङ्गमम् । न खलु नरके भारोक्रान्तं घनस्तनमण्डलं शरणमथ वा श्रोणीबिम्बं क्वणन्मणिमेखलम् ॥ पुरुषार्थोपदेशः-80॥ |
| विरम्यतां भूतवती सपर्या निविश्यतामासनमुज्झितं किम् । या दूतता नः फलिना विधेया सैवातिथेयी पृथुरुद्भवित्री ॥ नैषधीयचरितम् ८.५६ ॥ |
| विरलातपच्छविरनुष्णवपुः परितो विपाण्डु दधदभ्रशिरः । अभवद्गतः परिणतिं शिथिलः परमन्दसूर्यनयनो दिवसः ॥ शिशुपालवधम् ९.३ ॥ |
| विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः । किमपनेतुमचेष्टत किं पराभवितुमैहत तद्दवथुं पृथुम् ॥ नैषधीयचरितम् ४.३२ ॥ |
| विरहतापिनि चन्दनपांशुभिर्वपुषि सार्पितपाण्डिममण्डना । विषधराभबिसाभरणा दधे रतिपतिं प्रति शंभुविभीषिकाम् ॥ नैषधीयचरितम् ४.२७ ॥ |
| विरहपाण्डिमरागतमोमषीशितिमतन्निजपीततिमवर्णकैः । दश दिशः खलु तद्दृगकल्पयल्लिपिकरी नलरूपकचित्रिताः ॥ नैषधीयचरितम् ४.१५ ॥ |
| विरहपाण्डुकपोलतले विधुर्व्यधित भीमभुवः प्रतिबिम्बितः । अनुपलक्ष्यसितांशुतया मुखं निजसखं सुखमङ्कमृगार्पणात् ॥ नैषधीयचरितम् ४.२६ ॥ |
| विरहविषमः कामो वामस्तनुं कुरुते तनुं दिवसगणनाद् अक्षश्चासौ व्यपेतघृणो यमः । त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे किशलयमृदुर्जीवेद् एवं कथं प्रमदाजनः ॥ अमरुशतकम्-६४॥ |
| विरहिणो विमुखस्य विधूदये शमनदिक्पवनः स न दक्षिणः । सुमनसो नमयन्नटनौ धनुस्तव तु बाहुरसौ यदि दक्षिणः ॥ नैषधीयचरितम् ४.९७ ॥ |
| विरहिभिर्बहु मानमवापि यः स बहुलः खलु पक्ष इहाजनि । तदमितिः सकलैरपि यत्र तैर्व्यरचि सा च तिथिः किममीकृता ॥ नैषधीयचरितम् ४.६३ ॥ |
| विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम् । सुरनिपीतसुधाकमपापकं ग्रहविदो विपरीतकथाः कथम् ॥ नैषधीयचरितम् ४.६२ ॥ |
| विराध्य दुर्वासससमस्खलद्दिवः स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः । अदत्त तस्मै स मदच्छलात्सदा यमभ्रमातङ्गतयैव वर्षुकम् ॥ नैषधीयचरितम् १६.३१ ॥ |

| |
|---|
| विरेजिरे तच्चिकुरोत्कराः किराः क्षाणं गलन्निर्मलवारिविप्रुषाम् । तमःसुहृच्चामरनिर्जयार्जिताः सिता वमन्तः खलु कीर्तिमुक्तिकाः ॥ नैषधीयचरितम् १५.२३ ॥ |
| विरोधिनां विग्रहभेददक्षा मूर्तेव शक्तिः क्वचिदस्खलन्ती । नित्यं हरेः सन्निहिता निकामं कौमोदकी मोदयति स्म चेतः ॥ शिशुपालवधम् ३.१७ ॥ |
| विरोधिवर्णाभरणाश्मभासां मल्लाजिकौतूहलमीक्षमाणाम् । स्मरस्वचापभ्रमचालिते नु भ्रुवौ विलासाद्वलिते वहन्तीम् ॥ नैषधीयचरितम् १०.९६ ॥ |
| विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि । नवोटजाभ्यन्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ॥ कुमारसंभवम् ५.१७॥ |
| विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघनस्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् । झटित्यस्मिन्दृष्टे किमिति परवानस्मि यदि वा महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥ (उत्तररामचरितम् ६.११) |
| विरोधोऽनुपपत्तिश्चेद् गुणद्रव्यक्रियादिषु । अमन्दचन्दनस्यन्दः स्वच्छन्दं दन्दहीति माम् ॥ चन्द्रालोकः ५.७४ ॥ |
| विलङ्घितस्थितिमभिवीक्ष्य रुक्षया रिपोर्गिरागुरुमपि गान्दिनीसुतं । जनैस्तदा युगपरिवर्तवायुभिर्विवर्तिता गिरिपतयः प्रतीयिरे ॥ शिशुपालवधम् १७..१२ ॥ |
| विलङ्घ्य पत्रिणां पङ्क्तिं भिन्नः शिवशिलीमुखैः । ज्यायो वीर्यं समाश्रित्य न चकम्पे कपिध्वजः ॥ किरातार्जुनीयम् १५.४४ ॥ |
| विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति । अकरोत्पृथिवीरुहानपि स्रुतशाखारसभाष्पदुर्दिनान् ॥ रघुवंशम् ८.७० ॥ |
| विलम्बमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया । तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥ किरातार्जुनीयम् ८.१८ ॥ |
| विलम्बसे जीवित किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम् । जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमिदं तवेदृशम् ॥ नैषधीयचरितम् ९.९ ॥ |
| विलम्बिनीलोत्पलकर्णपूरा कपोलभित्तीरिव लोध्रगौरीः । नवोलपालङ्कृतसैकताभाः शुचीरपःशैवलनीर्दधानम् ॥ शिशुपालवधम् ४.८॥ |
| विललाप स बाष्पगद्गदं सहजां अप्यपहाय धीरतां । अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ रघुवंशम् ८.४३ ॥ |
| विललास जलाशयोदरे क्वचन द्यौरनुविम्बितेव या । परिखाकपटस्फुटस्फुरत्प्रतिबिम्बानवलम्बिताम्बुनि ॥ नैषधीयचरितम् २.७९ ॥ |
| विलसितमनुकुर्वती पुरस्ताद्धरणिरुहाधिरुहो वधूर्लतायाः । रमणमृजुतया पुरः सखीनामकलितचापलदोषमालिलिङ्ग ॥ शिशुपालवधम् ७.४६ ॥ |
| विलासवापीतटवीचिवादनात्पिकालिगीतेः शिखिलास्यलाघवात् । वनेऽपि तौर्यत्रिकमारराध तं क्व भोगमाप्नोति न भाग्यभाग्जनः ॥ नैषधीयचरितम् १.१०२ ॥ |
| विलासवैदग्ध्यविभूषणश्रीस्तेषां यथासीत्परिचारकेऽपि । अज्ञासिषुः स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कंचित् ॥ नैषधीयचरितम् १०.३२ ॥ |
| विलासिनीनां सहजा विलासा स्त एव मूढस्य हृदि स्फुरन्ति । रागो नलिन्या हि निसर्गसिद्ध स्तत्र भ्रमत्येव मुधा षडङ्घ्रिः ॥ पुरुषार्थोपदेशः-12॥ |
| विलासिनीविभ्रमदन्तपत्त्रमापाण्डु रं केतकबर्हमन्यः । प्रियाइतम्बोचितसंनिवेशैर्विपाटयामास युवा नखाग्रैः ॥ रघुवंशम् ६.१७ ॥ |
| विलुप्तमन्तःपुरसुन्दरीणां यदञ्जनं नौलुलिताभिरद्भिः । तद्बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासाम् ॥ रघुवंशम् १६.५९ ॥ |
| विलुलितकमलौघः कीर्णवल्लीवितानः प्रतिवनमवधूताशेषशाखिप्रसूनः । क्वचिदयमनवस्थः स्थास्नुतामेति वायुर्वधुकुसुमविमर्दोद्गन्धिवेश्मान्तरेषु ॥ शिशुपालवधम् ११.२८ ॥ |
| विलुलितमतिपूरैर्बाष्पमानन्दशोक- प्रभवमवसृजन्ती पक्ष्मलोत्तानदीर्घा । स्नपयति दयेशं स्नेहनिष्यन्दिनी ते धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः ॥ (उत्तररामचरितम् ३.२३) |
| विलुलितामनिलैः शरदङ्गना नवसरोरुहकेशरसम्भवाम् । विकरितुं परिहासविधित्सया हरिवधूरिव धूलिमुधक्षिपत् ॥ शिशुपालवधम् ६.५२ ॥ |
| विलुलितालकसंहृतिरामृशन्मृगदृशां श्रमवारि ललाटजम् । तनुतरङ्गततिं सरसां दलत्कुवलयं वलयन्मरुदाववौ ॥ शिशुपालवधम् ६.३ ॥ |
| विलेखितुं भीमभुवो लिपीषु सख्याऽतिविख्यातिभृतापि यत्र । अशाकि लीलाकमलं न पाणिरपारि कर्णोत्पलमक्षि नैव ॥ नैषधीयचरितम् ६.६४ ॥ |
| विलेपनामोदमुदागतेन तत्कर्णपूरोत्पलसर्पिणा च । रतीशदूतेन मधुव्रतेन कर्णे रहः किंचिदिवोच्यमानाम् ॥ नैषधीयचरितम् १०.९५ ॥ |
| विलोकके नायकमेलकेऽस्मिन्नृपान्यताकौतुकदर्शिभिस्तैः । बाधा बतेन्द्रादिभिरिन्द्रजालविद्याविदां वृत्तिवधाद्व्यधायि ॥ नैषधीयचरितम् १४.७ ॥ |
| विलोकनेनानुगृहाण तावद्दिशं जलानामधिपस्य दारान् । अक्षालि लाक्षापयसेव येयमपूरि पङ्कैरिव कुङ्कुमस्य ॥ नैषधीयचरितम् २२.३ ॥ |
| विलोकनेनैव तवामुना मुने कृतः कृताथो स्मि निबृंहितांहसा । तथापि शुश्रूषुरहं गरीयसीर्गिरो थवा श्रेयसि केन तृप्यते ॥ शिशुपालवधम् १.२९ ॥ |
| विलोकयन्तीभिरजस्रभावना बलादमुं नेत्रनिमीलनेष्वपि । अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः ॥ नैषधीयचरितम् १.२९ ॥ |
| विलोकितास्या मुखमुन्नमय्य किं वेधसेयं सुषमासमाप्तौ । धृत्युद्भवा यच्चिबुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव ॥ नैषधीयचरितम् ७.५१ ॥ |
| विलोकिते रागितरेण सस्मितं ह्रियाथ वैमुख्यमिते सखीजने । तदालिरानीय कुतोऽपि शार्करीं करे ददौ तस्य विहस्य पुत्रिकाम् ॥ नैषधीयचरितम् १६.१०४ ॥ |
| विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधापि धत्ते । यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ॥ नैषधीयचरितम् ६.४४ ॥ |
| विलोक्य तावाप्तदुरापकामौ परस्परप्रेमरसाभिरामौ । अथ प्रभुः प्रीतमना बभाषे जाम्बूनदोर्वीधरसार्वभौमः ॥ नैषधीयचरितम् १४.७१ ॥ |

| |
|---|
| विलोक्य यूना व्यजनं विधुन्वतीमवाप्तसत्त्वेन भृशं प्रसिष्वदे । उदस्तकण्ठेन मृषोष्मनाटिना विजित्य लज्जां ददृशे तदाननम् ॥ नैषधीयचरितम् १६.६२ ॥ |
| विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा । तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ॥ रघुवंशम् ७.८ ॥ |
| विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा । तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती॥ कुमारसंभवम् ७.५९॥ |
| विलोचनाभ्यामतिमात्रपीडिते वतंसनीलाम्बुरुहद्वयीं खलु । तयोः प्रतिद्वन्द्विधियाधिरोपयांबभूवतुर्भीमसुताश्रुती ततः ॥ नैषधीयचरितम् १५.३८ ॥ |
| विलोचनेन्दीवरवासवासितैः सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः । त्रपामपाकृत्य निभान्निभालय क्षितिक्षितिं मालयमालयं रुचः ॥ नैषधीयचरितम् १२.५३ ॥ |
| विलोमिताङ्कोत्किरणाद्दुरूहदृगादिना दृश्यविलोचनादि । विधिर्विधत्ते विधुना वधूनां किमाननं काञ्चनसञ्चकेन ॥ नैषधीयचरितम् २२.४७ ॥ |
| विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम् । यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥ कुमारसंभवम् ५.८१ ॥ |
| विवर्तयन्मदकलुषीकृते दृशौ कराहतक्षितिकृतभैरवावरवः । क्रुधा दधत्तनुमतिलोहिनीमभूत्प्रसेनजिद्गज इव गैरिकारुणः ॥ शिशुपालवधम् १७..१३ ॥ |
| विवस्वतानायिषतेव मिश्राः स्वगोसहस्रेण समं जनानाम् । गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारैः ॥ नैषधीयचरितम् २२.३५ ॥ |
| विवस्वदंशुसंश्लेष- द्विगुणीकृततेजसः । अमी वो मोघं उद्गूर्णा हसन्तीव महासयः ॥ किरातार्जुनीयम् १५.९ ॥ |
| विविनक्ति न बुद्धिदुर्विधः स्वयमेव स्वहितं पृथग्जनः । यदुदीरितमप्यदः परैर्न विजानाति तदद्भुतं महत् ॥ शिशुपालवधम् १६.३९ ॥ |
| विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्वालकदम्बकल्पैः । साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥ कुमारसंभवम् ३.६८ ॥ |
| विवृतोरुबाहुपरिघेण सरभसपदं निधित्सता । हन्तुमखिलनृपतीन्वसुना वसने विलम्बिनि निजे विचस्खले ॥ शिशुपालवधम् १५.५७ ॥ |
| विवेक-व्याकोशे विदधति समे शाम्यति तृषा परिष्वङ्गे तुङ्गे प्रसरतितरां सा परिणता। जराजीर्णैश्वर्य-ग्रसन-गहनाक्षेप-कृपणस्तृषापात्रं यस्यां भवति मरुतामप्यधिपतिः॥॥ वैराग्यशतकम् ८ ॥ |
| विवेश गत्वा स विलासकाननं ततः क्षणात्क्षोणिपतिर्धृतीच्छया । प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवार्णसां निधिम् ॥ नैषधीयचरितम् १.७४ ॥ |
| विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः । दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥ किरातार्जुनीयम् १.७ ॥ |
| विशति युवतित्यागे रात्रीमुचं मिहिकारुचं दिनमणिमणिं तापे चित्तान्निजाच्च यियासति । विरहतरलज्जिह्वा बह्वाह्वयन्त्यतिविह्वलामिह सहचरीं नामग्राहं रथाङ्गविहंगमाः ॥ नैषधीयचरितम् १९.३५ ॥ |
| विशदप्रभापरिगतं विबभावुदयाचलव्यवहितेन्दुवपुः । मुखमप्रकाशदशनं शनकैः सविलासहासमिव शक्रदिशः ॥ शिशुपालवधम् ९.२६ ॥ |
| विशदाश्मकूटघटिताः क्षपाकृतः क्षणदासु यत्र च रुचेकतां गताः । गृहपङ्क्तयश्चिरमतीयिरे जनैस्तमसीव हस्तपरिमर्शसूचिताः ॥ शिशुपालवधम् १३.५३ ॥ |
| विशाखाग्नेयभे सौम्यो मिश्रं साधारणं स्मृतम् । तत्राग्निकार्यं मिश्रं च वृषोत्सर्गावि सिद्धये ॥ मुहूर्त.नक्षत्रप्रकरणम् ५ ॥ |
| विशालवक्षा अधिपाणि भासयन्, महाकरालं करवाल-कालकम् । इवेन्द्रवज्रः स महीभ्रमण्डलान् जघान लोकेषु शठान् हठान्वितान् ॥ प्रतापविजयः-३८ ॥ |
| विशिखान्तराण्यतिपपात सपदि जवनैः स वाजिभिः । द्रष्टुमलघुरभसापातिता वनिताश्चकार न सकामचेतसः ॥ शिशुपालवधम् १५.७० ॥ |
| विशीर्णतल्पाट्टशतो निवेशः पर्यस्तशालः प्रभुणा विना मे । विडम्बयत्यस्तनिमग्नसूर्यं दिनान्तमुग्रानिलभिन्नमेघं ॥ रघुवंशम् १६.११ ॥ |
| विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् । गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः ॥ चन्द्रालोकः ५.८५ ॥ |
| विशेषतीर्थैरिव जह्नुनन्दिनी गुणैरिवाजानिकरागभूमिता । जगाम भाग्यैरिव नीतिरुज्ज्वलैर्विभूषणैस्तत्सुषमा महार्घताम् ॥ नैषधीयचरितम् १५.५४ ॥ |
| विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे । नमन्तमपि धीमन्तं न लङ्घयति कश्चन ॥ चन्द्रालोकः ५.७८ ॥ |
| विश्रमार्थमुपगूढमजस्रं यत्प्रियैः प्रथमरत्यवसाने । योषितामुदितमन्मथमादौ तद्द्वितीयसुरतस्य बभूव ॥ शिशुपालवधम् १०.८८ ॥ |
| विश्रवःपितृकयाप्तुमनर्हं सश्रवस्त्वमनयेत्युचितज्ञः । किं चकर्तिथ न शूर्पणखाया लक्ष्मणेन वपुषा श्रवसी वा ॥ नैषधीयचरितम् २१.७८ ॥ |
| विश्रान्तः सन्व्रज वननदीतीरजातानि सिञ्चन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि । गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम्॥ मेघदूतम्, पूर्वमेघः २६॥ |
| विश्वदृश्वनयना वयमेव त्वद्गुणाम्बुधिमगाधमवेमः । त्वामिहैवमनिवेश्य रहस्ये निर्वृतिं नहि लभेमहि सर्वे ॥ नैषधीयचरितम् ५.१०१ ॥ |
| विश्वम्भरा भगवती भवतीमसूत राजा प्रजापतिसमो जनकः पिता ते । तेषां वधूस्त्वमसि नन्दिनि ! पार्थिवानां येषां कुलेषु सविता च गुरुर्वयं च ॥ (उत्तररामचरितम् १.९) |
| विश्वरूप कृतविश्व कियत्ते वैभवाद्भुतमणौ हृदि कुर्वे । हेम नह्यति कियन्निजचीरे काञ्चनाद्रिमधिगत्य दरिद्रः ॥ नैषधीयचरितम् २१.११८ ॥ |
| विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये । विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥ नैषधीयचरितम् ५.३९ ॥ |
| विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्वभ्वाग्नेयैर्वा करपीडोचितऋक्षैः । वस्त्रालङ्कारादिसमेतैः फलपुष्पैः सन्तोष्यादौ स्यादनु कन्यावरणं हि ॥ मुहूर्त.विवाहप्रकरणम् १०॥ |

| |
|---|
| विश्वावसुप्राग्रहरैः प्रवीणैः संगीयमानत्रिपुरावदानः। अध्वानमध्वान्तविकारलङ्घ्यस्ततार ताराधिपखण्डधारी॥ कुमारसंभवम् ७.४८॥ |
| विषङ्गिणि प्रतिपदमापिबत्यपो हताचिरद्युतिनि समीरलक्ष्मणि । शनैःशनैरुपचितपङ्कभारिकाः पयोमुचः प्रययुरपेतवृष्टयः ॥ शिशुपालवधम् १७..६३ ॥ |
| विषङ्गिभिर्भृशमितरेतरं क्वचित्तुरङ्गमैरुपरि निरुद्धनिर्गमाः । चलाचलैरनुपदमाहताः खुरैर्विबभ्रमुश्चिरमध एव धूलयः ॥ शिशुपालवधम् १७..५३ ॥ |
| विषतां निषेवितमपक्रियया समुपैति सर्वमिति सत्यमदः । अमृतुतस्तुऽपि विरहादभवतो यदमूं दहन्ति हिमरश्मिरुचः ॥ शिशुपालवधम् ९.६८ ॥ |
| विषमं यद्यनौचित्यादनेकान्वयकल्पनम् । क्वातितीव्रविषाः सर्पाः क्वासौ चन्दनभूरुहः ॥ चन्द्रालोकः ५.८० ॥ |
| विषमं सर्वतोभद्रचक्रगोमूत्रिकादिभिः । श्लोकैरिवमहाकाव्यं व्यूहैस्तदभवद्बलं ॥ शिशुपालवधम् १९.४१ ॥ |
| विषमभांशगतौ शशिभार्गवौ तनुगृहं बलिनौ यदि पश्यतः । रचयतो वरलाभमिमौ यदा युगलभांशगतौ युवतिप्रदौ ॥ मुहूर्त.विवाहप्रकरणम् ३॥ |
| विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः । खग कालकलत्रदिग्भवः पवनस्तद्विरहानलैधसा ॥ नैषधीयचरितम् २.५७ ॥ |
| विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः । स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ किरातार्जुनीयम् २.३ ॥ |
| विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् । वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥ रघुवंशम् ३.४० ॥ |
| विषुवायनेषु परपूर्वमध्यमान्दिवसांस्त्यजेदितरसङ्क्रमेषु हि । घटिकास्तु षोडश शुभक्रियाविधौ परतोऽपि पूर्वमपि सन्त्यजेद्बुधः ॥ मुहूर्त.विवाहप्रकरणम् ७९॥ |
| विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः । पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥ नैषधीयचरितम् ५.७ ॥ |
| विष्वग्वृतः परिजनैरयमन्तरीपैस्तेषामधीश इव राजति राजपुत्रि । हेमाद्रिणा कनकदण्डमहातपत्रः कैलासरश्मिचयचामरचक्रचिह्नः ॥ नैषधीयचरितम् ११.८४ ॥ |
| विष्वद्रीचीर्विक्षिपन्सैन्यवीचीराजावन्तः क्वापि दूरं प्रयातं । बभ्रामैकोबन्धुमिष्टं दिदृक्षुः सिन्धौ वाद्यो मण्डलं गोर्वराहः ॥ शिशुपालवधम् १८.२५ ॥ |
| विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छायनितम्बशोभया । स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥ किरातार्जुनीयम् ८.२३ ॥ |
| विसृजन्त्यविकत्थिनः परे विषमाशीविषवन्नराः क्रुधं । दधतोऽन्तरसाररूपतां ध्वनिसाराः पटहा इवेतरे ॥ शिशुपालवधम् १६.३२ ॥ |
| विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य । उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥ रघुवंशम् २.९ ॥ |
| विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् । कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥ कुमारसंभवम् ५.११ ॥ |
| विस्तीर्णमायामवती लोललोकनिरन्तरा । नरेन्द्रमार्गं रथ्येव पपात द्विषतां बलं ॥ शिशुपालवधम् १९.४३ ॥ |
| विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरन्तकस्य । भिन्नाकृतिं ज्यां ददृशुः स्फुरन्तीं क्रुद्धस्य जिह्वामिव तक्षकस्य ॥ किरातार्जुनीयम् १७.२४ ॥ |
| विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी । ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥ किरातार्जुनीयम् १३.४० ॥ |
| विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् । क्षेप्तुकामं अवनौ तमक्लमं निष्पिपेष परिरभ्य वक्षसा ॥ किरातार्जुनीयम् १८.१३ ॥ |
| विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः । भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो निःसंदिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः ॥ (स्वप्नवासवदत्तम् १. १२) |
| विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नं । प्रालम्बं उत्कृष्य यथावकशं निनाय साचीकृतचारुवक्त्रः ॥ रघुवंशम् ६.१४ ॥ |
| विहगाः कदम्बसुरभाविह गाः कलयन्तनुक्षणमनेकलयम् । भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः ॥ शिशुपालवधम् ४.३६॥ |
| विहङ्गराजाङ्गरुहैरिवाततै र्हिरण्यमयोर्वीरुहवल्लितन्तुभिः । कृतोपवीतं हिमशुभ्रमुच्चकै र्घनं धनान्ते तडितां गुणैरिव ॥ शिशुपालवधम्  १.७ ॥ |
| विहन्तुं विद्विषस्तीक्ष्णः सममेव सुसंहतेः । परिवारात्पृथक्चक्रे खड्गश्चात्मा च केनचित् ॥ शिशुपालवधम् १९.४९ ॥ |
| विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः । सखीव काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धमंशुकं ॥ किरातार्जुनीयम् ८.५१ ॥ |
| विहस्य हस्तेऽथ विकृष्य देवी नेतुं प्रयाताऽभि महेन्द्रमेताम् । भ्रमादियं दत्तमिवाहिदेहे ततश्चमत्कृत्य करं चकर्ष ॥ नैषधीयचरितम् १४.३४ ॥ |
| विहाय वाञ्छां उदिते मदात्ययादरक्तकण्ठस्य रुते शिखण्डिनः । श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥ किरातार्जुनीयम् ४.२५ ॥ |
| विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् । व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ किरातार्जुनीयम् १.४२ ॥ |
| विहाय हा सर्वसुपर्वनायकं त्वया धृतः किंनरसाधिमभ्रमः । मुखं विमुच्य श्वसितस्य धारया वृथैव नासापथधावनश्रमः ॥ नैषधीयचरितम् ९.४४ ॥ |
| विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः । असक्तमूधांसि पयः क्षरन्त्यमूरुपायनानीव नयन्ति धेनवः ॥ किरातार्जुनीयम् ४.३१ ॥ |
| विहितं मयाद्य सदसीदमपमृषितमच्युतार्चनं । यस्य नमयतु स चापमयं चरणः कृतः शिरसि सर्वभूभृतां ॥ शिशुपालवधम् १५.४६ ॥ |
| विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् । उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ किरातार्जुनीयम् २.१ ॥ |
| विहितागसो मुहुरसङ्घ्यनिजवचनदामसंयतः । तस्य कतिथ इति तत्प्रथमं मनसा समाख्यदपराधमच्युतः ॥ शिशुपालवधम् १५.४२ ॥ |
| विहिताञ्जलिर्जनतया दधती विकसत्कुसुम्भकुसुमारुणतां । चिरमुज्झितापि तनुरौज्झदसौ न पितृप्रसूः प्रकृतिमात्मभुवः ॥ शिशुपालवधम् ९.१४ ॥ |
| विहितादभुतलोकसृष्टिमाये जममिच्छन्किल मायया मुरारौ । भुवनक्षयकालयोगनिद्रे नृपतिः स्वापनमस्त्रमाजहार ॥ शिशुपालवधम् २०.३२ ॥ |

| |
|---|
| विहितापचितिर्महीभृतां द्विषतामाहितसाध्वसो बलैः । भव सानुचरस्त्वमुच्चकैर्महतामप्युपरि क्षमाभृतां ॥ शिशुपालवधम् १६.९ ॥ |
| वीक्षितस्त्वमसि मामथ गन्तुं तन्मनुष्यजगतेऽनुमनुष्व । किं भुवः परिवृढा न विवोढुं तत्र तामुपगता विवदन्ते ॥ नैषधीयचरितम् ५.४२ ॥ |
| वीक्ष्य तस्य वरुणस्तरुणत्वं यद्बभार निबिडं जडभूयम् । नौचिती जलपतेः किमु सास्य प्राज्यविस्मयरसस्तिमितस्य ॥ नैषधीयचरितम् ५.६१ ॥ |
| वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि । नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे ॥ नैषधीयचरितम् ५.२ ॥ |
| वीक्ष्य प्रभा - हसित - चारु पुरन्दराणां, सङ्गं स नृत्यममलं शिखिसुन्दराणाम् । सम्भासते वनभुवः सुषमात्युदारः, हर्षाङ्कितो हरितऽहीरक - कण्ठहारः ॥ प्रतापविजयः-१६३ ॥ |
| वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीं । जज्ञिरे बहुमताः प्रमदानां ओष्ठयावकनुदो मधुवाराः ॥ किरातार्जुनीयम् ९.५९ ॥ |
| वीक्ष्य रन्तुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः । तत्प्रियार्थं इव यातुमथास्तं भानुमानुपपयोधि ललम्बे ॥ किरातार्जुनीयम् ९.१ ॥ |
| वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम् । संभ्रमोऽभवदपोढकर्मणामृत्विजां च्युतविकङ्कतस्रुचाम् ॥ रघुवंशम् ११.२५ ॥ |
| वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः । निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥ मेघदूतम्, पूर्वमेघः २८॥ |
| वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत । तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ॥ रघुवंशम् ११.८ ॥ |
| वीचीवातैः सीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् । मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति ॥ (उत्तररामचरितम् ३.२) |
| वीतजन्मजरसं परं शुचि ब्रह्मणः पदमुपैतुं इच्छताम् । आगमादिव तमोपहादितः सम्भवन्ति मतयो भवच्छिदः ॥ किरातार्जुनीयम् ५.२२ ॥ |
| वीतप्रभावतनुरप्यतनुप्रभावः प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीं । अस्त्रेषु भूतपतिनापहृतेषु जिष्णुर्वर्षिष्यता दिनकृतेव जलेषु लोकः ॥ किरातार्जुनीयम् १६.६४ ॥ |
| वीतविघ्नमनघेन भाविता सन्निधेस्तव मखेन मेऽधुना । को विहन्तुमलमास्थितोदये वासरश्रियमशीतदीधितौ ॥ शिशुपालवधम् १४.८ ॥ |
| वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः । समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ गुणा भजन्ते ॥ किरातार्जुनीयम् ३.४९ ॥ |
| वीप्सोत्सर्पन्मुखाग्रार्द्रं बर्ही जह्रे कृशस्तृषम् । ललना रभसं धत्ते घनाटोपे महीयसि ॥ चन्द्रालोकः६.२८ ॥ |
| वीरसनैर्ध्यानजुषामृषीणाममी समाध्यासितवेदिमध्याः । निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि ॥ रघुवंशम् १३.५२ ॥ |
| वीराग्रणीरभत-युद्ध कलाकलापी, क्वाऽस्तेऽद्य हा! स तनयः समयः प्रतापी । अत्रत्य - निर्जनवनेऽथ यदा कदाचिद् मातेव रोदिति सखे! कुररी नु काचित् ॥ प्रतापविजयः-१५८ ॥ |
| वीराश्चतुर्दशसहस्रमिता इहैव, मृत्युं यथा शयन्- तूलमथाऽऽलिलिङ्ग । किन्तु प्रशक्यतमधस्य महीयसीं स्वां सन्मातरं न हि मनाग् विजहुर्धरित्रीम् ॥ प्रतापविजयः-१६८ ॥ |
| वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव सम्प्रतीतिम् । कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामहन इवावशेषः ॥ किरातार्जुनीयम् ३.४३ ॥ |
| वीर्योत्साहश्लाघि कृत्वावदानं सङ्ग्रामाग्रे मानिनां लज्जितानां । अज्ञातानां शत्रुभिर्युक्तमुच्चैः श्रीमन्नाम श्रावयन्ति स्म नग्नाः ॥ शिशुपालवधम् १८.१६ ॥ |
| वुधानुराधामष्टम्यां दशम्यां भृगुरेवतीम् । नवम्यां गुरुपुष्यं चैकादश्यां शनिरोहिणीम् ॥ मुहूर्तचिन्त.२१ ॥ |
| वृणीष्व वर्णेन सुवर्णकेतकीप्रसूनवर्णाद्दृतपर्णमादृतम् । निजामयोध्यामपि पावनीमयं भवन्मयो ध्यायति नावनीपतिः ॥ नैषधीयचरितम् १२.५ ॥ |
| वृणे दिगीशानिति का कथा तथा त्वयीति नेक्षे नलभामपीह या । सतीव्रतेऽग्नौ तृणयामि जीवितं स्मरस्तु किं वस्तु तदस्तु भस्म यः ॥ नैषधीयचरितम् ९.७ ॥ |
| वृतः प्रतस्थे स रथैरथो रथी गृहान्विदर्भाधिपतेर्धराधिपः । पुरोधसं गौतममात्मवित्तमं द्विधा पुरस्कृत्य गृहीतमङ्गलः ॥ नैषधीयचरितम् १६.१ ॥ |
| वृत्तं युद्धे शूरमाश्लिष्य काचिद्रन्तुं तूर्णं मेरुकुञ्जं जगाम । त्यक्त्वा नाग्नौ देहमेति स्म यावत्पत्नी सद्यस्तद्वियोगासमर्था ॥ शिशुपालवधम् १८.६० ॥ |
| वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी । भारती भाति गम्भीरा कुटिला सरला क्वचित् ॥ चन्द्रालोकः७.१ ॥ |
| वृत्त्यर्थं नातिचेष्टते सा हि धात्रैव निर्मिता । गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥ नीतिसंग्रहस्य मित्र-१.१७१ ॥ |
| वृथा कथेयं मयि वर्णपद्धतिः कयानुपूर्व्या समकेति केति च । क्षमे समक्षव्यवहारमावयोः पदे विधातुं खलु युष्मदस्मदी ॥ नैषधीयचरितम् ९.९ ॥ |
| वृथा परीहास इति प्रगल्भता न नेति च त्वादृशि वाग्विगर्हणा । भवत्यवज्ञा च भवत्यनुत्तरादतः प्रदित्सुः प्रतिवाचमस्मि ते ॥ नैषधीयचरितम् ९.२५ ॥ |
| वृथार्पयन्तीमपथे पदं त्वां मरुल्ललत्पल्लवपाणिकम्पैः । आलीव पश्य प्रतिषेधतीयं कपोतहुंकारगिरा वनाली ॥ नैषधीयचरितम् ३.१४ ॥ |
| वृद्धस्य वचनं ग्राह्यमापत्काले ह्युपस्थिते । सर्वत्रैवं विचारे च भोजनेऽपि प्रवर्तताम् ॥ नीतिसंग्रहस्य मित्र-१.२३ ॥ |
| वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं (किं) वर्तते सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते । यानि त्रीण्यकुतोमुखान्यपि पदान्यासन्खरायोधने यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ (उत्तररामचरितम् ५.३४) |
| वृद्धो वार्धिरसौ तरङ्गवलिभिं बिभ्रद्वपुः पाण्डुरं हंसालीपलितेन यष्टिकलितस्तावद्वयोर्बहिमा । बिभ्रच्चन्द्रिकया च कं विकचया योग्यस्फुरत्संगतं स्थाने स्नानविधायिधार्मिकशिरोनत्यापि नित्यादृतः ॥ नैषधीयचरितम् १२.१०२ ॥ |

| |
|---|
| वृन्ताच्छ्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणाम्शुभिन्नैः । स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ रघुवंशम् ५.६९ ॥ |
| वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुं पाण्डुच्छायां तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः । सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥ मेघदूतम्, पूर्वमेघः २९॥ |
| वेणुना दशनपीडिताधरा वीणया नखपदाङ्कितोरवः । शिलपकार्य उभयेन वेजितास्तं विजिह्मनयना व्यलोभयन् ॥ रघुवंशम् १९.३५ ॥ |
| वेत्रशाककुजे शैलेऽलेशैजेऽकुकशात्रवे । यात किं विदिशो जेतुं तुञ्जेशो दिवि किंतया ॥ किरातार्जुनीयम् १५.१८ ॥ |
| वेद यद्यपि न कोऽपि भवन्तं हन्त हन्त्रकरुणं विरुणद्धि । पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥ नैषधीयचरितम् ५.३६ ॥ |
| वेदक्रमाच्छशिशिवाहिकरत्रिमूलपूर्वासु पौष्णकरमैत्रमृगादितीज्ये । ध्रौवेषु चाश्विवसुपुष्यकरोत्तरेशकर्णे मृगान्त्यलघुमैत्रधनादितौ सत् ॥ मुहूर्त.संस्कारप्रकरणम् ५७॥ |
| वेदाङ्गाष्टनवार्केन्द्रपक्षरन्ध्रतिथौ त्यजेत् । वस्वङ्कमनुतत्त्वाशाशरा नाडीः पराः शुभाः॥ मुहूर्तचिन्त.३६ ॥ |
| वेदैर्वचोभिरखिलैः कृतकीर्तिरत्ने हेतुं विनैव धृतनित्यपरार्थयत्ने । मीमांसयेव भगवत्यमृतांशुमौलौ तस्मिन्महीभुजि तयानुमतिर्न भेजे ॥ नैषधीयचरितम् ११.६४ ॥ |
| वेधोऽन्योन्यमसौ विरिञ्च्यभिजितोर्याम्यानुराधर्क्षयो- र्विश्वेन्द्वोर्हरिपित्र्ययोर्ग्रहकृतो हस्तोत्तराभाद्रयोः । स्वातीवारुणयोर्भवेन्निरृतिभादित्योस्तथोफान्त्ययोः खेटे तत्र गते तुरीयचरणाद्योर्वा तृतीयद्वयोः ॥ मुहूर्त.विवाहप्रकरणम् ५६॥ |
| वेलातिगस्त्रैणगुणाब्धिवेणिर्न योगयोग्यासि नलेतरेण । संदर्भ्यते दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ॥ नैषधीयचरितम् ३.४९ ॥ |
| वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि । मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम् ॥ रघुवंशम् १३.१६ ॥ |
| वेलानिलाय प्रसृता भुजंगा महोर्मिविस्फूर्जथुनिर्विशेषाः । सूर्यांशुसंपर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः ॥ रघुवंशम् १३.१२ ॥ |
| वेलामतिक्रम्य पृथुं मुखेन्दोरालोकपीयूषरसेन तस्याः । नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥ नैषधीयचरितम् ७.४ ॥ |
| वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं यो यो यत्नः कथमपि समाधीयते तं तमन्तः । हित्वा भित्त्वा प्रसरति बलात्कोऽपि चेतोविकार- स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ (उत्तररामचरितम् ३.३६) |
| वेश्मानि रामः परिबर्हवन्ति विश्राण्य सौहार्धनिधिः सुहृद्भ्यः । बाष्पायमाणो बलिमन्निकेतमालेख्यशेषस्य पितुर्विवेश ॥ रघुवंशम् १४.१५ ॥ |
| वेश्माप सा धैर्यवियोगयोगाद्बोधं च मोहं च मुहुर्दधाना । पुनःपुनस्तत्र पुरः स पश्यन्बभ्राम तां सुभ्रुवमुद्भ्रमेण ॥ नैषधीयचरितम् ६.५६ ॥ |
| वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः । स्वयंवरस्थानजनाश्रयस्तैर्दिने परत्रालमकारि वीरैः ॥ नैषधीयचरितम् १०.३७ ॥ |
| वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम् । शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह ॥ रघुवंशम् ६.३ ॥ |
| वैदर्भि दत्तस्तव तावदेष वरो दुरापः पृथिवीश एव । दूत्यं तु यत्त्वं कृतवानमायं नल प्रसादस्त्वयि तन्ममायम् ॥ नैषधीयचरितम् १४.७२ ॥ |
| वैदर्भि दर्भदलपूजनयापि यस्य गर्भे जनः पुनरुदेति न जातु मातुः । तस्यार्चनां रचय तत्र मृगाङ्कमौलेस्तन्मात्रदैवतजनाभिजनः स देशः ॥ नैषधीयचरितम् ११.५१ ॥ |
| वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भैर्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः । कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रैर्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥ नैषधीयचरितम् २.१०५ ॥ |
| वैदर्भीबहुजन्मनिर्मिततपःशिल्पेन देहश्रिया नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः । गीर्वाणालयसार्वभौमसुकृतप्राग्भारदुष्प्रापया गोयं भीमजयानुभूय भजतामद्वैतमद्य त्विषाम् ॥ नैषधीयचरितम् १५.९३ ॥ |
| वैदर्भीविपुलानुरागकलनात्सौभाग्यमत्राखिलक्षोणीचक्रशतक्रतौ निजगदे तद्बृत्तवृत्तक्रमैः । किंचास्माकनरेन्द्रभूसुभगतासंभूतये लग्नकं देवेन्द्रावरणप्रसादितशचीविश्राणिताशीर्वचः ॥ नैषधीयचरितम् १५.९६ ॥ |
| वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् । छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥ रघुवंशम् १३.२ ॥ |
| वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि । पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥ रघुवंशम् १०.४७ ॥ |
| वैराग्यं यः करोत्युच्चै रञ्जनं जनयन्नपि । सूते सर्वेन्द्रियाच्छादि प्रज्वलन्नपि यस्तमः ॥ नैषधीयचरितम् १७.२२ ॥ |
| वैरिश्रियं प्रतिनियुद्धमनाप्नुवन्यः किंचिन्न तृप्यति धरावलयैकवीरः । स त्वामवाप्य निपतन्मदनेषुवृन्दस्यन्दीति तृप्यतु मधूनि पिबन्निवायम् ॥ नैषधीयचरितम् ११.१११ ॥ |
| वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् । आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ रघुवंशम् १.११ ॥ |
| वैवस्वतोऽपि स्वत एव देवस्तुष्टस्तमाचष्ट धराधिराजम् । वरप्रदानाय तवावदानैश्चिरं मदीया रसनोद्धुरेयम् ॥ नैषधीयचरितम् १४.७९ ॥ |
| वैवाहिकैः कौतुकसंविधानैर्गृहेगृहे व्यग्रपुरन्धिवर्गम् । आसीत्पुरं सानुमतोऽनुरागादन्तःपुरं चैककुलोपमेयम्॥ कुमारसंभवम् ७.२॥ |
| वैशद्यहृद्यैर्म्रदिमाभिरामैरामोदिभिस्तानथ जातिजातैः । आनर्च गीत्यन्वितषट्पदैः सा स्तवप्रसूनस्तबकैर्नवीनैः ॥ नैषधीयचरितम् १४.६ ॥ |
| व्क्तासीदरितारिणां यत्तदीयास्तदा मुहुः । मनोहृतोऽपि हृदये लेगुरेषां न पत्रिणः ॥ शिशुपालवधम् १९.१०९ ॥ |

| |
|---|
| व्यक्त एव क्वचिद् व्यङ्ग्यः क्वचिदर्थस्वभावतः । क्वचिच्चारुतरस्याग्रे स विमुञ्चति चारुताम् ॥ चन्द्रालोकः८.२ ॥ |
| व्यक्तं बलीयान्यदि हेतुरागमादपूरयत्सा जलधिं न जाह्नवी । गङ्गौघनिर्भर्त्स्मितशम्भुकन्धरासवर्णमर्णः कथमन्यथास्य तत् ॥ शिशुपालवधम् १२.६९ ॥ |
| व्यक्तोदितस्मितमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः । तन्वन्तमिद्धमभितो गुरुमंशुजालं लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥ किरातार्जुनीयम् २.५९ ॥ |
| व्यगमन्सहसा दिशां मुखेभ्यः शमयित्वा शिखिनाङ्घनाघनौघाः । उपकृत्यनिसर्गतः परेषामुपरोधं न हि कुर्वते महान्तः ॥ शिशुपालवधम् २०.७४ ॥ |
| व्यचलन्विशङ्कटकटीरकस्थलीशिखरस्खलन्मुखरमेखलाकुलाः ।भवनानि तुङ्गतपनीयसंक्रमक्रमणक्वणत्कनकनूपुराः स्त्रियः ॥ शिशुपालवधम् १३.३४ ॥ |
| व्यतनोदपास्य चरणं प्रसाधिकाकरपल्लवाद्रसवशेन काचन । द्रुतयावकैकपदचित्रितावनिं पदवीं गतेव गिरिजा हरार्धताम् ॥ शिशुपालवधम् १३.३३ ॥ |
| व्यतरदथ पिताशिषं सुतायै नतशिरसे सहसोन्नमय्य मौलिम् । दयितमभिमतं स्वयंवरे त्वं गुणमयमाप्नुहि वासरैः कियद्भिः ॥ नैषधीयचरितम् ४.१२ ॥ |
| व्यतिकर इव भीमस्तामसो वैद्युतश्च प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति । अथ लिखितमिवैतत्सैन्यमस्पन्दमास्ते नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम् ॥ (उत्तररामचरितम् ५.१३) |
| व्यतिरेको विशेषश्चेदुपमानोपमेययोः । शैला इवोन्नताः सन्तः किं तु प्रकृतिकोमलाः ॥ चन्द्रालोकः ५.५९ ॥ |
| व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते । विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ (उत्तररामचरितम् ६.१२) |
| व्यथितमपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा । परभृतयुवतिः स्वनं वितेने नवनवयोजितकण्ठरागरम्यं ॥ किरातार्जुनीयम् १०.२२ ॥ |
| व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः । फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥ किरातार्जुनीयम् ५.११ ॥ |
| व्यधत्त धाता वदनाब्जमस्याः सम्राजमम्भोजकुलेऽखिलेऽपि । सरोजराजौ सृजतोऽदसीयां नेत्राभिधेयावत एव सेवाम् ॥ नैषधीयचरितम् ७.५४ ॥ |
| व्यधत्त यस्मिन्पुरं उच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः । स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥ किरातार्जुनीयम् ५.३५ ॥ |
| व्यधत्ते सौधे रतिकामयोस्तद्भक्तं वयोऽस्या हृदि वासभाजोः । तदग्रजाग्रत्पृथुशातकुम्भकुम्भौ न संभावयति स्तनौ कः ॥ नैषधीयचरितम् १०.१२२ ॥ |
| व्यधुस्तमां ते मृगमांससाधितं रसादशित्वा मृदु तेमनं मनः । निशाधवोत्सङ्गकुरङ्गजैरदः पलैः सपीयूषजलैः किमश्रपि ॥ नैषधीयचरितम् १६.७६ ॥ |
| व्यनक्ति लोके महिमाऽऽलयः सदा, यदीयलोकोत्तरतां हिमालयः । स राजते भारत-भूतलाञ्चले, विराजते भारतवर्षनामभाक् ॥ प्रतापविजयः-२६ ॥ |
| व्यनक्त्यनुचितार्थं यत्पदमाहुस्तदेव तत् । इयमद्भुतशाख्यग्र-केलिकौतुकवानरी ॥ चन्द्रालोकः२.५ ॥ |
| व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः । पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥ किरातार्जुनीयम् ८.१९ ॥ |
| व्ययाष्टशुद्धोपचये लग्नगे शुभदृग्युते। चन्द्रे त्रिषड्दशायस्थे सर्वारम्भः प्रसिद्धयति ॥ मुहूर्त.नक्षत्रप्रकरणम् ४४॥ |
| व्यये शनिः खेऽवनिजस्तृतीये भृगुस्तनौ चन्द्रखला न शस्ताः । लग्नेट् कविग्लौश्च रिपौ मृतौ ग्लौर्लग्नेट्शुभाराश्च मदे च सर्वे ॥ मुहूर्त.विवाहप्रकरणम् ८६॥ |
| व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा प्रज्ञाजाम्बवतो न यत्र न गतिः पुत्रस्य वायोरपि । मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः सौमित्रेरपि पत्त्रिणामविषये तत्र प्रिये ! क्वासि मे ॥ (उत्तररामचरितम् ३.४५) |
| व्यर्थीभवद्भावपिधानयत्ना स्वरेण साथ श्लथगद्गदेन । सखीचये साध्वसबद्धवाचि स्वयं तमूचे नमदाननेन्दुः ॥ नैषधीयचरितम् ८.१९ ॥ |
| व्यर्थ(कृतं पत्त्ररथेन तेन तथाऽवसाय व्यवसायमस्याः । परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यतालम् ॥ नैषधीयचरितम् ३.६ ॥ |
| व्यलोकि लोकेन न केवलं चलन्मुदा तदीयाभरणात्रपणाद्युतिः । अदर्शि विस्फारितरत्नलोचनैः परस्परेणेव विभूषणैरपि ॥ नैषधीयचरितम् १५.७७ ॥ |
| व्यलोकि सीमातिग एष पैरलं, पुनर्न तैरेतददर्शि भूतलम् । स्वयम्प्रतापोऽपि चमच्चकार तां, विलोक्य कुन्तार्जित-सिद्ध- वीरताम् ॥ प्रतापविजयः-१२९ ॥ |
| व्यवहार इवानृताभियोगं तिमिरं निर्जितवत्यथप्रकाशे । रिपुरुल्बणभीमभोगभाजां भुजगानां जननीं जजाप विद्यां ॥ शिशुपालवधम् २०.४१ ॥ |
| व्यवहितमविजानाती किलान्तर्वणभुवि वल्लभमाभिमुख्यभाजम् । अधिविटपि सलीलमग्रपुष्पग्रहणपदेन चिरं विलम्ब्य काचित् ॥ शिशुपालवधम् ७.३५ ॥ |
| व्यसरन्नु भूधरगुहान्तरतः पचलं बहिर्भहलपङ्करुचि । दिवसावसानपटुनस्तमसो बहिरेत्य चाधिकमभक्त गुहाः ॥ शिशुपालवधम् ९.१९ ॥ |
| व्याघातगण्डव्यतिपातपूर्वं शूलान्त्यवज्रे परिघातिगण्डे । एकार्गलाख्यो ह्यभिजित्समेतो दोषः शशी चेद्विषमर्क्षगोऽर्कात् ॥ मुहूर्त.विवाहप्रकरणम् ६२॥ |
| व्याघ्रादिभिर्विभावैस्तु वेपितादयनुभावभृत् । भावैर्मोहादिभिर्युक्तो भयस्थायी भयानकः ॥ चन्द्रालोकः६.१० ॥ |
| व्याघ्रानभीरभिमुखोपतितान्गुहाभ्यः फुल्लासनाग्रविटपानिव वायुरुग्णान् । शिक्षाविशेषलघुहस्ततया निमेषात्तूणीचकार शरपूरितवक्त्ररन्ध्रान् ॥ रघुवंशम् ८.६३ ॥ |

| |
|---|
| व्याघ्रीव तिष्ठति जरा परितर्जयन्ती रोगाश्च शत्रव इव प्रहरन्ति देहम्। आयुः परिस्रवति भिन्न-घटा-दिवाम्भो लोकस्तथाप्यहितमाचरतीति चित्रम्॥॥ वैराग्यशतकम् ३८ ॥ |
| व्याजोक्तिः शङ्कमानस्य छद्मना वस्तुगोपनम् । सखि पश्य गृहाराम-परागैरस्मि धूसरा ॥ चन्द्रालोकः ५.११० ॥ |
| व्यादिदेश गणः सपार्श्वगान्कर्मुकाभरणाय मैथिलः । तैजसय धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ॥ रघुवंशम् ११.४३ ॥ |
| व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः । चूर्णमुष्टिरिव लम्भितकान्तिर्वासवस्य दिशमंशुसमूहः ॥ किरातार्जुनीयम् ९.१७ ॥ |
| व्यापृतस्य शतरुद्रियजप्तौ पाणिमस्य नवपल्लवलीलम् । भृङ्गभङ्गिरिव रुद्रपराक्षश्रेणिरश्रयत रुद्रपरस्य ॥ नैषधीयचरितम् २१.४१ ॥ |
| व्याप्तं लोकैर्दुःखलभ्यापसारं संरंभित्वादेत्य धीरो महीयः । सेनामध्यं गाहते वारणः स्म ब्रह्मैव प्रागादिदेवोदरान्तः ॥ शिशुपालवधम् १८.४० ॥ |
| व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते छेत्तुं वज्रमणीञ्छिरीषकुसुमप्रान्तेन संनह्यते । माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते नेतुं वाञ्छन्ति यः खलान् पथि सतां सूक्तैः सुधास्यन्दिभिः ॥ नीतिशतकम्६ ॥ |
| व्यावृत्तवक्त्रैरखिलैश्चमूचरैर्व्रजिद्भिरेव क्षणमीक्षिताननाः । वल्गद्गरीयःस्तनकम्प्रकञ्चुकं ययुस्तुरङ्गाधिरुहोऽवरोधिकाः ॥ शिशुपालवधम् १२.२० ॥ |
| व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका । सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः॥ कुमारसंभवम् ७.२॥ |
| व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः । आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ रघुवंशम् १.१३ ॥ |
| व्यूहावुभौ तावितरेतरस्माद्भङ्गं जयं चापतुरव्यवस्थम् । पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ॥ रघुवंशम् ७.५४ ॥ |
| व्यूह्य स्थितः किंचिदिवोत्तरार्धं उन्नद्धचूडोऽञ्चितस्व्यजानुः । आकर्णमाकृष्टसबानधन्वा व्यरोचत्ऽ आस्ते स विनीयमानः ॥ रघुवंशम् १८.५१ ॥ |
| व्येद्धुमस्मानवधानतः पुरा चलत्यसवित्युपकर्णयन्नसौ । गीतानि गोप्याः कलमं मृगव्रजो न नूनमत्तीति हरिव्र्यलोकयत् ॥ शिशुपालवधम् १२.४३ ॥ |
| व्योम पश्चिमकलास्थितेन्दु वा पङ्कशेषमिव घर्मपल्वलं । राज्ञि तत्कुलमभूत्क्षयातुरे वामनार्चिरिव दीपभाजनं ॥ रघुवंशम् १९.५१ ॥ |
| व्योमस्पृशः प्रथयता कलधौतभित्ती- रुन्निद्रपुष्पचणचम्पकपिङ्गभासः । सौमेरवीमधिगतेन नितम्बशोभा-मेतेन भारतमिलावृतवद्विभाति ॥ शिशुपालवधम् ४.३१॥ |
| व्योमैकान्तविहारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदं बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि । दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ नीतिसंग्रहस्य मित्र-१.५२ ॥ |
| व्रज जय रिपुलोकं पादपद्मानतः सन्गदित इति शिवेन श्लाघितो देवसंघैः । निजगृहमथ गत्वा सादरं पाण्डुपुत्रो धृतगुरुजयलक्ष्मीर्धर्मसूनुं ननाम ॥ किरातार्जुनीयम् १८.४८ ॥ |
| व्रज स्वगेहं निजसैन्यसज्जितः पुनः समागच्छ मदर्थमातुरः । तदा तव स्वागतमत्र मानिनः स्वयं करिष्यामि कृपाणपणिना ॥ प्रतापविजयः-८३ ॥ |
| व्रजतः क्व तात वजसीति परिचयगतार्थमस्फुटं । धैर्यमभिनदुदितं शिशुना जननीनिर्भत्सनविवृद्धमन्युना ॥ शिशुपालवधम् १५.८७ ॥ |
| व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके भवति च नले दूरं तारापतौ च हतौजसि । लघु रघुपतेर्जायां मायामयीमिव रावणिस्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ॥ नैषधीयचरितम् १९.८ ॥ |
| व्रजति शुचि पदं त्वति प्रीतिमान्प्रतिहतमतिरेति घोरां गतिं । इयमनघ निमित्तशक्तिः परा तव वरद न चित्तभेदः क्वचित् ॥ किरातार्जुनीयम् १८.२६ ॥ |
| व्रजतिविषयमक्ष्णामंशुमाली न यावत्तिमिरमखिलमस्तं तावदेवारुणेन । परपरिभवि तेजस्तन्वतामाशु कर्तुं प्रभवति हि विपक्षोच्छेदमग्रेसरोऽपि ॥ शिशुपालवधम् ११.२५ ॥ |
| व्रजते दिवि यद्गृहावलीचलचेलाञ्चलदण्डताडनाः । व्यतरन्नरुणाय विश्रमं सृजते हेलिहयालिकालनाम् ॥ नैषधीयचरितम् २.८ ॥ |
| व्रजतोऽस्य बृहत्पतत्त्रजन्मा कृतताक्ष्योपनिपातवेगशङ्कः । प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः ॥ किरातार्जुनीयम् १३.२१ ॥ |
| व्रजतोरपि प्रणयपूर्वमेकतामसुरारिपाण्डुसुतसैन्ययोस्तदा । ररुषे विषाणिभिरनुक्षणंमिथो मदमूढबुद्धिषु विवेकिता कुतः? ॥ शिशुपालवधम् १३.६ ॥ |
| व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः । प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥ किरातार्जुनीयम् १.३० ॥ |
| व्रजन्तु ते तेऽपि वरं स्वयंवरं प्रसाद्य तानेव मया वरिष्यसे । न सर्वथा तानपि न स्पृशेद्दया न तेऽपि तावन्मदनस्त्वमेव वा ॥ नैषधीयचरितम् ९.१५४ ॥ |
| व्रजाजिरेष्वम्बुदनादशङ्किनीः शिखण्डिनामुन्मदयत्सु योषितः । मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरं ॥ किरातार्जुनीयम् ४.१६ ॥ |
| व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलं । न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान्हिमम् ॥ रघुवंशम् ८.२८ ॥ |
| व्रणभृता सुतनोः कलसीकृतस्फुरितदन्तमरीचिमयं दधे । स्फुटमिवावरणं हिमारुतैर्मृदुतया दुतयाधरलेखया ॥ शिशुपालवधम् ६.५९ ॥ |
| व्रणमुखच्युतशोणितशीकर- स्थगितशैलतटाभभुजान्तरः । अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः ॥ किरातार्जुनीयम् १८.४ ॥ |
| व्रततिवितितिभिस्तिरोहितायां प्रतियुवतौ वदनं प्रियः प्रियायाः । यदधयदधरावलोपनृत्यत्करवलयस्वनितेन तद्विवव्रे ॥ शिशुपालवधम् ७.४५ ॥ |
| व्रतबन्धनदेवताप्रतिष्ठाकरपीडोत्सवसूतकासमाप्तौ । न कदापि चलेदकालविद्युद्घनवर्षातुहिनेऽपि सप्तरात्रम् ॥ मुहूर्त.यात्राप्रकरणम् ७९॥ |
| व्रतबन्धेऽष्टषड्रिष्फवर्जिताः शोभनाः शुभाः । त्रिषडाये खलाः पूर्णो गोकर्कस्थो विधुस्तनौ ॥ मुहूर्त.संस्कारप्रकरणम् ४२॥ |
| व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः । न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥ रघुवंशम् २.४ ॥ |
| व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ चन्द्रालोकः६.१६ ॥ |

| |
|---|
| व्रीडानतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः । वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णम् ॥ किरातार्जुनीयम् ३.४२ ॥ |
| शकटव्युदासतरुभङ्गधरणिधरधारणादिकं । कर्म यदयमकरोत्तरलः स्थिरचेतसां क इव तेन विस्मयः ॥ शिशुपालवधम् १५.३७ ॥ |
| शक्तिरर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरत्ययं । कारणद्वयमिदं निरस्यतः प्रार्थनाधिकबले विपत्फला ॥ किरातार्जुनीयम् १३.६१ ॥ |
| शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो, नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ । व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ नीतिशतकम् ११ ॥ |
| शक्रः किमेष निषाधाधिपतिः स वेति दोलायमानमनसं परिभाव्य भैमीम् । निर्दिश्य तत्र पवनस्य सखायमस्यां भूयोऽसृजद्भगवती वचसः स्रजं सा ॥ नैषधीयचरितम् १३.९ ॥ |
| शक्राः पञ्च सिते शक्राद्याग्निविश्वरसाः क्रमात् । तथा निन्द्यं शुभे सार्प द्वादश्यां वैश्वमादिमे ॥ मुहूर्तचिन्त.११ ॥ |
| शक्रार्कदिग्वसुरसाब्ध्यश्विनः कुलिका रवेः । रात्रौ निरेकास्तिथ्यंशाः शनौ चान्त्योऽपि निन्दितः ॥ मुहूर्त.विवाहप्रकरणम् ६५॥ |
| शङ्काभिः सर्वमाक्रान्तमन्नं पानं च भूतले । प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं न वा ? ॥ नीतिसंग्रहस्य मित्र-१.२४ ॥ |
| शङ्कालतातततिमनेकनलावलम्बां वाणी नवर्धयतु तावदभेदिकेयम् । भीमोद्भवां प्रति नले च जलेश्वरे च तुल्यं तथापि यदवर्धयदत्र चित्रम् ॥ नैषधीयचरितम् १३.२६ ॥ |
| शङ्किताय कृतबाष्पनिपातां ईर्ष्यया विमुखितां दयिताय । मानिनिमभिमुखाहितचित्तां शंसति स्म घनरोमविभेदः ॥ किरातार्जुनीयम् ९.४६ ॥ |
| शङ्खभेरीविपञ्चीरवैर्मङ्गलं जायते वैपरीत्यं तदा लक्षयेत् । वायसो वा खरः श्वा शृतालोऽपि वा प्रश्नलग्नक्षणे रौति नादं यदि ॥ मुहूर्त.विवाहप्रकरणम् ९॥ |
| शङ्खस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः । निमीलितानामिव पङ्कजानां मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥ रघुवंशम् ७.६४ ॥ |
| शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टा मलपिङ्गतारम् । सांनिध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः॥ कुमारसंभवम् ७.३३॥ |
| शचीसपत्न्यां दिशि पश्य भैमी शक्रेभदानद्रवनिर्झरस्य । पोप्लूयते वासरसेतुनाशादुच्छृङ्खलः पूर इवान्धकारः ॥ नैषधीयचरितम् २२.२७ ॥ |
| शठ नाकलोकललनाभिरविरतरतं रिरंससे । तेन वहसि मुदमित्यवदद्व्रणरागिणं रमणमीर्ष्ययापरा ॥ शिशुपालवधम् १५.८८ ॥ |
| शतशः परुषाः पुरो विशङ्कं शिशुपालेन शिलीमुखाः प्रयुक्ताः । परमर्मभिदोऽपि दानवारेरपराधा इव न व्यथां वितेनुः ॥ शिशुपालवधम् २०.३१ ॥ |
| शतशः शृउतिमागतैव सा त्रिजगन्मोहमहौषधिर्मम । अमुना तव शंसितेन तु स्वदृशैवाधिगतामवैमि ताम् ॥ नैषधीयचरितम् २.५४ ॥ |
| शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने । प्रथयन्ननिवार्यवीर्यतां प्रजिगायेषुं अघातुकं शिवः ॥ किरातार्जुनीयम् १५.४८ ॥ |
| शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः । अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ॥ रघुवंशम् ३.४३* ॥ |
| शत्रुणा न हि सन्दध्यात्संश्लिष्टेनापि सन्धिना । सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ नीतिसंग्रहस्य मित्र-१.८९ ॥ |
| शनकैरथास्य तनुजालकान्तरस्फुरितक्षपाकरकरोत्कराकृति । पृथुफेनकूटमिव निम्नगापतेर्मरुतश्च सूनुरघुवत्प्रकीर्णकम् ॥ शिशुपालवधम् १३.२० ॥ |
| शनैरनीयन्त रयात् पतन्तो रथाः क्षितिं हस्तिनखादखेदैः । सयत्नसूतायतरश्मिभुग्नग्रीवान्तसंसक्तयुगैस्तुरङ्गैः ॥ शिशुपालवधम्  ३.६७ ॥ |
| शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् सोऽतिक्रान्तः श्रवणविषयं लोचनानामगम्यस्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ मेघदूतम्, उत्तरमेघः ३७ ॥ |
| शब्दादि निर्विश्य सुखं चिराय तस्मिन्प्रतिष्ठापितराजशब्दः । कौमुद्वतेयः कुमुदावदातैर्द्यामर्जितां कर्मभिरारुरोह ॥ रघुवंशम् १८.३ ॥ |
| शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः । पर्याप्तोऽसि प्रजाः पातुं औदासीन्येन वर्तितुम् ॥ रघुवंशम् १०.२६ ॥ |
| शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः संरक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः । निर्ह्रादी ते मुरज इव चेत्कन्दरासु ध्वनिः स्यात्संगीतार्थो ननु पशुपतेस्तत्र भावी समस्तः ॥ मेघदूतम्, पूर्वमेघः ५६॥ |
| शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा । हारादिवदलङ्कारः सन्निवेशो मनोहरः ॥ चन्द्रालोकः ५.१ ॥ |
| शब्दार्थोभयभूरेकः स च वाक्यैकसंश्रयः । पदैकदेशे रचना-वर्णवाक्यपदेष्वपि ॥ चन्द्रालोकः७.९ ॥ |
| शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया । याज्यया यजनकर्मिणोऽत्यजन्द्रव्यजातमपदिश्य देवतां ॥ शिशुपालवधम् १४.२० ॥ |
| शब्दे पदार्थे वाक्यार्थे वाक्यार्थस्तबके तथा । एते भवन्ति विन्यासाः स्वभावातिशयात्मकाः ॥ चन्द्रालोकः ५.१२२ ॥ |
| शब्दे पदार्थे वाक्यार्थे संख्यायां कारके तथा । लिङ्गे चेयमलङ्काराङ्कुरबीजतया स्थिता ॥ चन्द्रालोकः९.१६ ॥ |
| शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः । प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः ॥ किरातार्जुनीयम् ६.२० ॥ |
| शमिततापमपोढमहीरजः प्रथमबिन्दुभिरम्बुमुचोऽम्भसां । प्रविरलैरचलाङ्गनमङ्गनाजनसुगं न सुगन्धि न चक्रिरे ॥ शिशुपालवधम् ६.३३ ॥ |
| शमितपक्षबलः शितकोटिना शिखरिणां कुलिशेन पुरंदरः । स सारवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः ॥ रघुवंशम् ८.१२ ॥ |
| शम्भो धनुर्मण्डलतः प्रवृत्तं तं मण्डलादंशुमिवांशुभर्तुः । निवारयिष्यन्विदधे सिताश्वः शिलीमुखच्छायवृतां धरित्रीं ॥ किरातार्जुनीयम् १५.४९ ॥ |

| |
|---|
| शय्या शैलशिलागृहं गिरिगुहा वस्त्रं तरुणां त्वचः सारङ्गाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः । येषां निर्झरमम्बुपानमुचितं रत्यै तु विद्याङ्गना मन्ये ते परमेश्वराः शिरसि यैरि बद्धो न सेवाञ्जलिः ॥ वैराग्यशतकम् ॥ |
| शय्यां जहत्युभयपक्षविनीतनिद्राः स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते । येषां विभान्ति तरुणारुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव दन्तकोषाः ॥ रघुवंशम् ५.७२ ॥ |
| शय्यागतेन रामेण माता शातोदरी बभौ । सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥ रघुवंशम् १०.७० ॥ |
| शरः रिपूनवाप्यापि गतोऽवकीर्णितामयं न यावज्जनरञ्जनव्रती । भृशं विरक्तानपि रक्तवत्तरान्निकृत्य यत्तानसृजासृजद्युधि ॥ नैषधीयचरितम् १२.४५ ॥ |
| शरक्षते गजे भृङ्गैः सविषादिविषादिनि । रुतव्याजेन रुदितं तत्रासीदतिसीदति ॥ शिशुपालवधम् १९.७० ॥ |
| शरणं भवन्तमतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः । जितमृत्यवोऽजित भवन्ति भये ससुरासुरस्य जगतः शरणं ॥ किरातार्जुनीयम् १८.२२ ॥ |
| शरदीव शरश्रिया विभिन्ने विभुना शत्रुशिलीमुखाभ्रजाले । विकसन्मुखवारिजाः प्रकामं बभ्राशा इव यादवध्वजिन्यः ॥ शिशुपालवधम् २०.२७ ॥ |
| शरवर्षी महानादः स्फुरत्कार्मुककेतनः । नीलच्छविरसौ रेजे केशवच्छलनीरदः ॥ शिशुपालवधम् १९.९६ ॥ |
| शरवृष्टिं विधूयोर्वी उदस्तां सव्यसाचिना । रुरोध मार्गणैर्मार्गं तपनस्य त्रिलोचनः ॥ किरातार्जुनीयम् १५.४१ ॥ |
| शरानवद्यन्ननवद्यकर्मा चचार चित्रं प्रविचारमार्गैः । हस्तेन निस्त्रिंशभृता स दीप्तः सार्कांशुना वारिधिरूर्मिणेव ॥ किरातार्जुनीयम् १७.५६ ॥ |
| शराष्टदिक्शक्रनगातिधृत्यस्तिथिधृतिश्च प्रकृतेश्च पञ्च । उपग्रहाः सूर्यभतोऽब्जताराः शुभा न देशे कुरुबाह्लिकानाम् ॥ मुहूर्त.विवाहप्रकरणम् ६३॥ |
| शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः । आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥ रघुवंशम् ५.१५ ॥ |
| शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना । तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥ रघुवंशम् ३.२ ॥ |
| शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् । शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥ नीतिसंग्रहस्य मित्र-१.४९ ॥ |
| शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्तुं स किं नाशनिना करोति । अभेद्यमस्याहह वर्म न स्यादनङ्गता चेद्गिरिशप्रसादः ॥ नैषधीयचरितम् ८.६६ ॥ |
| शरैरजस्रं कुसुमायुधस्य कदर्थ्यमानस्तरुणि त्वदर्थे । अभ्यर्चयद्भिर्विनिवेद्यमानादप्येष मन्ये कुसुमाद्बिभेति ॥ नैषधीयचरितम् ८.७५ ॥ |
| शशंस दासीङ्गितविद्विदर्भजामितो ननु स्वामिनि पश्य कौतुकम् ।यदेष सौधाग्रनटे पटाञ्चले चलेऽपि काकस्य पदार्पणग्रहः ॥ नैषधीयचरितम् १२.२१ ॥ |
| शशकलङ्क भयंकर मादृशां ज्वलसि यन्निशि भूतपतिं श्रितः । तदमृतस्य तवेदृशभूततादभुतकरी परमूर्धविधूननी ॥ नैषधीयचरितम् ४.५५ ॥ |
| शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः । शिखरनिचयमेकसानुसद्मा सकलं इवापि दधन्महीधरस्य ॥ किरातार्जुनीयम् १०.११ ॥ |
| शशाक निह्नोतुमयेन तत्प्रियामयं बभाषे यदलीकवीक्षिताम् । समाज एवालपितासु वैणिकैर्मुमूर्च्छ यत्पञ्चममूर्च्छनासु च ॥ नैषधीयचरितम् १.५२ ॥ |
| शशाङ्कभं सूर्यभतोऽत्र गण्यं पक्षाददितिथ्या दिनवासरेण । युतं नवाप्तं नगशेषकं चेत्स्यादधिवरं तदगमनेऽतिशस्तम् ॥ मुहूर्त.यात्राप्रकरणम् २६॥ |
| शशाङ्कसूर्यर्क्षयुतेर्भशेषे खं भूयुगाङ्गानि दशेशतिथ्यः । नागेन्दवोऽङ्केन्दुमिता नखाश्चेद्भवन्ति चैते दशयोगसञ्ज्ञाः ॥ मुहूर्त.विवाहप्रकरणम् ७०॥ |
| शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः। ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने ॥ रघुवंशम् २.१४ ॥ |
| शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम् । मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥ नीतिसंग्रहस्य मित्र-१.५१ ॥ |
| शशिनं पुनरेति शार्वरी दयिता द्वन्द्वचरं पतत्रिणं । इति तौ विर्हान्तरक्षमौ कथमत्यन्तगता न मां दहेः ॥ रघुवंशम् ८.५६ ॥ |
| शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपम् । इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणां एकवाक्यं विवव्रुः ॥ रघुवंशम् ६.८५ ॥ |
| शशिमयं दहनास्रमुदित्वरं मनसिजस्य विमृश्य वियोगिनी । झटिति वारुणमश्रुमिषादसौ तदुचितं प्रतिशस्त्रमुपाददे ॥ नैषधीयचरितम् ४.३८ ॥ |
| शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः । प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ नीतिशतकम्५६ ॥ |
| शशी दिवसधूसरो, गलितयौवना कामिनी सरो विगतवारिजं, मुखमनक्षरं स्वाकृतेः। प्रभुर्धनपारायणः सततदुर्गतिः सज्जनो नृपाङ्कणगतः खलो, मनसि सप्तशल्यानि मे ॥ पुरुषार्थोपदेशः-6॥ |
| शस्ता न हंसाभिमुखी पुनस्ते यात्रेति ताभिश्छलहस्यमाना । साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः ॥ नैषधीयचरितम् ३.९ ॥ |
| शस्त्रव्रणमयश्रीमदलङ्करणभूषितः । ददृशेऽन्यो रावणवदलङ्करणभूषितः ॥ शिशुपालवधम् १९.५२ ॥ |
| शहङ्गयान्ययुवतौ वनिताभिः प्रत्यभेदि दयितः स्फुटमेव । न क्षमं भवति तत्त्वविचारे मत्सरेण हतसंवृति चेतः ॥ शिशुपालवधम् १०.३५ ॥ |
| शाक्रश्रवः क्षिप्रमृदुध्रुवोडुभिः शीर्षोदये वोयचये शुभे तनौ । पापैस्त्रिषष्ठायगतैः शुभग्रहैः केन्द्रत्रिकोणायधनत्रिसंस्थितैः ॥ मुहूर्त.राजाभिषेकप्रकरणम् २॥ |
| शाक्रेज्ये शतभानिले जलशिवे पौष्णार्यमर्क्षे वसु- द्वीशे वैश्वसुधांशुभे हयभगे सार्पानुराधे तथा । हस्तोपान्तिमभे विधातृविधिभे मूलादिती त्वाष्ट्रभा, जाङ्घ्री याम्यमघे कृशानुहरिभे विद्धेऽद्रिरेखे मिथः ॥ मुहूर्त.विवाहप्रकरणम् ५७॥ |
| शाखेशवारतनुवीर्यमतीव शस्तं शाखेशसूर्यशशिजीवबले व्रतं सत् । जीवे भृगौ रिपुगृहे विजिते च नीचे स्याद्वेदशास्त्रविधिना रहितो व्रतेन ॥ मुहूर्त.संस्कारप्रकरणम् ४४॥ |

| |
|---|
| शान्तं महापुरुषसंगदितं निशम्य तद्गौरवात्समुपसंतसंप्रहारः । शान्तो लवः,प्रणत एव च चन्द्रकेतुः, कल्याणमस्तु सुतसंगमनेन राज्ञः ॥ (उत्तररामचरितम् ६.७) |
| शान्तता विनययोगि मानसं भूरिधाम विमलं तपः श्रुतं । प्राह ते नु सदृशी दिवौकसामन्ववायमवदातमाकृतिः ॥ किरातार्जुनीयम् १३.३७ ॥ |
| शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् । लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ |
| शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ मासानन्यान्गमय चतुरो लोचने मीलयित्वा पश्चादावां विरहगुणितं तं तमात्माभिलाषं निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ मेघदूतम्, उत्तरमेघः ४४ ॥ |
| शापोऽप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोऽयं । कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो बीजप्ररोहजननीं ज्वलनः करोति ॥ रघुवंशम् ८.८० ॥ |
| शारतां गमितया शशिपादैश्छायया विटपिनां प्रतिपेदे । न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः ॥ किरातार्जुनीयम् ९.२९ ॥ |
| शारीं चरन्तीम् सखि मारयैतामित्यक्षदाये कथिते कयापि । यत्र स्वघातभ्रमभीरुशारीकाकुत्थसाकूतहसः स जज्ञे ॥ नैषधीयचरितम् ६.७१ ॥ |
| शासनेऽपि गुरुणि व्यवस्थितं कृत्यवस्तुषु नियुङ्क्ष्व कामतः । त्वत्प्रयोजनघनं धनञ्जयादन्य एव इति मां च मावगाः ॥ शिशुपालवधम् १४.१५ ॥ |
| शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान् । सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥ नीतिसंग्रहस्य मित्र-१.१६४ ॥ |
| शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयाऽऽगमा विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः । तज्जाड्यं वसुधाधिपस्य कवयस्त्वर्थं विनापीश्वराः कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः ॥ नीतिशतकम् १५ ॥ |
| शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः । तज्जाड्यं वसुधाधिपस्य सुधियस्त्वर्थं विनापीश्वराः कुत्स्याः स्युः कुपरीक्षकैर्न मणयो यैरर्घतः पातिताः ॥ पुरुषार्थोपदेशः-40॥ |
| शिक्षैव साक्षाच्चरितं यदीयं कल्पश्रियाकल्पविधिर्यदीयः । यस्याः समस्तार्थनिरुक्तिरूपैर्निरुक्तिविद्या खलु पर्यणंसीत् ॥ नैषधीयचरितम् १०.७६ ॥ |
| शिखरोन्नतनिष्ठुरांसपीठः स्थगयन्नेकदिगन्तमायतान्तः । निरवर्णि सकृत्प्रसारितोऽस्य क्षितिभर्तेव चमूभिरेकबाहुः ॥ शिशुपालवधम् २०.२२ ॥ |
| शिखिपिच्छकृतध्वजावचूडक्षणसाशङ्कविवर्तमानभोगाः । यमपाशवदाशुबन्धनाय न्यपतन्वृष्णिगणेषु लेलिहानाः ॥ शिशुपालवधम् २०.४६ ॥ |
| शिखी विधाय त्वदवाप्तिकामनां स्वयंहुतस्वांशहविः स्वमूर्तिषु । क्रतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्यास्तु विधिस्तु वैदिकः ॥ नैषधीयचरितम् ९.७५ ॥ |
| शिञ्चन्त्याः कथमपि बाहुमुन्नमय्य प्रेयांसं मनसिजदुःखदुर्लयायाः । सौवर्णं वलयमवागलत्कराग्राल्लवण्यश्रिय इव शेषमङ्गनायाः ॥ शिशुपालवधम् ८.३४ ॥ |
| शितचक्रनिपातसंप्रतीक्ष्यं वहतः स्कन्धगतं च तस्य मृत्युं ।अभिशौरि रथोऽथनोदिताश्वः प्रययौ सारथिरूपया नियत्या ॥ शिशुपालवधम् २०.२ ॥ |
| शितशल्यमुखावदीर्णमेघक्षरदम्भः स्फुटतीव्रवेदनानां । स्रवदस्रुततीव चक्रवालं ककुभामौर्णविषुः सुवर्णपुङ्खाः ॥ शिशुपालवधम् २०.१४ ॥ |
| शितितारकानुमितताम्रनयनमरुणीकृतं क्रुधा । बाणवदनमुददीपि भिये जगतः सकीलमिव सूर्यमण्डलं ॥ शिशुपालवधम् १५.४८ ॥ |
| शिथिलं शयने लिल्ये मच्चितं ते शशिश्रियि । मस्तपिष्टकटीलोष्ट-गल्लादि ग्राम्यमुच्यते ॥ चन्द्रालोकः२.१० ॥ |
| शिरः शार्वं स्वर्गात्पशुपति शिरसस्ततः क्षितिधरं महीध्राद्दुत्तुङ्गादवनिमवनेश्चापि जलधिम् । अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ नीतिशतकम् १० ॥ |
| शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च । सुरतानि च तानि ते रहः स्मर! संस्मृत्य न शान्तिरस्ति मे ॥ कुमारसंभवम् ४.१७ ॥ |
| शिरसा हरिन्मणिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः । उपमां ययावरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ ॥ किरातार्जुनीयम् ६.२३ ॥ |
| शिरसि स्म जिघ्रति सुरारिबन्धने छलवामनं विनयवामनं तदा । यशसेव वीर्यविजितामरद्रुमप्रसवेन वासितशिरोरुहे नृपः ॥ शिशुपालवधम् १३.१२ ॥ |
| शिरीषकोषादपि कोमलाया वेधा विधायाङ्गमशेषमस्याः । प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ॥ नैषधीयचरितम् ७.४७ ॥ |
| शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायादपि श्रुतवृद्धयोगात् । नितान्तगुर्वी अपि चानुभावाद्धुरं धरित्र्या बिभरां बभूव ॥ रघुवंशम् १८.४५ ॥ |
| शिरीषमृद्वी वरुणं किमीहसे पयःप्रकृत्या मृदुवर्गवासवम् । विहाय सर्वान्वृणुते स्म किं न सा निशापि शीतांशुमनेन हेतुना ॥ नैषधीयचरितम् ९.५८ ॥ |
| शिरोरुहैरलिकुलकोमलैरमी मुधा मृधे मृषत युवान एव मा । बलोद्धतं धवलितमूर्धजानिति ध्रुवं जनाञ्जरत इवाकरोद्रजः ॥ शिशुपालवधम् १७..५८ ॥ |
| शिलाघनैर्नाकसदां उरःस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः । तटाभिनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥ किरातार्जुनीयम् ८.३२ ॥ |
| शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु । व्यलोकयन्नुन्मिपितैस्तडिन्मयैर्महातपः साक्ष्य इव स्थिताः क्षपाः ॥ कुमारसंभवम् ५.२५ ॥ |
| शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव । रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥ रघुवंशम् ७.४९ ॥ |
| शिवप्रणुन्नेन शिलीमुखेन त्सरुप्रदेशादपवर्जिताङ्गः ।ज्वलन्नसिस्तस्य पपात पाणेर्घनस्य वप्रादिव वैद्युतोऽग्निः ॥ किरातार्जुनीयम् १७.५८ ॥ |
| शिवभुजाहतिभिन्नपृथुक्षतीः सुखं इवानुबभूव कपिध्वजः । क इव नाम बृहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥ किरातार्जुनीयम् १८.३ ॥ |
| शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम् । विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥ किरातार्जुनीयम् २.३५ ॥ |

| |
|---|
| शिवो नृयुग्मे द्वितनौ च देव्यः क्षुद्राश्चरे सर्व इमे स्थिरर्क्षे । पुष्ये ग्रहा विघ्नपयक्षसर्प-भूतादयोऽन्त्ये श्रवणे जिनश्च ॥ मुहूर्त.संक्रान्तिप्रकरणम् ६३॥ |
| शिवोऽजपादादष्टौ स्युर्भेशा अदितिजीवकौ । विष्ण्वर्कत्वाष्ट्रमरुतो मुहूर्ता निशि कीर्त्तिताः ॥ मुहूर्त.विवाहप्रकरणम् ५३॥ |
| शिशिरकिरणकान्तं वासरान्तेऽभिसार्य श्वसनसुरभिगन्धिः साम्प्रतं सत्वरेव । व्रजति रजनिरेषा तन्मयूखाङ्गरागैः परिमलितमनिन्द्यैरम्बरान्तं वहन्ती ॥ शिशुपालवधम् ११.२१ ॥ |
| शिशिरजरुजां घर्मं शर्मोदयाय तनूभृतामथ खरकरश्यानास्यानां प्रयच्छति यः पयः । जलभयजुषां तापं तापस्पृशां हिममित्ययं परहितमिलत्कृत्यावृत्तिः स भानुरुदञ्चति ॥ नैषधीयचरितम् १९.४८ ॥ |
| शिशिरमासमपास्य गुणोस्य नः क इव शीतहरस्य कुचोष्मणः । इति धियास्तरुषः परिरेभिरे घनमतो नमतोऽनुमतान्प्रियाः ॥ शिशुपालवधम् ६.६५ ॥ |
| शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति । शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥ (उत्तररामचरितम् ४.११) |
| शिष्यतां निधुवनोपदेशिनः शंकरस्य रहसि प्रपन्नया। शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम्॥ कुमारसंभवम् ७.१७॥ |
| शिष्याः कलाविधिषु भीमभुवो वयस्या वीणामृदुक्वणनकर्मणि याः प्रवीणाः । आसीनमेनमुपवीणयितुं ययुस्ता गन्धर्वराजतनुजा मनुजाधिराजम् ॥ नैषधीयचरितम् २१.१२५ ॥ |
| शीघ्रलङ्घितपथैरथ वाहैर्लम्भिता भुवममी सुरसाराः । वक्रितोन्नमितकंधरबन्धाः शुश्रुवुर्ध्वनितमध्वनि दूरम् ॥ नैषधीयचरितम् ५.५८ ॥ |
| शीतार्तिं बलवदुपेयुषतेव नीरैरासेकाच्छिशिरसमीरकम्पितेन । रामाणामभिनवयौवनोष्मभाजोराश्लेषि स्तनतटयोर्नवंशुकेन ॥ शिशुपालवधम् ८.६२ ॥ |
| शीधुपानविधुरासु निगृह्णन्मानमाशु शिथिलीकृतलज्जः । संगतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ किरातार्जुनीयम् ९.४२ ॥ |
| शीधुपानविधुरेषु वधूनां विघ्नतामुपगतेषु वपुःषु । ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे ॥ किरातार्जुनीयम् ९.७३ ॥ |
| शुकच्छदसमच्छविपत्त्रमालभारी हरिष्यति तरुस्तव तत्र चित्तम् । यत्पल्लवौघपरिरम्भविजृम्भितेन ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥ नैषधीयचरितम् ११.३८ ॥ |
| शुकाङ्गनीलोपलनिर्मितानां लिप्तेषु भासा गृहदेहलीनाम् । यस्यामलिन्देषु न चक्रुरेव मुग्धङ्गना गोमयगोमुखानि ॥ शिशुपालवधम् ३.४७ ॥ |
| शुक्रज्ञ जीवशनिभूतनयस्य बाण शैलाष्टपञ्चविशिखाः समराशिमध्ये । त्रिंशांशको विषमभे विपरीतमस्माद् द्रेष्काणकाः प्रथमपञ्चनवाधिपानाम् ॥ मुहूर्त.विवाहप्रकरणम् ४१॥ |
| शुक्रार्किषु दर्शभूतमदने नन्दासु तीक्ष्णोग्रमे पौष्णे वारुणभे त्रिपुष्करदिने न्यूनाधिमासेऽयने । याम्येऽब्दात्परतश्च पातपरिघे देवेज्यशुक्रास्तके भद्रावैधृतयोः शवप्रतिकृतेर्दाहो न पक्षे सिते ॥ मुहूर्त.नक्षत्रप्रकरणम् ५१॥ |
| शुक्रे जीवे तथा चन्द्रे सूर्यभौमाऽर्किसंयुते । निर्गुणः क्रूरचेष्टः स्यान्निर्घृणः सद्युते पटुः ॥ मुहूर्त.संस्कारप्रकरणम् ५२॥ |
| शुक्लांशुकोपरचितानि निरन्तराभिर्वेश्मनि रस्मिविततानि नराधिपानां । चन्द्राकृतानि गजमण्डलिकाभिरुच्चैर्नीलाभ्रपङ्क्तिपरिवेषमिवाधिजग्मुः ॥ शिशुपालवधम् ५.५२ ॥ |
| शुक्लाच्छदन्तच्छविसुन्दरीयं सैवोष्ठमुद्रा स च कर्णपाशः । नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव ॥ (उत्तररामचरितम् ६.२७) |
| शुक्ले पूर्वार्धेऽष्टमीपञ्चदश्योर्भद्रैकादश्यां चतुर्थ्या परार्धे । कृष्णेऽन्त्यार्धे स्यात्तृतीयादशम्योः पूर्वे भागे सप्तमीशम्भुतिथ्योः ॥ मुहूर्तचिन्त.४३ ॥ |
| शुक्लैः सतारैर्मुकुलीकृतैः स्थूलैः कुमुद्वतीनां कुमुदाकरैरिव । व्युष्टं प्रयाणं च वियोगवेदनाविदूननारीकमभूत्समं तदा ॥ शिशुपालवधम् १२.४ ॥ |
| शुक्लैर्मयूखनिचयैः परिवीतमूर्तिर्वप्राभिघातपरिमण्डलितोरुदेहः । शृङ्गाण्यमुष्य भजते गणभर्तुरुक्षा कुर्वन्वधूजनमनःसु शशाङ्कशङ्कां ॥ किरातार्जुनीयम् ५.४२ ॥ |
| शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया । प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ किरातार्जुनीयम् २.३२ ॥ |
| शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः । दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ नीतिसंग्रहस्य मित्र-१.९७ ॥ |
| शुचिरप्सु विद्रुमलताविटपस्तनुसान्द्रफेनलवसंवलितः । स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः ॥ किरातार्जुनीयम् ६.१३ ॥ |
| शुचिरुचिमुडुगणमगणनममुमतिकलयसि कृशतनु न गगनतटमनु । प्रतिनिशशशितलविगलदमृतभृतरविरथहयचयखुरबिलकुलमिव ॥ नैषधीयचरितम् २२.१४८ ॥ |
| शुचिवल्कवीततनुरन्यतमस्तिमिरच्छिदां इव गिरौ भवतः । महते जयाय मघवन्ननघः पुरुषस्तपस्यति तपज्जगतीं ॥ किरातार्जुनीयम् ६.३१ ॥ |
| शुचिशुक्रपौषतपसां दिगश्विरुद्रार्कसङ्ख्यसिततिथयः । भूतादित्रितयाष्टमि सङ्क्रमणं च व्रतेष्वनध्यायाः ॥ मुहूर्त.संस्कारप्रकरणम् ५४॥ |
| शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा \| विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥ कुमारसंभवम् ५.२०॥ |
| शुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः । विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् ॥ रघुवंशम् ८.२५ ॥ |
| शुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः । अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुं आत्मसंभवम् ॥ रघुवंशम् ३.२१ ॥ |
| शुद्धं सारोपमुद्दिष्टमायुर्घृतमितीदृशम् । शुद्धं साध्यवसानं स्यादायुरेवेदमीदृशम् ॥ चन्द्रालोकः९.१२ ॥ |
| शुद्धतन्मूलसंभिन्न-प्रभेदैर्यौगिकस्त्रिधा । ते च भ्रान्तिस्फुरत्कान्ति-कौन्तेयादिस्वरूपिणः ॥ चन्द्रालोकः १.११ ॥ |
| शुद्धमश्रुतिविरोधि बिभ्रतं शास्त्रमुज्ज्वलवर्णसङ्करैः । पुस्तकैः सममसौ गणं मुहुर्वाच्यमानमशृणोद्द्विजन्मनां ॥ शिशुपालवधम् १४.३७ ॥ |

| |
|---|
| शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः । क्षिप्ररेनमृजुमाशु सपक्षं सायकं धनुरिवाजनि वक्रः ॥ नैषधीयचरितम् ५.१०२ ॥ |
| शुद्धाः सङ्गं न कौचित्प्राप्तवन्तो दूरान्मुक्ता शीघ्रतां दर्शयन्तः । अन्तःसेनं विद्विषामाविशन्तो युक्तं चक्रुः सायका वाजितायाः ॥ शिशुपालवधम् १८.१३ ॥ |
| शुद्धान्तसंभोगनितान्ततुष्टे न नैषधे कार्त्र्यमिदं निगाद्यम् । अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ॥ नैषधीयचरितम् ३.९३ ॥ |
| शुद्धाम्बुरन्ध्रे विजनुर्भमृत्यौ व्यर्कारिक्ताचरदर्शचैत्रे । हयग्रेऽम्बुपूर्णं कलशं द्विजांश्च कृत्वा विशेद्वेश्म भकूटशुद्धम् ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ४॥ |
| शुद्धिं गतैरपि परामृजुभिर्विदित्वा बाणैरजय्यमविघट्टितमर्मभिस्तं । मर्मातिगैरनृजुभिर्नितरामशुद्धैर्वाक्सायकैरथ तुतोद तदा विपक्षः ॥ शिशुपालवधम् २०.७७ ॥ |
| शुद्धिरेकप्रधानत्वं तथा संसृष्टिसंकरौ । एतेषामेव विन्यासान्नालङ्कारान्तराण्यमी ॥ चन्द्रालोकः ५.११९ ॥ |
| शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश्चलफेनपङ्क्तिषु । नितान्तगौर्यो हृतकुङ्कुमेष्वलं न लेभिरे ताः परभागं ऊर्मिषु ॥ किरातार्जुनीयम् ८.४२ ॥ |
| शुभाष्टवर्गस्त्वदनङ्गजन्मनस्तवाधरेऽलिख्यत यत्र लेखया । मदीयदन्तक्षतराजिरञ्जनैः स भूर्जतामर्जतु बिम्बपाटलः ॥ नैषधीयचरितम् ९.११९ ॥ |
| शुभ्रांशुहारगणहारिपयोधराङ्कचुम्बीन्द्रचापखचितद्युमणिप्रभाभिः । अन्वास्यते समिति चामरवाहिनीभिर्यात्रासु चैष बहुलाभरणार्चिताभिः ॥ नैषधीयचरितम् १३.४ ॥ |
| शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथशिञ्जितमेखलाः । विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहंगमाः ॥ रघुवंशम् ८.३७ ॥ |
| शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तृविप्रकृता अपि रोषणतया मा स्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ अभिज्ञानशाकुन्तलम् ४.१८ ॥ |
| शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसंपदेऽपि । विशेषलेशोयऽमदेवदेहमंशागतं तु क्षितिभृत्तयेह ॥ नैषधीयचरितम् ६.९४ ॥ |
| शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् । विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्तलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ अमरुशतकम्-७८॥ |
| शूरः शौरिरशिशिरैराशाशैराशु राशिशः । शरारुः श्रीशरीरेशः शुशूरेऽरिशिरः शरैः ॥ शिशुपालवधम् १९.१०८ ॥ |
| शूरस्त्वं वादिजल्पव्युपशमनविधावक्षयं पाटवं नः। सेवन्ते त्वं धनान्धामतिमलहतये त्वामपि श्रोतुकामा मय्यप्यास्था न ते चेत् तवयि मम सुतरामेष राजन् गतोऽस्मि ॥ पुरुषार्थोपदेशः-45॥ |
| शूरेऽपि सूरिपरिषत्प्रथमाऋचितेऽपि शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि । तस्मिन्नवद्यमियमाप तदेव नाम यत्कोमलं न किल तस्य नलेति नाम ॥ नैषधीयचरितम् ११.३२ ॥ |
| शूलिनः करतलद्वयेन सा संनिरुध्य नयने हृतांशुका । तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत्॥ कुमारसंभवम् ७.७॥ |
| शृईहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । यातः पञ्चदशः कृशेतररसस्वादाविहायं महाकाव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् १५.९९ ॥ |
| शृङ्गाणि द्रुतकनकोज्वलानि गन्धाः कौसुम्भं पृथुकुचकुम्भसङ्गिवासः । मार्द्वीकं प्रयतमसन्निधानमासन्नारीणामिति जलकेलिसाधनानि ॥ शिशुपालवधम् ८.३० ॥ |
| शृङ्गारभृङ्गारसुधाकरेण वर्णस्रजानूपय कर्णकूपौ । त्वच्चारुवाणीरसवेणितीरं तृणानुकारः खलु कोषकारः ॥ नैषधीयचरितम् २२.५९ ॥ |
| शृणु उपार्जितानां वित्तानां त्याग एव हि रक्षणम् । तडागोदरसंस्थानां परीवाहैवाम्भसाम् ॥ नीतिसंग्रहस्य मित्र-१.१४९ ॥ |
| शृण्वन्सदारस्तदुदारभावं हृष्यन्मुहुर्लोम पुलोमजायाः । पुण्येन नालोकत लोकपालः प्रमोदबाष्पावृतनेत्रमालः ॥ नैषधीयचरितम् ३.२८ ॥ |
| शेषं नलं प्रत्यमरेण गाथा या या समर्था खलु येन येन । तां तां तदन्येन सहालगन्तीं तदा विशेषं प्रतिसंदधे सा ॥ नैषधीयचरितम् १४.१ ॥ |
| शेषान्मासान्गमनदिवसप्रस्तुतस्यावधेर्वा विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः संयोगं वा हृदयनिहितारम्भमास्वादयन्ती प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ मेघदूतम्, उत्तरमेघः २१ ॥ |
| शेषाश्चास्य समाः कुजस्य सुहृदश्चन्द्रेज्यसूर्याः बुधः शत्रुः शुक्रशनी समौ च शशभृत्सूनोः सिताहस्करौ ॥ मुहूर्त.विवाहप्रकरणम् २७॥ |
| शैलाघातक्षुभितवडवावक्त्रहुतभु- क्प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे । समन्तादुत्सर्पद्घनतुमुलहेलाकलकलः पयोराशेरोघः प्रलयपवनास्फालित इव ॥ (उत्तररामचरितम् ५.९) |
| शैलात्मजापि पितुरुच्छिरसोऽभिलाषं व्यर्थं समर्थ्य ललितं वपुरात्मनश्च । सख्योः समक्षमिति चाधिकजातलज्जा शून्या जगाम भवनाभिमुखी कथंचित् ॥ कुमारसंभवम् ३.७५ ॥ |
| शैलाधिरोहाब्यसनाधिकोद्धुरैः पयोधरैरामलकीवनाश्रिताः । तं पर्वतीयप्रमदाश्चचायिरे विकासविस्फारितविभ्रमेक्षणाः ॥ शिशुपालवधम् १२.५१ ॥ |
| शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः । संतानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः केनाप्युत्क्षिपतेव पष्य भुवनं मत्पार्श्वमानीयते ॥ अभिज्ञानशाकुन्तलम् ७.८ ॥ |
| शैलास्सन्ति सरित्तरङ्गसलिलप्रक्षालितान्तोपलाश् छायामण्डलिनः फलन्ति तरवः सर्वर्तुसाधारणाः । विद्यन्ते गुणावत्सलाश्च मुनयः तत्वार्थसन्दर्शिनस् सन्तोषं भज चित्त! वित्तमहतां मा भूरवज्ञास्पदम् ॥ पुरुषार्थोपदेशः-35॥ |
| शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात् । पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटं उत्ससर्प ॥ रघुवंशम् ५.४६ ॥ |

| |
|---|
| शैलोपशल्यनिपतद्रथनेमिधारा-निष्पिष्टनिष्ठुरशिलातलचूर्णगर्भाः । भूरेणवोनभसि नद्धपयोदचक्राश्चक्रवदङ्गरुहधूम्ररुचो विसस्रुः ॥ शिशुपालवधम् ५.८ ॥ |
| शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे । आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥ नैषधीयचरितम् ५.३३ ॥ |
| शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् । वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ रघुवंशम् १.८ ॥ |
| शोकं विषेहि भारतभृङ्ग! नूनं, यत्पारतन्त्र्य - रजनौगतपद्म - बद्धः । भूयो भविष्यति चिराय सखेऽधुनैव, स्वातन्त्र्यसूर्य-किरणारुण-सुप्रभापतम् ॥ प्रतापविजयः-६२ ॥ |
| शोकश्चेत्कोकयोस्त्वां सुदति तुदति तद्व्याहराज्ञाकरस्ते गत्वा कुल्यामनस्तं व्रजितुमनुनये भानुमेतज्जलस्थम् । बद्धे मय्यञ्जलावप्यनुनयविमुखः स्यान्ममैकग्रहोऽयं दत्त्वैवाभ्यां तदम्भोञ्जलिमिह भवतीं पश्य मामेष्यमाणम् ॥ नैषधीयचरितम् २१.१६२ ॥ |
| शोकस्थानसहस्राणि भयस्थानशतानि च । दिवसे दिवसे मूढमाविशन्ति न पण्डितम्  ॥ नीतिसंग्रहस्य मित्र-१.३ ॥ |
| शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् । केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्  ॥ नीतिसंग्रहस्य मित्र-१.१९८ ॥ |
| शोचित्वाग्रे भृत्ययोर्मृत्युभाजोरर्यः प्रेम्णा नो तथा वल्लभस्य । पूर्वं कृत्वा नेतरस्य प्रसादं पश्चात्तापादाप दाहं यथान्तः ॥ शिशुपालवधम् १८.५२ ॥ |
| शोणं पदप्रणयिनं गुणमस्य पश्य किंचास्य सेवनपरैव सरखती सा । एनं भजस्व सुभगे भुवनाधिनाथं किं वा भजन्ति तमिमं कमलाशया न ॥ नैषधीयचरितम् १३.२५ ॥ |
| शोभयन्ति परितः प्रतापिनो मन्त्रशक्तिविनिवारितापदः । त्वन्मखमुखभुवः स्वयम्भुवो भूभुजश्च परलोकजिष्णवः ॥ शिशुपालवधम् १४.५६ ॥ |
| शोभा ख्यातोऽपि यद्दोषो गुणकीर्त्या निषिध्यते । मुधा निन्दन्ति संसारं कंसारिर्यत्र पूज्यते ॥ चन्द्रालोकः३.२ ॥ |
| शोभायशोभिर्जितशैवशैलं करोषि लज्जागुरुमौलिमैलम् । दस्रौ हठश्रीहरणाद्दस्रौ कंदर्पमप्युज्झितरूपदर्पम् ॥ नैषधीयचरितम् ८.३४ ॥ |
| शौरेः प्रतापोपनतैरितस्ततः समागतैः प्रश्रयनम्रमूर्तिभिः । एकातपत्रा पृथिवीभृतां गणैरभूदबहुच्छात्रतया पताकिनी ॥ शिशुपालवधम् १२.३३ ॥ |
| श्च्योतद्भिः समधिकमात्तमङ्गसङ्गाल्लावण्यन्तनुमदिवाम्बु वाससोऽन्तैः । उत्तेरे तरलतरङ्गलीलानिष्णातैरथ सरसः प्रियासमूहैः ॥ शिशुपालवधम् ८.६३ ॥ |
| श्च्योतमन्मदाम्भकणकेन केनचिज्जनस्य जीमूतकदम्बकद्युता । नगेन गरीयसोच्चकैररोधि पन्थाः पृथुदन्तशालिना ॥ शिशुपालवधम् १२.४८ ॥ |
| श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च प्लक्षान्प्ररोहजटिलानिव मन्त्रिवृद्धान् । अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैर्वार्त्तानुयोगमधुराक्षरया च वाचा ॥ रघुवंशम् १३.७१ ॥ |
| श्मश्रूयमाणे मधुजालके तरोर्गजेन गण्डं कषता विधूनिते । क्षुद्राभिरक्षुद्रतराभिराकुलं विदश्यमानेन जनेन दुद्रुवे ॥ शिशुपालवधम् १२.५४ ॥ |
| श्यामारुणैर्वारणदानतोयैरालोडिताः काञ्चनभूपरागाः । आनेमिमग्नैः शितिकण्ठपक्षक्षोदद्युतश्चुक्षुबिरे रथौघैः ॥ शिशुपालवधम्  ३.२६ ॥ |
| श्यामास्वङ्गं चकितहरिणप्रेक्षिते दृष्टिपातं गण्डच्छायां शशिनि शिखिनां वर्हभारेषु केशान् उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्हन्तैकस्थं क्व चिदपि न ते भीरु सादृश्यमस्ति ॥ मेघदूतम्, उत्तरमेघः ३८ ॥ |
| श्यामीकृता मृगमदैरिव माथुरीणां धौतैः कलिन्दतनयामधिमध्यदेशम् । तत्राप्तकालियमहाह्रदनाभिशोभा रोमावलीमिव विलोकयितासि भूमेः ॥ नैषधीयचरितम् ११.१०६ ॥ |
| श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवाससः । अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः ॥ रघुवंशम् ११.६० ॥ |
| श्रद्धामयीभूय सुपर्वणस्तान्ननाम नामग्रहणाग्रकं सा । सुरेषु हि श्रद्दधतां नमस्य सर्वार्थसिद्ध्यङ्गमिथः समस्या ॥ नैषधीयचरितम् १४.३ ॥ |
| श्रद्धालुसंकल्पितकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः । तदाकुलोऽसौ कुलदैवतस्य स्मृतिं ततान क्षणमेकतानः ॥ नैषधीयचरितम् १०.६९ ॥ |
| श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनी- मरुत्तरलितालकाकुलललाटचन्द्रद्युति । अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते निराभरणसुन्दरश्रवणपाशमुग्धं मुखम् ॥ <br><br>(उत्तररामचरितम् ६.३७) |
| श्रवः प्रविष्टा इव तद्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना । ऊचे ह्रियोऽपि श्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री ॥ नैषधीयचरितम् ३.७४ ॥ |
| श्रवणपुटयुगेन स्वेन साधूपनीतं दिगधिपकृपयाप्तादीदृशः संविधान् । अलभत मधु बाला रागवागुत्थमित्थं निषधजनपदेन्द्रः पातुमानन्दसान्द्रम् ॥ नैषधीयचरितम् ६.११२ ॥ |
| श्रवणपूरतमालदलाङ्कुरं शशिकुरङ्गमुखे सखि निक्षिप । किमपि तुन्दिलितः स्थगयत्यमुं सपदि तेन तदुच्छ्वसिमि क्षणम् ॥ नैषधीयचरितम् ४.५६ ॥ |
| श्रितपुण्यसरः सरित्कथं न समाधिक्षपिताखिलक्षपम् । जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि ॥ नैषधीयचरितम् २.३९ ॥ |
| श्रितास्य कण्ठं गुरुविप्रवन्दनाद्विनम्रमोलेश्चिबुकाग्रचुम्बिनी । अवाप मुक्तावलिरास्यचन्द्रमःस्रवत्सुधातुन्दिलबिन्दुवृन्दताम् ॥ नैषधीयचरितम् १५.७२ ॥ |
| श्रियं भजन्तां कियदस्य देवाश्छाया नलस्यास्ति तथापि नैषाम् ।इतीरयन्तीव तया निरैक्षि सा नैषधे न त्रिदशेषु तेषु ॥ नैषधीयचरितम् १४.२३ ॥ |
| श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्नौति तनोति कीर्तिम् । संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥ किरातार्जुनीयम् ३.७ ॥ |
| श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् । स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ किरातार्जुनीयम् १.१ ॥ |
| श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि । वसन् ददर्शावतरन्तमम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ शिशुपालवधम्  १.१॥ |
| श्रियः पद्मनिषण्णायाः ॠ क्षौमान्तरितमेखले । अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ रघुवंशम् १०.८ ॥ |
| श्रियमेव परं धराधिपाद्गुणसिन्धोरुदितामवेहि ताम् । व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः ॥ नैषधीयचरितम् २.१९ ॥ |

| |
|---|
| श्रियस्तदालिङ्गनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः । समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाणुनापि ॥ नैषधीयचरितम् ३.३१ ॥ |
| श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षैर्-वपुष्टचैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय । प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षै-र्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षांबभूवे ॥ शिशुपालवधम् २०.७९ ॥ |
| श्रिया हसद्भिः कलमानि सस्मितैरलंकृताम्बुः प्रतिमागतैर्मुखैः । कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी ॥ किरातार्जुनीयम् ८.४४ ॥ |
| श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः । विहाय भैमीमप्दर्पया कया न दर्पणः श्वासमलीमसः कृतः ॥ नैषधीयचरितम् १.३१ ॥ |
| श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य स्मरामरेन्द्रावपि न स्मरामः । वासेन तस्मिन्क्षमयोश्च सम्यग्बुद्धौ न दध्मः खलु शेषबुद्धौ ॥ नैषधीयचरितम् ३.३६ ॥ |
| श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति । पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव कापि ॥ नैषधीयचरितम् ५.२३ ॥ |
| श्रीमद्भिः सरथगजैः सुराङ्गनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः । संमूर्छन्नलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥ किरातार्जुनीयम् ७.१ ॥ |
| श्रीमद्भिर्जितपुलिनानि माधवीनामारोहैर्निबिडबृहन्नितम्बबिम्बैः । पाषाणस्खलनविलोलमाशु नूनं वैलक्ष्याद्ययुरवरोधनानि सिन्धोः ॥ शिशुपालवधम् ८.८ ॥ |
| श्रीमद्भिर्नियमितकन्धरापरान्तैः संसक्तैरगुरुवनेषु साङ्गहारं । सम्प्राप्ते निसृतमदाम्बुभिर्गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ किरातार्जुनीयम् ७.३७ ॥ |
| श्रीमल्लताभवनं ओषधयः प्रदीपाः शय्या नवानि हरिचन्दनपल्लवानि । अस्मिन्रतिश्रमनुदश्च सरोजवाताः स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥ किरातार्जुनीयम् ५.२८ ॥ |
| श्रीहर्शं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । स्वादूत्पादभृति त्रयोदशतयादेश्यस्तदीये महाकाव्येऽयं व्यरमन्नलस्य चरिते सर्गो रसाम्भोनिधिः ॥ नैषधीयचरितम् १३.५६ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं शृईहीरः सुषुवे जितेन्द्रियचयं ममल्लदेवी च यम् । षष्ठः खण्डनखण्डतोऽपि सहजात्क्षोदक्षमे तन्महाकाव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् ६.११३ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुबे जितेन्द्रियचयं मामल्लदेवी च यम् । तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महाकाव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् ४.१२४ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । एकामत्यजतो नवार्थघटनामेकान्नविंशो महाकाव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमस्मिन्नगात् ॥ नैषधीयचरितम् १९.६८ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । गौडर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महाकाव्ये चारुणि वैरसेनिचरिते सर्गोऽगमत्सप्तमः ॥ नैषधीयचरितम् ७.११ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महाकाव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥ नैषधीयचरितम् १.१४५ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् १०.१३८ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महाकाव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् १२.११३ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । तस्य श्रीविजयप्रशस्तिरचनातातस्य नव्ये महाकाव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः ॥ नैषधीयचरितम् ५.१३८ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् ८.१०९ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । तस्यागादयमेकविंशगणनाकाव्येऽतिनव्ये कृतौ भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् २१.१६४ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महाकाव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् २२.१५१ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् २.११ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । यातः सप्तदशः स्वसुः सुसदृशि छिन्दप्रशस्तेर्महाकाव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् १७.२२२ ॥ |

| |
|---|
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् १४.१०१ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । शृङ्गारामृतशीतगावयमगादेकादशस्तन्महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् ११.१३ ॥ |
| श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् । संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ नैषधीयचरितम् ९.१६ ॥ |
| श्रुतः स दृष्टश्च हरित्सु मोहाद्ध्यातः स नीरन्ध्रितबुद्धिधारम् । ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेकशेषः ॥ नैषधीयचरितम् ३.८२ ॥ |
| श्रुतमप्यधिगम्य ये रिपून्विनयन्ते स्म न शरीरजन्मनः । जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥ किरातार्जुनीयम् २.४१ ॥ |
| श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हरः प्रसंख्यानपरो बभूव । आत्मेश्वराणां न हि जातु विनाः समाधिभेदप्रभवो भवन्ति ॥ कुमारसंभवम् ३.४०॥ |
| श्रुतिः सुराणां गुणगायनी यदि त्वदङ्घ्रिमग्नस्य जनस्य किं ततः । स्तवे रवेरप्सु कृताप्लवैः कृते न मुद्वती जातु भवेत्कुमुद्वती ॥ नैषधीयचरितम् ९.१४८ ॥ |
| श्रुतित्रयमृदुक्षिप्रध्रुवस्वातौ सिताम्बरे । मध्यं च मूलादितिभे पितृमिश्रे परेष्वसत् ॥ मुहूर्त.संस्कारप्रकरणम् २॥ |
| श्रुतिपथमधुराणि सारसानामनुनदि सुश्रुविरे रुतानि ताभिः । विदधति जनतामनःशरव्यव्यधपटुमन्मथचापनादशङ्कां ॥ शिशुपालवधम् ७.२४ ॥ |
| श्रुतिमयतनोर्भानोर्जानेऽवनेरधराढ्वना विहरणकृतः शाखा साक्षाच्छतानि दश त्विषाम् । निशि निशि सहस्राभ्यां दृग्भिः शृणोति सहस्वराः पृथगहिपतिः पश्यत्यस्याक्रमेण च भास्वराः ॥ नैषधीयचरितम् १९.५२ ॥ |
| श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः सततमृषभहीनं भिन्नकीकृत्य षड्जं । प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः परिणतिमिति रात्रेर्मागधा माधवाय ॥ शिशुपालवधम् ११.१ ॥ |
| श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः । उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ॥ रघुवंशम् ८.३५ ॥ |
| श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः । अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥ किरातार्जुनीयम् १०.३८ ॥ |
| श्रुत्वा तन्व्या निशीथे नवघनरसितं विश्लथाङ्कं पतित्वा शय्यायां भूमिपृष्ठे करतलधृतया दुःखितालीजनेन । सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटाघातशीर्णाश्रुबिन्दु स्मृत्वा स्मृत्वा प्रियस्य स्खलितमृदुवचो रुद्यते पान्थबध्वा ॥ अमरुशतकम्-५५॥ |
| श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्तात्दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि । तस्मिन्नागत्य कण्ठग्रहणसरभसस्थायिनि प्राणनाथे भग्ना मानस्य चिन्ता भवति मम प्नर्वज्रमय्याः कदा नु ॥ अमरुशतकम्-५७॥ |
| श्रृङ्गारे च प्रसादे च कान्त्यर्थव्यक्तिसंग्रहः । अमी दश गुणाः काव्ये पुंसि शौर्यादयो यथा ॥ चन्द्रालोकः४.१० ॥ |
| श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् । सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ रघुवंशम् १.४१ ॥ |
| श्रोताभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः । ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥ रघुवंशम् २.७२ ॥ |
| श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन । विभाति कायः करुणापराणां, परोपकारैर्न तु चन्दनेन ॥ नीतिशतकम्७२ ॥ |
| श्रौतमार्गसुखगानकोविदब्रह्मषट्चरणगर्भमुज्ज्वलं । श्रीमुखेन्दुसविधेऽपि शोभते यस्य नाभिसरसीसरोरुहं ॥ शिशुपालवधम् १४.६९ ॥ |
| श्लक्ष्णं यत्परिहितमेतयोः किलान्तर्धानार्थं तदुकसेकसक्तमूर्वोः । नारीणां विमलतरौ समुल्लसन्त्या भासन्तर्दधतुरुरूदुकूलमेव ॥ शिशुपालवधम् ८.६५ ॥ |
| श्लथतां व्रजतस्तथा परेषामगदधारणाशक्तिमुज्झतः स्वां । सुगृहीतमपि प्रमदभाजां मनसः शास्त्रमिवामस्त्रमग्रपाणेः ॥ शिशुपालवधम् २०.३५ ॥ |
| श्लथशिरसिजपातभारादिव नितरां नतिमद्भिरंसभागैः । मुकुलितनयनैर्मुखारविन्दैर्घनमहतामिव पक्ष्मणां भरेण ॥ शिशुपालवधम् ७.६२ ॥ |
| श्लथैर्दलैः स्तम्भयुगस्य रम्भयोश्चकास्ति चण्डातकमण्डिता स्म सा । प्रियासखीवास्य मनःस्थितिस्फुरत्सुखागतप्रश्नितर्तूर्यनिःस्वना ॥ नैषधीयचरितम् १६.८ ॥ |
| श्लाघ्यः स एको भुवि मानवानां स उत्तमः सत्पुरुषः स धन्यः । यस्यार्थिनो वा शरणागता वा नाशाविभङ्गा विमुखाः प्रयान्ति ॥ नीतिसंग्रहस्य मित्र-१.१८३ ॥ |
| श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथश्चुम्बत्यस्मिन् वदनविधुतिः किं कृता किं न दृष्टः । नोक्तः कस्माद् इति नववधूचेष्टितं चिन्तयन्ती पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥ अमरुशतकम्-५६॥ |
| श्लिष्यतः प्रियवधूरुपकण्ठं तारकास्ततकरस्य हिमांशोः । उद्वमन्नभिरराज समन्तादङ्गराग इव लोहितरागः ॥ किरातार्जुनीयम् ९.२७ ॥ |
| श्लिष्यद्भिरन्योन्यमुखाग्रसङ्गस्खलत्खलीनं हरिभिर्विलोलैः । परस्परोत्पीडितजानुभागा यत्नेन निश्चक्रमुरश्ववाराः ॥ शिशुपालवधम् ३.६५ ॥ |
| श्लिष्यन्ति वाचो यदमूरमुष्याः कवित्वशक्तेः खलु ते विलासाः । भूपाललीलाः किल लोकपालाः समाविशन्ति व्यतिभेदिनोऽपि ॥ नैषधीयचरितम् १४.१६ ॥ |
| श्लेषादिभूर्विरोधश्चेद्विरोधाभासता मता । अप्यन्धकारिणाऽनेन जगदेतत्प्रकाश्यते ॥ चन्द्रालोकः ५.७५ ॥ |
| श्लेषो विघटमानार्थ-घटमानत्ववर्णनम् । स तु शाब्दः सजातीयैः शब्दैर्बन्धः सुखावहः ॥ चन्द्रालोकः४.१ ॥ |
| श्लोकस्यार्धे तदर्धे वा वर्णावृत्तिर्यदि ध्रुवा । तदा मता मतिमतां स्फुटानुप्रासता सताम् ॥ चन्द्रालोकः ५.५ ॥ |

| |
|---|
| श्लोकादिह प्रथमतो हरिणा द्वितीयाद्धूमध्वजेन शमनेन समं तृतीयात् । तुर्याच्च तस्य वरुणेन समानभावं सा जानती पुनरवादि तया विमुग्धा ॥ नैषधीयचरितम् १३.३२ ॥ |
| श्वगण्वागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः । स्थिरतुरंगमभूमि निपानवन्मृगवयोगवयोपचितं वनं ॥ रघुवंशम् ८.५३ ॥ |
| श्वश्रूः सितोऽर्कः श्वशुरस्तनुस्तनुर्जामित्रपः स्याद्दयितो मनः शशी । एतद्बलं सम्प्रतिभाव्य तान्त्रिकस्तेषां सुखं सम्प्रवदेद्विवाहतः ॥ मुहूर्त.विवाहप्रकरणम् ९३॥ |
| श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः । प्रजानिशेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति ॥ रघुवंशम् १४.६० ॥ |
| श्वश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीं । प्रासादवातायनदृश्यबन्धैः साकेतनार्योऽञ्जलिभिः प्रणेमुः ॥ रघुवंशम् १४.१३ ॥ |
| श्वश्रूविनाशमहिजौ सुतरां विधत्तः कन्याऽसुतौ निऋृतिजौ श्वशुरं हतश्च । ज्येष्ठाभजाततनया स्वधवाग्रजं च शक्राग्निजा भवति देवरनाशकर्त्री ॥ मुहूर्त.विवाहप्रकरणम् १९॥ |
| श्वसनचलितपल्लवाधरोष्ठे नवनिहितेर्ष्यमिवावधूनयन्ती । मधुसुरभिणि षट्पदेन पुष्पे मुख इव शाललतावधूश्चुचुम्बे ॥ किरातार्जुनीयम् १०.३४ ॥ |
| श्वस्तस्याः प्रियमाप्तुसुद्धुरधियो धाराः सृजन्त्या रयान्नम्रोन्नम्रकपोलपालिपुलकैर्वैतस्वतीरस्रुणः । चत्वारः प्रहराः स्मरार्तिभिरभूत्सापि क्षपा दुःक्षया तत्तस्यां कृपयाखिलैव विधिना रात्रिस्त्रियामा कृता ॥ नैषधीयचरितम् ९.१५८ ॥ |
| श्वैत्यशैत्यजलदैवतमन्त्रस्वादुताप्रमुदितां चतुरक्षीम् । वीक्ष्य मोघधृतसौरभलोभं घ्राणमस्य सलिलघ्रमिवासीत् ॥ नैषधीयचरितम् २१.१७ ॥ |
| षडशीत्याननं चापनृयुक्कन्याझषे भवेत् । तुलाजौ विषुवं विष्णुपदं सिंहालिगोघटे ॥ मुहूर्त.संक्रान्तिप्रकरणम् ४ ॥ |
| षड्टतवः कृपया स्वकमेककं कुसुममक्रमनन्दितनन्दनाः । ददति यद्भवते कुरुते भवान्धनुरिवैकमिषूनिव पञ्च तैः ॥ नैषधीयचरितम् ४.९३ ॥ |
| षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता । निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ नीतिसंग्रहस्य मित्र-१.३४ ॥ |
| षष्टिघ्नं गतभं भुक्तघघटीयुक्तं युगाहतम् । शराब्धिहृल्लब्धतोऽर्कशेषेऽवस्थाः क्रियाद्विधोः ॥ मुहूर्त.संक्रान्तिप्रकरणम् १४ ॥ |
| षष्ठादौ लभते हि भोगमतुलं तातात्सुखं पुष्टतां लक्ष्मीं सौख्यमथो जनौ सदशनो वोर्ध्वे स्वपित्रादिहा ॥ मुहूर्त.संस्कारप्रकरणम् १३॥ |
| षष्ठाष्टस्थः प्रश्नलग्नाद्यदीन्दुर्लग्ने क्रूरः सप्तमे वा कुजः स्यात् । मूर्ताविन्दुः सप्तमे तस्य भौमो रण्डा सा स्यादष्टसंवत्सरेण ॥ मुहूर्त.विवाहप्रकरणम् ४॥ |
| षष्ठ्यष्ठमीभूतविधुक्षयेषु नो सेवेत ना तैलपले क्षरं रतम् । नाभ्यञ्जनं विश्वदशद्विके तिथौ धात्रीफलैः स्नानममाद्रिगोष्वसत् ॥ मुहूर्तचिन्त.७ ॥ |
| षष्ठ्यादितिथयो मन्दाद्विलोमं प्रतिपदबुधे । सप्तम्यर्केऽधमाः षष्ट्याद्यामाश्च रदधावने ॥ मुहूर्तचिन्त.६ ॥ |
| स इन्द्रनीलस्थलनीलमूर्ती रराज कर्पूरपिशङ्गवासाः । विसृत्वरैरम्बुरुहां रजोभिर्यमस्वसुश्चित्र इवोदभारः ॥ शिशुपालवधम् ३.११ ॥ |
| स एकलिङ्गो भगवाञ्जयत्वलम् जयत्वलं भारत-मा महीयसी । प्रतापसिंहो विजयी जयत्वलं, जयत्वलं तदबलवत्तरं बलम् ॥ प्रतापविजयः-१०७ ॥ |
| स एवम् उक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् । अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥ रघुवंशम् ३.५२ ॥ |
| स कंचिदूचे रचयन्तु तेमनोपहारमत्राङ्गरुचेर्यथोचितम् । पिपासतः काश्चन सर्वतोमुखं तवार्पयन्तामपि काममोदनम् ॥ नैषधीयचरितम् १६.४९ ॥ |
| स कदाचिदवेषितप्रजः सह देव्या विजहार सुप्रजाः । नगरोपवने शचीसखो मरुतां पालयितेव नन्दने ॥ रघुवंशम् ८.३२ ॥ |
| स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत । जिघाय जम्बूजनितश्रियः श्रियं सुमेरुश्रृङ्गस्य तदा तदासनम् ॥ शिशुपालवधम् १.१९ ॥ |
| स कामरूपाधिप एष हा त्वया न कामरूपाधिक ईक्ष्यतेऽपि यः । त्वमस्य सा योग्यतमासि वल्लभा सुदुर्लभा यत्प्रतिमल्लभा परा ॥ नैषधीयचरितम् १२.७ ॥ |
| स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः । सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ॥ रघुवंशम् १४.३१ ॥ |
| स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः । सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥ किरातार्जुनीयम् १.५ ॥ |
| स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः । स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः ॥ रघुवंशम् ८.२० ॥ |
| स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् । शुश्राव कुञ्जेषु यशस्स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥ रघुवंशम् २.१२ ॥ |
| स कीलश्रमं अन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः । समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥ रघुवंशम् ८.१४ ॥ |
| स क्षत्त्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः । वहन्द्वयीं यद्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम् ॥ किरातार्जुनीयम् ३.४८ ॥ |
| स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षं । क्ष्मां लम्भयित्वा क्षमयोपपन्नं वने तपः क्षान्ततरश्चचार ॥ रघुवंशम् १८.९ ॥ |
| स खण्डनं प्राप्य परादमर्षवान्भुजद्वितीयोऽपि विजेतुं इच्छया । ससर्ज वृष्टिं परिरुग्णपादपां द्रवेतरेषां पयसां इवाश्मनां ॥ किरातार्जुनीयम् १७.६० ॥ |
| स गतः क्षितिं उष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा । असुभिः क्षणं ईक्षितेन्द्रसूनिर्विहितामर्षगुरुध्वनिर्निरासे ॥ किरातार्जुनीयम् १३.३१ ॥ |
| स गरुद्वनदुर्गदुर्ग्रहान्कटु कीटान्दशतः सतः क्वचित् । ननुदे तनुकण्डु पण्डितः पटुचञ्चूपुटकोटिकुट्टनैः ॥ नैषधीयचरितम् २.४ ॥ |
| स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्मान्तरितोरुपृष्ठम् । तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारुह्य कैलासमिव प्रतस्थे॥ कुमारसंभवम् ७.३७॥ |
| स ग्राम्यः स विदग्धसंसदि सदा गच्छत्यपाङ्क्तेयतां तं च स्प्रस्ष्टुमपि स्मरस्य विशिखा मुग्धे विगानोन्मुखाः । यः किं मध्विति नाधरं तव कथं हेमेति न त्वद्वपुः कीदृङ्नाम सुधेति पृच्छति न ते दत्ते गिरं चोत्तरम् ॥ नैषधीयचरितम् २१.१५९ ॥ |
| स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः । धर्मार्थकाममोक्षाणामवतार इवाङ्गभाक् ॥ रघुवंशम् १०.८५ ॥ |

| |
|---|
| स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् । उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ रघुवंशम् ५.५४ ॥ |
| स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमुलिः । ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे ॥ रघुवंशम् ७.६६ ॥ |
| स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः । महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ रघुवंशम् ३.६० ॥ |
| स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन । रामापरिताणविहस्तयोधं सेनानिवेशं तुमुलं चकार ॥ रघुवंशम् ५.४९ ॥ |
| स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः । अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ॥ रघुवंशम् ७.४३ ॥ |
| स जगाम विस्मयमुद्वीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः । प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रमं अपां पटलं ॥ किरातार्जुनीयम् ६.१५ ॥ |
| स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः । यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥ नैषधीयचरितम् २.१६ ॥ |
| स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं कपालं यस्योच्चैर्विनिहितमलङ्कारविधये । नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ पुरुषार्थोपदेशः-43॥ |
| स जातः कोऽप्यासीन्मदन-रिपुणा मूर्ध्नि धवलं कपालं यस्योच्चैर्विनिहितमलङ्कार-विधये। नृभिः प्राण-त्राण-प्रवण-मतिभिः कैश्चिदधुना नमद्भिः कः पुंसामयमतुल-दर्प-ज्वर-भरः॥॥ वैराग्यशतकम् ६० ॥ |
| स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते । दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥ रघुवंशम् ३.१८ ॥ |
| स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः । ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगां उपयतीः सरितः ॥ किरातार्जुनीयम् ६.१६ ॥ |
| स तत्कुचस्पृष्टकचेष्टिदोर्लताचलद्दलाभव्यजनानिलाकुलः । अवाप नानानलजालशृङ्खलानिबद्धनीडोद्भवविभ्रमं युवा ॥ नैषधीयचरितम् १६.६३ ॥ |
| स तत्र मञ्चेषु मनोज्ञवेषान्सिंहासनस्थानुपचारवस्तु । वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥ रघुवंशम् ६.१ ॥ |
| स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् । तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ॥ रघुवंशम् ८.९१ ॥ |
| स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमां । अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा मुनिः ॥ रघुवंशम् ८.८० ॥ |
| स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः । वोदोद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥ शिशुपालवधम्  १.२० ॥ |
| स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः । भयविप्लुतमीक्षितो नभःस्थैर्जगतीं ग्राह इवापगां जगाहे ॥ किरातार्जुनीयम् १३.२४ ॥ |
| स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्रम् । विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः ॥ रघुवंशम् १६.५५ ॥ |
| स तेजो वैश्नवं पत्न्योर्विभेजे चरुसंज्ञितं । द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपं ॥ रघुवंशम् १०.५५ ॥ |
| स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः । शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥ रघुवंशम् २.४० ॥ |
| स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे । द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थम् ॥ रघुवंशम् ५.२५ ॥ |
| स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद । दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥ रघुवंशम् २.४५ ॥ |
| स त्वनेकवनितासखोऽपि सन्पावनीमनवलोक्य संततिं । वैद्ययत्नपरिभाविनं गदं न प्रदीप इव वायुं अत्यगात् ॥ रघुवंशम् १९.५३ ॥ |
| स दक्षिणं तूण-मुखेन वामं व्यापारयन्हस्तमलक्ष्यताजौ । आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ॥ रघुवंशम् ७.५७ ॥ |
| स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् । ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ कुमारसंभवम् ३.७० ॥ |
| स दिवं समचिच्छदच्छरौघैः कृततिग्मद्युतिमण्डलापलापैः । ददृशेऽथ च तस्य चापयष्ट्यामिषुरेकैव जनैः सकृद्विसृष्टा ॥ शिशुपालवधम् २०.२८ ॥ |
| स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः । सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥ रघुवंशम् १.४८ ॥ |
| स धर्मराजः खलु धर्मशीलया त्वयास्ति चित्तातिथितामवापितः । ममापि साधुः प्रतिभात्ययं क्रमश्चकास्ति योग्येन हि योग्यसंगमः ॥ नैषधीयचरितम् ९.५६ ॥ |
| स धातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः । व्यलङ्घयद्विन्ध्यमुपायनानि पश्यन्पुलिन्दैरुपपादितानि ॥ रघुवंशम् १६.३२ ॥ |
| स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् । पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥ रघुवंशम् २.६९ ॥ |
| स नर्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले । निवेशयामास विलङ्घिताध्वा क्लान्तं रजोधूसरकेतु सैन्यम् ॥ रघुवंशम् ५.४२ ॥ |
| स निकामघर्मितमभीक्ष्णमधुवदवधूतराजकः । क्षिप्तबहुलजलबिन्दु वपुः प्रलयार्णवोत्थित इवादिशूकरः ॥ शिशुपालवधम् १५.५ ॥ |
| स निनाय नितान्तवत्सलः करणापायविभिन्नवर्णया । समलक्ष्यत बिभ्रदाविलां मृगलेखां उषसीव चन्द्रमाः ॥ रघुवंशम् ८.४२ ॥ |
| स निनाय नितान्तवत्सलः परिवृत्तप्रथमच्छविं क्षणात् । सलिलोद्धृतपद्मिनीनिभां दयितामङ्कमुदशुलोचनः ॥ रघुवंशम् ८.४१* ॥ |
| स निरायतकेतनांशुकान्तः कलनिक्वाणकरालकिङ्किणीकः । विरराज रिपुक्षयप्रतिज्ञामुखरो मुक्तशिखः स्वयं नु मृत्युः ॥ शिशुपालवधम् २०.४ ॥ |
| स नैषधस्यार्थपतेः सुतायां उत्पादयामास निषिद्धशत्रुः । अनूनसारं निषधान्नगेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव ॥ रघुवंशम् १८.१ ॥ |
| स नौविमानादवतीर्य रेमे विलोलहारः सह ताभिरप्सु । स्कन्धावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेन्द्रः ॥ रघुवंशम् १६.६८ ॥ |

| |
|---|
| स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः । आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥ रघुवंशम् २.७ ॥ |
| स परार्ध्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः । शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् ॥ रघुवंशम् ८.२७ ॥ |
| स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि । ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥ रघुवंशम् २.१७ ॥ |
| स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श । अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ रघुवंशम् २.२९ ॥ |
| स पिङ्गाक्षः श्रीमान्भुवनमहनीयेन महसा तनुं भीमां बिभ्रत्त्रिगुणपरिवारप्रहरणः । परीत्येशानं त्रिः स्तुतिभिरुपगीतः सुरगणैः सुतं पाण्डोर्वीरं जलदं इव भास्वानभिययौ ॥ किरातार्जुनीयम् १८.४५ ॥ |
| स पिशङ्गजटावलिः किरन्नुरुतेजः परमेण मन्युना । ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते ॥ किरातार्जुनीयम् १५.४७ ॥ |
| स पूर्वजन्मान्तरदृष्टपाराः स्मरन्निवाक्लेशकरो गुरूणां । तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥ रघुवंशम् १८.५० ॥ |
| स पूर्वजानां कपिलेन रोषाद्भस्मावशेषीकृतविग्रहाणां । सुरालयप्राप्तिनिमित्तमम्भस्त्रैस्रोतसं नौलुलितं ववन्दे ॥ रघुवंशम् १६.३४ ॥ |
| स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः । पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ॥ रघुवंशम् ३.४२ ॥ |
| स पूर्वतः पर्वतपक्षशातनं हरिं विदित्वा हरिभिश्च वाजिभिः । अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ॥ रघुवंशम् ३.४३ ॥ |
| स पौरकार्याणि समीक्ष्य काले रेमे विदेहाधिपतेर्दुहित्रा । उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या ॥ रघुवंशम् १४.२४ ॥ |
| स प्रध्वनय्याम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिशृङ्गं । बलानि शम्भोरिषुभिस्तताप चेतांसि चिन्ताभिरिवाशरीरः ॥ किरातार्जुनीयम् १७.१० ॥ |
| स प्रयुज्य तनये महीपतेरात्मजातिसदृशीं किलानतिं । सान्त्वपूर्वमभिनीतिहेतुकं वक्तुं इत्थमुपचक्रमे वचः ॥ किरातार्जुनीयम् १३.३६ ॥ |
| स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्तात्। पुरो विलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः॥ कुमारसंभवम् ७.५०॥ |
| स प्रीतियोगाद्विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य । प्रावेशयन्मन्दिरमृद्धमेन मागुल्फकीर्णापणमार्गपुष्पम्॥ कुमारसंभवम् ७.५५॥ |
| स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः । न तु भीतपरित्राणवस्तूपालम्भपण्डितः ॥ नीतिसंग्रहस्य मित्र-१.३१ ॥ |
| स बभार रणापेतां चमूं पश्चादवस्थितां । पुरः सूर्यादुपावृत्तां छायामिव महातरुः ॥ किरातार्जुनीयम् १५.३३ ॥ |
| स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः । पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ॥ रघुवंशम् ८.४ ॥ |
| स बालः आसीद्वपुष चतुर्भुजो मुखेन पूर्णेन्दुरुचिस्त्रिलोचनः । युवा कराक्रान्तमहीभृच्चकैरसंशयं संप्रति तेजसा रविः ॥ शिशुपालवधम् १.७० ॥ |
| स बिभर्ति भीषणभुजंगभुजः पृथि विद्विषां भयविधायि धनुः । अमलेन तस्य धृतसच्चरिताश्चरितेन चातिशयिता मुनयः ॥ किरातार्जुनीयम् ६.३२ ॥ |
| स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः सहार्थं । रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः ॥ किरातार्जुनीयम् १३.१९ ॥ |
| स भिन्नमर्मापि तदर्तिकाकुभिः स्वदूतधर्मान्न विरन्तुमैहत । शनैरशंसन्निभृतं विनिश्वसन्विचित्रवाक्चित्रशिखाण्डनन्दनः ॥ नैषधीयचरितम् ९.७३ ॥ |
| स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे । न हीतरस्माद्घटते यदेत्य स्वयं तदाप्तिप्रतिभूर्ममाभूः ॥ नैषधीयचरितम् ३.८९ ॥ |
| स भोगसंघः शममुग्रधाम्नां सैन्येन निन्ये विनतासुतानां । महाध्वरे विध्यपचारदोषः कर्मान्तरेणेव महोदयेन ॥ किरातार्जुनीयम् १६.४८ ॥ |
| स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः । निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ किरातार्जुनीयम् ४.१७ ॥ |
| स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः । अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥ कुमारसंभवम् ३.२३॥ |
| स मृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः । श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥ रघुवंशम् ५.२ ॥ |
| स मौलरक्षोहरिमिश्रसैन्यस्तूर्यस्वनानन्दितपौरवर्गः विवेष सौधोद्गतलाजवर्षां उत्तोरणामन्वयराजधानीं ॥ रघुवंशम् १४.१० ॥ |
| स ययौ धुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्विभावनः । विततीकृतनिश्चलच्छदः क्षणमालोककदत्तकौतुकः ॥ नैषधीयचरितम् २.६८ ॥ |
| स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः । मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥ किरातार्जुनीयम् १.२२ ॥ |
| स- रक्तमांसाञ्चितसद्वसुन्धरा- निरीक्षणे हाऽक्षमतामुपागतः । कुयुद्धतः पूर्वमहो महोनिधिः निमीलिताक्षः सहसाऽभवद्रविः ॥ प्रतापविजयः-११३ ॥ |
| स राजलोकः कृतपूर्वसंविदारम्भसिद्धौ समयोपलभ्यम् । आदास्यमानः प्रम्दामिषं तदावृत्य पन्थानमजस्य तस्थौ ॥ रघुवंशम् ७.३१ ॥ |
| स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः स्मृतावाविर्भूतं त्वयि सुदि दृष्टे तदखिलम् । विपाके घोरेऽस्मिन्न खलु न विमूढा तव सखी पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥ (उत्तररामचरितम् ४.१२) |
| स रोषदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेका भृकुटीर्वहद्भिः । तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ॥ रघुवंशम् ७.५८ ॥ |
| स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्तिः । सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ॥ रघुवंशम् १४.४४ ॥ |
| स ललितकुसुमप्रवालशय्यां ज्वलितमहौषधिदीपिकासनाथां । नरपतिरतिवाहयां बभूव क्वचिदसमेतपरिच्छदस्त्रियामां ॥ रघुवंशम् ८.७० ॥ |

| |
|---|
| स वमन्नृषाश्रु घनघर्मविगलदुरुगण्डमण्डलः । स्वेदजलकणकरालकरो व्यरुचत्प्रभिन्न इव कुञ्जरस्त्रिधा ॥ शिशुपालवधम् १५.४ ॥ |
| स वासवेनासनसंनिकृष्टमितो निषीदेति विसृष्टभूमिः । भर्तुः प्रसादं प्रतिनन्द्य मूर्धा वक्तुं मिथः प्राक्रमतैवमेनम् ॥ कुमारसंभवम् ३.२॥ |
| स विकचोत्पलचक्षुषमैक्षत क्षितिभृतोऽङ्गगतां दयितामिव । शरदमच्छगलद्वसनोपमाक्षमधनामघनाशनकीर्तनः ॥ शिशुपालवधम् ६.४२ ॥ |
| स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः । स्फुरत्प्रभामण्डलमध्यवर्ति कान्तं वपुर्व्योमचरं प्रपेदे ॥ रघुवंशम् ५.५१ ॥ |
| स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः । परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखाश्रुषु ॥ रघुवंशम् ८.७४ ॥ |
| स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः । लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥ रघुवंशम् ३.२८ ॥ |
| स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयं । लघु साधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः ॥ किरातार्जुनीयम् १३.२८ ॥ |
| स वेलावप्रवलयां परिखीकृतसागराम् । अनन्याशासनामूर्वी शशासैकपुरीमिव ॥ रघुवंशम् १.३० ॥ |
| स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप । संप्रतीर्य भवसिन्धुमनादिं ब्रह्म शर्मभरचारु यतीव ॥ नैषधीयचरितम् ५.८ ॥ |
| स व्याप्तवत्या परितोऽपथान्यपि स्वसेनया सर्वपथीनया तया । अम्भोभिरुल्लङ्घित तुङ्गरोधसः प्रतीपनाम्नीः कुरुते स्म निम्नगाः ॥ शिशुपालवधम् १२.५७ ॥ |
| स व्रीहिणां यावदपासितुं गताः शुकान्मृगैस्तावदुपद्रुतश्रियां । कैदारिकाणामभितः समाकुलाः सहासमालोकयति स्म गोपिकाः ॥ शिशुपालवधम् १२.४२ ॥ |
| स शापो न त्वया राजन्न च सारथिना श्रुतः । नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ रघुवंशम् १.७८ ॥ |
| स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् । प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥ रघुवंशम् १४.४६ ॥ |
| स संनिपात्यावरजान्हतौजास्तद्विक्रियादर्शनलुप्तहर्षान् । कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यं ॥ रघुवंशम् १४.३६ ॥ |
| स संबन्धी श्लाघ्यः प्रियसुदसौ तच्च हृदयं स चानन्दः साक्षादपि च निखिलं जीवितफलम् । शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं महाराजः श्रीमान् किमपि मम नासीद्दशरथः ॥ (उत्तररामचरितम् ४.१३) |
| स समुद्धरता विचिन्त्य तेन स्वरुचं कीर्तिमिवोत्तमां दधानः । अनुयुक्त इव स्ववार्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्यां ॥ किरातार्जुनीयम् १३.३४ ॥ |
| स सम्चरिष्णुर्भुवनान्तराणि यां यदृच्छयाशिश्रियदाश्रयः श्रियः । अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसं।ध्यं त्रिदशैर्दिशे नमः ॥ शिशुपालवधम्  १.४६ ॥ |
| स सम्प्रधार्यैवमहार्यसारः सारं विनेष्यन्सगणस्य शत्रोः । प्रस्वापनास्त्रं द्रुतमाजहार ध्वान्तं घनानद्ध इवार्धरात्रः ॥ किरातार्जुनीयम् १६.२५ ॥ |
| स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन । शशीव दोषावृतलोचनानां विभिद्यमानः पृथगाबभासे ॥ किरातार्जुनीयम् १७.२१ ॥ |
| स सासिः सासुसूः सासो येयायेयाययाययः । ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन् ॥ किरातार्जुनीयम् १५.५ ॥ |
| स सिन्धुजं शीतमहःसहोदरं हरन्तमुच्चैःश्रवसः श्रियं हयम् । जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ॥ नैषधीयचरितम् १.६४ ॥ |
| स स्वयं चरणरागमादधे योषितं न च तथा समाहितः । लोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितम्बिभिः ॥ रघुवंशम् १९.२६ ॥ |
| स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः । नर्तकीरभिनयातिलङ्घिनीः पार्श्ववर्तिषु गुरुष्वलज्जवत् ॥ रघुवंशम् १९.१४ ॥ |
| स स्वहस्तकृतचिह्नशासनः पाकशासनसमानशासनः । आशशाङ्कतपनार्णवस्थितोर्विप्रसादकृत भूयसीर्भुवः ॥ शिशुपालवधम् १४.३६ ॥ |
| स हन्ति हन्त कान्तारे कान्तः कुटिलकुन्तलः । निहतार्थं लोहितादौ शोणितादिप्रयोगतः ॥ चन्द्रालोकः२.४ ॥ |
| स हि गगनविहारी कल्मषध्वंसकारी दशशतकरधारी ज्योतिषां मध्यचारी । विधुरपि विधियोगाद्ग्रस्यते राहुणासौ लिखितमपि ललाटे प्रोज्झितं कः समर्थः  ॥ नीतिसंग्रहस्य मित्र-१.२१ ॥ |
| स हिन्दुहा हिन्दुभिरेव सन्ततं, विधाय सङ्ग बलतश्च लोभतः । तदीयकन्याजन-सङ्गमाकुलः, चकार तांस्तानखिलान् पदश्रितान् ॥ प्रतापविजयः-४७॥ |
| संकथेच्छुरभिधातुमनीशा संमुखी न च बभूव दिदृक्षुः । स्पर्शनेन दयितस्य नतभ्रूरङ्गचपलापि चकम्पे ॥ शिशुपालवधम् १०.४१ ॥ |
| संकल्पं द्विरदगणं वरूथिनस्तुरङ्गिणो जयनयुजश्च वाजिनः । त्वरायुजः स्वयमपि कुर्वतो नृपाः पुनः पुनस्तदधिकृतानतत्वरन् ॥ शिशुपालवधम् १७..२३ ॥ |
| संकीर्णकीचकवनस्खलितैकवाल- विच्छेदकातरधियश्चलितुं चमर्यः । अस्मिन्मृदुश्वसनगर्भतदीयरन्ध्र- र्यत्स्वनश्रुतिसुखादिव नोत्सहन्ते ॥ शिशुपालवधम् ४.४३॥ |
| संक्रान्तं प्रियतमवक्षसोऽङ्गरागंसाध्वस्याः सरसि हरिष्यतेऽधुनाम्भः । तुष्ट्वैवं सपदि हृतेऽपि तत्र तेपे कस्यश्चित्स्फुटनखलक्ष्मणः सपत्न्या ॥ शिशुपालवधम् ८.४१ ॥ |
| संक्रान्तचन्दनरसाहितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रं । बद्धोर्मि नाकवनितापरिभुक्तमुक्तं सिन्धोर्बभार सलिलं शयनीयलक्ष्मीं ॥ किरातार्जुनीयम् ८.५७ ॥ |
| संक्रान्तिकालादुभयत्र नाडिकाः पुण्या मताः षोडशषोडशोष्णगोः । निशीथतोऽर्वागपरत्र सङ्क्रमे पूर्वापराहान्तिमपूर्वभागयोः ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ५ ॥ |
| संक्रान्तियातघस्रादयैर्मतिर्निघ्नी खषट्-६० हृता । लब्धेनांशादिना योज्यं यातर्क्षे स्पष्टभास्करः ॥ मुहूर्त.विवाहप्रकरणम् १०३॥ |
| संक्रीडन्ती तेजिताश्वस्य रागादुद्यम्यारामग्रकायोत्थितस्य । रंहोभाजामक्षधूः स्यन्दनानां हाहाकारं प्राजितुः प्रत्यनन्दत् ॥ शिशुपालवधम् १८.७ ॥ |
| संक्षिप्येरन्क्षण इव कथं दीर्घयामास्त्रियामाः सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ मेघदूतम्, उत्तरमेघः ४२ ॥ |

| |
|---|
| संक्षोभं पयसि मुहुर्महेभकुम्भश्रीभाजा कुचयुगलेन नीयमाने । विश्लेषं युगमगमद्रथाङ्गनाम्नोरुद्वृत्तः क इव सुखावहः परेषां ॥ शिशुपालवधम् ८.१७ ॥ |
| संख्यविक्षततनुस्रवदस्रुक्षालिताखिलनिजाघलघूनाम् । यत्त्विहानुपगमः शृणु राज्ञां तज्जगद्युवमुदं तमुदन्तम् ॥ नैषधीयचरितम् ५.२५ ॥ |
| संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता- वत्रैकस्मिन् कवचनिचितैर्नद्धचर्मोत्तरीये । कालज्येष्ठैरपरवयसि ख्यातिकामैर्भवद्भि- र्योऽयं बद्धो युधि समभरस्तेन धिग्वो धिगस्मान् ॥ (उत्तररामचरितम् ५.१२) |
| संगताभिरुचितैश्चलितापि प्रागमुच्यत चिरेण सखीव । भूय एव समगंस्त रतान्ते ह्रीवधूभिरसहा विरहस्य ॥ शिशुपालवधम् १०.८१ ॥ |
| संगमाय निशि गूढचारिणं चारदूतिकथितं पुरो गताः । वञ्चयिष्यसि कुतस्तमोवृतः कामुकेति चकृषुस्तमङ्गनाः ॥ रघुवंशम् १९.३३ ॥ |
| संग्रामनिर्विष्टसहस्रबाहुरष्टदासद्वीपनिखातयूपः । अनन्यसाधारणराजशब्दो बभूव योगी किल कार्तवीर्यः ॥ रघुवंशम् ६.३८ ॥ |
| संग्रामभूमीषु भवत्यरीणामस्रैर्नदीमातृकतां गतासु । तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ॥ नैषधीयचरितम् ३.३८ ॥ |
| संघट्टयन्त्यास्तरसात्मभूषाहीराङ्कुरप्रोतदुकूलहारी । दिशा नितम्बं परिधाप्य तन्व्यास्तत्पापसंतापमवाप भूपः ॥ नैषधीयचरितम् ६.२८ ॥ |
| संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा । नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥ रघुवंशम् ६.६७ ॥ |
| संचीयतामाश्रुतपालनोत्थं मत्प्राणविश्राणनजं च पुण्यम् । निवार्य्यतामार्य वृथा विशङ्का भद्रेऽपि मुद्रेयमये भृशं का ॥ नैषधीयचरितम् ३.८३ ॥ |
| संजहार सहसा परिरब्धप्रेयसीषु विरहय्य विरोधं । संहितं रतिपतिः स्मितभिन्नक्रोधमाशु तरुणेषु महेषुं ॥ शिशुपालवधम् १०.४४ ॥ |
| संज्ञाप्य नः स्वध्वजभृत्यवर्गान्दैत्यारिरत्यब्जुनलास्यनुत्यै । तत्संकुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ॥ नैषधीयचरितम् ३.३४ ॥ |
| संततं निशमयन्त उत्सुका यैः प्रयान्ति मुदमस्य सूरयः । कीर्तितानि हसितेऽपि तानि यं व्रीडयन्ति चरितानि मानिनं ॥ किरातार्जुनीयम् १३.४७ ॥ |
| संतानकमयी वृष्टिर्भवने चास्य पेतुषी । समङ्गलोपचाराणां सैवादिरचनाभवत् ॥ रघुवंशम् १०.७८ ॥ |
| संतानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम् । भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरं स्वर्ग इवाबभासे॥ कुमारसंभवम् ७.३॥ |
| संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा । दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोऽपभुङ्क्ष्वेऽति तमादिदेश ॥ रघुवंशम् २.६५ ॥ |
| संतानार्थाय विधये स्वभुजादवतारिता । तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥ रघुवंशम् १.३४ ॥ |
| संदष्टवस्त्रेष्वबलानितम्बेष्विन्दुप्रकाशान्तरितोडुकल्पाः । अमी जलापूरितसूत्रमार्गा मौनं भजन्ते रशनाकलापाः ॥ रघुवंशम् १६.६५ ॥ |
| संदानान्तादस्त्रिभिः शिक्षितास्त्रैरविश्याधः शातशस्त्रावलूनाः । कूर्मौपम्यं व्क्तमन्तर्नदीनामैभाः प्रापन्नङ्घ्रयोऽसृङ्मयीनां ॥ शिशुपालवधम् १८.७१ ॥ |
| संध्यावशेषे धृतताण्डवस्य चण्डीपतेः पत्पतनाभिघातात् । कैलासशैलस्फटिकाश्मखण्डैरमण्डि पश्योत्पतयालुभिर्द्यौः ॥ नैषधीयचरितम् २२.१६ ॥ |
| संध्यासरागः ककुभो विभागः शिवाविवाहे विभुनायमेव । दिग्वाससा पूर्वमवैमि पुष्पसिन्दूरिकापर्वणि पर्यधायि ॥ नैषधीयचरितम् २२.१ ॥ |
| संनिबद्धमपहर्तुमहार्यं भूरि दुर्गतिभयं भुवनानां । अद्भुताकृतिमिमामतिमायस्त्वं बिभर्षि करुणामय मायां ॥ किरातार्जुनीयम् १८.३० ॥ |
| संपदस्तवगिरामपि दूरा यन्न नाम विनयं विनयन्ते । श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः ॥ नैषधीयचरितम् ५.२२ ॥ |
| संपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् । सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां प्रतिपथगतिरासीद्वेगदीर्घी/कृताङ्गः ॥ कुमारसंभवम् ३.७६॥ |
| संप्रति प्रतिमुहूर्तमपूर्वा कापि यौवनजवेन भवन्ती । आशिखं सुकृतसारभृते सा क्वापि यूनि भजते किल भावम् ॥ नैषधीयचरितम् ५.२७ ॥ |
| संप्रवेष्टुमिव योषित ईषुः श्लिष्यतां हृदयमिष्टतमानां । आत्मनः सततमेव तदन्तर्वर्तिनो न खलु नूनमजानन् ॥ शिशुपालवधम् १०.४८ ॥ |
| संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते । तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ॥ रघुवंशम् २.५८ ॥ |
| संबन्धिराज्यमिदमेत्य महान् प्रहर्षः स्मृत्वा पुनर्नृपसुतानिधनं विषादः । किं नाम दैव! भवता न कृतं यदि स्याद् राज्यं परैरपहृतं कुशलं च देव्याः ॥ (स्वप्नवासवदत्तम् ६. ५) |
| संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये । वृन्दावने चैत्ररथादनूने निर्विश्यतां सुन्दरि युवनश्रीः ॥ रघुवंशम् ६.५० ॥ |
| संभाषणं भगवती सदृशं विधाय वाग्देवता विनयवन्धुरकंधरायाः । ऊचे चतुर्दशजगज्जनतानमस्या तन्नाश्रिता सदसि दक्षिणपक्षमस्याः ॥ नैषधीयचरितम् ११.७ ॥ |
| संभाष्य त्वामतिभ्रक्षमस्कन्धं सुबान्धवः । सहायमध्वरधुरं धर्मराजो विवक्षते ॥ शिशुपालवधम्  २.१०३ ॥ |
| संभुज्यमानाद्य मया निशान्ते स्वप्नेऽनुभूता मधुराधरेयम् । असीमलावण्यरदच्छदेत्थं कथं मयैव प्रतिपद्यते वा ॥ नैषधीयचरितम् ७.४२ ॥ |
| संमूर्छतां रजतभित्तिमयूखजालैरालोकपादपलतान्तरनिर्गतानाम् । घर्मद्युतेरिह मुहुः पटलानि धाम्नामादर्शमण्डलनिभानि समुल्लसन्ति ॥ किरातार्जुनीयम् ५.४१ ॥ |
| संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन । प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ॥ रघुवंशम् ५.५६ ॥ |
| संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रं । गान्धर्वमाधत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ॥ रघुवंशम् ५.५७ ॥ |
| संरम्भवेगोज्झितवेदनेषु गात्रेषु बाहिर्यमुपागतेषु । मुनेर्बभूवागणितेषुराशेर्लौहस्तिरस्कार इवात्ममन्युः ॥ किरातार्जुनीयम् १७.४९ ॥ |
| संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः । अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ॥ रघुवंशम् २.४३ ॥ |

| |
|---|
| संलापितानां मधुरैर्वचोभिर् मिथ्योपचारैश्च वशीकृतानाम् । आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥ नीतिसंग्रहस्य मित्र-१.७९ ॥ |
| संवाता मुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिं । पर्यस्यत्पृथुमणिमेखलांशुजालं संजज्ञे युतकमिवान्तरीयं ऊर्वोः ॥ किरातार्जुनीयम् ७.१४ ॥ |
| संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः । यामिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः ॥ किरातार्जुनीयम् ९.३२ ॥ |
| संशयाय दधतोः सरूपता दूरभिन्नफलयोः क्रियां प्रति । शब्दशासनविदः समासयोर्विग्रहं व्यवससुः स्वरेण ते ॥ शिशुपालवधम् १४.२४ ॥ |
| संशुद्धे मृतिभवने त्रिकोणकेन्द्रव्त्र्यायस्थैः शुभखचरैः कवीज्यलग्ने । पापाख्यैररिसहजायगेहसंस्थैर्लग्नस्थे त्रिदशगुरौ शुभावहः स्यात् ॥ मुहूर्त.संस्कारप्रकरणम् २५॥ |
| संसर्पिभिः पयसि गैरिकरेणुरागैरम्भोजगर्भरससाङ्गनिषङ्गिणा च । क्रीडोपभोगमनुभूय सरिन्महेभावन्योन्यवस्त्रपरिवर्तमिव व्यधत्ताम् ॥ शिशुपालवधम् ५.३९ ॥ |
| संसारविषयवृक्षस्य द्वे एव रसवत्फले । काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह ॥ नीतिसंग्रहस्य मित्र-१.१४६ ॥ |
| संसारसिन्धावनुबिम्बमत्र जागर्ति जाने तव वैरसेनिः । बिम्बानुबिम्बौ हि विहाय धातुर्न जातु दृष्टातिसरूपसृष्टिः ॥ नैषधीयचरितम् ८.४६ ॥ |
| संसिद्धाविति करणीयसंनिबद्धैरालापैः पिपतिषतां विलङ्घ्य वीथीं । आसेदे दशशतलोचनध्वजिन्या जीमूतैरपिहितसानुरिन्द्रकीलः ॥ किरातार्जुनीयम् ७.१७ ॥ |
| संसेवन्ते दानशीला विमुक्त्य सम्पश्यन्तो जन्मदुःखं पुमांसः । यन्निःसङ्गस्त्वं फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यं ॥ किरातार्जुनीयम् १८.२४ ॥ |
| संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु । जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थं इवाशशंसे ॥ किरातार्जुनीयम् १७.६ ॥ |
| संस्पर्शसुखोपचीयमाने सर्वाङ्गे करतललग्नवल्लभायाः । कौशेयं व्रजदपि गाढतामजस्रं सस्रंसे विगलितनीवि नीरजाक्ष्याः ॥ शिशुपालवधम् ८.६ ॥ |
| संहतास्तु हरन्त्येते मम जालं विहङ्गमाः । यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥ नीतिसंग्रहस्य मित्र-१.३७ ॥ |
| संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि । तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ नीतिसंग्रहस्य मित्र-१.३६ ॥ |
| संहत्या सात्वतां चैद्यं प्रति भास्वरसेनया । ववले योद्धुमुत्पन्नप्रतिमा स्वरसेन या ॥ शिशुपालवधम् १९.४२ ॥ |
| संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दम् । बभौ स भिन्दन्बृहतस्तरङ्गान्वार्यर्गलाभङ्ग इव प्रवृत्तः ॥ रघुवंशम् ५.४५ ॥ |
| सकलमपि निकामं कामलोलान्यनारीरतिरभसविमर्दैर्भिन्नवत्यङ्गरागे । इदमतिमहदेवाश्चर्यमाश्चर्यधाम्नस्तव खलु मुखरागो यन्न भेदं प्रयातः ॥ शिशुपालवधम् ११.३१ ॥ |
| सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः । विरहिणीगणचर्वणसाधनं विधुरतो द्विजराज इति श्रुतिः ॥ नैषधीयचरितम् ४.७२ ॥ |
| सकलापिहितस्वपौरुषो नियतव्यापदवर्धितोदयः । रिपुरुन्नतधीरचेतसः सततव्याधिरनीतिरस्तु ते ॥ शिशुपालवधम् १६.११ ॥ |
| सकले च तत्र गृहमागते हरौ नगरेऽप्यकालमहमादिदेश सः । सततोत्सवं तदिति नूनन्मुन्मुदो रभसेन विस्मृतमभून्महीभृतः ॥ शिशुपालवधम् १३.६७ ॥ |
| सकलैर्वपुः सकलदोषसमुदितमिदं गुणैस्तव । त्यक्तमपगुण गुणस्त्रितयत्यजनप्रयासमुपयासि किं मुधा ॥ शिशुपालवधम् १५.३२ ॥ |
| सकारनानारकास कायसाददसायका । रसाहवावाहसार नादवाददवादना ॥ शिशुपालवधम् १९.२७ ॥ |
| सकुङ्कुमैरविरलमम्बुबिन्दुभिर्गवेषणः परिणतदाडिमारुणैः । स मत्सरस्फुटितवपुर्विनिःसृतैर्बभौ चिरं निचित इवासृजां लवैः ॥ शिशुपालवधम् १७..१४ ॥ |
| सकौतुकागारमगात्पुरंध्रिभिः सहस्ररन्ध्रीकृतमीक्षितुं ततः । अधात्सहस्राक्षतनुत्रमित्रतामधिष्ठितं यत्खलु जिष्णुनाम्ना ॥ नैषधीयचरितम् १६.४६ ॥ |
| सक्तिं लवादपनयत्यनिले लतानां वैरोचनैर्द्विगुणिताः सहसा मयूखैः । रोधोभुवां मुहुरमुत्र हिरण्मयीनां भासस्तडिद्विलसितानि विडम्बयन्ति ॥ किरातार्जुनीयम् ५.४६ ॥ |
| सखा यदस्मै किल भीमसंज्ञया स यक्षसख्याधिगतं ददौ भवः । ददौ तदेष श्वशुरः सुरोचितं नलाय चिन्तामणिदाम कामदम् ॥ नैषधीयचरितम् १६.१६ ॥ |
| सखि जरां परिपृच्छ तमः शिरः सममसौ दधतापि कबन्धताम् । मगधराजवपुर्दलयुग्मवत्किमिति न व्यतिसीव्यति केतुना ॥ नैषधीयचरितम् ४.६९ ॥ |
| सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता । हृदयमहृदया न नाम पूर्वं भवदुपकण्ठं उपागतं विवेद ॥ किरातार्जुनीयम् १०.४७ ॥ |
| सखी तदीया तमुवाच वर्णिनं निबोध साधो! तव चेत्कुतूहलम् । यदर्थमम्भोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः ॥ कुमारसंभवम् ५.५२ ॥ |
| सखीं नलं दर्शयमानयाङ्कतो जवादुदस्तस्य करस्य कङ्कणे । विषज्य हारैस्त्रुटितैरतर्कितैः कृतं कयापि क्षणलाजमोक्षणम् ॥ नैषधीयचरितम् १५.८१ ॥ |
| सखीं प्रति स्माह युवेङ्गितेक्षिणी क्रमेण तेऽयं क्षमते न दित्सुताम् । विलोम तद्व्यञ्जनमर्प्यते त्वया वरं किमस्मै न नितान्तमर्थिने ॥ नैषधीयचरितम् १६.९७ ॥ |
| सखीजनं प्रेम गुरूकृतादरं निरीक्षमाणा इव नम्रमूर्तयः । स्थिरद्विरेफाञ्जनशरितोदरैर्विसारिभिः पुष्पविलोचनैर्लताः ॥ किरातार्जुनीयम् ८.११ ॥ |
| सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः । स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥ किरातार्जुनीयम् १.१० ॥ |
| सखीशतानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्तीम् । विलोकयामास सभां स भैम्यास्तस्य प्रतोलीमणिवेदिकायाम् ॥ नैषधीयचरितम् ६.५८ ॥ |
| सखे धन्याः केचित्त्रुटित-भव-बन्ध-व्यतिकरा वनान्ते चित्तान्तर्-विषमविषयाशीत-विष-गताः। शरच्-चन्द्र-ज्योत्स्नाधवल-गगनाभोग-सुभगां नयन्ते ये रात्रिं सुकृत-चय-चिन्तैक-शरणाः॥॥ वैराग्यशतकम् ३९ ॥ |
| सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च । प्राचीनाचलचूडाग्रचुम्बिबिम्बे सुधाकरे ॥ चन्द्रालोकः ५.५२ ॥ |
| सङ्क्रान्तिधिष्ण्याधरधिष्ण्यतस्त्रिभे स्वभे निरुक्तं गमनं ततोऽङ्गभे । सुखं त्रिभे पीडनमङ्गभेऽशुकं त्रिभेऽर्थहानी रसभे घनागमः ॥ मुहूर्त.संक्रान्तिप्रकरणम् १८ ॥ |

| |
|---|
| सङ्गं नैव हि कश्चिदस्य कुरुते संभाषते नादरात् संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते। दुरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम्॥ (मृच्छकटिकम् १.३७) |
| सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम् । विशन्नपि रवेर्मध्यं शीत एव सदा शशी ॥ चन्द्रालोकः ५.१०५ ॥ |
| सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणि ताभिः । क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि ॥ किरातार्जुनीयम् १०.७ ॥ |
| सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लतानां । व्यवहितरतिविग्रहैर्वितेने जलगुरुभिः स्तनितैर्दिगन्तरेषु ॥ किरातार्जुनीयम् १०.१९ ॥ |
| सजलाम्बुधरारवानुकारी ध्वनिरापूरितदिङ्मुखो रथस्य । प्रगुणीकृतकेकमूर्ध्वकण्ठैः शितिकण्ठैरुपकर्णयाम्बभूवे ॥ शिशुपालवधम् २०.५ ॥ |
| सज्जनोऽसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते । वारिधीनिव युगान्तवायवः क्षोभयन्त्यनिभृता गुरूनपि ॥ किरातार्जुनीयम् १३.६६ ॥ |
| सज्यं धनुर्वहति योऽहिपतिस्थवीयः स्थेयाञ्जयन्हरितुरङ्गमकेतुलक्ष्मीं । अस्यानुकूलय मतिं मतिमन्ननेन सख्या सुखं समभियास्यसि चिन्तितानि ॥ किरातार्जुनीयम् १३.७१ ॥ |
| सञ्चार-चारु- चिकुराऽचितमाननन्ते, विस्मारितेऽपि न हि विस्मृतिमेति मातः ! । संवीक्ष्य यदुचिरतां गगनेऽपि चन्द्रो, मन्दोऽभवत्सकलया कलयाऽन्वितोऽपि ॥ प्रतापविजयः-११ ॥ |
| सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् । प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥ रघुवंशम् २.१५ ॥ |
| सञ्जग्माते तावपायनपेक्षौ सेनाम्भोधी धीरनादौ रयेण । पक्षच्छेदात्पूर्वमेकत्र देशे वाञ्छन्तौ वा विन्ध्यसह्यौ निलेतुं ॥ शिशुपालवधम् १८.१ ॥ |
| सञ्जितानि सुरभीण्यथ यूनामुल्लसन्नयनवारिरुहाणि । आयुषः शुघटितानि सुरायाः पात्रतां प्रियतमावदनानि ॥ शिशुपालवधम् १०.१ ॥ |
| सटच्छटाभिन्नधनेन बिभ्रता नृसिंह सैंहीमतनुं तनुं त्वया । स मुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः ॥ शिशुपालवधम् १.४७ ॥ |
| सततमनभिभाषणं मया ते परिणमितं भवतीमनानयन्तया । त्वयि तदिति विरोधनिश्चितायां भवति भवत्वसुहृज्जनः सकामः ॥ शिशुपालवधम् ७.९ ॥ |
| सतीमुमामुद्वहता च पुष्पसिन्दूरिकाऋथं वसने सुनेत्रे । दिशौ द्विसंधीमभि रागशोभे दिग्वाससोभे किमलम्भिषाताम् ॥ नैषधीयचरितम् २२.११ ॥ |
| सत्रान्ते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान् । काकुत्स्थश्चिरविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ रघुवंशम् ४.८७ ॥ |
| सत्वस्रुतस्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु । लग्नोत्थितास्त्वत्कुचपत्त्रलेखास्तन्निर्गतास्तं प्रविशन्तु भूयः ॥ नैषधीयचरितम् ३.१२३ ॥ |
| सत्यं जना वच्मि न पक्षपाताल्लोकेषु सप्तस्वपि तथ्यमेतत् । नान्यन्मनोहारि नितम्बिनीभ्यो दुःखैकहेतुर्न च कश्चिदन्यः ॥ पुरुषार्थोपदेशः-33॥ |
| सत्यं न मे विभवनाशकृतास्ति चिन्ता भाग्यक्रमेण हि धनानि भवन्ति यान्ति। एतत्तु मां दहति नष्टधनाश्रयस्य यत्सौहृदादपि जनाः शिथिलीभवन्ति॥ (मृच्छकटिकम् १.१३) |
| सत्यवृत्तमपि मायिनं जगद्वृद्धमप्युचितनिद्रमर्भकं । जन्म बिभ्रतमजं नवं बुधा यं पुराणपुरुषं प्रचक्षते ॥ शिशुपालवधम् १४.७० ॥ |
| सत्याऽनृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या । नित्यव्यया प्रचुरनित्यधनागमा च वाराङ्गनेव नृपनीतिरनेकरूपा ॥ नीतिशतकम्४७ ॥ |
| सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः । कल्पवित्कल्पयामास वन्यामिवास्य संविधाम् ॥ रघुवंशम् १.९४ ॥ |
| सत्यामेव त्रिलोकी-सरिति हर-शिरश्चुम्बिनीवच्छटायां सद्वृत्तिं कल्पयन्त्यां बट-विटप-भवैर्वल्कलैः सत्फलैश्च। कोऽयं विद्वान्विपत्ति-ज्वर-जनित-रुजातीव-दुःखासिकानां वक्त्रं वीक्षेत दुःस्थे यदि हि न विभृयात्स्वे कुटुम्बेऽनुकम्पाम्॥॥ वैराग्यशतकम् ६२ ॥ |
| सत्येव साम्ये सदृशादशेषाद्गुणान्तरेणोच्चकृषे यदङ्गैः । नैषधीयचरितस्यास्ततः स्यात्तुलनापि नाम वस्तु त्वमीषामुपमापमानः ॥ नैषधीयचरितम् ७.१४ ॥ |
| सत्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो लब्धाघक्षयशुद्धिरुद्धरतरश्रीवत्सभूमिर्मुदा । मुक्त्वा काममपास्तभीः परमृगव्याधः स नादं हरे-रेकौघैः समकालमभ्रमुदयी रोपैस्तदा तस्तरे ॥ शिशुपालवधम् १९.१२० ॥ |
| सत्सङ्गः केशवे भक्तिर्गङ्गाम्भसि निमज्जनम् । असारे खलु संसारे त्रीणि साराणि भावयेत् ॥ नीतिसंग्रहस्य मित्र-१.१४७ ॥ |
| सदण्डमालक्तकनेत्रचण्डं तमःकिरं कायमधत्त कालः । तत्कालमन्तःकरणं नृपाणामध्यासितुं कोप इवोपनम्रः ॥ नैषधीयचरितम् १४.६५ ॥ |
| सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति । अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ॥ रघुवंशम् ८.७ ॥ |
| सदा तदाशामधितिष्ठतः करं वरं प्रदातुं चलिताद्बलादपि । मुनेरगस्त्याद्वृणुते स धर्मराड्यदि त्वदाप्तिं भण तत्र का गतिः ॥ नैषधीयचरितम् ९.७६ ॥ |
| सदामदबलप्रायः समुद्धृरसो बभौ । प्रतीतविक्रमः श्रीमन्हारिर्हरिरिवापरः ॥ शिशुपालवधम् १९.११६ ॥ |
| सदृशमतनुं आकृतेः प्रयत्नं तदनुगुणामपरैः क्रियामलङ्घ्यां । दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिं ॥ किरातार्जुनीयम् १०.१३ ॥ |
| सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा । अपि मित्त्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥ नैषधीयचरितम् २.२९ ॥ |
| सदेवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् । आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ॥ कुमारसंभवम् ३.४४॥ |
| सदैव गङ्गा-यमुना सरस्वती नदी-तरङ्गाऽऽलुलितो महामहाः । जगत्त्रयेश प्रिय-वेषवान् हि यः स एष देशः किल कस्य न प्रियः ॥ प्रतापविजयः-२७ ॥ |
| सदैव संपन्नवपू रणेषु स दैवसंपन्नवपूरणेषु । महो दधेऽस्तारि महानितान्तं महोदधेस्तारिमहा नितान्तं ॥ शिशुपालवधम् १९.११८ ॥ |

| |
|---|
| सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यं । संनिकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणं ईषे ॥ किरातार्जुनीयम् ९.३४ ॥ |
| सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्ति नवचूतबाणे । निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ॥ कुमारसंभवम् ३.२७॥ |
| सद्वंशत्वादङ्गसंसङ्गिनीत्वं नीत्वा कामं गौरवेणाबबद्धा । नीता हस्तं वञ्चयित्वा परेण द्रोहं चक्रे कस्यचित्स्वा कृपाणी ॥ शिशुपालवधम् १८.१९ ॥ |
| सद्वादितेवाभिनिविष्टबुद्धौ गुणाभ्यसूयेव विपक्षपाते । अगोचरे वागिव चोपरेमे शक्तिः शराणां शितिकण्ठकाये ॥ किरातार्जुनीयम् १७.११ ॥ |
| सध्वानं निपतितनिर्झरासु मन्द्रैः संमूर्छन्प्रतिनिनदैरधित्यकासु । उद्ग्रीवैर्घनरवशङ्कया मयूरैः सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानां ॥ किरातार्जुनीयम् ७.२२ ॥ |
| सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर्नदैर्वृतममुम् । मता फलवतोऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥ किरातार्जुनीयम् ५.२७ ॥ |
| सनालमात्माननिर्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम् । अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भःप्रभुचामरं नु किम् ॥ नैषधीयचरितम् १.१२२ ॥ |
| सन्त एव सतां नित्यमापदुद्धरणक्षमाः । गजानां पङ्कमग्नानां गजा एव धुरन्धराः  ॥ नीतिसंग्रहस्य मित्र-१.१८२ ॥ |
| सन्तप्ताऽयसि संस्थितस्य पयसो नामापि न ज्ञायते मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते । स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते ॥ नीतिशतकम्६७ ॥ |
| सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य । गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ मेघदूतम्, पूर्वमेघः ७॥ |
| सन्तमद्वयमयेऽध्वनि दत्तात्रेयमर्जुनयशोर्जनबीजम् । नौमि योगजयितानघसंज्ञं त्वामलर्कभवमोहतमोर्कम् ॥ नैषधीयचरितम् २१.९४ ॥ |
| सन्तमेव चिरप्रकृतत्वादप्रकाशितमदद्युतङ्गे । विभ्रमं मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थं ॥ शिशुपालवधम् १०.१५ ॥ |
| सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् । कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्  ॥ नीतिसंग्रहस्य मित्र-१.१३७ ॥ |
| सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा- स्तान् प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते । द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्करौ भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ नीतिशतकम्३४ ॥ |
| सन्त्येवात्र गृहे गृहे युवतयस्ताः पृच्छ गत्वाधुना प्रेयांसः प्रणमन्ति किं तव पुनर्दासो यथा वर्तते । आत्मद्रोहिणि दुर्जनैः प्रलपितं कर्णेऽनिशं मा कृथाश्छिन्नस्नेहरसा भवन्ति पुरुषा दुःखानुवर्त्याः पुनः ॥ अमरुशतकम्-९७॥ |
| सन्दष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती मामामुञ्च शठेति कोपवचनैरानर्तितभ्रूलता । शीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी प्राप्तं तैरमृतं मुधैव मथितो मूढैः सुरैः सागरः ॥ अमरुशतकम्-३२॥ |
| सन्दिग्धं यदि संदेहो दैर्घ्याद्युत्पलयोरिव । संप्राप्ते नयने तस्याः श्रवणोत्तंसभूमिकाम् ॥ चन्द्रालोकः८.७ ॥ |
| सन्धार्याः कुन्तवर्मेष्वसनशरक्वपाणासिपुत्र्यो विरक्ते शुक्रेज्यार्केऽह्नि मैत्रध्रुवलघुसहितादित्यशाक्रद्विदैवे । स्युर्लग्ने हि स्थिराख्ये शशिनि च शुभदृष्टे शुभैः केन्द्रगैः स्याद्भोगः शय्यासनादेर्ध्रुवमृदुलघुहर्यन्तकादित्य इष्टः ॥ मुहूर्त.नक्षत्रप्रकरणम्  २१ ॥ |
| सन्ध्या त्रिनाडीप्रमितार्कबिम्बा दर्द्धोदितास्तादध ऊर्ध्वमत्र । चेद्याम्यसौम्ये अयने क्रमात्स्तः पुण्यौ तदानीं परपूर्वधस्रौ ॥ मुहूर्त.संक्रान्तिप्रकरणम्  ७ ॥ |
| सपदि कुमुदिनीभिर्मीलितं हा क्षपापि क्षयमगमदपेतास्तारकास्ताः समस्ताः । इति दयितकलत्रश्चिन्तयन्नङ्गमिन्दुर्वहति कृशमशेषं भ्रष्टशोभं शुचेव ॥ शिशुपालवधम् ११.२४ ॥ |
| सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः खमाससाद । कुपितान्तकतर्जनाङ्गुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषु ॥ किरातार्जुनीयम् १३.२५ ॥ |
| सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः । युगपदृतुगणस्य संनिधानं वियति वने च यथायथं वितेने ॥ किरातार्जुनीयम् १०.१८ ॥ |
| सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु । तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं ववृते पुराणम् ॥ नैषधीयचरितम् १०.८४ ॥ |
| सपीतेः संप्रीतेरजनि रजनीशः परिषदा परीतस्ताराणां दिनमणिमणिग्रावमणिकः । प्रिये पश्योत्प्रेक्षाकविभिरभिधानाय सुशकः सुधामभ्युद्धर्तुं धृतशशकनीलाश्मचषकः ॥ नैषधीयचरितम् २२.१४६ ॥ |
| सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं । विलङ्घिताधोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखा बभूवुः ॥ रघुवंशम् ५.४८ ॥ |
| सप्ततन्तुमधिगन्तुमिच्छतः कुर्वनुग्रहमनुज्ञया मम । मूलतामुपगते प्रभो त्वयि प्रापि धर्ममयवृक्षता मया ॥ शिशुपालवधम् १४.६ ॥ |
| सप्तमभेदकरकल्पितस्वरं साम सामविदसङ्गमुज्जगौ । तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत ॥ शिशुपालवधम् १४.२१ ॥ |
| सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिवर्तमानः । पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैमयूखैः ॥ कुमारसंभवम् १.१६ ॥ |
| सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् । सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ रघुवंशम् १०.२२ ॥ |
| सभा नलश्रीयमकैर्यमाद्यैर्नलं विनाभूद्धृतदिव्यरत्नैः । भामाङ्गणप्राघुणिके चतुर्भिर्देवद्रुमैर्द्यौरिव पारिजाते ॥ नैषधीयचरितम् १०.२४ ॥ |
| सभाजनं तत्र ससर्ज तेषां सभाजने पश्यति विस्मिते सा । आमुद्यते यत्सुमनोभिरेवं फलस्य सिद्धौ सुमनोभिरेव ॥ नैषधीयचरितम् १४.५ ॥ |
| सभाजनायोपगतान्स दिव्यान्मुनीन्पुरस्कृत्य हतस्य शत्रोः । शुश्राव तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानं ॥ रघुवंशम् १४.१८ ॥ |

| |
|---|
| सभिति पतिनिपाताकर्णनद्रागदीर्णप्रतिनृपतिमृगाक्षीलक्षवक्षःशिलासु । रचितलिपिरिवोरस्ताडनव्यस्तहस्तप्रखरनखरटङ्कैरस्य कीर्तिप्रशस्तिः ॥ नैषधीयचरितम् १२.७५ ॥ |
| समं मृदुक्षिप्रवसुश्रवोऽग्निमघात्रिपूर्वास्रपभं बृहत्स्यात् । ध्रुवद्विदैवादितिभं जघन्यं सार्पाम्बुपार्द्रानिलशाक्रयाम्यम् ॥ मुहूर्त.संक्रान्तिप्रकरणम् १०॥ |
| समं ययोरिङ्गितवान्वयस्ययोस्तयोर्विहायोपहृतप्रतीङ्गिताम् । अकारि नाकूतमवारि सा यया विदग्धयाऽरञ्जि तयैव भाववित् ॥ नैषधीयचरितम् १६.९६ ॥ |
| समं सपत्नीभवदुःखतीक्ष्णैः स्वदारनासापथिकैर्मरुद्भिः । अनङ्गशौर्यानलतापदुःस्थैरथ प्रतस्थे हरितां मरुद्भिः ॥ नैषधीयचरितम् ८.८६ ॥ |
| समं समन्ततो राज्ञामापतन्तीरनीकिनीः । कार्ष्णिः प्रत्यग्रहीदेकः सारस्वानिव निम्नगाः ॥ शिशुपालवधम् १९.१० ॥ |
| समं समेते शशिनः करेण प्रसूनपाणाविह कैरविण्याः । विवाहलीलामनयोरिवाह मधुच्छलत्यागजलाभिषेकः ॥ नैषधीयचरितम् २२.१२४ ॥ |
| समकालमिवाभिलक्षणीयग्रहसंधानविकर्षणापवर्गैः । अथ साभिसारं शरैस्तरस्वी स तिरस्कर्तुमुपेन्द्रमध्यवर्षत् ॥ शिशुपालवधम् २०.८ ॥ |
| समगृहमध्ये शशिरविहोरा । विषमभमध्ये रविशशिनोः सा ॥ मुहूर्त.विवाहप्रकरणम् ४०॥ |
| समतया वसुवृटिविसर्जनैर्नियमनादसतां च नराधिपः । अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ॥ रघुवंशम् ८.६ ॥ |
| समताल्पसमासत्वं वर्णाद्यैस्तुल्यताऽथ वा । श्यामला कोमला बाला रमणं शरणं गता ॥ चन्द्रालोकः४.४ ॥ |
| समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयताम् । भवस्य पूर्वावतारस्तरस्विना मनःसु येन द्युसदां व्यधीयत ॥ शिशुपालवधम्  १.४३ ॥ |
| समदनमवतंसितेऽद्कर्णं प्रणयवता कुसुमे सुमध्यमायाः । व्रजदपि लघुतां बभूव भारः सपदि हिरण्मयमण्डनं सपत्न्याः ॥ शिशुपालवधम् ७.५९ ॥ |
| समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या । श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः ॥ किरातार्जुनीयम् १०.२५ ॥ |
| समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः । अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ रघुवंशम् ८.६५ ॥ |
| समनद्ध किमङ्ग भूपतिर्यदि संधित्सुरसौ सहामुना । हरिराक्रमणेन संनतिं किल विभ्रति भियेत्यसंभवः ॥ शिशुपालवधम् १६.३४ ॥ |
| समन्ततः सन्ततः वाक्शरार्वितो, मुहुर्मुहुर्भोगिगिनिभो विनिःश्वसन् । करेण सम्पीड्य करं व्यथाऽऽकुलः, ससर्प दिल्लीनगरं स 'मानवान् ॥ प्रतापविजयः-८७ ॥ |
| समपेत्य तुल्यमहसः शिलाघनान्घनपक्षदीर्घतरबाहुशालिनः । परिशिश्लिषुः क्षितिपतीन्क्षितीश्वराः कुलिशात्परेण गिरयो गिरीनिव ॥ शिशुपालवधम् १३.१५ ॥ |
| समभिसृत्य रसादवलम्बितः प्रमदया कुसुमावचिचीर्षया । अविनमन्न रराजवृथोच्चकैरनृतया नृतया वनपादपः ॥ शिशुपालवधम् ६.१० ॥ |
| सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः । अन्तर्गतफलारम्भाः सस्यानामिव संपदः ॥ रघुवंशम् १०.६० ॥ |
| सममेकमेव दधतुः सुतनोरु हारभूषणमुरोजतटौ । घटते हि संहततया जनितामिदमेव निर्विरतां दधतोः ॥ शिशुपालवधम् ९.४४ ॥ |
| सममेणमदैर्यदापणे तुलयन्सौरभलोभनिश्चलम् । पणिता न जनारवैरवैदपि गुञ्जन्तमलिं मलीमसम् ॥ नैषधीयचरितम् २.९२ ॥ |
| सममेव नराधिपेन सा गुरुसंमोहविलुप्तचेतना । गुरुसंमोहविलुप्तचेतना नवदीपार्चिरिव क्षितेस्तलं ॥ रघुवंशम् ८.३८* ॥ |
| सममौचित्यतोऽनेकवस्तुसम्बन्धवर्णनम् । अनुरूपं कृतं सद्म हारेण कुचमण्डलम् ॥ चन्द्रालोकः ५.८१ ॥ |
| समय एव करोति बलाबलं प्रणिगतवन्त इतीव शरीरिणाम् । शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम् ॥ शिशुपालवधम् ६.४४ ॥ |
| समराय निकामकर्कशं क्षणमाकृष्टमुपैति यस्य च । धनुषा सममाशु विद्विषां कुलमाशङ्कितभङ्गमानतिं ॥ शिशुपालवधम् १६.६३ ॥ |
| समरेषु रिपून्विनिघ्नता शिशुपालेन समेत्य संप्रति । सुचिरं सह सर्वसात्वतैर्भव विश्वस्तविलासिनीजनः ॥ शिशुपालवधम् १६.१४ ॥ |
| समरोन्मुखे नृपगणेऽपि तदनुमरणोद्यतैकधीः । दीनपरिजनकृताश्रुजलो न भटीजनः स्थिरमनाः विचक्लमे ॥ शिशुपालवधम् १५.९३ ॥ |
| समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् । अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥ किरातार्जुनीयम् २.३८ ॥ |
| समस्थलीकृतविवरेण पूरिता महीभृतां बलरजसा महागुहाः । रहस्त्रपाविधुरवधूरतार्थिनां नभःसदामुपकरणीयतां ययुः ॥ शिशुपालवधम् १७..६६ ॥ |
| समाकुले सदसि तथापि विक्रियां मनोऽगमन्न मुरभिदः परोदितैः । घनाम्बुभिर्बहुलितनिम्नगाजलैर्जलं न हि व्रजति विकारमम्बुधेः ॥ शिशुपालवधम् १७..१८ ॥ |
| समाद्रिपञ्चाङ्कदिने विवाहाद्वधूप्रवेशोऽष्टिदिनान्तराले । शुभः परस्ताद्विषमाद्बमासदिनेऽक्षवर्षात्परतो यथेष्टम् ॥ मुहूर्त.वधूप्रवेशप्रकरणम् १॥ |
| समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः । उत्कण्ठितां च कलयन्जगामास्तं च भानुमान् ॥ चन्द्रालोकः ५.९८ ॥ |
| समाधिरर्थमहिमा लसदघनरसात्मना । स्यादन्तर्विशता येन गात्रमङ्कुरितं सताम् ॥ चन्द्रालोकः४.५ ॥ |
| समानकान्तीनि तुषारभूषणैः सरोरुहैरस्फुटपत्त्रपङ्क्तिभिः । चितानि घर्माम्बुकणैः समन्ततो मुखान्यनुत्फुल्लविलोचनानि च ॥ किरातार्जुनीयम् ८.२५ ॥ |
| समानधर्मयुक्साध्या-रोपात्सोपाधिरूपकम् । उत्सिक्तक्षितिभृल्लक्ष्य-पक्षच्छेदपुरन्दरः ॥ चन्द्रालोकः ५.१९ ॥ |
| समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ । तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥ रघुवंशम् १०.८२ ॥ |
| समापय प्रावृषमस्तुविप्रुषां स्मितेन विश्राणय कौमुदीमुदः । दृशावितः खेलतु खञ्जनद्वयी विकासि पङ्केरुहमस्तु ते मुखम् ॥ नैषधीयचरितम् ९.११२ ॥ |
| समाप्तपुनरात्तं स्यादेष पीयूषभाजनम् । नेत्रानन्दी तुषारांशुरुदेत्यम्बुधिबान्धवः ॥ चन्द्रालोकः२.२१ ॥ |
| समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै । स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥ रघुवंशम् ५.२० ॥ |

| |
|---|
| समाप्तिलिप्येव भुजिक्रियाविधेर्दलोदरं वर्तुलयालयीकृतम् । अलंकृतं क्षीरवटैस्तदशनतां रराज पाकार्पितगैरिकश्रिया ॥ नैषधीयचरितम् १६.९८ ॥ |
| समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् । अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥ चन्द्रालोकः ५.६२ ॥ |
| समीक्ष्य पुत्रस्य चिरान्मुखं पिता निधानकुम्भस्य युवेव दुर्गतः । मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्छितो यथा ॥ रघुवंशम् ३.१६* ॥ |
| समीरशिशिरः शिरःसुवसता सता जवनिका निकानसुखिनाम् । बिभर्तिजनयन्नयं मुदमपा मपायधवला वलाहकततीः ॥ शिशुपालवधम् ४.५४॥ |
| समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः । दधन्ति मध्येषु वलीविभङ्गिषु स्तनातिभारादुदराणि नम्रताम् ॥ किरातार्जुनीयम् ८.२४ ॥ |
| समुज्ज्वलोऽप्यप्रिय-रक्त-रञ्जनो, विलम्बिदेहोऽप्यविलम्ब घातकः । अर्थकलः सन्नपि पञ्चतामयत्रयं जयं कस्य न चेतसोऽकरोत् ॥ प्रतापविजयः-१२८ ॥ |
| समुत्क्षिपन् यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः । त्रसत्तुषाराद्रिसुतासंभ्रमस्वयंग्रहाश्लेषमुखेन निष्क्रयाम् ॥ शिशुपालवधम् १.५० ॥ |
| समुदयगे विबुधगुरौ मदनगते हिमकिरणे । हिबुकगतौ बुधभृगुजौ सहजगताः खलखचराः ॥ मुहूर्त.यात्राप्रकरणम् ६६॥ |
| समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् । तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ॥ रघुवंशम् १३.५८ ॥ |
| समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपङ्क्तिमेखलैः । प्रतीरदेशैः स्वकलत्रचारुभिर्विभूषिताः कुञ्जसमुद्रयोषितः ॥ किरातार्जुनीयम् ८.९ ॥ |
| समुन्मुखीकृत्य बभार भारती रतीशकल्पेऽन्यनृपे निजं भुजम् । ततस्त्रसद्बालपृषद्विलोचनां शशंस संसज्जनरञ्जनीं जनीम् ॥ नैषधीयचरितम् १२.७७ ॥ |
| समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपङ्क्ति । विभिन्नमर्यादं इहातनोति नाश्वीयमाशा जलधेरिवाम्भः ॥ किरातार्जुनीयम् १६.४ ॥ |
| समुल्लसद्दिनकरवक्त्रकान्तयो रजस्वलाः परिमलिताम्बरश्रियः । दिगङ्गनाः क्षणमविलोकनक्षमाः शरीरिणां परिहरणीयतां ययुः ॥ शिशुपालवधम् १७..६१ ॥ |
| समूर्च्छदुच्छृङ्खलशङ्खनिस्वनः स्वनः प्रयाते पटहस्य शार्ङ्गिणि । स्वानिनिन्ये नितरां महान्त्यपि व्यथां द्वयेषामपि मेदिनीघृताम् ॥ शिशुपालवधम् १२.१३ ॥ |
| समेहि वीरोऽसि यदि त्वमन्यथा, विधेहि नूनं सहसा पलायनम् । सदा वदन्तीव जनान्समागतान्, अहर्दिवं या गगनङ्गताऽभवत् ॥ प्रतापविजयः-३२ ॥ |
| सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् । आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥ नीतिशतकम्६६ ॥ |
| सम्पदि यस्य न हर्षो विपदि विषादो रणे च भीरुत्वम् । तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ नीतिसंग्रहस्य मित्र-१.३३ ॥ |
| सम्पश्यतामिति शिवेन वितायमानं लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यं । अङ्गान्यभिन्नमपि तत्त्वविदां मुनीनां रोमाञ्चमञ्चिततरं बिभराम्बभूवुः ॥ किरातार्जुनीयम् १५.५३ ॥ |
| सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि क्षीणपयस्युपेयुषि भिदां जलधरपटले । खण्डितविग्रहं बलभिदो धनुरिह विविधाः पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥ किरातार्जुनीयम् ५.४३ ॥ |
| सम्प्रत्युपेयाः कुशली पुनर्युधः सस्नेहमाशीरिरिति भर्तुरीरिता । सद्यः प्रसह्य द्वितयेन नेत्रयोः प्रत्याचचक्षे गलता भटस्त्रियाः ॥ शिशुपालवधम् १५.९५ ॥ |
| सम्प्रदायविगमादुपेयुषीरेव नाशमविनाशिविग्रहः । स्मर्तुमप्रतिहतस्मृतिः श्रुतीर्दत्त इत्यभवदत्रिगोत्रजः ॥ शिशुपालवधम् १४.७९ ॥ |
| सम्प्रीयमाणोऽनुबभूव तीव्रं पराक्रमं तस्य पतिर्गणानां । विषाणभेदं हिमवानसह्यं वप्रानतस्येव सुरद्विपस्य ॥ किरातार्जुनीयम् १७.१३ ॥ |
| सम्बन्धस्पृहणीयताप्रमुदितैर्ज्येष्ठैर्वसिष्ठादिभिर्दृष्ट्वापत्यविवाहमङ्गलविधौ तत्तातयोः सङ्गमम् । पश्यन्नीदृशमीदृशः पितृसखं वृते महावैशसे दीर्ये किं न सहस्रधाऽहमथवा रामेण किं दुष्करम् ॥ (उत्तररामचरितम् ६.४०) |
| सम्बन्धातिशयोक्तिः स्यात्तदभावेऽपि तद्वचः । पश्य सौधाग्रसंसक्तं विभाति विधुमण्डलम् ॥ चन्द्रालोकः ५.४४ ॥ |
| सम्भावना यदीत्थं स्यादित्यूहोऽन्यप्रसिद्धये । सिक्तं स्फटिककुम्भान्तः स्थितिश्वेतीकृतैर्जलैः ॥ चन्द्रालोकः ५.४८ ॥ |
| सम्भिन्नामविरलपातिभिर्मयूखैर्नीलानां भृशं उपमेखलं मणीनां । विच्छिनामिव वनिता नभोन्तराले वप्राम्भःस्रुतिमवलोकयांबभूवुः ॥ किरातार्जुनीयम् ७.२३ ॥ |
| सम्भिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं विमानपङ्क्तीः । तत्पूर्वं प्रतिविदधे सुरापगाया वप्रान्तस्खलितविवर्तनं पयोभिः ॥ किरातार्जुनीयम् ७.११ ॥ |
| सम्भृतोपकरणेन निर्मलां कर्तुमिष्टिमभिवाञ्छता मया । त्वं समीरण इव प्रतीक्षितः कर्षकेण वलजान्पुपूषता ॥ शिशुपालवधम् १४.७ ॥ |
| सम्भोगक्षमगहनामथोपगङ्गं बिभ्राणां ज्वलितमणीनि सैकतानि । अध्यूषुश्च्युतकुसुमाचितां सहाया वृत्रारेरविरलशाद्वलां धरित्रीं ॥ किरातार्जुनीयम् ७.२६ ॥ |
| सम्यगर्चति नलेऽर्कमतूर्णं भक्तिगन्धिरमुनाकलि कर्णः । श्रद्दधानहृदयप्रति चातः साम्बमम्बरमणिर्निरचैषीत् ॥ नैषधीयचरितम् २१.३२ ॥ |
| सम्यगस्य जपतः श्रुतिमन्त्राः संनिधानमभजन्त कराब्जे । शुद्धबीजविशदस्फुटवर्णाः स्फाटिकाक्षवलयच्छलभाजः ॥ नैषधीयचरितम् २१.१९ ॥ |
| सम्यग्विनीतमथ वर्महरं कुमारमादिश्य रक्षणविधौ विधिवत्प्रजानां । रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः प्रायोपवेशनमतिर्नृपतिर्बभूव ॥ रघुवंशम् ८.९४ ॥ |
| सरजसं अपहाय केतकीनां प्रसवमुपान्तिकनीपरेणुकीर्णं । प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलबन्धनानि ॥ किरातार्जुनीयम् १०.२६ ॥ |
| सरजसमकरन्दनिर्भरासु प्रसवविभूतिषु भूरुहां विरक्तः । ध्रुवममृतपनामवाञ्छयासावधरममुं मधुपस्तवाजिहीते ॥ शिशुपालवधम् ७.४२ ॥ |
| सरभसं अवलम्ब्य नीलमन्या विगलितनीवि विलोलमन्तरीयं । अभिपतितुमनाः ससाध्वसेव च्युतरशनागुणसंदितावतस्थे ॥ किरातार्जुनीयम् १०.५४ ॥ |
| सरभसपरिरम्भारम्भसंरम्भभाजा यदधिनिशमपास्तं वल्लभेनाङ्गनायाः । वसनमपि निशान्ते नेष्यते तत्प्रदातु रथचरणविशालश्रेणिलोलेक्षणेन ॥ शिशुपालवधम् ११.२३ ॥ |

| |
|---|
| सरसनखपदान्तर्दष्टकेशप्रमोकं प्रणयिनि विदधाने योषितामुल्लसन्त्यः । विदधति दशनानां सीत्कृताविष्कृतानामभिनवरविभासः पद्मरागानुकारं ॥ शिशुपालवधम् ११.५४ ॥ |
| सरसिजमनुविद्धं शैवलेनापि रम्यम् मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति । इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ अभिज्ञानशाकुन्तलम् १. १९ ॥ |
| सरसिजवनकान्तं बिभ्रदभ्रान्तवृत्तिः करनयनसहस्रं हेतुमालोकशक्तेः । अखिलमतिमहिम्ना लोकमाक्रान्तवन्तं हरिरिव हरिदश्वः साधु वृत्रं हिनस्ति ॥ शिशुपालवधम् ११.५६ ॥ |
| सरसिजवनान्युद्यत्पक्षार्यमाणि हसन्तु न क्षतरुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवम् । हिमगिरिदृषद्दायादश्रि प्रतीतमदः स्मितं कुमुदविपिनस्याथो पाथोरुहैर्निजनिद्रया ॥ नैषधीयचरितम् १९.३२ ॥ |
| सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता । अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ॥ नैषधीयचरितम् २.४ ॥ |
| सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् । आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणं ॥ रघुवंशम् १.४३ ॥ |
| सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया । मुहुर्मुहुर्दशनविखण्डितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे ॥ शिशुपालवधम् १७..२ ॥ |
| सरित्समुद्रान्सरसीश्च गत्वा रक्षःकपीन्द्रैरुपपादितानि । तस्यापतन्मूर्ध्नि जलानि जिष्णोर्विन्ध्यस्य मेघप्रभवा इवापः ॥ रघुवंशम् १४.८ ॥ |
| सरोजकोशाभिनयेन पाणिना स्थितेऽपि कूरे मुहुरेव याचते । सखि त्वमस्मै वितर त्वमित्युभे मिथो न वादाद्ददतुः किलौदनम् ॥ नैषधीयचरितम् १६.९१ ॥ |
| सरोजनेत्र पुत्रस्य मुखेन्दुमवलोकय । पालयिष्यति ते गोत्रमसौ नरपुरन्दरः ॥ चन्द्रालोकः२.३८ ॥ |
| सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने । शिरोरुहाः स्विन्नतपक्ष्मसन्ततेर्द्विरेफवृन्दं नु निशब्दनिश्चलं ॥ किरातार्जुनीयम् ८.३५ ॥ |
| सरोजिनीमानसरागवृत्तेरनर्कसंपर्कमतर्कयित्वा । मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम् ॥ नैषधीयचरितम् ३.७६ ॥ |
| सरोरुहं तस्य दृशैव निर्जितं जिताः स्मितेनैव विधोरपि श्रियः । कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता ॥ नैषधीयचरितम् १.२४ ॥ |
| सर्वं सखे ! त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च । वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥ कुमारसंभवम् ३.१२॥ |
| सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः । सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ रघुवंशम् १०.२१ ॥ |
| सर्वतः कुशलवानसि कच्चित्त्वं स नैषध इति प्रतिभा नः । स्वासनार्धसुहृदस्त्वयि रेखां वीरसेननृपतेरिव विद्मः ॥ नैषधीयचरितम् ५.७४ ॥ |
| सर्वत्र नो वार्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानां । सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥ रघुवंशम् ५.१३ ॥ |
| सर्वत्र संवादयमबाधमानौ रूपश्रियातिथ्यकरं परं तौ । न शेकतुः केलिरसाद्विरन्तुमलीकमालोक्य परस्परं तु ॥ नैषधीयचरितम् ६.५४ ॥ |
| सर्वथापि शुचिनि क्रियमाणे मन्दिरोदर इवावकरा ये । उद्भवन्ति भविनां हृदि तेषां शोधनी भवदनुस्मृतिधारा ॥ नैषधीयचरितम् २१.११४ ॥ |
| सर्ववेदिनमनादिमास्थितं देहिनामनुजिघृक्षया वपुः । क्लेशकर्मफलभोगवर्जितं पुंविशेषममुमीश्वरं विदुः ॥ शिशुपालवधम् १४.६२ ॥ |
| सर्वसाधारणप्रेम-प्रश्रयादिस्वरूपया । अनौचित्या रसाभासा भावाभासाश्च कीर्तिताः ॥ चन्द्रालोकः६.१९ ॥ |
| सर्वस्मिन्विधुपापयुक्तनुलवावर्धे निशाहनोर्घटी- त्र्यंशं वै कुनवांशकं ग्रहणतः पूर्वं दिनानां त्रयम् । उत्पातग्रहतोऽद्र्यहांश्च शुभदोत्पातैश्च दुष्टं दिनं णण्मासं ग्रहभिन्नभं त्यज शुभे यौद्धं तथोत्पातभम् ।॥ मुहूर्तचिन्त.३२ ॥ |
| सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः । अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते  ॥ नीतिसंग्रहस्य मित्र-१.२० ॥ |
| सर्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय प्राप्तदृष्टिमिष्टातिथिममरदुरापामपाङ्गोत्तरङ्गम् । आनन्दान्ध्येन वन्ध्यानकृत तदपराकूतपातान्स रत्याः पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ॥ नैषधीयचरितम् १२.११२ ॥ |
| सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये । सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः  ॥ नीतिसंग्रहस्य मित्र-१.६५ ॥ |
| सर्वाः सम्पत्तस्यस्तस्य सन्तुष्टं यस्य मानसम् । उपानद्गूढपादस्य ननु चर्मावृतेव भूः  ॥ नीतिसंग्रहस्य मित्र-१.१३६ ॥ |
| सर्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते । यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति इं भूयसा येनायं हृदये स्थितः सुकृतिना अम्न्मन्त्रचिन्तामणिः ॥ नैषधीयचरितम् १४.८९ ॥ |
| सर्वाणि शस्त्राणि तवाङ्गचक्रैराविर्भवन्तु त्वयि शत्रुजैत्रे । अवाप्यमस्मादधिकं न किंचिज्जागर्ति वीरव्रतदीक्षितानाम् ॥ नैषधीयचरितम् १४.८ ॥ |
| सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना । स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ रघुवंशम् १.१४ ॥ |
| सर्वासु मातृष्वपि वत्सलत्वात्स निर्विशेषप्रतिपत्तिरासीत् । षडाननापीतपयोधरासु नेता चमूनामिव कृत्तिकासु ॥ रघुवंशम् १४.२२ ॥ |
| सर्वेषां च प्रतिद्वन्द्व-प्रतिच्छन्दभिदाभृताम् । उपाधिः क्वचिदुद्भिन्नः स्यादन्यत्रापि सम्भवात् ॥ चन्द्रालोकः ५.१२० ॥ |
| सर्वैरूर्ध्वैः सकारस्य सर्वै रेफस्य सर्वथा । रहोर्द्वेधा तु संयोगः परुषायां शषौ स्वतः ॥ चन्द्रालोकः६.२५ ॥ |
| सर्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्वायुधैः कङ्कटभेदिभिश्च । सर्वप्रयत्नेने च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ॥ रघुवंशम् ७.५९ ॥ |
| सललिकमवलम्ब्य पाणिनांसे सहचरमुच्छ्रतगुच्छवाञ्छयान्या । सकलकलभकुम्भविभ्रमाभ्यामुरसि रसादवतस्तरे स्तनाभ्यां ॥ शिशुपालवधम् ७.४७ ॥ |

| |
|---|
| सललितचलितत्रिकाभिरामाः शिरसिजसंयमनाकुलैकपाणिः । सुरपतितनयेऽपरा निरासे मनसिजजैत्रशरं विलोचनार्धं ॥ किरातार्जुनीयम् १०.५२ ॥ |
| सलिलार्द्रवराहदेहनीलो विदधद्भास्करमर्थशून्यसंज्ञं । प्रचलायतलोचनारविन्दं विदधे तद्बलमन्धकारः ॥ शिशुपालवधम् २०.३३ ॥ |
| सलीलमालिङ्गनयोपपीडमनामयं पृच्छति वासवस्त्वाम् । शेषस्त्वदाश्लेषकथापनिद्रैस्तद्रोमभिः संदिदिशे भवत्यै ॥ नैषधीयचरितम् ६.७८ ॥ |
| सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकं । स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया ॥ किरातार्जुनीयम् ८.१६ ॥ |
| सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमम् । अनुद्रुतः संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रताम् ॥ शिशुपालवधम्  १.५२ ॥ |
| सवधूकाः सुखिनोऽस्मिन्ननवरतममन्दरामतामरसदृशः । नासेवन्ते रसवन्नवरतममन्दरागतामरसदृशः ॥ शिशुपालवधम् ४.५१॥ |
| सविक्रमक्रमणचलैरितस्ततः प्रकीर्णकैः क्षिपत इव क्षिते रजः । व्यरंसिषुर्न खलु जनस्य दृष्टयस्तुरङ्गमादभिनवभाण्डभारिणः ॥ शिशुपालवधम् १७..३६ ॥ |
| सवितुः परिभावुकैर्मरीचीनचिराभ्यक्तमतङ्गजाङ्गभाभिः । जलदैरभितः स्फुरद्भिरुच्चैर्विदधे केतनतेव धूमकेतोः ॥ शिशुपालवधम् २०.६९ ॥ |
| सविनयमपराभिसृत्य साचि स्मितसुभगैकलसत्कपोललक्ष्मीः । श्रवणनियमितेन तं निदध्य सकलं इवासकलेन लोचनेन ॥ किरातार्जुनीयम् १०.५७ ॥ |
| सविशेषं सुते पाण्डोर्भक्तिं भवति तन्वति । वैरायितास्तरलाः स्वयं मत्सरिणः परे ॥ शिशुपालवधम्  २.११५ ॥ |
| सविषश्वसनोद्धतोरुधूमव्यवधिम्लानमरीचि पन्नगानां । उपरागवतेव तिग्मभासा वपुरौदुम्बरमण्डलाभमूहे ॥ शिशुपालवधम् २०.४५ ॥ |
| सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन । योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिबाष्पनिपातः ॥ किरातार्जुनीयम् ९.४५ ॥ |
| सव्यापसव्यत्यजनाद्द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु ।दशासु शेषा खलु तद्दशा या तया नभः पुष्प्यतु कोरकेण ॥ नैषधीयचरितम् ३.११४ ॥ |
| सव्यापारामहनि न तथा खेदयेद्विप्रयोगः शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते मत्संदेशैः सुखयितुमतः पश्य साध्वीं निशीथे तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ मेघदूतम्, उत्तरमेघः २३ ॥ |
| सव्रीडमन्दैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः । यशःक्षयक्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ॥ किरातार्जुनीयम् ३.४६ ॥ |
| सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानाम् । यशो हृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ॥ रघुवंशम् ७.६५ ॥ |
| ससंभ्रमं चरणतलाभिताडनस्फुटन्महीविवरवितीर्णवर्त्मभिः । रवेः करैरनुचिततापितोरगं प्रकाशतां शिनिरनयद्रसातलं ॥ शिशुपालवधम् १७..१५ ॥ |
| ससंभ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयानुकम्प्रताम् । तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव ॥ नैषधीयचरितम् १.१२६ ॥ |
| ससत्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वात् । अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥ रघुवंशम् १३.१० ॥ |
| ससत्वरतिदे नित्यं सदरामर्षनाशिनि । त्वराधिककसन्नादे रमकत्वमकर्षति ॥ किरातार्जुनीयम् १५.२७ ॥ |
| ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपाण्डुभिः । अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमम्बुमुचां चयं ॥ किरातार्जुनीयम् ५.१२ ॥ |
| सस्नुः पयः पपुरनेनिजुरम्बराणि जक्षुर्बिसं धृतविकासिबिसप्रसूना । सैन्याः श्रियामनुपभोगनिरर्थकत्व-दोषप्रवादममृजन्नगनिम्नगानां ॥ शिशुपालवधम् ५.२८ ॥ |
| सस्यन्दनैः प्रवहणैः प्रतिकूलपातं का वाहिनी न तनुते पुनरस्य नाम । तस्या विलासवति कर्कशताश्रिता या भूमः कथम् बहुतयासिकता वयं ताः ॥ नैषधीयचरितम् १३.२४ ॥ |
| सस्वजे प्रियमुरो निपीडनं प्रार्थितं मुखमनेन नाहरत् । मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा॥ कुमारसंभवम् ७.१४॥ |
| सह कज्जलेन विरराज नयनकमलाम्बुसन्ततिः । गण्डफलकमभितः सुतनोः पदवीव शोकमयकृष्णवर्त्मनः ॥ शिशुपालवधम् १५.९० ॥ |
| सह तया स्मर भस्म झटित्यभूः पशुपतिं प्रति यामिषुमग्रहीः । ध्रुवमभूदधुना वितनोः शरस्तव पिकस्वर एव स पञ्चमः ॥ नैषधीयचरितम् ४.९५ ॥ |
| सह त्वया हन्त! कृतेऽनुरञ्जने न. किं विरुद्ध जगतीतले भवेत् । क्व दन्तिनः स्याच्छशकेन मित्रता, क्व जम्बुकः सिंह-सखः श्रुतस्त्वया ॥ प्रतापविजयः-७४॥ |
| सहचरोऽसि रते रिति विश्रुतिस्त्वयि वसत्यपि मे न रतिः कुतः । अथ न संप्रति संगतिरस्ति वामनुमृता न भवन्तमियं किल ॥ नैषधीयचरितम् ४.७८ ॥ |
| सहजचापलदोषसमुद्धत-श्चलितदुर्बलपक्षपरिग्रहः । तव दुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गणः ॥ शिशुपालवधम्  २.११७ ॥ |
| सहजान्धदृशः स्वदुर्नये परदोषेक्षणदिव्यचक्षुषः । स्वगुणोच्चगिरो मुनिव्रताः परवर्णग्रहणेष्वसाधवः ॥ शिशुपालवधम् १६.२९ ॥ |
| सहजे कुजो निधनगश्च भार्गवो मदने बुधो रविररौ तनौ गुरुः । अथ चेत्स्युरिज्यसितभानवो जलत्रिगता हि सौरिरुधिरौ रिपुस्थितौ ॥ मुहूर्त.यात्राप्रकरणम् ७५॥ |
| सहजे रविर्दशमभे शशी तथा शनिमङ्गलौ रिपुगृहे सितः सुते । हिबुके बुधो गुरुरपीह लग्नगः स जयत्यरीन्प्रचलितोऽचिरान्नृपः ॥ मुहूर्त.यात्राप्रकरणम् ५८॥ |
| सहद्वितीयः स्त्रियमभ्युपेयादेवं स दुर्बुध्य नयोपदेशम् । अन्यां सभार्यः कथमृच्छतीति जलाधिपोऽभूदसहाय एव ॥ नैषधीयचरितम् १४.६८ ॥ |
| सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितं । निहितमपि तथैव पश्यन्नसिं वृषभगतिरुपाययौ विस्मयं ॥ किरातार्जुनीयम् १८.१६ ॥ |
| सहसा दधदुद्धताट्टहासश्रियमुत्त्रासितजन्तुना स्वनेन । वियतायतहेतिबाहुरुच्चैरथ वेताल इवोत्पपात वह्निः ॥ शिशुपालवधम् २०.६० ॥ |
| सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ किरातार्जुनीयम् २.३० ॥ |
| सहसा ससभ्रमविलोलसकलजनतासमाकुलं । स्थानमगमदथ तत्परितश्चलितोडुमण्डलनभःस्थलोपमां ॥ शिशुपालवधम् १५.७४ ॥ |
| सहसोपगतः सविस्मयं तपसां सूतिरसूतिरेनसाम् । ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः ॥ किरातार्जुनीयम् २.५६ ॥ |

| |
|---|
| सहस्रपत्त्रासनपत्त्रहंस वंशस्य पत्त्राणि पतत्त्रिणः स्मः । अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ॥ नैषधीयचरितम् ३.१६ ॥ |
| सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते । कुतस्तत्रोपमा यत्र पुनरुक्तः सुधाकरः ॥ चन्द्रालोकः२.३१ ॥ |
| सहस्रपूरणः कश्चिल्लूनमूर्धासिना द्विषः । तथोर्ध्व एव काबन्धीमभजन्नर्तनक्रियां ॥ शिशुपालवधम् १९.५१ ॥ |
| सहस्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य वितिष्ठमानम् । विलोचनस्थानगतोष्णरश्मिनिशाकरं साधु हिरण्यगर्भम् ॥ शिशुपालवधम् ४.४॥ |
| सहाखिलस्त्रीषु वहेऽवहेलया महेन्द्ररागादुगुरुमादरं त्वयि । त्वमीदृशि श्रेयसि संमुखेऽपि तं पराङ्मुखी चन्द्रमुखि न्यवीवृतः ॥ नैषधीयचरितम् ९.४ ॥ |
| सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः । दिगन्तमगमद् यस्य कीर्तिः प्रत्यर्थिभिः सह ॥ चन्द्रालोकः ५.६० ॥ |
| सा केतुमालोपवना बृहद्भिर्विहारशैलानुगतेव नागैः । सेना रथोदारगृहा प्रयाणे तस्याभवज्जङ्गमराजधानी ॥ रघुवंशम् १६.२६ ॥ |
| सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नशोभम् । निर्नाभिकौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलंचकार॥ कुमारसंभवम् ७.७॥ |
| सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः । आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम् ॥ रघुवंशम् ६.८३ ॥ |
| सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः । सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदङ्गनाभिः ॥ रघुवंशम् १६.५६ ॥ |
| सा तृष्णा चेत्परित्यक्ता को दरिद्रः क ईश्वरः । तस्याश्चेत्प्रसरो दत्तो दास्यं च शिरसि स्थितम् ॥ नीतिसंग्रहस्य मित्र-१.१७९ ॥ |
| सा दष्टनीवारबलीनिहिंस्रैः संबद्ध वैखानसकन्यकानि । इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि ॥ रघुवंशम् १४.२८ ॥ |
| सा दुर्निमित्तोपगताद्विषादात्सद्यः परिम्लानमुखारविन्दा । राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः ॥ रघुवंशम् १४.५० ॥ |
| सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन । अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥ रघुवंशम् २.२७ ॥ |
| सा निर्मले तस्य मधूकमाला हृदि स्थिता च प्रतिबिम्बिता च । कियत्यमग्ना कियती च मग्ना पुष्पेषुबाणालिरिव व्यलोकि ॥ नैषधीयचरितम् १४.५२ ॥ |
| सा नीयमाना रुचिरान्प्रदेशान्प्रियंकरो मे प्रिय इत्यनन्दत् । नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्त्रवृक्षं ॥ रघुवंशम् १४.४८ ॥ |
| सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् । स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥ अमरुशतकम्-२६॥ |
| सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् । स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥ काव्यप्रकाशः (चतुर्थ उल्लासः) ३४ ॥ |
| सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् । साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥ अमरुशतकम्-३०॥ |
| सा भङ्गिरस्याः खलु वाचि कापि यद्भारती मूर्तिमतीयमेव । श्लिष्टं निगद्यादृत वासवादीन्विशिष्य मे नैषधमप्यवादीत् ॥ नैषधीयचरितम् १४.१४ ॥ |
| सा भुवः किमपि रत्नमनर्घं भूषणं जयति तत्र कुमारी । भीमभूपतनया दमयन्ती नाम या मदनशस्त्रममोघम् ॥ नैषधीयचरितम् ५.२६ ॥ |
| सा मङ्गलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा । निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे॥ कुमारसंभवम् ७.११॥ |
| सा मन्दुरासंश्रयिभिस्तुरंगैः शालाविधिस्तम्भगतैश्च नागैः । पूराबभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी ॥ रघुवंशम् १६.४१ ॥ |
| सा यद्धृताखिलकलागुणभूमभूमीभैमीतुलाधिगतये स्वरसंगतासीत् । तं प्रागसावविनयं परिवादमेत्य लोकेऽधुनापि विदिता परिवादिनीति ॥ नैषधीयचरितम् २१.१२७ ॥ |
| सा यावन्ति पदान्यलीकवचनैरालीजनैः शिक्षिता तावन्त्येव कृतागसो द्रुततरं व्याहृत्य पत्युः पुरः । प्रारब्धा पुरतो यथा मनसिजस्याज्ञा तथा वर्तितुं प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोऽप्येष कान्तः क्रमः ॥ अमरुशतकम्-४३॥ |
| सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् । रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ॥ रघुवंशम् ६.८१ ॥ |
| सा रम्या नगरी महान्स नृपतिः सामन्त-चक्रं च तत्पार्श्वे तस्य च सा विदग्ध-परिषत्ताश्चन्द्र-बिम्बाननाः। उद्वृत्तः स च राज-पुत्र-निवहस्ते वन्दिनस्ताः कथाः सर्वं यस्य वशादगात्स्मृति-पथं कालाय तस्मै नमः॥॥ वैराग्यशतकम् ४१ ॥ |
| सा लाजधूमाञ्जलिमिष्टगन्धं गुरुपदेशाद्वदनं निनाय । कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे॥ कुमारसंभवम् ७.८१॥ |
| सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतान्तः । तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः ॥ रघुवंशम् १४.५६ ॥ |
| सा वागवाज्ञायितमां नलेन तेषामनाशङ्कितवाक्छलेन । स्त्रीरत्नलाभोचितयत्नमग्नमेनं हि न स्म प्रतिभाति किंचित् ॥ नैषधीयचरितम् १०.४९ ॥ |
| सा विभूतिरनुभाव सम्पदां भूयसी तव यदायतायति । एतदूढगुरुभार भारतं वर्षमद्य मम वर्तते वशे ॥ शिशुपालवधम् १४.५ ॥ |
| सा विभ्रमं स्वप्नगतापि तस्यां निशि स्वलाभस्य ददे यदेभ्यः । तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामम् ॥ नैषधीयचरितम् १०.३६ ॥ |
| सा शरस्य कुसुमस्य शरव्यं सूचिता विरहवाचिभिरङ्गैः । तातचित्तमपि धातुरधत्त स्वस्वयंवरमहाय सहायम् ॥ नैषधीयचरितम् ५.३ ॥ |
| सा शूरसेन्दाधिपतिं सुषेणमुद्दिश्य लोकान्तरगीतकीर्तिम् । आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ॥ रघुवंशम् ६.४५ ॥ |

| |
|---|
| सा संन्यस्ताभरणमबला पेलवं धारयन्ती शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ मेघदूतम्, उत्तरमेघः २८ ॥ |
| सा संभवद्भिः कुसुमैर्लतेव, ज्योतिर्भिरुद्यद्भिरिव त्रियामा । सरिद्विहङ्गैरिव लीयमानैरामुच्यमानाभरणा चकासे॥ कुमारसंभवम् ७.२१॥ |
| सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः । जेतुः परेषां जयशब्दपूर्वं तस्याञ्जलिं बन्धुमतो बबन्ध ॥ रघुवंशम् १६.५ ॥ |
| सांनिध्ययोगात्किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः । काकुत्स्थमुद्दिश्य समत्सरोऽपि शशाम तेन क्षितिपाललोकः ॥ रघुवंशम् ७.३ ॥ |
| सांमुख्यं विदधानायाः स्फुटमर्थान्तरे गिरः । कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मकः ॥ चन्द्रालोकः७.२ ॥ |
| साक्षात्कृताखिलजगज्जनताचरित्रा तत्राधिनाथमधिकृत्य दिवस्तथा सा । ऊचे यथा स च शचीपतिरभ्यधायि प्राकाशि तस्य न च नैषधकायमाया ॥ नैषधीयचरितम् १३.२ ॥ |
| साक्षात्सुधांशुर्मुखमेव भैम्या दिवः स्फुटं लाक्षणिकः शशाङ्कः । एतद्भ्रुवौ मुख्यमनङ्गचापं पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥ नैषधीयचरितम् १०.११६ ॥ |
| सागरान्मुनिविलोचनोदराद्यद्द्वयादजनि तेन किं द्विजः । एवमेव च भवन्नयं द्विजः पर्यवस्यति विधुः किमत्रिजः ॥ नैषधीयचरितम् २२.१३५ ॥ |
| साङ्कुरेव रुचिपीततमा यैर्यैः पुरास्ति रजनी रजनीव । ते धृआ वितरितुं त्रिदशेभ्यो यत्र हेमतिलका इव दीपाः ॥ नैषधीयचरितम् २१.२३ ॥ |
| साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातं । सुभ्रुवो जनयति स्म विभूषां संगतावुपरराम च लज्जा ॥ किरातार्जुनीयम् ९.४४ ॥ |
| साटोपमुर्वीमनिशं मदन्तो यैः प्लावयिष्यन्ति समन्ततोऽमी । तान्येकदेशान्निभृतं पयोधौ सोऽम्भांसि मेधान् पिबतो ददर्श ॥ शिशुपालवधम् ३.७३ ॥ |
| सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरङ्गनाः । ताभिरप्युपहृतं मुखासवं सोऽपिबद्बकुलतुल्यदोहदः ॥ रघुवंशम् १९.१२ ॥ |
| सादरं युद्धमानापि तेनान्यनरसादरं । सा दरं पृतना निन्ये हीयमाना रसादरं ॥ शिशुपालवधम् १९.२३ ॥ |
| सादिताखिलनृपं महन्महः सम्प्रति स्वनयसंपदैव ते । किं परस्य स गुणः समश्नुते पथ्यवृत्तिरपि यद्यरोगिताम् ॥ शिशुपालवधम् १४.१३ ॥ |
| सादृश्यं गतमपनिद्रचूतगन्धैरामोदं मदजलसेकजं दधानः । एतस्मिन्मदयति कोकिलानकाले लीनालिः सुरकरिणां कपोलकाषः ॥ किरातार्जुनीयम् ५.२६ ॥ |
| सादृश्यं दधति गभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि । आतेनुश्चकितचकोरनीलकण्ठान्कच्छान्तानमरमहेभबृंहितानि ॥ किरातार्जुनीयम् ७.३९ ॥ |
| सादृश्यात् समवायात् सा वैपरीत्यात् क्रियान्वयात् । सारोपाध्यवसानाख्ये गौणशुद्धे पृथक् पृथक् ॥ चन्द्रालोकः९.१० ॥ |
| साधारणीं गिरमुषर्बुधनैषधाभ्यामेतां निपीय न विशेषमवाप्तवत्या । ऊचे नलोऽयमिति तं प्रति चित्तमेकं ब्रूते स्म चान्यदनलोऽयमितीदमीयम् ॥ नैषधीयचरितम् १३.१४ ॥ |
| साधु त्वया तर्कितमेतदेव स्वेनानलं यत्किल संश्रयिष्ये । विनामुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ॥ नैषधीयचरितम् ३.७७ ॥ |
| साधु नः पतनमेवमितः स्यादित्यभण्यत तिलोत्तमयापि । चामरस्य पतनेन कराग्जात्तद्विलोलनचलद्भुजनालात् ॥ नैषधीयचरितम् ५.५ ॥ |
| साधु याम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः । ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ॥ रघुवंशम् ११.९१ ॥ |
| साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् । न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ नीतिसंग्रहस्य मित्र-१.८७ ॥ |
| साधोरपि स्वः खलु गामिताधो गमी स तु स्वर्गमितः प्रयाणे । इत्यायती चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे न ॥ नैषधीयचरितम् ६.९९ ॥ |
| सानन्तानाप्यतेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाजश्चित्तेनाशाजुषस्तान्सममसमगुणान्मुञ्चती गूढभावा । पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः ॥ नैषधीयचरितम् ११.१२९ ॥ |
| सानन्दंतनुजाविवाहनमहे भीमः स भूमीपतिर्वैदर्भीनिषधेश्वरौ नृपजनानिष्टोक्तिनिर्मृष्टये । स्वानि स्वानि धराधिपाश्च शिबिराण्युद्दिश्य यान्तः क्रमादेको द्वौ बहबश्चकार सृजतः स्मातेनिरे मङ्गलम् ॥ नैषधीयचरितम् १४.१ ॥ |
| सानुप्लवः प्रभुरपि क्षणदाचराणां भेजे रथान्दशरथप्रभवानुशिष्टः । मायाविकल्परचितैरपि ये तदीयैर्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥ रघुवंशम् १३.७५ ॥ |
| सान्द्रत्वक्कास्तल्पलाश्लिष्टकक्षा आङ्गीं शोभामाप्नुवन्तश्चतुर्थीं । कल्पस्यान्ते मारुतेनोपनुन्नाश्चेलुश्चण्डं गण्डशैला इवेभाः ॥ शिशुपालवधम् १८.६ ॥ |
| सान्द्राण्भोदश्यामले सामजानां वृन्दे नीताः शोणितैः शोणिमानं । दन्ताः शोभामापुरम्भोनिधीनां कन्दोद्भेदा वैद्रुमा वारिणीव ॥ शिशुपालवधम् १८.३६ ॥ |
| सापि प्रणयवत्यासीत्सपत्न्योरुभयोरपि । भ्रमरी वारणस्येव मदनिस्यन्दलेखयोः ॥ रघुवंशम् १०.५८ ॥ |
| सापीश्वरे शृण्वति तद्गुणौघान्प्रसह्य चेतो हरतोऽर्धशंभुः । अभूदपर्णाङ्गुलिरुद्धकर्णा कदा न कण्डूयनकैतवेन ॥ नैषधीयचरितम् ३.२९ ॥ |
| साप्तुं प्रयच्छति न पक्षचतुष्टये तां तल्लाभशंसिनि न पञ्चमकोटिमात्रे । श्रद्धां दधे निषधराड्विमतौ मतानामद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥ नैषधीयचरितम् १३.३६ ॥ |
| साफल्यमस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इअवापवर्गं । अनिन्धनस्य प्रसभं समन्युः समाददेऽस्त्रं ज्वलनस्य जिष्णुः ॥ किरातार्जुनीयम् १६.४९ ॥ |
| साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः । चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥ चन्द्रालोकः ५.४० ॥ |
| साभिशापमिव नातिथयस्ते मां यदद्य भगवन्नुपयन्ति । तेन न श्रियमिमां बहु मन्ये स्वोदरैकभृतिकाऋयकदर्याम् ॥ नैषधीयचरितम् ५.१६ ॥ |
| सामान्यं यदि सादृश्याद्भेद एव न लक्ष्यते । पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम् ॥ चन्द्रालोकः ५.३४ ॥ |
| सामान्यनिषेधमुक्त्वा विशेषनिषेधमाहमनीपिताः सन्ति गृहेषु देवतास्तपः क्व वत्से ! क्व च तावकं वपुः । पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ कुमारसंभवम् ५.४ ॥ |

| |
|---|
| सामान्य-परिवृत्तिः स्यात्कुण्डलच्छविविग्रहा । विशेषपरिवृत्तिः स्याद्वनिता मम चेतसि ॥ चन्द्रालोकः२.३६ ॥ |
| सामोदपुष्पाशुगवासिताङ्गीं किशोरशाखाग्रशयालिमालाम् । वसन्तलक्ष्मीमिव राजभिस्तैः कल्पद्रुमैरप्यभिलष्यमाणाम् ॥ नैषधीयचरितम् १०.९७ ॥ |
| सामोदाः कुसुमतरुश्रियो विविक्ताः सम्पत्तिः किसलयशालिनीलतानां । साफल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषां ॥ किरातार्जुनीयम् ७.२८ ॥ |
| साम्यं गतेनाशनिना मघोनः शशाङ्कखण्डाकृतिपाण्डुरेण । 1शम्भुं बिभित्सुर्धनुषा जघान स्तम्बं विषाणेन महानिवेभः ॥ किरातार्जुनीयम् १७.५१ ॥ |
| सायं शशाङ्गकिरणाहतचन्द्रकान्त-निस्यन्दिनीरनिकरेण कृताभिषेकाः । अर्कोपलोल्लसितवह्निभिरह्नि तप्ता-स्तीव्रं महाव्रतमिवात्र चरनति वप्राः ॥ शिशुपालवधम् ४.५८॥ |
| सायुज्यमृच्छति भवस्य भवाब्धियादस्तां पत्युरेत्य नगरीं नगराजपुत्र्याः । भूताभिधानपटुमद्यतनीमवाप्य भीमोद्भवे भवतिभावमिवास्तिधातुः ॥ नैषधीयचरितम् ११.११७ ॥ |
| सारैः करेज्यान्त्यमघाम्बुमूलैः कौजेऽह्नि वेश्माग्निसुतार्तिदं स्यात् । सज्ञैः कदास्रार्यमतक्षहस्तैर्ज्ञस्यैव वारे सुखपुत्रदं स्यात् ॥ मुहूर्त.वास्तुप्रकरणम् २७॥ |
| सारो नाम पदोत्कर्षः सारताया यथोत्तरम् । सारं सारस्वतं तत्र काव्यं तत्र शिवस्तवः ॥ चन्द्रालोकः ५.९० ॥ |
| सारोत्थधारेव सुधारसस्य स्वयंवरः श्वो भविता तवेति । संतर्पयन्ती हृदयानि तेषां श्रुतिः श्रुती नाकजुषामयासीत् ॥ नैषधीयचरितम् ८.८५ ॥ |
| सार्धं कथञ्चिदुचितैः पिचुमर्दपत्त्रैरास्यान्तरालगतमाम्रदलं म्रदीयः । दासेरकःसपदि संवलितं निषादैर्विप्रं पुरा पतगराडिव निर्जगार ॥ शिशुपालवधम् ५.६६ ॥ |
| सालक्तकं शतदलाधिककान्तिरम्यं रत्नौघधामनिकरारुणनूपुरं च । क्षिप्तं भृशं कुपितया तरलोत्पलाक्ष्या सौभाग्यचिह्नमिव मूर्ध्नि पदं विरेजे ॥ अमरुशतकम्-८६॥ |
| सालक्तकेन नवपल्लवकोमलेन पादेन नूपुरवता मदनालसेन । यस्ताड्यते दयितया प्रणयाराधात् सोऽङ्गीकृतो भगवता मकरध्वजेन ॥ अमरुशतकम्-५२॥ |
| सालीकदृष्टे मदनोन्मदिष्णुर्यथाप शालीनतमा न मौनम् । तथैव तथ्येऽपि नले न लेभे मुग्धेषु कः सत्यमृषाविवेकः ॥ नैषधीयचरितम् ८.१८ ॥ |
| सावज्ञमुन्मील्य विलोचने सकृत्क्षणं मृजेन्द्रेण सुषुप्सुना पुनः । सैन्यान्न यातः समयापि विव्यथे कथं सुराजंभवमन्मथाथवा ॥ शिशुपालवधम् १२.५२ ॥ |
| सावर्ण्यभाजः प्रतिभागताया लक्ष्यैः स्मरापाण्डुतया तरुण्याः । यस्यां कपोलैः कलधौतधामस्तम्भेषु भेजे मणिदर्पणश्रीः ॥ शिशुपालवधम् ३.४६ ॥ |
| सावर्तभावभवदद्भुतनाभिकूपे स्वर्भौममेतदुपवर्तनमात्मनैव । स्वाराज्यमर्जयसि न श्रियमेतदीयामेतद्गृहे परिगृहाण शचीविलासम् ॥ नैषधीयचरितम् ११.२८ ॥ |
| सावलेपमुपलिप्सते परैरभ्युपैति विकृतिं रजस्यपि । अर्थितस्तु न महान्समीहते जीवितं किमु धनं धनायितुं ॥ किरातार्जुनीयम् १३.५६ ॥ |
| सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु । गन्तुमुत्थिमकारणतः स्म द्योतयन्ति मदविभ्रममासां ॥ शिशुपालवधम् १०.१६ ॥ |
| सासेनागमनारम्भे रसेनासीदनारता । तारनादजनामत्त धीरनागमनामया ॥ शिशुपालवधम् १९.२९ ॥ |
| सास्रावसक्तकमनियपरिच्छदानामध्वश्रमातुरवधूजनसेवितानाम् । जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥ किरातार्जुनीयम् ७.४० ॥ |
| साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेस्चरितुं यतिष्ये । तथा यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥ रघुवंशम् १४.६६ ॥ |
| साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः । तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनां ॥ नीतिशतकम् १२ ॥ |
| सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु । प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥ नीतिशतकम्३८ ॥ |
| सिंहासने स हि 'महेन्द्र' पदेऽभिषिक्तो लोके बभावतितरां जगदेकवीरः । नैसर्गिको भवति हेम-घट प्रभावान् मार्तण्डरश्मि रुचिरस्य पुनः कथा का ॥ प्रतापविजयः-४९ ॥ |
| सिंहे गुरौ सिंहलवे विवाहो नेष्टोऽथ गोदोत्तरतश्च यावत् । भागीरथीयाम्यतटे हि दोषो नान्यत्र देशे तपनेऽपि मेषे ॥ मुहूर्तचिन्त.४९॥ |
| सिंहयव्याघ्रवराहरासभगजा वाहद्विषद्घोटकाः श्वाऽजो गौश्चरणायुधश्च बवतो वाहा रवेः संक्रमे । वस्त्रमिवेतसुपीतहारितकपाण्ड्वारक्तकालासितं चित्रं कम्बलदिग्घनाभमथ शस्त्रं स्याद्भुशुण्डी गदा ।॥ मुहूर्त.संक्रान्तिप्रकरणम् १४॥ |
| सिक्ता इवामृतरसेन मुहुर्जनानां क्लान्तिच्छिदो वनवनस्पतयस्तदानीं । शाखावसक्तवसनाभरणाभिरामाः कल्पद्रुमैः सह विचित्रफलैर्विरेजुः ॥ शिशुपालवधम् ५.१६ ॥ |
| सिक्तायाः क्षणमभिषिच्य पूर्वमन्यामन्यस्याः प्रणयवता बताबलायः । कालिम्ना समधित मन्.रेव वक्त्रं प्रापाक्ष्णोर्गलदपशब्दमञ्जनाम्भः ॥ शिशुपालवधम् ८.४३ ॥ |
| सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन् । दिवजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ॥ शिशुपालवधम् १.२५ ॥ |
| सितच्छदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणां । प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः ॥ किरातार्जुनीयम् ४.३० ॥ |
| सितजीवभौमबुधभानुतनूजास्तनुमन्मथारिहिबुकत्रिगृहे चेत् । क्रमतोऽरिसोदरखशात्रवहोराहिबुकायगैर्गुरुदिनेऽखिलखेटैः ॥ मुहूर्त.यात्राप्रकरणम् ७४॥ |
| सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केसरस्य च । स्फुटं चलच्चामरयुग्मचिह्ननैरनिह्नुवानं निजवाजिराजताम् ॥ नैषधीयचरितम् १.६२ ॥ |
| सितदीप्रमणिप्रकल्पिते यद्गारे हसदङ्करोदसि । निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ॥ नैषधीयचरितम् २.७६ ॥ |
| सितरुचिशयनीये नक्तमेकान्तमुक्तं दिनकरकरसङ्गव्यक्तकौसुम्भकान्ति । निजमिति रतिबन्धोर्जानतीमुत्तरीयं परिहसति सखी स्त्रीमाददानां दिनादौ ॥ शिशुपालवधम् ११.५२ ॥ |
| सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः । मणिजालमम्भसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥ किरातार्जुनीयम् ६.९ ॥ |
| सितांशुवर्णैर्वयति स्म तद्गुणैर्महासिवेम्नः सहकृत्वरी बहुम् । दिगङ्गनाङ्गावरणं रणाङ्गणे यशःपटं तद्भटचातुरीतुरी ॥ नैषधीयचरितम् १.१२ ॥ |
| सिताम्बुजानां निवहस्य यश्छलाद्बभावलिश्यामलितोदरश्रियाम् । तमःसमच्छायकलङ्कसंकुलं कुलं सुधांशोर्बहलं वहन्बहु ॥ नैषधीयचरितम् १.११ ॥ |
| सितासितादौ सद्दुष्टे चन्द्रे पक्षौ शुभावुभौ । व्यत्यासे चाशुभौ प्रोक्तौ सङ्कटेऽव्जबलं त्विदम् ॥ मुहूर्त.संक्रान्तिप्रकरणम् ८।॥ |

| |
|---|
| सितो यदात्रैष तदान्यदेशे चकास्ति रज्यच्छविरुज्जिहानः । तदित्थमेतस्य निधेः कलानां को वेद वा रागविरागतत्त्वम् ॥ नैषधीयचरितम् २२.५५ ॥ |
| सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुद्धद्रुमे गङ्गाधौतशिलातले हिमवतः स्थाने स्थितः स्थेयसि । कः कुर्वीत परप्रणाममलिने मानं मनस्वी जनो यद्युत्त्रस्तकुरङ्गशाबकदृशो न स्युः स्मरास्त्रं स्त्रियः ॥ पुरुषार्थोपदेशः-32॥ |
| सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये । युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः ॥ चन्द्रालोकः३.८ ॥ |
| सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः । जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥ नीतिसंग्रहस्य मित्र-०.१ ॥ |
| सिन्दूरद्युतिमुग्धमूर्धनि धृतस्कन्धावधिश्यामिके व्योमान्तस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति । जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसंध्याधियेवास्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः ॥ नैषधीयचरितम् १२.३६ ॥ |
| सिन्दूरबिन्दुरिव भारत-भूमि-भालात्, 'मेवाड़' एव पवनैर्यवनैर्विलुप्तः । भूयोऽपि तं किल तथा परिरञ्जयेद्यः, आयातु तत्कृत इदं प्रणतं शिरो मे ॥ प्रतापविजयः- १०२ ॥ |
| सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः । सादृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ किरातार्जुनीयम् ७.८ ॥ |
| सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्तिपूर्ताद्भुतं यत्र स्नान्ति जगन्ति सन्ति कवयः केवा न वाचंयमाः । यद्बिन्दुश्रियमिन्दुरञ्चति जलं चाविश्य दृश्येतरो यस्यासौ जलदेवतास्फटिकभूर्जागर्ति यागेश्वरः ॥ नैषधीयचरितम् १२.३८ ॥ |
| सिलमलमशनाय स्वादु पानाय तोयं शयनमवनिपृष्ठे वाससी वल्कले च। लवधनमधुपानभ्रान्तसर्वेन्द्रियाणाम् अपनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ पुरुषार्थोपदेशः-34॥ |
| सिषिचुरवनिमम्बुवाहाः शनैः सुरकुसुममियाय चित्रं दिवः । विमलरुचि भृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे ॥ किरातार्जुनीयम् १८.१७ ॥ |
| सिसौदिया' वंशवतां नृणामियं महा-महाभारत- रङ्ग भूरभूत् । विबोधयन्ती च विपक्षिणं क्षयं, खमुच्छ्रिता - वैजय वैजयन्तिका ॥ प्रतापविजयः-३१ ॥ |
| सीता समुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौम्य चिराय जीव । विडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वं ॥ रघुवंशम् १४.५९ ॥ |
| सीतां हित्वा दशमुखरिपुर्नोपयेम यदन्यां तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार । वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्तुः सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ॥ रघुवंशम् १४.८७ ॥ |
| सीत्कृतानि मणितं करुणोक्तिः स्निग्धमुक्तमलमर्थवचांसि । हासभूषणरवाश्च रमण्याः कामसूत्रपदतामुपजग्मुः ॥ शिशुपालवधम् १०.७५ ॥ |
| सीमन्तं निजमनुबध्नती कराभ्यामालक्ष्यस्तनतटबाहुमूलभागा । भर्त्रान्या मुहुरभिलष्यता निदध्ये नैवाहो विरमति कौतुकं प्रियेभ्यः ॥ शिशुपालवधम् ८.६९ ॥ |
| सीमन्त्यमाना यदुभूभृतां बलैर्बभौ तरिद्भिर्गवलासितद्युतिः । सिन्दूरितानेकपकङ्गणाङ्किता तरङ्गिणी वेणिरिवायता भुवः ॥ शिशुपालवधम् १२.७५ ॥ |
| सुकुमारं एकमणु मर्मभिदां अतिदूरगं युतममोघतया । अविपक्षमस्त्रमपरं कतमद्विजयाय यूयमिव चित्तभुवः ॥ किरातार्जुनीयम् ६.४० ॥ |
| सुकुमारमहो लघीयसां हृदयं तद्गतमप्रियं यतः । सहसैव समुद्गिरन्त्यमी जरयन्त्येव हि तन्मनीषिणः ॥ शिशुपालवधम् १६.२१ ॥ |
| सुक्तामयं सारास्नावलम्बि भाति स्म दामाप्रपदीनमस्य । अङ्गुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चैस्त्रिस्रोतसः सन्ततधारमम्भः ॥ शिशुपालवधम् ३.१० ॥ |
| सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्। सुखातु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति॥ (मृच्छकटिकम् १.१०) |
| सुखमापतितं सेव्यं दुःखमापतितं तथा । चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ॥ नीतिसंग्रहस्य मित्र-१.१६६ ॥ |
| सुखवेदनाहृषितरोमकूपया शिथिलीकृतेऽपि वसुदेवजन्मनि । कुरुभर्तुरङ्गलतया न तत्यजे विकसत्कदम्बनिकुरम्बचारुता ॥ शिशुपालवधम् १३.१३ ॥ |
| सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् । न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ॥ रघुवंशम् ३.१९ ॥ |
| सुखिनः पुरोऽभिमुखतामुपागतैः प्रतिमासु यत्र गृहरत्नभित्तिषु । नवसङ्गमैरबिभरुः प्रियाजनैः प्रमदं त्रपाभरपराङ्मुखैरपि ॥ शिशुपालवधम् १३.५५ ॥ |
| सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः । वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥ किरातार्जुनीयम् १.१७ ॥ |
| सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनु यदनाशयत् । तव तनूमवशिष्टवतीं ततः समिति भूतमयीमहरद्धरः ॥ नैषधीयचरितम् ४.८१ ॥ |
| सुगन्धयद्दिशः शुभ्रमम्लानि कुसुमं दिवः । भूरि तत्रापतत्तस्मादुत्पपात दिवं यशः ॥ शिशुपालवधम् १९.२० ॥ |
| सुगन्धितामप्रतियत्नपूर्वं बिभ्रन्ति यत्र प्रमदाय पुंसाम् । मधूनि वक्त्राणि च कामिनीनामामोदकर्मव्यतिहारमीयुः ॥ शिशुपालवधम् ३.५३ ॥ |
| सुगन्धिनिश्वासविवृद्धवृष्णं बिम्बाधरासन्नचरं द्विरेफम् । प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥ कुमारसंभवम् ३.५६ ॥ |
| सुजीर्णमन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः । सुचिन्त्य चोक्तं सुविचार्य यत्कृतं सुदीर्घकालेऽपि न याति विक्रियाम् ॥ नीतिसंग्रहस्य मित्र-१.२२ ॥ |
| सुतनु जहिहि कोपं पश्य पादानतं मां न खलु तव कदाचित्कोप एवं विधोऽभूत् । इति निगदति नाथे तिर्यगामीलिताक्ष्या नयनजलमनल्पं मुक्तमुक्तं न किञ्चित् ॥ अमरुशतकम्-३५॥ |
| सुतपरिणयात्षण्मासान्तः सुताकरपीडनं न च निजकुले तद्वद्वा मण्डनादपि मुण्डनम् । न च सहजयोर्देये भ्रात्रोः सहोदरकन्यके न सहजसुतोद्वाहोऽब्दार्धे शुभे न पितृक्रिया ॥ मुहूर्त.विवाहप्रकरणम् १६॥ |
| सुतरां सुखेन सकलक्लमच्छिदा सनिदाधमङ्गमिव मातरिश्वना । यदुनन्दनेन तदुदन्वतः पयः शसिनेव राजकुलमाप नन्दथुं ॥ शिशुपालवधम् १३.६५ ॥ |
| सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः । यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥ किरातार्जुनीयम् ३.१३ ॥ |

| |
|---|
| सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः । आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥ रघुवंशम् १.८१ ॥ |
| सुताः कमाहूय चिराय चुंकृतैर्विधाय कम्प्राणि मुखानि कं प्रति । कथासु शिष्यध्वमिति प्रमील्य स स्नुतस्य सेकादबुबुधे नृपाश्रुणः ॥ नैषधीयचरितम् १.१४२ ॥ |
| सुते शिशावेव सुदर्शनाख्ये दर्शात्ययेन्दुप्रियदर्शने सः । मृगायताक्षो मृगयाविहारी सिंहादवापद्विपदं नृसिंहः ॥ रघुवंशम् १८.३५ ॥ |
| सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ । सम्यगागमिता विद्या प्रबोधविनयाविव ॥ रघुवंशम् १०.७२ ॥ |
| सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया । न निशाखिलयापि वापिका प्रससाद ग्रहिलेव मानिनी ॥ नैषधीयचरितम् २.७७ ॥ |
| सुदृशः समीकगमनाय युवभिरथ संबभाषिरे । शोकपिहितगलरुद्धगिरस्तरसागताश्रुजलकेवलोत्तराः ॥ शिशुपालवधम् १५.८३ ॥ |
| सुदृशः सरसव्यलीक तप्तस्तरसास्लष्टवतः सयौवनोष्मा । कथमप्यभवत्स्मरानलोष्मणः स्तनभारो न नखंपचः प्रियस्य ॥ शिशुपालवधम् ९.८५ ॥ |
| सुधांशुरेषु प्रथमो भुवीति स्मरो दुवितीयः किमसावितीमम् । दस्रस्तृतीयोऽयमिति क्षितीशाः स्तुतिच्छलान्मत्सरिणो निनिन्दुः ॥ नैषधीयचरितम् १०.४१ ॥ |
| सुधांशुवंशाभरणं भवानिति श्रुतेऽपि नापैति विशेषसंशयः । कियत्सु मौनं वितता कियत्सु वाग्महत्यहो वञ्चनचातुरी तव ॥ नैषधीयचरितम् ९.१५ ॥ |
| सुधाभुजो यत्परिपीय तुच्छमेतं वितन्वन्ति तदर्हमेव । पुरा निपीयास्य पितापि सिन्धुरकारि तुच्छः कलशोद्भवेन ॥ नैषधीयचरितम् २२.६९ ॥ |
| सुधामधाम्नां रणधीर घर्षणो, धुतारि-पक्षो द्विजधर्मपक्षपाः । ध्रुवं धरा- धेनुक- धीमतां कृते कृतेश एष श्रित वेश- पेशलः॥ प्रतापविजयः-१२४ ॥ |
| सुधारसोद्वेलनकेलिमक्षरस्रजा सृजान्तर्मम कर्णकूपयोः । दृशौ मदीये मदिराक्षि कारय स्मितश्रिया पायसपारणाविधिम् ॥ नैषधीयचरितम् ९.११३ ॥ |
| सुधासरःसु त्वदनङ्गतापः शान्तो न नः किं पुनरप्सरःसु । निर्वाति तु त्वन्ममताक्षरेण सूनाशुगेषोर्मधुसीकरेण ॥ नैषधीयचरितम् ८.१ ॥ |
| सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमेथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ चन्द्रालोकः६.१७ ॥ |
| सुप्तोऽयं सखि सुप्यतामिति गताः सख्यस्ततोऽनन्तरं प्रेमावासितया मया सरलया न्यस्तं मुखं तन्मुखे । ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चितो लज्जासीन् मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः ॥ अमरुशतकम्-३३॥ |
| सुभ्रुवामधिपयोधरपीठं पीडनैस्त्रुटितवत्यपि पत्युः । णुक्तमौक्तिकलघुगुणशेषा हारयष्चिरभवत्गुरुरेव ॥ शिशुपालवधम् १०.८७ ॥ |
| सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः । छेत्ताः संयानां च क्लिश्यन्ते लोभमोहिताः ॥ नीतिसंग्रहस्य मित्र-१.२६ ॥ |
| सुमेखलाः सिततरदन्तचारवः समुल्लसत्तनुपरिधानसंपदः । रणैषिणां पुलकभृतोऽधिकन्धरं ललम्बिरे सदसिलताः प्रिया इव ॥ शिशुपालवधम् १७..२५ ॥ |
| सुरक्त- सत्केशर- रङ्गरञ्जितः, सुधामरश्चञ्चल चन्द्रहासमः । सुधीर - हस्त व्यजितः सहस्वधा, जहार हहो! हृदयं न कस्य सः॥ प्रतापविजयः-१२५ ॥ |
| सुरगज इव दन्तैर्भग्नदैत्यासिधारैर्नय इव पणबन्धव्यक्तयोगैरुपायैः । हरिरिव युगदीर्घैर्दोर्भिरंषैस्तदीयैः पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥ रघुवंशम् १०.८७ ॥ |
| सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोऽपि ते । अथ चास्तमिताऽस्यहो बत धिगिमां देहभृतामसारतां ॥ रघुवंशम् ८.५१ ॥ |
| सुरपरिवृढः कर्णात्प्रत्यग्रहीत्किल कुण्डलद्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः । विधुरुदयभागेकं तत्र व्यलोकि विलोक्यते नवतरकरस्वर्णस्रावि द्वितीयमहर्मणिः ॥ नैषधीयचरितम् १९.४३ ॥ |
| सुरभिणिश्वसिते दधतस्तृषं नवसुधामधुरे च तवाधरे । अलमलेरिव गन्धरसावमू मम न सोमनसौ मनसो मुदे ॥ शिशुपालवधम् ६.१२ ॥ |
| सुरसरिति परं तपोऽधिगच्छन्विधृतपिशङ्गबृहज्जटाकलापः । हविरिव विततः शिखासमूहैः समभिलषन्नुपवेदि जातवेदाः ॥ किरातार्जुनीयम् १०.१२ ॥ |
| सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् । चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः ॥ कुमारसंभवम् ३.२०॥ |
| सुरापराधस्तव वा कियानयं स्वयंवरायामनुकम्प्रता मयि । गिरापि वक्ष्यन्ति मखेषु तर्पणादिदं न देवा मुखलज्जयैव ते ॥ नैषधीयचरितम् ९.१५३ ॥ |
| सुरासुराणामथवाऽत्र सङ्गरे, स्ववर्गसम्पाद्यविधेः सहायकः । समागतः किं सहसा स-सम्भ्रमः, सशस्त्र एषः सुर सैन्य-नायकः ॥ प्रतापविजयः- ११७ ॥ |
| सुरेज्यमित्रभाग्येषु चाष्टम्यां तैतिले हरौ । शुक्रदृष्टे तनौ सौम्यवारे सन्धानमिष्यते ॥ मुहूर्त.नक्षत्रप्रकरणम् ४२॥ |
| सुरेन्द्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः । तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः ॥ रघुवंशम् ३.११ ॥ |
| सुरेषु नापश्यदवैक्षताक्ष्णोर्निमेषमुर्वीभृति संमुखी सा । इह त्वमागत्य नले मिलेति संज्ञानदानादिव भाषमाणम् ॥ नैषधीयचरितम् १४.१९ ॥ |
| सुरेषु पश्यन्निजसापराधतामियत्प्रयस्यापि तदर्थसिद्धये । न कूटसाक्षीभवनोचितो भवान्सतां हि चेतःशुचितात्मसाक्षिका ॥ नैषधीयचरितम् ९.१२९ ॥ |
| सुरेषु मालाममलामपश्यन्नले तु बाला मलिनीभवन्तीम् । इमां किमासाद्य नलोऽद्य मृद्वीं श्रद्धास्यते मामिति चिन्तयेव ॥ नैषधीयचरितम् १४.२२ ॥ |
| सुरेषु संदेशयसीदृशीं बहूं रसस्रवेण स्तिमितां न भारतीम् । मदर्पिता दर्पकतापितेषु या प्रयाति दावार्दितदाववृष्टिताम् ॥ नैषधीयचरितम् ९.१९ ॥ |
| सुलभैः सदा नयवतायवता निधिगुह्यकाधिपरमैः परमैः । अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती ॥ किरातार्जुनीयम् ५.२० ॥ |
| सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः । मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः ॥ रघुवंशम् ८.३३ ॥ |
| सुवर्णशैलादवतीर्य तूर्णं स्ववाहिनीवारिकणावकीर्णैः । तं वीजयामः स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यः ॥ नैषधीयचरितम् ३.२२ ॥ |
| सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात् । अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ॥ नैषधीयचरितम् २.२७ ॥ |

| |
|---|
| सुसंहतैर्दधदपि धाम नीयते तिरस्कृतिं बहुभिरसंशयं परैः । यतः क्षितेरवयवसंपदोऽणवस्त्विषां निधेरपि वपुरावरीषत ॥ शिशुपालवधम् १७..५९ ॥ |
| सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये । विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ किरातार्जुनीयम् २.४५ ॥ |
| सुहृदमग्निमुदञ्चयितुं स्मरं मनसि गन्धवहेन मृगीदृशः । अकलि निःश्वसितेन विनिर्गमानुमितनिह्नुतवेशनमायिता ॥ नैषधीयचरितम् ४.१४ ॥ |
| सुहृदां हितकामानां यः शृणोति न भाषितम् । विपत्सन्निहिता तस्य स नरः शत्रुनन्दनः  ॥ नीतिसंग्रहस्य मित्र-१.७५ ॥ |
| सूक्ष्मे घने नैषधकेशपाशे निपत्य निस्पन्दतरीभवद्भ्याम् । तस्यानुबन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ॥ नैषधीयचरितम् ८.१३ ॥ |
| सूतविशृअमदकौतुकिभावं भावबोधचतुरं तुरगाणाम् । तत्र नेत्रजनुषः फलमेते नैषधं बुबुधिरे विबुधेन्द्राः ॥ नैषधीयचरितम् ५.६ ॥ |
| सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः, स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः । आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं, तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना ॥ नीतिशतकम् २५ ॥ |
| सूरं न सौर इव नेन्दुमवीक्ष्य तस्मिन्नाश्नाति यस्तदितरत्रिदशानभिज्ञः । तस्यैन्दवस्य भवदास्यनिरीक्षयैव दर्शे श्नतोऽपि न भवत्यवकीर्णिभावः ॥ नैषधीयचरितम् ११.७६ ॥ |
| सूर्यः सितो भूमिसुतोऽथ राहुः शनिः शशी ज्ञश्च बृहस्पतिश्च । प्राच्यादितो दिक्षु विदिक्षु चापि दिशामधीशाः क्रमतः प्रदिष्टाः ॥ मुहूर्त.यात्राप्रकरणम् ४९॥ |
| सूर्यभात्त्रित्रिभे चान्द्रे सूर्यविच्छुक्रपङ्गवः । चन्द्रारेज्यागुशिखिनो नेष्टा होमाहुतिः खले ॥ मुहूर्त.नक्षत्रप्रकरणम् ३५॥ |
| सूर्यभाद्वेदगोतर्कदिग्विश्वनखसम्मिते । चन्द्रर्क्षे रवियोगाः स्युर्दोषसङ्घविनाशकाः ॥ मुहूर्तचिन्त.२७॥ |
| सूर्यर्क्षाद्युगभैः शिरस्यथ फलं लक्ष्मीस्ततः कोणभै- र्नागैरुद्वसनं ततो गजमितैः शाखासु सौख्यं भवेत् । देहल्यां गुणभैर्भृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यं चक्रमिदं विलोक्य सुधिया द्वारं विधेयं शुभम् ॥ मुहूर्त.वास्तुप्रकरणम् २९॥ |
| सूर्यर्क्षाद्रसभैरधः स्थलगतैः पाको रसैः संयुतः शीर्षे युग्ममितैः शवस्य दहनं मध्ये युगैः सर्पभीः। प्रागाशादिषु वेदभैः स्वसुहृदां स्यात्सङ्गमो रोगभीः क्वाथादेः करणं सुखं च गदितं काष्ठाविसंथापने ॥ मुहूर्त.नक्षत्रप्रकरणम् ४९॥ |
| सूर्यादिवारे तिथयो भवन्ति मघाविशाखाशिवमूलवह्निः । ब्राह्मं करोऽर्काद्यमघण्टकाश्च शुभे विवर्ज्या गमने त्ववश्यम् ॥ मुहूर्तचिन्त.९ ॥ |
| सूर्यारसौम्यास्फुजितोऽक्षनागसप्ताद्रिघस्रान्विधुरग्निनाडीः । तमोयमेज्यास्त्रिरसाश्विमासान् गन्तव्यराशेः फलदाः पुरस्तात् ॥ मुहूर्त.संक्रान्तिप्रकरणम्  १७॥ |
| सूर्ये षट्स्वरनागदिङ्मनुमिताश्चन्द्रेऽब्धिषट्कुञ्जरा- ङ्कार्काविश्वपुरन्दराः क्षितिसुते व्द्यब्ध्यग्नितर्को दिशः । सौम्ये व्द्यब्धिगजाङ्कदिङ्मनुमिता जीवे द्विषड्भास्कराः शक्राख्यास्तिथयः कलाश्च भृगुजे वेदेषुतकग्रहाः ॥ मुहूर्तचिन्त. ३८॥ |
| सूर्येऽङ्गनासिंहधटेषु शैवे स्तम्भोऽलिकोदण्डभृगेषु वायौ । मीनाजकुम्भे निरृतौ विवाहे स्थाप्योऽग्निकोणे वृषयुग्मकर्के ॥ मुहूर्त.विवाहप्रकरणम् ९८॥ |
| सूर्येऽर्कमूलोत्तरयुष्यदास्रं चन्द्रे श्रुतिब्राह्मशशीज्यमैत्रम् । भौमेऽश्व्यहिर्बुश्न्यकृशानुसार्पं ज्ञे ब्राह्ममैत्रार्ककृशानुचान्द्रम् ॥ मुहूर्तचिन्त.२८ ॥ |
| सूर्येशपञ्चाग्निरसाष्टनन्दा वेदाङ्गसप्ताश्विगजांङ्कशैलाः । सूर्याङ्गसप्तोरगगोदिगीशा दग्धा विषाख्याश्च हुताशनाश्च ॥ मुहूर्तचिन्त.८ ॥ |
| सूर्यो रसान्त्ये खयुगेऽग्निनन्दे शिवाक्षयोर्भौमशनी तमश्च । रसाङ्कयोर्लाभशरे गुणान्त्ये चन्द्रोऽम्बराब्धौ गुणनन्दयोश्च ॥ मुहूर्त.संक्रान्तिप्रकरणम्  १ ॥ |
| सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः । तदपि तत्क्षणभङ्गि करोति चेदहह! कष्टमपण्डितता कष्टम् ॥ नीतिशतकम् ९२ ॥ |
| सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः । परिस्फुरल्लोलशिखाग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निं ॥ किरातार्जुनीयम् ३.२० ॥ |
| सृजन्तु पाणिग्रहमङ्गलोचिता मृगीदृशः स्त्रीसमयस्पृशः क्रियाः । शृउतिस्मृतीनां तु वयं विदध्महे विधीनिति स्माह च निर्ययौ च सः ॥ नैषधीयचरितम् १५.७ ॥ |
| सृजामि किं विघ्नमिदंनृपस्तुतावितीङ्गितैः पृच्छति तां सखीजने । स्मिताय वक्त्रं यदवक्रयद्वधूस्तदेव वैमुख्यमलक्षि तन्नृपे ॥ नैषधीयचरितम् १२.६८ ॥ |
| सृष्टातिविश्वा विधिनैव तावत्तस्यापि नीतोपरि यौवनेन । वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्पत्रपारमेव ॥ नैषधीयचरितम् ७.१०८ ॥ |
| सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकं । विश्वासाय विहंगानामालवालाम्बुपायिनाम् ॥ रघुवंशम् १.५१ ॥ |
| सेतुत्वं दधति पयोमुचां विताने संरम्भादभिपततो रथाञ्जवेन । आनिन्युर्नियमितरश्मिभुग्नघोणाः कृच्छ्रेण क्षितिमवनामितस्तुरङ्गाः ॥ किरातार्जुनीयम् ७.१९ ॥ |
| सेना परिच्छदस्तस्य द्वयमेवार्थसाधनं । शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥ रघुवंशम् १.१९ ॥ |
| सेनानिवेशान्पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभासः । भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेषेषु च साभ्यसूयाः ॥ रघुवंशम् ७.२ ॥ |
| सेन्दुक्रूरखगोदयांशमुदयास्ताशुद्धिचण्डायुधान् खार्जूरं दशयोगयोगसहितं जामित्रलत्ताव्यधम् । बाणोपग्रहपापकर्तरि तथा तिथ्यृक्षवारोत्थितं दुष्टं योगमथार्धयामकुलिकाद्यान्वारदोषानपि ॥ मुहूर्त.विवाहप्रकरणम् १०८॥ |
| सेयं न धत्तेऽनुपपत्तिमुच्चैर्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने । ममौ स भद्रं चुलुके समुद्रस्त्वयात्तगाम्भीर्यमहत्त्वमुद्रः ॥ नैषधीयचरितम् ८.४५ ॥ |
| सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता । दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ॥ रघुवंशम् १३.६३ ॥ |
| सेयं ममैतद्विरहार्तिमूर्च्छातमीविभातस्य विभाति संध्या । महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना ॥ नैषधीयचरितम् ७.४५ ॥ |
| सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या । तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम् ॥ नैषधीयचरितम् ७.२८ ॥ |

| |
|---|
| सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः । न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥ रघुवंशम् २.५५ ॥ |
| सेयमुच्चतरता दुरितानामन्यजन्मनि मयैव कृतानाम् । युष्मदीयमपि या महिमानं जेतुमिच्छति कथापथपारम् ॥ नैषधीयचरितम् ५.१०४ ॥ |
| सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम् । हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति ॥ नीतिसंग्रहस्य मित्र-१.१३२ ॥ |
| सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः । पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ रघुवंशम् १.३८ ॥ |
| सेव्याधमर्णयुवतीनगरादिभं चेत्पूर्वं हि भृत्यधनिभर्तृपुरादिसद्भात् । सेवाविनाशधननाशनभर्तृनाशग्रामादिसौख्यहृदिदं क्रमशः प्रदिष्टम् ॥ मुहूर्त.विवाहप्रकरणम् ३८॥ |
| सेव्योऽपि सानूनयमाकलनाय यन्त्रा नीतेन वन्यकरिदानकृताधिवासः । नाभाजि केवलमभाजि गजेन शाखी नान्यस्य गन्धमपि मानभ-तः सहन्ते ॥ शिशुपालवधम् ५.४२ ॥ |
| सैकतं च सरयूं विवृण्वतीं श्रोणिबिम्बं इव हंसमेखलं । स्वप्रियाविलसितानुकारिणीं सौधजाल्विवरैर्व्यलोकयत् ॥ रघुवंशम् १९.४० ॥ |
| सैका तिथिर्वारयुता कृताप्ता शेषे गुणेऽभ्रे भुवि वह्निवासः । सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च ॥ मुहूर्त.नक्षत्रप्रकरणम् ३६ ॥ |
| सैवाहं प्रमदा नृणामधिगतावेतौ च तौ नूपुराव् एषास्माकमवृत्तिरेव सहजव्रीडाधनः स्त्रीजनः । इत्थं लज्जितया स्मृतेरुपगमे मत्वा तनुं सम्भ्रमात्पुम्भावः प्रथमं रतिव्यतिकरे मुक्तस्ततो वल्लभः ॥ अमरुशतकम्-९५॥ |
| सैषा स्थली चकित-चेतक चङ्क्रमाणां, सैषा स्थली कुटिल - कुन्त- पराक्रमाणां । सैषा स्थली प्रियतमाप्यसुतोऽमराणां सैषा स्थली भयकरी नर-वामराणाम् ॥ प्रतापविजयः-१७० ॥ |
| सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् । अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥ रघुवंशम् १३.२३ ॥ |
| सोऽधिकारमभिकः कुलोचितं काश्चन स्वयमवर्तयत्समाः । तं निवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोऽभवत् ॥ रघुवंशम् १९.४ ॥ |
| सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम् । तत्र तत्र विजहार संपतन्नप्रमेयगतिना ककुद्मता॥ कुमारसंभवम् ७.२१॥ |
| सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणं । भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥ रघुवंशम् १.७४ ॥ |
| सोऽस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतम् । तेन शैलगुरुमप्यपातयत्पाण्डुपत्त्रमिव ताडकासुतम् ॥ रघुवंशम् ११.२८ ॥ |
| सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः । नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ॥ रघुवंशम् ७.६० ॥ |
| सोऽस्मद्विधानां प्रणयैः कृशीकृतो न तेन कश्चिद्विभवैर्विमानितः। निदाघकालेष्विव सोदको ह्रदो नृणां स तृष्णामपनीय शुष्कवान्॥ (मृच्छकटिकम् १.४६) |
| सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमं । करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयं ॥ रघुवंशम् १०.४५ ॥ |
| सोऽहं सपर्याविधिभाजनेन मत्वा बहवन्तं प्रभुशब्दशेषम् । अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥ रघुवंशम् ५.२२ ॥ |
| सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् । आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ रघुवंशम् १.५ ॥ |
| सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः । प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥ रघुवंशम् १.६८ ॥ |
| सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितया पतद्भिः । छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैरिव तस्य बाणैः ॥ किरातार्जुनीयम् १७.२८ ॥ |
| सोढुं तस्य द्विषो नालमवयोधरवा रणं । ऊर्णुनाव यशश्च द्यामपयोधरवारणं ॥ शिशुपालवधम् १९.२१ ॥ |
| सोत्कण्ठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलितरुचः पुरान्मघोनः । रामाणां उपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥ किरातार्जुनीयम् ७.२ ॥ |
| सोपचारमुपशान्तविचारं सानुतर्षमनुतर्षपदेन । ते मुहूर्तमथ मूर्तमपीप्यन्प्रेम मानमवधूय वधूः स्वाः ॥ शिशुपालवधम् १०.२ ॥ |
| सोमाय कुप्यन्निव विप्रयुक्तः स सोममाचामति दूयमानम् । नामापि जागर्ति हि यत्र शत्रोस्तेजस्विनस्तं कतमे सहन्ते ॥ नैषधीयचरितम् ८.७४ ॥ |
| सोष्मणः स्तनशिलाशिखराग्रादात्तघर्मसलिलैस्तरुणानां । उच्छ्वसत्कमलचारुषु हस्तैर्निम्ननाभिसरसीषु निपेते ॥ शिशुपालवधम् १०.५८ ॥ |
| सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात् । स कथाशेषतां यातः समालिङ्ग्य मरुत्सखम् ॥ चन्द्रालोकः४.८ ॥ |
| सौख्यं क्लेशो भीतिरर्थागमश्च शून्यं नैः स्वं निःस्वता मिश्रता च । द्रव्यक्लेशो दुःखमिष्टाप्तिरर्थो लाभः सौख्यं मङ्गलं वित्तलाभः ॥ मुहूर्त.यात्राप्रकरणम् २१॥ |
| सौख्यं लाभः कार्यसिद्धिश्च कष्टं क्लेशः कष्टात्सिद्धिरर्थो धनं च । मृत्युर्लाभो द्रव्यलाभश्च शून्यं शून्यं सौख्यं मृत्युरत्यन्तकष्टम् ॥ मुहूर्त.यात्राप्रकरणम् २३॥ |
| सौगन्धं दधदपि काममङ्गनानां दूरत्वाद्गतमाननोपमानं । नेदीयो जितमिति लज्जयेव तासामालोले पयसि मनोत्पलं ममज्ज ॥ शिशुपालवधम् ८.४८ ॥ |
| सौमित्रिणा तदनु संससृजे स चैनमुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग । रूढेन्द्रजित्प्रहरणव्रणकर्कशेन क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥ रघुवंशम् १३.७३ ॥ |
| सौमित्रिणा सावरजेन मन्दमाधूतवालव्यजनो रथस्थः । धृतातपत्रो भरतेन साक्षादुपायसंघात इव प्रवृद्धः ॥ रघुवंशम् १४.११ ॥ |
| सौम्यायने ज्येष्ठतपोऽन्त्यमाधवे यत्रानिवृत्तौ नृपतेर्नवे गृहे । स्याद्वेशनं द्वाःस्थमृदुध्रुवोऽड्भिर्जन्मर्क्षलग्नोपचयोदये स्थिरे ॥ मुहूर्त.गृहप्रवेशप्रकरणम् १॥ |
| सौम्यायने सूर्यविधू तदोत्तरां प्राचीं व्रजेत्तौ यदि दक्षिणायने । प्रत्यग्यमाशां च तयोर्दिवानिशं भिन्नायनत्वेऽथ वधोऽन्यथा भवेत् ॥ मुहूर्त.यात्राप्रकरणम् ३९॥ |
| सौवर्गवर्गैरमृतं निपीय कृतोऽह्नि तुच्छः शशलाञ्छनोऽयम् । पूर्णोऽमृतानां निशि तेऽत्र नद्यां मग्नः पुनः स्यात्प्रतिमाच्छलेन ॥ नैषधीयचरितम् २२.१२३ ॥ |
| स्कन्धधूननविसारिकेसरक्षिप्तसागरमहाप्लवामयं । उद्धृतामिव मुहूर्तमैक्षत स्थूलनासिकवपुर्वसुन्धरां ॥ शिशुपालवधम् १४.७१ ॥ |

| |
|---|
| स्कन्धाधिरूढोज्ज्वलनीलकण्ठानुर्वीरुहः श्लिष्टतनूनहीन्द्रैः । प्रनर्तितानेकलताभुजाग्रान्रुद्राननेकानिव धारयन्तम् ॥ शिशुपालवधम् ४.७॥ |
| स्खर्वमाख्यदमरौघनिवासं पर्वतं क्वचन चम्पकसंपत् । मल्लिकाकुसुमराशिरकाऋषीद्यत्र च स्फटिकसानुमनुच्चम् ॥ नैषधीयचरितम् २१.२८ ॥ |
| स्खलन्ती नक्वचित्तैक्ष्णादभ्यग्रफलशालिनी । अमोचि शक्तिः शक्तिकैर्लोहजा न शरीरजा ॥ शिशुपालवधम् १९.५९ ॥ |
| स्तनंधयन्तं तनयं विहाय विलोकनाय त्वरया व्रजन्ती । संप्रस्नुताभ्यां पदवीं स्तनाभ्यां सिषेच काचित्पयसा गवाक्षात् ॥ रघुवंशम् ७.१०* ॥ |
| स्तनद्वये तन्वि परं तवैव पृथौ यदि प्राप्स्यति नैषधस्य । अनल्पवैदग्ध्यविवर्धिनीनां पत्त्रावलीनां वलना समाप्तिम् ॥ नैषधीयचरितम् ३.११८ ॥ |
| स्तनयोः समयेन याङ्गनानामभिनद्धारसमा न सा रसेन । परिरम्भरुचिं ततिर्जलानामभिनद्धा रसमानसारसेन ॥ शिशुपालवधम् ६.७५ ॥ |
| स्तनावटे चन्दनपङ्किलेऽस्या जातस्य यावद्युवमानसानाम् । हारावलीरत्नमयूखधाराकाराः स्फुरन्ति स्खलनस्य रेखाः ॥ नैषधीयचरितम् ७.८ ॥ |
| स्तनौ मांस-ग्रन्थी कनक-कलशावित्युपमिती मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम्। स्रवन्-मूत्र-क्लिन्नं करि-वर-शिर-स्पर्धि जघनं मुहुर्निन्द्यं रूपं कवि-जन-विशेषैर्गुरु-कृतम्॥॥ वैराग्यशतकम् १६ ॥ |
| स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् । स्रवन्मूत्रक्लिन्नं करिवरशिरस्पर्धि जघनम् मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ पुरुषार्थोपदेशः-28॥ |
| स्तब्धं बभूव गगनं चकिता धरित्री, यच्चेतकेन कटितः स सलीम- हस्ती। दिष्ट्या करीन्द्र-कृतपूर्ण पलायनेन प्राणानहो! यवनराई न जही स्व- भाग्यात् ॥ प्रतापविजयः-९४८ ॥ |
| स्तम्भं महान्तमुचितं सहसा मुमोच दानं ददावतितरां सरसाग्रहस्तः । बद्धपराणि परितो निगडानेयलावीत्स्वातन्त्र्यमुज्वलमवाप करेणुराजः ॥ शिशुपालवधम् ५.४८ ॥ |
| स्तम्भस्तथालम्भितमां नलेन भैमीकरस्पर्शमुदः प्रसादः । कंदर्पलक्ष्यीकरणार्पितस्य स्तम्भस्य दम्भं स चिरं यथापत् ॥ नैषधीयचरितम् १४.५९ ॥ |
| स्तम्भेषु योषित्प्रतियातनानामुत्क्रान्तवर्णक्रमधूसराणां । स्तनोत्तरीयाणि भवन्ति सङ्गान्निर्मोकपट्टाः फणिभिर्विमुक्ताः ॥ रघुवंशम् १६.१७ ॥ |
| स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः । मृषोत्तरं साक्षिणि हृत्सु न्ṛपामज्ञातृविज्ञापि ममापि तस्मिन् ॥ नैषधीयचरितम् ६.९१ ॥ |
| स्त्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग्वितरीतुमुत्तरम् । तदत्र मद्भाषितसूत्रपद्धतौ प्रबन्द्धृतास्तु प्रतिबन्द्धृता न ते ॥ नैषधीयचरितम् ९.३७ ॥ |
| स्त्रीपुंसव्यतिषञ्जनं जनयतः पत्युः प्रजानामभूदभ्यासः परिपाकिमः किमनयोर्दाम्पत्यसंपत्तये । आसंसारपुरन्ध्रिपूरुषमिथःप्रेमार्पणक्रीडयाप्येतज्जम्पतिगाढरागरचना प्राकर्षि चेतोभुवः ॥ नैषधीयचरितम् १५.९४ ॥ |
| स्त्रीपुंसौ प्रविभज्य जेतुमखिलावालोचितौचित्ययोर्नम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं त्वद्भ्रुवौ । त्वन्नासाच्छलनिह्नुतां द्विनलिकीं नालीकमुक्त्येषिणोस्त्वन्निश्वासलते मधुश्वसनजं वायव्यमस्त्रं तयोः ॥ नैषधीयचरितम् २१.१५१ ॥ |
| स्थगयन्त्यमूः शामितचातकार्तस्वरा जलदास्तडित्तुलितकान्तकार्तस्वराः । जगतीरिहस्फुरितचारुचामीकराः सवितुः कचित्कपिशयन्ति चामी कराः ॥ शिशुपालवधम् ४.२४॥ |
| स्थगिताम्बरक्षितितले परितस्तिमिरे जनस्य दृशमन्धयति । दधिरे रसाञ्जनमपूर्वतः प्रियवेश्मवर्त्म सुदृशो ददृशुः ॥ शिशुपालवधम् ९.२१ ॥ |
| स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः । विग्रहेण मदनस्य चारुणा सोऽभवत्प्रतिनिधिर्न कर्मणा ॥ रघुवंशम् ११.१३ ॥ |
| स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः । इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥ नीतिसंग्रहस्य मित्र-१.१०३ ॥ |
| स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः । तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥ नीतिसंग्रहस्य मित्र-१.१०४ ॥ |
| स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयापि तप्तम् । या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमुताङ्कशय्याम्॥ कुमारसंभवम् ७.६५॥ |
| स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति । पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ रघुवंशम् ५.१६ ॥ |
| स्थाने विधोर्वा मदनस्य सख्यं स शंभुनेत्रे ज्वलति प्रलीनः । अयं लयं गच्छति दर्शभाजि भास्वन्मये चक्षुषि चादिपुंसः ॥ नैषधीयचरितम् २२.८९ ॥ |
| स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या । पद्मेव नारायणमन्यथासौ लभेत कान्तं कथमात्मतुल्यम् ॥ रघुवंशम् ७.१३ ॥ |
| स्थायी जुगुप्सा बीभत्सो विभावाद्यैर्यथाक्रमम् । अनिष्टेक्षणनिष्ठीवमोहाद्याः संमताः क्रमाद् ॥ चन्द्रालोकः६.११ ॥ |
| स्थाल्यां वैदूर्यमय्यां पचति तिलकणांश्चन्दनैरिन्धनौघैः, सौवर्णैर्लाङ्गूलाग्रैर्विलिखतिवसुधामर्कमूलस्य हेतोः । कृत्वा कर्पूरखण्डान् वृतिमिह कुरुते कोद्रवाणां समन्तात्, प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥ नीतिशतकम् १०० ॥ |
| स्थितं विशुद्धे नभसीव सत्त्वे धाम्ना तपोवीर्यमयेन युक्तं । शस्त्राभिघातैस्तमजस्रमीशस्त्वष्टा विवस्वन्तमिवोल्लिलेख ॥ किरातार्जुनीयम् १७.४८ ॥ |
| स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः । जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥ रघुवंशम् २.६ ॥ |
| स्थितस्य रात्रावधिशय्य शय्यां मोहे मनस्तस्य निमज्जयन्ती । आलिङ्ग्य या चुम्बति लोचने सा निद्राधुना न त्वदृतेऽङ्गना वा ॥ नैषधीयचरितम् ३.१०८ ॥ |
| स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः । वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥ कुमारसंभवम् ५.२४ ॥ |
| स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्तु या । स्वरभेदमुपैतु या कथं कलितानल्पमुखारवा न वा ॥ नैषधीयचरितम् २.९८ ॥ |
| स्थितैरियद्भिर्युवभिर्विदग्धैर्दग्धेऽपि कामे जगतः क्षतिः का । एकाम्बुबिन्दुव्ययमम्बुराशेः पूर्णस्य कः शंसति शोषदोषम् ॥ नैषधीयचरितम् १०.६५ ॥ |

| |
|---|
| स्थितैव कण्ठे परिणम्य हारलता बभूवोदिततारवृत्ता । ज्योतिर्मयी यद्भजनाय विद्या मध्येङ्गमङ्केन भृता विशङ्के ॥ नैषधीयचरितम् १०.७९ ॥ |
| स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये । अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ रघुवंशम् १.२५ ॥ |
| स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तम् तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः । रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य॥ मेघदूतम्, पूर्वमेघः १९॥ |
| स्थिरा त्वमश्मेव भवेति मन्त्रवागनेशदाशास्य किमाशु तां ह्रिया । शिला चलेत्प्रेरणया नृणामपि स्थितेस्तु नाचालि बिडौजसापि सा ॥ नैषधीयचरितम् १६.३६ ॥ |
| स्नग्धाञ्जनश्यामतनूभिरुन्नतैर्निरन्तराला करिणां कदम्बकैः । सेना सुधाक्षालितसौधसंपदां पुरां बहूनां परभागमाप सा ॥ शिशुपालवधम् १२.६२ ॥ |
| स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयूखैः । सततमसितयामिनीषु शम्भो अमलयतीह वनान्तमिन्दुलेखा ॥ किरातार्जुनीयम् ५.४४ ॥ |
| स्नेहनिर्भरमदत्त वधूनामार्द्रतां वपुरसंशयमन्तः । यूनि गाढपरिरम्भिणि वस्त्रक्नोपमम्बु ववृषे यदनेन ॥ शिशुपालवधम् १०.४९ ॥ |
| स्नातकं गुरुमभीष्टमृत्विजं संयुजा च सह मेदिनीपतिं । अर्घभाज इति कीर्तयन्ति षट्ते च ते युगपदागताः सदः ॥ शिशुपालवधम् १४.५५ ॥ |
| स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वा ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले । आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ वैराग्यशतकम् ८८ ॥ |
| स्नात्वा यथाकामं असौ सदारस्तीरोपकार्यां गतमात्र एव । दिव्येन शून्यं वलयेन बाहुं उपोढनेपथ्यविधिर्ददर्श ॥ रघुवंशम् १६.७३ ॥ |
| स्नानवारिघटराजदुरोजा गौरमृत्तिलकबिन्दुमुखेन्दुः । केशशेषजलमौक्तिकदन्ता तं बभाज सुभगाप्लवनश्रीः ॥ नैषधीयचरितम् २१.१६ ॥ |
| स्नानाग्निपाकशयनास्त्रभुजश्च धान्य-भाण्डारदैवतगृहाणि च पूर्वतः स्युः । तन्मध्यतस्तु मथनाज्यपुरीषविद्याभ्यासाख्यरोदनरतौषधसर्वधाम ॥ मुहूर्त.वास्तुप्रकरणम् २१॥ |
| स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु । कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम् ॥ रघुवंशम् १६.५० ॥ |
| स्नान्तीनां बृहदमलोदबिन्दुचित्रै रेजाते रुचिरदृशामुरोजकुम्भौ । हाराणां मणिभिरुपाश्रितौ समन्तादुत्सूत्रैर्गुणवदुपघ्नकाम्ययेव ॥ शिशुपालवधम् ८.५३ ॥ |
| स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव । मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति ॥ अभिज्ञानशाकुन्तलम् २.२ ॥ |
| स्निग्धगम्भीरनिर्घोषं एकं स्यन्दनमास्थितौ । प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ रघुवंशम् १.३६ ॥ |
| स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुमृजांशुकाभाम् । नेपथ्यहीरद्युतिवारिवर्तिस्वच्छायसच्छायनिजालिजालाम् ॥ नैषधीयचरितम् १०.९४ ॥ |
| स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम् एते तीर्थाश्रमगिरिसरिद्गर्तकान्तारमिश्राः संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ (उत्तररामचरितम् २.१४) |
| स्निग्धाञ्जनश्यामरुचिः सुवृत्तो वध्वा इवाध्वंसितवर्णकान्तेः । विशेषको वा विशिशेष यस्याः श्रियं त्रिलिकीतिलकः स एव ॥ शिशुपालवधम् ३.६२ ॥ |
| स्निह्यन्ती दृशमपरा निधाय पूर्णं मूर्तेन प्रणयरसेन वारिणेव । कन्दर्पप्रवणमानाः सखीसिसिक्षालक्ष्येण प्रतियुवमञ्जलिं चकार ॥ शिशुपालवधम् ८.३५ ॥ |
| स्नेहच्छेदेऽपि साधूनां गुणा नायान्ति विक्रियाम् । भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ॥ नीतिसंग्रहस्य मित्र-१.९६ ॥ |
| स्नेहात्सभाजयितुमेत्य दिनान्यमूनि नीत्वोत्सवेन जनकोऽद्य गतो विदेहान् । देव्यास्ततो विमनसः परिसान्त्वनाय धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ (उत्तररामचरितम् १.७) |
| स्पर्शं तमस्याधिगतापि भैमी मेने पुनर्भ्रान्तिमदर्शनेन । नृपः स पश्यन्नपि तामुदीतः स्तम्भो न धर्तुं सहसा शशाक ॥ नैषधीयचरितम् ६.५२ ॥ |
| स्पर्शः पुरा परिचितो नियतं स एव सञ्जीवनश्च मनसः परितोषणश्च । सन्तापजां सपदि यः परिहृत्य मूर्च्छा- मानन्दनेन जडतां पुनरातनोति ॥ (उत्तररामचरितम् ३.१२) |
| स्पर्शभाजि विशदच्छविचारौ कल्पिते मृगदृशां सुरताय । सन्नतिं दधति पेतुरजस्रं दृष्टयः प्रियतमे शयने च ॥ शिशुपालवधम् १०.३९ ॥ |
| स्पर्शमुष्णमुचितं दधच्छिखी यददाह हविरद्भुतं न तत् । गन्धतोऽपि हुतहव्यसम्भवाद्देहिनामदहदोघमंहसाम् ॥ शिशुपालवधम् १४.२७ ॥ |
| स्पर्शातिहर्षादृतसत्यमत्या प्रवृत्य मिथ्याप्रतिलब्धबाधौ । पुनर्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ ॥ नैषधीयचरितम् ६.५३ ॥ |
| स्पर्शेन तत्र किल तत्तरुपत्रजन्मा यन्मारुतः कमपि संमदमादधाति । कौतूहलं तदनुभूय विधेहि भूयः श्रद्धां पराशरपुराणकथान्तरेऽपि ॥ नैषधीयचरितम् ११.३९ ॥ |
| स्पष्टं बहिः स्थितवतेरपि निवेदयन्तश्चेष्टाविशेषमनुजीविजनाय राज्ञां । वैतालिकाः स्फुटपदप्रकटार्थमुच्चैर्भोगावलीः कलगिरोऽवसरेषु पेठुः ॥ शिशुपालवधम् ५.६७ ॥ |

| |
|---|
| स्पष्टार्कसङ्क्रान्तिविहीनचांद्रो मासोऽधिमासः क्षयमासकस्तु । द्विसङ्क्रमस्तत्र विभागयोस्तस्तिथेर्हि मासौ प्रथमान्त्यसञ्ज्ञौ ॥ मुहूर्त.संक्रान्तिप्रकरणम् २० ॥ |
| स्पृशन् सशङ्कः समये शुचावङ् स्थितः कराग्रैरसमग्रपातिभिः । अधर्मधर्मोदकबिन्दुमौक्तिकैरलंचकारास्य वधूरहस्करः ॥ शिशुपालवधम् १.५८ ॥ |
| स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः । विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ किरातार्जुनीयम् २.३४ ॥ |
| स्फारे तादृशि वैरसेनिनगरे पुण्यैः प्रजानां घनं विघ्नं लब्धवअश्चिरादुपनतिस्तस्मिन्किलाभूत्कलेः । एतस्मिन्पुनरन्तरेऽन्तरमितानन्दः स भैमीनलावारादधुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः ॥ नैषधीयचरितम् १७.२२१ ॥ |
| स्फुचमिदमभिचारमन्त्र एव प्रतियुवतेरभिधानमङ्गनानां । वरतनुरमुनोपहूय पत्या मृदुकुसुमेन यदाहताप्यमूर्च्छत् ॥ शिशुपालवधम् ७.५८ ॥ |
| स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्य स्फुरति सुरमुनीनां मण्डलं व्यस्तमेत् । शकटमिव महीयः शैशवे शार्ङ्गपाणेश्चपलचरणकाब्जप्रेरणोत्तुङ्गिताग्रम् ॥ शिशुपालवधम् ११.२ ॥ |
| स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् । रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥ किरातार्जुनीयम् २.२७ ॥ |
| स्फुटति हारमणौ मदनोष्मणा हृदयमप्यनलंकृतमद्य ते । सखि हतास्मि तदा यदि हृद्यपि प्रियतमः स मम व्यवधापितः ॥ नैषधीयचरितम् ४.११ ॥ |
| स्फुटतु हृदयं कामं कामं करतु तनुं तनुं न सखि चटुलप्रेम्णा कार्यं पुनर्दयितेन मे । इति सरभसं मानाटोपाद् उदीर्य वचस्तया रमणपदवी सारङ्गाक्ष्या सशङ्कितमीक्षिता ॥ अमरुशतकम्-७१॥ |
| स्फुटत्यदः किं हृदयं त्रपाभराद्यदस्य शुद्धिर्विबुधैर्विबुध्यते । विदन्तु ते तत्त्वमिदं तु दन्तुरं जनानने कः करमर्पयिष्यति ॥ नैषधीयचरितम् ९.१२५ ॥ |
| स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरः शरं जिघृक्षुः । न तथा कृतवेदिनां करिष्यन्प्रियतां एति यथा कृतावदानः ॥ किरातार्जुनीयम् १३.३२ ॥ |
| स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः । जयमिच्छति तस्य जातशङ्के मनसीमं मुहुराददे वितर्क ॥ किरातार्जुनीयम् १३.२ ॥ |
| स्फुटमिवोज्वलकाञ्चकान्तिभिर्युतमशोकमशोभत चम्पकैः । विरहिणां हृदयस्य भिदाभृतः कपिशितं पिशितं मदनाग्निना ॥ शिशुपालवधम् ६.५ ॥ |
| स्फुटास्फुटप्रभेदेन प्रयोजनमपि द्विधा । विदुः स्फुटं तटस्थत्वादर्थगत्वाद् द्विधा बुधाः ॥ चन्द्रालोकः९.३ ॥ |
| स्फुटोत्पलाभ्यामलिदंपतीव तद्विलोचनाभ्यां कुचकुड्नलाशया । निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुः ॥ नैषधीयचरितम् ९.८५ ॥ |
| स्फुरच्छटोग्नप्रतडित्प्रगर्जन, महामद्- प्रान्त - विलोचनाञ्चलः । प्रचण्ड- कण्डूतिमलं रणङ्गतां विनाशयामास सहाय- वीरकृतैः ॥ प्रतापविजयः-१३६ ॥ |
| स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः पुरुसितगरुच्चञ्चच्चञ्चच्चञ्चूपुटस्फुटचुम्बितः । अपि मधुकरी कालिंमन्या विराजति धूमलच्छविरिव रवेर्लाक्षालक्ष्मीं करैरतिपातुकैः ॥ नैषधीयचरितम् १९.५ ॥ |
| स्फुरत्तुषारंशुमरीचिजालविनिह्नुताः स्फाटिकसौधपङ्क्तीः । आरुह्य नार्यः क्षणदासु यस्यां नभोगता देव्य इव व्यराजन्??४२ ॥ शिशुपालवधम् |
| स्फुरत्पिशङ्गमौर्वीकं धुनानः स बृहद्धनुः । धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥ किरातार्जुनीयम् १५.३९ ॥ |
| स्फुरत्प्रभामण्डलमानुसूयं सा बिभ्रती शाश्वतमङ्गरागं । रराज शुद्धेति पुनः स्वपुर्यै संदर्शित वह्निगतेव भर्त्रा ॥ रघुवंशम् १४ ॥ |
| स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनाः शान्तध्वन्तिसु रजनीषु द्युसरितः । भवाभोगोद्विग्नाः शिव शिव शिवेत्युच्चवचसः कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदशाम् ॥ वैराग्यशतकम् ८५ ॥ |
| स्फुरदधीरतडिन्नयना मुहुः प्रियमिवागलितोरुपयोधरा । जलधरावलिरप्रतिपालितस्वसमया समयाञ्जगतीधरम् ॥ शिशुपालवधम् ६.२५ ॥ |
| स्फुरदुज्वलाधरदलैर्विसदद्दशनांशुकेशकरैः परितः । धृतमुग्धगण्डफलकैर्विबभुर्विकसद्भिरास्यकमलैः प्रमदाः ॥ शिशुपालवधम् ९.४७ ॥ |
| स्फुरद्धनुर्निस्वनतद्धनाशौगप्रगल्भवृष्टिव्ययितस्य संगरे । निजस्य तेजःशिखिनः परश्शता वितेनुरिङ्गालमिवायशः परे ॥ नैषधीयचरितम् १.९ ॥ |
| स्फुरमाणनेत्रकुसुमोष्ठदलमभृतभूभृदङ्घ्रिपैः । धूतपृथुभुजलतं चलितैर्द्रुतवातपातवनविभ्रमं सदः ॥ शिशुपालवधम् १५.६० ॥ |
| स्फुरितकोटिसहस्रमरीचिना समचिनोत्कुलिशेन हरिर्यशः । स धनुषा युधि सायकवर्षिणा स्वनवता नवतामरसाननः ॥ रघुवंशम् ८.१२* ॥ |
| स्मर नृशंसतमस्त्वमतो विधिः सुमनसः कृतवान्भवदायुधम् । यदि धनुर्दृढमाशुगमायसं तव सृजेत्त्रिजगत्प्रलयं व्रजेत् ॥ नैषधीयचरितम् ४.८७ ॥ |
| स्मर स मद्दुरितैरफलीकृतो भगवतोऽपि भवद्दहनश्रमः । सुरहिताय हुतात्मतनुः पुनर्ननु जनुर्दिवि तत्क्षणमापिथ ॥ नैषधीयचरितम् ४.९६ ॥ |
| स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य । तस्मै स्वभूषादृषदंशुशिल्पं बलद्विषः कार्मुकमर्पयन्तीम् ॥ नैषधीयचरितम् १०.९९ ॥ |
| स्मरकृतां हृदयस्य मुहुर्दशां बहु वयन्निव निःश्वसितानिलः । व्यधित वाससि कम्पमदः श्रिते त्रसति कः सति नाश्रयबाधने ॥ नैषधीयचरितम् ४.१६ ॥ |
| स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभं । अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ॥ रघुवंशम् ८.६३ ॥ |
| स्मरमुखं हरनेत्रहुताशनाज्ज्वलदिदं चकृषे विधिना विधुः । बहुविधेन वियोगिवधैनसा शशमिषादथ कालिकयाङ्कितः ॥ नैषधीयचरितम् ४.७३ ॥ |
| स्मररागमयी वपुस्तमिस्रा परिसस्तार रवेरसत्यवशं । प्रियमाप दिवापि कोकिले स्त्री परितस्ताररवे रसत्वश्यं ॥ शिशुपालवधम् ६.७० ॥ |
| स्मररिपोरिव रोपशिखी पुरां दहतु ते जगतामपि मा त्रयम् । इति विधिस्त्वदिषून्कुसुमानि किं मधुभिरन्तरसिञ्चदनिर्वृतः ॥ नैषधीयचरितम् ४.८८ ॥ |
| स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः । अनपिधानपतत्तपनातपं तपनिपीतसरः सरसीरुहम् ॥ नैषधीयचरितम् ४.९ ॥ |

| |
|---|
| स्मरसखौ रुचिभिः स्मरवैरिणा मखमृगस्य यथा दलितं शिरः । सपदि संदधतुर्भिषजौ दिवः सखि तथा तमसोऽपि करोतु कः ॥ नैषधीयचरितम् ४.६७ ॥ |
| स्मरसरसमुरःस्थलेन पत्युर्विनिमयसंक्रमिताङ्गरागरागैः । भृशमतिशयखेदसम्पदेव स्तनयुगलैरितरेतरं निषण्णैः ॥ शिशुपालवधम् ७.६५ ॥ |
| स्मरसि स्मर ! मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् । च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा ॥ कुमारसंभवम् ४.८ ॥ |
| स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम् । नालक्षयत्साध्वससनहस्तः त्रस्तं शरं चापमपि स्वहस्तात् ॥ कुमारसंभवम् ३.५१॥ |
| स्मरस्य कम्बुः किमयं चकास्ति दिवि त्रिलोकीजयवादनीयः । कस्यापरस्योडुमयैः प्रसूनैर्वादित्रशक्तिर्घटते भटस्य ॥ नैषधीयचरितम् २२.२२ ॥ |
| स्मरस्य कीर्त्येव सितीकृतानि तद्दोःप्रतापैरिव तापितानि । अङ्गानि धत्ते स भवद्वियोगात्पाण्डूनि चण्डज्वरजर्जराणि ॥ नैषधीयचरितम् ८.७९ ॥ |
| स्मरस्यदो दाशरथिर्भवन् भवानमुं वनान्ताद्वनितापहारिणम् । पयोधिमाविद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति ॥ शिशुपालवधम् १.६८ ॥ |
| स्मरहुताशनदीपितया तया बहु मुहुः सरसं सरसीरुहम् । श्रयितुमर्धपथे कृतमन्तरा श्वसितनिर्मितमर्मरमुज्झितम् ॥ नैषधीयचरितम् ४.२९ ॥ |
| स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा । जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥ नैषधीयचरितम् १.३६ ॥ |
| स्मरार्धचन्द्रेषुनिभे क्रशीयसां स्फुटं पलाशेऽध्वजुषां पलाशनात् । स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम् ॥ नैषधीयचरितम् १.८४ ॥ |
| स्मराशुगीभूय विदर्भसुभ्रूवक्षो यदक्षोभि खलु प्रसूनैः । स्रजं सृजन्त्या तदशोधि तेषु यत्रैकया सूचिशिखां निखाय ॥ नैषधीयचरितम् ६.६७ ॥ |
| स्मराहुताशनमुर्मुरचूर्णतां दधुरिवाम्रवनस्य रजःकणाः । निपातिताः परितः पथिकव्रजानुपरि ते परितेपुरतो भृशम् ॥ शिशुपालवधम् ६.६ ॥ |
| स्मरेण निस्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामनायि । अनङ्गतामप्ययमाप्यमानः स्पर्धां न सार्धं विजहाति तेन ॥ नैषधीयचरितम् ३.१०९ ॥ |
| स्मरेन्धने वक्षसि तेन दत्ता संवर्तिका शैवलवल्लिचित्रा । रराज चेतोभवपावकस्य धूमाविला कीलपरम्परेव ॥ नैषधीयचरितम् ८.७६ ॥ |
| स्मरेषुमाथं सहसे मृदुः कथं हृदि द्रढीयः कुचसंवृते तव । निपत्य वैसारिणकेतनस्य वा व्रजन्ति बाणा विमुखोत्पतिष्णुताम् ॥ नैषधीयचरितम् ९.११ ॥ |
| स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत । त्यजन्त्यमूञ्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥ नैषधीयचरितम् १.५ ॥ |
| स्मर्यते तनुभृतां सनातनं न्याय्यमाचरितमुत्तमैर्नृभिः । ध्वंसते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ॥ किरातार्जुनीयम् १३.४२ ॥ |
| स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदङ्कारचये चिकित्सौ । निदानमौनादविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा ॥ नैषधीयचरितम् ३.१११ ॥ |
| स्मारं धनुर्यद्विधुनोज्झितास्या यास्येन भूतेन च लक्ष्मलेखा । एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबालभावम् ॥ नैषधीयचरितम् ७.२६ ॥ |
| स्मितश्रिया सृक्कणि लीयमानयावितीर्णया तद्गुणशर्मणेव सा । उपाहसत्कीर्त्यमहत्त्वमेव तं गिरां हि पारे निषधेन्द्रवैभवम् ॥ नैषधीयचरितम् १२.४१ ॥ |
| स्मितसरोरुहनेत्रसरोजलामतिसितङ्गविहङ्गहसद्दिवं । अकलयन्मुदितामिव सर्वतः स शरदन्तुरदिहमुखाम् ॥ शिशुपालवधम् ६.५४ ॥ |
| स्मितस्य संभावय सृक्वणा कणान्विधेहि लीलाचलचञ्चलं भ्रुवः । अपाङ्गरथ्यापथिकीं च हेलया प्रसद्य संधेहि दृशं ममोपरि ॥ नैषधीयचरितम् ९.१११ ॥ |
| स्मिताञ्चितां वाचमवोचदेनं प्रसन्नचेता नृपतिं प्रचेताः । प्रदाय भैमीमधुना वरौ तु ददामि तद्यौतककौतुकेन ॥ नैषधीयचरितम् १४.८२ ॥ |
| स्मितेच्छदन्तच्छदकम्पकिंचिद्दिगम्बरीभूतरदांशुवृन्दैः । आनन्दितोर्वीन्द्रमुखारविन्दैर्मन्दं नुदन्तीं हृदि कौमुदीनाम् ॥ नैषधीयचरितम् १०.१०३ ॥ |
| स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा । हेमेव कायप्रभयाङ्गशेषैस्तन्वी मतिं क्रामति मे न कापि ॥ नैषधीयचरितम् १०.१३४ ॥ |
| स्मितेन भावेन च लज्जया भिया पराङ्मुखैरर्धकटाक्षवीक्षितैः। वचोभिरीर्ष्याकलहेन लीलया समस्तभावैः खलु बन्धनं स्त्रियः ॥ पुरुषार्थोपदेशः-30॥ |
| स्मृतिवर्त्म तस्य न समस्तमपकृतमियाय विद्विषः । स्मर्तुमधिगतगुणस्मरणाः पटवो न दोषमखिलं खलूत्तमाः ॥ शिशुपालवधम् १५.४३ ॥ |
| स्मृत्वा स्थलाम्बुरुह कोरक - कोमलान्त्वां, तेजोमयीं कनकचम्पकगुच्छगौरीम् । यातोऽस्मि कामपि दशां विषमां ययाऽहं, संमोहितोऽस्मि जडितोऽस्म्यपरीकृतोऽस्मि ॥ प्रतापविजयः-७॥ |
| स्यन्दना नो चतुरगाः सुरेभा वाविपत्तयः । स्यन्दना नो च तुरगाः सुरेभावा विपत्तयः ॥ किरातार्जुनीयम् १५.१६ ॥ |
| स्याच्चेतो विशता येन सक्षता रमणीयता । शब्देऽर्थे च कृतोन्मेषं दोषमुद्घोषयन्ति तम् ॥ चन्द्रालोकः२.१ ॥ |
| स्यात्काव्यलिङ्गं वागर्थो नूतनार्थसमर्पकः । जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः ॥ चन्द्रालोकः ५.३८ ॥ |
| स्यात्तैतिले नागचतुष्पदे रविः सुप्तो निविष्टस् तुगरादिपञ्चके । किंस्तुघ्न ऊर्ध्वः शकुनौ सकौलवे नेष्टः समः श्रेष्ठ इहावर्षर्धणे ॥ मुहूर्त.संक्रान्तिप्रकरणम् १३॥ |
| स्यात्संपूर्णोपमा यत्र द्वयोरपि विधेयता । पद्मानीव विनिद्राणि नेत्राण्यासन्नहर्मुखे ॥ चन्द्रालोकः ५.१७ ॥ |
| स्यात्स्मृतिभ्रान्तिसंदेहैस्तदेवालङ्कृतित्रयम् । पङ्कजं पश्यतस्तस्याः मुखं मे गाहते मनः ॥ चन्द्रालोकः ५.३१ ॥ |
| स्यादग्निहोत्रविधिरुत्तरगे दिनेशे मिश्रध्रुवान्त्यशशिशक्रसुरेज्यधिष्ण्ये ।रिक्तासु नो शशिकुजेज्मभृगौ न नीचे नास्तं गते न विजिते न च शत्रुगेहे ॥ मुहूर्त.ग्न्याधानप्रकरणम् १॥ |
| स्यादङ्गयष्टिरित्येवंविधमाभासरूपकम् । अङ्गयष्टिधनुर्वल्लीत्यादि रूपितरूपकम् ॥ चन्द्रालोकः ५.२१ ॥ |
| स्याद् द्वादशांश इह राशित एव गेहं होराऽथ दृक्कनवमांशकसूर्यभागाः । त्रिंशांशकश्च षडिमे कथितास्तु वर्गाः सौम्यैः शुभं भवति चाऽशुभमेव पापैः ॥ मुहूर्त.विवाहप्रकरणम् ४२॥ |
| स्याद्द्वयर्थमिइह सन्दिग्धं नद्यां यान्ति पतत्त्रिणः । स्यादप्रतीतं शास्त्रैक-गम्यं वीता नुमादिवत् ॥ चन्द्रालोकः२.९ ॥ |

| |
|---|
| स्याद्भूषाघटनं त्रिषुष्करचरक्षिप्रध्रुवे रत्नयुक् तत्तीक्ष्णोग्रविहीनभे रविकुजे मेवालिसिंहे तनौ । तन्मुक्तासहितं चरध्रुवमृदुक्षिप्रे शुभे सत्तनौ तीक्ष्णोग्राश्विमृगे द्विदैवदहने शस्त्रं शुभं घट्टितम् ॥ मुहूर्त.नक्षत्रप्रकरणम् १९ ॥ |
| स्याद्व्याघातो यथाकारि वस्त्वन्यक्रियमुच्यते । यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ॥ चन्द्रालोकः ५.८६ ॥ |
| स्यानमल्लिका पाटलिका जपा च सङ्क्रान्तिवस्त्राशनवाहनादेः । नाशश्च तद्वृत्त्युपजीविनां च स्थितोपविष्टस्वपतां च नाशः ॥ मुहूर्त.संक्रान्तिप्रकरणम् १७॥ |
| स्यान्मिथ्याध्यवसायश्चेदसती साध्यसाधने । चन्द्रांशुसूत्रग्रथितां नभःपुष्पस्रजं वह ॥ चन्द्रालोकः३.७ ॥ |
| स्युर्धर्मे दस्रपुष्योरगवसुजलपद्वीशमैत्राण्यर्थे याम्याजाङ्घ्रीन्द्रकर्णादितिपितृपवनोडून्यथो भानि कामे । वह्न्यार्द्राबुध्न्यचित्रानिरृतिविधिभगाख्यानि मोक्षेऽथ रोहिण्याप्येन्द्वन्त्यर्क्षविश्वार्यमभदिनकरर्क्षाणि पथ्यादिराहौ ॥ मुहूर्त.यात्राप्रकरणम् १८॥ |
| स्रंसमानमुपयन्तरि वध्वाः श्लिष्टवत्युपसपक्षि रसेन । आत्मनैव रुरुधे कृतिनेव स्वसङ्गि वसनं जघनेन ॥ शिशुपालवधम् १०.४५ ॥ |
| स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति मां । विषमप्यमृतं क्वचिद्भवेदमृतं वा विषं ईश्वरेच्छया ॥ रघुवंशम् ८.४६ ॥ |
| स्रग्वासनादृष्टजनप्रसादः सत्येयमित्यद्भुतमाप भूपः । क्षिप्तामदृश्यत्वमितां च मालामालोक्य तां विस्मयते स्म बाला ॥ नैषधीयचरितम् ६.५ ॥ |
| स्रजा समालिङ्गयितुं प्रियं सा रसादधत्तैव बहुप्रयत्नम् । स्तम्भत्रपाभ्यामभवत्तदीये स्पन्दस्तु मन्दोऽपि न पाणिपद्मे ॥ नैषधीयचरितम् १४.२६ ॥ |
| स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः । अत्यारूढं रिपोः सोढं चन्दनेव भोगिनः ॥ रघुवंशम् १०.४३ ॥ |
| स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् । न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ॥ कुमारसंभवम् ३.५५॥ |
| स्रस्ताङ्गसन्धौ विगताशापाटवे रुजा निकामं विकलीकृते रथे । आप्तेन तत्क्षणा भिषजेव तत्क्षणं प्रचक्रमे लङ्घनपूर्वकः क्रमः ॥ शिशुपालवधम् १२.२५ ॥ |
| स्व- वैरि-सैन्ये, सहसा प्रवेशतः, स्ववेशतो भीमतमं तमो नयन् प्रतापसिंहो निजसिंहनादतः, प्रकम्पयामास न कस्य मानसम् ॥ प्रतापविजयः-४२ ॥ |
| स्वं दृष्ट्वा करजक्षतं मधुमदक्षीवा विचार्येर्ष्यया गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया । प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा कोपात्प्रस्फुरिताधरा यदवदत्तत्केन विस्मर्यते ॥ अमरुशतकम्-८५॥ |
| स्वं निवेश्य किल धाम राघवे वैष्णवं विदितविष्णुतेजसि । स्वस्तिदानमधिकृत्य चाक्षयं भार्गवोऽथ निजमाश्रमं ययौ ॥ रघुवंशम् ११.९१* ॥ |
| स्वं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलः सन् । किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः ॥ नैषधीयचरितम् १०.१३६ ॥ |
| स्वं रागादुपरि वितन्वतोत्तरीयं कान्तेन प्रतिवारितातपायाः । सच्छत्रादपरविलासिनीसमूहच्छायासीदधिकतरा तदापरस्याः ॥ शिशुपालवधम् ८.५ ॥ |
| स्वकर्मसन्तानविचेष्टितानि कालान्तरावर्तिशुभाशुभानि । इहैव दृष्टानि मयैव तानि जन्मान्तराणीव दशान्तराणि ॥ नीतिसंग्रहस्य मित्र-१.१९६ ॥ |
| स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् । कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादशृणोद्गुणोत्करम् ॥ नैषधीयचरितम् १.४२ ॥ |
| स्वकामसंमोहमहान्धकारनिर्वापमिच्छन्निव दीपिकाभिः । उद्गत्वरीभिश्छुरितं वितेने निजं वपुर्वायुसखः शिखाभिः ॥ नैषधीयचरितम् १४.६३ ॥ |
| स्वकेतुभिः पाण्डुरनीलपाटलैः समागताः शक्रधनुःप्रभाभिदः । असंस्थितां आदधिरे विभावसोर्विचित्रचीनांशुकचारुतां त्विषः ॥ किरातार्जुनीयम् १६.५८ ॥ |
| स्वकेलिलेशस्मितनिन्दितेन्दुनो निजांशदृक्तर्जितपद्मसंपदः । अतद्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ॥ नैषधीयचरितम् १.२३ ॥ |
| स्वक्षं सुपत्रं कनकोज्वलद्युतिं जवेन नागाञ्जितवन्तमुच्चकैः । आरुह्य तार्क्ष्यं नभसीव भूतले ययावनुद्घातमुखेन सोऽध्वना ॥ शिशुपालवधम् १२.२ ॥ |
| स्वगुणैराफलप्राप्तेराकृष्य गणिका इव । कामुकानिव नालीकांस्त्रिणन्ताः सहसामुचन् ॥ शिशुपालवधम् १९.६१ ॥ |
| स्वगोचरे सत्यपि वित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनां । नभश्चराणां उपकर्तुं इच्छतां प्रियाणि चक्रुः प्रणयेन योषितः ॥ किरातार्जुनीयम् ८.१३ ॥ |
| स्वच्छन्द-मन्द-गमना यवनाः गजाऽभाः, नन्दन्तु तावदिह नन्दन- कानने मे । वक्षो- विदारणकरं निनदं विधाय यावन्न सर्पति महामृगराज एषः ॥ प्रतापविजयः- १०४ ॥ |
| स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते । अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत् ॥ नीतिसंग्रहस्य मित्र-१.६९ ॥ |
| स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा- मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः । भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम- द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ काव्यप्रकाशः (प्रथमोल्लासः) ४ ॥ |
| स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठस्ताम्बूलद्युतिविशदो विलासिनीम् । वासश्च प्रतनु विविक्तमस्त्वितीयानाकल्पो यदि कुसुमेषुणा न शून्यः ॥ शिशुपालवधम् ८.७० ॥ |
| स्वजन्मराशेरिह वेधमाहुरन्ये ग्रहाधिष्ठितराशितः सः । हिमाद्रिविन्ध्यान्तर एव वेधो न सर्वदेशेष्विति काश्यपोक्तिः ॥ मुहूर्त.संक्रान्तिप्रकरणम् ५॥ |
| स्वजीवमप्याऋतमुदे ददद्भ्यस्तव त्रपा नेदृशबद्धमुष्टेः । महयं मदीयान्यदसूनदित्सोर्धर्मः कराद्भ्रश्यति कीर्तिधौतः ॥ नैषधीयचरितम् ३.८५ ॥ |
| स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः । जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भया ॥ नैषधीयचरितम् २.२१ ॥ |
| स्वधाकृतं यत्तनयैः पितृभ्यः श्रद्धापवित्रं तिलचित्रमम्भः । चन्द्रं पितृस्थानतयोपतस्थे तदङ्करोचिःखचिता सुधैव ॥ नैषधीयचरितम् २२.१२१ ॥ |
| स्वनाम यन्नाम मुधाभ्यधामहो महेन्द्रकार्यं महदेतदुज्झितम् । हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथः सितीकृतः ॥ नैषधीयचरितम् ९.१२३ ॥ |
| स्वप्नकीर्तितविपक्षमङ्गनाः दर्शनेन कृतखण्डनव्यथाः । प्रच्छदान्तगलिताश्रुबिन्दुभिः क्रोधभिन्नवलयैर्विवर्तनैः ॥ रघुवंशम् १९.२२ ॥ |

| |
|---|
| स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मग्नः कटाक्षः श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनूमञ्जरीसौकुमार्ये । नासा श्वासाधिवासेऽधरमधुनि रसज्ञा चरित्रेषु चित्तं तन्नस्तन्वङ्गि कैश्चिन्न करणहरिणैर्वागुरा लङ्घितासि ॥ नैषधीयचरितम् ८.१०६ ॥ |
| स्वप्रकाश जड एष जनस्ते वर्णनं यदभिलष्यति कर्तुम् । नन्वहर्पतिमहः प्रति स स्यान्न प्रकाशनरसस्तमसः किम् ॥ नैषधीयचरितम् २१.५४ ॥ |
| स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी । साक्षादप्सरसो विमानकलितव्योमान एवाभवद्यन्न प्राप निमेषमभ्रतरसा यान्ती रसादध्वनि ॥ नैषधीयचरितम् २.१०४ ॥ |
| स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते । तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ॥ नीतिसंग्रहस्य मित्र-१.१९४ ॥ |
| स्वभुजद्वयकेवलायुधश्चतुरङ्गामपहाय वाहिनीं । बहुशः सह शक्रदन्तिना स चतुर्दन्तमगच्छदाहवं ॥ शिशुपालवधम् १६.६९ ॥ |
| स्वमुकुलमयैर्नेत्रैरन्धंभविष्णुतया जनः किमु कुमुदिनीं दुर्व्याचष्टे रवेरनवेक्षिकाम् । लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये शृणुत शृणुतासूर्यपश्या न सा किल भाविनी ॥ नैषधीयचरितम् १९.३६ ॥ |
| स्वयं कथाभिर्वरपक्षसुभ्रुवः स्थिरीकृतायाः पदयुग्ममन्तरा । परेण पश्चान्निभृतं न्यधापयद्ददर्श चादर्शतलं हसन्खलु ॥ नैषधीयचरितम् १६.५४ ॥ |
| स्वयं तदङ्गेषु गतेषु चारुतां परस्परेणैव विभूषितेषु च । किमूचिरेऽलंकरणानि तानि तद्दृथैव तेषां करणं बभूव यत् ॥ नैषधीयचरितम् १५.४८ ॥ |
| स्वयं विधाता सुरदैत्यरक्षसामनुग्रहापग्रहयोर्यदृच्छया । दशाननादीनभिराद्धदेवतावितीर्णवीर्यातिशयान् हसत्यसौ ॥ शिशुपालवधम् १.७१ ॥ |
| स्वयं संराध्यैवं शतमखं अखण्डेन तपसा परोच्छित्त्या लभ्यामभिलषति लक्ष्मीं हरिसुते । मनोभिः सोद्वेगैः प्रणयविहतैर्ध्वस्तरुचयः सगन्धर्मा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥ किरातार्जुनीयम् १०.६३ । |
| स्वयंकृतेप्रसादस्य तस्याह्नो भानुमानिव । समयावधिमप्राप्य नान्तायालं भवानपि ॥ शिशुपालवधम् २.११० ॥ |
| स्वयंवरं भीमनरेन्द्रजाया दिशः पतिन प्रविवेश शेषः । प्रयातु भारं स निवेश्य कस्मिन्नहिर्महीगौरवसासहिर्यः ॥ नैषधीयचरितम् १०.१५ ॥ |
| स्वयंवरस्याजिरमाजिहानां विभाव्य भैमीमथ भूमिनाथैः । इदं मुदा विह्वलचित्तभावादवापि खण्डाक्षारजिह्मजिह्वम् ॥ नैषधीयचरितम् १०.११२ ॥ |
| स्वयंवरोद्वाहमहे वृणीष्व हे महेन्द्रशैलस्य महेन्द्रमागतम् । कलिङ्गजानां स्वकुचद्वयश्रिया कलिं गजानां शृणु तत्र कुम्भयोः ॥ नैषधीयचरितम् १२.२४ ॥ |
| स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्टा तपसस्तया पुनः । तदप्यपाकीर्णमतः प्रियंवदां वदन्त्येपर्णेति च तां पुराविदः ॥ कुमारसंभवम् ५.२८ ॥ |
| स्वयमेव शन्तनुतनूज यमपि गणमर्घ्यमभ्यधाः । तत्र मुररिपुरयं कतमो यमनिन्द्यबन्दिवदभिष्टुषे वृथा ॥ शिशुपालवधम् १५.२० ॥ |
| स्वर-व्यञ्जन-संदोह-व्यूहा-मन्दोहदोहदा । गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा ॥ चन्द्रालोकः ५.२ ॥ |
| स्वरिपुतीक्ष्णसुदर्शनविभ्रमात्किमु विधुं ग्रसते स विधुंतुदः । निपतितं वदने कथमन्यथा बलिकरम्भनिभं निजमुज्झति ॥ नैषधीयचरितम् ४.६४ ॥ |
| स्वरुचारुणया पताकया दिनमर्केण समीयुषोतृषः । लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालयाः ॥ नैषधीयचरितम् २.९९ ॥ |
| स्वरेण वीणेत्यविशेषणं पुरा स्फुरत्तदीया खलु कण्ठकन्दली । अवाप्य तन्त्रीरथ सअप्त मुक्तिकासरानराजत्परिवादिनी स्फुटम् ॥ नैषधीयचरितम् १५.४४ ॥ |
| स्वर्ग शुचिप्रौष्ठ पदेषमाघे भूमौ नभः कार्तिकचैत्रपौषे । मूलं ह्यधस्तात् तपस्यमार्गवैशाखशुक्रेष्वशुभं च तत्र ।॥ मुहूर्त.नक्षत्रप्रकरणम् ५६ ॥ |
| स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः । अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ॥ नैषधीयचरितम् ३.१७ ॥ |
| स्वर्गामिनस्तस्य तं ऐकमत्यादमात्यवर्गः कुलतन्तुमेकं । अनाथदीनाः प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार ॥ रघुवंशम् १८.३६ ॥ |
| स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च । शक्या मखेनापि मुदोऽमराणां कथं विहाय त्रयमेकमीहे ॥ नैषधीयचरितम् ६.९८ ॥ |
| स्वर्गेवासं कारयन्त्या चिराय प्रत्यग्रत्वं प्रत्यहं धारयन्त्या । कश्चिद्भेजे दिव्यनार्या परस्मिंल्लोके लोकं प्रीणयन्त्येह कीर्त्या ॥ शिशुपालवधम् १८.६२ ॥ |
| स्वर्णकेतकशतानि स हेम्नः पुण्डरीकघटनां रजतस्य । मालयारुणमणेः करवीरं तस्य मूर्ध्नि पुनरुक्तमकार्षीत् ॥ नैषधीयचरितम् २१.४५ ॥ |
| स्वर्णैर्वितीर्णैः करवाम वामनेत्रे भवत्या किमुपासनासु । अङ्ग त्वदङ्गानि निपीतपीतदर्पाणि पाणिः खलु याचते नः ॥ नैषधीयचरितम् ८.९८ ॥ |
| स्वर्भानुना प्रसभपानविभीषिकाभिर्दुःखाकृतैनमवधूय सुधासुधांशुम् । स्वं निह्नुते शितिमचिह्नममुष्य रागैस्ताम्बूलताम्रमवलम्ब्य तवाधरोष्ठम् ॥ नैषधीयचरितम् २२.१३८ ॥ |
| स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भवश्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः । पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ॥ नैषधीयचरितम् २२.१५ ॥ |
| स्वर्लोकमस्माभिरितः प्रयातैः केलीषु तद्गानगुणान्निपीय । हा हेति गायन्यदशोचि तेन नाम्नैव हाहा हरिगायनोऽभूत् ॥ नैषधीयचरितम् ३.२७ ॥ |
| स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमपि अस्थि कं श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये । सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं सर्वः कृच्छ्रगतोऽपि वाञ्छन्ति जनः सत्त्वानुरूपं फलम् ॥ नीतिशतकम्३० ॥ |
| स्ववर्णना न स्वयमर्हतीति नियुज्य मां त्वन्मुखमिन्दुरूपम् । स्थानेऽत्युदास्ते शशिनः प्रशस्तौ धरातुरासाहमिति स्म साह ॥ नैषधीयचरितम् २२.१०६ ॥ |
| स्ववालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः । अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात् ॥ नैषधीयचरितम् १.२५ ॥ |

| |
|---|
| स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा । विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ रघुवंशम् ८.८९ ॥ |
| स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः । दिवाकरादर्शनबद्धकोशे नक्शत्रनाथांशुरिवारविन्दे ॥ रघुवंशम् ६.६६ ॥ |
| स्वस्यामरैर्नृपतिमिंशममुं त्यजद्भिरंशच्छिदाकदनमेव तदाध्यगामि । उत्का स्म पश्यति निवृत्य निवृत्य यान्ती वाग्देवतपि निजविभ्रमधाम भैमीम् ॥ नैषधीयचरितम् १४.९९ ॥ |
| स्वाच्छन्द्यमानन्दपरम्पराणां भैमी तमालोक्य किमप्यवाप । महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम् ॥ नैषधीयचरितम् ८.८ ॥ |
| स्वातीचित्रे त्रयोदश्यां सप्तम्यां हस्तराक्षसे । नवभ्यां कृतिकाष्टाम्यां पूभा षष्ठ्यां च रोहिणी ।॥ मुहूर्तचिन्त.१३ ॥ |
| स्वातीन्त्रपूर्वाशिवसार्पभे मृतिर्ज्वरेऽन्त्यमैत्रे स्थिरता भवेद्रुजः । याम्यश्रवोवारुणतक्षभे शिवा घस्रा हि पक्षौ द्रव्यधिपार्कवासवे ॥ मुहूर्त.नक्षत्रप्रकरणम् ४५॥ |
| स्वात्मनः प्रियमपि प्रति गुप्तिं कुर्वती कुलवधूमवजज्ञौ । हृद्यदैवतनिवेद्यनिवेशाद्यत्र भूमिरवकाशदरिद्रा ॥ नैषधीयचरितम् २१.२९ ॥ |
| स्वात्मापि शीलेन तृणं विधेयं देया विहायासनभूर्निजापि । आनन्दबाष्पैरपि कल्प्यमम्भः पृच्छा विधेया मधुभिर्वचोभिः ॥ नैषधीयचरितम् ८.२१ ॥ |
| स्वात्यन्तकाहिवसुपौष्णकरानुराधा- दित्यध्रुवाणि विषमास्तिथयोऽकुलाः स्युः । सूर्येन्दुमन्दगुरवश्च कुलाकुला ज्ञो मूलाम्बुपेशविधिभं दशषड्द्वितिथ्यः ॥ मुहूर्त.यात्राप्रकरणम् १६॥ |
| स्वात्यादित्ये श्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम् । तस्मिन् गजादिकारोहो वाटिकागमनादिकम् ॥ मुहूर्त.नक्षत्रप्रकरणम्  ३ ॥ |
| स्वादयन्नसमनेकसंस्कृतप्राकृतैरकृतपात्रसङ्करैः । भावशुद्धिसहितैर्मुदं जनो नाटकैरिव बभार भोजनैः ॥ शिशुपालवधम् १४.५० ॥ |
| स्वादितः स्वयमथैधितमानं लम्भितः प्रियतमैः सह पीतः । आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ किरातार्जुनीयम् ९.५५ ॥ |
| स्वादूदके जलनिधौ सवनेन सार्धं भव्या भवन्तु तव वारिविहारलीलाः । द्वीपस्य तं पतिममुं भज पुष्करस्य निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ॥ नैषधीयचरितम् ११.२७ ॥ |
| स्वाधीनताऽऽर्य भुवि मूर्तिमती स-माना, राणाप्रताप बलवीर्यविभासमाना। आटीकते समुपमा नहि यां सुशोचिः, शाटीव सा जयति काचन हल्दिघाटी ॥ प्रतापविजयः-१५३ ॥ |
| स्वानुरागमनघः कमलायां सूचयन्नपि हृदि न्यसनेन । गौरवं व्यधित वागधिदेव्याः श्रीगृहोर्ध्वनिजकण्ठनिवेशात् ॥ नैषधीयचरितम् २१.५१ ॥ |
| स्वापतेयमधिगम्य धर्मतः पर्यपालयमवीवृधं च यत् । तीर्थगामी करवै विधानतस्तज्जुषस्व जुहवानि चानले ॥ शिशुपालवधम् १४.९ ॥ |
| स्वाभाविकं विनीतत्वं तेषं विनयकर्मणा । मुमूर्छ सहजं तेजो हविषेव हविर्भुजां ॥ रघुवंशम् १०.८० ॥ |
| स्वाभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम् । कुरङ्गैरुत्तरङ्गाक्षि स्तब्धकर्णैरुदीक्ष्यते ॥ चन्द्रालोकः ५.११२ ॥ |
| स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः । विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥ नीतिशतकम् ७ ॥ |
| स्वारसातलभवाहवशङ्की निर्वृणोमि न वसन्वसुमत्याम् । द्यां गतस्य हृदि मे दुरुदर्कः क्ष्मातलद्वयभटाजिवितर्कः ॥ नैषधीयचरितम् ५.४१ ॥ |
| स्वासिधारापरिहृतः कामं चक्रस्य तेन मे । स्थापितो दशमो मूर्धा लव्यांश इव रक्षसा ॥ रघुवंशम् १०.४२ ॥ |
| स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः । अन्यत्पुनः कम्प्रमपि स्फुरत्त्वात्तस्याः पुरः प्राप नवोपभोगम् ॥ नैषधीयचरितम् ६.६ ॥ |
| स्वेदः स्वदेहस्य वियोगतापं निर्वापयिष्यन्निव संसिसृक्षोः । हीराङ्कुरश्चारुणि हेमनीव नले तयालोकि न दैवतेषु ॥ नैषधीयचरितम् १४.२१ ॥ |
| स्वेदनेन सुतनोरविचारादोष्ठतः समचरिष्ट रसोऽत्र । अन्यमन्यदिव यन्मधु यूनः स्वादमिष्टमतनिष्ट तदेव ॥ शिशुपालवधम् १०.७ ॥ |
| स्वेदस्य धाराभिरिवापगाभिर्व्याप्ता जगद्भारपरिश्रमार्ता । छायापदेशाद्वसुधा निमज्ज्य सुधाम्बुधावुज्झति खेदमत्र ॥ नैषधीयचरितम् २२.९३ ॥ |
| स्वेदानुविद्धार्द्रनखक्षताङ्के संदष्टभूयिष्ठशिखं कपोले । च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ॥ रघुवंशम् १६.४८ ॥ |
| स्वेदाप्लवप्रणयिनी नवरोमराजी रत्यै यदाचरति जागरितव्रतानि । आभासितेन नरनाथ मधूत्थसान्द्रमग्नासमेषुशरकेशरदन्तुराङ्गः ॥ नैषधीयचरितम् २१.१३८ ॥ |
| स्वेन पूर्यत इयं सकलाशा भो बले न मम किं भवतेति । त्वं बटुः कपटवाचि पटीयान्देहि वामन मनःप्रमदं नः ॥ नैषधीयचरितम् २१.६२ ॥ |
| स्वेष्टायनक्षत्रभवोऽथ दैर्घ्यहृत्स्याद्विस्तृतिर्विस्तृतिहृच्च दीर्घता । आया ध्वजोधूमहरिश्वगोखरेभध्वाङ्क्षकाः पिण्ड इहाष्टशेषिते ॥ मुहूर्त.वास्तुप्रकरणम् ४॥ |
| स्वैरं कृतास्फालनललितान्पुरः स्फुरत्नून्दर्शितलाघवक्रियाः । वङ्गावलग्नैकसवल्गपाणयस्तुरङ्गमानारुरुहुस्तुरङ्गिणः ॥ शिशुपालवधम् १२.६ ॥ |
| स्वोच्चे शुक्रे लग्नगे वा गुरौ वेश्मगतेऽथवा । शनौ स्वोच्चे लाभगे वा लक्ष्म्या युक्तं चिरं गृहम् ॥ मुहूर्त.वास्तुप्रकरणम् २४॥ |
| स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे वर्गोत्तमे गुरुः । रिष्फाष्टतुर्यगोऽपीष्टो नीचारिस्थः शुभोऽप्यसत् ॥ मुहूर्त.संस्कारप्रकरणम् ४७॥ |
| स्व्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपं आशशङ्के । पर्यायसम्पादितकर्णतालं यन्ता गजं व्यालं इवापराद्धः ॥ किरातार्जुनीयम् १७.२५ ॥ |
| हं हो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान् रे रे स्वैरिणि निर्विचारकविते मास्मत्प्रकाशीभव । उल्लासाय विचारवीचिनिचयालङ्कारवारांनिधे-श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥ चन्द्रालोकः १.२ ॥ |
| हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् । ग्रहीतुकामादरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥ नैषधीयचरितम् ३.४ ॥ |
| हंसा बृहन्तः सुरसद्मवाहाः संह्रादिकण्ठाभरणाः पतन्तः । चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ॥ किरातार्जुनीयम् १८.१९ ॥ |
| हंसोऽप्यसौ हंसगतेः सुदत्याः पुरः पुरश्चारु चलन्बभासे । वैलक्ष्यहेतोर्गतिमेतदीयामग्रेऽनुकृत्योपहसन्निवोच्चैः ॥ नैषधीयचरितम् ३.१ ॥ |
| हतः कयाचित्पथि कन्दुकेन संघट्ट्य भिन्नः करजैः कयापि ।कयाचनाक्तः कुचकुङ्कुमेन संभुक्तकल्पः स बभूव ताभिः ॥ नैषधीयचरितम् ६.२९ ॥ |

| |
|---|
| हतवृत्तमनुक्तोऽपि छन्दोदोषश्चकास्ति चेत् । विशाललोचने पश्याम्बरं तारातरङ्गितम् ॥ चन्द्रालोकः२.१७ ॥ |
| हतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा । कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ नैषधीयचरितम् २.२५ ॥ |
| हताहतेत्युद्धतभीष्मघोषैः समुज्झिता योद्धृभिरभ्यमित्रं । हेतयः प्राप्ततडित्त्विषः खे विवस्वदंशुज्वलिताः पतन्ति ॥ किरातार्जुनीयम् १६.५ ॥ |
| हरत्ययं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितः कृतं शुभैः । शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितये पि योग्यताम् ॥ शिशुपालवधम्  १.२६ ॥ |
| हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलिताङ्गुलिपाणिजः । स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु दरीभृतः ॥ किरातार्जुनीयम् १८.२ ॥ |
| हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः। उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ कुमारसंभवम् ३.६७॥ |
| हरिं परित्यज्य नलाभिलाषुका न लज्जसे वा विदुषिब्रुवा कथम् ।उपेक्षितेक्षोः करभाच्छमीरतादुरु वदे त्वां करभोरु भोरिति ॥ नैषधीयचरितम् ९.४३ ॥ |
| हरितपत्रमयीव मरुद्गणैः स्रगवनद्धमनोरमपल्लवा । मधुरिपोरभिताम्रमुखी मुदं दिवि तता विततान शुकावलिः ॥ शिशुपालवधम् ६.५३ ॥ |
| हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः । वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥ कुमारसंभवम् ४.१४ ॥ |
| हरित्पतीनां सदसः प्रतीहि त्वदीयमेवातिथिमागतं माम् । वहन्तमन्तर्गुरुणादरेण प्राणानिव स्वःप्रभुवाचिकानि ॥ नैषधीयचरितम् ८.५५ ॥ |
| हरिद्विपद्वीपिभिरांशुकैर्नभोनभस्वदाध्मापनपीनितैरभूत् । तरस्वदश्वध्वजिनीध्वजैर्वनं विचित्रचीनाम्बरवल्लिवेल्लिवेल्लितम् ॥ नैषधीयचरितम् १६.६ ॥ |
| हरिन्मणेर्भोजनभाजनेऽर्पिते गताः प्रकोपं किल वारयात्रिकाः । भृतं न शाकैः प्रवितीर्णमस्ति वस्त्विषेदमेवं हरितेति बोधिताः ॥ नैषधीयचरितम् १६.६६ ॥ |
| हरिमप्यमंसत तृणाय कुरुपतिमजीगणन्न वा । मानतुलितभुवनत्रितयाः सरितः सुतादबिभयुर्नभूभृतः ॥ शिशुपालवधम् १५.६१ ॥ |
| हरिमर्चितवान्महीपतिर्यदि राज्ञस्तव कोऽत्र मत्सरः । न्यसनाय ससौरभस्य कस्तरुसूनस्य शिरस्यसूयति ॥ शिशुपालवधम् १६.२० ॥ |
| हरिराकुमारमखिलाभिधानवित्स्वजनस्य वार्तमयमयमन्वयुङ्क्त च । महतीमपि श्रियमवाप्य विस्मयः सुजनो न विस्मरति जातु किञ्चन ॥ शिशुपालवधम् १३.६८ ॥ |
| हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः । तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥ रघुवंशम् ३.४९ ॥ |
| हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशाङ्गुलौ । भुजे शचीपत्रविशेषकाङ्किते स्वनामचिह्नं निचखान सायकम् ॥ रघुवंशम् ३.५५ ॥ |
| हरेरपि प्रति परकीयवाहिनीरधिस्यदं प्रववृतिरे चमूचराः । विलम्बितुं न खलु सहा मनस्विनो विधित्सतः कलहमवेक्ष्य विद्विषः ॥ शिशुपालवधम् १७..५० ॥ |
| हरेर्यदक्रामि पदैकक्रेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः । त्रपा हरीणामिति नम्रिताननैर्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥ नैषधीयचरितम् १.७ ॥ |
| हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत् सर्वदा ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् । कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ पुरुषार्थोपदेशः-48॥ |
| हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा- ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् । कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ नीतिशतकम् १६ ॥ |
| हर्यक्षीभवतः कुरङ्गमुदरे प्रक्षिप्य यद्वा शशं जातस्फीततनोरमुष्य हरिता सूतस्य पत्न्या हरेः । भङ्गस्त्वद्वदनाम्बुजादजनि यत्पद्मात्तदेकाकिनः स्यादेकः पुनरस्य स प्रतिभटो यः सिंहिकायाः सुतः ॥ नैषधीयचरितम् २२.१३९ ॥ |
| हर्षणवैधृतिसाध्यव्यतिपातकगण्डशूलयोगानाम् । अन्ते यन्नक्षत्रं पातेन निपातितं तत्स्यात् ॥ मुहूर्त.विवाहप्रकरणम् ६०॥ |
| हविःशमीपल्लवलाजगन्धिः पुण्यः कृशानोरुदियाय धूमः । कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥ रघुवंशम् ७.२६ ॥ |
| हविरावर्जितं होतस्त्वया विधिवदग्निषु । वृष्टिर्भवति सस्यानामवग्रहविशोषिणां ॥ रघुवंशम् १.६२ ॥ |
| हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः । असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥ रघुवंशम् १३.४१ ॥ |
| हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः । भुजंगपिहितद्वारं पातालमधितिष्ठति ॥ रघुवंशम् १.८० ॥ |
| हसत्सु भैमीं दिविषत्सु पाणौ पाणिम् प्रणीयाप्सरसां रसात्सा । आलिङ्ग्य नीत्वाकृत पान्थदुर्गां भूपालदिक्पालकुलाध्वमध्यम् ॥ नैषधीयचरितम् १४.३७ ॥ |
| हसितुं परेण परितः परिस्फुरत्करवालकोमलरुचावुपेक्षितैः । उदकर्षि यत्र जलशङ्कया जनैर्मुहुरिन्द्रनीलभुवि दूरमम्बरं ॥ शिशुपालवधम् १३.६० ॥ |
| हस्तलेखमसृजत्खलु जन्मस्थानरेणुकमसौ भवदर्थम् । राम राममधरीकृततत्तल्लेखकः प्रथममेव विधाता ॥ नैषधीयचरितम् २१.६९ ॥ |
| हस्तस्थिताखण्डितचक्रशालिनं द्वजेन्द्रकान्तं श्रितवक्षसं श्रिया । सत्यानुरक्तं नरकस्य जिष्णवो गुणैर्नृपाः शाङ्गिणमन्ययासिषुः ॥ शिशुपालवधम् १२.३ ॥ |
| हस्तानिलाश्विमृगमैत्रवसुध्रुवाख्यैः शक्रान्वितैः शुभतिथौ शुभवासरे च । स्नायादथार्तववती मृगपौष्णवायुः हस्ताश्विधातृभिररं लभते च गर्भम् ॥ मुहूर्त.संस्कारप्रकरणम् ४॥ |
| हस्ताश्विपुष्याभिजितः क्षिप्रं लघु गुरुस्तथा । तस्मिन् पण्यरतिज्ञानं भूषाशिल्पकलादिकम् ॥ मुहूर्त.नक्षत्रप्रकरणम्  ६ ॥ |
| हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं नीता रोध्रप्रसवरजसा पाण्डुतामाननश्रीः । चूडापाशे नवकुरवकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ मेघदूतम्, उत्तरमेघः २ ॥ |
| हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकाशे । अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन ॥ रघुवंशम् ७.२१ ॥ |

| |
|---|
| हस्तेनाग्रे वीतभीतिं गृहीत्वा कञ्चिद्व्यालः क्षिप्तवानूर्ध्वमुच्चैः । आसीनानां व्योम्नि तस्यैव हेतोः स्वर्गस्त्रीणामर्पयामास नूनं ॥ शिशुपालवधम् १८.४८ ॥ |
| हस्तोच्छ्राया वेदहस्तैः समन्तात्तुल्या वेदी सद्मनो वामभागे । युग्मे घस्रे षष्ठहीने च पञ्चसप्ताहे स्यान्मण्डपोद्वासनं सत् ॥ मुहूर्त.विवाहप्रकरणम् ९७॥ |
| हा तातेति क्रन्दितमाकर्ण्य विषण्णस्तस्यान्विष्यन्वेतसगूढं प्रभवं सः । शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं तापादन्तःशल्य इवासीत्क्षितिपोऽपि ॥ रघुवंशम् ८.७५ ॥ |
| हा हा देवि ! स्फुटति हृदयं ध्वंसते देहबन्धः शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि । सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥ (उत्तररामचरितम् ३.३८) |
| हावकारि हसितं वचनानां खौशलं दृशि विकारविशेषाः । चकिरे भृशमृजोरपि वध्वाः कामिनेव तरुणेन मदेन ॥ शिशुपालवधम् १०.१३ ॥ |
| हासत्विषैवाखिलकैरवाणां विश्वं विशङ्केऽजनि दुग्धमुग्धम् । यतो दिवा बद्धमुखेषु तेषु स्थितेऽपि चन्द्रे न तथा चकास्ति ॥ नैषधीयचरितम् २२.६३ ॥ |
| हासस्थायी रसो हास्यो विभावद्यैर्यथाक्रमम् । वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः ॥ चन्द्रालोकः६.६ ॥ |
| हाहा' कृतां पुनरलं हननैर्मृतानां, यूनां महाबलवतां नु परश्शतानाम् । संस्मृत्य शैर्य-भरितं चरितं पुराणं, मूकाऽस्त्यसौ किमिति विज्ञ-जन-प्रमाणम् ॥ प्रतापविजयः-१५५ ॥ |
| हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत् कल्पितं व्यालानां, पशवस्तृणाङ्कुरभुजः सृष्टाः स्थलीशायिनः। संसारार्णवलघनक्षमधियां वृत्तिः कृता सा नृणां यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ पुरुषार्थोपदेशः-19॥ |
| हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं व्यालानं पशवस्तृणाङ्कुरभुजस्तुष्टाः स्थलीशायिनः । संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां तामन्वेषयतां प्रयान्ति सततं सर्वं समाप्तिं गुणाः ॥ वैराग्यशतकम् ९७ ॥ |
| हितगिरं न शृणोषि किमाश्रवे प्रसभमप्यव जीवितमात्मनः । सखि हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम् ॥ नैषधीयचरितम् ४.१०४ ॥ |
| हितमप्रियमिच्छसि श्रुतं यदि संधत्स्व पुरा न नश्यसि । अनृतैरथ तुष्यसि प्रियैर्जयताज्जीव भवावनीश्वरः ॥ शिशुपालवधम् १६.५६ ॥ |
| हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटासीदन्मर्कटकीटकृत्रिमसितच्छत्त्रीभवत्कौस्तुभम् । उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं लूतातन्तुभिरन्तरद्य भुजयोः श्रीरस्य विश्राम्यति ॥ नैषधीयचरितम् १२.३७ ॥ |
| हित्वा नीलं भुजगवलयं शम्भुना दत्तहस्ता क्रीडाशैले यदि च विहरेत्पादचारेण गौरी । भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलोऽस्याः सोपानत्वं कुरु सुखपदस्पर्शमारोहणेषु ॥ मेघदूतम्, पूर्वमेघः ६०॥ |
| हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजास्तु भक्ष्याः । सर्वेऽपि सिंहस्य वशे विनाऽलिं ज्ञेयं नराणां व्यवहारतोऽन्यत् ॥ मुहूर्त.विवाहप्रकरणम् २३॥ |
| हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे । कृत्वा तासामभिगममपां सोम्य सारस्वतीनामन्तःस्वच्छस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ मेघदूतम्, पूर्वमेघः ४९॥ |
| हित्वैकमस्यापघनं विशन्ती तद्दृष्टिरङ्गान्तरभुक्तिसीमाम् । चिरं चकारोभयलाभलोभात्स्वभावलोला गतमागतं ॥ नैषधीयचरितम् ८.११ ॥ |
| हित्वैतांश्चैत्रपौषावमहरिशयनं जन्ममासं च रिक्तां युग्माब्दं जन्मतारामृतुमुनिवसुभिः सम्मिते मास्यथो वा । जन्माहात्सूर्यभूपैः परिमितदिवसे ज्ञेज्यशुक्रेन्दुवारे ऽथौजाब्दे विष्णुयुग्मादितिमृदुलघुभैः कर्णवेधः प्रशस्तः ॥ मुहूर्त.संस्कारप्रकरणम् २४॥ |
| हित्वैव वर्त्मैकमिह भ्रमन्त्याः स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य । चतुष्पथस्याभरणं बभूव लोकावलोकाय सतां स दीपः ॥ नैषधीयचरितम् ६.२४ ॥ |
| हिमऋतावपि ताः स्म भृशस्विदो युवतयः सुतरामुपकारिणौ. प्रकटयत्यनुरागमकृत्रिमं स्मरमयं रमयन्ति विलासिनः ॥ शिशुपालवधम् ६.६१ ॥ |
| हिमकिरणसुतो बली चेत्तनौ त्रिदशपतिगुरुर्हि केन्द्रस्थितः । व्ययगृहसहजारिधर्मस्थितो यदि च भवति निर्बलश्चन्द्रमाः ॥ मुहूर्त.यात्राप्रकरणम् ६९॥ |
| हिममुक्तचन्द्ररुचिरः सपद्मको मदयन्द्विजाञ्जनितमीनकेतनः । अभवत्प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः ॥ शिशुपालवधम् १३.३८ ॥ |
| हिमलतसदृशः श्रमोदबिन्दूनुपनयता किल नूतनोढवध्वाः । कुचकलशकिशोरकौ कथञ्चित्तरलतया तरुणेन पस्पृशाते ॥ शिशुपालवधम् ७.७३ ॥ |
| हिमव्यपायाद्विशदाधराणामापाण्डरीभूतमुखच्छवीनाम् । स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥ कुमारसंभवम् ३.३३ ॥ |
| हीयते हि मतिस्तात हीनैः सह समागमात् । समैश्च समतामेति विशिष्टैश्च विशिष्टताम्  ॥ नीतिसंग्रहस्य मित्र-०.४१ ॥ |
| हुतहुताशनदीप्ति वनिश्रियः प्रतिनिधिः कनकाभरणस्य यत् । युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलं ॥ रघुवंशम् ८.४० ॥ |
| हुताशकीनाशजलेशदूतीर्निराकरिष्णोः कृतकाकुयाञ्चाः । भैम्या वचोभिः स निजां तदाशां न्यवर्तयद्दूरमपि प्रयाताम् ॥ नैषधीयचरितम् ६.७५ ॥ |
| हृतस्य यन्मन्त्रयते रहस्त्वां तद्व्यक्तमामन्त्रयते मुखं यत् । तद्वैरिपुष्पायुधमित्रचन्द्र सत्यौचिती सा खलु तन्मुखस्य ॥ नैषधीयचरितम् ३.१०७ ॥ |
| हृतायाः प्रतिसखिकामिनान्यनाम्ना ह्रीमत्याः सरसि गलन्मुखेन्दुकान्तेः । अन्तर्धिं द्रुतमिव कर्तुमश्रुवर्षैर्भूमानं गमयितुमीषिरे पयांसि ॥ शिशुपालवधम् ८.४२ ॥ |
| हृत्पद्मसद्मन्यधिवास्य बुद्ध्या दध्यावथैतानियमेकताना । सुपर्वणां हि स्फुटभावना या सा पूर्वरूपं फलभावनायाः ॥ नैषधीयचरितम् १४.७ ॥ |
| हृदय एव तवास्ति स वल्लभस्तदपि किं दमयन्ति विषीदसि । हृदि परं न बहिः खलु वर्तते सखि यतस्तत एव विषद्यते ॥ नैषधीयचरितम् ४.१०९ ॥ |

| |
|---|
| हृदयदत्तसरोरुहया तया क्व सदृगस्तु वियोगनिमग्नया । प्रियधनुः परिरभ्य हृदा रतिः किमनुमर्तुमशेत चितार्चिषि ॥ नैषधीयचरितम् ४.२१ ॥ |
| हृदयमरिवधोदयादुपोढद्रढिम दधातु पुनः पुरन्दरस्य । धनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वम् ॥ शिशुपालवधम्  १.१.७४ ॥ |
| हृदयमाश्रयसे यदि मामकं ज्वलयसीत्थमनङ्ग तदैव किम् । स्वयमपि क्षणदग्धनिजेन्धनः क्व भवितासि हताश हुताशवत् ॥ नैषधीयचरितम् ४.७६ ॥ |
| हृदयस्थमनासन्नमकामं त्वां तपस्विनं । दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ रघुवंशम् १०.२० ॥ |
| हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् । उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥ कुमारसंभवम् ४.९ ॥ |
| हृदाभिनन्द्य प्रतिवन्द्यनुत्तरः प्रियागिरः सस्मितमाह स स्म ताम् । वदामि वामाक्षि परेषु मा क्षिप स्वमीदृशं माक्षिकमाक्षिपद्वचः ॥ नैषधीयचरितम् ९.१७ ॥ |
| हृदि दमस्वसुरश्रुझरप्लुते प्रतिफलद्विरहात्तमुखानतेः । हृदयभाजमराजत चुम्बितुं नलमुपेत्य किलागमि तन्मुखम् ॥ नैषधीयचरितम् ४.१३ ॥ |
| हृदि लुठन्ति कला नितराममूर्विरहिणीवधपङ्ककलङ्किता । कुमुदसख्यकृतस्तु बहिष्कृताः सखि विलोकय दुर्विनयं विधोः ॥ नैषधीयचरितम् ४.४७ ॥ |
| हृदि विदर्भभुवः प्रहरञ्शरै रतिपतिर्निषधाधिपतेः कृते । कृततदन्तरगस्वदृढव्यधः फलदनीरितमूर्च्छदलं खलु ॥ नैषधीयचरितम् ४.१९ ॥ |
| हृदि विदर्भभुवोऽश्रुभृति स्फुटं विनमदास्यतया प्रतिबिम्बितम् । मुखदृगोष्ठमरोपि मनोभुवा तदुपमाकुसुमान्यखिलाः शराः ॥ नैषधीयचरितम् ४.२५ ॥ |
| हृद्यगन्धवहभोगवतीशः शेषरूपमपि बिभ्रदशेषः । भोगभूतिमदिरारुचिरश्रीरुल्लसत्कुमुदबन्धुरुचिस्त्वम् ॥ नैषधीयचरितम् २१.८६ ॥ |
| हृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनन्दत् । स्थली नवाम्भःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृन्दम् ॥ रघुवंशम् ७.६९ ॥ |
| हे हस्त दक्षिण ! मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम् । रामस्य बाहुरसि निर्भरगर्भखिन्न- सीताविवासनपटोः करुणा कुतस्ते ॥ (उत्तररामचरितम् २.१०) |
| हेतुस्त्यक्त्वा बहून्पक्षान्युक्त्यैकस्यावधारणम् । नेन्दुर्नार्कोऽयमौर्वाग्निः सागरादुत्थितो दहन् ॥ चन्द्रालोकः३.४ ॥ |
| हेतोः कुतोऽपि वैशिष्ट्यात्स्फूर्तिरुन्मीलितं मतम् । लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ॥ चन्द्रालोकः ५.३५ ॥ |
| हेमनामकतरुप्रसवेन त्र्यम्बकस्तदुपकल्पितपूजः । आत्तया युधि विजित्य रतीशं राजितः कुसुमकाहलयेव ॥ नैषधीयचरितम् २१.३४ ॥ |
| हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुं । अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहं ॥ रघुवंशम् १०.५२ ॥ |
| हेमाम्भोजप्रसवि सलिलं मानसस्याददानः कुर्वन्कामात्क्षणमुखपटप्रीतिमैरावणस्य । धुन्वन्वातैः सजलपृषतैः कल्पवृक्षांशुकानि च्छायाभिन्नः स्फटिकविशदं निर्विशेः पर्वतं तम् ॥ मेघदूतम्, पूर्वमेघः ६२॥ |
| हेम्नः स्थलीषु परितः परिवृत्य वाजी धुन्वन्वपुः प्रवितितायतकेशपङ्क्तिः । ज्वलाकणारुणरुचा निकरेणरेणोः शेषेणतेजसः इवोल्लसता रराज ॥ शिशुपालवधम् ५.५५ ॥ |
| हेलां दधौ रक्षिजनेऽस्त्रिसज्जे लीनश्चरामीति हृदा ललज्जे । द्रक्ष्यामि भैमीमिति संतुतोष दूतं विचिन्त्य स्वमसौ शुशोच ॥ नैषधीयचरितम् ६.१ ॥ |
| हैयंगवीनमादाय घोषवृद्धानुपस्थितान् । नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनां ॥ रघुवंशम् १.४५ ॥ |
| ह्यस्फुटं स्तनयोरत्र कोकसादृश्यवन्मतम् । कुङ्कुमाक्तं स्तनद्वन्द्वं मानसं मम गाहते ॥ चन्द्रालोकः८.६ ॥ |
| ह्रदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीर उज्झति । मुहुस्तनैस्तालस्समं समाददे मनोरमं नृत्यमिव प्रवेपितं ॥ किरातार्जुनीयम् ८.४३ ॥ |
| ह्रीतय अगलितनीवि निरस्यन्नन्तरीयमवलम्बितकाञ्चि । मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ किरातार्जुनीयम् ९.४८ ॥ |
| ह्रीभरादवनतं परिरम्भे रागवानवटुजेष्ववकृष्य । अर्पितोष्ठदलमाननपद्मं योषितो मुकुलिताक्षमधासीत् ॥ शिशुपालवधम् १०.५२ ॥ |
| ह्रीमानभूद् भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः। पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद॥ कुमारसंभवम् ७.५४॥ |
| ह्रीविमोहमहरद्दयितानामन्तिकं रतिसुखाय निनाय । सप्रसादमिव सेवितमासीत्सद्य एव फलदं मधु तासां ॥ शिशुपालवधम् १०.२२ ॥ |
| ह्रीसंकुचत्फणगणादुरगप्रधानात्तां राजसङ्घमनयन्त विमानवाहाः । संध्यानमद्दलकुलात्कमलाद्विनीय कह्लारमिन्दुकिरणा इव हासभासम् ॥ नैषधीयचरितम् ११.२३ ॥ |
| ह्रेपयन्नहिमतेजसं त्विषा स त्वमित्थमुपपन्नपौरुषः । हर्तुमर्हसि वराहभेदिनं नैनमस्मदधिपस्य सायकं ॥ किरातार्जुनीयम् १३.४१ ॥ |
| ह्रेपिता हि बहवो नरेश्वरास्तेन तात धनुषा धनुर्भृतः । ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्रतस्थिरे ॥ रघुवंशम् ११.४० ॥ |
| **स्वर वर्ण** |
| अंशं षोडक्षमामनन्ति रजनीभर्तुः कलां वृत्तयत्न्येनं पञ्चदशैव ताः प्रतिपदाद्याराकवर्धिष्णवः । या शेषा पुनरुद्धृता तिथिमृते सा किं हरालंकृतिस्तस्याः स्थानबिलं कलङ्कमिह किं पश्यामि सश्यामिकम् ॥ नैषधीयचरितम् २२.१४२ ॥ |
| अंशुकं हृतवता तनुबाहुस्वस्तिकापिहितमुग्धकुचाग्रा । भिन्नशङ्खवलयं परिणेत्रा पर्यरम्भि रभसादचिरोढा ॥ शिशुपालवधम् १०.४३ ॥ |
| अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा । क्षीबतामिव गतः क्षितिमेष्यंल्लोहितं वपुरुवाह पतङ्गः ॥ किरातार्जुनीयम् ९.३ ॥ |
| अंशे हिरण्याक्शरिपोः स जाते हिरण्यनाभे तनये नयज्ञः । द्विषामसह्यः सुतरां तरूणां हिरण्यरेता सानिलोऽभूत् ॥ रघुवंशम् १८.२५ ॥ |

| |
|---|
| अंसलम्बिकुटजार्जुनस्रजस्तस्य नीपरजसाङ्गरागिणः । प्रावृषि प्रमदबर्हिणेष्वभूत्कृतिमाद्रिषु विहारविभ्रमः ॥ रघुवंशम् १९.३७ ॥ |
| अंसस्थलैः केचिदभिन्नधैर्याः स्कन्धेषु संश्लेषवतां तरूणां । मदेन मीलन्नयनाः सलीलं नागा इव स्रस्तकरा निषेदुः ॥ किरातार्जुनीयम् १६.३० ॥ |
| अंसाववष्टब्धनतौ समाधिः शिरोधराया रहितप्रयासः । धृता विकारांस्त्यजता मुखेन प्रसादलक्ष्मीः शशलाञ्छनस्य ॥ किरातार्जुनीयम् १६.२१ ॥ |
| अकचटतपयशवर्गाः खगेशमार्जारसिंहशुनाम् । सर्पाखुमृगावीनां निजपञ्चमवैरिणामष्टौ ॥ मुहूर्त.विवाहप्रकरणम् ३६॥ |
| अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा । सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ नीतिशतकम् ५२ ॥ |
| अकरुणादव सूनशरादसून्सहजयापदि धीरतयात्मनः । असव एव ममाद्य विरोधिनः कथमरीन्सखि रक्षितुमात्थ माम् ॥ नैषधीयचरितम् ४.१०३ ॥ |
| अकरोत्स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् । न हि तेन पथा तनुत्यजस्तनयावर्जितपिण्डकाङ्क्षिणः ॥ रघुवंशम् ८.२६ ॥ |
| अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्मसात् । अपरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना ॥ रघुवंशम् ८.२० ॥ |
| अकर्णधाराशुगसंभृशाङ्गतां गतैररित्रेण विनास्य वैरिभिः । विधाय यावत्तरणेर्भिदामहो निमज्ज्य तीर्णः समरे भवार्णवः ॥ नैषधीयचरितम् १२.७१ ॥ |
| अकर्णनासस्त्रपते मुखं ते पश्यन्न सीतास्यमिवाभिरामम् । रक्तोस्रवर्षी बत लक्ष्मणाभिभूतः शशी शूर्पणखामुखाभः ॥ नैषधीयचरितम् २२.५१ ॥ |
| अकलाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म सम्प्रयान् । हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम् ॥ किरातार्जुनीयम् ३.५९ ॥ |
| अकाण्डमेवात्मभुवार्जितस्य भूत्वा पि मूलं मयि वीरणस्य । भवान्न मे किं नलदत्वमेत्य कर्ता हृदश्चन्दनलेपकृत्यम् ॥ नैषधीयचरितम् ३.९ ॥ |
| अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजालयः । तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥ नैषधीयचरितम् १.४४ ॥ |
| अकारि नीहारनिभं प्रभञ्जनादधूपि यच्चागुरुसारदारुभिः । निपीय भृङ्गारकसङ्गि तत्र तैरवर्णि वारि प्रतिवारमीदृशम् ॥ नैषधीयचरितम् १६.८९ ॥ |
| अकार्यचिन्तासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् । अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ॥ रघुवंशम् ६.३९ ॥ |
| अकिंचनः सन्प्रभवः स संपदां त्रिलोकनाथः पितृसद्मगोचरः। स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः॥ कुमारसंभवम् ५.७७ ॥ |
| अकिञ्चनैः कल्पतरुप्रभीकृतः, स्वयं विडौजा इति वीरवन्दितः । धृतोऽरिभिः काल इव स्व-मानसे स कल्कि - कल्पः कलित कलौ जनैः ॥ प्रतापविजयः-४० ॥ |
| अकृत परभृतः स्तुहिस्तुहीति श्रुतवचनस्रगनूक्तिचुञ्चुचञ्चुः । पठितनलनुतिं प्रतीव कीरं तमिव नृपं प्रति जातनेत्ररागः ॥ नैषधीयचरितम् २१.१४३ ॥ |
| अकृतस्वसद्मगमनादरः क्षणं लिपिकर्मनिर्मित इव व्यतिष्ठत । गतमच्युतेन सह शून्यतां गतः प्रतिपालयन्मन इवाङ्गनाजनः ॥ शिशुपालवधम् १३.४७ ॥ |
| अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् । मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ॥ किरातार्जुनीयम् ३.३७ ॥ |
| अक्रमातिशयोक्तिश्चेद् युगपत्कार्यकारणे । आलिङ्गन्ति समं देव ज्यां शराश्च पराश्च ते ॥ चन्द्रालोकः ५.४१ ॥ |
| अक्षभीजवलयेन निबभौ दक्षिणश्रवणसंस्थितेन यः । क्षत्रियान्तकरणैकविंशतेर्व्याजपूर्वगणनामिवोद्वहन् ॥ रघुवंशम् ११.६६ ॥ |
| अक्षसूत्रगतपुष्करबीजश्रेणिरस्य करसंकरमेत्य । शौरिमुक्तजपितुः पुनरापत्पद्मसद्मचिरवासविलासम् ॥ नैषधीयचरितम् २१.४९ ॥ |
| अक्षितारासु विव्याध द्विषतः स तनुत्रिणः । दानेषु स्थूललक्ष्यत्वं न हि तस्य शरासने ॥ शिशुपालवधम् १९.९९ ॥ |
| अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः । त्वया स्वहस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥ किरातार्जुनीयम् १.२९ ॥ |
| अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा । तया तु तस्यार्धशरीरभाजा पश्चात्कृताः स्निग्धजनाशिषोऽपि॥ कुमारसंभवम् ७.२८॥ |
| अखानि सिन्धुः समपूरि गङ्गया कुले किलास्य प्रसभं स भन्त्स्यते । विलङ्घ्यते चास्य यशःशतैरहो सतां महत्संमुखधावि पौरुषम् ॥ नैषधीयचरितम् १२.८ ॥ |
| अखिध्यतासन्नमुदग्रतापं रविं दधानेऽप्यरविन्दधाने । भृङ्गावलिर्यस्य तटे निपीतरसा नमत्तामरसा न मत्ता ॥ शिशुपालवधम् ४.१२॥ |
| अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् । सविधेऽपि नसूक्ष्मसाक्षिणीवदनालंकृतिमात्रमक्षिणी ॥ नैषधीयचरितम् २.५५ ॥ |
| अखिलमिदममुष्य गैरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलाम् । अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः ॥ किरातार्जुनीयम् ५.२१ ॥ |
| अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते । आनन्दशीतमिव भाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ॥ रघुवंशम् १६.४४ ॥ |
| अगूढं कलयेदर्थान्तरसंक्रमितादिकम् । विस्मृतः किमपां नाथ स त्वया कुम्भसम्भवः ॥ चन्द्रालोकः८.३ ॥ |
| अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया । अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः ॥ कुमारसंभवम् ५.६२ ॥ |
| अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजं । इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥ किरातार्जुनीयम् ८.३६ ॥ |
| अग्निं हुत्वा देवतां पूजयित्वा नत्वा विप्रानर्चयित्वा दिगीशम् । दत्त्वा दानं ब्राह्मणेभ्यो दिगीशं ध्यात्वा चित्ते भूमिपालोऽधिगच्छेत् ॥ मुहूर्त.यात्राप्रकरणम् ८३॥ |
| अग्निवर्णम् अभिषिच्य राघवः स्वे पदे तनयम् अग्नितेजसम् । शिश्रिये श्रुतवताम् अपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥ रघुवंशम् १९.१ ॥ |
| अग्नेर्दिशं नृप इयान्पुरुहूतदिग्भैरेवं प्रदक्षिणगता विदिशोऽथ कृत्ये । आवश्यकेऽपि परिघं प्रविलङ्घ्य गच्छेच्छूलं विहाय यदि दिक्तनुशुद्धिरस्ति ॥ मुहूर्त.यात्राप्रकरणम् ३७॥ |
| अग्न्याहिता नित्यमुपासते यां देदीप्यमानां तनुमष्टामूर्तेः । आशापतिस्ते दमयन्ति सोऽपि स्मरेण दासीभवितुं न्यदेशि ॥ नैषधीयचरितम् ८.७१ ॥ |
| अग्रगतेन वसतिं परिगृह्य रम्यामापात्यसैनिकनिराकराणाकुलेन । यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूरादुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ॥ शिशुपालवधम् ५.१५ ॥ |

| |
|---|
| अग्रसानुषु नितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलम्ब्य । अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ॥ किरातार्जुनीयम् ९.७ ॥ |
| अग्रे गीतं सरस-कवयः पार्श्वयोर्दाक्षिणात्याः पश्चाल्लीलावलय-रणितं चामर-ग्राहिणीनाम्। यद्यस्त्येवं कुरु भव-रसास्वादने लम्पटत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ॥॥ वैराग्यशतकम् ६७ ॥ |
| अघौषभाराज्जनता नताऽधुना वधू-जने चापि विलासिताऽऽसिता । अहो दुरन्तः किल काल-चक्रमः, यदद्य सर्वत्र विपत्त्युपक्रमः ॥ प्रतापविजयः-९४ ॥ |
| अङ्कचुम्बिधनचन्दनपङ्कं यत्र गारुडशिलाजममत्रम् । प्राप केलिकवलीभवदिन्दोः सिंहिकासुतमुखस्य सुखानि ॥ नैषधीयचरितम् २१.२५ ॥ |
| अङ्कमङ्कपरिवर्तनोचिते तस्य निन्यतुरशून्यतामुभे । वल्लकी च हृदयंगमस्वना वल्गुवागपि च वामलोचना ॥ रघुवंशम् १९.१३ ॥ |
| अङ्कादययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त । संबन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम॥ कुमारसंभवम् ७.५॥ |
| अङ्के विदर्भेन्द्रपुरस्य शङ्के न संममौ नैष तथा समाजः । यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥ नैषधीयचरितम् १०.३ ॥ |
| अङ्केणनाभेर्विषकृष्णकण्ठः सुधाप्तशुद्धः कटभस्मपाण्डुः । अर्हन्नपीन्दोर्निजमौलिधानान्मृडः कलामर्हति षोडशीं न ॥ नैषधीयचरितम् २२.६६ ॥ |
| अङ्गं चन्दनपाण्डुपल्लवमृदुस्ताम्बूलताम्राधरो धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने । अन्तःपुष्पसुगन्धिरार्द्रकवरी सर्वाङ्गलग्नाम्बरं रोमाणां रमणीयतां विदधति ग्रीष्मापराह्वागमे ॥ अमरुशतकम्-५९॥ |
| अङ्गभङ्गोल्लसल्लीला तरुणी स्मरतोरणम् । तर्ककर्कशपूर्णोक्ति-प्राप्तोत्कटधियां वृथा ॥ चन्द्रालोकः६.२७ ॥ |
| अङ्गसत्त्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन् । स प्रयोगनिपुणैः प्रयोक्तृभिः संजघर्ष सह मित्रसंनिधौ ॥ रघुवंशम् १९.३६ ॥ |
| अङ्गादङ्गात्सृत इव निजः स्नेहजो देहसारः प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेकः । सान्द्रानन्दक्षुभितदयप्रस्रवेणावसिक्तो गाढाऽऽश्लेषः स हि मम हिमच्योतमाशंसतीव ॥ (उत्तररामचरितम् ६.२२) |
| अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात्कुतो मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति । तन्व्या सर्वमिदं स्वभावजमिति व्याहृत्य पक्ष्मान्तर-व्यापी बाष्पभरस्तया चलितया निःश्वस्य मुक्तोऽन्यतः ॥ अमरुशतकम्-४५॥ |
| अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मादनुष्णमनलं कृती ॥ चन्द्रालोकः १.८ ॥ |
| अङ्गुलीकिसलयाग्रतर्जनं भ्रूविभङ्गकुटिलं च वीक्षितं । मेखलाभिरसकृच्च बन्धनं वञ्चयन्प्रणयिनीरवाप सः ॥ रघुवंशम् १९.१७ ॥ |
| अङ्गुलीचलनलोचनभङ्गिभ्रूतरङ्गविनिवेदितदानम् । रत्नमन्यनृपढौकितमन्ये तत्प्रसादमलभन्त नृपास्तत् ॥ नैषधीयचरितम् २१.४ ॥ |
| अङ्गुष्ठमूर्ध्ना विनिपीडिताया मध्येन भागेन च मध्यमायाः । आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ॥ नैषधीयचरितम् १०.११ ॥ |
| अङ्गेन केनापि विजेतुमस्या गवेष्यते किं चलपत्त्रपत्त्रम् । न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ॥ नैषधीयचरितम् ७.९१ ॥ |
| अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं सास्रेणास्रद्रवमविरतोत्कण्ठमुत्कण्ठितेन उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती संकल्पैस्ते विशति विधिना वैरिणा रुद्धमार्गः ॥ मेघदूतम्, उत्तरमेघः ३६ ॥ |
| अङ्घ्रिस्थारुणिमेष्टकाविसरणैः शोणे कृपाणः स्फुटं कालोऽयं विधिना रथाङ्गमिथुनं विच्छेतुमन्विच्छता । रश्मिग्राहिगरुत्मदग्रजसमारब्धाविरामभ्रमौ दण्डभ्राजिनि भानुशाणवलये संसज्य किं निज्यते ॥ नैषधीयचरितम् २१.१४९ ॥ |
| अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्यां । भृशमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ किरातार्जुनीयम् १०.४९ ॥ |
| अचित्ततायामपि नाम युक्तामनूर्ध्वतां प्राप्य तदीयकृच्छ्रे । महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगं ॥ किरातार्जुनीयम् १७.४७ ॥ |
| अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् । सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ नीतिसंग्रहस्य मित्र-१.१५९ ॥ |
| अचिराज्जितमीनकेतनो विलसन्वृष्णिगणैर्नमस्कृतः । क्षितिपः क्षयितोद्धतान्तको हरलीलां स विडम्बयिष्यति ॥ शिशुपालवधम् १६.५८ ॥ |
| अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम् । पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥ नैषधीयचरितम् २.१४ ॥ |
| अचिराद्वज्वभिर्भागं कल्पितं विधिवत्पुनः । मायाविभिरनालीढमादास्यध्वे मिशाचरैः ॥ रघुवंशम् १०.४६ ॥ |
| अचिरान्मया सह गतस्य समरमुरगारिलक्ष्मणः । तीक्ष्णविशिखमुखपीतमसृक्पततां गणैः पिबतु सार्धमुर्वरा ॥ शिशुपालवधम् १५.६६ ॥ |
| अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः । क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ किरातार्जुनीयम् २.९ ॥ |
| अचीकरच्चारु हयेन या भ्रमीर्निजातपत्रस्य तलस्थले नलः । मरुकिमद्यापि न तासु शिक्षते वितत्य वात्यामयचक्रचङ्क्रमान् ॥ नैषधीयचरितम् १.७३ ॥ |
| अचुम्बि या चन्दनबिन्दुमण्डली नलीयवक्त्रेण सरोजतर्जिना । श्रियं श्रिता काचन तारकासखी कृता शशाङ्कस्य तयाङ्कवर्तिनी ॥ नैषधीयचरितम् १५.६९ ॥ |
| अजगणन्गणशः प्रियमग्रतः प्रणतमप्यभिमानितया न याः । सति मधावभवन्मदनव्यथा विधुरिता धुरिताः कुकुरस्त्रियः ॥ शिशुपालवधम् ६.१५ ॥ |
| अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः । जयमघोषयदस्य तु केवलं गजवती जवतीरहया चमूः ॥ रघुवंशम् ८.१० ॥ |

| |
|---|
| अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् । गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ नीतिसंग्रहस्य मित्र-०.३ ॥ |
| अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः । स्वपतो जागरूकस्य याथात्म्यं वेद कस्तव ॥ रघुवंशम् १०.२५ ॥ |
| अजस्रभूमीतटकुट्टनोत्थितैरुपास्यमानं चरणेषु रेणुभिः । रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥ नैषधीयचरितम् १.५९ ॥ |
| अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च । दधौ पटीयान्समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥ नैषधीयचरितम् १.१७ ॥ |
| अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयाम् । श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतां तदाप्य ॥ नैषधीयचरितम् ३.१०६ ॥ |
| अजस्रमास्फालितवल्लकीगुण क्षतोज्ज्वलांगुष्ठनखांशुभिन्नया । पुरः प्रवालैरिव पूरितार्द्धया विभान्तमच्छस्फटिकाक्षमालया ॥ शिशुपालवधम्  १.९ ॥ |
| अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः । सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे  ॥ नीतिसंग्रहस्य मित्र-०.10 ॥ |
| अजातविच्छेदलवैः स्मरोद्भवैरगस्त्यभासा दिशि निर्मलत्विषि । धुतावधिं कालममृत्युशङ्किता निमेषवत्तेन नयस्व केलिभिः ॥ नैषधीयचरितम् ९.५७ ॥ |
| अजानती कापि विलोकनोत्सुका समीरधूतार्धमपि स्तनांशुकम् । कुचेन तस्मै चलतेऽकरोत्पुरः पुराङ्गना मङ्गलकुम्भसंभृतिम् ॥ नैषधीयचरितम् १५.८ ॥ |
| अजानतीवेदमवोचदेनामाकूतमस्यास्तदवेत्य देवी । भावस्त्रपोर्मिप्रतिसीरया ते न दीयते लक्षयितुं ममापि ॥ नैषधीयचरितम् १४.३१ ॥ |
| अजानन् दाहात्म्यं पततु शलभस्तत्र दहने स मीनोऽप्यज्ञानाद् बळिशसितमश्नातु पिशितम् । विजानन्तोऽप्येते वयमिह विपज्जालजटिलान् न मुञ्चमः कामानह ह! गहनो मोहमहिमा ॥ पुरुषार्थोपदेशः-29॥ |
| अजानन्दाहात्म्यं पततु शलभस्तीव्र-दहने स मीनोऽप्यज्ञानाद्बडिश-युतमश्नातु पिशितम्। विजानन्तोऽप्येते वयमिह वियज्जाल-जटिलान्न मुञ्चामः कानामहह गहनो मोह-महिमा॥॥ वैराग्यशतकम् १८ ॥ |
| अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशरदैरजः । अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः ॥ रघुवंशम् ८.१७ ॥ |
| अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहां । अधिवसंस्तनुमध्वरदीक्षितामसम्भासं अभासयदीश्वरः ॥ रघुवंशम् ८.१७ ॥ |
| अजीयतावर्तशुभंयुनाभ्यां दोर्भ्यां मृणालं किमु कोमलाभ्याम् । निसूत्रमाष्ते घनपङ्कमृत्सु मूर्तासु नाकीर्तिषु तन्निमग्नम् ॥ नैषधीयचरितम् ७.६९ ॥ |
| अजैकपादहिर्बुध्न्यशक्रमित्रानिलान्तकैः । समन्दैर्मन्दवारे स्याद्रक्षोभूतयुतं गृहम् ॥ मुहूर्त.वास्तुप्रकरणम् २८॥ |
| अज्ञः सुखमवबोध्यः सुखतरमबबोध्यते विशेषज्ञः। ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न बोधयति ॥ पुरुषार्थोपदेशः-3॥ |
| अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः । ज्ञानलवदुर्विदग्धं ब्रह्माऽपि च तं नरं न रञ्जयति ॥ नीतिशतकम्३ ॥ |
| अज्ञातकुलशीलस्य वासो देयो न कस्यचित् । मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः  ॥ नीतिसंग्रहस्य मित्र-१.५६ ॥ |
| अज्ञातदोषैर्दोषज्ञैरूद्दूष्यो भयवेतनैः । भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥ शिशुपालवधम्  २.११३ ॥ |
| अज्ञानेन पराङ्मुखीं परिभवाद् आश्लिष्य मां दुःखितां किं लब्धं चटुल त्वयेह नयता सौभाग्यमेतां दशाम् । पश्यैतद् दयिताकुचव्यतिकरोन् मृष्टाङ्गरागारुणं वक्षस्ते मलतैलपङ्क-शवलैर्वेणीपदैरङ्कितम् ॥ अमरुशतकम्-१४॥ |
| अटाट्यमानो ह्यटवीषु सन्ततं, स्वतन्त्रतार्थी, सकलत्रपुत्रकः । अवाप दुखं न हि किं व्यथाऽऽकुलः स वीरतायास्तनयो वरान्वितः ॥ प्रतापविजयः-३५ ॥ |
| अणीयसे विश्वविधारिणे नमो नमोऽन्तिकस्थाय नमो दवीयसे । अतीत्य वाचां मनसां च गोचरं स्थिताय ते तत्पतये नमो नमः ॥ किरातार्जुनीयम् १८.४१ ॥ |
| अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः । अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥ किरातार्जुनीयम् २.५१ ॥ |
| अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः । नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥ चन्द्रालोकः ५.२४ ॥ |
| अतनुकुचभरानतेन भूयः श्रमजनितानतिना शरीरकेण । अनुचितगतिसादनिःसहत्वं कलभकरोरुभिरूरुभिर्दधानैः ॥ शिशुपालवधम् ७.६६ ॥ |
| अतनुना नवमम्बुदमाम्बुदं सुतनुरस्त्रमुदस्तमवेक्ष्य सा । उचितमायतनिःश्वसितच्छलाच्छ्वसनशस्त्रममुञ्चदमुं प्रति ॥ नैषधीयचरितम् ४.३९ ॥ |
| अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत् \| गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥ कुमारसंभवम् ५.१४ ॥ |
| अतिकोमलमेकतोन्यतः सरसाम्भोरुहवृन्तकर्कशम् । वहति स्फुटमेकमेव ते वचनं शाकपलाशदेश्यताम् ॥ शिशुपालवधम् १६.१८ ॥ |
| अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् । अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ॥ नैषधीयचरितम् ४.४ ॥ |
| अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति  ॥ नीतिसंग्रहस्य मित्र-१.६३ ॥ |
| अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी । जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ किरातार्जुनीयम् २.४२ ॥ |
| अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः । शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ॥ रघुवंशम् ३.५८ ॥ |
| अतियपरिणाहववान्वितेने बहुतरमर्पितकिङ्किणीकः । अलघुनि जघनस्थलेऽपरस्या ध्वनिमधिकं कलमेखलाकलापः ॥ शिशुपालवधम् ७.५ ॥ |
| अतिरक्तभावमुपगम्य कृतमतिरमुष्य साहसे । दृष्टिरगणितभयासिलतामलम्बते स्म सभया सखीमिव ॥ शिशुपालवधम् १५.९ ॥ |
| अतिविस्मयनीयकर्मणो नृपतेर्यस्य विरोधि किञ्चन । यदुमुक्तनयो नयत्यसावहितानां कुलमक्षयं क्षयं ॥ शिशुपालवधम् १६.६६ ॥ |

| |
|---|
| अतिशयितवनान्तरद्युतीनां फलकुसुमावचयेऽपि तद्विधानां । ऋतुरिव तरुवीरुधां समृद्ध्या युवतिजनैर्जगृहे मुनिप्रभावः ॥ किरातार्जुनीयम् १०.८ ॥ |
| अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात् । स्फुटमकारि फलान्यपि मुञ्चता तदुरसि स्तनतालयुगार्पणम् ॥ नैषधीयचरितम् ४.४२ ॥ |
| अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः । प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ रघुवंशम् १०.३ ॥ |
| अतिसुरभिभाजि पुष्पश्रियामतनुतरतयेष सन्तानकः । तरुणपरभृतः स्वनं रागिणामतनुत रतये वसन्तानकः ॥ शिशुपालवधम् ६.६७ ॥ |
| अतुहिनरुचिनासौ केवलं नोदयाद्रिः क्षणमुपरिगतेन क्ष्माभृतः सर्व एव । नवकरनिकरेण स्पष्टबन्धूकसूनस्तबकरचितमेते शेखरं बिभ्रतीव ॥ शिशुपालवधम् ११.४६ ॥ |
| अतोऽयम् अश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः । अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ॥ रघुवंशम् ३.५० ॥ |
| अतोत्र किंचिद्भवतीं बहुक्षमा द्विजातिभावादुपपन्नचापलः । अयं जनः प्रष्टुमनास्तपोधने ! न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ कुमारसंभवम् ५.४०॥ |
| अत्प्रत्युत त्वन्मृदुबाहुवल्लीस्मृतिस्रजं गुम्फति दुर्विनीता । ततो विधत्तेऽधिकमेव तापं तेन श्रिता शैत्यगुणा मृणाली ॥ नैषधीयचरितम् ८.८२ ॥ |
| अत्यद्भुतादपि गुणातिशयात्प्रियो मे तस्मात्सखा त्वमसि, यन्मम तत्तवैव । तत्किं निजे परिजने कदनं करोषि नन्वेषु दर्पनिकषस्तव चन्द्रकेतुः ॥ (उत्तररामचरितम् ५.१०) |
| अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे । मनस्विनो दरिद्रस्य वनादन्यत्कुतः सुखम्  ॥ नीतिसंग्रहस्य मित्र-१.१२४ ॥ |
| अत्यन्तातिशयोक्तिस्तत्-पौर्वापर्यव्यतिक्रमे । अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ चन्द्रालोकः ५.४२ ॥ |
| अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यन्तादहिममयूखमण्डलस्य । आशानामुपरचितामिवैकवेणीं रम्योर्मीं त्रिदशनदीं ययुर्बलानि ॥ किरातार्जुनीयम् ७.९ ॥ |
| अत्याजिलब्धविजयप्रसरस्त्वया किं विज्ञायते रुचिपदं न महीमहेन्द्रः । प्रत्यर्थिदानवशताहितचेष्टयासौ जीमूतवाहनधियं न करोति कस्य ॥ नैषधीयचरितम् १३.२८ ॥ |
| अत्युक्तिरदभुतातथ्य-शौर्यौदार्यादिवर्णनम् । त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः ॥ चन्द्रालोकः ५.११६ ॥ |
| अत्र चैष सकलेऽपिभाति मां प्रत्यशेषगुणबन्धुरर्हति । भूमिदेवनरदेवसङ्गमे पूर्वदेवरिपुरर्हणां हरिः ॥ शिशुपालवधम् १४.५८ ॥ |
| अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः । रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥ रघुवंशम् १३.३५ ॥ |
| अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् । प्रवर्तयामास किलानसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥ रघुवंशम् १३.५१ ॥ |
| अत्रावियुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि । द्वन्द्वानि दूरान्तरवर्तिना ते मया प्रिये सस्पृहमीक्षितानि ॥ रघुवंशम् १३.३१ ॥ |
| अत्रैव वाणीमधुना तवापि श्रोतुं समीहे मधुनः सनाभिम् । इति प्रियप्रेरितया तयाथ प्रस्तोतुमारम्भि शशिप्रशस्तिः ॥ नैषधीयचरितम् २२.६ ॥ |
| अत्रैव वीरजन शोणित-शोण-गङ्गा, भूत्वा सहस्रपथगा गतिमाततान। यद्दशनिन रसनेन च मज्जनेन देवैः सहैव ऋषयः पितरोऽपि तृप्ताः ॥ प्रतापविजयः-१६९ ॥ |
| अत्रैव वीरजनमौलिमहार्हरत्नं, धीराग्रणीरगणितव्रणवान् स 'झाला' । राणाऽर्थमेव हहहा! समरेऽसहायः प्राणाञ्जहौ न तु पलायनतत्परोऽभूत् ॥ प्रतापविजयः-१६६ ॥ |
| अत्स्यामि पत्रपुटके न पुनर्न हैमे, वत्स्यामि वर्ण-भवने विजने न हर्म्ये । स्थास्याम्यहं भुवि तृणासनकेषु तेषु, न त्वच्छ-रत्न-रचितेषु नृपासनेषु ॥ प्रतापविजयः-५२ ॥ |
| अथ कनकपतत्रस्तत्र तां राजपुत्रीं सदसि सदृशभासां विस्फुरन्तीं सखीनाम् । उडुपरिषादि मध्यस्थायिशीतांशुलेखानुकरणपटुलक्ष्मीमक्षिलक्षीचकार ॥ नैषधीयचरितम् २.१०७ ॥ |
| अथ कले कलय श्वसिति स्फुटं चलति पक्ष्म चले परिभावय । अधरकम्पनमुन्नय मेनके किमयि जल्पति कल्पलते शृणु ॥ नैषधीयचरितम् ४.११४ ॥ |
| अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः । तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः ॥ रघुवंशम् ८.२४ ॥ |
| अथ किल कथिते सखीभिरत्र क्षणमपरेव ससंभ्रमा भवन्ती । शिथिलितकुसुमाकुलाग्रपाणिः प्रतिपदसंयमितांशुकावृताङ्गी ॥ शिशुपालवधम् ७.३६ ॥ |
| अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन । प्रसभं अवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥ किरातार्जुनीयम् १०.१७ ॥ |
| अथ कोऽयमिन्द्रमणिमेचकच्छविर्ध्वनिनैव बद्धपुलकं करोति माम् । नवनीलनीरधरधीरगर्जितक्षणबद्धकुड्मलकदम्बडम्बरम् ॥ (उत्तररामचरितम् ६.१७) |
| अथ क्षमामेव निरस्तसाधनश्चिराय पर्येषि सुखस्य साधनम् । विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥ किरातार्जुनीयम् १.४४ ॥ |
| अथ गौरवेण परिवादमपरिगणयंस्तमात्मनः । प्राह मुररिपुतिरस्करणक्षुभितः स्म वाचमिति जाह्नवीसुतः ॥ शिशुपालवधम् १५.४५ ॥ |
| अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना । धृतराष्ट्रसुतेन सुत्यज्याश्चिरमास्वाद्य नरेन्द्रसम्पदः ॥ किरातार्जुनीयम् २.१६ ॥ |
| अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया । अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलङ्घयितुं नभः ॥ किरातार्जुनीयम् ५.१ ॥ |
| अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः । श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरंगमेण ॥ रघुवंशम् ८.७२ ॥ |
| अथ तं सवनाय दिषितः प्रणिधानाद्गुरुराश्रमस्थितः । अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥ रघुवंशम् ८.७५ ॥ |
| अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीं । विससर्ज कृतान्त्यमण्डनामनलाय्ऽ आगुरुचन्दनदिहसे ॥ रघुवंशम् ८.७१ ॥ |
| अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः । वसुधामपि हस्तगामिनीमकरोदिन्दुमतीमिवापराम् ॥ रघुवंशम् ८.१ ॥ |
| अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः । पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥ रघुवंशम् १०.५१ ॥ |
| अथ तेन दशाहतः परे गुणशेषां उपदिष्य गेहिनीम् । विदुषा विधयो महर्द्धयः पुर एवोपवने समापिताः ॥ रघुवंशम् ८.७३ ॥ |

| |
|---|
| अथ तैः परिदेविताक्षरैर्हृदये दिग्ध शरैरिवाहतः । रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः ॥ कुमारसंभवम् ४.२५ ॥ |
| अथ दीपितवारिवाहवर्त्मा रववित्रासितवारणादवार्यः । निपपात जवादिषु पिनाकान्महतोऽभ्रादिव वैद्युतः कृशानुः ॥ किरातार्जुनीयम् १३.२० ॥ |
| अथ दीर्घतमं तमः प्रवेक्ष्यन्सहसा रुग्णरयः स सम्भ्रमेण । निपतन्तमिवोष्णरश्मिं उर्व्यां वलयीभूततरुं धरां च मेने ॥ किरातार्जुनीयम् १३.३० ॥ |
| अथ नभस्य इव त्रिदशायुधं कनकपिङ्गतडिद्गुणसंयुतं । धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ॥ रघुवंशम् ८.५४ ॥ |
| अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् । नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥ रघुवंशम् २.७५ ॥ |
| अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशःकुसुमं धनुः । श्रुतिपथोपरतं सुमनस्तया तमिषुमाशु विधाय जिगाय तान् ॥ नैषधीयचरितम् ४.१ ॥ |
| अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्पह् । पुरमविशदयोध्यां मैथिलीदर्शनीनां कुवलयितगवाक्षां लोचनैरङ्गनानाम् ॥ रघुवंशम् ११.९३ ॥ |
| अथ परिमलजां अवाप्य लक्ष्मीमवयवदीपितमण्डनश्रियस्ताः । वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥ किरातार्जुनीयम् १०.१ ॥ |
| अथ प्रकाशं निभृतस्मिता सती सतीकुलस्याभरणं किमप्यसौ । पुनस्तदाभाषणविभ्रमोन्मुखं मुखं विदर्भाधिपसंभवा दधौ ॥ नैषधीयचरितम् ९.२४ ॥ |
| अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् । वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ रघुवंशम् २.१ ॥ |
| अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिं । सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जित श्रियं ॥ रघुवंशम् १.९३ ॥ |
| अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः । उवाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ॥ रघुवंशम् ५.५२ ॥ |
| अथ प्रयत्नोन्नमितानमत्फणैर्धृते कथंचित्फणिनां गणैरधः । न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले ॥ शिशुपालवधम्  १.१३ ॥ |
| अथ प्रियासादनशीलनादौ मनोरथः पल्लवितः पुरा यः । विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ॥ नैषधीयचरितम् ७.१ ॥ |
| अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता । पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥ नैषधीयचरितम् २.७३ ॥ |
| अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपया स निजाम् । अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥ नैषधीयचरितम् ९.१५७ ॥ |
| अथ भीमसुतावलोकनैः सफलं कर्तुमहस्तदेव सः । क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥ नैषधीयचरितम् २.६४ ॥ |
| अथ भूतानि वार्त्रघ्न- शरेभ्यस्तत्र तत्रसुः । भेजे दिशः परित्यक्त- महेष्वासा च सा चमूः ॥ किरातार्जुनीयम् १५.१ ॥ |
| अथ मधु वनितां नेत्रनिर्वेशनीयं मनसिजतरुपुष्पं रागबन्धप्रवालं । अकृतकविधि सर्वाङ्गीणमाकल्पजातं विलसितपदमाद्यं यौवनं स प्रपेदे ॥ रघुवंशम् १८.५२ ॥ |
| अथ मीनलग्न उत वा तदंशके चलितस्य वक्रमिह वर्त्म जायते । जनिलग्नजन्मभपती शुभग्रहौ भवतस्तदा तदुदये शुभो गमः ॥ मुहूर्त.यात्राप्रकरणम् ४४॥ |
| अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुं तुदया च तया मुहुः । पतितया स्मरतापमये गदे निजगदेऽश्रुविमिश्रमुखी सखी ॥ नैषधीयचरितम् ४.४३ ॥ |
| अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता । विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ॥ कुमारसंभवम् ४.१ ॥ |
| अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः । नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसंनिभः ॥ रघुवंशम् ८.४८ ॥ |
| अथ यन्तारमादिष्य धुर्यान्विश्रमयेति सः । तामवारोपयत्पत्नीं रथादवततार च ॥ रघुवंशम् १.५४ ॥ |
| अथ रथचरणौ विलोक्य रक्तावतिविरहासहताहताविवास्रैः । अपि तमकृत पद्मसुप्तिकालं श्वसनविकीर्णसरोजसौरभं सा ॥ नैषधीयचरितम् २१.१४५ ॥ |
| अथ रिरंसुममुं युगपद्गिरौ कृतयथास्वतरुप्रसवश्रिया । ऋतुगणेन निषेवितुमादधे भुवि पदं विपदन्तकृतं सताम् ॥ शिशुपालवधम् ६.१ ॥ |
| अथ रोधसि दक्षिणोदधेः श्रित गोकर्णनिकेतमीश्वरं । उपवीणयितुं ययौ रवेरुदगावृत्तिपथेन नारदः ॥ रघुवंशम् ८.३३ ॥ |
| अथ लक्ष्मणागतकान्तवपुर्जलधिं विलङ्घ्य शशिदाशरथिः । परिवारितः परित ऋक्षगणैस्तिरौघराक्षसकुलं बिभिदे ॥ शिशुपालवधम् ९.३१ ॥ |
| अथ वक्षोमणिच्छायाच्छुरितापीतवाससा । स्फुरदिन्द्रधनुर्भिन्नतडितेव तडित्वता ॥ शिशुपालवधम् १९.८३ ॥ |
| अथ वा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः । मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ रघुवंशम् १.४ ॥ |
| अथ वा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा । यदनेन तरुर्न पातितस्क्षपिता तद्विटपाश्रितलता ॥ रघुवंशम् ८.४७ ॥ |
| अथ वा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः । हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥ रघुवंशम् ८.४५ ॥ |
| अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमञ्चिताक्षिपक्ष्मा । क्षितिपसमाजमगात्स्वयंवरस्थम् ॥ रघुवंशम् ५.७६ ॥ |
| अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य क्षितिधरपतिकन्या माददानः करेण कनककलशयुक्तं भक्तिशोभासनाथं क्षितिविरचितशय्यं कौतुकागारमागात्॥ कुमारसंभवम् ७.९४॥ |
| अथ विहितविधेयैराशु मुक्ता वितानैरसितनगनितम्बश्यामभासां घनानां । विकसदमलधाम्नां प्राप नीलोत्पलानां श्रियमधिकविशुद्धां वह्निदाहादिव द्यौः ॥ किरातार्जुनीयम् १६.६२ ॥ |
| अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया । विषयेषु विनाशधर्मसु त्रिदिवस्तेष्वपि निःस्पृहोऽभवत् ॥ रघुवंशम् ८.१० ॥ |
| अथ वेलासमासन्नशैलरन्ध्रानुनादिना । स्वरेणोवाच भगवान्परिभूतार्णवध्वनिः ॥ रघुवंशम् १०.३६ ॥ |
| अथ व्यवस्थापितवाक्कथंचित् सौमित्रिरन्तर्गतबाष्पकण्ठः । औत्पातिको मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार ॥ रघुवंशम् १४.५३ ॥ |
| अथ शशधरमौलेरभ्यनुज्ञामवाप्य त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै । अवितथफलमाशिर्वादमारोपयन्तो विजयि विविधमस्त्रं लोकपाला वितेरुः ॥ किरातार्जुनीयम् १८.४६ ॥ |

| |
|---|
| अथ श्रिया भर्त्सितमत्स्यलाञ्छनः समं वयस्यैः स्वरहस्यवेदिभिः । पुरोपकण्ठोपवनं किलेक्षिता दिदेश यानाय निदेशकारिणः ॥ नैषधीयचरितम् १.५६ ॥ |
| अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्त्वा यूने सितातपवारणम् । मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसां इक्ष्वाकूणामिदं हि कुलव्रतम् ॥ रघुवंशम् ३.७० ॥ |
| अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् । यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरञ्चितविक्रमम् ॥ रघुवंशम् ८.२४ ॥ |
| अथ सस्मितवीक्षितादवज्ञाचलितैकोन्नमितभ्रु माधवेन । निजकेतुशिरःश्रितः सुपर्णादुदपप्तन्नयुतानि पक्षिराजां ॥ शिशुपालवधम् २०.५२ ॥ |
| अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी । विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम्॥ कुमारसंभवम् ४.४ ॥ |
| अथ सान्द्रसान्ध्यकिरणारुणितं हरिहेतिहूति मिथुनं पततोः । पृथगुत्पपात विरहार्तिदलद्धृदयस्रुतासृगनुलिप्तमिव ॥ शिशुपालवधम् ९.१५ ॥ |
| अथ स्तुते बन्दिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके । संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयन्तीः ॥ रघुवंशम् ६.८ ॥ |
| अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः । पयोऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ किरातार्जुनीयम् ८.२७ ॥ |
| अथ स्मराज्ञामवधीर्य धैर्यादूचे स तद्वागुपवीणितोऽपि । विवेकधाराशतधौतमन्तः सतां न कामः कलुषीकरोति ॥ नैषधीयचरितम् ८.५४ ॥ |
| अथ स्वमादाय हबयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात् । निलीय तस्मिन्निव सन्नपांनिधिर्वने तडाको ददृशेऽवनीभुजा ॥ नैषधीयचरितम् १.१०७ ॥ |
| अथ स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनम् । सुराङ्गना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ किरातार्जुनीयम् ८.१ ॥ |
| अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया । स्ववपुःप्रतिमनोहरं हरं दधतमुदीक्ष्य ननाम पाण्डवः ॥ किरातार्जुनीयम् १८.१५ ॥ |
| अथतत्र पाण्डुतनयेन सदसि विहितं मुरद्विषः । मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनां ॥ शिशुपालवधम् १५.१ ॥ |
| अथवा न धर्ममसुबोधसमयमवयात बालिशाः । खाममयमिह वृथापालितो हतबुद्धिरप्रणिहितः सरित्सुतः ॥ शिशुपालवधम् १५.१९ ॥ |
| अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः । स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ॥ नैषधीयचरितम् २.६१ ॥ |
| अथवाध्वमेव खलु यूयमगणितमरुद्गणौजसः । वस्तु कियदिदमयं न मृधे मम केवलमस्य मुखमीक्षितुं क्षमः ॥ शिशुपालवधम् १५.६४ ॥ |
| अथवाभिनिविष्टबुद्धिषु व्रजति व्यर्थकतां सुभाषितं । रविरागिषु शीतरोचिषः करजालं कमलाकरेष्विव ॥ शिशुपालवधम् १६.४३ ॥ |
| अथवैष कृतज्ञयेव पूर्वं भृशमासेवितया रुषा न मुक्तः । अवधूय विरोधिनीः किं आरान्मृगजातीरभियाति मां जवेन ॥ किरातार्जुनीयम् १३.५ ॥ |
| अथसूर्यरुचीव तस्य दृष्टावुद्भूत्कौस्तुभदर्पणं गतायां । पटुः धाम ततो न चाद्भुतं तद्विभुरिन्द्वर्कविलोचनः किलासौ ॥ शिशुपालवधम् २०.३७ ॥ |
| अथाऽथर्वनिधेस्तस्य विजितारिपुरः पुरः । अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ रघुवंशम् १.५९ ॥ |
| अथाग्रमहिषी राज्ञः प्रसूतिसमये सती । पुत्रं तमोऽपहं लेभे नक्तं ज्योतिरिवौषधिः ॥ रघुवंशम् १०.६७ ॥ |
| अथाग्रहस्ते मुकुलीकृताङ्गुला समर्पयन्ती स्फटिकाक्ष मालिकाम् । कथंचिदद्रस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ॥ कुमारसंभवम् ५.६३ ॥ |
| अथाग्रहो मे भवते पुनः पुनः सहैब नेयो भगिनीश्वरोऽपि सः । रणे हि दृष्ट्वा भवतः पराक्रमं प्रसन्नचेता स महान् भविष्यति ॥ प्रतापविजयः-८६ ॥ |
| अथाग्रे हसता साचि- स्थितेन स्थिरकीर्तिना । सेनान्या ते जगदिरे किंचिदायस्तचेतसा ॥ किरातार्जुनीयम् १५.७ ॥ |
| अथाङ्गुलिभ्यां हरितालमाद्रं माङ्गल्यमादाय मनःशिलां च। कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य॥ कुमारसंभवम् ७.२३॥ |
| अथाङ्गदाश्लिष्टभुजं भुजिष्या हेमाङ्गदं नाम कलिङ्गनाथम् । आसेदुषीं सादितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ॥ रघुवंशम् ६.५३ ॥ |
| अथाङ्गराजादवतार्य चक्षुर्याहजन्यामवदत्कुमारी । नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ॥ रघुवंशम् ६.३० ॥ |
| अथाजिनापाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा \| विवेश कश्चिञ्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥ कुमारसंभवम् ५.३० ॥ |
| अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।  रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥ रघुवंशम् १३.१ ॥ |
| अथाद्भुतेनास्तनिमेषमुद्रमुन्निद्रलोमानममुं युवानम् । दृशा पपुस्ताः सुदृशः समस्ताः सुता च भीमस्य महीमघोनः ॥ नैषधीयचरितम् ८.१ ॥ |
| अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपाण्डुरेण । आनन्दयित्री परिणेतुरासीदनक्षरव्यञ्जितदोहदेन ॥ रघुवंशम् १४.२६ ॥ |
| अथाधिगन्तुं निषधेश्वरं सा प्रसादनामाद्रियतामराणाम् । यतः सुराणां सुरभिर्नृणां तु सा वेधसासृज्यत कामधेनुः ॥ नैषधीयचरितम् १४.१ ॥ |
| अथाधिशिश्ये प्रयथः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं । सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥ रघुवंशम् ५.२८ ॥ |
| अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तधुरं तुरंगैः । रथं सुमन्त्र प्रतिपन्नरश्मिं आरोप्य वैदेहसुतां प्रतस्थे ॥ रघुवंशम् १४.४७ ॥ |
| अथानुपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टां । सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविषृटतल्पः ॥ रघुवंशम् १६.६ ॥ |
| अथानुरूपाभिनिवेशतोपिणा कृताभ्यनुज्ञा गुरुणा गरीयसा । प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरीशिखरं शिखण्डिमत् ॥ कुमारसंभवम् ५.७ ॥ |
| अथान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहःसहोदरैः । निगालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः ॥ नैषधीयचरितम् १.५८ ॥ |
| अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् । भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ॥ रघुवंशम् २.४६ ॥ |

| |
|---|
| अथान्यमुद्दिश्य नृपं कृपामयी मुखेन तद्दिङ्मुखसंमुखेन सा । दमस्वसारं वदति स्म देवता गिरामिलाभूवदतिस्मरश्रियम् ॥ नैषधीयचरितम् १२.५२ ॥ |
| अथापदां उद्धरणक्षमेषु मित्रेष्विवास्त्रेषु तिरोहितेषु । धृतिं गुरुश्रीर्गुरुणाभिपुष्यन्स्वपौरुषेणेव शरासनेन ॥ किरातार्जुनीयम् १७.१ ॥ |
| अथाभिपश्यन्निव विद्विषः पुरः पुरोधसारोपितहेतिसंहतिः । बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ॥ किरातार्जुनीयम् ३.५६ ॥ |
| अथाभिलिख्येव समर्प्यमाणां राजि निजस्वीकरणाक्षराणाम् । दूर्वाङ्कुराढ्यां नलकण्ठनाले वधूर्मधूकस्रजमुत्ससर्ज ॥ नैषधीयचरितम् १४.४८ ॥ |
| अथाभिषेकं रघुवंशकेतोः प्रारब्धं आनन्दजलैर्जनन्योः । निर्वर्तयामासुरमात्यवृद्धास्तीर्थाहृतैः काञ्चनकुम्भतोयैः ॥ रघुवंशम् १४.७ ॥ |
| अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया । तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ रघुवंशम् १.३५ ॥ |
| अथायमुत्थाय विसार्य दोर्युगं मुदा प्रतीयेष तमात्मजन्मनः । सुरस्रवन्त्या इव पात्रमागतं भृताभितोवीचिगतिः सरित्पतिः ॥ नैषधीयचरितम् १६.११ ॥ |
| अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः । कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वा वनितामपश्यत् ॥ रघुवंशम् १६.४ ॥ |
| अथावददूतमुखः स नैषधं कुलं च बाला च ममानुकम्प्यताम् । स पल्लवत्वद्य मनोरथाङ्कुरश्चिरेण नस्त्वच्चरणोदकैरिति ॥ नैषधीयचरितम् १५.९ ॥ |
| अथावदद्भीमसुतेङ्गितात्सखी जनैरकीर्तिर्यदि वास्य नेष्यते । मयापि सा तत्खलु नेष्यते परं सभाश्रवःपूरतमालवल्लिताम् ॥ नैषधीयचरितम् १२.१०५ ॥ |
| अथावलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः । स तिर्यगावर्जितकंधरः शिरः पिधाय पक्षेण रतिक्लमालसः ॥ नैषधीयचरितम् १.१२१ ॥ |
| अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद्गुरुः । नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥ रघुवंशम् ३.३३ ॥ |
| अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्बिहारम् । निःश्वासहार्यांशुकमाजगाम घर्मः प्रिया वेषमिवोपदेष्टुं ॥ रघुवंशम् १६.४३ ॥ |
| अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे । अमङ्गलाभ्यासर् तिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे ॥ कुमारसंभवम् ५.६५ ॥ |
| अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया जुणैश्च । चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रं एषां हि कुलानुसारि ॥ रघुवंशम् १६.१ ॥ |
| अथेत्थमेव प्रविधाय दुष्कृतिं, महादयालोर्दयया वशीकृतः । तदीय-सैन्याऽधिपतिस्तदाऽभवत् स मानसिंहो महितो महीतले ॥ प्रतापविजयः-४८ ॥ |

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि । जनस्थाने शून्ये विकलकरणैरार्यचरितै- रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥

(उत्तररामचरितम् १.२८)

| |
|---|
| अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्द्भलवन्निगृह्य । हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ कुमारसंभवम् ३.६९ ॥ |
| अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् । निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौर्हृदलक्षणं दधौ ॥ रघुवंशम् ३.१ ॥ |
| अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः । आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ॥ रघुवंशम् ५.३९ ॥ |
| अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि । शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ॥ रघुवंशम् २.४९ ॥ |
| अथैतदुर्वीपतिवर्णनाद्भुतं न्यमीलदास्वादयितुं हृदीव सा । मधुस्रजा नैषधनामजापिनी स्फुटीभवद्ध्यानपुरःस्फुरन्नला ॥ नैषधीयचरितम् १२.८६ ॥ |
| अथोच्चकैरासनतः परार्ध्याद्दुद्यन्स धूतारुणवल्कलाग्रः । रराज कीर्णाकपिशांशुजालः शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ किरातार्जुनीयम् २.५७ ॥ |
| अथोच्चकैर्जरठकपोतकन्धरातनूरुहप्रकरविपाण्डुरद्युति । वलैश्चलच्चरणविधूतमुच्चरद्धनावलीरुदचरत क्षमारजः ॥ शिशुपालवधम् १७..५२ ॥ |
| अथोच्चकैस्तोरणसङ्गभङ्गभयावनम्रीकृतकेतनानि । क्रियाफलानीव सुनीतिभाजं सैन्यानि सोमान्वयमन्वयुस्तम् ॥ शिशुपालवधम् ३.२५ ॥ |
| अथोत्तस्थे रणाटव्यामसुहृद्वेणुदारिणा । नृपाङ्घ्रिपौघसंघर्षादग्निवद्वेणुदारिणा ॥ शिशुपालवधम् १९.१ ॥ |
| अथोद्भ्रमन्ती रुदती गतक्षमा ससंभ्रमा लुप्तरतिः स्खलन्मतिः । व्यधात्प्रियप्राप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि सा ॥ नैषधीयचरितम् ९.८७ ॥ |
| अथोपकार्या निषधावनीपतिर्निजामयासीद्वरणस्रजाञ्चितः । वसूनि वर्षन्सुबहूनि बन्दिनां विशिष्यभैमीगुणकीर्तनाकृताम् ॥ नैषधीयचरितम् १५.१ ॥ |
| अथोपकार्याममरेन्द्रकार्यात्कक्षासु रक्षाधिकृतैरदृष्टः । भैमीं दिदृक्षुर्बहुदिक्षु चक्षुर्दिशन्नसौ तामविशद्विशङ्कः ॥ नैषधीयचरितम् ६.११ ॥ |
| अथोपचारोद्धुरचारुलोचना विलासनिर्वासितधैर्यसंपदः । स्मरस्य शिल्पं वरवर्गविक्रिया विलोककं लोकमहासयन्मुहुः ॥ नैषधीयचरितम् १६.५५ ॥ |
| अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण । विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करवीजमालाम् ॥ कुमारसंभवम् ३.६५॥ |
| अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं ग्रवो गुरुप्रियम् । अवन्ध्ययत्नाश्च बभूवुरर्भके ततार विद्याः पवनातिपातिभिर् ॥ रघुवंशम् ३.२९ ॥ |
| अथोपपत्तिं छलनापरो परामवाप्य शैलूष इवैष भूमिकाम् । तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते संप्रति सो प्यसः परैः ॥ शिशुपालवधम् १.६९ ॥ |
| अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम् । स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमुखो बभूव ॥ रघुवंशम् ७.१ ॥ |
| अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः । निर्धौत दानामलगण्डभित्तिर्यन्यः सरित्तो गज उन्ममज्ज ॥ रघुवंशम् ५.४३ ॥ |
| अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा । कुलध्वजस्तानि चलध्वजानि निवेशयामास बली बलानि ॥ रघुवंशम् १६.३७ ॥ |
| अथोराख्यस्य पुरस्य नाथं दौवारिकी देवसरूपं । इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्यां ॥ रघुवंशम् ६.५९ ॥ |

| |
|---|
| अथोरुदेशादवतार्य पादमाक्रान्तिसंभावितपादपीठम् । संकल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ॥ कुमारसंभवम् ३.११॥ |
| अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः । विहर्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव ॥ रघुवंशम् १६.५४ ॥ |
| अथोषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् । समेतबन्धुर्हिमवान्सुताया विवाहदीक्षाविधिमन्वतिष्ठत्॥ कुमारसंभवम् ७.१॥ |
| अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः । स्पृषन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ॥ रघुवंशम् ५.३२ ॥ |
| अथोष्णभासेव सुमेरुकुञ्जान्विहीयमानानुदयाय तेन । बृहद्द्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ किरातार्जुनीयम् ३.३२ ॥ |
| अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः । चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥ रघुवंशम् १३.४५ ॥ |
| अदःसमित्संमुखवीरयौवतत्रुटद्भुजाकम्बुमृणालहारिणी । द्विषद्गणस्त्रैणदृगम्बुनिर्झरे यशोमरालावलिरस्य खेलति । १२.३५ ॥ नैषधीयचरितम् |
| अदयमिव कराग्रैरेष निपीड्य सद्यः शशधरमहरादौ रागवानुष्णरश्मिः । अवकिरति नितान्तं कान्तिनिर्यासमब्द-स्रुतनवजलपाण्डुं पुण्डरीकोदरेषु ॥ शिशुपालवधम् ११.६२ ॥ |
| अदरेष्वलक्तकरसः सुदृशां विशदं कपोलभुवि लोध्ररजः । नवमञ्जनं नयनपङ्कजयोर्बिभिदे न शङ्खनिहितात्पयसः ॥ शिशुपालवधम् ९.४६ ॥ |
| अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम् । इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥ नैषधीयचरितम् १.२८ ॥ |
| अदाहि यस्तेन दशार्धबाणः पुरापुरारेर्नयनालयेन । न निर्दहंस्तं भवदक्षिवासी न वैरशुद्धेरधुनाधमर्णः ॥ नैषधीयचरितम् ८.७३ ॥ |
| अदिकमरुणिमानमुद्वहद्भिर्विकसदशीतमरीचिरश्मिजालैः । परिचितपरिचुम्बनाभियोगादपगतकुङ्कुमरेणुभिः कपोलैः ॥ शिशुपालवधम् ७.६३ ॥ |
| अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम् । ततान्तरं सान्तरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥ किरातार्जुनीयम् ४.२९ ॥ |
| अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः । उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ रघुवंशम् १.८७ ॥ |
| अदृश्यमाना क्वचिदीक्षिता क्वचिन्ममानुयोगे भवतः सरस्वती । क्वचित्प्रकाशां क्वचिदस्फुटार्णसं सरस्वतीं जेतुमनाः सरस्वतीं ॥ नैषधीयचरितम् ९.४ ॥ |
| अदृष्टिदानं कृतपूर्वनाशनमाननं दुश्चरितानुकीर्तनम् । कथाप्रसङ्गेन च नामविस्मृतिर् विरक्तभावस्य जनस्य लक्षणम् ॥ नीतिसंग्रहस्य मित्र-१.११६ ॥ |
| अदो निगद्यैव नतास्यया तया श्रुतौ लगित्वाभिहितालिरालपत् । प्रविश्य यन्मे हृदयं ह्रियाह तद्विनिर्यदाकर्णय मन्मुखाध्वना ॥ नैषधीयचरितम् ९.३ ॥ |
| अदोऽयमालप्य शिखीव शारदो बभूव तूष्णीमहितापकारकः । अथास्यरागस्य दधा पदेपदे वचांसि हंसीव विदर्भजाददे ॥ नैषधीयचरितम् ९.१४ ॥ |
| अदोषतामेव सतां विवृण्वते द्विषां मृषादोषकणाधिरोपणाः । न जातु सत्ये सति दूषणे भवेदलीकमाधातुमवद्यमुद्यमः ॥ नैषधीयचरितम् १५.४ ॥ |
| अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः । हत्वा निवृत्ताय मृधे खरादीन्संरक्षितां त्वामिव लक्ष्मणो मे ॥ रघुवंशम् १३.६५ ॥ |
| अद्भुतो विस्मयस्थायी मायादिकविभावभूः । रोमाञ्चाद्यनुभावोऽयं स्तम्भादिव्यभिचारिकः ॥ चन्द्रालोकः६.१२ ॥ |
| अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः । आ संसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम् ॥ किरातार्जुनीयम् ३.६ ॥ |
| अद्यप्रभृत्यवनताङ्गि! तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ । अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ कुमारसंभवम् ५.८६ ॥ |
| अद्ययावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ । आस्थितावितथतागुणपाशस्त्वादृशा स विदुषा दुरपासः ॥ नैषधीयचरितम् ५.१३ ॥ |
| अद्यापि कोपविमुखीकृतगन्तुकामा नोक्तं वचः प्रतिददाति यदैव वक्त्रम् । चुम्बामि रोदिति भृशं पतितो अस्मि पादे दासस् तव प्रियतमे भज मं स्मरामि ॥ चौरपंचाशिका ३६ ॥ |
| अद्यापि तत् कनककुण्डलघृष्टगण्डमास्यं स्मरामि विपरीतरताभियोगे । आन्दोलनश्रमजलस्फुटसान्द्रबिन्दु मुक्ताफलप्रकरविच्छुरितं प्रियायाः ॥ चौरपंचाशिका १२ ॥ |
| अद्यापि तत् कनकगौरकृताङ्गरागं प्रस्वेदबिन्दुविततं वदनं प्रियायाः । अन्ते स्मरामि रतिखेदविलोलनेत्रं राहूपरागपरिमुक्तम् इवेन्दुबिम्बम् ॥ चौरपंचाशिका १० ॥ |
| अद्यापि तत् कनकरेणुघनोरुदेशे न्यस्तं स्मरामि नखरक्षतलक्ष्म तस्याः । आकृष्टहेमरुचिराम्बरम् उत्थितायां लज्जावशात् करधृतं च ततो व्रजन्त्याः ॥ चौरपंचाशिका १५ ॥ |
| अद्यापि तत् कमलरेणुसुगन्धगन्धि तत्प्रेमवारि मकरध्वजपातकारि । प्राप्नोम्य् अहं यदि पुनः सुरतैकतीर्थं प्राणांस् त्यजामी नियतं तदवाप्तिहेतोर् ॥ चौरपंचाशिका ४२ ॥ |
| अद्यापि तत्प्रणयभङ्गगुरुदृष्टिपातं तस्याः स्मरामि रतिविभ्रमगात्रभङ्गम् । वस्त्राञ्चलस्खलतचारुपयोधरान्तं दन्तच्छदं दशनखण्डनमण्डनं च ॥ चौरपंचाशिका १३ ॥ |
| अद्यापि तत्सुरतकेलिनिरस्त्रयुद्धं बन्धोपबन्धपतनोत्थितशून्यहस्तम् । दन्तौष्ठपीडननखक्षतरक्तसिक्तं तस्या स्मरामि रतिबन्धुरनिष्ठुरत्वम् ॥ चौरपंचाशिका ४८ ॥ |
| अद्यापि तद्वदनपङ्कजगन्धलुब्ध भ्राम्यद्द्विरेफचयचुम्बितगण्डदेशाम् । लीलावधूतकरपल्लवकङ्कणानां क्वाणो विमूर्च्छति मनः सुतरां मदीयम् ॥ चौरपंचाशिका ३४ ॥ |
| अद्यापि तन्नयनकज्जलम् उज्ज्वलास्यं विश्रान्तकर्णयुगलं परिहासहेतोः । पश्ये तवात्मनि नवीनपयोधराभ्यां क्षीणां वपुर् यदि विनश्यति नो न दोषः ॥ चौरपंचाशिका ४० ॥ |
| अद्यापि तन्मनसि संपरिवर्तते मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या । जीवेति मङ्गलवचः परिहृत्य कोपात् कर्णे कृतं कनकपत्रम् अनालपन्त्या ॥ चौरपंचाशिका ११ ॥ |
| अद्यापि तां कनककान्तिमदालसाङ्गीं व्रीडोत्सुकां निपतिताम् इव चेष्टमानाम् । अगांगसंगपरिचुम्बनजातमोहां तां जीवनौषधिम् इव प्रमदां स्मरामि ॥ चौरपंचाशिका ४७ ॥ |
| अद्यापि तां कनकचम्पकदामगौरीं फुल्लारविन्दवदनां तनुरोमराजीम् । सुप्तोत्थितां मदनविह्वललालसाङ्गीं विद्यां प्रमादगुणिताम् इव चिन्तयामि ॥ चौरपंचाशिका १ ॥ |
| अद्यापि तां क्षणवियोगविषोपमेयां सङ्गे पुनर्बहुतराममृताभिषेकाम् । तां जीवधारणकरीं मदनातपत्राम् उद्वत्तकेशनिवहां सुदतीं स्मरामि ॥ चौरपंचाशिका ३० ॥ |
| अद्यापि तां क्षितितले वरकामिनीनां सर्वाङ्गसुन्दरतया प्रथमैकरेखाम् । शृङ्गारनाटकरसोत्तमपानपात्रीं कान्तां स्मरामि कुसुमायुधबाणखिन्नाम् ॥ चौरपंचाशिका २४ ॥ |
| अद्यापि तां गमनमित्युदितं मदीयं श्रुत्वैव भीरुहरिणीमिव चञ्चलाक्षीम् । वाचः स्खलद्विगलदाश्रुजलाकुलाक्षीं संचिन्तयामि गुरुशोकविनम्रवक्त्राम् ॥ चौरपंचाशिका २८ ॥ |

| |
|---|
| अद्यापि तां गलितबन्धनकेशपाशां स्रस्तस्रजं स्मिरसुधामधुराधरौष्ठीम् । पीनोन्नतस्तनयुगोपरिचारुचुम्बन् मुक्तावलीं रहसि लोलदृशं स्मरामि ॥ चौरपंचाशिका १७ ॥ |
| अद्यापि तां चाटुशतदुर्ललितोचितार्थं तस्याः स्मरामि सुरतक्लमविह्वलायाः । अव्यक्तनिःस्वनितकातरकथ्यमान संकीर्णवर्णरुचिरं वचनं प्रियायाः ॥ चौरपंचाशिका २१ ॥ |
| अद्यापि तां जगति वर्णयितुं न कश्चिच्शक्नोत्य्दृष्टसदृशीं च परिग्रहं मे । दृष्टं तयोर् सदृशयोर्खलु येन रूपं शक्तो भवेद् यदि सैव नरो न चान्यः ॥ चौरपंचाशिका ३८ ॥ |
| अद्यापि तां धवलवेश्मनि रत्नदीप मालामयूखपटलैर् दलितान्धकारे । प्राप्तोद्यमे रहसि संमुखदर्शनार्थं लज्जाभयार्थनयनामनुचिन्तयामि ॥ चौरपंचाशिका १८ ॥ |
| अद्यापि तां न खलु वेद्मि किम् ईशपत्नी शापं गता सुरपतेर् अथ कृष्णलक्ष्मी । धात्रैव किं नु जगतः परिमोहनाय सा निर्मिता युवतिरत्नदिदृक्षयाट् वा ॥ चौरपंचाशिका ३९ ॥ |
| अद्यापि तां नखपदं स्तनमण्डले यद् दत्तं मयास्यमधुपानविमोहितेन । उद्भिन्नरोमपुलकैर् बहुभिर् समन्ताज् जागर्ति रक्षति विलोकयति स्मरामि ॥ चौरपंचाशिका ३५ ॥ |
| अद्यापि तां निजवपुः कृशवेदिमध्याम् उत्तुंगसंभृतसुधास्तनकुम्भयुग्माम् । नानाविचित्रकृतमण्डमण्डिताङ्गी सुप्तोत्थितां निशि दिवा न हि विस्मरामि ॥ चौरपंचाशिका ४६ ॥ |
| अद्यापि तां निधुवनक्लमनिःसहाङ्गीमापाण्डुगण्डपतितालककुन्तलालिम् । ङ प्रच्छन्नपापकृतमन्थरमावहन्तीं कण्ठावसक्तबाहुलतां स्मरामि ॥ चौरपंचाशिका ४ ॥ |
| अद्यापि तां निधुवने मधुपानरक्ताम् लीलाधरां कृशतनुं चपलायताक्षीम् । काश्मीरपङ्कमृगनाभिकृताङ्गरागां कर्पूरपूगपरिपूर्णमुखीं स्मरामि ॥ चौरपंचाशिका ९ ॥ |
| अद्यापि तां नृपती शेखरराजपुत्रीं संपूर्णयौवनमदालसघूर्णनेत्रीम् । गन्धर्वयक्षसुरकिंनरनागकन्यां स्वर्गाद् अहो निपतिताम् इव चिन्तयामि ॥ चौरपंचाशिका ४५ ॥ |
| अद्यापि तां प्रणयिनीं मृगशावकाक्षीं पीयूषपूर्णकुचकुम्भयुगं वहन्तीम् । पश्याम्य् अहं यदि पुनर्दिवसावसाने स्वर्गापवर्गनरराजसुखं त्यजामि ॥ चौरपंचाशिका २३ ॥ |
| अद्यापि तां प्रथमतो वरसुन्दरीणां स्नेहैकपात्रघटितामवनीशपुत्रीम् । हंहोजना मम वियोगहुताशनो ऽयं सोढुं न शक्यतेति प्रतिचिन्तयामि ॥ चौरपंचाशिका २६ ॥ |
| अद्यापि तां मसृणचन्दनपङ्कमिश्र. कस्तूरिकापरिमलोत्थविसर्पिगन्धाम् । अन्योन्यचञ्चुपुटचुम्बनलग्नपक्ष्म युग्माभिरामनयनां शयने स्मरामि ॥ चौरपंचाशिका ८ ॥ |
| अद्यापि तां यदि पुनः कमलायताक्षीं पश्यामि पीवरपयोधरभारखिन्नाम् । संपीड्य बाहुयुगलेन पिबामि वक्त्रमुन्मत्तवन्मधुकरः कमलं यथेष्टम् ॥ चौरपंचाशिका ३ ॥ |
| अद्यापि तां यदि पुनः श्रवणायताक्षीं पश्यामि दीर्घविरहज्वरिताङ्गयष्टिम् । अङ्गैरहं समुपगुह्य ततो ऽतिगाढं नोन्मीलयामि नयने न च तां त्यजामि ॥ चौरपंचाशिका ६ ॥ |
| अद्यापि तां विधृतकज्जललोलनेत्रां पृथ्वीं प्रभूतकुसुमाकुलकेशपाशाम् । सिन्दूरसंलुलितमौक्तिकदन्तकान्तिमाबद्धहेमकटकां रहसि स्मरामि ॥ चौरपंचाशिका १६ ॥ |
| अद्यापि तां विरहवह्निनिपीडिताङ्गीं तन्वीं कुरङ्गनयनां सुरतैकपात्रीम् । नानाविचित्रकृतमण्डनमावहन्तीं तां राजहंसगमनां सुदतीं स्मरामि ॥ चौरपंचाशिका १९ ॥ |
| अद्यापि तां विहसितां कुचभारनम्रां मुक्ताकलापधवलीकृतकण्ठदेशाम् । तत् केलिमन्दरगिरौ कुसुमायुधस्य कान्तां स्मरामि रुचिरोज्ज्वलपुष्पकेतुम् ॥ चौरपंचाशिका २० ॥ |
| अद्यापि तां शशिमुखीं नवयौवनाढ्यां पीनस्तनीं पुनरहं यदि गौरकान्तिम् । पश्यामि मन्मथशरानलपीडिताङ्गीं गात्राणि संप्रति करोमि सुशीतलानि ॥ चौरपंचाशिका २ ॥ |
| अद्यापि तां सुनिपुणं यतता मयापि दृष्टं न यत् सदृशतोवदनं कदाचित् । सौन्दर्यनिर्जितरति द्विजराजकान्ति कान्ताम् इहातिविमलत्वमहागुणेन ॥ चौरपंचाशिका २९ ॥ |
| अद्यापि तां सुरतघूर्णनिमीलिताक्षीं स्रस्ताङ्गयष्टिगलितांशुककेशपाशाम् । शृङ्गारवारिरुहकाननराजहंसीं जन्मान्तरे ऽपि निधने ऽप्य् अनुचिन्तयामि ॥ चौरपंचाशिका २२ ॥ |
| अद्यापि तां सुरतजागरघूर्णमान तिर्यग्वलत्तरलतारकमायताक्षीम् । शृङ्गारसारकमलाकरराजहंसीं व्रीडाविनम्रवदनाम् उषसि स्मरामि ॥ चौरपंचाशिका ५ ॥ |
| अद्यापि तां सुरतताण्डवसूत्रधारीं पूर्णेन्दुसुन्दरमुखीं मदविह्वलाङ्गीम् । तन्वीं विशालजघनस्तनभारनम्रां व्यालोलकुन्तलकलापवतीं स्मरामि ॥ चौरपंचाशिका ७ ॥ |
| अद्यापि तां स्तिमितवस्त्रम् इवाङ्गलग्नां प्रौढप्रतापमदनानलतप्तदेहम् । बालाम् अनाथशरणामनुकम्पनीयां प्राणाधिकां क्षणमहं न हि विस्मरामि ॥ चौरपंचाशिका २५ ॥ |
| अद्यापि ताम् अवहितां मनसाचलेन संचिन्तयामि युवतीं मम जीविताशाम् । नान्योपभुक्तनवयौवनभारसारां जन्मान्तरे ऽपि मम सैव गतिर् यथा स्यात् ॥ चौरपंचाशिका ३३ ॥ |
| अद्यापि धवति मनः किम् अहं करोमि सार्धं सखीभिर् अपि वासगृहं सुकान्ते । कान्ताङ्गसंगपरिहासविचित्रनृत्ये क्रीडाभिरामेति यातु मदीयकालः ॥ चौरपंचाशिका ३७ ॥ |
| अद्यापि निर्मलशरच्शशिगौरकान्ति चेतो मुनेरपि हरेत् किमुतास्मदीयम् । वक्त्रं सुधामयमहं यदि तत् प्रपद्ये चुम्बन् पिबाम्यविरतं व्यधते मनो मे ॥ चौरपंचाशिका ४१ ॥ |
| अद्यापि नोज्झति हरः किल कालकूटं कूर्मो बिभर्ति धरणीं खलु पृष्टभागे । अम्भोनिधिर् वहति दुःसहवडवाग्निम् अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ चौरपंचाशिका ५० ॥ |
| अद्यापि पश्यतु जगद्रघुवंश-वीर्य, ग्रन्थेषु मत्कृत इदं विलिखन्तु विज्ञाः । एकोऽपि कोपिततमः कतमः परेण, दिल्लीश्वरेण समरं समरीरचद्यत् ॥ प्रतापविजयः-१०५ ॥ |
| अद्यापि मे निशि दिवाट् हृदयं दुनोति पूर्णेन्दुसुन्दरमुखं मम वल्लभायाः । लावण्यनिर्जितरतिक्षतिकामदर्पं भूयः पुरः प्रतिपदं न विलोक्यते यत् ॥ चौरपंचाशिका ३२ ॥ |
| अद्यापि यत्र जननी मम हन्त 'राणा' 'राणा' विरौति विकला नु 'कुहू' च्छलेन । अद्यापि धारयति नैव कदापि शोभां नूनञ्च तद्विरहिणी प्रकृतिर्वधूटी ॥ प्रतापविजयः-१५९ ॥ |
| अद्यापि यत्र सुमधुव्रत - झङ्कृतानि, लोलाक्षखञ्जनञ्जनाञ्चित - नर्तनानि । सत्कूजितान्यनुदिनं शुक- शावकानां तौयत्रिकं जयति किञ्चन देवतानाम् ॥ प्रतापविजयः-१६० ॥ |
| अद्यापि वासगृहतो मयि नीयमने दुर्वारभीषणकरैर्यमदूतकल्पैर्- । किं किं तया बहुविधं न कृतं मदर्थे वक्तुं न पार्यतेति व्यथते मनो मे ॥ चौरपंचाशिका ३१ ॥ |
| अद्यापि विस्मयकरीं त्रिदशान् विहाय बुद्धिर्बलाच्चलति मे किम् अहं करोमि । जानन्न् अपि प्रतिमुहूर्तम् इहान्तकाले कान्तेति वल्लभतरेति ममेति धीरा ॥ चौरपंचाशिका २७ ॥ |
| अद्यापि सा मम मनस्तटिनी सदास्ते रोमाञ्चवीचिविलसद्विपुलस्वभावा । कादम्बकेशररुचिः क्षतवीक्षणं मां गात्रक्लमं कथयती प्रियराजहंसी ॥ चौरपंचाशिका ४४ ॥ |
| अद्याप्य् अशोकनवपल्लवरक्तहस्तां मुक्ताफलप्रचयचुम्बितचूचुकाग्राम् । अन्तः स्मितोच्छ्वसितपाण्डुरगण्डभित्तिं तां वल्लभामलसहंसगतिं स्मरामि ॥ चौरपंचाशिका १४ ॥ |
| अद्याप्य् अहं वरवधूसुरतोपभोगं जीवामि नान्यविधिनाट् क्षणम् अन्तरेण । तद् भ्रातरो मरणम् एव हि दुःख शान्त्यै विज्ञापयामि भवतस् त्वरितं लुनीध्वम् ॥ चौरपंचाशिका ४९ ॥ |
| अद्याप्य् अहो जगति सुन्दरलक्षपूर्णे ऽन्यान्यम् उत्तमगुणाधिकसंप्रपन्ने । अन्याभिरप्युपमितुं न मया च शक्यं रूपं तदीयम् इति मे हृदये वितर्कः ॥ चौरपंचाशिका ४३ ॥ |

| |
|---|
| अद्यारभ्य यदि प्रिये पुनरहं मानस्य वाऽन्यस्य वा गृह्णीयां शठदुर्नयेन मनसा नामापि संक्षेपतः । तत्तेनैव विना शशाङ्कधवलाः स्पष्टाट्टहासा निशा एको वा दिवसः पयोदमलिनो यायान्मम प्रावृषि ॥ अमरुशतकम्-९९॥ |
| अद्रीन्दुकुञ्चचरकुञ्जरगण्डकाष-संक्रान्तदानपयसो वनपादपस्य । सेनागजेन मथितस्य निजप्रसूनैर्मम्ले यथागतमगामि कुलैरलीनाम् ॥ शिशुपालवधम् ५.४३ ॥ |
| अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर् दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः । स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥ मेघदूतम्, पूर्वमेघः १४॥ |
| अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम् । लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छदं वदत् ॥ नैषधीयचरितम् २.२४ ॥ |
| अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः । प्रतिघातिनीं विषयसङ्गरतिं निरुपप्लवः शमसुखानुभवः ॥ किरातार्जुनीयम् ६.२१ ॥ |
| अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे । तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः ॥ नैषधीयचरितम् १.२ ॥ |
| अधारि यः प्राङ्नहिषासुरद्विषा कृपाणमस्मै तमदत्त कूकुदः । अहायि तस्या हि धवार्धमज्जिना स दक्षिणार्धेन पराङ्गदारणः ॥ नैषधीयचरितम् १६.१९ ॥ |
| अधिकं बोध्यमाधारादाधेयाधिकवर्णनम् । यया व्याप्तं जगत्तस्यां वाचि मान्ति न ते गुणाः ॥ चन्द्रालोकः ५.८३ ॥ |
| अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव संगतं । पदं ऋद्धमजेन पैतृकं विनयेनास्य नवं च यौवनं ॥ रघुवंशम् ८.६ ॥ |
| अधिकोन्नमद्घनपयोधरं मुहुः प्रचलत्कलापिकलशङ्खकस्वना । अभिकृष्णमङ्गुलिमुखेन काचन द्रुतमेककर्णविवरं व्यघट्टयत् ॥ शिशुपालवधम् १३.४१ ॥ |
| अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलोचितं । अभवदस्य ततो गुणवत्तरं सनगरं नगरन्ध्रकरौजसः ॥ रघुवंशम् ८.२ ॥ |
| अधिगतपरमार्थन् पण्डितान्मावमंस्थास् तृणमिव लघु लक्ष्मीर्नेव तान् संरुणाद्धि। अभिनवमदलेखाश्यानगण्डस्थलानां न भवति बिसतन्तुर्वारणं वारणानाम् ॥ पुरुषार्थोपदेशः-50॥ |
| अधिगतपरमार्थान् पण्डितान् मावमंस्थाः तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि । अभिनवमदलेखाश्यामगण्डस्थलानां न भवति विसतन्तुर्वारणं वारणानाम् ॥ नीतिशतकम् १७ ॥ |
| अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः । वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः ॥ नैषधीयचरितम् २.१ ॥ |
| अधिगम्य गुह्यकगणादिति तन्मनसः प्रियं प्रियसुतस्य तपः । निजुगोप हर्षमुदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः ॥ किरातार्जुनीयम् ६.३८ ॥ |
| अधिगम्य च रन्ध्रमन्तरा जनयन्मण्डलभेदमन्यतः । खनति क्षतसंहति क्षणादपि मूलानि महान्ति कस्यचित् ॥ शिशुपालवधम् १६.७३ ॥ |
| अधिजानु बाहुमुपधाय नमत्करपल्लवार्पितकपोलतलम् । उदकण्ठि कण्ठपरिवर्तिकलस्वरसून्यगानपयापरया ॥ शिशुपालवधम् ९.५४ ॥ |
| अधित कापि मुखे सलिलं सखी प्यधित कापि सरोजदलैः स्तनौ । व्यधित कापि हृदि व्यजनानिलं व्यधित कापि हिमं सुतनोस्तनौ ॥ नैषधीयचरितम् ४.११२ ॥ |
| अधिनागं प्रजविनो विकसत्पिच्छचारवः । पेतुर्बर्हिणदेशीयाः शङ्कवः प्राणहारिणः ॥ शिशुपालवधम् १९.४५ ॥ |
| अधिरजनि जगाम धाम तस्याः प्रियतमयेति रुषा स्रजावनद्धः । पदमपि चलितुं युवा न सेहे किमिव न शक्तिहरं ससाध्वसानां ॥ शिशुपालवधम् ७.५२ ॥ |
| अधिरजनि वधूभिः पीतमैरेयरिक्तं कनकचषकमेतद्रोचनालोहितेन । उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्तर्मधुन इव तथैवापूर्णमद्यापि भाति ॥ शिशुपालवधम् ११.५१ ॥ |
| अधिरात्रि यत्र निपतन्नभोलिहां कलधौतधौतशिलावेश्मनां रुचौ । पुनरप्यवापदिव दुग्धवारिधिक्षणगर्भवासमनिदाघदीधितिः ॥ शिशुपालवधम् १३.५१ ॥ |
| अधिरुक्ममन्दिरगवाक्षमुल्लसत्सदृशो रराज मुरजिद्दिदृक्षया । वदनारविन्दमुदयाद्रिकन्दराविवरोदरस्थतमिवेन्दुमण्डलं ॥ शिशुपालवधम् १३.३५ ॥ |
| अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः । मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिं आससाद स वनान्तभुवं ॥ किरातार्जुनीयम् ६.१७ ॥ |
| अधिरुह्यतामिति महीभृतोदितः कपिकेतुनार्पितकरो रथं हरिः । अवलम्बितैलविलपाणिपल्लवः श्रयति स्म मेघमिव मेघवाहनः ॥ शिशुपालवधम् १३.१८ ॥ |
| अधिरूढया निजनिकेतमुच्चकैः पवनावधूतवसनान्तयैकया । विहितोपशोभमुपयाति माधवे नगरं व्यरोचत पताकयेव तत् ॥ शिशुपालवधम् १३.३६ ॥ |
| अधिलवङ्गममी रजसाधिकं मलिनिताः सुमनोदलतालिनः । स्फुटमिति प्रसवेन पुरोऽहसत्सपदि कुन्दलता दलतालिनः ॥ शिशुपालवधम् ६.६६ ॥ |
| अधिवह्निपतङ्गतेजसो नियतस्वान्तसमर्थकर्मणः । तव सर्वविधेयवर्तिनः प्रणतिं बिभ्रति केन भूभृतः ॥ शिशुपालवधम् १६.५ ॥ |
| अधीतपञ्चाशुगबाणवञ्चने स्थिता मदन्तर्बहिरेषि चेद्रुः । स्मराशुगेभ्यो हृदयं बिभेतु न प्रविश्य तत्त्वन्मयसंपुटे मम ॥ नैषधीयचरितम् ९.११५ ॥ |
| अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः । चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥ नैषधीयचरितम् १.४ ॥ |
| अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम् । करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती ॥ नैषधीयचरितम् २.२ ॥ |
| अधृत थद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा । स्पृशति तत्कदं कदलीतरुर्यदि मरुज्वलदूषरदूषितः ॥ नैषधीयचरितम् ४.८ ॥ |
| अधोविधानात्कमलप्रवालयोः शिरःसु दानादखिलक्षमाभुजाम् । पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया ॥ नैषधीयचरितम् १.१८ ॥ |
| अध्यध्वमारूढवतैव केनचित्प्रतीक्षमाणेन जनं मुहुर्धृतः । दाक्ष्यं हि सद्यः फलदं यदग्रतश्चखाद दासेरयुवा वनावलीः ॥ शिशुपालवधम् १२.३२ ॥ |
| अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते । कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ॥ कुमारसंभवम् ३.६॥ |
| अध्यास्य चाम्भःपृषतोक्षितानि शैलेयगन्धीनि शिलातलानि । कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु ॥ रघुवंशम् ६.५१ ॥ |

| |
|---|
| अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेषस्याहेर्भूयः फणसमुचितः काययष्टीनिकायः । दुग्धाम्भोधेर्मुनिचुलकनत्रासनाशाभ्युपायः कायव्यूहः क्व जगति न जागर्त्यदःकीर्तिपूरः ॥ नैषधीयचरितम् १२.५७ ॥ |
| अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटः तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः । आसारेण त्वमपि शमये तस्य नैदाघमग्निं सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु॥ मेघदूतम्, पूर्वमेघः १९ (प्रक्षिप्त)॥ |
| अध्वाग्रजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात्प्रतिबन्धुमर्हः । जोषं जनः कार्यविदस्तु वस्तु प्रच्छया निजेच्छा पदवीं मुदस्तु ॥ नैषधीयचरितम् ६.१०७ ॥ |
| अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि । क्षणं तदाराममनिहारकैतवान्निषेवितुं देशमियेष निर्जनम् ॥ नैषधीयचरितम् १.५५ ॥ |
| अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुहुरामृणालम् । मधौमधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम् ॥ नैषधीयचरितम् ८.६९ ॥ |
| अनङ्गलीलाभिरपाङ्गधाविनः कनीनिकानीलमणेः पुनः पुनः । तमिस्रवंशप्रभवेन रश्मिना स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥ नैषधीयचरितम् १५.३५ ॥ |
| अनतिचिरोज्झितस्य जलदेन चिर- स्थितबुद्ध्युदयस्य पयसोऽनुकृतिं । विरलविकीर्णवज्रशकला सकला मिह विदधाति धौतकलधौतमही ॥ शिशुपालवधम् ४.४१॥ |
| अनतिशिथिले पुंभावेन प्रगल्भबलाः खलु प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः । किमपि मुखतःकृत्वानीतं वितीर्य सरोज्नीमधुरसमुषोयोगे जायां नवान्नमचीकरन् ॥ नैषधीयचरितम् १९.२७ ॥ |
| अनन्तरं तामवदन्नृपान्तरं तदध्वदृक्तारतरङ्गरङ्गणा । तृणीभवत्पुष्पशरं सरस्वती स्वतीव्रतेजःपरिभूतभूतलम् ॥ नैषधीयचरितम् १२.३२ ॥ |
| अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् । एको हि दोषो गुणसंनिपाते निमजतीन्दोः किरणेष्विवाङ्कः ॥ कुमारसंभवम् १.३ ॥ |
| अनन्यगुर्व्यास्तव केन केवलः पुराणमूर्तेर्महिमावगम्यते । मनुष्यजन्मापि सुरासुरान् गुणैर्भवान् भवेच्छेदकरैः करोत्यधः ॥ शिशुपालवधम्  १.३५ ॥ |
| अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन । न हीश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ॥ कुमारसंभवम् ३.१३॥ |
| अनपेक्ष्य गुणागुणौ जनः स्वरुचिं निश्चयतोनुधावति । अपहाय महीशमर्चिचत्सदति त्वां ननु भीमपूर्वजः ॥ शिशुपालवधम् १६.४४ ॥ |
| अनयत्प्रभुशक्तिसंपदा वशं एको नृपतीननन्तरान् । अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ॥ रघुवंशम् ८.१९ ॥ |
| अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे । चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥ नैषधीयचरितम् २.४३ ॥ |
| अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया । घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥ नैषधीयचरितम् २.४६ ॥ |
| अनर्ध्यरत्नैघमयेन मण्डितो रराज राज मुकुटेन मूर्धति । वनीपकानां स हि कल्पभूरुहस्ततो विमुञ्चन्निव मञ्जुमञ्जरीम् ॥ नैषधीयचरितम् १५.६६ ॥ |
| अनर्ध्यरत्नौघमयेन मण्डितो रराज राजा मुकुटेन मूर्धनि । वनीपकानां स हि कल्पभूरुहस्ततो विमुञ्चन्निव मञ्जुमञ्जरीम् ॥ नैषधीयचरितम् १५.६ ॥ |
| अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत । प्रशमनाय विधाय तृणान्यमूञ्ज्वलति तत्र यदुज्झितुमैहत ॥ नैषधीयचरितम् ४.२२ ॥ |
| अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः । उदयं लयमन्तरा रवेरवहद्बाणपुरीपरार्ध्यताम् ॥ नैषधीयचरितम् २.८७ ॥ |
| अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयज्ज्वलद्भुवः । प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः ॥ नैषधीयचरितम् १.१ ॥ |
| अनल्प-रूक्षाक्षर-जल्पनाऽऽकुलः, तपल्ललाटन्तपवन्मुखाऽरुणः। जगाद शैच्येण हयोपरि स्थितः, स मानसिंहोऽपि गिरङ्गरीयसीम् ॥ प्रतापविजयः-७५॥ |
| अनवद्यवाद्यलयगामि कोमलं नवगीतमप्यनवगीततां दधत् । स्फुटसात्विकाङ्गिकमनृत्यदुज्ज्वलं सविलासलासिकविलासनीजनः ॥ शिशुपालवधम् १३.६६ ॥ |
| अनवरतरसेन रागभाजा करजपरिक्षतिलब्धसंस्तवेन । सपदि तरुणपल्लवेन वध्वा विगतदयं खलु खण्डितेन मम्ले ॥ शिशुपालवधम् ७.३१ ॥ |
| अनवाप्तमवाप्तव्यं न ते किंचन विद्यते । लोकानुग्रह एवैको हेतुस्ते जन्मकरमणोः ॥ रघुवंशम् १०.३२ ॥ |
| अनश्नुवानेन युगोपमानमबद्धमौर्वीकिणलाञ्छनेन । अस्पृष्टखड्गत्सरुणापि चासीद्रक्षावती तस्य भुजेन भूमिः ॥ रघुवंशम् १८.४८ ॥ |
| अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः । तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ रघुवंशम् १.२३ ॥ |
| अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं रत्नं मधु नवमनास्वादितरसम् । अखण्डं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ अभिज्ञानशाकुन्तलम् २.१० ॥ |
| अनाचरत्तथ्यमृषाविचारणां तदाननं कर्णलतायुगेन किम् । बबन्ध जित्वा मणिकुण्डले विधू द्विचन्द्रबुद्ध्या कथितावसूयकौ ॥ नैषधीयचरितम् १५.४१ ॥ |
| अनाथ-नारीजन-शोक-शोचनः, गवां द्विजानां गलदश्रुमोचनः । स एक एवाभवदार्थ रोचनः समुल्लसल्लोहित-लोल लोचनः ॥ प्रतापविजयः-३६ ॥ |
| अनादिधाविस्वपरम्पराया हेतुस्रजः स्रोतसि वेश्वरे वा । आयत्तधीरेष जनस्तदार्याः किमीदृशः पर्यनुयोगयोग्यः ॥ नैषधीयचरितम् ६.१०२ ॥ |
| अनादिसर्गस्रजि वानुभूता चित्रेषु वा भीमसुता नलेन । जातेव यद्वा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु ॥ नैषधीयचरितम् ६.१४ ॥ |
| अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री । तुल्या भवद्दर्शनसम्पदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ किरातार्जुनीयम् ३.५ ॥ |
| अनामृशन्तः क्वचिदेव मर्म प्रियैषिणानुप्रहिताः शिवेन । सुहृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः ॥ किरातार्जुनीयम् १७.३३ ॥ |
| अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य । त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन संज्ञा ॥ नैषधीयचरितम् ८.२५ ॥ |

| |
|---|
| अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाम् । फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ॥ किरातार्जुनीयम् १.१५ ॥ |
| अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः । निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ किरातार्जुनीयम् १.४० ॥ |
| अनारतं रसति जयाय दुन्दुभौ मधुद्विषः फलदलघुप्रतिस्वनैः । विनिष्पतन्मृगपतिभिर्गुहामुखैर्गताः परां मुदमहसन्निवाद्रयः ॥ शिशुपालवधम् १७..३२ ॥ |
| अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य तावत् । हंसोऽपि देवांशतयासि वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ॥ नैषधीयचरितम् ३.५७ ॥ |
| अनाश्रवा वः किमहं कदापि वक्तुं विशेषः परमस्ति शेषः । ईतीरिते भीमजया न दूतीमालिङ्गदालीश्च मुदामियत्ता ॥ नैषधीयचरितम् ६.८८ ॥ |
| अनाहारे तुल्यः प्रततरुदितक्षामवदनः शरीरे संस्कारं नृपतिसमदुःखं परिवहन् । दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः ॥ (स्वप्नवासवदत्तम् १. १४) |
| अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात्फलबन्धिवृक्षम् । वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावम् ॥ रघुवंशम् १३.५० ॥ |
| अनिमिषमविरामा रागिणां सर्वरात्रं नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य । इदमुदवसितानामस्फुटालोकसंपन्-नयनमिव सनिद्रं घूर्णते दैपमर्चिः ॥ शिशुपालवधम् ११.१८ ॥ |
| अनिराकृततापसंपदं फलहीनां सुमनोभिरुज्झितां । खलतां खलतामिवासतीं प्रतिपद्येत कथं बुधो जनः ॥ शिशुपालवधम् १६.२४ ॥ |
| अनिरूपिरूपसंपदस्तमसो वान्यभृतच्छदच्छवेः । तव सर्वगतस्य संप्रति क्षितिपः क्षिप्नुरभीशुमानिव ॥ शिशुपालवधम् १६.५० ॥ |
| अनिशान्तवैरदहनेन विरहितवतान्तरार्द्रतां । कोपमरुदभिहितेन भृशं नरकात्मजेन तरुणेव जज्वले ॥ शिशुपालवधम् १५.५० ॥ |
| अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा । यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे  ॥ नीतिसंग्रहस्य मित्र-१.६ ॥ |
| अनीकिनीनां समरेऽग्रयायी तस्यापि देवप्रतिमः सुतोऽभूत् । व्यश्रूयतानीकपदावसानं देवादि नाम त्रिदिवेऽपि यस्य ॥ रघुवंशम् १८.१० ॥ |
| अनुकूलपातिनमचण्डगतिं किरता सुगन्धिमभितः पवनं । अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुमतः ॥ किरातार्जुनीयम् ६.२५ ॥ |
| अनुकृतिशिखरौघश्रीभिरभ्यगतेऽसौ त्वयि सरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः । द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलं हलधरपरिधानश्यामलैरम्बुवाहैः ॥ शिशुपालवधम् ४.६८॥ |
| अनुगिरमृतुभिर्वितायमानामथ स विलोकयितुं वनान्तलक्ष्मीं । निरगमदभिराद्धुमदृतानां भवति महत्सु न निष्फलः प्रयासः ॥ शिशुपालवधम् ७.१ ॥ |
| अनुग्रहः केवलमेष मादृशे मनुष्यजन्मन्यपि यन्मनो जने । स चेद्विधेयस्तदमी तमेव मे प्रसद्य भिक्षां वितरीतुमीशताम् ॥ नैषधीयचरितम् ९.३४ ॥ |
| अनुग्रहप्रत्यभिनन्दिनीं तां वाल्मीकिरादाय दयार्द्रचेताः । सायं मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शान्तमृगं निनाय ॥ रघुवंशम् १४.७९ ॥ |
| अनुग्रहादेव दिवौकसां नरो निरस्य मानुष्यकमेति दिव्यताम् । अयोविकारे स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि ॥ नैषधीयचरितम् ९.४२ ॥ |
| अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः । स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते ॥ किरातार्जुनीयम् ५.१६ ॥ |
| अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना । शब्दविद्येव नाभाति राजनीतिरपस्पशा ॥ शिशुपालवधम्  २.११२ ॥ |
| अनुदेहमागतवतः प्रतिमां परिणायकस्य गुरुमुद्वहता । मुकुरेण वेपथुभृतोऽतिभरात्कथमप्यपाति न वधूकरतः ॥ शिशुपालवधम् ९.७३ ॥ |
| अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिं । माधुर्यविस्रम्भविशेषभाजा कृतोपसम्भाषमिवेक्षितेन ॥ किरातार्जुनीयम् ३.३ ॥ |
| अनुनयमगृहीत्वा व्याजसुप्ता पराची रुतमथ कृकवाकोस्तारमाकर्ण्य कल्पे ।कथमपि परिवृत्ता निद्रयान्धा किल स्त्री मुकुलितनयनैवा शिलिष्यति प्राणनाथम् ॥ शिशुपालवधम् ११.९ ॥ |
| अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया । अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ किरातार्जुनीयम् २.१० ॥ |
| अनुभवति शचीत्थं सा घृताचीमुखाभिर्न सह सहचरीभिर्नन्दनानन्दमुच्चैः । इति मतिरुदयासीत्पक्षिणः प्रेक्ष्य भैमीं विपिनभुवि सखीभिः सार्धमाबद्धकेलिम् ॥ नैषधीयचरितम् २.१०९ ॥ |
| अनुभवन्नवदोलं ऋतूत्सवं पटुपै प्रियकण्ठजिगृक्षया । अनयदासनरज्जुपरिग्रहे भुजलतां जडतामबलाजनः ॥ रघुवंशम् ८.४६ ॥ |
| अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनंजयेन । स्वबलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥ किरातार्जुनीयम् १३.१५ ॥ |
| अनुभावैः कटाक्षाद्यैरुन्मादाद्यैर्यथाक्रमम् । सम्भोगो विप्रलम्भश्च श्रृङ्गारो द्विविधो मतः ॥ चन्द्रालोकः६.५ ॥ |
| अनुभूय वसिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनं । विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ॥ रघुवंशम् ८.३ ॥ |
| अनुममार न मार कथं नु सा रतिरतिप्रथितापि पतिव्रता । इयदनाथवधूवधपातकी दयितयापि तयासि किमुज्झितः ॥ नैषधीयचरितम् ४.८ ॥ |
| अनुमानं च कार्यादेः कारणाद्यवधारणम् । अस्ति किञ्चिद्यदनया मां विलोक्य स्मितं मनाक् ॥ चन्द्रालोकः ५.३६ ॥ |
| अनुययौ विविधोपलकुण्डलद्युतिवितानकसंवलितांशुकम् । धुततनुर्वलयस्य पयोमुचः शबलिमा बलिमानमुषो वपुः ॥ शिशुपालवधम् ६.२७ ॥ |
| अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरं । निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥ शिशुपालवधम् ९.१० ॥ |
| अनुराधा द्वितीयायां पञ्चम्यां पित्र्यभं तथा । त्र्युत्तराश्च तृतीयायामेकादश्यां च रोहिणी ॥ मुहूर्तचिन्त.१२ ॥ |
| अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम् । युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥ नैषधीयचरितम् २.४२ ॥ |
| अनुलेपनानि कुसुमान्यबलाः कृतमन्यवः पतिषु धीपशिखाः ।समयेन तेन चिरसुप्तमनोभवबोधनं सममबोधिषत ॥ शिशुपालवधम् ९.२४ ॥ |
| अनुवनं वनराजिवधूमुखे बहलरागजवाधरचारुणि । विकचबाणवलयोऽधिकं रुरुचिरे रुचिरेक्षणविभ्रमाः ॥ शिशुपालवधम् ६.४६ ॥ |

| |
|---|
| अनुवनमसितभ्रुवः सखीभिः सह पदवीमपरः पुरोगतायाः । उरसि सरसरागपदलेखाप्रतिमतयानुययावसंशयानः ॥ शिशुपालवधम् ७.२२ ॥ |
| अनुवप्रपरेण बाहुमूलप्रहितभुजाकलितस्तनेन निन्ये । निहितदशनवाससा कपोले विषमवितीर्णपदं बलादिवान्या ॥ शिशुपालवधम् ७.२१ ॥ |
| अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् । स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ किरातार्जुनीयम् २.५४ ॥ |
| अनुसन्ततिपातिनः पटुत्वं दधतः शुद्धिभृतो गृहीतपक्षाः । वदनादिव वादिनोऽथ शब्दाः क्षितिभर्तुर्धनुषः शराः प्रसस्रुः ॥ शिशुपालवधम् २०.११ ॥ |
| अनुसानु पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः । धृतिमाततान तनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः ॥ किरातार्जुनीयम् ६.१८ ॥ |
| अनुहेमवप्रमरुणैः समतां गतं ऊर्मिभिः सहचरं पृथुभिः । स रथाङ्गनामवनितां करुणैरनुबध्नतीमभिननन्द रुतैः ॥ किरातार्जुनीयम् ६.८ ॥ |
| अनृतां गिरं न गदसीति जगति पटहैर्विघुष्यसे । निन्द्यमथ च हरिमर्चयतस्तव कर्मणैव विकसत्यसत्यता ॥ शिशुपालवधम् १५.१६ ॥ |
| अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् । नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥ किरातार्जुनीयम् १.१६ ॥ |
| अनेकसंयोजनया तथाकृतेर्निकृत्य निष्पिष्य च तादृगर्जनात् । अमी कृताकालिकवस्तुविस्मयं जना बहु व्यञ्जनमभ्यवाहरन् ॥ नैषधीयचरितम् १६.८३ ॥ |
| अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् । सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ नीतिसंग्रहस्य मित्र-०.7॥ |
| अनेकस्यार्थयुग्मस्य सादृश्यं स्तबकोपमा । श्रितोऽस्मि चरणौ विष्णोर्भृङ्गस्तामरसं यथा ॥ चन्द्रालोकः ५.१६ ॥ |
| अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः । प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ॥ रघुवंशम् १०.५४ ॥ |
| अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे । प्रासादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुराङ्गनानां ॥ रघुवंशम् ६.२४ ॥ |
| अनेन धर्मः सविशेषमद्य मे त्रिवर्गमारः प्रतिभाति भाविनि! । त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ॥ कुमारसंभवम् ५.३८॥ |
| अनेन पर्यासयतास्रबिन्दून्मुक्ताफलस्थूलतमान्स्तनेषु । प्रत्यर्पिताः शत्रुविलासिनीनामुन्मुच्य सूत्रेण विनैव हाराः ॥ रघुवंशम् ६.२८ ॥ |
| अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी । रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ॥ रघुवंशम् ६.६३ ॥ |
| अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत् । अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्यकञ्चुकम् ॥ नैषधीयचरितम् १.४६ ॥ |
| अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते । सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरंपरासु ॥ रघुवंशम् ६.३५ ॥ |
| अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीं अयच्छन् । समाचराचारं उपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनां ॥ किरातार्जुनीयम् ३.२८ ॥ |
| अनेन राज्ञार्थिषु दुर्भगीकृतो भवन्घनध्वानजरत्नमेदुरः । तथा विदूराद्रिरदूरतां गमी यथा स गामी तव केलिशैलताम् ॥ नैषधीयचरितम् १२.५५ ॥ |
| अनेन वेधा विपरीतरूपविनिर्मिताङ्कोत्किरणाङ्गकेन । त्वदाननं दृश्यदृगाद्यलक्ष्यदृगादिनैवाकृत सञ्चकेन ॥ नैषधीयचरितम् २२.४८ ॥ |
| अनेन संबन्धमुपेत्य दिष्ट्या मनोरथप्रार्थितमीश्वरेण । मूर्धानमालि ! क्षितिधारणोच्च मुच्चैस्तरं वक्ष्यति शैलराजः॥ कुमारसंभवम् ७.६८॥ |
| अनेन सर्वार्थिकृतार्थताकृताहृतार्थिनौ कामगवीसुरद्रुमौ । मिथः पयःसेचनपल्लवाशने प्रदाय दानव्यसनं समाप्नुतः ॥ नैषधीयचरितम् १२.७९ ॥ |
| अनेन सार्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् । प्रेमापि तन्वि त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥ नैषधीयचरितम् ८.६१ ॥ |
| अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु । द्वीपानतरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥ रघुवंशम् ६.५७ ॥ |
| अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरऋअशेषाम् । ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥ नैषधीयचरितम् ३.७९ ॥ |
| अनौचित्यं कीर्तिलतां तरङ्गयति यः सदा । प्रसिद्ध्या विद्यया वाऽपि विरुद्धं द्विविधं मतम् ॥ चन्द्रालोकः२.३४ ॥ |
| अन्तः सलक्ष्मीक्रियते सुधांशो रूपेण पश्ये हरिणेन पश्य । इत्येष भैमीमददर्शदस्य कदाचिदन्तं स कदाचिदन्तः ॥ नैषधीयचरितम् २२.१३४ ॥ |
| अन्तःपुरान्तः स विलोक्य बालां कांचित्समालब्धुमसंवृतोरुम् । निमीलिताक्षः परया भ्रमन्त्या संघट्टमासाद्य चमच्चकार ॥ नैषधीयचरितम् ६.१३ ॥ |
| अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः । न कालसारं हरिणं तदक्षिद्वयं प्रभुर्बन्द्धुमभून्मनोभूः ॥ नैषधीयचरितम् ६.१९ ॥ |
| अन्तःसंतोषबाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्यन्नङ्गे नानस्तिरोमा रचयति पुलकश्रेणिमानन्दकन्दाम् । न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तन्न विद्मः शृण्वन्नेतस्य कीर्तीः कथमुरगपतिः प्रीतिमाविष्करोति ॥ नैषधीयचरितम् १२.३९ ॥ |
| अन्तकस्य पृथौ तत्र शयनीय इवाहवे । दशनव्यसनादीयुर्मत्कुणत्वं मतङ्गजाः ॥ शिशुपालवधम् १९.७१ ॥ |
| अन्तर्जलौघमवगाढवतः कपोलौ हित्वा क्षणं विततपक्षतिरन्तरीक्षे । द्रव्यश्रयेष्वपि गणेषु रराज नीलो वर्णः पृथग्गत इवालिगणो गजस्य ॥ शिशुपालवधम् ५.३८ ॥ |
| अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले । निःसृतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगन्तः ॥ किरातार्जुनीयम् ९.२१ ॥ |
| अन्त्यनवांशे न च परिणेया काचन वर्गोत्तममिह हित्वा । नो चरलग्ने चरलवयोगं तौलिमृगस्थे शशभृति कुर्यात् ॥ मुहूर्त.विवाहप्रकरणम् ८५॥ |
| अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य। स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा॥ (मृच्छकटिकम् १.४९) |

| |
|---|
| अन्धाक्षं वसुपुष्यधातृजलभद्वीशार्यमान्त्याभिधं मन्दाक्षं रविविश्वमैत्रजलपाश्लेषाश्विचाद्रं भवेत् । मध्याक्षं शिवपित्रजैकचरणत्वाष्ट्रेन्द्रविध्यन्तकं स्वक्षं स्वात्यदितिश्रवोदहनभाहिर्बुध्न्यरक्षोभगम् ॥ मुहूर्त.नक्षत्रप्रकरणम्  २२ ॥ |
| अन्यकालपरिहार्यमजस्रं तद्द्वयेन विदधे द्वयमेव । धृष्टता रहसि भर्तृषु ताभिर्निर्दयत्वमितरैरबलासु ॥ शिशुपालवधम् १०.७१ ॥ |
| अन्यथैव हि सौहार्दं भवेत्स्वच्छान्तरात्मनः । प्रवर्ततेऽन्यथा वाणी शाठ्योपहतचेतसः  ॥ नीतिसंग्रहस्य मित्र-१.१०१ ॥ |
| अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात् । व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ॥ रघुवंशम् ११.७३ ॥ |
| अन्यदीयविशिखे न केवलं निःस्पृहस्य भवितव्यमाहृते । निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः ॥ किरातार्जुनीयम् १३.४६ ॥ |
| अन्यदोषमिव सः स्वकं गुणं ख्यापयेत्कथमधृष्टताजडः । उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुमर्थिता ॥ किरातार्जुनीयम् १३.४८ ॥ |
| अन्यान्यवनितागतचित्तं चित्तनाथमभिशङ्कितवत्या । पीतभूरिसुरयापि नमेदे निर्वृतिर्हिमनसो मदहेतुः ॥ शिशुपालवधम् १०.२८ ॥ |
| अन्यास्तिस्र इति व्यक्ता शक्तितः सा चतुर्विधा । इन्दुरेवैष तद्वक्त्रमुत्कर्षो लक्ष्यते मुखे ॥ चन्द्रालोकः९.६ ॥ |
| अन्यूनं गुणममृतस्य धारयन्ती सम्फुल्लस्फुरितसरोरुहावतंसा । प्रेयोभिः सह सरसी निषेव्यमाणा रक्तत्वं व्यधित वधूदृशां सुरा च ॥ शिशुपालवधम् ८.५२ ॥ |
| अन्यूनोन्नतयोऽतिमात्रपृथवः पृथ्वीधरश्रीभृत- स्तन्वन्तः कनकावलीभिरुपमां सौदामनीदामभिः । वर्षन्तः शममानयन्नुपलसच्छृङ्गारलेखायुधाः काले कालियकायकालवपुषः पांसून्गजाम्भोमुचः ॥ शिशुपालवधम् १७..६९ ॥ |
| अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः । गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥ रघुवंशम् २.२६ ॥ |
| अन्येन पत्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा । जनापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरीः स्यात् ॥ नैषधीयचरितम् ३.५१ ॥ |
| अन्येन विदधेऽरीणामतिमात्रा विलासिना । उद्गूर्णेन चमूस्तूर्णमतिमात्राविलासिना ॥ शिशुपालवधम् १९.५० ॥ |
| अन्योन्यं नाम यत्र स्यादुपकारः परस्परम् । त्रियामा शशिना भाति शशी भाति त्रियामया ॥ चन्द्रालोकः ५.८४ ॥ |
| अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु । दिग्भ्यः समेतेषु नृपेषु तेषु सौवर्गवर्गो न जनैरचिह्नि ॥ नैषधीयचरितम् १०.३४ ॥ |
| अन्योन्यमन्यत्रवदीक्षमाणो परस्परेणाध्युषितेऽपि देशे । अलिङ्गितालीकपरस्परान्तस्तथ्यं मिथस्तौ परिषस्वजाते ॥ नैषधीयचरितम् ६.५१ ॥ |
| अन्योन्यरक्तमनसामथ बिभ्रतीनां चेतोभुवो हरिसखाप्सरसां निदेशं । वैबोधिकध्वनिविभावितपश्चिमार्धा सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ किरातार्जुनीयम् ९.७४ ॥ |
| अन्योन्यरागवशयोर्युवयोर्विलासस्वच्छन्दताच्छिदपयातु तदालिवर्गः । अत्याजयन्सिचयमाजिमकारयन्वा दन्तैर्नखैश्च मदनो मदनः कथं स्यात् ॥ नैषधीयचरितम् २१.१४१ ॥ |
| अन्योन्यव्यतिकरचारुभिर्विचित्रै- रत्रस्यन्नवमणिजन्मभिर्मयूखैः । विस्मेरान्गगनसदः करोत्यमुष्मि- न्नाकाशेरचितमभित्ति चित्रकर्म ॥ शिशुपालवधम् ४.५३॥ |
| अन्योन्यसंगमवशादधुना विभातां तस्यापि तेऽपि मनसी विकसद्विलासे । स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥ नैषधीयचरितम् ३.१२५ ॥ |
| अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् । व्यश्वौ गदाव्यायतसंप्रहारौ बग्नायुधौ बाहुविमर्दनिष्ठौ ॥ रघुवंशम् ७.५२ ॥ |
| अन्योन्येषां पुष्करैरामृशन्तो दानोद्भेदानुच्चकैर्भुग्नवालाः । उन्मूर्धानः सन्निपत्यपरान्तैः प्रायुध्यन्त स्पष्टदन्तध्वनीभाः ॥ शिशुपालवधम् १८.३२ ॥ |
| अन्वयुर्द्युतिपयः पितृनाथास्तं मुदाथ हरितां कमितारः । वर्त्म कर्षतु पुरः परमेकस्तद्गतानुगतिको न महार्घः ॥ नैषधीयचरितम् ५.५५ ॥ |
| अन्वियेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग्द्विजः । सद्य एव सुकृतां हि पच्यते कल्पवृक्षफल धर्मि काङ्क्षितम् ॥ रघुवंशम् ११.५० ॥ |
| अन्वेतुकामोऽवमताङ्गुशग्रहस्तिरोगतं साङ्गुशमुद्वहञ्शिरः । स्थूलोच्चयेनागमदन्तिकगतां गजोऽग्रयाताग्रकरः करेणुकां ॥ शिशुपालवधम् १२.१६ ॥ |
| अन्वेष्टव्यो यदसि भुवने लोकनाथः शरण्यो मामन्विष्यन्निह वृषलकं योजनानां शतानि । क्रान्त्वा प्राप्तः स इह तपसां संप्रसादोऽन्यथा तु क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ॥ (उत्तररामचरितम् २.१३) |
| अपः प्रति स्वामितयाऽपरः सुरः स ता निषेधेद्यदि नैषधक्रुधा । नलाय लोभात्ततपाणयेऽपि ते पिता कथं त्वां वद संप्रदास्यते ॥ नैषधीयचरितम् ९.८२ ॥ |
| अपगतनवयावकैश्चिराय क्षितिगमनेन पुनर्वितीर्णरागैः । कथमपि चरणोत्पलैश्चलद्भिर्भृशविनिवेशात्परस्परस्य ॥ शिशुपालवधम् ७.६७ ॥ |
| अपतुषारतया विशदप्रभैः सुरतराग परिश्रमनोदिभिः । कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोजितकेतनं ॥ रघुवंशम् ८.३९ ॥ |
| अपत्ये यत्तादृग्दुरितमभवत्तेन महता विषक्तस्तीव्रेण व्रणितदयेन व्यथयता । पटुर्धारावाही नव इव चिरेणापि हि न मे निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति ॥ (उत्तररामचरितम् ४.३) |
| अपदान्तरं च परितः क्षितिक्षितामपतन्द्रुतभ्रमितहेमनेमयः । जविमारुताञ्चितपरस्परोपमक्षितिरेणुकेतुवसनाः पताकिनः ॥ शिशुपालवधम् १३.४ ॥ |
| अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः । अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते ॥ किरातार्जुनीयम् २.३६ ॥ |

| |
|---|
| अपयन्धनुषः शिवान्तिकस्थैर्विवरेसदभिरभिख्यया जिहानः । युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः ॥ किरातार्जुनीयम् १३.२३ ॥ |
| अपयाति सरोषया निरस्ते कृतकं कामिनि चुक्षुषे मृगाक्ष्या । कलयन्नपि सव्यथोऽवतस्थेऽशकुनेन स्खलितः किलेतरोऽपि ॥ शिशुपालवधम् ९.८३ ॥ |
| अपरस्य रसादेश्चेदङ्गमन्यद्रसादिकम् । हा हा! मत्कुचकाश्मीर-लिप्तं भिन्नमुरः शरैः ॥ चन्द्रालोकः८.४ ॥ |
| अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः । सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ किरातार्जुनीयम् २.५० ॥ |
| अपराधशतक्षमं नृपः क्षमयात्येति भवन्तमेकया । हृतवत्यपि भीष्मकात्मजां त्वयि चक्षाम समर्थ एव यत् ॥ शिशुपालवधम् १६.४८ ॥ |
| अपराधीन इत्यादि विरुद्धमतिकृन्मतम् । अन्यसङ्गतमुत्तुङ्ग-हारशोभिपयोधरौ ॥ चन्द्रालोकः२.१४ ॥ |
| अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् । विद्यते हि नृशंसेभ्यो भयं गुणवतामपि  ॥ नीतिसंग्रहस्य मित्र-१.७६ ॥ |
| अपराह्नशीतलतरेण शनैरनिलेन लोलितलताङ्गुलये । निलयाय शाखिन इवाह्वयते ददुराकुलाः खगकुलानि गिरः ॥ शिशुपालवधम् ९.४ ॥ |
| अपवर्जितविप्लवे शुचय्हृदयग्राहिणि मङ्गलास्पदे । विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ किरातार्जुनीयम् २.२६ ॥ |
| अपशङ्कमङ्कपरिवर्तनोचिताश्चलिताः पुरः पतिमुपेतुमात्मजाः । अनुरोदितीव करुणेन पत्त्रिणां विरुतेन वत्सलतयैष निम्नगाः ॥ शिशुपालवधम् ४.४७॥ |
| अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः । स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥ रघुवंशम् ८.८६ ॥ |
| अपश्यद्भिरिवेशानं रणान्निववृते गणैः । मुह्यतीव हि कृच्छ्रेषु सम्भ्रमज्वलितं मनः ॥ किरातार्जुनीयम् १५.२ ॥ |
| अपह्नुतः स्वेदभरः करे तयोस्त्रपाजुषोर्दानजलैर्मिलन्मुहुः । दृशोरपि प्रस्तुतमस्रु सात्त्विकं घनैः समाधीयत धूमलङ्घनैः ॥ नैषधीयचरितम् १६.४२ ॥ |
| अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा । अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ॥ नैषधीयचरितम् १.४९ ॥ |
| अपां विहारे तव हारविभ्रमं करोतु नीरे पृषदुत्करस्तरन् । कठोरपीनोच्चकुचद्वयीतटत्रुट्यत्तरः सारवसारवोर्मिजः ॥ नैषधीयचरितम् १२.७ ॥ |
| अपाङ्गमप्याप दृशोर्न रश्मिर्नलस्य भैमीमभिलष्य यावत् । स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ॥ नैषधीयचरितम् ८.३ ॥ |
| अपाङ्गमालिङ्ग्य तदीयमुच्चकैरदीपि रेखा जनिताञ्जनेन या । अपाति सूत्रं तदिव द्वितीयया वयःश्रिया वर्धयितुं विलोचने ॥ नैषधीयचरितम् १५.३४ ॥ |
| अपादि व्यापृतनयांस्तथा युयुधिरे नृपाः । आप दिव्या पृतनया विस्मयं जनता यथा ॥ शिशुपालवधम् १९.६० ॥ |
| अपार्थयन्याजकफूत्कृतिश्रमं ज्वलेद्रुषा चेद्वपुषापि नानलः । अलं नलः कर्तुमनग्निसाक्षिकं विधिं विवाहे तव सारसाक्षि कम् ॥ नैषधीयचरितम् ९.८ ॥ |
| अपास्तपाथेयसुधोपयोगैस्त्वच्चुम्बिनैव स्वमनोरथेन । क्षुधं च निर्वापयता तृषं च स्वादीयसाऽध्वा गमितः सुखं तैः ॥ नैषधीयचरितम् ८.८७ ॥ |
| अपास्तपाथोरुहि शायितं करे करोषि लीलाकमलं किमाननम् । तनोषि हारं कियदस्रुणः स्रवैरदोषनिर्वासितभूषणे हृदि ॥ नैषधीयचरितम् ९.१०५ ॥ |
| अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते \| अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥ कुमारसंभवम् ५.३३ ॥ |
| अपि जनकसुतायास्तच्च तच्चानुरूपं स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति । ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो- रभिनवशतपत्त्रश्रीमदास्यं प्रियायाः ॥ (उत्तररामचरितम् ६.२६) |
| अपि तुरगसमीपादुत्पतन्तं मयूरं न स रुचिरकलापं बाणलक्ष्यी चकार । सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबन्धे केशपाशे प्रियायाः ॥ रघुवंशम् ८.६७ ॥ |
| अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधाम् \| चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ॥ कुमारसंभवम् ५.३४ ॥ |
| अपि द्रढीयः शृणु मत्प्रतिश्रुतं स पीडयेत्पाणिमिमं न चेन्नृपः । हुताशनोद्बन्धनवारिकारितां निजायुषस्तत्करवै स्ववैरिताम् ॥ नैषधीयचरितम् ९.३५ ॥ |
| अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया । उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ॥ नैषधीयचरितम् १.६३ ॥ |
| अपि धयन्नितरामरवत्सुधां त्रिनयनात्कथमापिथ तां दशाम् । भण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु नापिबः ॥ नैषधीयचरितम् ४.८३ ॥ |
| अपि प्रभुः सानुशयोऽधुना स्यात्किमुत्सुकः शक्रजितोऽपि हन्ता । शशंस सीतापरिदेवनान्तमनुष्ठितं शासनमग्रजाय ॥ रघुवंशम् १४.८३ ॥ |
| अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु \| य उत्पलाक्षि ! प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ कुमारसंभवम् ५.३५ ॥ |
| अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय । कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥ रघुवंशम् ५.१० ॥ |
| अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि । श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते ॥ नैषधीयचरितम् २.२२ ॥ |
| अपि विधिः कुसुमानि तवाशुगान् स्मर विधाय न निर्वृतिमाप्तवान् । अदित पञ्च हि ते स नियम्य तांस्तदपि तैर्बत जर्जरितं जगत् ॥ नैषधीयचरितम् ४.९ ॥ |
| अपि विरहमनिष्टमाचरन्तावधिगमपूर्वकपूर्वसर्वचेष्टौ । इदमहह निदर्शनं विहंगौ विधिवशचेतनचेष्टनानुमाने ॥ नैषधीयचरितम् २१.१४८ ॥ |
| अपि स्वमस्वप्नमसूषुपन्नमी परस्य दाराननवैतुमेव माम् ।स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदापि तादृशीम् ॥ नैषधीयचरितम् ९.३३ ॥ |
| अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च । मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता  ॥ नीतिसंग्रहस्य मित्र-१.१२१ ॥ |
| अपुष्टार्थो विशेष्ये चेन्न विशेषो विशेषणात् । विशन्ति हृदयं कान्ता-कटाक्षाः खञ्जनत्विषः ॥ चन्द्रालोकः२.२९ ॥ |

| |
|---|
| अपूर्वयेव तत्कालसमागमसकामया । दृष्टेन राजन्वपुषा कटाक्षैर्विजयश्रिया ॥ शिशुपालवधम् १९.८५ ॥ |
| अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते । यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥ रघुवंशम् ५.४ ॥ |
| अप्यन्यस्मिन्जलधर महाकालमासाद्य काले स्थातव्यं ते नयनविषयं यावदभ्येति भानुः । कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीयामामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥ मेघदूतम्, पूर्वमेघः ३४॥ |
| अप्यर्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः । संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यं ॥ रघुवंशम् ७.४५ ॥ |
| अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् । वीक्षितेन परिवीक्ष्य पार्वती मूर्धकम्पमयमुत्तरं ददौ॥ कुमारसंभवम् ७.६॥ |
| अप्रभूतमतनीयसि तन्वी काञ्चिधाम्निपिहितैकतरोरु । क्षौममाकुलकरा विचकर्ष कान्तापल्लवमभीष्टतमेन ॥ शिशुपालवधम् १०.८३ ॥ |
| अप्रयुक्तं दैवतादिशब्दे पुंल्लिङ्गतादिकम् । असमर्थं तु हन्त्यादेः प्रयोगो गमनादिषु ॥ चन्द्रालोकः२.३ ॥ |
| अप्रसन्नमपराद्धरि पत्यौ कोपदीप्तमुररीकृतधैर्यं । क्षालितं नु शमितं नु वधूनां द्रवितं नु हृदयं मधुवारैः ॥ शिशुपालवधम् १०.१४ ॥ |
| अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा । कार्यकारणसामान्य-विशेषादेरसौ मता ॥ चन्द्रालोकः ५.६६ ॥ |
| अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यं । अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः ॥ किरातार्जुनीयम् १६.२४ ॥ |
| अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः । परपरिवादनिवृत्तैः क्वचित् क्वचिन्मण्डिता वसुधा ॥ नीतिशतकम् १०४ ॥ |
| अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् । अनवद्यतृणार्दिनो मृगान्मृगयाघाय न भूभुजां घ्नताम् ॥ नैषधीयचरितम् २.१ ॥ |
| अबिषेणयिषुं भुवनानि यः स्मरमिवाख्यात लोध्ररचश्चयः । क्षुभितसैन्यपरागविपाण्डुरद्युतिरयं तिरयन्नुभूद्दिशः ॥ शिशुपालवधम् ६.६४ ॥ |
| अबुधैः कृतमानसम्विदस्तव पार्थैः कृत एव योग्यता । सहसि प्लवगैरुपासितं न हि गुञ्जाफलमेति सोष्मतां ॥ शिशुपालवधम् १६.४७ ॥ |
| अबोधि तत्त्वं दहनेऽनुरज्यसे स्वयं खलु क्षत्त्रियगोत्रजन्मनः । विना तमोजस्विनमन्यतः कथं मनोरथस्ते वलते विलासिनि ॥ नैषधीयचरितम् ९.५४ ॥ |
| अबोधि नो ह्रीनिभृतं मदिङ्गितं प्रतीत्य वा नादृतवत्यसाविति । लुनाति यूनः स्म धियं कियद्गता निवृत्य बालादरदर्शनेषुणा ॥ नैषधीयचरितम् १६.७२ ॥ |
| अब्दायनर्तुतिथिमासभपक्षदग्ध तिथ्यन्धकाणबधिराङ्गमुखाश्च दोषाः । नश्यन्ति विद्गुरुसितेष्विह केन्द्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषः ॥ मुहूर्त.विवाहप्रकरणम् ८९॥ |
| अब्रवीच्च भगवन्मतङ्गजैर्यद्बृहद्भिरपि कर्म दुष्करम् । तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ॥ रघुवंशम् ११.३९ ॥ |
| अब्रवीत्तमनलः क्व नलेदं लब्धमुज्झसि यशः शशिकल्पम् । कल्पवृक्षपतिमर्थिनमित्थं नाप कोऽपि शतमन्युमिहान्यः ॥ नैषधीयचरितम् ५.१२२ ॥ |
| अब्रवीदथ यमस्तमहृष्टं वीरसेनकुलदीप तमस्त्वाम् । यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेः सदृशं ते ॥ नैषधीयचरितम् ५.१२४ ॥ |
| अभग्नवृत्ताः प्रसभादाकृष्टा यौवनोद्धतैः । चक्रन्दुरुच्चकैर्मुष्टिग्राह्यमध्या धनुर्लताः ॥ शिशुपालवधम् १९.३५ ॥ |
| अभजत चिराभ्यासं देवः प्रतिक्षणदात्यये दिनमयमयं काले भूयः प्रसूय तथा रविः । न खलु शकिता शीलं कालप्रसूतिरसौ पुरा यमयमुनयोर्जन्माधानेष्यनेन यथोज्झितुम् ॥ नैषधीयचरितम् १९.४६ ॥ |
| अभवन्मतयोगः स्यान्न चेदभिमतोऽन्वयः । येन बद्धोऽम्बुधिर्यस्य रामस्यानुचरा वयम् ॥ चन्द्रालोकः२.२३ ॥ |
| अभावि सिन्ध्वा सन्ध्याभ्रसदृग्गृधिरतोयया ।हृते योद्धुं जनः पांशौ स दृग्गृधि रतो यथा ॥ शिशुपालवधम् १९.७६ ॥ |
| अभिचैद्यमगाद्रथोऽपि शौरेरवनिं जागुडकुङ्कुमाभिताम्रैः ।गुरनेमिनिपीडनावदीर्णव्यसुदेहस्रुतशोणितैर्विलिम्पन् ॥ शिशुपालवधम् २०.३ ॥ |
| अभितः क्षुभिताम्बुराशिधीरध्वनिराकृष्टसमूलपादपौघः । जनयन्नभवद्युगान्तशङ्कामनिलो नागविपक्षपक्षजन्मा ॥ शिशुपालवधम् २०.७७ ॥ |
| अभितः सदोऽथ हरिपाण्डवौ रथादमलांशुमण्डलसमुल्लसत्तनू । अवतेरतुर्नयननन्दनौ नभः शशिभार्गवावुदयपर्वतादिव ॥ शिशुपालवधम् १३.६१ ॥ |
| अभितर्जयन्निव समस्तनृपगणमसावकम्पयत् । लोलमुकुटमणिरश्मि शनैरशनैः प्रकम्पितजगत्त्रयं शिरः ॥ शिशुपालवधम् १५.३ ॥ |
| अभितापसंपदमथोष्णरुचिर्निजतेसामसहमान इव । पयसि प्रपित्सुरपराम्बुनिधेरधिरोढुमस्तगिरिमभ्यपतत् ॥ शिशुपालवधम् ९.१ ॥ |
| अभितिग्मरश्मि चिरमविरमादवधानखिन्नमनिमेषतया । विगलन्नमधुव्रतकुलाश्रुजलं न्ममीलदब्जनयनं नलिनी ॥ शिशुपालवधम् ९.११ ॥ |
| अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः । भवतोऽभिमनाः समीहते सरुषः कर्तुमुपेत्य माननां ॥ शिशुपालवधम् १६.२ ॥ |
| अभिधाय रूक्षमिति मा स्म गम इति पृथासुतेरितां । वाचमननयपरां स ततः सहसावकर्ण्य निरियाय संसदः ॥ शिशुपालवधम् १५.६७ ॥ |
| अभिधित्सतः किमपि राहुवदनविकृतं व्यभाव्यत । ग्रस्तशशधरमिवोपलसत्सितदन्तपङ्क्ति मुखमुत्तमौजसः ॥ शिशुपालवधम् १५.५१ ॥ |
| अभिनयमनसः सुराङ्गनाया निहितमलक्तकवर्तनाभिताम्रं । चरणमभिपपात षट्पदाली धुतनवलोहितपङ्कजाभिशङ्का ॥ किरातार्जुनीयम् १०.४२ ॥ |
| अभिनयान्परिचेतुं इवोद्यता मलयमारुतकम्पितपल्लवा । अमदयत्सहकारलता मनः सकलिका कलिकामजितामपि ॥ रघुवंशम् ८.२९ ॥ |
| अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे । जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभङ्गः ॥ किरातार्जुनीयम् १०.२३ ॥ |
| अभिभवोदितमन्युविदीपितः समभिसृत्य भृशं जवं ओजसा । भुजयुगेन विभज्य समाददे शशिकलाभरणस्य भुजद्वयं ॥ किरातार्जुनीयम् १८.७ ॥ |

| |
|---|
| अभिभूय विभूतिमार्तवीं मधुगन्धातिशयेन वीरुधां । नृपतेरमरस्रगाप सा दयितोरुस्तनकोटिसुस्थितिं ॥ रघुवंशम् ८.३६ ॥ |
| अभिमतमभितः कृताङ्गभङ्गा कुचयुगमुन्नतिवित्तमुन्नमय्य । तनुरभिलषितं क्लमच्छलेन व्यवृणुत वेल्लितबाहुवल्लरीका ॥ शिशुपालवधम् ७.७२ ॥ |
| अभिमत-महा-मान-ग्रन्थि-प्रभेद-पटीयसी गुरुतर-गुण-ग्रामाम्भोज-स्फुटोज्ज्वल-चन्द्रिका। विपुल-विलसल्लज्जा-वल्ली-वितान-कुठारिका जठर-पिठरी दुष्पूरेयं करोति विडम्बनम्॥॥ वैराग्यशतकम् २२ ॥ |
| अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः । अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ किरातार्जुनीयम् २.१९ ॥ |
| अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः । विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ किरातार्जुनीयम् २.१३ ॥ |
| अभिमानो विचारश्चेदूहितार्थनिषेधकृत् । इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि ॥ चन्द्रालोकः३.३ ॥ |
| अभिमुखपतितैर्गुणप्रकर्षादवजितमुद्धतिमुज्ज्वलां दधानैः । तरुकिसलयजालमग्रहस्तैः प्रसभमनीयत भङ्गमङ्गनानां ॥ शिशुपालवधम् ७.२९ ॥ |
| अभिमुखमुपयाति मा स्म किञ्चित्त्वमभिदधाः पटले मधुव्रतानां । मधुसुरभिमुखाब्जगन्धलब्धेरधिकमधित्वदनेन मा निपाति ॥ शिशुपालवधम् ७.४१ ॥ |
| अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे । चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥ किरातार्जुनीयम् १०.४५ ॥ |
| अभियाति नः सतृष एव चक्षुषो हरिरित्यखिद्यत नितम्बिनीजनः । न विवेद यः सततमेनमीक्षते न वितृष्णतां व्रजति खल्वसावपि ॥ शिशुपालवधम् १३.४६ ॥ |
| अभियोग इमान्महीभुजो भवता तस्य ततः कृतावधेः । प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव ॥ किरातार्जुनीयम् २.४६ ॥ |
| अभिलपति पतिं प्रति स्म भैमी सदय विलोकय कोकयोरवस्थाम् । मम हृदयमिमौ च भिन्दतीं हा क इव विलोक्य नरो न रोदितीमाम् ॥ नैषधीयचरितम् २१.१४६ ॥ |
| अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्योरसुगमं अरिसैन्यैरङ्कमभ्यागतस्य । जनक इव शिशुत्वे सुप्रियस्यैकसूनोरविनयमपि सेहे पाण्डवस्य स्मरारिः ॥ किरातार्जुनीयम् १७.६४ ॥ |
| अभिवर्त्म वल्लभतमस्य विगलदमलायतांशुका । भूमिनभसि रभसेन यती विरराज काचन समं महोल्कया ॥ शिशुपालवधम् १५.९२ ॥ |
| अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा । स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ किरातार्जुनीयम् २.३१ ॥ |
| अभिवीक्ष्य विदर्भराजपुत्रीकुचकाश्मीरजचिह्नमच्युतोरः । चिरसेवितयापि चेदिराजः सहसावाप रुषा तदैव योगं ॥ शिशुपालवधम् २०.६ ॥ |
| अभिवीक्ष्य सामिकृतमण्डनं यतीः कररुद्धनीविगलदंशुकाः स्त्रियः । दधिरेऽधिभित्ति पटहप्रतिस्वनैः स्फुटमट्टहासमिव सौधपङ्क्तयः ॥ शिशुपालवधम् १३.३१ ॥ |
| अभिशत्रु संयति कदाचिदविहितपराक्रमोऽपि यत् । व्योम्नि कथमपि चकर्थ पदं व्यपदिश्यते जगति विक्रमीत्यतः ॥ शिशुपालवधम् १५.२८ ॥ |
| अभीकमतिकेनेद्धे भीतानन्दस्यनाशने । कनत्सकामसेनाके मन्दकामकमस्यति ॥ शिशुपालवधम् १९.७२ ॥ |
| अभीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेन्द्रवन्दीश्वसितानिलैर्यथा । सचन्दनाम्भःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ ॥ शिशुपालवधम् १.६६ ॥ |
| अभीष्टविप्रयोगाश्रुपातग्लान्यादिभिः क्रमात् । विभावाद्यैर्युतः शोकस्थायी स्यात् करुणो रसः ॥ चन्द्रालोकः६.७ ॥ |
| अभीष्ठमासाद्य चिराय काले समुद्धृताशां कमनी चकाशे । योषिन्मनोजन्मसुखोदयेषु समुद्धृताशङ्गमनीचकाशे ॥ शिशुपालवधम् ६.७४ ॥ |
| अभुक्तमूलं घटिकाचतुष्टयं ज्येष्ठान्त्यमूलादिभवं हि नारदः । वसिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेकघटीप्रमाणकम् ।॥ मुहूर्त.नक्षत्रप्रकरणम् ५३ ॥ |
| अभुक्तायां यस्यां क्षणमपि न जातं नृपशतै र्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् । तदंशस्याप्यंशे तदवयवलेशे च पतयो विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ पुरुषार्थोपदेशः-39॥ |
| अभुक्तायां यस्यां क्षणमपि न यातं नृप-शतैर्भुवस्तस्या लाभे क इव बहुमानः क्षिति-भृताम्। तदंशस्याप्यंशे तदवय-लेशेऽपि पतयो विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम्॥॥ वैराग्यशतकम् ५८ ॥ |
| अभूत्पुरा भारत-भा-विभासकः, स एकलिङ्गस्य सदश्युपासकः । महाबली दुर्गचित्तोड़-शासकः, प्रतापसिंहः परताप नाशकः ॥ प्रतापविजयः-३४ ॥ |
| अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः । यमिन्द्रशब्दार्थनिसूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते ॥ शिशुपालवधम् १.४२ ॥ |
| अभ्यघानि मुनिचापलात्त्वया यन्मृगः क्षितिपतेः परिग्रहः । अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥ किरातार्जुनीयम् १३.६३ ॥ |
| अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम् । प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ॥ नैषधीयचरितम् ३.९२ ॥ |
| अभ्यागतैः कुण्डिनवासवस्य परोक्षवृत्तेष्वपि तेषु तेषु । जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽति नावापि नृपैर्विशेषः ॥ नैषधीयचरितम् १०.२९ ॥ |
| अभ्यागमन्मुखभुजामिह कोटिरेषा येषां पृथक्कथनमब्दशतातिपाति । अस्यां वृणीष्व मनसा परिभाव्य कंचिद्यं चित्तवृत्तिरनुधावति तावकीना ॥ नैषधीयचरितम् ११.८ ॥ |
| अभ्याजतोऽभ्यागततूर्णतर्णकान्निर्याणहस्तस्य पुरोदुधुक्षतः । वर्गादगवां हुंकृतिचारु निर्यतीमरिर्मधोरैक्षत गोमततल्लिकाम् ॥ शिशुपालवधम् १२.४१ ॥ |
| अभ्यायतः संततधूमधूम्रं व्यापि प्रभाजालं इवान्तकस्य । रजः प्रतूर्णाश्वरथाङ्गनुन्नं तनोति न व्योमनि मातरिश्वा ॥ किरातार्जुनीयम् १६.६ ॥ |
| अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् । ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥ रघुवंशम् १०.२४ ॥ |
| अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् । पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ रघुवंशम् १.५३ ॥ |
| अभ्युद्यतस्य क्रमितुं जवेन गां तमालनीला गिरां धृतायतिः । सीमेव सा तस्य पुरः क्षणं बभौ बलाम्बुराशेर्महतो महापगा ॥ शिशुपालवधम् १२.७० ॥ |

| |
|---|
| अभ्रपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदभाजि । स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्धनसङ्घे ॥ नैषधीयचरितम् ५.१२७ ॥ |
| अमतार्थान्तरं मुख्येऽमुख्येनार्थे विरोधकृत् । त्यक्तहारमुरःकृत्वा शोकेनालिङ्गिताऽङ्गना ॥ चन्द्रालोकः२.२८ ॥ |
| अमदयन्मद्धुगन्धसनाथया किसलयाधरसंगतया मनः । कुसुमसंभृत्तया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ॥ रघुवंशम् ८.४२ ॥ |
| अमनोरमतां यती जनस्य क्षणमालोकपथान्नभः सदां वा । रुरुधे पिहिताहिमद्युतिर्धीविशिखैरन्तरिता च्युता धरित्री ॥ शिशुपालवधम् २०.१५ ॥ |
| अमन्यतासौ कुसुमेषु गर्भगं परागमन्धंकरणं वियोगिनाम् । स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु संगतम् ॥ नैषधीयचरितम् १.८७ ॥ |
| अमलात्मसु प्रतिफलन्नभितस्तरुणीकपोलफलकेषु मुहुः । विससार सान्द्रतरमिन्दुरुचामधिकावभासितदिशां निकरः ॥ शिशुपालवधम् ९.३७ ॥ |
| अमहतितरास्ताद्दक्तारा न लोचनगोचरास्तरणिकिरणा द्यामञ्चन्ति क्रमादपरस्पराः । कथयति परिश्रातिं रात्री तमस्सहयुध्वनामयमपि दरिद्राणप्राणस्तमीदयितस्त्विषाम् ॥ नैषधीयचरितम् १९.४ ॥ |
| अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमन्तमात्मनः । मुमोच जानन्नपि जानकीं न यः सदाभ्मानैकघना हि मानिनः ॥ शिशुपालवधम्  १.६७ ॥ |
| अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः । मदनानलबोधने भवेत्खग धाय्या धिगधैर्यधारिणः ॥ नैषधीयचरितम् २.५६ ॥ |
| अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि । अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ॥ रघुवंशम् १३.२२ ॥ |
| अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम् । उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोदितमन्दुरोदरम् ॥ नैषधीयचरितम् १.५७ ॥ |
| अमी तमीदृग्जगुरत्र मध्ये कस्यापि नोत्पत्तिरभूदिलायाम् । अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नात्र बिभर्ति कश्चित् ॥ नैषधीयचरितम् १०.४६ ॥ |
| अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः । विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुं इवासितोत्पलं ॥ किरातार्जुनीयम् ४.२६ ॥ |
| अमी लसद्बाष्पमखण्डिताखिलं वियुक्तमन्योन्यममुक्तमार्द्रवम् । रसोत्तरं गौरमपीवरं रसादभुञ्जतामोदनमोदनं जनाः ॥ नैषधीयचरितम् १६.६८ ॥ |
| अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनां । पारिप्लवाः स्रोतसि निम्नगायाः शैवाललोलांश्छलयन्ति मीनान् ॥ रघुवंशम् १६.६१ ॥ |
| अमी समीहैकपरास्तवामराः स्वकिंकरं मामपि कर्तुमीशिषे । विचार्य कार्यं सृज मा विधान्मुधा कृतानुतापस्त्वयि पार्ष्णिविग्रहम् ॥ नैषधीयचरितम् ९.१३४ ॥ |
| अमी समुद्धूतसरोजरेणुना हृता हृतासारकणेन वायुना । उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः ॥ किरातार्जुनीयम् ४.३५ ॥ |
| अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः । स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥ कुमारसंभवम् ३.१५॥ |
| अमीभिराकण्ठमभोजि तद्गृहे तुषारधारामृदितेव शर्करा । हयद्विषद्बष्कयणीपयःसुतं सुधाह्रदात्पङ्कमिवोद्धृतं दधि ॥ नैषधीयचरितम् १६.९३ ॥ |
| अमीषां प्राणानां तुलितबिसिनीपत्रपयसां कृते किं नास्भाभिर्विगलितविवेकैव्यवसितम् । यदाढयानामग्रे द्रविणमदनिः संज्ञमनसां कृतं म्लानव्रीलैर्निजगुणकथापातकमपि ॥ पुरुषार्थोपदेशः-57॥ |
| अमीषां प्राणानां तुलित-विसिनी-पत्र-पयसां कृते किं नास्माभिर्विगलित-विवेकैर्व्यवसितम्। यदाढ्यानामग्रे द्रविण-मद-निःसंज्ञ-मनसां कृतं माव-व्रीडैर्निज-गुण-कथा-पातकमपि॥॥ वैराग्यशतकम् ५ ॥ |
| अमीषु तथ्यानृतरत्नजातयोर्वराटराट्चारुनितान्तचारुणोः । स्वयं गृहाणैकमिहेत्युदीर्य तद्द्वयं ददौ शेषजिघृक्षवे हसन् ॥ नैषधीयचरितम् १६.१११ ॥ |
| अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन । यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥ रघुवंशम् २.३६ ॥ |
| अमुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि । नालं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ॥ रघुवंशम् १३.४२ ॥ |
| अमुज्जदाकण्ठमसौ सुधासु प्रियं प्रियाया वचनं निपीय । द्विषन्मुखेऽपि स्वदते स्तुतिर्या तन्मि(न्मृ)ष्टता नेष्टमुखे त्वमेया ॥ नैषधीयचरितम् ८.५१ ॥ |
| अमुना ननु ! पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव ।  बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः॥ कुमारसंभवम् ४.२९ ॥ |
| अमुष्मिन्नारामे सततनिपतद्दोहदतया प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे । असौ बद्धालम्बः कलिरजनि कादम्बविहगच्छदच्छायाभ्यङ्गोचितरुचितया लाञ्छनमृगः ॥ नैषधीयचरितम् १७.२२ ॥ |
| अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता । उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता ॥ नैषधीयचरितम् १.२२ ॥ |
| अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन् । निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥ नैषधीयचरितम् १.४५ ॥ |
| अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम् । अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम् ॥ नैषधीयचरितम् १.५ ॥ |
| अमुष्योर्वीभर्तुः प्रसृमरचमूसिन्धुरभवैरवैमि प्रारब्धे वमथुभिरवश्यायसमये । न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न तद्वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः ॥ नैषधीयचरितम् १२.८२ ॥ |
| अमूनि गच्छन्ति युगानि न क्षणः कियत्सहिष्ये न हि मृत्युरस्ति मे । न मां तु कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः ॥ नैषधीयचरितम् ९.९४ ॥ |
| अमूनि मन्येऽमरनिर्झरिण्या यादांसि गोधा मकरः कुलीरः । तत्पूरखेलत्सुरभीतिदूरो मग्नान्यधः स्पष्टमितः प्रतीमः ॥ नैषधीयचरितम् २२.२१ ॥ |
| अमूर्विमानान्तरलम्बिनीनां श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् । प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो गोदावरीसारसपङ्क्तयस्त्वाम् ॥ रघुवंशम् १३.३३ ॥ |

| |
|---|
| अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति । शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥ शिशुपालवधम् २.१०७ ॥ |
| अमृतं सूक्तमित्यादौ लक्ष्यस्थमतिहृद्यता । आभिमुख्यात्संनिधानात्तथाकारप्रतीतितः ॥ चन्द्रालोकः९.८ ॥ |
| अमृतदीधितिरेष विदर्भजे भजसि तापममुष्य किमंशुभिः । यदि भवन्ति मृताः सखि चन्द्रिकाः शशभृतः क्व तदा ॥ नैषधीयचरितम् ४.१०५ ॥ |
| अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया । वलयायितशेषशायिनः सखितामादित पीतवाससः ॥ नैषधीयचरितम् २.१०१ ॥ |
| अमृतद्रवैर्विदधब्जदृशाममपमार्गमोषधिपतिः स्म करैः । परितो विसर्पि परितापि भृशं वपुषोऽवतारयति मानविषम् ॥ शिशुपालवधम् ९.३६ ॥ |
| अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः । अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥ रघुवंशम् १०.१८ ॥ |
| अमेलयद्भीमनृपः परं न नाकर्षदेतान्दमनस्वसैव । इदं विधातापि विचिन्त्य यूनः स्वशिल्पसर्वस्वमदर्शयन्नः ॥ नैषधीयचरितम् १०.६ ॥ |
| अमोघभावेन सनाभितां गताः प्रसन्नगीर्वाणवरक्षरस्रजाम् । ततः प्रणम्राधिजगाम सा ह्रिया गुरुर्गुरुब्रह्मपतिव्रताशिषः ॥ नैषधीयचरितम् १५.६२ ॥ |
| अमोघभावेन सनाभितां गताः प्रसन्नगीर्वाणवराक्षरस्रजाम् । ततः प्रणम्राधिजगाम सा ह्रिया गुरुर्गुरुब्रह्मपतिव्रताशिषाः ॥ नैषधीयचरितम् १५.५६ ॥ |
| अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि । अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ॥ रघुवंशम् ३.६५ ॥ |
| अम्बरं विनयतः प्रियपाणेर्योषितस्य करयोः कलहस्य । वारणमिव विधातुमभीक्ष्णं कक्ष्यया च वलयैश्च शिशिञ्चे ॥ शिशुपालवधम् १०.६२ ॥ |
| अम्बां प्रणत्योपनता नताङ्गी नलेन भैमी पथि योगमाप । स भ्रान्तिभैमीषु न तां व्यविक्त सा तं च नादृश्यतया ददर्श ॥ नैषधीयचरितम् ६.४८ ॥ |
| अम्भश्च्युतः कोमलरत्नराशीन् अपांपतिः फेनपिनद्धभासः । यत्रातपं दातुमिवोपतल्पं विसारयामास तरङ्गहस्तैः ॥ शिशुपालवधम् ३.३८ ॥ |
| अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम् । स्वभूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम् ॥ नीतिसंग्रहस्य मित्र-१.१८६ ॥ |
| अम्भोजगर्भरुचिराथ विदर्भसुभ्रूस्तं गर्भरूपमपि रूपजितत्रिलोकम् । वैराग्यरूक्षमवलोकयति स्म भूपं दृष्टिः पुरत्रयरिपोरिव पुष्पचापम् ॥ नैषधीयचरितम् ११.८ ॥ |
| अम्भोजिनीवनविहारविलासमेव हंसस्य हन्ति नितरां कुपितो विधाता । न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ नीतिशतकम् १८ ॥ |
| अम्लानिरामोदभरश्च दिव्यः पुष्पेषु भूयाद्भवदङ्गसङ्गात् । दृष्टं प्रसूनोपमया मयान्यन्न धर्मशर्मोभयकर्मठं यत् ॥ नैषधीयचरितम् १४.८५ ॥ |
| अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम् । दृशं ददौ विस्मयनिस्तरङ्गां स लङ्घितायामपि राजसिंहः ॥ नैषधीयचरितम् ६.१२ ॥ |
| अयं किलायात् इतीरिपौरवाग्भयादयादस्य रिपुर्वृथा वनम् । श्रुताष्तदुत्स्वापगिरस्तदक्षाराः पठद्भिरत्रासि शुकैर्वनेऽपि सः ॥ नैषधीयचरितम् १२.२५ ॥ |
| अयं गुणौघैरनुरज्यदुत्कलो भवन्मुखालोकरसोत्कलोचनः । स्पृशन्तु रूपामृतवापि नन्वमुं तवापिदृक्तारतरङ्गभङ्गयः ॥ नैषधीयचरितम् १२.७८ ॥ |
| अयं तावद्बाष्पस्त्रुटित इव मुक्तामणिसरो विसर्पन्धाराभिर्लुठति धरणीं जर्जरकणः । निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया परेषामुन्नेयो भवति चिरमाध्मातदयः ॥ (उत्तररामचरितम् १.२९) |
| अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ नीतिसंग्रहस्य मित्र-१.७१ ॥ |
| अयं पटः सूत्रदरिद्रतां गतो ह्ययं पटश्छिद्रशतैरलंकृतः। अयं पटः प्रावरितुं न शक्यते ह्ययं पटः संवृत एव शोभते॥ (मृच्छकटिकम् २.१०) |
| अयं प्रमत्तमधुपस्त्वन्मुखं वेद पङ्कजम् । पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ॥ चन्द्रालोकः ५.३२ ॥ |
| अयं वः क्लैब्यमापन्नान्दृष्टपृष्ठानरातिना । इच्छतीशश्च्युताचारान्दारानिव निगोपितुं ॥ किरातार्जुनीयम् १५.१९ ॥ |
| अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य । यवाङ्कुरापाण्डुकपोलशोभी मयावतंसः परिकल्पितस्ते ॥ रघुवंशम् १३.४९ ॥ |
| अयनर्क्षमासतिथिकालवासरोद्भवशूलसम्मुखसितज्ञदिक्कपाः । भृगुवक्रतादिपरिघाख्यदण्डको युवतीरजोऽप्यशुचितोत्सवादिकम् ॥ मुहूर्त.यात्राप्रकरणम् ११०॥ |
| अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः । सततमसुगतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति ॥ शिशुपालवधम् ४.२९॥ |
| अयमयोगिवधूवधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते । शितिनिशादृषदि स्फुटदुत्पतत्कणगणाधिकतारकिताम्बरः ॥ नैषधीयचरितम् ४.४९ ॥ |
| अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना । समधिरूढं अजेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥ किरातार्जुनीयम् १८.९ ॥ |
| अयमुग्रसेनतनयस्य नृपशुरपरः पशूनवन् । स्वमिवधमसुकरं पुरुषैः कुरुते स्म यत्परममेतदद्भुतं ॥ शिशुपालवधम् १५.३८ ॥ |
| अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा । स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥ नैषधीयचरितम् २.३ ॥ |
| अयमेत्य तडाकनीडजैर्लघु पर्यव्रियताथ शाङ्कितैः । उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः ॥ नैषधीयचरितम् २.५ ॥ |
| अयमेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे । पृथुभिर्ध्वजिनीस्रवैरकार्षीच्चकितोद्भ्रान्तमृगाणि काननानि ॥ किरातार्जुनीयम् १३.९ ॥ |
| अयशोभिदुरालोके कोपधाम-रणादृते । अयशोभिदुरा लोके कोपधा मरणादृते ॥ शिशुपालवधम् १९.५८ ॥ |
| अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडपतेश्च रश्मयः । बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥ कुमारसंभवम् ५.२२ ॥ |

| |
|---|
| अयि कठोर ! यशः किल ते प्रियं किमयशो ननु घोरमतः परम् । किमभवद्विपिने हरिणीदृशः कथय नाथ ! कथं बत मन्यसे ॥ (उत्तररामचरितम् ३.२७) |
| अयि जीवितनाथ ! जीवसीत्यभिधायोत्थितया तया पुरः । ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥ कुमारसंभवम् ४.३ ॥ |
| अयि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् । स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥ नैषधीयचरितम् २.३१ ॥ |
| अयि प्रिये कस्य कृते विलप्यते विलिप्यते हा मुखमश्रुबिन्दुभिः । पुरस्त्वयालोकि नमन्नयं न किं तिरश्चलल्लोचनलीलया नलः ॥ नैषधीयचरितम् ९.१०३ ॥ |
| अयि ममैष चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम् । अशितुमब्धिमधीतवतोऽस्य च शशिकराः पिबतः कति शीकराः ॥ नैषधीयचरितम् ४.५८ ॥ |
| अयि लेखनि लिख्यतां तथा, वरवीरस्य यथा यथा कथा । क्रियतां च तथा विचारणा, प्रभवेदद्य यया सुधारणा ॥ प्रतापविजयः-१७ ॥ |
| अयि विधुं परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता । ग्लपितशंभुगलाद्गरलात्त्वया किमुदधौ जड वा वडवानलात् ॥ नैषधीयचरितम् ४.४८ ॥ |
| अयि शपे हृदयाय अवैव तद्यदि विधोर्न रुचेरसि गोचरः । रुचिफलं सखि दृश्यत एव तज्ज्वलयति त्वचमुल्ललयत्यसून् ॥ नैषधीयचरितम् ४.१०७ ॥ |
| अयि संप्रति देहि दर्शनं स्मर ! पर्युत्सुक एष माधवः । दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥ कुमारसंभवम् ४.२८ ॥ |
| अयि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतोदिता । मुखानि लोलाक्षि दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ॥ नैषधीयचरितम् १.१३९ ॥ |
| अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षः सुलभं तवापि यत् । स्तनद्वयेऽस्मिन्हरिचन्दनास्पदे पदं चिताभम्मरजः करिष्यति ॥ कुमारसंभवम् ५.६९ ॥ |
| अये कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमित्थम् । उदेति ते भीरपि किं नु बाले विलोकयन्त्या न घना वनालीः ॥ नैषधीयचरितम् ३.१३ ॥ |
| अये दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् । मृषां न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः ॥ नैषधीयचरितम् १.१५ ॥ |
| अये ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने । गरौ गिरः पल्लवनार्थलाघवे मितं च सारं च वचो हि वाग्मिता ॥ नैषधीयचरितम् ९.८ ॥ |
| अये मयात्मा किमनिह्नुतीकृतः किमत्र मन्ता स तु मां शतक्रतुः । पुरः स्वभक्त्याथ नमन्ह्रियाविलो विलोकिताहे न तदिङ्गितान्यपि ॥ नैषधीयचरितम् ९.१२२ ॥ |
| अये! स्वदेशोन्नतये धृतासर्वोऽस्त्ययं जनो वक्तुमना मनागत । 'हृदि स्वकीये विलिखन्तु मद्वचः, स्वशक्तिरादया शुचिधर्मसाधिका ॥ प्रतापविजयः-८९ ॥ |
| अयोगजामन्वभवं न वेदनां हिताय मेऽभूदियमुन्मदिष्णुता । उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः ॥ नैषधीयचरितम् ९.१३२ ॥ |
| अयोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् । पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥ नैषधीयचरितम् १.१ ॥ |
| अयोगे सुयगोऽपि चेत्स्यात्तदानीमयोगं निहत्यैष सिद्धिं तनोति । परे लग्नशुद्ध्या कुयोगादिनाशं दिनार्धोत्तरं विष्टिपूर्वं च शस्तम् ॥ मुहूर्तचिन्त. ४२॥ |
| अयोधि तद्धैर्यमनोभवाभ्यां तामेव भैमीमवलम्ब्य भूमिम् । आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्ताम् ॥ नैषधीयचरितम् ८.५३ ॥ |
| अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः । यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने ॥ कुमारसंभवम् ५.१५ ॥ |
| अरमयन्भवनादचिरद्युतेः किल भयादमपयातुमनिच्छवः । यदुनरेन्द्रगणं तरुणागणास्तमथ मन्मथमन्थरभाषिणः ॥ शिशुपालवधम् ६.४० ॥ |
| अरातिभिर्युधि सहयुध्वनो हतान्जिघृक्षवः श्रुतरणतूर्यनिःस्वनाः । अकुर्वत प्रथमसमागमोचितं चिरोज्झितं सुरगणिकाः प्रसाधनं ॥ शिशुपालवधम् १७..३४ ॥ |
| अराधि यन्मीनमृगाजपत्त्रिजैः पलैर्मृदु स्वादु सुगन्धि तेमनम् । अशाकि लोकैः कुत एव जेमितुं न तत्तु संख्यातुमपि स्म शक्यते ॥ नैषधीयचरितम् १६.८७ ॥ |
| अरावप्युचितं कार्यमातिथ्यं गृहमागते । छेत्तुमप्यागते छायां नोपसंहरते द्रुमः ॥ नीतिसंग्रहस्य मित्र-१.५९ ॥ |
| अरावली' यां समवाप्य सुन्दरी, सुहल्दिघाटी प्रथिता रणस्थली । परस्परं सा भुवि योद्धुकामतः, प्रवर्तमानोभय पक्षतोऽभवत् ॥ प्रतापविजयः- १०९ ॥ |
| अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा । निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥ रघुवंशम् ३.१५ ॥ |
| अरुणकिरणे वह्नौ लाजानुदूनि जुहोति या परिणयति तां संध्यामेतामवैमि मणिर्दिवः । इयमिव स एवाग्निभ्रान्तिं करोति पुरा यतः करमपि न कस्तस्यैवोत्कः सकौतुकमीक्षितुम् ॥ नैषधीयचरितम् १९.२ ॥ |
| अरुणजलजराजीमुग्धहस्ताग्रपादा बहुलमधुपमालाकज्जलेन्दीवराक्षी । अनुपतति विरावैः पत्त्रिणां व्याहरन्ती रजनिमचिरजाता पूर्वसन्ध्या सुतेव ॥ शिशुपालवधम् ११.४० ॥ |
| अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः । परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ॥ रघुवंशम् ८.४३ ॥ |
| अरुणिताखिलशैलवना मुहुर्विदधती पथिकान्परितापिनः ।विकचकिंशुकसंहतिरुच्चकैरुदवहद्दवहव्यवहश्रियं ॥ शिशुपालवधम् ६.२१ ॥ |
| अरुन्धतीकामपुरंध्रिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानाम् । चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यदद्दश्यसिद्धिः ॥ नैषधीयचरितम् ७.९८ ॥ |
| अर्कतर्कत्रितिथिषु प्रदोषः स्यात्तदग्रिमैः । रात्र्यर्धसार्धप्रहरयाममध्यस्थितैः क्रमात् ॥ मुहूर्त.संस्कारप्रकरणम् ५५॥ |
| अर्कादिवारे सङ्क्रान्तौ कर्कस्याब्दविंशोपकाः । दिशो नखा गजाः सूर्या धृत्योऽष्टादश सायकाः ॥ मुहूर्त.संक्रान्तिप्रकरणम् १२ ॥ |
| अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामक्षिभिरम्बुकेलौ । भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः ॥ नैषधीयचरितम् ७.५७ ॥ |
| अर्काल्लग्नात्सायनाद्भोग्यभुक्तैर्भागैर्निघ्नात्स्वोदयात्खाग्निभक्तात् । भोग्यं भुक्तं चान्तरालोदयाढ्यं षष्ट्या भक्तं स्वेष्टनाड्यो भवेयुः ॥ मुहूर्त.विवाहप्रकरणम् १०५॥ |
| अर्घनिःस्वमणिमाल्यविमिश्रैः स्मेरजातिमयदामसहस्रैः । तं पिधाय विदधे बहुरत्नक्षीरनीरनिधिमग्नमिवैषः ॥ नैषधीयचरितम् २१.४८ ॥ |

| |
|---|
| अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः । क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥ रघुवंशम् ११.६९ ॥ |
| अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृतातिथिमिन्द्रः । यावदर्हकरणं किल साधोः प्रत्यवायधुतये न गुणाय ॥ नैषधीयचरितम् ५.९ ॥ |
| अर्चयन्हरकरं स्मितभाजा नागकेसरतरोः प्रसवेन । सोयमापयदतिर्यगवाग्दिक्पालपाण्डुरकपालविभूषाम् ॥ नैषधीयचरितम् २१.३५ ॥ |
| अर्चिता तस्य कौसल्या प्रिया केकयवंशजा । अतः संभाविता ताभ्यां सुमित्रां ऐच्छदीश्वरः ॥ रघुवंशम् १०.५६ ॥ |
| अर्थना मयि भवद्भिरिवास्ये कर्तुमर्हति मयापि भवत्सु । भीमजाऋथपरयाचनचाटौ यूयमेव गुरवः करणीयाः ॥ नैषधीयचरितम् ५.११२ ॥ |
| अर्थनाशं मनस्तापं गृहे दुश्चरितानि च । वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥ नीतिसंग्रहस्य मित्र-१.१२७ ॥ |
| अर्थश्लेषोऽर्थमात्रस्य यद्यनेकार्थसंश्रयः । कुटिलाः श्यामला दीर्घाः कटाक्षाः कुन्तलाश्च ते ॥ चन्द्रालोकः ५.६५ ॥ |
| अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनमायुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवनम् । धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ नीतिसंग्रहस्य मित्र-१.१४८ ॥ |
| अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च । वश्यश्च पुत्रोऽर्थकरी च विद्या षड्जीवलोकस्य सुखानि राजन् ॥ नीतिसंग्रहस्य मित्र-०.14 ॥ |
| अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं शूरस्त्वं वादि-दर्प-व्युपशमन-विधावक्षयं पाटवं नः। सेवन्ते त्वां धनाढ्या मतिमलहतये मामपि श्रोतु-कामाः मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्ननास्था॥॥ वैराग्यशतकम् ५२ ॥ |
| अर्थापत्तिः स्वयं सिध्येत्पदार्थान्तरवर्णनम् । स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम् ॥ चन्द्रालोकः ५.३७ ॥ |
| अर्थिताः प्रथमतो दमयन्तीं यूयमन्वहमुपास्य मया यत् । ह्रीर्न चेद्व्यतियतामपि तद्वः सा ममापि सुतरां न तदस्तु ॥ नैषधीयचरितम् ५.११३ ॥ |
| अर्थिनां त्वयि गतेषु सुरेषु म्लानदानजनिजोरुयशःश्रीः । अद्य पाण्डु गगनं सुरशाखी केवलेन कुसुमेन विधत्ताम् ॥ नैषधीयचरितम् ५.१३३ ॥ |
| अर्थिनामहृषिताखिललोमा स्वं नृपः स्फुटकदम्बकदम्बम् । अर्चनार्थमिव तच्चरणानां स प्रणामकरणादुपनिन्ये ॥ नैषधीयचरितम् ५.७९ ॥ |
| अर्थिने न तृणवद्धनमात्रं किं तु जीवनमपि प्रतिपाद्यम् । एवमाह कुशवज्जलदापी द्रव्यदानविधिरुक्तिविदग्धः ॥ नैषधीयचरितम् ५.८६ ॥ |
| अर्थिनो वयममी समुपेमस्त्वां नलेति फलितार्थमवेहि । अध्वनः क्षणमपास्य च खेदं कुर्महे भवति कार्यनिवेदम् ॥ नैषधीयचरितम् ५.७७ ॥ |
| अर्थिभ्रंशबहूभवत्फलभरव्याजेन कुब्जायितः सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः । आस्ते निर्व्ययरत्नसंपदुदयोदग्रः कथं याचकश्रेणीवर्जनदुर्यशोनिबिडितव्रीडस्तु रत्नाचलः ॥ नैषधीयचरितम् १२.६७ ॥ |
| अर्थी सर्वसुपर्वणां पतिरसावेतस्य यूनः कृते पर्यत्याजि विदर्भराजसुतया युक्तं विशेषज्ञया । अस्मिन्नाम तया वृते सुमनसः सन्तोऽपि यन्निर्जरा जाता दुर्मनसो न सोढुमुचिता तेषां तु साऽनौचिती ॥ नैषधीयचरितम् १५.९ ॥ |
| अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः । क्रिया सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ नीतिसंग्रहस्य मित्र-१.११९ ॥ |
| अर्थो विनैवाऋथनयोपसीदन्नाल्पोऽपि धीरैरवधीरणीयः । मान्येन मन्ये विधिना वितीर्णः स प्रीतिदायो बहु मन्तुमर्हः ॥ नैषधीयचरितम् १४.८७ ॥ |
| अर्धचक्रवपुषार्जुनबाहून्योऽलुनात्परशुनाथ सहस्रम् । तेन किं सकलचक्रविलूने बाणबाहुनिचयेऽञ्चति चित्रम् ॥ नैषधीयचरितम् २१.९८ ॥ |
| अर्धाचिता सत्वरं उत्थितायाः पदे पदे दुर्निमिते गलन्ती । कस्याश्चिदासीद्रशना तदानीमङ्गुष्ठमाउलार्पितसूत्रशेषा ॥ रघुवंशम् ७.१० ॥ |
| अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती । कस्याश्चिदासीद्शसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा॥ कुमारसंभवम् ७.६१॥ |
| अर्धान्तरपदापेक्षिक्रीडानृत्येषु सस्मितम् । मोघारम्भं स्तुमः शम्भुमर्धरम्भोरुविग्रहम् ॥ चन्द्रालोकः२.२२ ॥ |
| अर्पितं रसितवत्यपि नामग्राहमन्ययुवतेर्दयितेन । उज्झति स्म मदमप्यपिबन्ती वीक्ष्य मद्यमितरा तु ममाद ॥ शिशुपालवधम् १०.२७ ॥ |
| अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु । तस्य सर्वसुरतान्तरक्षमाः साक्षितां शिशिररात्रयो ययुः ॥ रघुवंशम् १९.४२ ॥ |
| अलं नलं रोद्धुममी किलाभवन्गुणा विवेकप्रमुखा न चापलम् । स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः ॥ नैषधीयचरितम् १.५४ ॥ |
| अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् । न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥ रघुवंशम् २.३४ ॥ |
| अलं विलङ्घ्य प्रियविज्ञ याCजां कृत्वापि वाम्यं विविधं विधेये । यशः पथादाश्रवतापदोत्थात्खलु स्खलित्वास्तखलोक्तिखेलात् ॥ नैषधीयचरितम् ३.८४ ॥ |
| अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः । गुरूपदेशं ग्रतिभेव तीक्ष्णा प्रतिईक्षते जातु न कालमर्तिः ॥ नैषधीयचरितम् ३.९१ ॥ |
| अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः । ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥ कुमारसंभवम् ५.८२ ॥ |
| अलं सजन्धर्मविधौ विधाता रुणद्धि मौनस्य मिषेण वाणीम् । तत्कण्ठमालिङ्ग्य रसस्य तृप्तां न वेद तां वेदजडः स वक्राम् ॥ नैषधीयचरितम् ३.३ ॥ |
| अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वं । तस्मादुपच्छन्दयति प्रयोजं मयि त्वया न प्रतिषेधरौक्ष्यम् ॥ रघुवंशम् ५.५८ ॥ |
| अलंकृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम् । इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः ॥ नैषधीयचरितम् १०.१०८ ॥ |
| अलंकृतानां ऋजुतागुणेन गुरूपदिष्टां गतिमास्थितानां । सतामिवापर्वणि मार्गणानां भङ्गः स जिष्णोर्धृतिं उन्ममाथ ॥ किरातार्जुनीयम् १७.२९ ॥ |

| |
|---|
| अलंकृतासन्नमहीविभागैरयं जनस्तैरमरैर्भवत्याम् । अवापितो जङ्गमलेखलक्ष्मीं निक्षिप्य संदेशमयाक्षराणि ॥ नैषधीयचरितम् ८.८९ ॥ |
| अलक्षि विद्युत्फलकोपमः परैरतर्कि तर्ककधनैर्यमोऽपरैः । अमानि कैश्चिच्च पलायनेपरैः सुदर्शनो दर्शनमात्र कातरैः॥ प्रतापविजयः-१२७ ॥ |
| अलक्षिताऽशान्त गतागतिः सदा, रणाग्निमध्ये तृण-पुञ्ज-दायकः । ननर्त वैरि-व्रज-मौलि-मण्डले, स मूर्तिधारी रणचक्रवक्रिमा॥ प्रतापविजयः-१३३ ॥ |
| अलक्ष्यत क्षणदलिताङ्गदे गदे करोदरप्रहितनिजांसधामनि । समुल्लसच्छकलितपाटलोपलैः स्फुलिङ्गवान्स्फुटमिव कोपपावकः ॥ शिशुपालवधम् १७..३ ॥ |
| अलघूपलपङ्क्तिशालिनीः परितो रुद्धनिरन्तराम्बराः । अधिरूढनितम्बभूमयो न विमुञ्चन्ति चिराय मेखलाः ॥ शिशुपालवधम् १६.७६ ॥ |
| अलङ्कारः परिकरः साभिप्राये विशेषणे । सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥ चन्द्रालोकः ५.३९ ॥ |
| अलङ्कारप्रधानेषु दधानेष्वपि साम्यताम् । वैलक्षण्यं प्रतिव्यक्ति प्रतिभाति मुखेष्विव ॥ चन्द्रालोकः ५.१२४ ॥ |
| अलङ्कारेषु तथ्येषु यद्यनास्था मनीषिणाम् । तदर्वाचीनभेदेषु नाम्नां नाम्नाय इष्यताम् ॥ चन्द्रालोकः ५.१२५ ॥ |
| अलङ्कृतिर्नैव रसो, गुणोऽथवा न रीतिरत्रास्ति तथाप्यसौ कृतिः । न कस्य मोदं वितनोत्यदूषणं विभूषणाऽप्यङ्क-गता वधूरिव ॥ प्रतापविजयः-२४ ॥ |
| अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु ! कुतः पितुर्गृहे । पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥ कुमारसंभवम् ५.४३ ॥ |
| अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु ! कुतः पितुर्गृहे । प राभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥ कुमारसंभवम् ५.४३॥ |
| अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहन्तुम् । घनवर्त्म सहस्रधेव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः ॥ किरातार्जुनीयम् ५.१७ ॥ |
| अलर्कवत्केसरिणः पदान्तिके, वराक। अल्पस्यलमग्रतो मृषा । तृणायतस्त्वद्बलत कदाप्यहो ! ममाग्निरूपस्य कथम्भयम्भवत् ॥ प्रतापविजयः-८१ ॥ |
| अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातं । स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा ॥ किरातार्जुनीयम् १०.६० ॥ |
| अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः । हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः कथय सुकृती कोऽयं मुग्धे त्वयाद्य विलोक्यते ॥ अमरुशतकम्-४॥ |
| अलसैर्मदेन सुदृशः शरीरकैः स्वगृहान्प्रति प्रतिययुः शनैः शनैः । अलघुप्रसारित विलोचनाञ्जलिद्रुतपीतमाधवरसौघनिर्भरैः ॥ शिशुपालवधम् १३.४८ ॥ |
| अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता । विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ॥ कुमारसंभवम् ४.१५ ॥ |
| अलिभिरञ्जनबिन्दुमओहरैः कुसुमपङ्क्तिनिपातिभिरङ्कितः । न खलु शोबहयित्स्म वनस्थलीं न तिलकस्तिलकः प्रमदां इव ॥ रघुवंशम् ८.४१ ॥ |
| अलीकभैमीसहदर्शनान्न तस्यान्यकन्याप्सरसो रसाय । भैमीभ्रमस्यैव ततः प्रसादाद्भैमीभ्रमस्तेन न तास्वलम्भि ॥ नैषधीयचरितम् ६.१५ ॥ |
| अल्पप्रयोजनकृतोरुतरप्रयातसैरुद्गूर्णलोष्टगुडैः परितोऽनुविद्धम् । उद्यातमुद्रतमनोकहझालमध्यादन्याः शशङ्गुणमनल्पमवन्नवाप ॥ शिशुपालवधम् ५.२५ ॥ |
| अल्पाक्षरा विचित्रार्थ-ख्यातिरक्षर-संहतिः । उषाकान्तेनानुगतः शूरः शौरिरयं पुनः ॥ चन्द्रालोकः३.१ ॥ |
| अल्पाङ्कपङ्का विधुमण्डलीयं पीयूषानीरा सरसी स्मरस्य । पानात्सुधानामजलेऽप्यमृत्यु चिह्नं बिभर्त्यत्रभवं स मीनम् ॥ नैषधीयचरितम् २२.१२७ ॥ |
| अल्पानामपि वस्तूनां संहतिः कार्यसाधिका । तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ नीतिसंग्रहस्य मित्र-१.३५ ॥ |
| अल्पायां वृष्टौ दोषोऽल्पो भूयस्यां दोषो भूयाञ्जीभूतानां निर्घोषे वृष्टौ वा जातायां भूपः । सूर्येन्द्वोर्बिम्बे सौवर्णे कृत्वा विप्रेभ्यो दद्याद् दुःशाकुन्ये साज्यं स्वर्णं दत्वा गच्छेत्स्वेच्छाभिः ॥ मुहूर्त.यात्राप्रकरणम् ९९॥ |
| अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् । स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ रघुवंशम् ८.८८ ॥ |
| अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः। बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग ! मोक्ष्यति ॥ कुमारसंभवम् ४.१३ ॥ |
| अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्यमृगाणि काननानि । अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥ किरातार्जुनीयम् १०.५ ॥ |
| अवचितकुसुमा विहाय वल्लीर्युवतीषु कोमलमाल्यमालिनीषु । पदमुपदधिरे कुलान्यलीनां न परिचयो मलिनात्मनां प्रधाम् ॥ शिशुपालवधम् ७.६१ ॥ |
| अवच्छटा कापि कटाक्षणस्य सा तथैव भङ्गी वचनस्य काचन । यथा युवभ्यामनुनाथने मिथः कृशोऽपि दूतस्य न शेषितः श्रमः ॥ नैषधीयचरितम् १६.६४ ॥ |
| अवजानासि मां यस्मादतस्ते न भविष्यति । मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ रघुवंशम् १.७७ ॥ |
| अवजितमधुना तवाहमक्ष्णो रुचितयेत्यवनम्य लज्जयेव । श्रवणकुवलयं विलासवत्या भ्रमररुतैरुपकर्णमाचचक्षे ॥ शिशुपालवधम् ७.६० ॥ |
| अवज्ञया यदहसदुच्चकैर्बलः समुल्लसद्दशनमयूखमण्डलः । रुषारुणीकृतमपि तेन तत्क्षणं निजं वपुः पुनरयन्निजां रुचिं ॥ शिशुपालवधम् १७..४ ॥ |
| अवज्ञा वर्ण्यते वस्तु गुणदोषाक्षमं यदि । म्लायन्ति यदि पद्मानि का हानिरमृतद्युतेः ॥ चन्द्रालोकः ५.१०७ ॥ |
| अवतमसभिदायै भास्वताम्युद्गतेन प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः । निरसितुमरिमिच्छोर्ये तदीयाश्रयेण श्रियमधिगतवन्तस्तेऽपि हन्तव्यपक्षे ॥ शिशुपालवधम् ११.५७ ॥ |
| अवद्यन्पत्रिणः शम्भोः सायकैरवसायकैः । पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥ किरातार्जुनीयम् १५.३७ ॥ |
| अवधानपरे चकार सा प्रलयान्तोन्मिपिते विलोचने । न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ॥ कुमारसंभवम् ४.२ ॥ |
| अवधार्य कार्यगुरुतामभवन्न भयाय सान्द्रतमसन्तमसम् । सुतनोः स्तनौ च दयितोपगमे तनुरोमराजिपथवेपथवे ॥ शिशुपालवधम् ९.२२ ॥ |

| |
|---|
| अवधीज्जनङ्गम इवैष यदि हतवृषो वृषं ननु । स्पर्शमशुचिवपुरर्हति न प्रतिमाननां तु नितरां नृपोचितां ॥ शिशुपालवधम् १५.३५ ॥ |
| अवधीर्य धैर्यकलिता दयितं विदधे विरोधमथ तेन सह । तव गोप्यते किमिव कर्तुमिदं न सहास्मि साहसमसाहसिकी ॥ शिशुपालवधम् ९.५९ ॥ |
| अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः । परिरेभिरेऽभिमुखं एत्य सुखाः सुहृदः सखायमिव तं मरुतः ॥ किरातार्जुनीयम् ६.३ ॥ |
| अवधृत्य दिवोऽपि यौवतैर्न सहाधीतवतीमिमामहम् । कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम् ॥ नैषधीयचरितम् २.४१ ॥ |
| अवनदवदनेन्दुरिच्छतीव व्यवधिमधीरतया यदस्थितास्मै । अहरत सुतरामतोऽस्य चेतः स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ शिशुपालवधम् ७.३८ ॥ |
| अवनम्य वक्षसि निमग्नकुचद्वितयेन गाढमुपगूढवता । दयितेन तत्क्षणचलद्रशनाकलकिङ्किणीरवमुदासि वधूः ॥ शिशुपालवधम् ९.७४ ॥ |
| अवनिं एकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः । विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ॥ रघुवंशम् ८.११ ॥ |
| अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता । स च मुनिरनुयातारुन्धतीको वसिष्ठ- स्तव वितरतु भद्रं भूयसे मङ्गलाय ॥ (उत्तररामचरितम् ३.४८) |
| अवनीभृतां त्वमपहाय गणमतिजडः समुन्नतं । नीचि नियतमिह यच्चपलो निरतः स्फुटं भवसि निम्नगासुतः ॥ शिशुपालवधम् १५.२१ ॥ |
| अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः । आरोप्य चक्रभ्रमम्मुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥ रघुवंशम् ६.३२ ॥ |
| अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः । गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ॥ (मृच्छकटिकम् १.६) |
| अवन्ध्यकोपस्य निहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः । अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ किरातार्जुनीयम् १.३३ ॥ |
| अवभृतप्रयतो नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः । नमयति स्म स केवलं उन्नतं वनमुचे नमुचेररये शिरः ॥ रघुवंशम् ८.१८ ॥ |
| अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसां । स ददर्श वेतसवनाचरितां प्रणतिं बलीयसि समृद्धिकरीं ॥ किरातार्जुनीयम् ६.५ ॥ |
| अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसं गतम् । स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसंगतम् ॥ नैषधीयचरितम् २.६६ ॥ |
| अवलीढसनाभिरश्वसेनः प्रसभं खाण्डवजातवेदसा वा । प्रतिकर्तुमुपागतः समन्युः कृतमन्युर्यदि वा वृकोदरेण ॥ किरातार्जुनीयम् १३.११ ॥ |
| अवलोक एव नृपतेः स्म दूरतो रभसाद्रथादवतरीतुमिच्छतः । अवतीर्णवान्प्रथममात्मना हरिर्विनयं विशेषयति सम्भ्रमेण सः ॥ शिशुपालवधम् १३.७ ॥ |
| अवलोकनाय सुरविद्विषां द्विषः पटहप्रणादविहितोपहूतयः । अवधीरितान्यकरणीयसत्वराः प्रतिरथ्यमीयुरथ पौरयोषितः ॥ शिशुपालवधम् १३.३० ॥ |
| अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया । दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ नीतिसंग्रहस्य मित्र-१.१८ ॥ |
| अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् । व्रजन्तः स्वातन्त्रयादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शतमुखमनन्तं विदधति ॥ पुरुषार्थोपदेशः-25॥ |
| अवश्यं यातारश्चिरतरमुषित्वापि विषयाः वियोगे को भेदस्त्यजति न जनो यत्स्वयममून्। व्रजन्तः स्वातन्त्र्यादतुल-परितापाय मनसः स्वयं त्यक्ता ह्येते शम-सुखमनन्तं विदधति॥॥ वैराग्यशतकम् १२ ॥ |
| अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा । तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ॥ नैषधीयचरितम् १.१२ ॥ |
| अवसमधिगम्य तं हरन्तयो हृदयमयत्नकृतोज्वलस्वरूपाः । अवनिषु पदमङ्गनास्तदानीं न्यदधत विभ्रमसम्पदोऽङगनासु ॥ शिशुपालवधम् ७.३ ॥ |
| अवसितललितक्रियेण बाह्वोर्ललिततरेण तनीयसा युगेन । सरसकिसलयानुरञ्जितैर्वा करकमलैः पुनरुक्तभाभिः ॥ शिशुपालवधम् ७.६४ ॥ |
| अवस्तुनिर्बन्धपरे ! कथं नु ते करोऽयमामुक्तविवाहकौतुकः । करेण शंभोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम् ॥ कुमारसंभवम् ५.६६ ॥ |
| अवहितहृदयो विधाय स अर्हाम् ऋषिवदृषिप्रवरे गुरूपदिष्टाम् । तदनुमतमलंचकार पश्चात्प्रशम इव श्रुतमासनं नरेन्द्रः ॥ किरातार्जुनीयम् २.५८ ॥ |
| अवादि भैमी परिधाप्य कुण्डले वयस्ययाभ्यामभितः समन्वयः । त्वदाननेन्दोः प्रियकामजन्मनि श्रयत्ययं दौरुधरीं धुरं ध्रुवम् ॥ नैषधीयचरितम् १५.४२ ॥ |
| अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः । असंवरे शंबरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥ नैषधीयचरितम् १.५३ ॥ |
| अवापितायाः शुचिवेदिकान्तरं कलासु तस्याः सकलासु पण्डिताः । क्षणेन सख्यश्चिरशिक्षणैः स्फुटं प्रतिप्रतीकं प्रतिकर्म निर्ममुः ॥ नैषधीयचरितम् १५.२६ ॥ |
| अवाप्यते वा किमियद्भवत्या चितैकपद्यामपि विद्यते यः । यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥ नैषधीयचरितम् ३.६३ ॥ |
| अवामावामार्धे सकलमुभयाकारघटनाद्द्विधाभूतं रूपं भगवदभिधेयं भवति यत् । तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं निराकारं शश्वज्जप नरपते सिध्यतु सते ॥ नैषधीयचरितम् १४.८८ ॥ |
| अवारितं गतमुभयेषु भूरिशः क्षमाभृतामथ कटकान्तरेष्वपि । मुहुर्युधि क्षतसुरशत्रुशोणितप्लुतप्रधिं रथमधिरोहति स्म सः ॥ शिशुपालवधम् १७..२७ ॥ |
| अवारितद्वारतया तिरश्चामन्तः पुरे तस्य निविश्य राज्ञः । गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ॥ नैषधीयचरितम् ३.४१ ॥ |

| |
|---|
| अविग्रहस्याप्यतुलेन हेतुना समेतभिन्नद्वयमूर्ति तिष्ठतः । तवैव नान्यस्य जगत्सु दृश्यते विरुद्धवेषाभरणस्य कान्तता ॥ किरातार्जुनीयम् १८.३३ ॥ |
| अविचालितचारुचक्रयोरनुरागादुपगूढयोः श्रिया । युवयोरिदमेव भिद्यते यदुपेन्द्रस्त्वमतीन्द्र एव सः ॥ शिशुपालवधम् १६.७० ॥ |
| अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति । अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ॥ किरातार्जुनीयम् २.२९ ॥ |
| अविन्दतासौ मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे । अत्रावतीर्णा गुणवर्णनाय राज्ञां तदाज्ञावशगास्मि कापि ॥ नैषधीयचरितम् १०.९ ॥ |
| अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः । सह पूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभेदं ॥ किरातार्जुनीयम् १३.२७ ॥ |
| अविभावितेषुविषयः प्रथमं मदनोऽपि नूनमभवत्तमसा । उदिते दिशः प्रकटयत्यमुना यदघर्मधाम्नि धनुराचकृषे ॥ शिशुपालवधम् ९.४० ॥ |
| अविभाव्यतारकमदृष्टहिमद्युतिबिम्बमस्तमितभानु नभः । अवसन्नतापमतमिस्रमभादपदोषतैव विगुणस्य गुणः ॥ शिशुपालवधम् ९.१२ ॥ |
| अविमृष्टविधेयांशः समासपिहिते विधौ । विशन्ति विशिखप्रायाः कटाक्षाः कामिनां हृदि ॥ चन्द्रालोकः२.१३ ॥ |
| अविमृष्यमेतदभिलष्यति स द्विषतां वधेन विषयाभिरतिं । भववीतये न हि तथा स विधिः क्व शरासनं क्व च विमुक्तिपथः ॥ किरातार्जुनीयम् ६.४४ ॥ |
| अविरतकुसुमावचायखेदान्निहितभुजालतयैकयोपकण्ठं । विपुलतरनिरन्तरालग्नस्तनपिहितप्रियवक्षसा ललम्बे ॥ शिशुपालवधम् ७.७१ ॥ |
| अविरतदयिताङ्गासङ्गसञ्चरितेन छुरितमभिनवासृक्कान्तिना कुङ्कुमेन । कनकनिकषरेखा कोमलं कामिनीनां भवति वपुरवाप्तच्छायमेवातपेऽपि ॥ शिशुपालवधम् ११.५५ ॥ |
| अविरतरतलीलायासजातश्रमाणां उपशममुपयान्तं निःसहेऽङ्गेऽङ्गनानां । पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य ज्वलयति मदनाग्निं मालतीनां रजोभिः ॥ शिशुपालवधम् ११.१७ ॥ |
| अविरतोज्झितवारिविपाण्डुभिर्विरहितैरचिरद्युतितेजसा । उदितपक्षमिवारतनिःस्वनैः पृथुनितम्बविलम्बिभिरम्बुदैः ॥ किरातार्जुनीयम् ५.६ ॥ |
| अविरलपुलकः सह व्रजन्त्याः प्रतिपदमेकतरः स्तनस्तरुण्याः । घटितविघटितः प्रियस्य वक्षस्तटभुवि कन्दुकविभ्रमं बभार ॥ शिशुपालवधम् ७.१५ ॥ |
| अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः । गुणमसमयजं चिराय लेभे विरलतुषारकण्.अस्तुषारकालः ॥ किरातार्जुनीयम् १०.२८ ॥ |
| अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु । सवपुषां इव चित्तरागं ऊहुर्नमितशिखानि कदम्बकेसराणि ॥ किरातार्जुनीयम् १०.४३ ॥ |
| अविलङ्घ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम् । अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ किरातार्जुनीयम् ३.५७ ॥ |
| अविवक्षितवाच्यस्य द्वौ भेदौ वाच्यमेव चेत् । अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥ चन्द्रालोकः७.३ ॥ |
| अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागं । विजिगीषुं इवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तं ॥ किरातार्जुनीयम् १३.२९ ॥ |
| अविषह्यतमे कृताधिकारं वशिना कर्मणि चेदिपार्थिवेन । अरसद्धनुरुच्चकैर्दृढार्तिप्रसभाकर्षणवेपमानजीवं ॥ शिशुपालवधम् २०.१० ॥ |
| अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरंगम् । अन्तश्चराणां मरुतां निरोधानिवातनिष्कम्पमिव प्रदीपम् ॥ कुमारसंभवम् ३.४८॥ |
| अवेक्षितानायतवल्गमग्रे तुरङ्गिभिर्यत्ननिरुद्धवाहैः । प्रक्रीडितान् रेणुभिरेत्य तूर्णं निन्युर्जनन्यः पृथुकान् पथिभ्यः ॥ शिशुपालवधम्  ३.२९ ॥ |
| अवैमि कमलाकरे निखिलयामिनीयामिकश्रियं श्रयति यत्पुरा विततपत्त्रनेत्रोदरम् । तदेव कुमुदं पुनर्दिनमवाप्य नर्भभ्रमद्द्विरेफरवघोरणाघनमुपैति निद्रामुदम् ॥ नैषधीयचरितम् १९.६० ॥ |
| अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वां । सोऽहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातं ॥ रघुवंशम् १६.८२ ॥ |
| अवैमि चैनामनघेति किं तु लोकापवादो बलवान्मतो मे । छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः ॥ रघुवंशम् १४.४० ॥ |
| अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये । व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥ कुमारसंभवम् ३.१३॥ |
| अवैमि वादिप्रतिवादिगाढखपक्षरागेण विराजमाने । ते पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ॥ नैषधीयचरितम् १०.८ ॥ |
| अवैमि सौभाग्यमदेन वञ्चिनं तव प्रियं यश्चतुरावलोकिनः ।  करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः ॥ कुमारसंभवम् ५.४९ ॥ |
| अवैमि हंसावलयो वलक्षास्त्वत्कान्तिकीर्तेश्चपलाः पुलाकाः । उड्डीय युक्तं पतिताः स्रवन्तीवेशन्तपूरं परितः प्लवन्ते ॥ नैषधीयचरितम् ८.३५ ॥ |
| अव्यक्तयोगनिर्योग-योगाभासैस्त्रिधादिमः । ते च वृक्षादिभूवादि-मण्डपाद्या यथाक्रमम् ॥ चन्द्रालोकः १.१० ॥ |
| अव्याकुलं प्रकृतमुत्तरधेयकर्म धाराः प्रसाधयितुव्यतिकीर्णरूपाः । सिद्धं मुखे नवसु वाथिषु कश्चिदश्वं वल्गाविभागकुशलो गमयांबभूव ॥ शिशुपालवधम् ५.६० ॥ |
| अव्याहतक्षिप्रगतैः समुच्छ्रितानमुज्झितद्रामबिर्गरीयसः । नाव्यं पयःकेचिदतारिषुर्भुजैः क्षिपद्भिरूर्मीनपरैरिवोर्मिभिः ॥ शिशुपालवधम् १२.७६ ॥ |
| अशिथिलमपरावसज्य कण्ठे दृढपरिरब्धबृहद्बहिस्तनेन । हृषिततनुरुहा भुजेन भर्तुर्मृदुममृदु व्यतिविद्धमेकबाहुं ॥ शिशुपालवधम् ७.१६ ॥ |
| अशीमहि वयं भिक्षामाशावासो वसीमहि । शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ पुरुषार्थोपदेशः- 44॥ |
| अशुभखगैरनवाष्टमदस्थैर्हिबुकसहोदरलाभगृहस्थैः । कविरिह केन्द्रगगीष्पतिदृष्टो वसुचयलाभकरः खलु योगः ॥ मुहूर्त.यात्राप्रकरणम् ७०॥ |
| अशून्यतीरां मुनिसंनिवेशैस्तमोऽपहन्त्रीं तमसां विगाह्य । तत्सैकतोत्सङ्गबलिक्रियाभिः संपत्स्यते ते मनसः प्रसादः ॥ रघुवंशम् १४.७६ ॥ |
| अशेषतीर्थोपहृताः कमण्डलोर्निधाय पाणावृषिणाभ्युदीरिताः । अधौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः ॥ शिशुपालवधम्  १.१८ ॥ |
| अशोकनिर्भर्हितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् । मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ॥ कुमारसंभवम् ३.५३॥ |

| |
|---|
| अशोकमर्थान्वितनामताशया गताञ्शरण्यं गृहशोचिनोऽध्वगान् । अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ॥ नैषधीयचरितम् १.१०१ ॥ |
| अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम् । प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद् दिवसानि कौशिकः ॥ शिशुपालवधम् १.५३ ॥ |
| अश्नीमहि वयं भिक्षामाशावासो वसीमहि। शयीमहि मही-पृष्ठे कुर्वीमहि किमीश्वरैः॥॥ वैराग्यशतकम् ५५ ॥ |
| अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवाजिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना । पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥ नैषधीयचरितम् २.१०२ ॥ |
| अश्रावि भूमिपतिभिः क्षणवीतनिद्रैरश्वनुन्प्रो हरितकं मुदमादधानः । ग्रीवाग्रलोलकलकिङ्गिणीकानिनाद मिश्रं दधद्दशनचर्चुरशब्दमश्वः ॥ शिशुपालवधम् ५.५८ ॥ |
| अश्रौषमिन्द्रादरिणीर्गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः । स्वं प्रागहं प्रादिषि नामराय किंनाम तस्मै मनसा नराय ॥ नैषधीयचरितम् ६.९५ ॥ |
| अश्लीलं त्रिविधं व्रीडा-जुगुप्सा मङ्गलात्मना । आह्लादसाधनं वायुः कान्तानाशे भवेत्कथम् ॥ चन्द्रालोकः२.८ ॥ |
| अश्वः क्वचित्पतति मर्दित-मुग्ध-मुण्डः, दन्ती क्वचित्रदति कर्तित- दीर्घ- शुण्डः । एवं रिपून् स पशुमारममारयद्यः, द्वाकृति प्रकट सङ्गर- सङ्गचण्डः ॥ प्रतापविजयः-१४१ ॥ |
| अश्विन्यभ्युपयोर्हयो निगदितः स्वात्यर्कयोः कासरः सिंहो वस्वजपाद्भयोः समुदितो याम्यान्त्ययोः कुञ्जरः । मेषो देवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः स्याद्वैश्वाभिजितोस्तथैव नकुलश्चान्द्राब्जयोन्योरहिः ॥ मुहूर्त.विवाहप्रकरणम् २५॥ |
| अष्टौ तदाष्टासु हरित्सु दृष्टीः सदो दिदृक्षुर्निदिदेश देवः । लैङ्गीमदृष्ट्वापि शिरःश्रियं यो दृष्टौ मृषावादितकेतकीकः ॥ नैषधीयचरितम् १०.५२ ॥ |
| असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा । करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोरुणाङ्गुली ॥ कुमारसंभवम् ५.८०॥ |
| असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय । प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥ नीतिसंग्रहस्य मित्र-१.२८ ॥ |
| असंभवोऽर्थनिष्पत्तावसंभाव्यत्ववर्णनम् । को वेद गोपशिशुकः शैलमुत्पाटयिष्यति ॥ चन्द्रालोकः ५.७६ ॥ |
| असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः। बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः॥ कुमारसंभवम् ३.५॥ |
| असंविदानस्य ममेश संविदां तितिक्षितुं दुश्चरितं त्वमर्हसि । विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनापि ॥ किरातार्जुनीयम् १८.४२ ॥ |
| असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनं । हृतेऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियं ॥ किरातार्जुनीयम् ८.३८ ॥ |
| असंशयं स त्वयि हंस एव मां शशंस न त्वद्विरहाप्तसंशयाम् । क्व चन्द्रवंशस्य वतंस मद्वधान्नृशंसता संभविनी भवादृशे ॥ नैषधीयचरितम् ९.१४४ ॥ |
| असंशयं सा गुणदीर्घभावकृता दधाना विततिं यदीया । विधायिका शब्दपरम्पराणां किं वारचि व्याकरणेन काञ्ची ॥ नैषधीयचरितम् १०.७८ ॥ |
| असंशयं सागरभागुदस्थात्पृथ्वीधरादेव मथः प्रायम् । अमुष्य यस्मादधुनापि सिन्धौ स्थितस्य शैलादुदयं प्रतीमः ॥ नैषधीयचरितम् २२.४४ ॥ |
| असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः । तुल्याद्विभागादिव तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने ॥ किरातार्जुनीयम् ३.३३ ॥ |
| असंहार्योत्साहं जयिनमुदयं प्राप्य तरसा धुरं गुर्वीं वोढुं स्थितमनवसादाय जगतः । स्वधाम्ना लोकानां तमुपरि कृतस्थानममरास्तपोलक्ष्म्या दीप्तं दिनकृतमिवोच्चैरुपजगुः ॥ किरातार्जुनीयम् १८.४७ ॥ |
| असकलकलिकाकुलीकृतालिस्खलनविकीर्णविकासिकेशराणां । मरुदवनिरुहां रजो वधूभ्यः मुपहरन्विचकार कोरकाणि ॥ शिशुपालवधम् ७.२६ ॥ |
| असकलनयनेक्षितानि लज्जा गतमलसं परिपाण्डुता विषादः । इति विविधं इयाय तासु भूषां प्रभवति मण्डयितुं वधूरनङ्गः ॥ किरातार्जुनीयम् १०.५९ ॥ |
| असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता । दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषां ॥ रघुवंशम् ८.२१ ॥ |
| असकृद्गृहीतबहुदेहसम्भवस्तदसौ विभक्तनवगोपुरान्तरं । पुरुषः पुरं प्रविशति स्म पञ्चभिः सममिन्द्रियैरिव नरेन्द्रसूनुभिः ॥ शिशुपालवधम् १३.२८ ॥ |
| असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया । गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणः परस्परम् ॥ किरातार्जुनीयम् १.११ ॥ |
| असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् । अवेहि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ॥ रघुवंशम् ३.६३ ॥ |
| असन्तो नाभ्यर्थ्याः सुहृदपि न वाच्यः कृशधनः, प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् । विपद्युच्चैः स्थेयं पदमनुविधेयं च महताम् सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ नीतिशतकम् २८ ॥ |
| असमये मतिरुन्मिषति ध्रुवं करगतैव गता यदियं कुहूः । पुनरुपैति निरुध्य निवास्यते सखि मुखं न विधोः पुनरीक्ष्यते ॥ नैषधीयचरितम् ४.५७ ॥ |
| असमापितकृत्यसम्पदां हतवेगं विनयेन तावता । प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ किरातार्जुनीयम् २.४८ ॥ |
| असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् । न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं कृतस्थितिः ॥ रघुवंशम् ८.७६ ॥ |
| असम्भोगेन सामान्यं कृपणस्य धनं परैः । अस्येदमिति सम्बन्धो हानौ दुःखेन गम्यते ॥ नीतिसंग्रहस्य मित्र-१.१५४ ॥ |
| असह्यपीडं भगवन्नृणमन्त्यमवेहि मे । अरुंतुदमिवालानमनिर्वाणस्य दन्तिनः ॥ रघुवंशम् १.७१ ॥ |
| असह्यहुंकारनिवर्तितः पुरा पुरारिमप्राप्तमुखः शिलीमुखः । इमां हृदि व्यायतपातम क्षिणोद्विशीर्णमूर्तेरपि पुष्पधन्वनः ॥ कुमारसंभवम् ५.५४ ॥ |
| असाधना वित्तहीना बुद्धिमन्तः सुहृन्मताः । साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥ नीतिसंग्रहस्य मित्र-१.२ ॥ |

| |
|---|
| असाम यन्नाम तवेह रूपं स्वेनाधिगत्य श्रितमुग्धभावाः । तन्नो धिगाशापतितान्नरेन्द्र धिक्चेदमस्मद्विबुधत्वमस्तु ॥ नैषधीयचरितम् १०.४८ ॥ |
| असाराः सन्त्येते विरतिविरसा वाथ विषया जुगुप्स्यन्तां यद्वा न तु सकलदोषस्पदमिदम् । तथाप्येतद् ब्रूमो न हि परहितात्पुण्यमधिकं न चास्मिन् संसारे कुवलयदृशो रम्यमपरम् ॥ पुरुषार्थोपदेशः-77॥ |
| असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि । उपैति शुष्यन्कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् ॥ किरातार्जुनीयम् ४.३४ ॥ |
| असावसाम्याद्वितनोः सखा नो कर्पूरमिन्दुः खलु तस्य मित्रम् । दग्धौ हि तौ द्वावपि पूर्वरूपाद्यद्वीर्यवत्तामधिकां दधाते ॥ नैषधीयचरितम् २२.८८ ॥ |
| असिं भवान्याः क्षतकासरासुरं वराय भीमः स्म ददाति भासुरम् । ददे हि तस्मै धवनामधारिणे स शंभुसंभोगनिमग्नयानया ॥ नैषधीयचरितम् १६.१८ ॥ |
| असिच्यत प्रशमितपांशुभिर्मही मदाम्बुभिर्धृतनवपूर्णकुम्भया । अवाद्यत श्रवणसुखं समुन्नमत्पयोधरध्वनिगुरु तूर्यमाननैः ॥ शिशुपालवधम् १७..३८ ॥ |
| असितमेकसुराशितमप्यभून्न पुनरेष विधुर्विशदं विषम् । अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम् ॥ नैषधीयचरितम् ४.६१ ॥ |
| असिस्वददद्यन्मधुपर्कमर्पितं स तद्व्यधात्तर्कमुदर्कदर्शिने । यदेष पास्यन्मधु भीमजाधरं मिषेण पुण्याहविधिं तदाकृत ॥ नैषधीयचरितम् १६.१३ ॥ |
| असीदियं दशरथस्य गृहे यथा श्रीः श्रीरेव वा किमुपमानपदेन सैषा । कष्टं बतान्यदिव दैववशेन जाता दुःखत्मकं किमपि भूतमहो विकारः ॥ (उत्तररामचरितम् ४.६) |
| असुन्दरं यदि व्यङ्ग्यं स्याद्वाच्यादमनोहरम् । सरस्यामीलदम्भोजे चक्रः कान्तां विलोकते ॥ चन्द्रालोकः८.९ ॥ |
| असुरस्त्वया न्यवधि कोऽपि मधुरिति कथं प्रतीयते । दण्डदलितसरघः प्रथसे मधुसूदनस्त्वमिति सूदयन्मधु ॥ शिशुपालवधम् १५.२३ ॥ |
| असुरहितमप्यादित्योत्थां विपत्तिमुपागतं दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः । पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीं यदि न वहते संध्यामौनव्रतव्ययभीरुताम् ॥ नैषधीयचरितम् १९.१५ ॥ |
| असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि । पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण ॥ कुमारसंभवम् ३.२६॥ |
| असृग्जनोऽस्त्रक्षतिमानवमज्जवसादनं । रक्षःपिशाचं मुमुदे नवमज्जवसादनं ॥ शिशुपालवधम् १९.७८ ॥ |
| असृङ्नदीनामुपचीयमानैर्विदारयद्भिः पदवीं ध्वजिन्याः । उच्छ्रायमायान्ति न शोणितौघैः पङ्कैरिवाश्यानघनैस्तटानि ॥ किरातार्जुनीयम् १६.१० ॥ |
| असेवि यस्त्यक्तदिवा दिवानिशं श्रियः प्रियेणानणुरामणीयकः । सहामुना तत्र पयः पयोनिधौ कृशोदरि क्रीड यथामनोरथम् ॥ नैषधीयचरितम् ९.७९ ॥ |
| असेवितेश्वरद्वारमदृष्टविरहव्यथम् । अनुक्तक्लीबवचनं धन्यं कस्यापि जीवनम् ॥ नीतिसंग्रहस्य मित्र-१.१३९ ॥ |
| असेविषातां सुषमां विदर्भजादृशाववाप्याञ्जनरेखयाऽन्वयम् । भुजद्वयज्याकिणपद्धतिस्पृशोः स्मरेण बाणीकृतयोः पयोजयोः ॥ नैषधीयचरितम् १५.३६ ॥ |
| असौ कुमारस्तमजोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः । गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशं बिभर्ति ॥ रघुवंशम् ६.७८ ॥ |
| असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः । वृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥ रघुवंशम् १३.६६ ॥ |
| असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः । तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ॥ रघुवंशम् ६.३४ ॥ |
| असौ महीभृद्बहुधातुमण्डितस्तया निजोपत्यकयेव कामपि । भुवा कुरङ्गक्षणदन्तिचारयोर्बभार शोभां कृतपादसेवया ॥ नैषधीयचरितम् १६.१२० ॥ |
| असौ महेन्द्रद्विपदानगन्धी त्रिमार्गगावीचिविमर्दशीतः । आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते ॥ रघुवंशम् १३.२० ॥ |
| असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च । यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ॥ रघुवंशम् ६.५४ ॥ |
| असौ मुहुर्जातजलाभिषेचना क्रमादद्दुकूलेन सितांशुनोज्ज्वला । द्वयस्य वर्षाशरदां तदातनीं सनाभितां साधु बबन्ध संध्यया ॥ नैषधीयचरितम् १५.२१ ॥ |
| असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः । राजा प्रजारञ्जनलब्धवर्णः परंतपो नाम यथार्थनामा ॥ रघुवंशम् ६.२१ ॥ |
| अस्तं याते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने लग्ने चेन्दौ । कन्यानाशस्तनुमदमृत्युस्थे भौमे वोढुर्लाभे धनसहजे चन्द्रे सौख्यम् ॥ मुहूर्त.विवाहप्रकरणम् १०१॥ |
| अस्ताचलेऽस्मिन्निकषोपलाभे संध्याकषोल्लेखपरीक्षितो यः । विक्रीय तं हेलिहिरण्यपिण्डं तारावराटानियमादित द्यौः ॥ नैषधीयचरितम् २२.१३ ॥ |
| अस्ताद्रिचूडालयपक्कणालिच्छेकस्य किं कुक्कुटपेटकस्य । यामान्तकूजोल्लसितैः शिखौघैर्दिग्वारुणी द्रागरुणीकृतेयम् ॥ नैषधीयचरितम् २२.५ ॥ |
| अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः । स्वच्छोपसर्पणमपि प्रतिमाभिमाने भेदभ्रमे पुनरमीषु न मे निमित्तम् ॥ नैषधीयचरितम् १३.४२ ॥ |
| अस्तु त्वया साधितमन्नमीनरसादि पीयूषरसातिशायि । यद्भूप विद्मस्तव सूपकारक्रियासु कौतूहलशालि शीलम् ॥ नैषधीयचरितम् १४.७८ ॥ |
| अस्ते निशाप्रहरकेषु पिशाचकादीन् नक्तंचरानपि नटान् पशुपालकांश्च । सूर्योदये सकललिङ्गिजनं च सौम्ययाम्यायनं मकरकर्कटयोर्निरुक्तम् ॥ मुहूर्त.संक्रान्तिप्रकरणम् ३॥ |
| अस्ते वर्ज्यं सिंहनक्रस्थजीवे वर्ज्यं केचिद्वक्रगे चातिचारे । गुर्वादित्ये विश्वघस्रेऽपि पक्षे प्रोचुस्तद्वद्दन्तरत्नादिभूषाम् ॥ मुहूर्तचिन्त. ४८॥ |
| अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः । पूर्वापरौ तोय]निधी व गाहय स्थितः पृथिव्या इव मानदण्डः ॥ कुमारसंभवम् १.१ ॥ |
| अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकाव जयाय दृप्तः । पुरा जनस्थानविमर्दशङ्की संधाय लंकाधिपतिः प्रतस्थे ॥ रघुवंशम् ६.६२ ॥ |
| अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः । जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधं ॥ किरातार्जुनीयम् १३.६२ ॥ |

| |
|---|
| अस्त्रवेदविदयं महीपतिः पर्वतीय इति मावजीगणः । गोपितुं भुवमिमां मरुत्वता शैलवासं अनुनीय लम्भितः ॥ किरातार्जुनीयम् १३.६७ ॥ |
| अस्त्रैः समानामतिरेकिणीं वा पश्यनीषूणामपि तस्य शक्तिं । विषादवक्तव्यबलः प्रमाथी स्वमाललम्बे बलं इन्दुमौलिः ॥ किरातार्जुनीयम् १७.३४ ॥ |
| अस्फुटं चार्थनिष्ठत्वात्तटस्थत्वादपि द्विधा । लक्ष्यलक्षकनिष्ठत्वादर्थसंस्थमपि द्विधा ॥ चन्द्रालोकः९.४ ॥ |
| अस्मत्किल श्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य । तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥ नैषधीयचरितम् ३.२६ ॥ |
| अस्मदाद्यविषयेऽपि विशेषे रामनाम तव धाम गुणानाम् । अन्वबन्धि भवतैव तु कस्मादन्यथा ननु जनुस्त्रितयेऽपि ॥ नैषधीयचरितम् २१.११५ ॥ |
| अस्माकमध्यासितमेतदन्तस्तावद्भवत्या हृदयं चिराय । बहिस्त्वयालंक्रियतामिदानीमुरो मुरं विद्विषतः श्रियेव ॥ नैषधीयचरितम् ८.९५ ॥ |
| अस्माकमुक्तिभिरवैष्यथ एव बुद्धेर्गाधं युवामतिमती स्तुमहे तथापि । ज्ञानं हि वागवसरावचनाद्भवद्भ्यामेतावदप्यनवधारितमेव न स्यात् ॥ नैषधीयचरितम् २१.१३१ ॥ |
| अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते । आकरे पद्यरागानां जन्म काचमणेः कुतः ॥ नीतिसंग्रहस्य मित्र-०.४३ ॥ |
| अस्मिञ्जयन्ति जगतीपतयः सहस्रमस्रास्रुसार्द्ररिपुतद्वनितेषु तेषु । रम्भोरु चारु कतिचित्तव चित्तबिन्धिरूपान्निरूपय मुदाहमुदाहरामि ॥ नैषधीयचरितम् ११.८७ ॥ |
| अस्मिञ्शिशौ न स्थित एव रङ्कुर्यूनि प्रियाभिर्विहितोपदायम् । आरण्यसंदेश इवौषधीभिरङ्के स शङ्के विधुना न्यधायि ॥ नैषधीयचरितम् २२.७८ ॥ |
| अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायिनी कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा । अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्ध्वं निजः पन्था भास्वति दृश्यते बिलमयः प्रत्यर्थिभिः पाॠथिवैः ॥ नैषधीयचरितम् १२.२९ ॥ |
| अस्मिन्न विस्मापयतेऽयमस्मांश्चक्षुर्बभूवैष यदादिपुंसः । तदत्रिनेत्राद्दितस्य तन्वि कुलानुरूपं किल रूपमस्य ॥ नैषधीयचरितम् २२.११२ ॥ |
| अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः । विन्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ किरातार्जुनीयम् ५.३३ ॥ |
| अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते । आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥ (उत्तररामचरितम् ३.३७) |
| अस्मिन्यशःपौरुषलोलुपानामरातिभिः प्रत्युरसं क्षतानां । मूर्छान्तरायं मुहुरुच्छिनत्ति नासारशीतं करिशीकराम्भः ॥ किरातार्जुनीयम् १६.९ ॥ |
| अस्मिन्समाजे मनुजेश्वरेण तां खञ्जनाक्षीमंवलोक्य केन । पुनः पुनर्लोलितमौलिना न भ्रुवोरुदक्षेपितरां द्वयी वा ॥ नैषधीयचरितम् १०.१११ ॥ |
| अस्मै करं प्रवितरन्तु नृपा न कस्मादस्यैव तत्र यदभूत्प्रतिभूः कृपाणः । दैवाद्यदा प्रवितरन्ति न ते तदैव नेदंकृपा निजकृपाणकरग्रहाय ॥ नैषधीयचरितम् ११.१२६ ॥ |
| अस्य क्षोणिपतेः परार्ध्धपरया लक्षीकृताः संख्यया प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः । गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरान्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥ नैषधीयचरितम् १२.१०६ ॥ |
| अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि । कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ॥ रघुवंशम् ६.३३ ॥ |
| अस्यर्थहेतिपट्टाकवलीभवत्तत्पार्थिवाधिकरणप्रभवाऽस्य भूतिः । अप्यङ्गरागजननाय महेश्वरस्य संजायते रुचिरकर्णि तपस्विनोऽपि ॥ नैषधीयचरितम् १३.११ ॥ |
| अस्या भवन्तमनिशं भवतस्तथैनां कामः श्रमं न कथमृच्छति नाम गच्छन् । छायैव वामथ गतागतमाचरिष्णोस्तस्याध्वजश्रमहरा मकरध्वजस्य ॥ नैषधीयचरितम् २१.१३७ ॥ |
| अस्या भुजाभ्यां विजिताद्बिसाक्तिं पृथक्करोऽगृह्यत तत्प्रसूनम् । इहेष्यते तन्न गृहाः श्रियः कैर्न गीयते वा कर एव लोकैः ॥ नैषधीयचरितम् १०.१२३ ॥ |
| अस्या मुखश्रीप्रतिविम्बमेव जलाच्च तातान्मुकुराच्च मित्रात् । अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित् ॥ नैषधीयचरितम् ७.५६ ॥ |
| अस्या मुखस्यास्तु न पुर्णमास्यं पूर्णस्य जित्वा महिमा हिमांशुम् । भूलक्ष्म खण्डं दधदर्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः ॥ नैषधीयचरितम् ७.५३ ॥ |
| अस्या मुखेनैव विजित्य नित्यस्पर्धी मिलत्कुङ्कुमरोषाभासा । प्रसह्य चन्द्रः खलु नह्यमानः स्यादेव तिष्ठत्परिवेषपाशः ॥ नैषधीयचरितम् ७.५८ ॥ |
| अस्या मुखेन्दावधरः सुधाभूबिम्बस्य युक्तः प्रतिबिम्ब एषः । तस्याथवा श्रीर्द्रुमभाजि देशे संभाव्यमानस्य तु विद्रुमे सा ॥ नैषधीयचरितम् ७.३८ ॥ |
| अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्धमर्धम् । कर्णान्तरुत्कीर्णगभीररेखः किं तस्य संख्यैव नवानवाङ्कः ॥ नैषधीयचरितम् ७.६३ ॥ |
| अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम् । स्फुटस्फुरद्भङ्गिकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ॥ नैषधीयचरितम् ७.२१ ॥ |
| अस्यां मुनीनामपि मोहमूहे भृगुर्महान्यत्कुचशैलशीली । नानारदाहलादि मुखं श्रियोरुर्व्यासो महाभारतसर्गयोग्यः ॥ नैषधीयचरितम् ७.९६ ॥ |
| अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवां स कामः । प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥ नैषधीयचरितम् ७.१२ ॥ |
| अस्याः कचानां शिखिनश्च किंनु विधिं कलापौ विमतेरगाताम् । तेनायमेभिः किमपूजि पुष्पैरभर्त्सि दत्त्वा स किमर्धचन्द्रम् ॥ नैषधीयचरितम् ७.२२ ॥ |
| अस्याः करस्पर्धनगर्धनर्द्धिर्बालत्वमापत्खलु पल्लवो यः । भूयोऽपि नामाधरसाम्यगर्वं कुर्वन्कथं वास्तु न स प्रवालः ॥ नैषधीयचरितम् ७.७१ ॥ |
| अस्याः खलु ग्रन्थिनिबद्धकेशमल्लीकदम्बप्रतिबिम्बवेषात् । स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥ नैषधीयचरितम् ७.८८ ॥ |
| अस्याः पदौ चारुतया महान्तावपेक्ष्य सौक्ष्म्याल्लवभावभाजः । जाता प्रवालस्य महीरुहाणां जानीमहे पल्लवशब्दलब्धिः ॥ नैषधीयचरितम् ७.९९ ॥ |
| अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन । अमूनि सूनैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥ नैषधीयचरितम् १०.१३ ॥ |

| |
|---|
| अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप । पक्षस्थतावद्बहुचन्द्रकोऽपि कलापिनां येन जितः कलापः ॥ नैषधीयचरितम् ७.२ ॥ |
| अस्याः सुराधीशदिशः पुरासीद्यदम्बरं पीतमिदं रजन्या । चन्द्रांशुचूर्णव्यतिचुम्बितेन तेनाधुना नूनमलोहितायि ॥ नैषधीयचरितम् २२.४९ ॥ |
| अस्याङ्कलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितम्बकाञ्चीम् । प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ॥ रघुवंशम् ६.४३ ॥ |
| अस्याधिशय्य पुरमुज्जयिनीं भवानी जागर्ति या सुभगयौवतमौलिमाला । पत्याऽर्धकायघटनाय मृगाक्षि तस्याः शिष्या भविष्यसि चिरं वरिवस्ययापि ॥ नैषधीयचरितम् ११.९ ॥ |
| अस्यारिप्रकरः शरश्च नृपतेः संख्ये पतन्तावुभौ सीत्कारं च न संमुखौ रचयतः कम्पं च न प्राप्नुतः । तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्ति यन्मुक्तयोरेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् ॥ नैषधीयचरितम् १२.९८ ॥ |
| अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कृष्णिमा कम्पोन्मीलदराललीलवलनस्तेषां भिये भूभुजाम् । सङ्ग्रामेषु निजाङ्गुलीमयमहासिद्धाषधीवीरुधः पर्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥ नैषधीयचरितम् १२.९६ ॥ |
| अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्मम हस्तलेखः । इत्याह धाता हरिणेक्षणायां किं हस्तलेखीकृतया तयास्याम् ॥ नैषधीयचरितम् ७.७२ ॥ |
| अस्यैव सेवार्थमुपागतानामास्वादयन्पल्लवमोषधीनाम् । धयन्नमुष्यैव सुधाजलानि सुखं वसत्येष कलङ्करङ्कुः ॥ नैषधीयचरितम् २२.७९ ॥ |
| अस्यैवासीन्महति शिखरे गृध्रराजस्य वासस्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु। गोदावर्याः पयसि विततश्यामलानोकहश्री-रन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः॥ (उत्तररामचरितम् २.२५) |
| अस्योत्कण्ठितकण्ठलोठिवरणस्रक्साक्षिभिर्दिग्भटैः स्वं वक्षः स्वयमस्फुटन्न किमदः शस्त्रादपि स्फोटितम् । व्यावृत्योपनतेन हा शतमखेनाद्य प्रसाद्या कथं भैम्यां व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥ नैषधीयचरितम् १५.९१ ॥ |
| अस्योर्वीरमणस्य पार्थिवणविधुद्वैराज्यसज्जं यशः सर्वाङ्गोज्ज्वलशर्वपर्वतसितश्रीगर्वनिर्वासि यत् । तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः पर्यायः किमु दुग्धसिन्धुपयसां सर्वानुवादः किमु ॥ नैषधीयचरितम् १२.६५ ॥ |
| अहं तेनाहूता किमपि कथयामीति विजने समीपे चासीना सरसहृदयत्वादवहिता । ततः कर्णोपान्ते किमपि वदताघ्राय वदनं गृहीता धर्मिल्ले सखि स च मया गाढमधरे ॥ अमरुशतकम्-१०२॥ |
| अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते । चतुरैः सुरकामिनीजनैः प्रिय ! यावन्न विलोभ्यसे दिवि ॥ कुमारसंभवम् ४.२० ॥ |
| अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् । उदधेरिव निमगाशतेष्वभवन्नास्य विमानना क्वचित् ॥ रघुवंशम् ८.८ ॥ |
| अहर्निशा वेति रताय पृच्छति क्रमोष्णशीतान्नकरार्पणाद्विटे । ह्रिया विदग्धा किल तन्निषेधिनी न्यधत्त संध्यामधुरेऽधरेऽङ्गुलिम् ॥ नैषधीयचरितम् १६.७८ ॥ |
| अहह सह मघोना श्रीप्रतिष्ठासमाने निलयमभि नलेऽथ स्वं प्रतिष्ठासमाने । अपतदमरभर्तुर्मूर्तिबद्धेव कीर्तिर्गलदलिमधुबाष्पा पुष्पवृष्टिर्नभस्तः ॥ नैषधीयचरितम् १४.९८ ॥ |
| अहितादनपत्रपस्त्रसन्नतिमात्रोज्झितभीरनास्तिकः । विनयोपहितस्त्वया कृतः सदृशोऽन्यो गुणवानविस्मयः ॥ शिशुपालवधम् १६.७ ॥ |
| अहितानभि वाहिन्या स मानी चतुरङ्गया । चचाल वल्गत्कलभसमानीचतुरङ्गया ॥ शिशुपालवधम् १९.२५ ॥ |
| अहीनगुर्नाम स गां समग्रां अहीनबाहुद्रविणः शशास । यो हीन संसर्गपराङ्मुखत्वाद्माधुर्यमीष्टे हरिणान्ग्रहीतुं ॥ रघुवंशम् १८.१४ ॥ |
| अहो अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम् । तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ॥ नैषधीयचरितम् १.४१ ॥ |
| अहो तपः कल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः । त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः ॥ नैषधीयचरितम् ३.१२ ॥ |
| अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतिकम् । क्व वा निधिर्निर्धनमेति किंच तं स वाक्कवाटं घटयन्निरस्यति ॥ नैषधीयचरितम् ९.३९ ॥ |
| अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासंगमशोमिताभृतः । हृदस्य हंसावलिमांसलश्रियो वलाकयेव प्रबला विडम्बना ॥ नैषधीयचरितम् ९.२७ ॥ |
| अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते। उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः ॥ कुमारसंभवम् ५.४७ ॥ |
| अहो! मदीया जड-लौह-लेखनी, कथा तदीया कथमत्र कथ्यताम् । क्षणेन सा यच्छटया 'अरावली' ददी दरीदृश्यत एकदाऽरुणा ॥ प्रतापविजयः-१३९ ॥ |
| अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा । तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ वैराग्यशतकम्॥ |
| अह्नाय यावन्न चकार भूयसे निषेदिवानासनबन्धमध्वने । तीव्रोत्थितास्तावदसह्यरंहसो विशृङ्खलं शृङ्खलकाः प्रतस्थिरे ॥ शिशुपालवधम् १२.७ ॥ |
| आ संसारात्त्रिभुवनमिदं चिन्वतां तात्तादृङ्नैवास्माकं नयन-पदवीं श्रोत्र-मार्गं गतो वा । योऽयं धत्ते विषय-करिणो गाढ-गूढाभिमानक्षीवस्यान्तःकरण-करिणः संयमालान-लीलाम् ॥ वैराग्यशतकम् ८१ ॥ |
| आः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः । दयां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडाउजः ॥ नैषधीयचरितम् ५.२४ ॥ |
| आकम्पाग्रैः केतुभिः सन्निपातं तारोदीर्णग्रैवनादं व्रजन्तः । मग्नानङ्गे गाढमन्यद्विपानां दन्तान्दुःखादुत्खनन्ति स्म नागाः ॥ शिशुपालवधम् १८.३७ ॥ |

| |
|---|
| आकर्ण्य तुल्यमखिलां सुदती लगन्तीमाखण्डलेऽपि च नलेऽपि च वाचमेताम् । रूपं समानमुभयत्र विगाहमाना श्रोत्रान्न निर्णयमवापदसौ न नेत्रात् ॥ नैषधीयचरितम् १३.८ ॥ |
| आकर्षतेवोर्ध्वमपि क्रशीयानत्युन्नतत्वात् कुचमण्डलेन । ननाम मध्यो तिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम् ॥ शिशुपालवधम् ३.१४ ॥ |
| आकल्पविच्छेदविवर्जितो यः स धर्मशास्त्रव्रज एव यस्याः । पश्यामि मूर्धा श्रुतिमूलशाली कण्ठस्थितः कस्य मुदे न वृत्तः ॥ नैषधीयचरितम् १०.८५ ॥ |
| आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यः स्वन उच्चचार । द्रागन्यविन्यस्तदृशः स तस्याः संभ्रान्तमन्तः करणं चकार ॥ नैषधीयचरितम् ३.२ ॥ |
| आकारमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपं । नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥ किरातार्जुनीयम् ३.२७ ॥ |
| आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः । आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ रघुवंशम् १.१५ ॥ |
| आकीटमाकैटभवैरि तुल्यः स्वाभीष्टलाभात्कृतकृत्यभावः । भिन्नस्पृहाणां प्रति चार्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥ नैषधीयचरितम् ६.१०६ ॥ |
| आकीर्णं ऋषिपत्नीनामुटजद्वाररोधिभिः । अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥ रघुवंशम् १.५० ॥ |
| आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु । मातङ्गोन्मथितसरोजरेणुपिङ्गं माञ्जिष्ठं वसनमिवाम्बु निर्बभासे ॥ किरातार्जुनीयम् ७.३६ ॥ |
| आकीर्णा मुखनलिनैर्विलासिनीनामुद्भूतस्फुटविशदातपत्रफेना । सा तूर्यध्वनितगभीरमापतन्ती भूभर्तुः शिरसि नभोनदीव रेजे ॥ किरातार्जुनीयम् ७.१८ ॥ |
| आकुञ्चिताग्राङ्गुलिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभः । तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठं ॥ रघुवंशम् ६.१५ ॥ |
| आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसावतीर्य । निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ॥ नैषधीयचरितम् ३.१ ॥ |
| आकुमारं उपदेष्टुं इच्छवः संनिवृत्तिमपथान्महापदः । योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलतां ॥ किरातार्जुनीयम् १३.४३ ॥ |
| आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः । आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥ किरातार्जुनीयम् ९.८ ॥ |
| आकृष्टवपुर्लतैस्तरदभिस्तस्याम्भस्तदथ सरोमहार्णवस्य । अक्षोभि प्रसृतविलोबाहुपक्षैर्योषाणांमुरुभिरुरोजगण्डस्शैलैः ॥ शिशुपालवधम् ८.२५ ॥ |
| आकृष्य सारमखिलं किमु वल्लकीनां तस्या मृदुस्वरमसर्जि न कण्ठनालम् । तेनान्तरं तरलभावमवाप्य वीणा ह्रीणा न कोणममुचत्किमु वालयेषु ॥ नैषधीयचरितम् २१.१२९ ॥ |
| आक्रम्याजेरग्रिमस्कन्धमुच्चैरास्थायाथो वीतशङ्कं शिरश्च । हेलालोला वर्त्म गत्वातिमर्त्यं द्यामारोहन्मानभाजः सुखेन ॥ शिशुपालवधम् १८.१४ ॥ |
| आक्रम्यैकामग्रपादेन जङ्घामन्यामुच्चैराददानः करेण । संस्थितस्वानं दारुवद्दारुणात्मा कञ्चिन्मध्यात्पाटयामास दन्ती ॥ शिशुपालवधम् १८.५१ ॥ |
| आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनं सन्तोषो धनलिप्सया शममुखं प्रौढाङ्गना-विभ्रमैः। लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतयोऽप्यपहता ग्रस्तं न किं केन वा॥॥ वैराग्यशतकम् ३२ ॥ |
| आक्षिप्तचापावरणेषुजालश्छिन्नोत्तमासिः स मृधेऽवधूतः । रिक्तः प्रकाशश्च बभूव भूमेरुत्सादितोद्यान इव प्रदेशः ॥ किरातार्जुनीयम् १७.५९ ॥ |
| आक्षिप्तसम्पातमपेतशोभं उद्वह्नि धूमाक्कुलदिग्विभागं । वृतं नभो भोगिकुलैरवस्थां परोपरुद्धस्य पुरस्य भेजे ॥ किरातार्जुनीयम् १६.४१ ॥ |
| आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालूनसटं मृगेन्द्रम् । त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिं ॥ किरातार्जुनीयम् ३.५० ॥ |
| आक्षेपस्तु प्रयुक्तस्य प्रतिषेधो विचारणात् । चन्द्र संदर्शयात्मानमथवास्ति प्रियामुखम् ॥ चन्द्रालोकः ५.७२ ॥ |
| आखण्डलो दण्डधरः कृशानुः पाशीति नाथैः ककुभां चतुर्भिः । भैम्येव बद्ध्वा स्वगुणेन कृष्टैः स्वयंवरे तत्र गतं न शेषैः ॥ नैषधीयचरितम् १०.१ ॥ |
| आख्यातुमक्षिव्रजसर्वपीतां भैमीं तदेकाङ्गनिखातदृक्षु । गाथासुधाश्लेषकलाविलासैरलंचकाराननचन्द्रमिन्द्रः ॥ नैषधीयचरितम् १०.१३३ ॥ |
| आख्याते भिन्नदेशत्वे कार्यहेत्वोरसंगतिः । त्वद्भक्तानां नमत्यङ्गं भङ्गमेति भवक्लमः ॥ चन्द्रालोकः ५.७९ ॥ |
| आगच्छतोऽनूचिगजस्य घण्डयोः स्वनं समापकर्ण्य समाकुलाङ्गनाः । दूरापवर्तितभारवाहणाः पथोऽपसस्रुस्त्वरितं चमूचराः ॥ शिशुपालवधम् १२.३४ ॥ |
| आगच्छदुर्विन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः । विस्पष्टमाचष्ट हरिद्वधूनां रूपं पतित्यागदशानुरूपम् ॥ नैषधीयचरितम् १०.९ ॥ |
| आगच्छन्भणतामुषाः क्षाणमथातिथ्यं दृशोरानशे स्वर्गङ्गाम्बुनि बन्दिनी कृतदिनारम्भाप्लुतिर्भूपतिः । आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतके प्राप्तं तैरवरागतैरविदितप्रासादतो निर्गमः ॥ नैषधीयचरितम् १९.६७ ॥ |
| आगताद्व्यवसितेन चेतसा सत्त्वसम्पदविकारिमानसः । तत्र नाभवदसौ महाहवे शात्रवादिव पराङ्मुखोऽर्थिनः ॥ शिशुपालवधम् १४.४४ ॥ |
| आगतानगणितप्रतियातान्वल्लभानभिसिसारयिषूणां । प्रापि चेतसि सविप्रतिसारे सुभ्रुवामवसरः सरकेण ॥ शिशुपालवधम् १०.२० ॥ |
| आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वर- ज्यानिर्घोषममन्दुन्दुभिरवैराध्मातमुज्जृम्भयन् । वेल्लद्भैरवरुण्डखण्डनिकरैर्वीरो विधत्ते भुवं तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव ॥ (उत्तररामचरितम् ५.६) |
| आगश्शतं विदधतोऽपि समिद्धकामा नाधीयते परुषामक्षरमस्य वामाः । चान्द्री न तत्र हरमौलिशयालुरेकानध्यायहेतुतिथिकेतुरपैति लेखा ॥ नैषधीयचरितम् ११.९२ ॥ |
| आग्नेयत्वाष्ट्रजलपपित्र्यवासवरौद्रभे । मूलब्राह्माजपादर्क्षे पित्र्यमूलाजभे क्रमात् ॥ मुहूर्त.यात्राप्रकरणम् २८॥ |
| आघट्टयामास गतागताभ्यां सावेगमग्राङ्गुलिरस्य तूणौ । विधेयमार्गे मतिरुत्सुकस्य नयप्रयोगाविव गां जिगीषोः ॥ किरातार्जुनीयम् १७.३८ ॥ |

| |
|---|
| आघूर्णितं पक्ष्मलमक्षिपद्मं प्रान्तद्युतिश्वैत्यजितामृतांशु । अस्या इवास्याश्चलदिन्द्रनीलगोलामलश्यामलतारतारम् ॥ नैषधीयचरितम् ७.२९ ॥ |
| आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितविवृत्तलोचनेन । सम्पृक्तं वनकरिनां मदाम्बुसेकैर्नाचेमे हिमं अपि वारि वारणेन ॥ किरातार्जुनीयम् ७.३४ ॥ |
| आचूडाग्रममज्जयज्जयपटुर्यच्छल्यदण्डानयं संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान् । सा सेवास्य पृथुः प्रसीदति तया नास्मै कुतस्त्वत्कुचस्पर्धागर्धिषु तेषु तान्धृतवते दण्डान्प्रदण्डानपि ॥ नैषधीयचरितम् १२.४ ॥ |
| आच्छादितायतदिगम्बरमुच्चकैर्गा- माक्रम्य संस्थितमुदग्रविशालशृङ्गम् । मूर्ध्निस्खलत्तुहिनदीधितिकोटिमेन- मुद्वीक्ष्य को भुवि न विस्मयते नगेशम् ॥ शिशुपालवधम् ४.१९॥ |
| आच्छाद्य पुष्पपटमेव महान्तमन्त- रावर्तिभिर्गृहकपोतशिरोधराभैः । शस्वङ्गानि धूमरुचिमागुरवीं दधानै- र्धूपायतीव पटलैर्नीरदानां ॥ शिशुपालवधम् ४.५२॥ |
| आच्छिद्य योधसार्थस्य प्राणसर्वस्वमाशुगाः । ऐकागारिकवद्भूमौ दूराज्जग्मुरदर्शनं ॥ शिशुपालवधम् १९.१११ ॥ |
| आजिघ्रति प्रणतमूर्धनि बाहलजेऽश्वे तिस्याङ्गसङ्गमसुखानुभवोत्सुकायाः । नासाविरोकपवनोल्लसितं तनीयो रोमाञ्चतामिव जगाम रजः पृथिव्याः ॥ शिशुपालवधम् ५.५४ ॥ |
| आज्ञया च पितुरज्ञभिया च श्रीरहीयत महीप्रभवा द्विः । लङ्घितश्च भवता किमु नद्विर्वारिराशिरुदकाङ्कगलङ्कः ॥ नैषधीयचरितम् २१.७२ ॥ |
| आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च । येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ नीतिशतकम्४८ ॥ |
| आज्ञां तदीयामनु कस्य नाम नकारपारुष्यमुपैतु जिह्वा । प्रह्वा तु तां मूर्ध्नि विधाय मालां बालापराध्यामि विशेषवाग्भिः ॥ नैषधीयचरितम् ६.९२ ॥ |
| आज्ञापय ज्ञातविशेष ! पुंसां लोकेषु यत्ते करणीयमस्ति । अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते ॥ कुमारसंभवम् ३.३॥ |
| आज्यं तिलौदनं मत्स्यं पयश्चापि यथाक्रमम् । भक्षयेद्दोहदं दिश्यमाशां पूर्वादिकां व्रजेत् ॥ मुहूर्त.यात्राप्रकरणम् ८६॥ |
| आततज्यमकरोत्स संसदा विस्मयस्तिमितनेत्रमीक्षितः । शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः ॥ रघुवंशम् ११.४५ ॥ |
| आतन्वद्भिर्दिक्षु पत्राग्रनादं प्राप्तैर्दूरादाशु तीक्ष्णैर्मुखाग्रैः । आदौ रक्तं सैनिकानामजीवैर्जीवैः पश्चात्पत्त्रिपूगैरपायि ॥ शिशुपालवधम् १८.७४ ॥ |
| आतपात्ययसंक्षिप्तनीवारासु निषादिभिः । मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥ रघुवंशम् १.५२ ॥ |
| आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन । सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यं ॥ किरातार्जुनीयम् ९.३० ॥ |
| आताम्राभा रोषभाजः कटान्तादाशूत्खाते मार्गणे धूर्गतेन । निश्च्योतन्ती नागराजस्य जज्ञे दानस्याहो लोहितस्येव धारा ॥ शिशुपालवधम् १८.४२ ॥ |
| आतुर्यमासप्तमं च यथेष्टैरष्टमादिभिः । समासः स्यात्पदैर्न स्यात्समासः सर्वथापि च ॥ चन्द्रालोकः६.२१ ॥ |
| आत्मनीनमुपतिष्ठते गुणाः सम्भवन्ति विरमन्ति चापदः । इत्यनेकफलभाजि मा स्म भूदर्थिता कथं इवार्यसंगमे ॥ किरातार्जुनीयम् १३.६९ ॥ |
| आत्मनैव गुणदोषकोविदः किं न वेत्सि करणीयवस्तुषु । यत्तथापि न गुरून्नपृच्छसि त्वं क्रमोऽयमिति तत्र कारणं ॥ शिशुपालवधम् १४.५४ ॥ |
| आत्मन्यस्य समुच्छ्रितीकृतगुणस्याहोतरामौचिती यद्गात्रान्तरवर्जनादजनयद्भूजानिरेष द्विषाम् । भूयोऽहं क्रियते स्म येन च हृदा स्कन्धो न यश्चानमत्तन्मर्माणि दलंदलं समिदलंकर्मीणबाणव्रजः ॥ नैषधीयचरितम् १२.८३ ॥ |
| आत्मलाभपरिणामनिरोधैर्भूतसंघ इव न त्वमुपेतः । तेन सर्वभुवनातिग लोके नोपमानमसि नाप्युपमेयः ॥ किरातार्जुनीयम् १८.३४ ॥ |
| आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी । हरोपयाने त्वरिता बभूव, स्त्रीणां प्रियालोकफलो हि वेषः॥ कुमारसंभवम् ७.२२॥ |
| आत्मानमेव जलधेः प्रतिबिम्बिताङ्गं ऊर्मौ महत्यभिमुखापातितं निरीक्ष्य । क्रोधादधावदपभीरभिहन्तुमन्य-नागाभियुक्त इव युक्तमहो महेभः ॥ शिशुपालवधम् ५.३२ ॥ |
| आत्मैव तातस्य चतुर्भुजस्य जातश्चतुर्दोरुचितः स्मरोऽपि । च्चापयोः कर्णलते भ्रुवोर्ज्ये वंशत्वगंशौ चिपिटे किमस्याः ॥ नैषधीयचरितम् ७.६५ ॥ |
| आदत्त दीप्रं मणिमम्बरस्य दत्त्वा यदस्मै खलु सायधूर्तः । रज्यत्तुषारद्युतिकूटहेम तत्पाण्डु जातं रजतं क्षणेन ॥ नैषधीयचरितम् २२.५२ ॥ |
| आदधीचि किल दातृकृतार्घ प्राणमात्रपणसीम यशो यत् । आददे कथमहं प्रियया तत् प्राणतः शतगुणेन पणेन ॥ नैषधीयचरितम् ५.१११ ॥ |
| आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः । आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥ नैषधीयचरितम् ३.५६ ॥ |
| आदर्शदृश्यत्वमपि श्रितोऽयमादर्शदृश्यां न बिभर्ति मूर्तिम् । त्रिनेत्रभूरप्ययमत्रिनेत्रादुत्पादमासादयति स्म चित्रम् ॥ नैषधीयचरितम् २२.७५ ॥ |
| आदर्शाञ्जनधौतवस्त्ररजका मीनाज्यसिंहासनं । शावं रोदनवर्जितं ध्वजमधुच्छागास्त्रगोरोचनम् । भारद्वाजनृयानवेदनिनदा माङ्गल्यगीताङ्कुशा दृष्टाः सत्फलदाः प्रयाणसमये रिक्तो घटः स्वानुगः ॥ मुहूर्त.यात्राप्रकरणम् १०१॥ |
| आदातुं दयितमिवावगाढमारादूर्मीणां ततिभिरभिप्रसार्यमाणः । कस्याश्चिद्विततचलच्छिखाङ्गुलीको लक्ष्मीवान्सरसि रराज केशहस्तः ॥ शिशुपालवधम् ८.२७ ॥ |
| आदाय दण्डं सकलासु दिक्षु योऽयं परिभ्राम्यति भानुभिक्षुः । अब्धौ निमज्जन्निव तापसोऽयं संध्याभ्रकाषायमधत्त सायम् ॥ नैषधीयचरितम् २२.१२ ॥ |
| आदितामजननाय देहिनामन्ततां च दधतेऽनपायिने । बिभ्रते भुवमधः सदाथ च ब्रह्मणोऽप्युपरि तिष्ठते नमः ॥ शिशुपालवधम् १४.६५ ॥ |
| आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहु-कार्य-भार-गुरुभिः कालोऽपि न ज्ञायते। दृष्ट्वा जन्म-जरा-विपत्ति-मरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमाद-मदिरामुन्मत्त-भूतं जगत्॥॥ वैराग्यशतकम् ४३ ॥ |

| |
|---|
| आदित्यस्य गतागतैरहरहः संक्षेयीते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते । दृष्ट्वा जन्मजराविपत्तिमरणत्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ पुरुषार्थोपदेशः-16॥ |
| आदृता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः । सौकुमार्यगुणसम्भृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥ किरातार्जुनीयम् ९.४९ ॥ |
| आदृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति । दत्तैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्मिन्क्षणे मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम् ॥ अमरुशतकम्-७४॥ |
| आदेशितामप्यवलोक्य मन्दं मन्दं नलस्यैव दिशा चलन्तीम् । भूयः सुरानर्धपथादथासौ तानेव तां नेतुमना नुनोद ॥ नैषधीयचरितम् १४.३८ ॥ |
| आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम् । त्वदङ्गशिल्पात्पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥ नैषधीयचरितम् ८.४३ ॥ |
| आदौ सम्पूज्य रत्नादिभिरथ गणकं वेदयेत्स्वस्थचित्तं कन्योद्वाहं दिगीशानलहयविशिखे प्रश्नलग्नाद्यदीन्दुः । दृष्टो जीवेन सद्यः परिणयनकरो गोतुलाकर्कटाख्यं वा स्यात्प्रश्नस्य लग्नं शुभखचरयुतालोकितं तद्विदध्यात् ॥ मुहूर्त.विवाहप्रकरणम् २॥ |
| आद्यं रजः शुभं माघमार्गराधेषफाल्गुने । ज्येष्ठश्रावणयोः शुक्ले सद्वारे सत्तनौ दिवा ॥ मुहूर्त.संस्कारप्रकरणम् १ ॥ |
| आद्यं विधोर्जन्म स एष भूमौ द्वैतं युवासौ रतिवल्लभस्य । नासत्ययोर्मूर्तितृतीयतायमिति स्तुतस्तैः कृतमत्सरैः सः ॥ नैषधीयचरितम् १०.४२ ॥ |
| आद्यकोलतुलितां प्रकम्पनैः कम्पितां मुहुरनीदृगात्मनि । वाचिरोपितवतामुना महीं राजकाय विषया विभेजिरे ॥ शिशुपालवधम् १४.४३ ॥ |
| आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौ करग्रहः । नोचितोऽथ विबुधैः प्रशस्यते चेद् द्वितीयजनुषोः सुतप्रदः ॥ मुहूर्त.विवाहप्रकरणम् १४॥ |
| आद्ये पिता नाशमुपैति मूल पादे द्वितीये जननी तृतीये । धनं चतुर्थोऽस्य शुभोऽथ शान्त्या सर्वत्र सत्स्यादहिभे विलोमम् ॥ मुहूर्त.नक्षत्रप्रकरणम् ५५ ॥ |
| आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यान्ते विगलितशुचा या मयोन्मोचनीया स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं गण्डाभोगात्कठिनविषमादेकवेणीं करेण ॥ मेघदूतम्, उत्तरमेघः २२ ॥ |
| आद्येऽपशकुने स्थित्वा प्राणानेकादश व्रजेत् । द्वितीये षोडश प्राणांस्तृतीये न क्वचिद्व्रजेत् ॥ मुहूर्त.यात्राप्रकरणम् १०८॥ |
| आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् । कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदमाश्रमपादपानाम् ॥ रघुवंशम् ५.६ ॥ |
| आधावन्तः सम्मुखं धारितानामन्यैरन्ये तीक्ष्णकौक्षेयकाणां । वक्षःपीठैरात्सरोरात्मनैव क्रोधेनान्धाः प्रविशन्पुष्कराणि ॥ शिशुपालवधम् १८.१७ ॥ |
| आधिक्षामां विरहशयने संनिकीर्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः मत्संयोगः कथमुपनमेत्स्वप्नजोऽपीति निद्रामाकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥ मेघदूतम्, उत्तरमेघः २४ ॥ |
| आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः। जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम्॥॥ वैराग्यशतकम् ३३ ॥ |
| आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान्सरयूतरङ्गान् । तं क्लान्तसैन्यं कुलराजधान्याः प्रत्युज्जगामोपवनान्तवायुः ॥ रघुवंशम् १६.३६ ॥ |
| आधोरणानां गजसंनिपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः । हतान्यपि आयेननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ॥ रघुवंशम् ७.४६ ॥ |
| आध्राय श्रमजमनिन्द्यबन्धुं निश्वासश्वसनमसक्तमङ्गनानां । आरण्याः सुमनस ईषिरे न भृङ्गैरौचित्यं गणयति को विशेषकामः ॥ शिशुपालवधम् ८.१० ॥ |
| आननेन शशिनः कलां दधद्दर्शनक्षयितकामविग्रहः । आप्लुतः स विमलैर्जलैरभूदष्टमूर्तिधरमूर्तिरष्टमी ॥ शिशुपालवधम् १४.१८ ॥ |
| आननैर्विचकसे हृषिताभिर्वल्लभानभि तनूभिरभावि । आर्द्रतां हृदयमाप च रोषो लोलति स्म वचनेषु वधूनां ॥ शिशुपालवधम् १०.३६ ॥ |
| आनन्दं दधति मुखे करोदकेन श्यामाया दयिततमेन सिच्यमाने । ईर्ष्यन्त्या वदनमसिक्तमप्यनल्पस्वेदाम्बुस्नपितमजायतेतरस्याः ॥ शिशुपालवधम् ८.३६ ॥ |
| आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद । गङ्गासरय्वोर्जलं उष्णत्पतं हिमाद्रिनिस्यन्द इवावतीर्णः ॥ रघुवंशम् १४.३ ॥ |
| आनन्दजाश्रुभिरनुस्रियमाणमार्गान्प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान् । चक्रे स चक्रनिभचङ्क्रमणच्छलेन नीराजनां जनयतां निजबान्धवानाम् ॥ नैषधीयचरितम् १.१४४ ॥ |
| आनन्दयेन्द्रमथ मन्मथमग्नमग्निं केलीभिरुद्धर तनूदरि नूतनाभिः । आसादयोदितदयं शमने मनो वा नो वा यदीत्थमथ तद्वरुणं वृणीथाः ॥ नैषधीयचरितम् ८.१०८ ॥ |
| आनन्दाख्यः कालदण्डश्च धूम्रो धाता सौम्यो ध्वांक्षकेतू क्रमेण । श्रीवत्साख्यो वज्रकं मुद्गरश्च छत्रं मित्रं मानसं पद्मलुम्बौ ॥ मुहूर्तचिन्त.२३ ॥ |
| आनाभेः सरसि नतभ्रुवावगाढे चापल्यादथ पयसस्तरङ्गहस्तैः । उच्छ्रायिस्तनयुगमध्यरोहि लब्धस्पर्शानां भवति कुतोऽथवाव्यवस्था ॥ शिशुपालवधम् ८.२२ ॥ |
| आपतन्तममुन्दूरादूरीकृतपराक्रमः । बलोऽवलोकयामास मातङ्गमिव केसरी ॥ शिशुपालवधम् १९.२ ॥ |
| आपत्सु मित्रं जानीयाद्रणे शूरमृणे शुचिम् । भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ नीतिसंग्रहस्य मित्र-१.७३ ॥ |
| आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ नीतिसंग्रहस्य मित्र-१.४२ ॥ |
| आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् । मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥ नीतिसंग्रहस्य मित्र-१.३० ॥ |
| आपस्कारात्लूनगात्रस्य भूमिं निःसाधारं गच्छतोपाङ्मुखस्य । लब्धायामं दन्तयोर्युग्ममेव स्वं नागस्य प्रापदुत्तम्भनत्वं ॥ शिशुपालवधम् १८.४६ ॥ |

| |
|---|
| आपिञ्जरा बद्धरजःकणत्वान्मञ्जर्युदाराशुशुभेऽर्जुनस्य । दग्ध्वापि देहं गिरिशेन रोषात्खण्डीकृता ज्येव मनोभ्वस्य ॥ रघुवंशम् १६.५१ ॥ |
| आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः । उभावलंचक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥ रघुवंशम् २.१८ ॥ |
| आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम् वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु । काले काले भवति भवतो यस्य संयोगमेत्य स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्॥ मेघदूतम्, पूर्वमेघः १२॥ |
| आप्तकाम सृजसि त्रिजगत्किं किं भिनत्सि यदि निर्मितमेव । पासि चेदमवतीर्य मुहुः किं स्वात्मनापि यदवश्यविनाश्यम् ॥ नैषधीयचरितम् २१.१०६ ॥ |
| आप्यायनाद्वा रुचिभिः सुधांशोः शैत्यात्तमःकाननजन्मनो वा । यावन्निशायामथ घर्मदुःस्थस्तावद्व्रजत्यह्नि न शब्दपान्थः ॥ नैषधीयचरितम् २२.११ ॥ |
| आबद्धप्रचुरपरार्घ्यकिङ्किणीको रामाणामनवरतोदगाहभाजां । नारावं व्यतनुत मेखलाकलापः कस्मिन्वा सजलगुणे गिरां पटुत्वं ॥ शिशुपालवधम् ८.४५ ॥ |
| आबाधामरणभयार्चिषा चिराय प्लुष्टेभ्यो भव महता भवानलेन । निर्वाणं समुपगमेन यच्छते ते बीजानां प्रभव नमोऽस्तु जीवनाय ॥ किरातार्जुनीयम् १८.३९ ॥ |
| आभजन्ति गुणिनः पृथक्पृथक्पार्थ सत्कृतिमकृत्रिमाममी । एक एव गुणवत्तमोऽथवापूज्य इत्ययमपीष्यते विधिः ॥ शिशुपालवधम् १४.५७ ॥ |
| आभिर्मृगेन्द्रोदरि कौमुदीभिः क्षीरस्य धाराभिरिव क्षाणेन । अक्षालि नीली रुचिरम्बरस्था तमोमयीयं रजनीरजक्या ॥ नैषधीयचरितम् २२.११३ ॥ |
| आभ्यां कुचाभ्यामिभकुम्भयोः श्रीरादीयतेऽसावनयोर्न ताभ्याम् । भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ॥ नैषधीयचरितम् ७.७८ ॥ |
| आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्भूतग्रथितरजांसि पङ्कजानि । कान्तानां गगननदीतरङ्गशीतः संतापं विरमयति स्म मातरिश्वा ॥ किरातार्जुनीयम् ७.१० ॥ |
| आमूलान्तात्सायकेनायतेन स्यूते बाहौ मण्डुकश्लिष्टमुष्टेः । प्रप्यासह्यां वेदनामस्तधैर्यादप्यभ्रश्यच्चर्म नान्यस्य पाणेः ॥ शिशुपालवधम् १८.२१ ॥ |
| आमृशद्भिरभितो वलिवीचिर्लोलमानविततांङ्गुलिहस्तैः । सुभ्रुवामनुभवात्प्रतिपेदे मुष्टिमेयमिति मध्यमभीष्टैः ॥ शिशुपालवधम् १०.५९ ॥ |
| आमृष्टस्तिलकरुचः स्रजो निरस्ता नीरक्तं वसनमपाकृतोङ्गरागः । कामः स्त्रीरनुशायवानिव स्वपक्षव्याघाताददिति सुतरां चकार चारूः ॥ शिशुपालवधम् ८.६१ ॥ |
| आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य । उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः॥ कुमारसंभवम् १.५ ॥ |
| आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु । व्यामृष्टपत्त्रतिलकेषु विलासिनीनां शोभां बबन्ध वदनेषु मदावशेषः ॥ किरातार्जुनीयम् ९.७७ ॥ |
| आमरणान्ताः प्रणयाः कोपाश्च क्षणभङ्गुराः । परित्यागाश्च निःसङ्गा न भवन्ति महात्मनाम् ॥ नीतिसंग्रहस्य मित्र-१.१८१ ॥ |
| आयताङ्गुलिरभूदतिरिक्तः सुभ्रुवां क्रशिमशालिनि मध्ये । श्रोणिषु प्रियकरः पृथुलासु स्पर्शमाप सकलेन तलेन ॥ शिशुपालवधम् १०.६५ ॥ |
| आयन्तीनामविरतरयंराजकानीकिनीना- मित्थं सैन्यैः सममलघुभिः श्रीपतेरूर्मिमद्भिः । आसीदोघैर्मुहुरिव महद्वारिधेरापगानां दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजां ॥ शिशुपालवधम् १८.८० ॥ |
| आयस्तः सुरसरिदोघरुद्धवर्त्मा सम्प्राप्तुं वनगजदानगन्धि रोधः । मूर्धानं निहितशिताङ्कुशं विधुन्वन्यन्तारं न विगणयांचकार नागः ॥ किरातार्जुनीयम् ७.३२ ॥ |
| आयात् स प्रकटयम् बलमत्युदारं कर्तुं समर्थ इह यो व्रतमासिधारम् । क्रीडास्थलीय किल यः समरस्थली स्यात्, किं वा विषाद इह यस्य कृते प्रसादः ॥ प्रतापविजयः-१०० ॥ |
| आयात् स प्रबलवानिह साऽभिमानं, कृत्वा स्वदेश-चरणे मृदु-मौलि-दानम् । वक्षः क्षताज्जनितशोणित-बिन्दुभिर्यः, निश्शङ्कमङ्कयतु गौरव-गर्वगानम् ॥ प्रतापविजयः-१०१ ॥ |
| आयाते दयिते मनोरथशतैर्नीत्वा कथंचिद्दिनं वैदग्ध्यापगमाज्जडे परिजने दीर्घां कथां कुर्वति । दष्टास्मीत्यभिधाय सत्वरपदं व्याधूय चीनांशुकं तन्वङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ॥ अमरुशतकम्-७५॥ |
| आयान्त्यां निजयुवतौ वनात्सशङ्कं बर्हाणामपरशिखण्डिनीं भरेण । आलोक्य व्यवदधतं पुरो मयूरं कामिन्यः श्रदधुरनार्जवं नरेषु ॥ शिशुपालवधम् ८.११ ॥ |
| आयामवद्भिः करिणां घटाशतैरधःकृताट्टालसपङ्क्तिरुच्चकैः । दूष्यैर्जितोदग्रगृहाणि सा चमूरतीत्य भूयांसि पुराण्यवर्तत ॥ शिशुपालवधम् १२.६५ ॥ |
| आयासादलघुतरस्तनैः स्वनद्भिः श्रान्तानामविकचलोचनारविन्दैः । अभ्यम्भः कथमपि योषितां समूहैस्तैरुर्वीनिहितचलत्पदं प्रचेले ॥ शिशुपालवधम् ८.१ ॥ |
| आयास्तमैक्षत जनशचटुलाग्रपादं गच्छन्तमुच्चलितचामरचारुमश्वं । नागं पुनर्मृदु सलीलनिमीलिताक्षं सर्वःप्रयः खलु भवतयनुरूपचेष्टः ॥ शिशुपालवधम् ५.६ ॥ |
| आयाहि रे ! रे ! मुगलवंशकलङ्किसुनो! पूर्णोऽद्य मे भगवतः कृपयाऽभिलाषः । दग्धो भव, प्रतप कोवकुशानुमध्ये, श्वासं गृहाण, नु सलीम ! भुवि क्षणार्धम् ॥ प्रतापविजयः-१४४ ॥ |
| आयुः कर्म च वित्तं च विद्या निधनमेव च । पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ नीतिसंग्रहस्य मित्र-०.18 ॥ |
| आयुः कल्लोललोलं कतिपयदिवसस्थयिनी यौवनश्रीर् अर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः। कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥ पुरुषार्थोपदेशः-94॥ |
| आयुः कल्लोल-लोलं कतिपय-दिवस-स्थायिनी यौवन-श्रीरर्थाः सङ्कल्प-कल्पा घन-समय-तडिद्-विभ्रमा भोग-पूगाः। कण्ठाश्लेषोपगूढ तदपि च न चिरं यत्प्रियाभः प्रणीतं ब्रह्मण्यासक्त-चित्ता भवत भवमयाम्भोधि-पारं तरीतुम्॥॥ वैराग्यशतकम् ३६ ॥ |
| आयुर्वर्ष-शतं नृणां परिमितं रात्रौ तदर्धं गतं तस्यार्धस्य परस्य चार्धमपरं बालत्व-वृद्धत्वयोः। शेषं व्याधि-वियोग-दुःख-सहितं सेवादिभिर्नीयते जीवे वारित-रङ्ग-चञ्चलतरे सौख्यं कुतः प्राणिनाम्॥॥ वैराग्यशतकम् ४९ ॥ |

| |
|---|
| आयुष्मतः किल लवस्य नरेन्द्रसैन्यै- रायोधनं ननु किमात्थ ? सखे ! तथेति । अद्यास्तमेतु भुवनेषु च राजशब्दः क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥ (उत्तररामचरितम् ६.१६) |
| आयो वारोंऽशको द्रव्यमृणमृक्षं तिथिर्युतिः । आयुश्चाथ गृहेशर्क्षं गृहभैक्यं मृतिप्रदम् ॥ मुहूर्त.वास्तुप्रकरणम् १२॥ |
| आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिम् । धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्त्रसाराम् ॥ रघुवंशम् ६.४२ ॥ |
| आरक्षमग्नमवमत्य सृणिं शिताग्रं एकः पलायत जवेन कृतार्तनादः । अन्यः पुनर्मुहुरुदप्लवतास्तभारमन्योन्यतः पथि बताबिभातमिभोष्ट्रौ ॥ शिशुपालवधम् ५.५ ॥ |
| आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये घटे । राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भोः! विस्मयः (प्रतिमानाटकम् १.५) |
| आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् । दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ नीतिशतकम्६० ॥ |
| आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेर्विश्वसहोऽधिजज्ञे । पातुं सहो विश्वसखः समग्रां विश्वंभरामात्मजमूर्तिरात्मा ॥ रघुवंशम् १८.२४ ॥ |
| आराध्यैवं शरवणभुवं देवमुल्लङ्घिताध्वा सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः । व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ मेघदूतम्, पूर्वमेघः ४५॥ |
| आरूढं अद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टं । ऊर्ध्वं गतं यस्य न चानुबन्धि यशः परिच्छेत्तुमियत्तयालम् ॥ रघुवंशम् ६.७७ ॥ |
| आरूढः पतित इति स्वसम्भवोऽपि स्वच्छानां परिहरणीयतामुपैति । कर्णेभ्यश्च्युतमसितोत्पलं वधूनां वीचिभिस्तटमनु यन्निरासुरापः ॥ शिशुपालवधम् ८.५४ ॥ |
| आरोढुः समवनतस्य पीतशेषे साशङ्कं पयसि समीरिते करेण । संमार्जन्नरुणमदस्रुती कपोलौ सस्यन्दे मद इव शीकरः करेणोः ॥ किरातार्जुनीयम् ७.३३ ॥ |
| आरोप्यते चेदिह केतकत्वमिन्दौ दलाकारकलाकलापे । तत्संवदत्यङ्कमृगस्य नाभिकस्तूरिका सौरभवासनाभिः ॥ नैषधीयचरितम् २२.८६ ॥ |
| आरोहणाय तव सज्ज इवास्ति तत्र सोपानशोभिवपुरश्मवलिच्छटाभिः । भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धिक्षुब्धाचलः कनककेतकगोत्रगात्रि ॥ नैषधीयचरितम् ११.६१ ॥ |
| आर्द्रत्वदतिशायिनीमुपेयिवद्भिः संसक्तिं भृशमपि भूरिशोवधूतैः । अङ्गेभ्यः कथमपि वामलोचनानां विश्लेषो बत नवरक्तकैः प्रपेदे ॥ शिशुपालवधम् ८.६७ ॥ |
| आर्ये विचार्यालमिहेति कापि योग्यं सखि स्यादिति काचनायि । ओंकार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काप्यवोचत् ॥ नैषधीयचरितम् ६.८७ ॥ |
| आलम्बनोद्दीपनात्मा विभावः कारणं द्विधा । कार्योऽनुभावो भावश्च सहायो व्यभिचार्यपि ॥ चन्द्रालोकः६.१ ॥ |
| आलम्ब्याङ्गणवाटिकापरिसरे चूतद्रुमे मञ्जरीं सर्पत्सान्द्रपरागलम्पटरटद्भृङ्गाङ्गनाशोभिनीम् । मन्ये स्वां तनुमुत्तरीयशकलेनाच्छाद्य बाला स्फुरत्- कण्ठध्वाननिरोधकम्पितकुचश्वासोद्गमा रोदिति ॥ अमरुशतकम्-७६॥ |
| आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः । नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ नीतिशतकम्८६ ॥ |
| आलापैस्तुलितरवाणि माधवीनां माधुर्यादमलपतत्रिणां कुलानि । अन्तर्धामुपययुरुत्पलावलीषु प्रादुष्कात्क इव जितः पुरः परेण ॥ शिशुपालवधम् ८.१२ ॥ |
| आलिख्य सख्याः कुचपत्रभङ्गीमध्ये सुमध्या मकरीं करेण । यत्रालपत्तामिदमालि यानं मन्ये त्वदेकावलिनाकनद्याः ॥ नैषधीयचरितम् ६.६९ ॥ |
| आलिङ्गितः कमलवत्करकस्त्वयाऽयं श्यामः सुमेरुशिस्वयेव नवः पयोदः । कन्दर्पमूर्धरुहमण्डनचम्पकस्रग्दामत्वदङ्गरुचिकञ्चुकितश्चकास्तु ॥ नैषधीयचरितम् ११.९८ ॥ |
| आलिमात्मसुभगत्वसगर्वा कापि शृण्वति मघोनि बभाषे । वीक्षणेऽपि सघृणासि नृणां किं यासि न त्वमपि सार्थगुणेन ॥ नैषधीयचरितम् ५.५४ ॥ |
| आलोकतृप्तीकृतलोक यस्त्वामसूत पीयूषमयूखमेनम् । कः स्पर्धितुं धावति साधु सार्धमुदन्वता नन्वयमन्ववायः ॥ नैषधीयचरितम् ८.३ ॥ |
| आलोकमाना वरलोकलक्ष्मीं तात्कालिकीमप्सरसो रसोत्काः । जनाम्बुधौ यत्र निजाननानि वितेनुरम्भोरुहकाननानि ॥ नैषधीयचरितम् १०.५५ ॥ |
| आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः । बद्धुं न संभावित एव तावत्करेण रुद्धोऽपि हि केशपाशः ॥ रघुवंशम् ७.६ ॥ |
| आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः। बद्धुं न संभावित एव तावत्करेण रुद्धोऽपि च केशपाशः॥ कुमारसंभवम् ७.५७॥ |
| आलोकयामास हरिर्महीधरानधिश्रयन्तीर्गजताः परःशताः । उत्पातवातप्रतिकूलपातिनीरुपत्यकाभ्यो बृहतीः शिला इव ॥ शिशुपालवधम् १२.५० ॥ |
| आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती पृच्छन्ती वा मधुरवचनां शारिकां पञ्जरस्थां कच्चिद्भर्तुः स्मरसि निभृते त्वं हि तस्य प्रियेति ॥ मेघदूतम्, उत्तरमेघः १९ ॥ |
| आलोक्य प्रियतममंशुके विनीवौ यत्तस्थे नामितमुखेन्दु मानवत्या । तन्नूनं पदमवलोकयांबभूवे मानस्य द्रुतमपयानमास्थितस्य ॥ शिशुपालवधम् ९.८४ ॥ |
| आलोक्य भाविविधिकर्तृकलोकसृष्टिकष्टानि रोदिति पुरा कृपयैव रुद्रः । नामेच्छयेति मिषमात्रमधत्त यत्तां संसारतारणतरीमसृजत्पुरीं सः ॥ नैषधीयचरितम् ११.११५ ॥ |
| आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या । निदाघकालोल्वणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या॥ कुमारसंभवम् ७.८४॥ |

| |
|---|
| आलोलपुष्करमुखोल्लसितैरभीक्ष्ण-मुक्षांबभूवुरभितोवपुरम्बुवर्षैः । स्वेदायत श्वसितनिरस्तवेगमुग्ध-मूर्धन्यरत्ननिकरैरिव हास्तिकानि ॥ शिशुपालवधम् ५.३० ॥ |
| आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं किञ्चिन्मृष्टविशेषकं तनुतरैः खेदाम्भसां शीकरैः । तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥ अमरुशतकम्- ३॥ |
| आवर्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् । पर्याप्तपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव ॥ कुमारसंभवम् ३.५४॥ |
| आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः । वन्यैः पुलिन्दैरिव वानरैस्ताः क्लिश्यन्त उद्यानलता मदीयाः ॥ रघुवंशम् १६.१९ ॥ |
| आवर्तशोभा नतनाभिकान्तेर्भङ्ग्यो भ्रुवां द्वन्द्वचराःस्तनानां । जातानि रूपावयवोपमानान्यदूरवर्तीनि विलासिनीनां ॥ रघुवंशम् १६.६३ ॥ |
| आवर्तिनः शुभफलप्रदशुक्तियुक्ताः संपन्नदेवमणयो भृतरन्ध्रभागाः । अश्वाः प्यधुर्वसुमतीमतिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापततन्तः ॥ शिशुपालवधम् ५.४ ॥ |
| आवृण्वतो लोचनमार्गमाजौ रजोऽन्धकारस्य विजृम्भितस्य । शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद्रुधिरप्रवाहः ॥ रघुवंशम् ७.४२ ॥ |
| आवृतान्यपि निरन्तरमुच्चैर्योषितामुरसिजद्वतयेन । रागिणामित इतो विमृशद्भिः पाणिभिर्जगृहिरे हृदयानि ॥ शिशुपालवधम् १०.५६ ॥ |
| आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः । अमन्दानन्दसन्दोह-स्वच्छन्दास्पद-मन्दिरम् ॥ चन्द्रालोकः ५.३ ॥ |
| आवृत्तवर्णस्तबकं स्तवकन्दाङ्कुरं कवेः । यमकं प्रथमा धुर्य-माधुर्यवचसो विदुः ॥ चन्द्रालोकः ५.८ ॥ |
| आवृत्ते दीपकपदे भवेदावृत्तिदीपकम् । दीप्त्याग्निर्भाति भातीन्दुः कान्त्या भाति रविस्त्विषा ॥ चन्द्रालोकः ५.५४ ॥ |
| आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् । निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥ कुमारसंभवम् ३.१४॥ |
| आशंसितापचितिचारु पुरः सुराणामदेशं इत्यभिमुखं समवाप्य भर्तुः । लेभे परां द्युतिममर्त्यवधूसमूहः सम्भावना ह्यधिकृतस्य तनोति तेजः ॥ किरातार्जुनीयम् ६.४६ ॥ |
| आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरात्व्याजेनागतमावृणोति हसितं न स्पष्टमुद्वीक्षते । मय्यालापवति प्रतीपवचनं सख्या सहाभाषते तस्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदयः ॥ अमरुशतकम्-४२॥ |
| आशयस्य विवृतिः क्रियते किं दित्सुरस्मि हि भवच्चरणेभ्यः । विश्वमित्यभिहितो बलिनास्मान्वामन प्रणतपावन पायाः ॥ नैषधीयचरितम् २१.६५ ॥ |
| आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी । मोहावर्तसुदुस्तरातिहना प्रोक्तुङ्गचिन्तातटी तस्याः पारगता विशुद्वमनसो नन्दन्ति योगीश्वराः ॥ पुरुषार्थोपदेशः-66॥ |
| आशा नाम नदी मनोरथ-जला तृष्णा-तरङ्गाकुला राग-ग्राहवती वितर्क-विहगा धैर्य-द्रुम-ध्वंसिनी। मोहावर्त-सुदुस्तरातिगहना प्रोतुङ्ग-चिन्ता-तटी तस्याः परगता विशुद्धमलसो नन्दन्ति योगीश्वराः॥॥ वैराग्यशतकम् १० ॥ |
| आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते । पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीडं भवतः पितेव ॥ रघुवंशम् ५.३४ ॥ |
| आशीविषेण रदनच्छददंशदानमेतेन ते पुनरनर्थतया न गण्यम् । बाधां विधातुमधरे हि न तावकीने पीयूषसारधटिते घटतेऽस्य शक्तिः ॥ नैषधीयचरितम् ११.२ ॥ |
| आशु कान्तमभिसारितवत्या योषितः पुलकरुद्धकपोलम् । निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या ॥ किरातार्जुनीयम् ९.३८ ॥ |
| आशु लङ्घितवतीष्टकराग्रे नीवीमर्धमुकुलीकृतदृष्ट्या । रक्तवैणिक हताधरतन्त्रीमण्डलक्वणितचारु चुकूजे ॥ शिशुपालवधम् १०.६४ ॥ |
| आश्चर्यमस्य ककुभामवधीनवापदाजानुगादभुजयुगादुदितः प्रतापः । व्यापत्सदाशयविसारितसप्ततन्तुजन्मा चतुर्दश जगन्ति यशःपटश्च ॥ नैषधीयचरितम् ११.१ ॥ |
| आश्च्योतनं नु हरिचन्दनपल्लवानां निष्पीडितेन्दुकरकन्दलजो नु सेकः । आतप्तजीवितमनःपरितर्पणोऽयं सञ्जीवनौषधिरसो हृदि नु प्रसक्तः ॥ (उत्तररामचरितम् ३.११) |
| आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् । फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥ शिशुपालवधम् ३.७१ ॥ |
| आश्लेषलग्नगिरिजाकुचकुङ्कुमेन यः पट्टसूत्रपरिरम्भणशोणशोभः । यज्ञोपवीतपदवीं भजते स शंभोः सेवासु वासुकिरयं प्रसितः सितश्रीः ॥ नैषधीयचरितम् ११.१७ ॥ |
| आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः । निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः ॥ रघुवंशम् १४.५८ ॥ |
| आसंसारं त्रिभुवनमिदं चिन्वतां तात! तद्दृङ् नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा । योऽयं धत्त विषयकरिणीरुढगाढाभिमान क्षीबस्यान्तः करणकरिणः संयमालानलीलाम् ॥ पुरुषार्थोपदेशः-67॥ |
| आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः । किं ग्रहा दिवि न जाग्रति ते ते भास्करस्य कतमस्तुलयास्ते ॥ नैषधीयचरितम् ५.१ ॥ |
| आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियमवमत्य धूर्गतानां । सव्याजं निजकरिणीभिरात्तचित्ताः प्रस्थानं सुरकरिणः कथंचिदीषुः ॥ किरातार्जुनीयम् ७.२४ ॥ |
| आससाद मिथिलां स वेष्टयन्पिडितोपवनपादपां बलैः । प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कान्तपरिभोगमायतम् ॥ रघुवंशम् ११.५२ ॥ |
| आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम् । बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुख मृगं तपोवनम् ॥ रघुवंशम् ११.२३ ॥ |
| आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु शीकरेषु । पयोधरोत्सर्पिषु शीर्यमाणाः संलक्ष्यते न च्छिदुरोऽपि हारः ॥ रघुवंशम् १६.६२ ॥ |

| |
|---|
| आसादितस्य तमसा नियतेर्नियोगा- दाकाङ्क्षतःपुनरपक्रमणेन कालम् । पत्युस्त्वषामिह महौषधयः कलत्र स्थानं परैननभिभूतममूर्वहन्ति ॥ शिशुपालवधम् ४.३४॥ |
| आसादिता तत्प्रथमं प्रसह्य प्रगल्भतायाः पदवीं हरन्ती । सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य ॥ किरातार्जुनीयम् १६.२७ ॥ |
| आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः । विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः ॥ रघुवंशम् १३.२९ ॥ |
| आसीदथर्वा त्रिवलित्रिवेदी मूलाद्विनिर्गत्य वितायमाना । नानाभिचारोचितमेचकश्रीः श्रुतिर्यदीयोदररोमरेखा ॥ नैषधीयचरितम् १०.७५ ॥ |
| आसीदसौ तत्र न कोऽपि भूपस्तन्मूर्तिरूपोद्भवदद्भुतस्य । उल्लेसुरङ्गानि मुदा न यस्य विनद्ररोमाङ्कुरदन्तुराणि ॥ नैषधीयचरितम् १०.१०९ ॥ |
| आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्तिः सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः । वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूयश्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः ॥ नैषधीयचरितम् १२.१८ ॥ |
| आसीद्धर्मपुरे षडङ्गनिगमाध्येतृद्विजैर्मण्डिते ज्योतिर्वित्तिलकफणीन्द्र रचिते भाष्ये कृतातिश्रमः। तज्जातक संहिता गणितकृन्मान्यो महाभूभुजां तर्कालङ्कृतिवेदवाक्यविलसद्बुद्धिः स चिन्तामणिः ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ८॥ |
| आसीद्यथाज्यौतिषमेष गोलः शशी समक्षं चिपिटस्तथोऽभूत् । स्वर्भानुदंष्ट्रायुगयन्त्रकृष्टपीयूषपिण्याकदशावशेषः ॥ नैषधीयचरितम् २२.८७ ॥ |
| आसीद्वरः कण्टकितप्रकोष्टः स्विन्नाङ्गुलिः संववृते कुमारी । वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मओभवस्य ॥ रघुवंशम् ७.२२ ॥ |
| आसीना तटभुवि सस्मितेन भर्त्रा रम्भोरुवतिरुतं सरस्यनिच्छुः । धुन्वाना करयुगमीक्षितुं विलासाञ्शीतालुः सलिलगतेन सिच्यते स्म ॥ शिशुपालवधम् ८.१९ ॥ |
| आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः । वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः शोभां रम्यां त्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ मेघदूतम्, पूर्वमेघः ५२॥ |
| आसुत्राममपासनान्मखभुजां भैम्यैव राजव्रजे तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जामृजा । आत्मानं त्रिदशप्रसादफलताम् पत्ये विधायानया ह्रीरोषापयशःकथानवसरः सृष्टं सुराणामपि ॥ नैषधीयचरितम् १५.९७ ॥ |
| आसुरे लोकवित्रास- विधायिनि महाहवे । युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषं ॥ किरातार्जुनीयम् १५.२८ ॥ |
| आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानां भुवनत्रयस्य । रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे ॥ किरातार्जुनीयम् १८.१८ ॥ |
| आस्कन्दन्कथमपि योषितो न यावद्भीमत्यः प्रियकरधार्यमाणहस्ताः । औत्सुक्यात्त्वरितममूस्तदम्बु तावत्संक्रान्तप्रतिमतया दधाविवान्तः ॥ शिशुपालवधम् ८.१६ ॥ |
| आस्तां तदप्रस्तुतचिन्तयालं मयासि तन्वि श्रमितातिवेलम् । सोऽहं तदागः परिमार्ष्टुकामः किमीप्सितं ते विदधेऽभिधेहि ॥ नैषधीयचरितम् ३.५२ ॥ |
| आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी । तवैव देहं श्रितया श्रियेति नवस्तु वस्तु प्रतिभातिवादः ॥ नैषधीयचरितम् ८.४१ ॥ |
| आस्तिक्यशुद्धमवतः प्रियधर्म धर्मं धर्मात्मजस्य विहितागसि शत्रुवर्गे । सम्प्राप्नुयां विजयमीश यया समृद्ध्या तां भूतनाथ विभुतां वितराहवेषु ॥ किरातार्जुनीयम् १८.४३ ॥ |
| आस्तीर्णतल्परचितावासथः क्षणेन वेशयाजनः कृतनवकर्मकाम्यः । खिन्नानखिन्नमतिरापततो मनुष्यान्प्रत्यग्रहीच्चिरनिविष्ट इवोपचारैः ॥ शिशुपालवधम् ५.२७ ॥ |
| आस्तृतेऽभिनवपल्लवपुष्पैरप्यनारतरताभिरताभ्यः । दीयते स्म शयितुं शयनीये न क्षणः क्षणदयापि वधूभ्यः ॥ शिशुपालवधम् १०.८९ ॥ |
| आस्ते दामदोरीयामियमुदरदरी यावलम्ब्य त्रिलोकी संमातुं शक्नुवन्ति प्रथिमभरवशादत्र नैतद्यशांसि । तामेनां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्मच्छद्मापन्नानितानिद्विपदशनसनाभीनि नाभीपथेन ॥ नैषधीयचरितम् १२.९५ ॥ |
| आस्ते प्रताप इह भारत-भूमि - वीरः हे पान्थ ! हिन्दुरसि चेत्सकृदानतः स्याः । सम्प्रत्यपि प्रतिवदन्निव किन्नु धीरं, धीरं ह्यधीरयति धीर-जनं समीरः ॥ प्रतापविजयः-१५६ ॥ |
| आस्थद्दृष्टेराच्छदं च प्रमत्तो यन्ता यातुः प्रत्यरीभं द्विपस्य । भग्नस्योच्चैर्बर्हभारेण शङ्कोरवव्राते वीक्षणे च क्षणेन ॥ शिशुपालवधम् १८.३० ॥ |
| आस्थां आलम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु । व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥ किरातार्जुनीयम् १५.४ ॥ |
| आस्थितः स्थगितवारिदपङ्क्त्या संध्यया गगनपश्चिमभागः । सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियं ऊहे ॥ किरातार्जुनीयम् ९.९ ॥ |
| आस्फालितं यत्प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत् । वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥ रघुवंशम् १६.१३ ॥ |
| आस्माकी युवतिदृशामसौ तनोति च्छायेव श्रियमनपायिनीं किमेभिः । मत्वैवं स्वगुणपिधानसाभ्यसूयैः पनीयैरिति विदधाविरेऽञ्जनानि ॥ शिशुपालवधम् ८.५० ॥ |
| आस्यं शीतमयूखमण्डलगुणानाकृष्य ते निर्मितं शङ्के सुन्दरि शर्वरीपरिवृढस्तेनैष दोषाकरः । आदायेन्दुमृगादपीह निहिते पश्यामि सारं दृशौ त्वद्वक्त्रे सति वा विधौ धृतिमयं दध्यादनन्धः कुतः ॥ नैषधीयचरितम् २२.१४७ ॥ |
| आस्ये या तव भारती वसति तल्लीलारविन्दोल्लसद्वासे तत्कलवैणनिक्वणमिलद्वाणीविलासामृते । तत्केलिभ्रमणार्हगैरिकसुधानिर्माणहर्म्याधरे तन्मुक्तामणिहार एव किमयं दन्तस्रजौ राजतः ॥ नैषधीयचरितम् २१.१५५ ॥ |
| आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च । अव्याहतैस्स्वैरगतैस्स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥ रघुवंशम् २.५ ॥ |
| आहतं कुचतटेन तरुण्याः साधु सोढममुनेति पपात । त्रुट्यतः प्रियतमोरसि हारात्पुष्पवृष्चटरिव मौक्तिकवृष्टिः ॥ शिशुपालवधम् १०.७४ ॥ |
| आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणाम् । ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ॥ नीतिसंग्रहस्य मित्र-०.16॥ |

| |
|---|
| आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकासं । आबभौ नव इवोद्धतरागः कामिनीष्ववसरः कुसुमेषोः ॥ किरातार्जुनीयम् ९.६९ ॥ |
| इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घ्यपरिग्रहान्ते । पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके ॥ रघुवंशम् १३.७० ॥ |
| इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः । इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननी न तावत् ॥ रघुवंशम् १४.५५ ॥ |
| इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुम्भमयोमुखेन । संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्माम् ॥ रघुवंशम् ५.५५ ॥ |
| इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत् । काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेन्द्राः ॥ रघुवंशम् ६.७१ ॥ |
| इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानाम् । आपुरेव मिथुनानि वियोगं लङ्घ्यते न खलु कालनियोगः ॥ किरातार्जुनीयम् ९.१३ ॥ |
| इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा । सभ्यः सभायां सुहृदास्थितायां तस्थौ वृषाङ्कागमनप्रतीक्षः॥ कुमारसंभवम् ७.२९॥ |
| इज्याऽध्ययनदानानि तपः सत्यं धृतिः क्षमा । अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः  ॥ नीतिसंग्रहस्य मित्र-१.८ ॥ |
| इज्येव देवव्रजभोज्यऋद्धिः शुद्धा सुधादीधितिमण्डलीयम् । हिंसां यथा सैव तथाङ्गमेषा कलङ्कमेकं मलिनं बिभर्ति ॥ नैषधीयचरितम् २२.७६ ॥ |
| इतः परं मान-मतं विचार्य सः, युगान्तकालाग्निसमः समुज्ज्वलन् । समस्त-सामन्तजने- जनेश्वरः समुज्ज्वलद्वह्नि- शिखोपमोऽब्रवीत् ॥ प्रतापविजयः-८८ ॥ |
| इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयासि । एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥ रघुवंशम् ७.६७ ॥ |
| इतः स्वपिति केशवः कुलमितस्तदीयद्विषा- मितश्च शरणार्थिनां शिखरिणां गणाः शेरते । इतोऽपि बडवानलः सह समस्तसंवर्तकै- रहो विततमूर्जितं भरसहं सिन्धोर्वपुः ॥ नीतिशतकम्७७ ॥ |
| इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम् इतो हि शरणार्थिनः शिखरिपक्षिणः शेरते । इतोऽपि बडवानलः सह समस्तसंवर्तको अहो विततमूर्जितं भरवहं च सिन्धोर्वपुः ॥ पुरुषार्थोपदेशः-54॥ |
| इतरनलतुलाभागेष शेषाः सुधाभिः स्नपयति मम चेतो नैषधः कस्य हेतोः । प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये विलसति चरमेऽनुप्रासभासां विलासः ॥ नैषधीयचरितम् १३.५४ ॥ |
| इतरानपि क्षितिभुजोऽनुजन्मनः प्रमनाः प्रमोदपरिफुल्लचक्षुषः । स यथोचितं जनसभाजनोचितः प्रसभोद्धृतासुरसभोऽसभाजयत् ॥ शिशुपालवधम् १३.१४ ॥ |
| इतरेतरत्सन्निकर्षजन्मा गलसंघट्टविकीर्णविस्फुलिङ्गः । पटलानि लिहन्वलाहकानामपरेषु क्षणमज्ज्वलत्कृशानुः ॥ शिशुपालवधम् २०.२६ ॥ |
| इतरेतरानभिभवेन मृगास्तमुपासते गुरुं इवान्तसदः । विनमन्ति चास्य तरवः प्रचये परवान्स तेन भवतेव नगः ॥ किरातार्जुनीयम् ६.३४ ॥ |
| इतस्ततःऽस्मिन्विलसन्ति मेरोः समानवप्रेमणिसानुरागाः । स्त्रियश्च पत्यौ सुरसुन्दरीभिः समा नवप्रेमणिसानुरागाः ॥ शिशुपालवधम् ४.२७॥ |
| इतस्त्रसद्विद्रुतभूभृदुज्झिता प्रियाथ दृष्टा वनमानवीजनैः । शशंस पृष्टाद्भुतमात्मदेशजं शशित्विषः शीतलशीलतां किल ॥ नैषधीयचरितम् १२.२६ ॥ |
| इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिबिम्बः । विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥ किरातार्जुनीयम् ४.३७ ॥ |
| इति कियद्वचसैव भृशं प्रियाधरपिपासु तदाननमाशु तत् । अजनि पांशुलमप्रियवाग्ज्वलन्मदनशोषणबाणहतेरिव ॥ नैषधीयचरितम् ४.१०१ ॥ |
| इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः । समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ॥ रघुवंशम् ३.६९ ॥ |
| इति गदन्तमनन्तरमङ्गना भुजयुगोन्नमनोच्चतरस्तनी । प्रणयिनं रभसादुदरश्रिया वलिभयादलिभयादिव सस्वजे ॥ शिशुपालवधम् ६.१३ ॥ |
| इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेशरेण । श्रवणनियमितेन कान्तमन्या सममसिताम्बुरुहेण चक्षुषा च ॥ शिशुपालवधम् ७.५६ ॥ |
| इति गन्तुमिच्छुमभिधाय पुरः क्षणदृष्टिपातविकसद्वदनां । स्वकरावलम्बनविमुक्तगलत्कलकाञ्चि काञ्चिदरुणत्तरुणः ॥ शिशुपालवधम् ९.८२ ॥ |
| इति चक्रुधे भृशमनेन ननु महदवाप्य विप्रियं । याति विकृतिमपि संवृतिमत्किमु यन्निसर्गनिरवग्रहं मनः ॥ शिशुपालवधम् १५.११ ॥ |
| इति चेदिमहीभृता तदानीं तदनीकं दनुसूनुसूदनस्य । वयसमिव चक्रमक्रियाकं परितोऽरोधि विपाटपञ्चरेण ॥ शिशुपालवधम् २०.१७ ॥ |
| इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त ! किं स्थितम् । तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥ कुमारसंभवम् ४.२७ ॥ |
| इति जोषमवस्थितं द्विषः प्रणिधिं गामभिधाय सात्यकिः । वदति स्म वचोऽथ चोदितश्चलितैकभ्रू रथाङ्गपाणिना ॥ शिशुपालवधम् १६.१६ ॥ |
| इति तं स विसृज्य धैर्यवान्नृपतिः सूनृतवाग्बृहस्पतिः । अविशद्वनवेश्म विस्मितः स्मृतिलग्नैः कलहंसशंसितैः ॥ नैषधीयचरितम् २.६३ ॥ |
| इति तत्तदा विकृतरूपमभजत्तदविभिन्नचेतसं । मारबलमिव भयङ्करतां हरिबोधिसत्वमभि राजमण्डलं ॥ शिशुपालवधम् १५.५८ ॥ |
| इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे । उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥ किरातार्जुनीयम् १३.१४ ॥ |
| इति त्रिलोकीतिलकेषु तेषु मनोभुवो विक्रमकामचारः । अमोघमस्त्रं भवतीमवाप्य मदान्धतानर्गलचापलस्य ॥ नैषधीयचरितम् ८.८४ ॥ |
| इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् । उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥ किरातार्जुनीयम् २.२५ ॥ |
| इति द्विकृत्वः शुचिमृष्टभोजिनां दिनानि तेषां कतिचिन्मुदा ययुः । द्विरष्टसंवत्सरवारसुन्दरीपरीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ नैषधीयचरितम् १६.११२ ॥ |
| इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानावरलक्ष्यकोपया । विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते ॥ कुमारसंभवम् ५.७४ ॥ |
| इति धृतसुरसार्थवाचिकस्रङ्निजरसनातलपत्त्रहारकस्य । सफलय मम दूततां वृणीष्व स्वयमवधार्य दिगीशमेकमेषु ॥ नैषधीयचरितम् ८.१०७ ॥ |

| |
|---|
| इति धौतपुरन्ध्रिमत्सरान्सरसिमज्जनेन श्रियमाप्तवतोऽतिशायिनीमपमलाङ्गभासः । अवलोक्य तदैव यादवानपरवारिराशेः शिसिरेतररोचिषाप्यपां ततिषु मङ्क्तुमीषे ॥ शिशुपालवधम् ८.७१ ॥ |
| इति नरपतिरस्त्रं यद्यदाविश्चकार प्रकुपित इव रोगः क्षिप्रकारी विकारं । भिषगिव गुरुदोषच्छेदिनोपक्रमेण क्रमविदथ मुरारिः प्रत्यहंस्तत्तदाशु ॥ शिशुपालवधम् २०.७६ ॥ |
| इति निगदितवन्तं सूनुं उच्चैर्मघोनः प्रणतशिरसं ईशः सादरं सान्त्वयित्वा । ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ किरातार्जुनीयम् १८.४४ ॥ |
| इति निश्चितप्रियतमागतयः सितदीधितावदयवत्यबलाः । प्रतिकर्म कर्तुमुचक्रमिरे समये हि सर्वमुपकारि कृतम् ॥ शिशुपालवधम् ९.४३ ॥ |
| इति पठति शुके मृषा ययुस्ता बहु नृपकृत्यमवेत्य सांधिवेलम् । कुपितनिजसखीदृशार्धदृष्टाः कमलतयेव तदा निकोचवत्यः ॥ नैषधीयचरितम् २१.१४२ ॥ |
| इति पूर इवोदकस्य यः सरितां प्रवृषिजस्तटद्रुमैः । क्वचनापि महानखण्डितप्रसरः क्रीडति भूभृतां गणैः ॥ शिशुपालवधम् १६.७५ ॥ |
| इति प्रगल्भं पुरुसाधिराजो मृगाधिराजस्य वचो निशम्य । प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥ रघुवंशम् २.४१ ॥ |
| इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् । निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥ रघुवंशम् ३.४७ ॥ |
| इति प्रतीत्यैव मयावधीरिते तवापि निर्बन्धरसो न शोभते । हरित्पतीनां प्रतिवाचिकं प्रति श्रमो गिरां ते घटते हि संप्रति ॥ नैषधीयचरितम् ९.११ ॥ |
| इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम् । अथो वयस्यां परिपार्श्ववर्तिनीं विवर्तितानञ्जननेत्रमैक्षत ॥ कुमारसंभवम् ५.५१ ॥ |
| इति प्रसादयामासुस्तव संह्रियते वचः । भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ रघुवंशम् १०.३४ ॥ |
| इति प्रियाकाकुभिरुन्मिषन्भृशं दिगीशदूत्येन हृदि स्थिरीकृतः । नृपं स योगेऽपि वियोगमन्मथः क्षणं तमुद्भ्रान्तमजीजनत्पुनः ॥ नैषधीयचरितम् ९.१०१ ॥ |
| इति ब्रुवन्तं तमुवाच स व्रती न वाच्यमित्थं पुरुषोत्तम त्वया । त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्य्यं गुरु योगिनामपि ॥ शिशुपालवधम्  १.३१ ॥ |
| इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे । तं राजराजानुचरोऽस्य साक्षात्प्रदेशमादेशं इवाधितस्थौ ॥ किरातार्जुनीयम् ३.३० ॥ |
| इति भीष्मभाषितवचोऽर्थमधिगतवतामिव क्षणात् । क्षोभमगमदतिमात्रमथो शिशुपालपक्षपृथिवीभृतां गणः ॥ शिशुपालवधम् १५.४७ ॥ |
| इति मदमदनाभ्यां रागिणः स्पष्टरागननवरतरतश्रीसङ्गिनस्तानवेक्ष्य । अभजत परिवृत्तिं साथ पर्यस्तहस्ता रजनिरवनतेन्दुर्लज्जयाधोमुखीव ॥ शिशुपालवधम् १०.९१ ॥ |
| इति मनसि विकल्पानुद्यतः संत्यजन्ती क्वचिदपि दमयन्ती निर्णयं नाससाद । मुखमथ परितापास्कन्दितानन्दमस्या मिहिरविरचितावस्कन्दमिन्दुं निनिन्द ॥ नैषधीयचरितम् १३.५५ ॥ |
| इति वदति सखीजने निमीलद्विगुणितसान्द्रतराक्षिपक्ष्ममाला । अपदतलिभयेन भर्तुरङ्गं भवति हि विक्लवता गुणोऽङ्गनानाम् ॥ शिशुपालवधम् ७.४३ ॥ |
| इति वदति सखीजनेऽनुरागाद्दयिततमामपरश्चिरं प्रतीक्ष्य । तदनुगमवशादनायतानि न्यधित मिमान इवावनिं पदानि ॥ शिशुपालवधम् ७.१३ ॥ |
| इति वादिन एवास्य होतुराहुतिसाधनं । अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥ रघुवंशम् १.८२ ॥ |
| इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः । क्षणमामृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥ रघुवंशम् १.७३ ॥ |
| इति विधोर्विविधोक्तिविगर्हणं व्यवहितस्य वृथेति विमृश्य सा । अतितरां दधती विरहज्वरं हृदयभाजमुपालभत स्मरम् ॥ नैषधीयचरितम् ४.७५ ॥ |
| इति विरचितवाग्भिर्बन्दिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झां चकार । मदपटु निनदद्भिर्बोधितो राजहंसैः सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥ रघुवंशम् ५.७५ ॥ |
| इति विविधं उदासे सव्यसाची यदस्त्रं बहुसमरनयज्ञः सादयिष्यन्नरातिं । विधिरिव विपरीतः पौरुषं न्यायवृत्तेः सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥ किरातार्जुनीयम् १६.६३ ॥ |
| इति विशकलितार्थामौद्दवीं वाचमेना-मनुगतनयमार्गामर्गलां दुर्नयस्य । जनितमुदस्थादुच्चकैरुच्छ्रितोरः- स्थलनियतनिषण्णश्रीश्रुतां शुश्रुवान् सः ॥ शिशुपालवधम्  २.११८ ॥ |
| इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठं असूयया कयाचित् । अगणितगुरुमानलज्जयासौ स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ किरातार्जुनीयम् १०.५६ ॥ |
| इति विस्मृतान्यकरणीयमात्मनः सचिवावलम्बितधुरं नराधिपं । परिवृद्धरागमनुभन्धसेवया मृगया जहार चतुरेव कामिनी ॥ रघुवंशम् ८.६९ ॥ |
| इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ । प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥ रघुवंशम् ८.२३ ॥ |
| इति शासति सेनान्यां गच्छतस्ताननेकधा । निषिध्य हसता किंचित्तत्र तस्थेऽन्धकारिणा ॥ किरातार्जुनीयम् १५.२९ ॥ |
| इति शिरसि स वामं पादमाधाय मुदवहदनवद्यां तामवद्यादपेतः । रथतुरगरजोभिस्तस्य रूक्षालकाग्रा समरविजयलक्ष्मीः सैव मूर्ता बभूव ॥ रघुवंशम् ७.७० ॥ |
| इति श्रुतिस्वादिततद्गुणस्तुतिः सरस्वतीवाङ्मयविस्मयोत्थया । शिरस्तिरःकम्पनयैव भीमजा न तं मनोरन्वयमन्वमन्यत ॥ नैषधीयचरितम् १२.१३ ॥ |
| इति श्रुतेऽस्या वचसैव हास्यात्कृत्वा सलास्याधरमास्यबिम्बम् । भ्रूविभ्रमाकूतकृताभ्यनुज्ञेष्वेतेषु तां साथ नलाय निन्ये ॥ नैषधीयचरितम् १४.४६ ॥ |
| इति स चिकुरादारभ्यैनां नखावधि वर्णयन्हरिणरमणीनेत्रां चित्राम्बुधौ तरदन्तरः । हृदयभरणोद्वेलानन्दः सखीवृतभीमजानयनविषयीभावे भावं दधार धराधिपः ॥ नैषधीयचरितम् ७.१०९ ॥ |
| इति स विधुमुखीमुखेन मुग्धालपितसुधासवमर्पितं निपीय । स्मितशबलवलन्मुखोऽवदत्तां स्फुटमिदमीदृशमीदृशं यथात्थ ॥ नैषधीयचरितम् २१.१५ ॥ |
| इति स्तुवन्हुंकृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतैव । ओंकारभूम्ना पठतैव वेदान्महर्षिवृन्देन तथाऽन्वमानि ॥ नैषधीयचरितम् १०.६६ ॥ |
| इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन । व्याकृत्य मर्त्योचितमर्थमुक्तेराखण्डलस्तस्य नुनोद शङ्काम् ॥ नैषधीयचरितम् १०.१३५ ॥ |

| |
|---|
| इति स्फुटं तद्वचसस्तयादरात्सुरस्पृहारोपविडम्बनादपि । कराङ्कसुप्तैककपोलकर्णया श्रुतं च तद्भाषितमश्रुतं च तत् ॥ नैषधीयचरितम् ९.६ ॥ |
| इति स्मरः शीघ्रमतिश्चकार तं वधूं च रोमाञ्चभरेण कर्कशौ । स्खलिष्यति स्निग्धतनुः प्रियादियं म्रदीयसी पीडनभीरुदोर्युगात् ॥ नैषधीयचरितम् १६.११५ ॥ |
| इति स्वयं मोहमहोर्मिनिर्मितं प्रकाशनं शोचति नैषधे निजम् । तथाव्यथामग्नतदुद्दिधीर्षया दयालुरागाल्लघु हेमहंसराट् ॥ नैषधीयचरितम् ९.१२७ ॥ |
| इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा । महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ॥ रघुवंशम् ७.२९ ॥ |
| इतिकृतवचनायाः कश्चिदभेत्य बिभ्यद्गलितनयनवारेर्याति पादावनामं । करुणमपि समर्थं मानिनां मानभेदे रुदितमुदितमस्त्रं योषितां विग्रहेषु ॥ शिशुपालवधम् ११.३५ ॥ |
| इतियस्य ससंपदः पुरा यदवापुर्भवनेष्वरिस्त्रियः । स्फुटमेव समस्तमापदा तदिदानीमवनीध्रमूर्धसु ॥ शिशुपालवधम् १६.७८ ॥ |
| इतिवाचमुद्धतमुदीर्य सपदि सह वेणुदारिणा । सोढरिपुबलभरोऽसहनः स जहास दत्तकरतालमुच्चकैः ॥ शिशुपालवधम् १५.३९ ॥ |
| इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः । दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥ नैषधीयचरितम् १.१३४ ॥ |
| इतीन्द्रदूत्याः प्रतिवाचमर्धे प्रत्युह्य सैषाभिदधे वयस्याः । किंचिद्विवक्षोल्लसदोष्ठलक्ष्मीजितापनिद्रद्दलपङ्कजास्याः ॥ नैषधीयचरितम् ६.१०१ ॥ |
| इतीयमक्षिभ्रुवविभ्रमेङ्गितस्फुटामनिच्छां विवरीतुमुत्सुका । तदुक्तिमात्रश्रवणेच्छयाशृणोद्दिगीशसंदेशगिरं न गौरवात् ॥ नैषधीयचरितम् ९.१ ॥ |
| इतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरव्रीडसमस्ययानया । पदे पदे मौनमयान्तरीपिणी प्रवर्तिता सारघसारसारणी ॥ नैषधीयचरितम् ९.१५५ ॥ |
| इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् । प्रविश्य कृष्णा सदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥ किरातार्जुनीयम् १.२६ ॥ |
| इतीरयित्वा विरतां स तां पुनर्गिरानुजग्राहतरां नराधिपः । विरुत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥ नैषधीयचरितम् ९.७ ॥ |
| इतीरयित्वा विरराम पत्री स राजपुत्रीहृदयं बुभुत्सुः । ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ॥ नैषधीयचरितम् ३.५३ ॥ |
| इतीरिणापृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः । मृदुर्बभाषे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः ॥ नैषधीयचरितम् ९.१३ ॥ |
| इतीरिता तच्चरणात्परागं गीर्वाणचूडामणिमृष्टशेषम् । तस्य प्रसादेन सहाज्ञयासावादाय मूर्ध्नादरिणी बभार ॥ नैषधीयचरितम् १०.७३ ॥ |
| इतीरिता पत्त्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी । चेतो नलङ्कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ॥ नैषधीयचरितम् ३.६७ ॥ |
| इतीरिते वचसि वचस्विनामुना युगक्षयक्षुभितमरुद्गरीयसि । प्रचक्षुभे सपदि तदम्बुराशिना समं महाप्रलयसमुद्यतं सदः ॥ शिशुपालवधम् १७..१ ॥ |
| इतीरिते विश्वसितां पुनस्तामादाय पाणौ दिविषत्सु देवी । कृत्वा प्रणम्रां वदति स्म सा तान् भक्तेयमर्हत्यधुनानुकम्पाम् ॥ नैषधीयचरितम् १४.४२ ॥ |
| इतीरितैर्नैषधसूनृतामृतैर्विदर्भजन्मा भृशमुल्ललास सा । ऋतोरधिश्रीः शिशिरानुजन्मनः पिकस्वरैर्दूरविकस्वरैर्यथा ॥ नैषधीयचरितम् ९.१३६ ॥ |
| इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि च । अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम् ॥ नैषधीयचरितम् १.१०४ ॥ |
| इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला । स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥ कुमारसंभवम् ५.८४ ॥ |
| इतो भिया भूपतिभिर्वनं वनादटद्भिरुच्चैरटवीत्वमीयुषी । निजापि सावापि चिरात्पुनः पुरी पुनः स्वमध्यासि विलासमन्दिरम् ॥ नैषधीयचरितम् १२.१७ ॥ |
| इतो मुखाद्वागियमाविरासीत्पीयूषधारामधुरेति जल्पन् । अचुम्बदस्याः स मुखेन्दुबिम्बं संवावदूकश्रियमम्बुजानाम् ॥ नैषधीयचरितम् २२.१०४ ॥ |
| इतोऽपि किं वीरयसे न कुर्वतो नृपान्धनुर्बाणगुणैर्वशंवदान् । गुणेन शुद्धेन विधाय निर्भरं तमेनमुर्वीवलयोर्वशी वशम् ॥ नैषधीयचरितम् १२.२७ ॥ |
| इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव । तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥ रघुवंशम् २.६७ ॥ |
| इत्थं गते गतघृणः किं अयं विधत्तां वध्यस्तवेत्यभितिते वसुधाधिपेन । एधान्हुताशनवतः स मुनिर्ययाचे पुत्रं परासुमनुगन्तुमनाः सदारः ॥ रघुवंशम् ८.८१ ॥ |
| इत्थं गिरः प्रियतमा इव सोऽव्यलीकः शुश्राव सूततनयस्य तदा व्यलीकाः । रन्तुं निरन्तरमियेष ततोऽवसाने तासां गिरौ च वनराजिपटं वसाने ॥ शिशुपालवधम् ५.१ ॥ |
| इत्थं द्विजेन द्विजराकान्तिरावेदितो वेदविदां वरेण । एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥ रघुवंशम् ५.२३ ॥ |
| इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं लब्ध्वा बन्धुं तमपि च कुशः पञ्चमं तक्षकस्य । एकः शङ्कां पितृवधरिपोरत्यजद्वैनतेयाच्छान्तव्यालामवनिमपरः पौरकान्तः शशास ॥ रघुवंशम् १६.८८ ॥ |
| इत्थं नारीर्घटयितुमलं कामिभिः काममासन्प्रालेयांशोः सपदि रुचयः शान्तमानान्तरायाः । आचार्यत्वं रतिषु विलसन्मन्मथश्रीविलासा ह्रीप्रत्यूहप्रशमकुशलाः शीधवश्चक्रुरासां ॥ शिशुपालवधम् ९.८७ ॥ |
| इत्थं पुनर्वागवकाशनाशान्महेन्द्रदूत्यामपयातवत्याम् । विवेश लोलं हृदयं नलस्य जीवः पुनः क्षीबमिव प्रबोधः ॥ नैषधीयचरितम् ६.१११ ॥ |
| इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला । अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलोलमौलिम् ॥ नैषधीयचरितम् ६.१०८ ॥ |
| इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशं । राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ॥ रघुवंशम् ५.३५ ॥ |
| इत्थं मधूत्थं रसमुद्गिरन्ती तदोष्ठबन्धूकधनुर्विसृष्टा । कर्णात्प्रसूनाशुगपञ्चबाणी वाणीमिषेणास्य मनो विवेश ॥ नैषधीयचरितम् ८.५ ॥ |
| इत्थं यथेह मदभाग्यमनेन मन्ये कल्पद्रुमोऽपि स मया खलु याच्यमानः । संकोचसंज्वरदलाङ्गुलिपल्लवाग्रपाणीभवन्भवति मां प्रति बद्धमुष्टिः ॥ नैषधीयचरितम् १३.५१ ॥ |
| इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद्बहिः । प्रस्थानकालक्षमवेषकल्पनाकृतक्षणक्षेपमुदैक्षताच्युतं ॥ शिशुपालवधम् १२.१ ॥ |

| |
|---|
| इत्थं वितीर्य वरमम्बरमाश्रयत्सु तेषु क्षणादुदलसद्विपुलः प्रणादः । उत्तिष्ठतां परिजनालपनैर्नृपाणां स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥ नैषधीयचरितम् १४.९५ ॥ |
| इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ । प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय॥ कुमारसंभवम् ७.८६॥ |
| इत्थं विहृत्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः । उत्सर्पितोर्मिचयलङ्घिततीरदेशं औत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ किरातार्जुनीयम् ८.५५ ॥ |
| इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः । सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥ रघुवंशम् २.२५ ॥ |
| इत्थं ह्रिया वर्णनजन्मनेव संध्यामपक्रान्तवतीं प्रतीत्य । तारातमोदन्तुरमन्तरिक्षं निरीक्षमाणः स पुनर्बभाषे ॥ नैषधीयचरितम् २२.१७ ॥ |
| इत्थमत्र विततक्रमे क्रतौ वीक्ष्य धर्ममथ घर्मजन्मना । अर्घदानमनुचोदितो वचः सभ्यमभ्यधित शन्तनोः सुतः ॥ शिशुपालवधम् १४.५३ ॥ |
| इत्थममुं विलपन्तमम‍ुञ्चद्दीनदयालुतयावनिपालः । रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥ नैषधीयचरितम् १.१४३ ॥ |
| इत्यद्भुतैकप्रभवः प्रभावात्मसिद्धनेपथ्यविधेर्विधाता । आत्मानमासन्नगणोपनीते खड्गे निषक्तप्रतिमं ददर्श॥ कुमारसंभवम् ७.३६॥ |
| इत्यध्वनः कैश्चिदहोभिरन्ते कूलं समासाद्य कुशः सरय्वाः । वेदिप्रतिष्ठान्विततताध्वराणां यूपानपश्यच्छतशो रघूणाम् ॥ रघुवंशम् १६.३५ ॥ |
| इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम् । ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन् क्रियाः ॥ रघुवंशम् ११.३० ॥ |
| इत्यमी वसुमतीं कमितारः सादरस्त्वदतिथीभवितुं न । भीमभूसुरभुवोरभिलाषे दूरमन्तरमहो नृपतीनाम् ॥ नैषधीयचरितम् ५.३४ ॥ |
| इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारां अपि गां निशम्य । स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥ रघुवंशम् ५.१२ ॥ |
| इत्यवेत्य मनसात्मविधेयं किंचन त्रिविबुधी बुबुधे न । नाकनायकमपास्य तमेकं सा स्म पश्यति परस्परमास्यम् ॥ नैषधीयचरितम् ५.७२ ॥ |
| इत्यवेत्य वसुना बहुनापि प्राप्नुवन्न मुदमर्चनया सः । सूक्तिमौक्तिकमयैरथ हारैर्भक्तिमैहत हरेरुपहारैः ॥ नैषधीयचरितम् २१.५२ ॥ |
| इत्याकर्ण्य क्षितीशास्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार । अङ्गीकारं गतेऽस्मिन्नमरपरिवृढः संभृतानन्दमूचे भूयादन्तर्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र ॥ नैषधीयचरितम् ५.१३७ ॥ |
| इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैव श्रोष्यत्यस्मात्परमवहिता सोम्य सीमन्तिनीनां कान्तोदन्तः सुहृदुपनतः संगमात्किं चिदूनः ॥ मेघदूतम्, उत्तरमेघः ३४ ॥ |
| इत्यादि लक्षणं भूरि काव्यस्याहुर्महर्षयः । स्वर्णभ्राजिष्णुभालत्व-प्रभृतीव महीभुजः ॥ चन्द्रालोकः३.११ ॥ |
| इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव । अविघ्नमस्तु ते स्थेयाः सायं प्रतुद्व्रजेदपि ॥ रघुवंशम् १.९० ॥ |
| इत्यालपत्यथ पतत्त्रिणि तत्र भैमीं सख्यश्चिरात्तदनुसंधिपराः परीयुः । शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य वेगाज्जगाम निषधाधिपराजधानीम् ॥ नैषधीयचरितम् ३.१२९ ॥ |
| इत्यालिङ्गतामालोक्य जयलक्ष्म्या झषध्वजं । क्रुद्धयेव क्रुधा सद्यः प्रपेदे चेदिभूपतिः ॥ शिशुपालवधम् १९.२४ ॥ |
| इत्यालेपुरनुप्रतीकनिलयालंकारसारश्रियाहंकुर्वत्तनुरामणीयकममूरालोक्य पौरप्रियाः । सानन्दाः कुरुविन्दसुन्दरकरस्यानन्दनं स्यन्दनं तस्याध्यास्य यतः शतक्रतुहरित्क्रीडाद्रिमिन्दोरिव ॥ नैषधीयचरितम् १५.९८ ॥ |
| इत्युक्तवत्या निहितादरेण भैम्या गृहीता मघवत्प्रसादः । स्रक्पारिजातस्य ऋते नलाशां वासैरशेषामपूपूरदाशाम् ॥ नैषधीयचरितम् ६.८६ ॥ |
| इत्युक्तवत्या यदलोपि लज्जा सानौचिती चेतसि नश्चकास्तु । स्मरस्तु साक्षी तददोषतायामुन्माद्य यस्तत्तदवीवदत्ताम् ॥ नैषधीयचरितम् ३.९७ ॥ |
| इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशं ईशं । न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुं आसीदनुवर्तितुं वा ॥ रघुवंशम् १४.४३ ॥ |
| इत्युक्तवन्तं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः । प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ किरातार्जुनीयम् ३.२४ ॥ |
| इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ । उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ किरातार्जुनीयम् ३.१० ॥ |
| इत्युक्तिशेषे स वधूं बभाषे सूक्तिश्रुतासक्तिनिबद्धमौनाम् । मुखाभ्यसूयानुशयादिवेन्दौ केयं तव प्रेयसि मूकमुद्रा ॥ नैषधीयचरितम् २२.५८ ॥ |
| इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे धाम स्वं गतवति राजराजभृत्ये । सोत्कण्ठं किं अपि पृथासुतः प्रदध्यौ संधत्ते भृशमरतिं हि सद्वियोगः ॥ किरातार्जुनीयम् ५.५१ ॥ |
| इत्युदीरितगिरं नृपस्त्वयि श्रेयसि स्थितवति स्थिरा मम । सर्वसम्पदिति शौरिमुक्तवानुद्वहन्मुदमुदस्थित क्रतौ ॥ शिशुपालवधम् १४.१७ ॥ |
| इत्युदीर्य मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण । चक्षुषां दशशतीमनिमेषां तस्थिवान्मुनिमुखे प्रणिधाय ॥ नैषधीयचरितम् ५.१९ ॥ |
| इत्युदीर्य स ययौ मुनिरुर्वीं स्वर्पतिं प्रतिनिवर्त्य बलेन । वारितोऽप्यनुजगाम सयत्नं तं कियन्त्यपि पदान्यपराणि ॥ नैषधीयचरितम् ५.४३ ॥ |
| इत्युदीर्य स हरिं प्रति संप्रज्ञातवासिततमः समपादि । भावनाबलविलोकितविष्णौ प्रीतिभक्तिसदृशानि चरिष्णुः ॥ नैषधीयचरितम् २१.११९ ॥ |
| इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोतसुखाः कुमारः । उद्भासितं मङ्गलसंविधाभिः संबन्धिनः सद्म समाससाद ॥ रघुवंशम् ७.१६ ॥ |
| इत्यूचिवानुपहृताभरणः क्षितीशं श्लाघ्यो भवान्स्वजन इत्यनुभाषितारं । संयोजयां विधिवदास समेतबन्धुः कन्यामयेन कुमुदः कुलभूषणेन ॥ रघुवंशम् १६.८६ ॥ |
| इत्येवं बोद्धृवैचित्र्याद्वक्तृस्यूतं चतुर्विधम् । उपेक्षानिह्नवाभ्यां च द्विधा स्वाङ्कुरितं मतम् ॥ चन्द्रालोकः७.१५ ॥ |
| इत्योषधिप्रस्थविलासिनीनां शृण्वन्कथाः श्रोत्रसुखास्त्रिनेत्रः। केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद॥ कुमारसंभवम् ७.६९॥ |

| |
|---|
| इदं कृष्णं कृष्णं प्रियतम तनु श्वेतमथ किं गमिष्यामो यामो भवतु गमनेनाथ भवतु । पुरा येनावं मे चिरमनुसृता चित्तपदवी स एवान्यो जातः सखि परिचिताः कस्य पुरुषाः ॥ अमरुशतकम्-१००॥ |
| इदं निगद्य क्षितिभर्तरि स्थिते तयाभ्यधायि स्वगतं विदग्धया । अधिस्त्रि तं दूतयतां भुवः स्मरं मनो दधत्या नयनैपुणव्यये ॥ नैषधीयचरितम् ९.२२ ॥ |
| इदं महतेऽभिहितं हितं मया विहाय मोहं दमयन्ति चिन्तय । सुरेषु विघ्नैकपरेषु को नरः करस्थमप्यर्थमवाप्तुमीश्वरः ॥ नैषधीयचरितम् ९.८३ ॥ |
| इदं यदि क्ष्मापतिपुत्रि तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन् । त्वामुच्चकैस्तापयता नृपं च पञ्चेषुणैवाजनि योजनेयम् ॥ नैषधीयचरितम् ३.१ ॥ |
| इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा प्रियशोको जीवं कुसुममिव धर्मो ग्लपयति । स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ- स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम् ॥ (उत्तररामचरितम् ३.३०) |
| इदंनृपप्रार्थिभिरुज्झितोऽर्थिभिर्मणिप्ररोहेण विवृध्य रोहणः । कियद्दिनैरम्बरमावरिष्यते मुधा मुनिर्विन्ध्यमरुन्ध भूधरम् ॥ नैषधीयचरितम् १२.९ ॥ |
| इदंयशांसि द्विषतः सुधारुचः किमङ्कमेतद्द्विषातः किमाननम् । यशोभिरस्याखिललोकधाविभिर्विभीषिता धावति तामसी मसी ॥ नैषधीयचरितम् १२.८९ ॥ |
| इदमपास्य विरागि परागीरलिकदम्बकमम्बुरुहां ततीः । स्तनभरेण जितस्तबकानमन्नवलते वलतेऽभिमुखं तव ॥ शिशुपालवधम् ६.११ ॥ |
| इदमयुक्तमहो महदेव यद्वरतनोः स्मरयत्यनिलोऽन्यदा । स्मृसयौवनसोष्मपयोधरान्सतुहिनस्तु हिनस्तु वियोगिनः ॥ शिशुपालवधम् ६.५६ ॥ |
| इदमिदमिति भूरुहां प्रसूनैर्मुहुरतिलोभयता पुरःपुरोऽन्या । अनुरहसमनायि नायकेन त्वरयति रन्तुमहो जनं मनोभूः ॥ शिशुपालवधम् ७.५० ॥ |
| इदमुच्छ्वसितालकं मुखं विश्रान्तकथं दुनोति मां । निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनं ॥ रघुवंशम् ८.५५ ॥ |
| इदमुदीर्य तदैव मुमूर्च्छ सा मनसि मूर्च्छितमन्मथपावका । क्व सहतामवलम्बलवच्छिदामनुपपत्तिमतीमतिदुःखिता ॥ नैषधीयचरितम् ४.१११ ॥ |
| इन्दीवरश्यामतनौर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः । अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥ रघुवंशम् ६.६५ ॥ |
| इन्दुं मुखाद्बहुतृणं तव यद्गृणन्ति नैनं मृगस्त्यजति तन्मृगतृष्णयेव । अत्येति मोहमहिमा न हिमांशुबिम्बलक्ष्मीविडम्बिमुखि वित्तिषु पाशवीषु ॥ नैषधीयचरितम् २२.१३७ ॥ |
| इन्दोर्भ्रमेणोपगमाय योग्ये जिह्वा तवास्ये विधुवास्तुमन्तम् । गीत्या मृगं कर्षतु भन्त्स्यता किं पाशीबभूवे श्रवणद्वयेन ॥ नैषधीयचरितम् २२.१०९ ॥ |
| इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां वाचं नले तरलिताथ समां प्रमाय । सा सिन्धुवेणिरिव वाडववीतिहोत्रं लावण्यभूः कमपि भीमसुताप तापम् ॥ नैषधीयचरितम् १३.३५ ॥ |
| इन्द्रियार्थपरिशून्यमक्षर्मः सोढुं एकमपि स क्षणातरं । अन्तरे च विहरन्दिवानिशं न व्यपैक्षत समुत्सुकाः प्रजाः ॥ रघुवंशम् १९.६ ॥ |
| इभकुम्भतुंङ्गकठिनेतरेतरस्तनभारदूरविनिवारितोदराः । परिफुल्लगण्डफलकाः परस्परं परिरेभिरे कुकुरकौरवस्त्रियः ॥ शिशुपालवधम् १३.१६ ॥ |
| इमं परित्यज्य परं रणादरिः स्वमेव भग्नः शरणं मुधाविशत् । न वेत्ति यत्रातुमितः कृतस्मयो न दुर्गया शैलभुवापि शक्यते ॥ नैषधीयचरितम् १२.७४ ॥ |
| इमा गिरस्तस्य विचिन्त्य चेतसा तथेति संप्रत्ययमाससाद सा । निवारितावग्रहनीरनिर्झरे नभोनभस्यत्वमलम्भयद्दृशौ ॥ नैषधीयचरितम् ९.८४ ॥ |
| इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् । त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः ॥ रघुवंशम् १३.३२ ॥ |
| इमां न मृद्वीमसृजत्कराभ्यां वेधा कुशाध्यासनकर्कशाभ्याम् । शृङ्गारधारां मनसा न शान्तिविश्रान्तिधन्वाध्वमहीरुहेण ॥ नैषधीयचरितम् १०.१२७ ॥ |
| इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुं । आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव पादयोस्ते ॥ रघुवंशम् १६.८५ ॥ |
| इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे । विहाय निःसारतयेव भूरुहान्पदं वनश्रीर्वनितासु संदधे ॥ किरातार्जुनीयम् ८.२० ॥ |
| इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः । विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥ किरातार्जुनीयम् १.३७ ॥ |
| इयं कियच्चारुकुचेति पश्यते पयःप्रदाया हृदयं समावृतम् । ध्रुवं मनोज्ञा व्यतरद्युदुत्तरं भिषेण भृङ्गारधृते करद्वयी ॥ नैषधीयचरितम् १६.९२ ॥ |
| इयं च तेऽन्या पुरतो विडम्बना यद्ढया वारणराजहार्यया । विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ॥ कुमारसंभवम् ५.७० ॥ |
| इयं च दुर्वारमहारथानामाक्षिप्य वीर्यं महतां बलानां । शक्तिर्ममावस्यति हीनयुद्धे सौरीव ताराधिपधाम्नि दीप्तिः ॥ किरातार्जुनीयम् १६.१७ ॥ |
| इयं न ते नैषाध दृक्पथातिथिस्त्वदेकतानस्य जनस्य यातना । ह्रदे ह्रदे हा न कियद्गवेषितः स वेधसाऽगोपि खगोऽपि वक्ति यः ॥ नैषधीयचरितम् ९.९७ ॥ |
| इयं बाला मां प्रत्यनपरतमिन्दीवरदल प्रभाचोरं चक्षुः क्षिपति किमभिप्रेतमनया । गतो मोहोऽस्माकं स्मरशबरबाणव्यतिकर ज्वरज्वाला शान्ता, किमिति न वराकी विरमति ॥ पुरुषार्थोपदेशः-84॥ |
| इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः । जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ किरातार्जुनीयम् ४.२१ ॥ |
| इयच्चिरस्यावदधन्ति मत्पथे किमिन्द्रनेत्राण्यशनिर्न निर्ममौ । धिगस्तु मां सत्वरकार्यमन्थरं स्थितः परप्रेष्यगुणोऽपि यत्र न ॥ नैषधीयचरितम् ९.२१ ॥ |
| इयत्कृतं केन महीजगत्यामहो महीयः सुकृतं जनेन । पादौ यमुद्दिश्य तवापि पद्यारजःसु पद्मस्रजमारभेते ॥ नैषधीयचरितम् ८.४७ ॥ |
| इयमनङ्गशरावलिपन्नगक्षतविसारिवियोगविषावशा । शशिकलेव खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम् ॥ नैषधीयचरितम् ४.३३ ॥ |
| इयमप्रतिबोधशायिनीं रशना त्वां प्रथमा रहःसखी । गतिविभ्रमसाद नीरवा न शुचा नानुमृतेव लक्ष्यते ॥ रघुवंशम् ८.५८ ॥ |

| |
|---|
| इयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा । पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवितहारिणी ॥ अमरुशतकम्-५१॥ |
| इयमियमधिरथ्यं याति नेपथ्यमञ्जुर्विशतिविशति वेदीमुर्वशी सेयमुर्व्याः । इति जनजनितैः सानन्दनादैर्विजघ्ने नलहृदि परभैमीवर्णनाकर्णनाप्तिः ॥ नैषधीयचरितम् १०.१३७ ॥ |
| इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती । ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ किरातार्जुनीयम् २.५ ॥ |
| इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः । अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥ कुमारसंभवम् ५.२ ॥ |
| इवादिकपदाभावे गूढोत्प्रेक्षां प्रचक्षते । त्वत्कीर्तिर्विभ्रमश्रान्ता विवेश स्वर्गनिम्नगाम् ॥ चन्द्रालोकः ५.३० ॥ |
| इषमासि सिता दशमी विजया शुभकर्मसु सिद्धिकरी कथिता । श्रवणर्क्षयुता सुतरां शुभदा नृपतेस्तु गमे जयसन्धिकरी ॥ मुहूर्त.यात्राप्रकरणम् ७७॥ |
| इषुवर्षमनेकमेकवीरस्तदरिप्रच्युतमच्युतः पृषत्कैः । अथ वादिकृतं प्रमाणमन्यैः प्रतिवादीव निराकरोत्प्रमाणैः ॥ शिशुपालवधम् २०.१८ ॥ |
| इष्टं कृत्वार्थं पत्रिणः शार्ङ्गपाणेरित्याधोमुख्यं प्रविशन्भूमिमाशु । शुद्धया युक्तानां वैरिवर्गस्य मध्ये भर्त्रा क्षिप्तानामेतदेवानुरूपं ॥ शिशुपालवधम् १९.११९ ॥ |
| इष्टं न प्रति ते प्रतिश्रुतिरभूद्याद्य स्वराहलादिनी धर्मार्था सृज तां श्रुतिप्रतिभटीकृत्यान्विताख्यापदाम् । त्वत्कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशनादद्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥ नैषधीयचरितम् ५.१३५ ॥ |
| इष्टदारविरहौर्वपयोधिस्त्वं शरण्य शरणं स ममैधि । लक्ष्मणक्षाणवियोगकृशानौ यः स्वजीविततृणाहुतियज्वा ॥ नैषधीयचरितम् २१.७६ ॥ |
| इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः । महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ॥ नैषधीयचरितम् ३.२१ ॥ |
| इह किमुषसि पृच्छाशंसिकिंशब्दरूपप्रतिनियमितवाचा वायसेनैष पृष्टः । भण फणिभवशास्त्रे तातणः स्थानिनौ काविति विहिततुहीवागुत्तरः कोकिलोऽभूत् ॥ नैषधीयचरितम् १९.६१ ॥ |
| इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् । अमुं अतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परं ॥ किरातार्जुनीयम् ५.१८ ॥ |
| इह न कतमश्चित्रं धत्ते तमिस्रततीर्दिशामपि चतसृणामुत्सङ्गेषु शृङ्गता धयतां क्षणात् । तरुशरणतामेत्य च्छायामयं निवसत्तमः शमयितुमभूदानैश्वर्यं यदर्यमरोचिषाम् ॥ नैषधीयचरितम् १९.४९ ॥ |
| इह मुहुर्मुदितैः कलभै रवः प्रतिदिशं क्रियते कलभैरवः । स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः ॥ शिशुपालवधम् ४.६०॥ |
| इह वीतभयास्तपोनुभावाज्जहति व्यालमृगाः परेषु वृत्तिं । मयि तां सुतरां अयं विधत्ते विकृतिः किं नु भवेदियं नु माया ॥ किरातार्जुनीयम् १३.४ ॥ |
| इह सनियमयोः सुरापगायां उषसि सयावकसव्यपादरेखा । कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥ किरातार्जुनीयम् ५.४० ॥ |
| इह समदशकुन्ताक्रान्तवानीरमुक्त- प्रसवसुरभिशीतस्वच्छतोया वहन्ति । फलभरपरिणामश्यामजम्बूनिकुञ्ज- स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ (उत्तररामचरितम् २.२०) |
| इहाविशेद्येन पथातिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः । सोऽस्याः श्रवःपत्त्रयुगे प्रणालीरेखैव धावत्यभिकर्णकूपम् ॥ नैषधीयचरितम् ७.६२ ॥ |
| ईदृशस्य भवतः खतमेतल्लाघवं मुहुरतीव रतेषु । क्षिप्तमायतमदर्शयदुर्व्या काञ्चिदाम जघनस्य महत्वं ॥ शिशुपालवधम् १०.७७ ॥ |
| ईदृशानि गदितानि तदानीमाकलय्य स नलस्य बलारिः । शंसति स्म किमपि स्मयमानः स्वानुगाननविलोकनलोलः ॥ नैषधीयचरितम् ५.११६ ॥ |
| ईदृशानि मुनये विनयाब्धिस्तस्थिवान्स वचनान्युपहृत्य । प्रांशुनिःश्वसितपृष्ठचरी वाग्नारदस्य निरियाय निरोजाः ॥ नैषधीयचरितम् ५.४ ॥ |
| ईदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे । नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य ॥ नैषधीयचरितम् ५.७८ ॥ |
| ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः । प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ रघुवंशम् १.७९ ॥ |
| ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः । परभाग्योपजीवी च षडेते नित्यदुःखिताः ॥ नीतिसंग्रहस्य मित्र-१.२५ ॥ |
| ईशः कुशेशयसनाभिशये कुशेन द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते । ज्योतिष्मता सममनेन वनीघनासु तत्त्वं विनोदय घृतोदतटीषु चेतः ॥ नैषधीयचरितम् ११.५८ ॥ |
| ईशा दिशां नलभुवं प्रतिपद्य लेखा वर्णिश्रियं गुणवतामपि वः कथं वा । मूर्खान्धकूपपतनादिव पुस्तकानामस्तं गतं बत परोपकृतिव्रतत्वम् ॥ नैषधीयचरितम् १३.४९ ॥ |
| ईशाणिमैश्वर्य विवर्तमध्ये लोकेशलोकेशयलोकमध्ये । तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ॥ नैषधीयचरितम् ३.६४ ॥ |
| ईशार्थमम्भसि चिराय तपश्चरन्त्या यादोविलङ्घनविलोलविलोचनायाः ।आलम्बताग्रकरमत्र भवो भवान्याः श्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥ किरातार्जुनीयम् ५.२९ ॥ |
| ईषत्स्मितक्षालितसृक्वभागा दृक्सञ्ज्ञया वारिततत्तदालिः । स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूरुत्तरयांचकार ॥ नैषधीयचरितम् ६.९ ॥ |
| उक्तिर्व्याजस्तुतिर्निन्दा-स्तुतिभ्यां स्तुतिनिन्दयोः । कस्ते विवेको नयसि स्वर्गं पातकिनोऽपि यत् ॥ चन्द्रालोकः ५.७१ ॥ |
| उचितस्वपनोऽपि नीरराशौ स्वबलाम्भोनिधिमध्यगस्तदीनीं । भुवनत्रयकार्यजागरूकः स परं तत्र परः पुमानजागः ॥ शिशुपालवधम् २०.३६ ॥ |
| उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः । यान्वेति मां द्रुह्यति मह्यमेव सात्रेत्युपालम्भि तयालिवर्गः ॥ नैषधीयचरितम् ३.७ ॥ |
| उच्चारणज्ञेऽथ गिरा दधानमुच्चा रणत्पक्षिगणास्तटीस्तम् । उत्कं धरं द्रष्टुमवेक्ष्य शौरिणुत्कन्धरं दारुक इत्युवाच ॥ शिशुपालवधम् ४.१८॥ |
| उच्चैमहारजतराजिविराजितासौ दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा । अभ्येति भस्मपरिपाण्डुरितस्मरारे- रुद्वह्निलोचनललामललाटलीलां ॥ शिशुपालवधम् ४.२८॥ |

| |
|---|
| उच्चैरस्यति मन्दतामरसतां जाग्रत्कलङ्कैरव-ध्वंसं हस्तयते च या सुमनसामुल्लासिनी मानसे । दुष्टोद्यन्मदनाशनार्चिरमला लोकत्रयीदर्शिका सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु ॥ चन्द्रालोकः १.१ ॥ |
| उच्चैर्गतामस्खलितां गरीयसीं तदातिदूरादपि तस्य गच्छतः । एके समूहुर्बलरेणुसंहतिं शिरोभिराज्ञामपरे महीभृतः ॥ शिशुपालवधम् १२.४५ ॥ |
| उच्चैस्तरादम्बरशैलमौलेश्च्युतो रविर्गैरिकगण्डशैलः ।तस्यैव पातेन विचूर्णितस्य संध्यारजोराजिरिहोज्जिहीते ॥ नैषधीयचरितम् २२.४ ॥ |
| उच्छिद्य विद्विष इव प्रसभं मृगेन्द्रानिन्द्रानुजाचरभूतपतयोऽध्यवात्सुः । वन्येभमस्तकनिखातनखाग्रयमुक्तमुक्ताफलप्रकरभाञ्जि गुहागृहाणि ॥ शिशुपालवधम् ५.१२ ॥ |
| उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी । आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥ किरातार्जुनीयम् ९.३९ ॥ |
| उज्जिहानसुकृताङ्कुरशङ्का यत्र धर्मगहने खलु तेने । भूरिशर्करकरम्भबलीनामालिभिः सुगतसौधसखानाम् ॥ नैषधीयचरितम् २१.२७ ॥ |
| उज्झती शुचं इवाशु तमिस्रां अन्तिकं व्रजति तारकराजे । दिक्प्रसादगुणमण्डनं ऊहे रश्मिहासविशदं मुखं ऐन्द्री ॥ किरातार्जुनीयम् ९.१८ ॥ |
| उज्झत्सु संहार इवास्तसंख्यमह्नाय तेजस्विषु जीवितानि । लोकत्रयास्वादनलोलजिह्वं न व्याददात्याननमत्र मृत्युः ॥ किरातार्जुनीयम् १६.१६ ॥ |
| उडुपरिवृढः पत्या मुक्तामयं यदपीडयद्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती । तदुभयमतः शङ्के सङ्कोचितं निजशङ्कया प्रसरति नवार्के कर्कन्धूफलारुणरोचिषि ॥ नैषधीयचरितम् १९.५१ ॥ |
| उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती पतिरिह न यद्दृष्टस्ताभ्यां गणेयरुचीगणः । स्फुटमुडुपतेराश्मं वक्षः स्फुरन्मलिनाश्मनश्छवि यदनयोर्विच्छेदेऽपि द्रुतं बत न द्रुतम् ॥ नैषधीयचरितम् १९.१९ ॥ |
| उत्कण्टका विलसदुज्ज्वलपत्रराजिरामोदभागनपरागतराऽतिगौरी । रुद्रक्रुधस्तदरिकामधिया नले सा वासार्थितामधृत काञ्चनकेतकी वा ॥ नैषधीयचरितम् १२.११ ॥ |
| उत्कण्ठयन्पृथगिमां युगपन्नलेषु प्रत्येकमेषु परिमोहयमाणबाणः । जानीवहे निजशिलीमुखशीलिसंख्यासाफल्यमाप स तदा यदि पञ्चबाणः ॥ नैषधीयचरितम् १३.३८ ॥ |
| उत्क्रान्तानामामिषायोपरिष्टादध्याकाशं बभ्रमुः पत्रवाहाः । मूर्ताः प्राणाः नूनमद्याप्यवेक्षामासुः कायं त्यजिताः दारुणास्त्रैः ॥ शिशुपालवधम् १८.७३ ॥ |
| उत्क्षिप्तपटकान्तरलीयमानमन्दानिलप्रशमितश्रमघर्मतोयैः । दूर्वाप्रतानसहजास्तरणेषु भेजे निद्रसुखं वसनसद्मसु राजदारैः ॥ शिशुपालवधम् ५.२२ ॥ |
| उत्क्षिप्योच्चैः प्रस्फुरन्तं रदाभ्यामीषादन्तः कुञ्जरं शात्रवीयं । शृङ्गप्रोतप्रावृषेण्याम्बुदस्य स्पष्टं प्रापत्साम्यमुर्वीधरस्य ॥ शिशुपालवधम् १८.३८ ॥ |
| उत्क्षिप्तगात्रः स्म विडम्बयन्नभः समुत्पतिष्यन्तमगेन्द्रमुच्चकैः । आकुञ्चितप्रोहनिरूपितक्रमं करेणुरारोहयते निषादिनं ॥ शिशुपालवधम् १२.५ ॥ |
| उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बै-रुत्तम्भितोडुभिरतिवतरां शिरोभिः । श्रद्धेयनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमन्तरीक्षं ॥ शिशुपालवधम् ४.२५॥ |
| उत्क्षिप्तस्फुटितसरोरुहार्घ्यमुच्चैः सस्नेहं विहगरुतैरिवालपन्तो । नारीणामथ सरसी सफेनहासा प्रीत्येव व्यतनुत पाद्यमूर्मिहस्तैः ॥ शिशुपालवधम् ८.१४ ॥ |
| उत्खातं निधि-शङ्कया क्षिति-तलं ध्माता गिरेर्धातवो निस्तीर्णः सरितां पतिः नृपतयो यत्नेन सन्तोषिताः। मन्त्राराधन-तत्परेण मनसा नीताः श्मशाने निशाः प्राप्तः काण-वराटकोऽपि न मया तृष्णे सकामा भव॥॥ वैराग्यशतकम् ३ ॥ |
| उत्खातं निधिशङ्कया क्षितितलं, ध्माता गिरेर्धातवो निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन सन्तर्पिताः । मन्त्राराधनतत्परेण विधिना नीताः श्मशाने निशाः प्राप्तः काणवराटकोऽपि न मया, तृष्णे सकामा भव ॥ पुरुषार्थोपदेशः-15॥ |
| उत्खाय दर्पचलितेन सहैव रज्ज्वा कीलं प्रयत्नपरमानवदुर्ग्रहेण । आकुल्यकारि कटकस्तुरगेण तूर्णमश्वेति विद्रुतमनुद्रुताश्वमन्यम् ॥ शिशुपालवधम् ५.५९ ॥ |
| उत्तमं स महति स्म महीभृत्पूरुषं पुरुषसूक्तविधानैः । द्वादशापि च स केशवमूर्तीर्द्वादशाक्षरमुदीर्य ववन्दे ॥ नैषधीयचरितम् २१.४२ ॥ |
| उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः । पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ नीतिसंग्रहस्य मित्र-१.११४ ॥ |
| उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम् । तत्र स्थिरं बीजगेहशान्त्यारामादि सिद्धये ॥ मुहूर्त.नक्षत्रप्रकरणम् २॥ |
| उत्तरीयविनयात्त्रपमाणा रुन्धती किल तदीक्षणमार्गं । आचरिष्ट विकटेन विवोढुर्वक्षसैव कुचमण्डलमन्या ॥ शिशुपालवधम् १०.४२ ॥ |
| उत्तस्थुषः शिशिरपल्वलपङ्कमध्यान्मुस्ताप्ररोहकवलावयवानुकीर्णं । जग्राह स द्रुतवराहकुलस्य मार्गं सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥ रघुवंशम् ८.५९ ॥ |
| उत्तानमेवास्य वलक्षकुक्षिं देवस्य युक्तिः शशमङ्कमाह । तेनाधिकं देवगवेष्वपि स्यां श्रद्धालुरुत्तानगतौ शृउतायाम् ॥ नैषधीयचरितम् २२.८२ ॥ |
| उत्तालतालीवनसंप्रवृत्तसमीरसीमन्तिततकेतकीकाः । आसेदिरे लावणसैन्धवीनां चमूचरैः कच्छभुवां प्रदेशाः ॥ शिशुपालवधम् ३.७९ ॥ |
| उत्तिष्ठ वत्से ननु सानुजोऽसौ दशान्तरं तत्र समं प्रपन्ने । अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ ॥ रघुवंशम् १४.१ ॥ |
| उत्तिष्ठ वत्से ननु सानुजोऽसौ वृत्तेन भर्ता शुचिना तवैव । कृच्छ्रं महत्तीर्ण इति प्रियार्हां तां ऊचतुस्ते प्रियमप्यमिथ्या ॥ रघुवंशम् १४.६ ॥ |
| उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् । ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥ रघुवंशम् २.६१ ॥ |
| उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता । समौ हि शिष्टैराम्नातौ वत्स्र्यन्तावामयः स च ॥ शिशुपालवधम् २.१० ॥ |
| उत्तीर्णभारलघुनाप्यलघूलपौघ-सौहित्यनिःसहतरेण तरोरधस्तात् । रोमन्थमन्थरचलद्गुरुसास्नमासां-चक्रे नीमीलदलसेक्षणमौक्षकेण ॥ शिशुपालवधम् ५.६२ ॥ |
| उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गीसर्वानुवादविधिबोधितसाधुमेधाः । सौधस्रजः प्लुतपताकतयाभिनिन्युर्मन्ये जनेषु निजताण्डवपण्डितत्वम् ॥ नैषधीयचरितम् ११.६ ॥ |

| |
|---|
| उत्तुङ्गादनिलचलांशुकास्तटान्ताच्चेतोभिः सह भयदर्शितनां प्रियाणाम् । श्रेणिभिर्गुरुभिरतूर्णमुत्पतन्तयस्तोयेषु द्रुततरमङ्गना निपेतुः ॥ शिशुपालवधम् ८.३१ ॥ |
| उत्थातुमिच्छन्विधृतः पुरो बलान्निधीयमाने भरभाजि यन्त्रके । अर्धोज्झितोद्गारविझर्झरस्वरः स्वनाम निन्ये रवणः स्फुटार्थतां ॥ शिशुपालवधम् १२.९ ॥ |
| उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः । चिस्तारितः कुञ्जरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यम् ॥ रघुवंशम् ७.३९ ॥ |
| उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम् । आयुषः खण्डमादाय रविरस्तं गमिष्यति  ॥ नीतिसंग्रहस्य मित्र-१.४ ॥ |
| उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य । लीलामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रीमंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ मेघदूतम्, पूर्वमेघः ५९॥ |
| उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते । शुक्लापाङ्गैः सनयनजलैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत्॥ मेघदूतम्, पूर्वमेघः २२॥ |
| उत्पातसृत्यू किल काणसिद्धी शुभोऽमृताख्यो मुसलो गदश्च । मातङ्गरक्षश्चरसुस्थिराख्यप्रवर्धमानाः फलदाः स्वनाम्ना॥ मुहूर्तचिन्त.२४ ॥ |
| उत्पातान्सह पातदग्धतिथिभिर्दुष्टांश्च योगांस्तथा चन्द्रेज्योशनसामथास्तमयनं तिथ्याः क्षयर्द्धी तथा । गण्डान्तं च सविष्टिसंक्रमदिनं तन्वंशपास्तं तथा तन्वंशेशविधूनथाष्टरिपुगान् पापस्य वर्गांस्तथा ॥ मुहूर्त.विवाहप्रकरणम् १०७॥ |
| उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना । त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी ॥ चन्द्रालोकः ५.२९ ॥ |
| उत्प्लुत्यारादर्धचन्द्रेण लूने वक्त्रेऽन्यस्य क्रोधदष्टोष्ठदन्ते । सैन्यैः कण्ठच्छेदलीने कबन्धाद्भूयो बिभ्ये वल्गतः सासिपाणेः ॥ शिशुपालवधम् १८.५३ ॥ |
| उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः । वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीं ॥ किरातार्जुनीयम् ५.३९ ॥ |
| उत्सङ्गे वा मलिनवसने सोम्य निक्षिप्य वीणां मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा तन्त्रीरार्द्रां नयनसलिलैः सारयित्वा कथं चिद्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥ मेघदूतम्, उत्तरमेघः २० ॥ |
| उत्सङ्गे समविषमे समं महाद्रेः क्रान्तानां वियदभिपातलाघवेन । आ मूलादुपनदि सैकतेषु लेभे सामग्री खुरपदवी तुरङ्गमाणाम् ॥ किरातार्जुनीयम् ७.२१ ॥ |
| उत्सर्जिताम्भःकणिको नभस्वानौदन्वतः स्वेदलवान् ममार्ज । तस्यानुवेलं व्रजतोऽतिवेलमैलालतास्फालनलब्धगन्धः ॥ शिशुपालवधम्  ३.७८ ॥ |
| उत्सर्पिणी न किल तस्य तरिङ्गिणी या त्वन्नेत्रयोरहह तत्र विपाशि जाता ।नीराजनाय नवनीरजराजिरास्तामत्राञ्जसानुरज राजनि राजमाने ॥ नैषधीयचरितम् ११.७७ ॥ |
| उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे । राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः  ॥ नीतिसंग्रहस्य मित्र-१.७४ ॥ |
| उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् । शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं वाञ्छति वासहेतोः  ॥ नीतिसंग्रहस्य मित्र-१.१६८ ॥ |
| उत्साहाख्यस्थायिभावः प्रभावादिविभावभूः । वीरोऽनुभावैः स्थैर्याद्यैर्भावैर्गर्वादिभिर्युतः ॥ चन्द्रालोकः६.९ ॥ |
| उत्सुकश्च सुतदारकर्मणा सोऽभवद्गुरुरुपागतश्च तम् । गौतमस्य तनयोऽनुकूलवाक्प्रार्थितं हि सुकृतामकालहृत् ॥ रघुवंशम् ११.४९* ॥ |
| उत्सृज्य साम्राज्यमिवाथ भिक्षां तारुण्यमुल्लङ्घ्य जरामिवारात् । तं चारुमाकारमुपेक्ष्य यान्तं निजां तनूमाददिरे दिगीशाः ॥ नैषधीयचरितम् १४.६ ॥ |
| उत्सृष्टध्वजकुथकङ्कटा धरित्रीं आनीता विदितनयैः श्रमं विनेतुं । आक्षिप्तद्रुमगहना युगान्तवातैः पर्यस्ता गिरय इव द्विपा विरेजुः ॥ किरातार्जुनीयम् ७.३० ॥ |
| उत्सेधनिर्धूतमहीरुहां ध्वजैर्जनावरुद्धोद्धतसिन्धुरंहसां । नागैरधिक्षिप्तमहाशिलं मुहुर्बलं बभूवोपरि तन्महीभृतां ॥ शिशुपालवधम् १२.५३ ॥ |
| उथ्कातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि । त्वां प्रत्यकस्मात्कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे ॥ रघुवंशम् १४.७३ ॥ |
| उदधेरिव रत्नानि तेजांसीव विवस्वतः । स्तुतिभ्यो व्यतिरिच्यन्ते दूरेण चरितानि ते ॥ रघुवंशम् १०.३१ ॥ |
| उदमज्जि कैटभजितः शयनादपनिद्रपाण्डुरसरोजरुचा । प्रथमप्रबुद्धनदराजसुतावदनेन्दुनेव तुहिनद्युतिना ॥ शिशुपालवधम् ९.३० ॥ |
| उदयति स्म तददभुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यत् । अनुमितोऽपि च बाष्पनिरीक्षणाद्व्यभिचचार न तापकरो नलः ॥ नैषधीयचरितम् ४.१८ ॥ |
| उदयति हि शशाङ्कः कामिनीगण्डपाण्डुर्ग्रहगणपरिवारो राजमार्गप्रदीपः। तिमिरनिकरमध्ये रश्मयो यस्य गौराः स्रुतजल इव पङ्के क्षीरधाराः पतन्ति॥ (मृच्छकटिकम् १.५७) |
| उदयतिविततरःध्वरशमिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् । वहति गिरिरयं विलम्बिधण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥ शिशुपालवधम् ४.२०॥ |
| उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः । स हि निदेशमलङ्घयतामभूत्सुहृदयोहृदयः प्रतिगर्जतां ॥ रघुवंशम् ८.९ ॥ |
| उदयमुदितदीप्तिर्याति यः संगतौ मे पतति न वरमिन्दुः सोऽपरामेष गत्वा । स्मितरुचिरिव सद्यः साभ्यसूयं प्रभेति स्फुरति विशदमेषा पूर्वकाष्ठाङ्गनायाः ॥ शिशुपालवधम् ११.१२ ॥ |
| उदयशिखरिप्रस्थान्यहना रणेऽत्र निशः क्षणे दधति विहरत्पूषाण्यूष्मद्रुताश्मजतुस्रवान् । उदयदरुणप्रह्वीभावादरादरुणानुजे मिलति किमु तत्सङ्गाच्छङ्क्या नवेष्टकवेष्टना ॥ नैषधीयचरितम् १९.१६ ॥ |
| उदयशिखरिप्रस्थावस्थायिनी खनिरक्षाया शिशुतरमहोमाणिक्यानामहर्मणिमण्डली । रजनिदृषदं ध्वान्तश्यामां विधूय पिधायिकां न खलु कतमेनेयं जाने जनेन विमुद्रिता ॥ नैषधीयचरितम् १९.४२ ॥ |

| |
|---|
| उदयशिखरिशृङ्गप्राङ्गणेष्वेव रिङ्गन्सकमलमुखहासं वीक्षितः पद्मिनीभिः । विततमृदुकराग्रः शब्दयन्त्या वयोभिः परिपतति दिवोऽङ्गके हेलया बालसूर्यः ॥ शिशुपालवधम् ११.४७ ॥ |
| उदयाद्रिमूर्ध्नि युगपच्चकासतोर्दिननाथपूर्णशशिनोरसम्भवां । रुचिमासने रुचिरधाम्नि बिभ्रतावलघुन्यथ न्यषदतां नृपाच्युतौ ॥ शिशुपालवधम् १३.६४ ॥ |
| उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्तया । मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यतां ॥ रघुवंशम् ८.८४ ॥ |
| उदये रविर्यदि सौरिररिगः शशी दशमेऽपि । वसुधापतिर्यदि याति रिपुवाहिनी वशमेति ॥ मुहूर्त.यात्राप्रकरणम् ६४॥ |
| उदर एव धृतः किमुदन्वता न विषमो वडवानलवद्विधुः । विषवदुज्झितमप्यमुना न स स्मरहरः किममुं बुभुजे विभुः ॥ नैषधीयचरितम् ४.६ ॥ |
| उदरं नतमध्यपृष्टतास्फुटदङ्गुष्ठपदेन मुष्टिना । चतुरङ्गुलमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥ नैषधीयचरितम् २.३४ ॥ |
| उदरं परिमाति मुष्ट्षिना कुतुकी कोऽपि दमस्वसुः किमु । धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥ नैषधीयचरितम् २.३५ ॥ |
| उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे । यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयांबभूव ताम् ॥ नैषधीयचरितम् १५.१९ ॥ |
| उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितं । मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥ किरातार्जुनीयम् ८.५० ॥ |
| उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम् । सानौ यस्याभवद् युद्धं तद्धूर्जटिकिरीटिनोः ॥ चन्द्रालोकः ५.११५ ॥ |
| उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया । स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥ किरातार्जुनीयम् १.१९ ॥ |
| उदारता तु वैदग्ध्यमग्राम्यत्वात् पृथङ्मता । मानं मुञ्च प्रिये किंचिल्लोचनान्तमुदञ्चय ॥ चन्द्रालोकः४.९ ॥ |
| उदारसारश्चेद्भाति भिन्नोऽभिन्नतया गुणः । मधुरं मधु पीयूषं तस्मात्तस्मात्कवेर्वचः ॥ चन्द्रालोकः ५.९१ ॥ |
| उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन । बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरूषं पुराविदः ॥ शिशुपालवधम्  १.३३ ॥ |
| उदासितेनैव मयेदमुद्यसे भिया न तेभ्यः स्मरतानवान्न वा । हितं यदि स्यान्मदसुव्ययेन ते तदा तव प्रेमणि शुद्धिलब्धये ॥ नैषधीयचरितम् ९.१३५ ॥ |
| उदासिरे पवनविधूतवाससस्ततस्ततो गगनलिहश्च केतवः । यतः पुरः प्रतिरिपु शार्ङ्गिणः स्वयं व्यधीयत द्विपघटयेति मङ्गलं ॥ शिशुपालवधम् १७..३९ ॥ |
| उदितं प्रियां प्रति सहार्दमिति श्रद्धीयत प्रियतमेन वचः । विदितेङ्गिते हि पुर एव जने सपदीरिताः खलु लगन्ति गिरः ॥ शिशुपालवधम् ९.६९ ॥ |
| उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः । मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ किरातार्जुनीयम् ६.४ ॥ |
| उदितोरुसादमतिवेपथुमत्सुदृशोऽभिभर्तृ विधुरं त्रपया । वपुरादरातिशयशंसि पुनः प्रतिपत्तिमूढमपि वाढमभूत् ॥ शिशुपालवधम् ९.७७ ॥ |
| उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकारां । आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥ किरातार्जुनीयम् ३.५५ ॥ |
| उदीरितो भो जन! भोजनाय वै स मानसिंहोऽमरसिंहवर्म्मणा न वीक्ष्य तस्मिन्समयेऽपि तन्नृपं व्यभाषतैवं परितापतोऽपरम् ॥ प्रतापविजयः-६६ ॥ |
| उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमम् । उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया ॥ शिशुपालवधम्  १.३२ ॥ |
| उदेति यस्यां दिशि यत्र याति गोलभ्रमाद्वाऽथ ककुब्भसङ्घे । त्रिधोच्यते सम्मुख एव शुक्रो यत्रोदितस्तां तु दिशं न यायात् ॥ मुहूर्त.यात्राप्रकरणम् ४०॥ |
| उद्गतेन्दुं अविभिन्नतमिस्रां पश्यति स्म रजनीमवितृप्तः । व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥ किरातार्जुनीयम् ९.२४ ॥ |
| उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोडशभिः पदार्थैः । आन्वीक्षिकीं यद्दशनद्विमालीं तां मुक्तिकामाकलितां प्रतीमः ॥ नैषधीयचरितम् १०.८२ ॥ |
| उद्धतान्द्विषतस्तस्य निघ्नतो द्वितयं ययुः । पानार्थे रुधिरं धातौ रक्षार्थे भुवनं शराः ॥ शिशुपालवधम् १९.१०३ ॥ |
| उद्धतैरिव परस्परसङ्गादीरितान्युभयतः कुचकुम्भैः । योषितामतिमदेन जुघूर्णुर्विभ्रमातिशयपुंसि वपूंषि ॥ शिशुपालवधम् १०.३२ ॥ |
| उद्धतैर्निभृतमेकमनेकैश्छदवन्मृगदृशामविरामैः । श्रूयते स्म मणितं कलकाञ्चीनूपुरध्वनिभिरक्षतमेव ॥ शिशुपालवधम् १०.७६ ॥ |
| उद्धूतमुच्चैर्ध्वजिनाभिरंशुभिः प्रतप्तमभ्यर्णतयाविवस्वतः । आह्लादिकह्लारसमीरणाहते पुरः पपाताम्भसि यमुने रजः ॥ शिशुपालवधम् १२.६६ ॥ |
| उद्धृतिस्खलदिलापरिरम्भाल्लोमभिर्बहिरितैर्बहुहृष्टैः । ब्राहममण्डमभवद्वलिनीपं केलिकोल तव तत्र न मातः ॥ नैषधीयचरितम् २१.५९ ॥ |
| उद्धृत्य प्रथमत एव दक्षिणांघ्रिं द्वात्रिंशत्पदमधिगत्य दिश्ययानम् । आरोहेत्तिलघृतहेमताम्रपात्रं दत्त्वाऽऽदौ गणकवराय च प्रगच्छेत् ॥ मुहूर्त.यात्राप्रकरणम् ८९॥ |
| उद्धृत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव संप्रणीताः । आलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिम् ॥ शिशुपालवधम्  ३.७४ ॥ |
| उद्बद्धकेशश्च्युतपत्त्ररेखो विश्लेषिमुक्ताफलपत्त्रवेष्टः । मनोज्ञ एव प्रमदामुखानामम्भोविहाराकुलितोऽपि वेषः ॥ रघुवंशम् १६.६७ ॥ |
| उद्भवाजतनुजादज कामं विश्वभूषण न दूषणमत्र । दूषणप्रशमनाय समर्थं येन देव तव वैभवमेव ॥ नैषधीयचरितम् २१.७ ॥ |
| उद्भासिताखिलखलस्य विश्रृङ्खलस्य प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः । दैवादवाप्तविभवस्य गुणद्विषोऽस्य नीचस्य गोचरगतैः सुखमाप्यते कैः ॥ नीतिशतकम् ५९ ॥ |
| उद्भ्रमामि विरहात्खलु यस्या मोहमेमि च मुहूर्तमहं यः । ब्रूत वः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः ॥ नैषधीयचरितम् ५.१०८ ॥ |
| उद्यच्छमाना गमनाय पश्चात्पुरो निवेशे पथि च व्रजन्ती । सा यत्र सेना ददृषे नृपस्य तत्रैव सामग्र्यमतिं चकार ॥ रघुवंशम् १६.२९ ॥ |
| उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बिपुरुषान्त्रमेखलाम् । तां विलोक्य वनितावधे घृणां पत्त्रिणा सह मुमोच राघवः ॥ रघुवंशम् ११.१७ ॥ |
| उद्यन्नादं धन्विभिर्निष्ठुराणि स्थूलान्युच्चैर्मण्डलत्वं दधन्ति । आस्फाल्यन्ते कार्मुकाणि स्म कामं हस्त्यारोहैः कुञ्जराणां शिरांसि ॥ शिशुपालवधम् १८.९ ॥ |

| |
|---|
| उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः । नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ नीतिसंग्रहस्य मित्र-०.३६ ॥ |
| उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् । आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यते तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ॥ वैराग्यशतकम् ८७ ॥ |
| उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर् दैवेन देयमिति कापुरुषा वदन्ति । दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ नीतिसंग्रहस्य मित्र-०.३३ ॥ |
| उद्यत्कृशानुशकलेषु सुराभिघातादभूमीसमायातशिलाफलकाचितैषु । पर्न्तवर्त्मसु व्चक्रमिरे महाश्वाः शैलस्य दर्दुरपुटानिव वादयन्तः ॥ शिशुपालवधम् ५.९ ॥ |
| उद्वर्तयन्त्या हृदये निपत्य नृपस्य दृष्टिर्न्यवृतदद्रुतैव । वियोगिवैरात्कुचयोर्नखाङ्कैरर्धेन्दुलीलैर्गलहस्तितेव ॥ नैषधीयचरितम् ६.२५ ॥ |
| उद्वीक्ष्य प्रियकरकुड्मलापविद्धैर्वक्षोजद्वयमभिषिक्तमन्यनार्याः । अम्भोभिर्मुहुरसिचद्वधूरमर्षदात्मीयं पृथुतरनेत्रयुग्ममुक्तैः ॥ शिशुपालवधम् ८.३७ ॥ |
| उद्वेजयत्यङ्गुलिपार्ष्णिभागान्मार्गे शिलीभृतहिमेऽपि यत्र । न दुर्वहश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥ कुमारसंभवम् १.११ ॥ |
| उद्वोढुं कनकविभूषणान्यशक्तः सध्रीचा वलयितपद्मनालसूत्रः । आरूढप्रतिवनिताकटाक्षभारः साधीयो गुररभवद्भुजस्तरुण्याः ॥ शिशुपालवधम् ८.४४ ॥ |
| उन्नमन्सपदि धूम्रयन्दिशः सान्द्रतां दधदधःकृताम्बुदः । दयामियाय दहनस्य केतनः कीर्तयन्निव दिवौकसां प्रियं ॥ शिशुपालवधम् १४.२८ ॥ |
| उन्नम्रताम्रपटमण्डपमण्डितं तदानीलननागकुलसंकुलमाबभासे । संध्याशुभिन्नघनकर्बुरितान्तरीक्ष-लक्ष्मीविडम्बि शिविरं शिवकीर्तनस्य ॥ शिशुपालवधम् ५.६८ ॥ |
| उन्नाभ इत्युदगतस्नामधेयस्तस्यायथार्थोन्नतनाभिरन्ध्रः । सुतोऽभवत्पङ्कजनाभकल्पः कृत्स्नस्य नाभिर्नृपमण्डलस्य ॥ रघुवंशम् १८.२० ॥ |
| उन्निद्रप्रियकमनोरमं रमण्याः संरेजे सरसि वपुः प्रकाशमेव । युक्तानां विमलतया तिरस्क्रियायै नाक्रामन्नपि हि भवत्यलं जलौघः ॥ शिशुपालवधम् ८.२८ ॥ |
| उन्मज्जन्मकर इवामारापगाया वेगेन प्रतिमुखं एत्य बाणनद्याः । गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ॥ किरातार्जुनीयम् १७.६३ ॥ |
| उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते । पूर्वः परस्पर्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम् ॥ नैषधीयचरितम् ३.९८ ॥ |
| उन्मीलद्गुडपाकतन्तुलतया रज्ज्वा भ्रमीरर्जयन्दानान्तःश्रुतशक्रकराचलमथः स्वेनामृतान्धाः स्मरः । नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत्सा भवज्जिहवायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणाम् ॥ नैषधीयचरितम् २१.१५४ ॥ |
| उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूरक्रोडक्रीडद्द्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः । एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमालीव्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः ॥ नैषधीयचरितम् १२.१०१ ॥ |
| उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्समुद्धरन् । रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम् ॥ रघुवंशम् ११.२६ ॥ |
| उन्मूलितालानबिलाभनाभिश्छिन्नस्खलच्छृङ्खलरोमराजिः । मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥ नैषधीयचरितम् ७.८५ ॥ |
| उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशं । कृतशक्तिरवाङ्मुखो गुरुत्वाज्जनितव्रीड इवात्मपौरुषेण ॥ किरातार्जुनीयम् १३.३३ ॥ |
| उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः । अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ किरातार्जुनीयम् २.४३ ॥ |
| उपकारपरः स्वभावतः सततं सर्वजनस्य सज्जनः । असतामनिशं तथाप्यहो गुरुहृद्रोगकरी तदुन्नतिः ॥ शिशुपालवधम् १६.२२ ॥ |
| उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् । तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि ॥ नीतिसंग्रहस्य मित्र-१.८० ॥ |
| उपगूढवेलमलघूर्मिभुजैः सरितामचुक्षुपदधीशमपि । रजनीकरः किमिव चित्रमदो यदुरागिणां गणमनङ्गलघुम् ॥ शिशुपालवधम् ९.३८ ॥ |
| उपग्रहर्क्षं कुरुबाह्लिकेषु कलिङ्गवङ्गेषु च पातितं भम् । सौराष्ट्रशाल्वेषु च लत्तितं भं त्यजेतु विद्धं किल सर्व देशे ॥ मुहूर्त.विवाहप्रकरणम् ६९॥ |
| उपचचार चिरं मृदुशीतलैर्जलजनालमृणालजलादिभिः । प्रियसखीनिवहः स तथा क्रमादियमवाप यथा लघु चेतनम् ॥ नैषधीयचरितम् ४.११३ ॥ |
| उपचितावयवा शुचिभिः कणैरलिकदम्बकयोगमुपेयुषी । सदृशकान्तिरलक्ष्यत मञ्जरी तिलकजाऽलकजालकमौक्तिकैः ॥ रघुवंशम् ८.४४ ॥ |
| उपचितेषु परेष्वसमर्थतां व्रजति कालवशादबलवानपि । तपसि मन्दगभस्तिरभीषुमान्नहि महाहिमनिकरोऽभवत् ॥ शिशुपालवधम् ६.६३ ॥ |
| उपजापसहान्विलङ्घयन्स विधाता नृपतीन्मदोद्धतः । सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥ किरातार्जुनीयम् २.४७ ॥ |
| उपजीवति स्म सततं दधतः परिमुग्धतां वणिगिवोडुपतेः । घनवीथवीथिमवतीर्णवतो निधिरम्भसामुपचयाय कलाः ॥ शिशुपालवधम् ९.३२ ॥ |
| उपतप्यमानमलघूष्णिभिः श्वसितैः सितेतरसरोजदृशः । द्रवतां न नेतुमधरं क्षमते नवनागवल्लिदलरागरसः ॥ शिशुपालवधम् ९.६५ ॥ |
| उपनतमुडुपुष्पजातमास्ते भवतु जनः परिचारकस्तवायम् । तिलतिलकितपर्पटाभमिन्दुं वितर निवेद्यमुपास्स्व पञ्चबाणम् ॥ नैषधीयचरितम् २२.१४९ ॥ |
| उपनम्रमयाचितं हितं प्रतिहर्तुं न तवापि सांप्रतम् । करकल्पजनान्तराद्विधेः शुचितः प्रापि स हि प्रतिग्रहः ॥ नैषधीयचरितम् २.१२ ॥ |
| उपनीय बिन्दुसरसो मयेन या मणिदारु चारु किल वार्षपर्वणं । विदधेऽवधूतसुरसद्मसम्पदं समुपासदत्सपदि संसदं स तां ॥ शिशुपालवधम् १३.५० ॥ |
| उपनेतुमुन्नतिमतेव दिवं कुचयोर्युगेन तरसा कलितां । रभसोत्थितामुपगतः सहसा परिरभ्य कञ्चन वधूमरुधत् ॥ शिशुपालवधम् ९.७२ ॥ |
| उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः । इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥ किरातार्जुनीयम् २.२८ ॥ |
| उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे । दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदां ॥ रघुवंशम् १.६० ॥ |

| |
|---|
| उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वंभर विश्वमीशिषे । ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ॥ शिशुपालवधम् १.३८ ॥ |
| उपमा यत्र सादृश्य-लक्ष्मीरुल्लसति द्वयोः । हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव ॥ चन्द्रालोकः ५.११ ॥ |
| उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया । तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः॥ कुमारसंभवम् ४.५ ॥ |
| उपमानमलाभि लोलपक्षक्षणविक्षिप्तमहाम्बुवाहमत्स्यैः । गगनार्णवमन्तरासुमेरोः कुलजानां गरुडैरिलाधराणां ॥ शिशुपालवधम् २०.७४ ॥ |
| उपमाने तु लीलादि-पदाढ्ये ललितोपमा । त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥ चन्द्रालोकः ५.१५ ॥ |
| उपमानोपमेयत्वे यत्रैकस्यैव जागृतः । इन्दुरिन्दुरिवेत्यादौ भवेदेवमनन्वयः ॥ चन्द्रालोकः ५.१२ ॥ |
| उपमेयोपमानादावर्थानुप्रास इष्यते । चन्दनं खलु गोविन्द-चरणद्वन्द्ववन्दनम् ॥ चन्द्रालोकः ५.६ ॥ |
| उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः । सदृशं इष्टसमागमनिर्वृतिं वनितयाऽनितया रजनीवधूः ॥ रघुवंशम् ८.३८ ॥ |
| उपरिजतरुजानि याजमानां कुशलतया परिरम्भलोलुपोऽन्यः । प्रथितपृथुपयोधरां गृहाण स्वयमिति मुग्धवधूमुदास दोर्भ्याम् ॥ शिशुपालवधम् ७.४९ ॥ |
| उपलभ्य चञ्चलतरङ्गहृतं मदगन्धं उत्थितवतां पयसः । प्रतिदन्तिनामिव स सम्बुबुधे करियादसामभिमुखान्करिणः ॥ किरातार्जुनीयम् ६.१४ ॥ |
| उपलाहतोद्धततरङ्गधृतं जविना विधूतविततं मरुता । स ददर्श केतकशिखाविशदं सरितः प्रहासं इव फेनमपाम् ॥ किरातार्जुनीयम् ६.१० ॥ |
| उपवनपवनानुपातदक्षैरलिभिरलाभि यदङ्गनाजनस्य । परिमलविषयस्तदुन्नतानामनुगमने खलु सम्पदोऽग्रतःस्थाः ॥ शिशुपालवधम् ७.२७ ॥ |
| उपसंध्यमास्त तनु सानुमतः शिखरेषु तत्क्षणमशीतरुचः । करजालमस्तमयेऽपि सतामुतिं खलूच्चतरमेव पदम् ॥ शिशुपालवधम् ९.५ ॥ |
| उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः । तदास्पदं प्राप्य तयातिरोषात्सोढास्मि न त्वद्भवने वसन्ती ॥ रघुवंशम् १४.६३ ॥ |
| उपहरन्ति न कस्य सुपर्वणः सुमनसः कति पञ्च सुरद्रुमाः । तव तु हीनतया पृथगेकिकां धिगियतापि न तेऽङ्ग विगर्हणा ॥ नैषधीयचरितम् ४.९१ ॥ |
| उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके । प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥ रघुवंशम् ८.२७ ॥ |
| उपात्तवणे चरिते पिनाकिनः सबाष्पकण्ठस्खलितैः पदैरियम् । अनेकशः किंनरराजकन्यका वनान्तसंगीतसखीररोदयत् ॥ कुमारसंभवम् ५.५६ ॥ |
| उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् । श्रीर्गन्तुकामापि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ॥ रघुवंशम् ५.३८ ॥ |
| उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् । स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे॥ कुमारसंभवम् ७.४१॥ |
| उपादानार्पणद्वारे द्वे चान्ये इति षड् विधा । कुन्ता विशन्ति गङ्गायां घोषो निवसतीति च ॥ चन्द्रालोकः९.१३ ॥ |
| उपान्तयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि । केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ॥ रघुवंशम् ७.५० ॥ |
| उपान्तवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि । दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः ॥ रघुवंशम् १३.३० ॥ |
| उपायानां भावादविरलविनोदव्यतिकरै- र्विमर्दैर्वीराणां जनितजगदत्यद्भुतरसः । वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत् कटुस्तूष्णीं सह्यो निरवधिरयं तु प्रविलयः ॥<br><br>(उत्तररामचरितम् ३.४४) |
| उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः । काकी कनकसूत्रेण कृष्णसर्पमघातयत् ॥ नीतिसंग्रहस्य मित्र-१.१८७ ॥ |
| उपारताः पश्चिमरात्रिगोचरादपारयन्तः पतितुं जवेन गाम् । तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधरसः ॥ किरातार्जुनीयम् ४.१० ॥ |
| उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु बन्दिनाम् । पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ॥ नैषधीयचरितम् १.३४ ॥ |
| उपास्य सांध्यं विधिमन्तिमाशारागेण कान्ताधरचुम्बिचेताः । अवाप्तवान्सप्तमभूमिभागे भैमीधरं सौधमसौ धरेन्द्रः ॥ नैषधीयचरितम् २२.१ ॥ |
| उपास्यमानाविव शिक्षितुं ततो मृदुत्वमप्रौढमृणालनालया । विरेजतुर्माङ्गलिकेन संगतौ भुजौ सुदत्या वलयेन कम्बुनः ॥ नैषधीयचरितम् १५.४५ ॥ |
| उपाहितैर्वपुषि निवातवर्मभिः स्फुरन्मणिप्रसृतमरीचिसूचिभिः । निरन्तरं नरपतयो रणाजिरे रराजिरे शरनिकराचिता इव ॥ शिशुपालवधम्१७ .५१ ॥ |
| उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् । न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥ रघुवंशम् ३.६ ॥ |
| उपेत्यच स्वनगुरुपक्षमारुतं दिवस्त्विषा कपिशितदूरदिङ्मुखः । प्रकम्पितस्थिरतरयष्टि तत्क्षणं पतत्पतिः पदमधिकेतनं दधौ ॥ शिशुपालवधम् १७..२८ ॥ |
| उपेयिवांसि कर्तारः पुरीमाजातशास्त्रवीन् । राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥ शिशुपालवधम् २.११४ ॥ |
| उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषिताम् । कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चन्दनाः ॥ किरातार्जुनीयम् ८.१२ ॥ |
| उपेयुषो वर्त्म निरन्तराभिरसौ निरुच्छ्वासमनीकिनीभीः । रथस्य तस्यां पुरि दत्तचक्षुर्विद्वान् विदामास शनैर्न यातम् ॥ शिशुपालवधम् ३.३१ ॥ |
| उपैति सस्यं परिणामरम्यता नदीरनौद्धत्यमपङ्कता महीं । नवैर्गुणैः सम्प्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥ किरातार्जुनीयम् ४.२२ ॥ |
| उपैतुकामैस्तत्पारं निश्चितैर्योगिभिः परैः । देहत्यागकृतोद्योगैरदृश्यत परः पुमान् ॥ शिशुपालवधम् १९.८७ ॥ |
| उपैत्यनन्तद्युतिरप्यसंशयं विभिन्नमूलोऽनुदयाय संक्षयं । तथा हि तोयौघविभिन्नसंहतिः स हव्यवाहः प्रययौ पराभवं ॥ किरातार्जुनीयम् १६.६१ ॥ |

| |
|---|
| उपोढकल्याणफलोऽभिरक्षन्वीरव्रतं पुण्यरणाश्रमस्थः । जपोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य ॥ किरातार्जुनीयम् १७.५४ ॥ |
| उप्तित्सवोऽन्तर्नदभर्तुरुच्चकैर्गरीयसा निःश्वसितानिलेन । पयांसि भक्त्या गरूडध्वजस्य ध्वजानिवोच्चिक्षिपिरे फणीन्द्राः ॥ शिशुपालवधम्  ३.७६ ॥ |
| उभयं युगपन्मयोदितं त्वरया सान्त्वमथेतरच्च ते । प्रविभज्य पृथङ्मनीषया स्वगुणं यत्किल तत्करिष्यसि ॥ शिशुपालवधम् १६.४२ ॥ |
| उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम् । वलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डहरान्वयम् ॥ रघुवंशम् ८.३ ॥ |
| उभयोरपि पार्श्ववर्तिनां तुमु लेनार्तरवेण वेजिताः । विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः ॥ रघुवंशम् ८.३९ ॥ |
| उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशोभिनौ तौ । विस्पष्टमस्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलम्भात् ॥ रघुवंशम् १४.२ ॥ |
| उभौ यदि व्योम्नि पृथक् प्रवाहावाकाशगङ्गापयसः पतेताम् । तनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ शिशुपालवधम्  ३.८ ॥ |
| उमापतिं पाण्डुसुतप्रणुन्नाः शिलीमुखा न व्यथयांबभूवुः । अभ्युत्थितस्याद्रिपतेर्नितम्बं अर्कस्य पादा इव हैमनस्य ॥ किरातार्जुनीयम् १७.१२ ॥ |
| उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् । चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥ कुमारसंभवम् ३.६२ ॥ |
| उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरंदरौ । तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ॥ रघुवंशम् ३.२३ ॥ |
| उमास्तनोद्भेदमनुप्रवृद्धो मनोरथो यः प्रथमं बभूव । तमेव मेना दुहितुः कथञ्चिद्विवाहदीक्षातिलकं चकार॥ कुमारसंभवम् ७.२४॥ |
| उरगेन्द्रमूर्धरुहरत्नसन्निधेर्मुहुरुन्नतस्य रसितैः पयोमुचः । अभवन्यदङ्गणभुवः समुच्छ्वसन्नववालवायजमणिस्थलाङ्कुराः ॥ शिशुपालवधम् १३.५८ ॥ |
| उरसा विततेन पातितांसः स मयूराञ्चितमस्तकस्तदानीं । क्षणमालिखितो नु सौष्ठवेन स्थिरपूर्वापरमुष्टिराबभौ वा ॥ शिशुपालवधम् २०.२० ॥ |
| उरसि निहितस्तारो हारः कृता जघने घने कलकलवती काञ्ची पादौ क्वणन्मणिनूपुरौ । प्रियमभिसरस्येवं मुग्धे समाहतडिण्डिमा यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥ अमरुशतकम्-२८॥ |
| उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः । भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥ किरातार्जुनीयम् १८.५ ॥ |
| उरस्यपर्याप्तभागा प्रौढीभविष्यन्तमुदीक्षमाणा । संजातलज्जेव तमातपत्रच्छायाच्छलेनोपजुगूह लक्ष्मीः ॥ रघुवंशम् १८.४७ ॥ |
| उरु सत्त्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयं । शमिनोऽपि तस्य नवसंगमने विभुतानुषङ्गि भयमेति जनः ॥ किरातार्जुनीयम् ६.३५ ॥ |
| उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम् । त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ॥ नैषधीयचरितम् १.४८ ॥ |
| उर्वशी गुणवशीकृतविश्वा तत्क्षणस्तिमितभावनिभेन । शक्रसौहृदसमापनसीमस्तम्भकार्यमपुषद्वपुषैव ॥ नैषधीयचरितम् ५.५२ ॥ |
| उल्मुकेन द्रुमं प्राप्य संकुचत्पत्रसंपदं । तजः प्रकिरता दिक्षु सप्रतापमदीप्यत ॥ शिशुपालवधम् १९.८ ॥ |
| उल्लसत्तनुतां नीतेऽनन्ते पुलककण्टकैः । भीतया मानवत्यैव श्रियाश्लिष्टं हरिं स्तुमः ॥ चन्द्रालोकः४.२ ॥ |
| उल्लासोऽन्यमहिम्ना चेद्दोषो ह्यन्यत्र वर्ण्यते । तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम् ॥ चन्द्रालोकः ५.१०१ ॥ |
| उल्लास्य धातुस्तुलिता करेण श्रोणौ किमेषा स्तनयोर्गुरुर्वा । तेनान्तरालैस्त्रिभिरङ्गुलीनामुदीतमध्यत्रिवलीविलासा ॥ नैषधीयचरितम् १०.१२८ ॥ |
| उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबापि दृष्टिः । अश्मैव रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहर्षि रोम ॥ नैषधीयचरितम् ६.३४ ॥ |
| उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथादर्शि तथैव भैमी । तेनाभिलिख्योपहृतस्वहारा कस्या न दृष्टाजनि विस्मयाय ॥ नैषधीयचरितम् ६.३७ ॥ |
| उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम् । अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥ कुमारसंभवम् ५.७५ ॥ |
| उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् । अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥ रघुवंशम् ३.२५ ॥ |
| उवाच वाचं महितः स मत्पिता नितान्तवान्तोऽस्ति 'शिरोव्यथा 'हतः । ततोऽशनं वै भवता समं विभो!, न शक्यते तेन विधातुमन्ततः ॥ प्रतापविजयः-६८ ॥ |
| उवास वैदर्भगृहेषु पञ्चषा निशाः कृशाङ्गीं परिणीय तां नलः । अथ प्रतस्थे निषधान्सहानया रथेन वार्ष्णेयगृहीतरश्मिना ॥ नैषधीयचरितम् १६.११३ ॥ |
| उवाह यः सान्द्रतराङ्गकाननः स्वशौर्यसूर्योदयपर्वतव्रतम्। सनिर्झरः शाणनधौतधारया समूढसंध्यः क्षतशत्रुजासृजा ॥ नैषधीयचरितम् १६.२ ॥ |
| उषःकालो विना पूर्वां गोधूलिः पश्चिमां विना । विनोत्तरां निशीथः सन् याने याम्यां विनाऽभिजित् ॥ मुहूर्त.यात्राप्रकरणम् ५४॥ |
| उषसि स गजयूथकर्णतालैः पटुपटधवनिभिर्विनीतनिद्रः । अरमत मधुराणि तत्र शृण्वन्विहगविकूजितबन्दिमङ्गलानि ॥ रघुवंशम् ८.७१ ॥ |
| उष्णोष्णशीकरसृजः प्रबलोष्मणोऽन्तर्-उत्फुल्लनीलनलिनोदरतुल्यभासः । एकान्वशालशिरसो हरिचन्दनेषु नागान्बबन्धुरपारान्मनुजा निरासुः ॥ शिशुपालवधम् ५.४५ ॥ |
| ऊचिवानुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य । कीर्तिरेव भवतां प्रियदारा दाननीरझरमौक्तिकहारा ॥ नैषधीयचरितम् ५.१२८ ॥ |
| ऊचे पुनर्भगवती नृपमन्यमस्यै निर्दिश्य दृश्यतमतावमताश्विनेयम् । आलोक्यतामयमये कुलशीलशाली शालीनतानतमुदस्य निजास्यबिम्बम् ॥ नैषधीयचरितम् ११.३५ ॥ |
| ऊरुप्रकाण्डद्वितयेन तन्व्याः करः पराजीयत वारणीयः । युक्तं ह्रिया कुण्डलनच्छलेन गोपायति स्वं मुखपुष्करं सः ॥ नैषधीयचरितम् ७.९५ ॥ |
| ऊरुमूलचपलेक्षणमघ्नन्यैर्वतंसकुसुमैः प्रियमेताः । चक्रिरे सपदि तानि यथार्थं मन्मथस्य कुसुमायुधनाम ॥ शिशुपालवधम् १०.६७ ॥ |
| ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्लङ्घितमेघपङ्क्तिः । आयस्तसिंहाकृतिरुत्पपात प्राण्यन्तमिच्छन्निव जातवेदाः ॥ किरातार्जुनीयम् १६.५० ॥ |

| |
|---|
| ऊर्ध्वं धृतं व्योम सहस्ररश्मेर्दिवा सहस्रेण करैरिवासीत् । पतत्तदेवांशुमता विनेदं नेदिष्ठतामेति कुतस्तमिस्रम् ॥ नैषधीयचरितम् २२.३१ ॥ |
| ऊर्ध्वदिक्कदलनां द्विरकार्षीः किं तनुं हरिहरीभवनाय । किं च तिर्यगभिनो नृहरित्वे कः स्वतन्त्रमनु नन्वनुयोगः ॥ नैषधीयचरितम् २१.१०५ ॥ |
| ऊर्ध्वस्ते रदनच्छदः स्मरधनुर्बन्धूकमालामयं मौर्वी तत्र तवाधराधरतटाधःसीमलेखालता । एषा वागपि तावकी ननु धनुर्वेदः प्रिये मान्मथः सोऽयं कोणधनुष्मतीभिरुचितं वीणाभिरभ्यस्यते ॥ नैषधीयचरितम् २१.१५८ ॥ |
| ऊर्ध्वार्पितन्युब्जकटाहकल्पे यद्व्योम्नि दीपेन दिनाधिपेन । न्यधायि तद्भूममिलद्गुरुत्वं भूमौ तमः कज्जलमस्खलत्किम् ॥ नैषधीयचरितम् २२.३२ ॥ |
| ऋक्षाणि क्रूरविद्धानि क्रूरभुक्तादिकानि च । भुक्त्वा चन्द्रेण मुक्तानि शुभार्हाणि प्रचक्षते ॥ मुहूर्त.विवाहप्रकरणम् ५८॥ |
| ऋग्वेदं सामवेदं गणितमथ कलां वैशिकिं हस्तिशिक्षां ज्ञात्वा शर्वप्रसादाद्व्यपगततिमिरे चक्षुषी चोपलभ्य । राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः ॥ (मृच्छकटिकम् १.४) |
| ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः । मधुना सह सस्मितां कथां नयनोपान्तवि लोकितं च यत् ॥ कुमारसंभवम् ४.२३ ॥ |
| ऋजुताफलयोगशुद्धिभाजां गुरुपक्षाश्रयिणां शिलीमुखानां । गुणिना नतिमागतेन सन्धिः सह चापेन समञ्जसो बभूव ॥ शिशुपालवधम् २०.९ ॥ |
| ऋजुत्वमौनश्रुतिपारगामिता यदीयमेतत्परमेव हिंसितुम् । अतीव विश्वासविधायि चेष्टितं बहुर्महानस्य स दाम्भिकः ॥ नैषधीयचरितम् १२.४४ ॥ |
| ऋजुदृशः कथयन्ति पुराविदो मधुभिदं खलु राहुशिरश्छिदम् । विरहिमूर्धभिदं निगदन्ति न क्व न शशी यदि तज्जठरानलः ॥ नैषधीयचरितम् ४.६६ ॥ |
| ऋज्वीर्दधानैरवतत्य कन्धराश्चलावचूडाः कलघर्घरारवैः । भूमिर्महत्यप्यविलम्बितक्रमं क्रमेलकैस्तत्क्षणमेव चिच्छिदे ॥ शिशुपालवधम् १२.१८ ॥ |
| ऋणीकृता किं हरिनीभिरासीदस्याः सकाशान्नयनद्वयश्रीः । भूयोगुणेयं सकला बलाद्यत्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः ॥ नैषधीयचरितम् ७.३३ ॥ |
| ऋतुमत्याः सूतिकायाः सूनोश्चौलादि नाऽऽचरेत् । ज्येष्ठापत्यस्य न ज्येष्ठे कैश्चिन्मार्गेऽपि नेष्यते ॥ मुहूर्त.संस्कारप्रकरणम् ३३॥ |
| ऋद्धापणं राजपथं स पश्यन्विगाह्यमानां सरयूं च नौभिः । विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे ॥ रघुवंशम् १४.३० ॥ |
| ऋषिदेवगणस्वधाभुजां श्रुतयागप्रस्वैः स पार्थिवः । अनृणत्वमुपेयिवान्बभौ परिधेर्मुक्त इवोष्णदीधितिः ॥ रघुवंशम् ८.३० ॥ |
| ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृतां । चरतस्तपस्तव वनेषु सदा न वयं निरूपयितुमस्य गतिं ॥ किरातार्जुनीयम् ६.३६ ॥ |
| ऋष्यशृङ्गादयस्तस्य सन्तः संतानकाङ्क्षिणः । आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥ रघुवंशम् १०.४ ॥ |
| एक एव वसु यद्ददौ नृपस्तत्समापकमतर्क्यत क्रतोः । त्यागशालिनि तपःसुते ययुः सर्वपार्थिवधनान्यपि क्षयं ॥ शिशुपालवधम् १४.४० ॥ |
| एक एव सुसखैष सुन्वतां शौरिरित्यभिनयादिवोच्चकैः । यूपरूपकमनीनमद्भुजं भूश्चषालतुलिताङ्गुलीयकं ॥ शिशुपालवधम् १४.५२ ॥ |
| एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः । शरीरेण समं नाशं सर्वमन्यधि गच्छति ॥ नीतिसंग्रहस्य मित्र-१.६६ ॥ |
| एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम् । ब्रूत किं सेव्यतां चन्द्रमुखीचन्द्रकिरीटयोः ॥ चन्द्रालोकः२.३३ ॥ |
| एकः कारणतस्तां तामवस्थां प्रतिपद्यसे । नानात्वं रागसंयोगात्स्फटिकस्यऽएव ते स्मृतम् ॥ रघुवंशम् १०.१९ ॥ |
| एकः पिपासुः प्रवहानिलस्य च्युतो रथाद्वाहनरङ्कुरेषः । अस्त्यम्बरेऽनम्बुनि लेलिहास्यः पिबन्नमुष्यामृतबिन्दुवृन्दम् ॥ नैषधीयचरितम् २२.७७ ॥ |
| एकः प्रभावमयमेति परेतराजौ तज्जीवितेशधियमत्र निधत्स्व मुग्धे । भूतेषु यस्य खलु भूरियमस्य वश्यभावं समाश्रयति दस्रसहोदरस्य ॥ नैषधीयचरितम् १३.१९ ॥ |
| एकः सुधांशुर्न कथंचन स्यात्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः ॥ नैषधीयचरितम् ३.११९ ॥ |
| एकचित्ततितिरद्वयवादिन्नत्रयीपरिचितोऽथ बुधस्त्वम् । पाहि मां विधुतकोटिचतुष्कः पञ्चबाणविजयी षडभिज्ञः ॥ नैषधीयचरितम् २१.८८ ॥ |
| एकतामिव गतस्य विवेकः कस्यचिन्न महतोऽप्युपलेभे । भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥ किरातार्जुनीयम् ९.१२ ॥ |
| एकत्र स्फटिकतटांशुभिन्ननीरा नीलाश्मद्युतिभिदुराम्भसोऽपरत्र । कालिन्दीजलजनितश्रियः श्रयन्ते वैदग्धीमिह सरितः सुरापगायाः ॥ शिशुपालवधम् ४.२६॥ |
| एकत्रासनसंस्थितिः परिहता प्रतुद्गमाद् दूरतस्ताम्बूलानयनच्छलेन रभसाशेल्षोऽपि संविघ्नितः । आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥ अमरुशतकम्-१५॥ |
| एकस्मिञ्शयने पराङ्मुखतया वीतोत्तरं ताम्यतोरन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम् । दम्पत्योः शनकैरपाङ्गवलनान् मिश्रीभवच्चक्षुषोर्भग्नो मानकलिः सहासरभसं व्यासक्तकण्ठग्रहम् ॥ अमरुशतकम्-१९॥ |
| एकस्मिञ्शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं शयितया चाटूनि कुर्वन्नपि । आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात्मा भूस्सुप्त इवैष मन्दवलितग्रीवं पुनर्वीक्षितः ॥ अमरुशतकम्-८३॥ |
| एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य । तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ नीतिसंग्रहस्य मित्र-१.१९३ ॥ |
| एकस्यास्तपनकरैः करालितया बिभ्राणः सपदि सितोष्णावरणत्वम् । सेवायै वदनसरोजनिर्जितश्रीरागस्य प्रियमिव चन्द्रमाश्चकार ॥ शिशुपालवधम् ८.४ ॥ |

| |
|---|
| एकाकिभावेन पुरा पुरारिर्यः पञ्चतां पञ्चशरं निनाय । तद्भीसमाधानममुष्य काय निकायलीलाः किममी युवानः ॥ नैषधीयचरितम् १०.६१ ॥ |
| एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः । कदा शम्भुर्भविष्यामि कर्मनिर्मूलनक्ष्मः ॥ पुरुषार्थोपदेशः-89॥ |
| एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः । कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ वैराग्यशतकम् ८९ ॥ |
| एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च । अल्पस्य हेतोर्बहु हातुं इच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥ रघुवंशम् २.४७ ॥ |
| एकादशैकादशरुद्रमौलीनस्तं यतो यान्ति कलाः किमस्य । प्रविश्य शेषास्तु भवन्ति पञ्चपञ्चेषुतूणीमिषवोऽर्धचन्द्राः ॥ नैषधीयचरितम् २२.११५ ॥ |
| एकार्गलोपग्रहवातलत्ताजामित्रकर्तर्युदयास्तदोषाः । नश्यन्ति चन्द्रार्कबलोपपन्ने लग्ने यथार्काभ्युदये तु दोषा ॥ मुहूर्त.विवाहप्रकरणम् ६८॥ |
| एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये, सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये । तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये, ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ नीतिशतकम्७५ ॥ |
| एकेन पर्यक्षिपदात्मनाद्रिं चक्षुर्मुरारेरभवत्परेण । तैर्द्वादशात्मा दशभिस्तु शेषैर्दिशो दशालोकत लोकपूर्णाः ॥ नैषधीयचरितम् १०.५३ ॥ |
| एकेनापि हि शूरेण पादाक्रान्तं महीतलम् । क्रियते भास्करेणैव स्फारस्फुरिततेजसा ॥ नीतिशतकम् १०७ ॥ |
| एकेषुणा सङ्घतिथान्द्विषो भिन्दन्द्रुमानिव । स जन्मान्तररामस्य चक्रे सदृशमात्मनः ॥ शिशुपालवधम् १९.१०७ ॥ |
| एकैकमद्भुतगुणं धुतदूषणं च हित्वान्यमन्यमुपगत्य परित्यजन्तीम् । एनां जगाद जगदञ्चितपादपद्मा पद्मामिवाच्युतभुजान्तरविच्युतां सा ॥ नैषधीयचरितम् ११.५७ ॥ |
| एकैकमेते परिरभ्य पीनस्तनोपपीडं त्वयि संदिशन्ति । त्वं मूर्च्छतां नः स्मरभिल्लशल्यैर्मुदे विशल्यौषधिवल्लिरेधि ॥ नैषधीयचरितम् ८.९ ॥ |
| एकैकमैक्षत मुहुर्महतादरेण भेदं विवेद न च पञ्चसु कंचिदेषा । शङ्काशतं वितरता हरता पुनस्तदुन्मादिनेव मनसेयमिदं तदाह ॥ नैषधीयचरितम् १३.४१ ॥ |
| एकैकवृत्तेः प्रतिलोकपालं पतिव्रतात्वं जगृहुर्दिशां याः । वेद स्म गाथा मिलितास्तदासावाशा इवैकस्य नलस्य वश्याः ॥ नैषधीयचरितम् १४.११ ॥ |
| एकैव तारा मुनिलोचनस्य जाता किलैतज्जनकस्य तस्य । ताताधिका संपदभूदियं तु सप्तान्विता विंशतिरस्य यत्ताः ॥ नैषधीयचरितम् २२.१२९ ॥ |
| एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् । विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ॥ कुमारसंभवम् ७.४४॥ |
| एकैव सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव । आसन्नपाणिग्रहणेति पित्रोरुमा विशेषोच्छ्वसितं बभूव॥ कुमारसंभवम् ७.४॥ |
| एको देवः केशवो वा शिवो वा, ह्येकं मित्रं भूपतिर्वा यतिर्वा । एको वासः पत्तने वा वने वा ह्येका भार्या सुन्दरी वा दरी वा ॥ नीतिशतकम्६९ ॥ |
| एको नलः किमयमन्यतमः किमैलः कामोऽपरः किमु किमु द्वयमाश्विनेयौ । किं रूपधेयभरसीमतया समेषु तेष्वेव नेह नलमोहमहं वहे वा ॥ नैषधीयचरितम् १३.४४ ॥ |
| एको रसः करुण एव निमित्तभेदाद्भिन्नः पृथक्पृथगिव श्रयते विवर्तान् । आवर्तबुद्बुदतरङ्गमयान्विकारानम्भो यथा सलिलमेव हि तत्समस्तम् ॥ (उत्तररामचरितम् ३.४७) |
| एको रागिषु राजते प्रियतमा-देहार्ध-हारी हरो नीरागेषु जनो विमुक्त-ललनासङ्गो न यस्मात्परः। दुर्वार-स्मर-बाण-पन्नग-विष-व्याबिद्ध-मुग्धो जनः शेषः काम-विडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः॥॥ वैराग्यशतकम् १७ ॥ |
| एकोनितेष्टर्क्षहताद्वितिथ्यो रूपोनितेष्टायहतेन्दुनागैः । युक्ता घनैश्चापि युता विभक्ता भूपाश्विभिः शेषमितो हि पिण्डः ॥ मुहूर्त.वास्तुप्रकरणम् ३॥ |
| एणः स्मरेणाङ्कमयः सपत्राकृतो भवद्भ्रूयुगधन्वना यः । मुखे तवेन्दौ लसता स तारा पुष्पालिबाणानुगतो गतोऽयम् ॥ नैषधीयचरितम् २२.२५ ॥ |
| एतं नलं तं दमयन्ति पश्य त्यजार्तिमित्या लिकुलप्रबोधान् । श्रुत्वा स नारीकरवर्तिसारीमुखात्स्वमाशङ्कत यत्र दृष्टम् ॥ नैषधीयचरितम् ६.६ ॥ |
| एतत्कीर्तिविवर्तधौतनिखिलत्रैलोक्यनिर्वासितैर्विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि । जज्ञे कीर्तिमयादहो भयभरैरस्मादकीर्तिः पुनः सायन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिम् ॥ नैषधीयचरितम् १२.१०४ ॥ |
| एतत्कुचस्पर्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम् । तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः ॥ नैषधीयचरितम् ७.७५ ॥ |
| एतत्कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या इष्टान्देशान्विचर जलद प्रावृषा संभृतश्रीर्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ मेघदूतम्, उत्तरमेघः ४८ ॥ |
| एतत्तरुस्तरुणि राजति राजजम्बूः स्थूलोपलानिव फलानि विमृश्य यस्याः । सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्तियूथानि केन तरुमारुरुहुः पथेति ॥ नैषधीयचरितम् ११.८५ ॥ |
| एतत्तु मां दहति यद्गृहमस्मदीयं क्षीणार्थमित्यतिथयः परिवर्जयन्ति। संशुष्कसान्द्रमदलेखमिव भ्रमन्तः कालात्यये मधुकराः करिणः कपोलम्॥ (मृच्छकटिकम् १.१२) |
| एतत्पुनर्वनमहो कथमद्य दृष्टं यस्मिन्नभूम चिरमेव पुरा वसन्तः । आरण्यकाश्च गृहिणश्च रताः स्वधर्मे सांसारिकेषु च सुखेषु वयं रसज्ञा ॥ (उत्तररामचरितम् २.२२) |
| एतत्पुरःपठदपश्रमबन्दिवृन्दवाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन् । उत्पत्तुमस्ति पदमेव न मत्पदानामर्थोऽपि नाक्रथपुनरुक्तिषु पातुकानाम् ॥ नैषधीयचरितम् ११.३६ ॥ |

| |
|---|
| एतद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमज्जत्तनुः फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्धिभिः । दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमिव्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥ नैषधीयचरितम् १२.८५ ॥ |
| एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् । नवं यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥ रघुवंशम् १३.२६ ॥ |
| एतद्गुणश्रवणकालविजृम्भमाणतल्लोचनाञ्चलनिकोचनसूचितस्य । भावस्य चक्ररुचितं शिबिकाभृतस्ते तामेकतः क्षितिपतेरपरं नयन्तः ॥ नैषधीयचरितम् ११.७१ ॥ |
| एतद्दत्तासिघातस्रवदसृगसुहृद्वंशसार्द्रेन्धनैतद्दोरुद्दामप्रतापज्वलदनलमिलद्भूमधूमभ्रमाय । एतद्दिग्जैत्रयात्रासमसमरभरं पश्यतः कस्य नासीदेतन्नासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु ॥ नैषधीयचरितम् १२.७३ ॥ |
| एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः । पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामरश्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम् ॥ नैषधीयचरितम् १२.२ ॥ |
| एतद्बलैः क्षणिकतामपि भूखुराग्रस्पर्शायुषां रयरसादसमापयद्भिः । दृक्पेयकेवलनभःक्रमणप्रवाहैर्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥ नैषधीयचरितम् ११.१२७ ॥ |
| एतद्भीतारिनारी गिरिबिलविगलद्वासरा निःसरन्ती स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रा । आक्रन्ददभूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्बप्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन्न्यश्वसीच्च ॥ नैषधीयचरितम् १२.२८ ॥ |
| एतद्भुजारणिसमुद्भवविक्रमाग्निचिह्नं धनुर्गुणकिणः खलु धूमलेखा । जातं ययारिपरिषन्मशकाकृथयाश्रुविश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥ नैषधीयचरितम् ११.१०५ ॥ |
| एतद्यशःक्षीरधिपूरगाहि पतत्यगाधे वचनं कवीनाम् । एतद्गुणानां गणनाङ्कपातः प्रत्यर्थिकीर्तीः खटिकाः क्षिणोति ॥ नैषधीयचरितम् १२.९ ॥ |
| एतद्यशो नवनवं खलु हंसवेषं वेशन्तसंतरणदूरगमक्रमेण । अभ्यासमर्जयति संतरितुं समुद्रान्गन्तुं च निःश्रममितः सकलान्दिगन्तान् ॥ नैषधीयचरितम् ११.५४ ॥ |
| एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा दुग्धीकृते तदुभयव्यतिभेदमुग्धाः । क्षीरे पयस्यपि पदे द्वयवाचिभूयं नानार्थकोषविषयोऽद्य मृषोद्यमस्तु ॥ नैषधीयचरितम् ११.७८ ॥ |
| एतद्यशोभिरमलानि कुलानि भासां तथ्यं तुषारकिरणस्य तृणीकृतानि । स्थाने ततो वसति तत्र सुधाम्बुसिन्धौ रङ्कुस्तदङ्कुरवनीकवलाभिलाषात् ॥ नैषधीयचरितम् ११.९७ ॥ |
| एतद्वरं स्यामिति राजकेन मनोरथातिथ्यमवापिताय । सखीमुखायोत्सृजतीमपाङ्गात्कर्पूरकस्तूरिकयोः प्रवाहम् ॥ नैषधीयचरितम् १०.१०२ ॥ |
| एतन्मदीयमतिवञ्चकपञ्चकस्थे नाथे कथं नु मनुजस्य चकास्तु चिह्नम् । लक्ष्माणि तानि किममी न वहन्ति हन्त बर्हिर्मुखा धृतरजस्तनुतामुखानि ॥ नैषधीयचरितम् १३.४७ ॥ |
| एतन्मुखा विबुधसंसदसावशेषा माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि । एनं महस्विनमुपेहि सदारुणोच्चैर्येनामुना पितृमुखि ध्रियते करश्रीः ॥ नैषधीयचरितम् १३.१२ ॥ |
| एतन्मुनेर्मानिनि शातकर्णेः पञ्चाप्सरो नाम विहारवारि । आभाति पर्यन्तवनं विदूरान्मेघान्तरालक्ष्यमिवेन्दुबिम्बम्॥ रघुवंशम् १३.३८ ॥ |
| एतस्माद्विरमेन्द्रियार्थ-गहनादायासकादाश्रय श्रेयो-मार्गमशेष-दुःख-शमन-व्यापार-दक्षं क्षणात्। स्वात्मीभावमुपैहि सन्त्यज निजां कल्लोल-लोलं गतिं मा भूयो भज भङ्गुरां भव-रतिं चेतः प्रसीदाधुना॥॥ वैराग्यशतकम् ६४ ॥ |
| एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनादसितनयने मय्यविश्वासिनी भूः स्नेहानाहुः किमपि विरहह्रासिनस्ते ह्यभोगादिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ मेघदूतम्, उत्तरमेघः ४६ ॥ |
| एतस्मिन्नधिकपयःश्रियं वहन्त्यः संक्षोभं पवनभुवा जवेन नीताः । वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यं दधति गिरां महासरस्यः ॥ शिशुपालवधम् ४.५९॥ |
| एतस्य सावनिभुजः कुलराजधानी काशी भवोत्तरणधर्मतरिः स्मरारेः । यामागता दुरितपूरितचेतसोऽपि पापं निरस्य चिरजं विरजीभवन्ति ॥ नैषधीयचरितम् ११.११४ ॥ |
| एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवन्त्यः । गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात्प्लवन्ते ॥ रघुवंशम् १६.६० ॥ |
| एतां कुमारनिपुणां पुनरप्यभाणीद्वाणी सरोजमुखि निर्भरमारभस्व । अस्मिन्नसंकुचितपङ्कजसख्यशिक्षानिष्णातदृष्टिपरिरम्भविजृम्भितानि ॥ नैषधीयचरितम् ११.१०२ ॥ |
| एतां धरामिव सरिच्छविहारिहारामुल्लासितस्वमिदमाननचन्द्रभासा । बिभ्रद्विभासि पयसामिव राशिरन्तर्वेदिश्रियं जनमनः प्रियमध्यदेशाम् ॥ नैषधीयचरितम् २१.१३४ ॥ |
| एताः करोत्पीडितवारिधारा दर्पात्सखीभिर्वदनेषु सिक्ताः । वक्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान्वारिलवान्वमन्ति ॥ रघुवंशम् १६.६६ ॥ |
| एतादृशीमथ विलोक्य सरस्वती तां संदेहचित्रभयचित्रितचित्तवृत्तिम् । देवस्य सूनुमरविन्दविकासिरश्मेरुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे ॥ नैषधीयचरितम् १३.१५ ॥ |
| एतादृशोरम्बुरुहैर्विशेषं भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ । इतीव धाताकृत तारकालिस्त्रीपुंसमाध्यस्थ्यमिहाक्षियुग्मे ॥ नैषधीयचरितम् १०.१२१ ॥ |
| एतावदुक्तवति दाशरथौ तदीयामिच्छां विमानमधिदेवतया विदित्वा । द्योतिष्पथादवततार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥ रघुवंशम् १३.६८ ॥ |
| एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य । किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त ॥ रघुवंशम् ५.१८ ॥ |
| एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन । शिलोच्चयोऽपि क्षितिपालं उच्चैः प्रीत्या तमेवार्थमभाषतेव ॥ रघुवंशम् २.५१ ॥ |
| एताश्चलद्वलयसंहतिमेखलोत्थ झङ्कारानूपुररवाहृतराजहंस्यः। कुर्वन्ति कस्य मनसो विवशं तरुणयो वित्रस्तमुग्धहरिणीसदृशाक्षिपातैः ॥ पुरुषार्थोपदेशः-31॥ |
| एते त एव गिरयो विरुवन्मयूरा- स्तान्येव मत्तहरिणानि वनस्थलानि । आमञ्जुवञ्जुललतानि च तान्यमूनि नीरन्ध्रनीपनिचुलानि सरित्तटानि ॥ (उत्तररामचरितम् २.२३) |

| |
|---|
| एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः । अन्योन्यप्रतिघातशङ्कुलचलत्कल्लोलकोलाहलै- रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥ (उत्तररामचरितम् २.३०) |
| एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः । प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ॥ रघुवंशम् १३.१७ ॥ |
| एतेन ते विरहपावकमेत्य तावत्कामं स्वनाम कलितान्वयमन्वभावि । अङ्गीकरोषि यदि तत्तव नन्दनाद्यैर्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥ नैषधीयचरितम् ११.४५ ॥ |
| एतेन ते स्तनयुगेन सुरेभकुम्भौ पाणिद्वयेन दिविषद्द्रुमपल्लवानि । आस्येन स स्मरतु नीरधिमन्थनोत्थं स्वच्छन्दमिन्दुमपि सुन्दरि मन्दराद्रिः ॥ नैषधीयचरितम् ११.६३ ॥ |
| एतेन संमुखमिलत्करिकुम्भमुक्ताः कौक्षेयकाभिहतिभिर्विबभुर्विमुक्ताः । एतद्भुजोष्मभृशनिःसहया विकीर्णाः प्रस्वेदबिन्दव इवारिनरेन्द्रलक्ष्म्या ॥ नैषधीयचरितम् ११.९९ ॥ |
| एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि । अश्वैरस्वैरवेगैः कृतखुरखुरलीमङ्क्षुविक्षुद्यमानक्ष्मापृष्ठोत्तिष्ठदन्धंकरणरणधुरारेणुधारान्धकारात् ॥ नैषधीयचरितम् १२.१ ॥ |
| एनं स बिभ्रद्विधुमुत्तमाङ्गे गिरीन्द्रपुत्रीपतिरोषधीशम् । अश्नाति घोरं विषमब्धिजन्म धत्ते भुजङ्गं च विमुक्तशङ्कः ॥ नैषधीयचरितम् २२.११९ ॥ |
| एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षणीयं द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा क्षामच्छायं भवनमधुना मद्वियोगेन नूनं सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ मेघदूतम्, उत्तरमेघः १४ ॥ |
| एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वाङ्कमधूकमाला । ऋजुप्रणामक्रियैव तन्वी प्रत्यादिदेशैनमभाषमाणा ॥ रघुवंशम् ६.२५ ॥ |
| एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु । एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ॥ रघुवंशम् ५.६० ॥ |
| एवं प्रतापमपि वीक्ष्य रणे स-तापं, टङ्कारितं प्रतिविषाय महोग्रचापम् । राणा शिरो-मुकुटमात्म-गतं च 'झाला माना' विधाय यवनाऽऽहनने प्रसक्तः ॥ प्रतापविजयः-१५० ॥ |
| एवं प्रतिद्वन्द्विषु तस्य कीर्तिं मौलीन्दुलेखाविशदां विधास्यन् । इयेष पर्यायजयावसादां रणक्रियां शम्भुरनुक्रमेण ॥ किरातार्जुनीयम् १७.१८ ॥ |
| एवं महासमर- कर्म्मणि जायमाने, मानेरितं युधि सलीममलं स वीक्ष्य । सद्यः सचेतक गतिः सविधे तदीये, सैन्यावलीं नृपतिरुल्ललयाञ्चकार ॥ प्रतापविजयः- १४३ ॥ |
| एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः । यच्चाशीः कपटादवादि सदृशी स्यात्तत्र या सान्त्वना तन्मत्वालिजनो मनोब्धिमतनोदानन्दमन्दाक्षयोः ॥ नैषधीयचरितम् ४.१२३ ॥ |
| एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तम् । शिल्पज्ञदैवज्ञविधिज्ञपौरान् राजार्चयेद्भूमिहिरण्यवस्त्रैः ॥ मुहूर्त.गृहप्रवेशप्रकरणम् ७॥ |
| एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोऽपि तत्र सः । अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत ॥ रघुवंशम् ११.५७ ॥ |
| एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम् । अर्थिदुर्लभमवाप्य सहर्षान्याच्यमानमुखमुल्लसितश्रि ॥ नैषधीयचरितम् ५.९३ ॥ |
| एवमाप्तवचनात्स पौरुषं काकपक्षकधरेऽपि राघवे । श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि ॥ रघुवंशम् ११.४२ ॥ |
| एवमालि निगृहीतसाध्वसं शंकरो रहसि सेव्यतामिति । सा सखीभिरुपदिष्टमाकुला नास्मरत्प्रमुखवर्तिनी प्रिये॥ कुमारसंभवम् ७.५॥ |
| एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः। शैलराजभवने सहोमया मासमात्रमवसद् वृषध्वजः॥ कुमारसंभवम् ७.२०॥ |
| एवमिन्द्रियसुखानि निर्विशन्नन्यकार्यविमुखः स पार्थिवः । आत्मलक्षणनिवेदितानृतूनत्यवाहयदनङ्गवाहितः ॥ रघुवंशम् १९.४७ ॥ |
| एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा । उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥ नैषधीयचरितम् ५.३७ ॥ |
| एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः । तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् ॥ रघुवंशम् ११.७९ ॥ |
| एवमुक्तवति वीतविशङ्के वीरसेनतनये विनयेन । वक्रभावविषमामथ शक्रः कार्यकैतवगुरुर्गिरमूचे ॥ नैषधीयचरितम् ५.९८ ॥ |
| एष दाशरथिभूयमेत्य च ध्वंसितोद्धतदशाननामपि । राक्षसीमकृत रक्षितप्रजस्तेजसाधिकविभीषणां पुरीं ॥ शिशुपालवधम् १४.८१ ॥ |
| एष नैषाध स दण्डभृदेष ज्वालजालजटिलः स हुताशः । यादसां स पतिरेष च शेषं शासितारमधिगच्छ सुराणाम् ॥ नैषधीयचरितम् ५.७६ ॥ |
| एष प्रतापनिधिरुद्गतिमान्सदाऽयं किं नाम् नार्जितमनेन धनंजयेन । हेम प्रभूतमधिगच्छ शुचेरमुष्मानास्येव कस्यचन भास्वररूपसंपत् ॥ नैषधीयचरितम् १३.१ ॥ |
| एषा त्वया पेशलमध्ययापि घटाम्बुसंवर्धितबालचूता । आह्लादयत्युन्मुखकृष्णसारा दृष्टा चिरात्पञ्चवटी मनो मे ॥ रघुवंशम् १३.३४ ॥ |
| एषा नाणकमोषिकामकशिका मत्स्याशिका लासिका निर्नासा कुलनाशिका अवशिका कामस्य मञ्जूषिका। एषा वेशवधूः सुवेशनिलया वेशाङ्गना वेशिका एतान्यस्या दश नामकानि मया कृतान्यद्यापि मां नेच्छति॥ (मृच्छकटिकम् १.२३) |
| एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी । मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥ रघुवंशम् १३.४८ ॥ |
| एषा रतिः स्फुरति चेतसि कस्य यस्याः सूते रतिं द्युतिरथ त्वयि वा तनोति । त्रैयक्षवीक्षणखिलीकृतनिर्जरत्वसिद्धायुरध्वमकरध्वजसंशयं कः ॥ नैषधीयचरितम् २१.१३३ ॥ |

| |
|---|
| एषां गिरेः सकलरत्नफलस्तरुः स प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः । मुक्ताफलं फलनसान्वयनाम तन्वन्नाभाति बिन्दुभिरिव च्छुरितः पयोधेः ॥ नैषधीयचरितम् ११.१ ॥ |
| एषां त्वदीक्षणरसादनिमेषतैषा स्वाभाविकानिमिषतामिलिता यथाभूत् । आस्ये तथैव तव नन्वधरोपभोगैर्मुग्धे विधावमृतपानमपि द्विधाष्तु ॥ नैषधीयचरितम् ११.९ ॥ |
| एषामकृत्वा चरणप्रणाममेषामनुज्ञामनवाप्य सम्यक् । सुपर्ववैरे तव वैरसेनिं वरीतुमीहा कथमौचितीयम् ॥ नैषधीयचरितम् १४.४१ ॥ |
| एषुत्रयेणैव जगत्त्रयस्य विनिर्जयात्पुष्पमयाशुगेन । शेषा द्विबाणी सफलीकृतेयं प्रियादृगम्भोजपदेऽभिषिच्य ॥ नैषधीयचरितम् ७.२७ ॥ |
| एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावम् । सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥ रघुवंशम् १३.४३ ॥ |
| एष्यन्ति यावद्गणनाद्दिगन्तान्नृपाः स्मराताः शरणे प्रवेष्टुम् ।इमे पदाब्जे विधिनापि सृष्टास्तावत्य एवाङ्गुलयोऽत्र लेखाः ॥ नैषधीयचरितम् ७.१०५ ॥ |
| ऐरावतास्फालनविश्लथं यः संघट्टयन्नङ्गदमङ्गदेन । उपेयुशः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोऽधितष्ठौ ॥ रघुवंशम् ६.७३ ॥ |
| ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः । अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ नीतिशतकम्८३ ॥ |
| ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वाऽतिभूयसः । रिपुं हत्वा यशः कृत्वा त्वदसिः कोशमाविशत् ॥ चन्द्रालोकः४.७ ॥ |
| ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः । यद्विभुः शशिमयूखसखः सन्नाददे विजयि चापमनङ्गः ॥ किरातार्जुनीयम् ९.३३ ॥ |
| ओजस्विवर्णोज्वलवृत्तशालिनः प्रसादिनोऽनुज्झित गोत्रसंविदः । श्लोकानुपेन्द्रस्य पुरः स्म भूयसो गुणान्समुद्दिश्य पठन्ति वन्दिनः ॥ शिशुपालवधम् १२.३५ ॥ |
| ओजो महौजाः कृत्वाधस्तत्क्षणादुत्तमौजसः । कुर्वन्नाजावमुख्यत्वमनमन्नाम मुख्यतां ॥ शिशुपालवधम् १९.१६ ॥ |
| ओजोभाजां यद्रणे संस्थितानामादत्तीव्रं सार्धमङ्गेन नूनं । ज्वालाव्याजादुद्वमन्ती तदन्तस्तेजस्तारं दीप्तजिह्वा ववाशे ॥ शिशुपालवधम् १८.७५ ॥ |
| ओमित्युक्तवतो थ शार्ङ्गिण इति व्याहृत्य वाचं नभ- स्तस्मिन्नुत्पतितं पुरः सुरमुनाविन्दोः श्रियं बिभ्रति । शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति व्योम्नीव भृकुटिच्छलेन वदने केतुश्चकारास्पदम् ॥ शिशुपालवधम्  १.१.७५ ॥ |
| ओषामासे मत्सरोत्पातवाताश्लिष्यद्दन्तक्ष्मारुहां घर्षणोत्थैः । योगान्तैर्वा वह्निभिर्वारणानामुच्चैर्मूर्धव्योम्नि नक्षत्रमाला ॥ शिशुपालवधम् १८.३५ ॥ |
| ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानां । फुल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ किरातार्जुनीयम् ९.५७ ॥ |
| औज्झि प्रियाङ्गैर्घृणयैव रूक्षा न वारिदुर्गात्तु वराटकस्य । न कण्टकैरावरणाच्च कान्तिर्धूलीभृता काञ्चनकेतकस्य ॥ नैषधीयचरितम् ७.१८ ॥ |
| औदास्यसंविदवलम्बितशून्यमुद्रामस्मिन्दृशोर्निपतितामवगम्य भैम्याः । स्वेनैव जन्यजनतान्यमजीगमत्तां सुज्ञं प्रतीङ्गितविभावनमेव वाचः ॥ नैषधीयचरितम् ११.१०१ ॥ |
| औरसं कृतसम्बन्धं तथा वंशक्रमागतम् । रक्षकं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम्  ॥ नीतिसंग्रहस्य मित्र-१.१८५ ॥ |
| औषसातपभयादपलीनं वासरच्छविविरामपटीयः । संनिपत्य शनकैरिव निम्नादन्धकारं उदवाप समानि ॥ किरातार्जुनीयम् ९.११ ॥ |